COMPLETE SANSKRIT WORKS ON JAGANNATHA CULTURE

(VOL - 1)

Edited By
PROF. HAREKRISHNA SATAPATHY

Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Tirupati, A.P.
2006



Complete Sanskrit Works on Jagannath Culture (Vol. - I)

(The work has been prepared under U.G.C.sponsored Major Research Project entitled "A Critical Survey of Sanskrit Works on Jagannath Culture")

Year of Publication : 2006

© Rashtriya Sanskrit Vidyapeetha, Tirupati, A.P.

Copies : 1000

Edited by -

PROF. HAREKRISHNA SATAPATHY

Published by -

Orissa Chair,

Rashtriya Sanskrit Vidyapeetha (Deemed Univeristy)

Tirupati, Andhra Pradesh.

Under Centre of Excellence in Traditional Sastras

Co-Ordinator -

PROF. S. SUDARSANA SARMA

Price -



RATHA YATRA OF LORD JAGANNATH, BALABHADRA & SUBHADRA

FOREWORD

It is a coincidence that the person, who once prepared this volume and approached the authorities of the Rashtriya Sanskrit Vidyapeeth, Tirupati for its publication in the capacity of Principal Investigator, Major Research Project entitled ***"A critical survey of complete sanskrit works on Jagannath culture"*** sponsored by the U.G.C., New Delhi; is now circumstanced to write a foreword to the said volume in the capacity of the Vice-Chancellor of the Vidyapeeth. This has been possible because of the divine blessings and desire of Lord Jagannath.

Rashtriya Sanskrit Vidyapeeth, Tirupati has been doing a lot of works in the field of Sanskrit and on some interdisciplinary subjects since last four and half decades to preserve and promote the traditional resources of this country through teaching and publication for which it has been accreditated with A^+ Gradae by the NAAC and has been further identified by the U.G.C. as Centre of Excellence. The institution has also taken up certain new research projects like Sanskrit and computer, Science and Sanskrit; Sanskrit and Management, Sanskrit and Ancient Indian Law etc. and has done some pioneering works for which the relevance of Sanskrit in the contemporary world of science and technology has been established. Installation of Orissa Chair under the patronization of Shri J.B.Patanaik, Ex-Chief Minister of Orissa, a learned scholar in Sanskrit and Indian Culture, is another magnificent academic achievement of the institution. The main purpose of the establishment of this chair is to carry out the research and extension activities on Jagannath Culture, Shri Chaitanya philosophy and Jayadev litera-

ture. The Utkla Peetha of this Vidyapeeth has been actively engaged in this work since its inception through organization of various seminars and symposia in different places of the country at different times and publication of several valuable works. Needless to mention that the publication of the complete Sanskrit works on Jagannath Culture in volumes will not only enhance the status of the Orissa Chair but also enrich the Jagannath Culture and consciousness.

Lord Jagannath is considered as the unquestioned supreme deity of the country because of His consciousness of synthesizing the various cults and sects propounded by so many seers, savants and prophets of various times and climes. The cult of Jagannath has adopted the fundamental principles not merely from different cults of Hinduism, but from Buddhism, Jainism and from the primitive cults that were practised by the primitive people of Orissa in particular and the country in general. The presence of Lord Jagannath in the sanctum sanctorum of the monumental shrine at Puri along with His elder brother Balabhadra and sister Subhadra signifies the sublime philosophy of universal brotherhood and global fraternity. No doubt, this unique culture has influenced so many seers, religious leaders, saint-poets and authors as a result they have been inspired to create a vast literature mainly in Sanskrit. All these Sanskrit works are still in a scattered position and most of these works are yet to be brought to the limelight. Some of these works, although published, have not reached a wider circle of the readers and researchers because of the fact that they have been printed in Oriya script. It is a laudable attempt that steps have been

taken to compile all the published as well as the unpublished works in Sanskrit on Jagannath culture and this project has been supported by the University Grants Commission, New Delhi. It is a privilege on the part of the Rashtriya Sanskrit Vidyapeeth, Tirupati ; identified as the Centre of Excellence, to publish these works in volumes with the help and cooperation of Orissa Chair. I am thankful to Professor D.Prahalladchar and Prof. K.E.Govindan ; both are former Vice-Chancellors of this University and the co-ordinator of the Centre of Excellence, Professor S.Sudarshan Sharma for their kind encouragement and support for publication of the work on Jagannath Culture. All the scholars of Orissa Chair including its coordinator, Prof. J.Ramakrishna deserve our appreciation for the sincerity they have shown in respect of the publication work.

I hope that this publication will earn wide appreciation of the Readers and Researchers of Jagannath Literature in Sanskrit and this will help in a long way in propagating and promoting the Jagannath culture that stands for the synthesis of almost all kinds of religions and philosophies of the country.

27th June, 2006
Rathayatra

H.K.Satapathy
Vice-Chancellor

INTRODUCTION

Prof. H.K.Satapathy
Principal Investigator

Orissa or Utkal occupies a prominent place in the international map of spiritual tourism because of the monumental shrine of Lord Jagannātha at Puri . In this holy land of Lord Jagannātha, several emperors and empires have risen and fallen in the annals of its history. Different religions, cults and ideologies have been evolved from this land and spread over the entire world leaving an indelible impression on the minds of many . More important is that the religions of diverse nature have been assimilated and synthesized by several saints and savants in this holy land and the focal point of all those diversified ideologies has become the mysterious image of Lord Jagannātha. Even the history of Orissa since the beginning of the ***Kālī*** era upto its conquest by the British (1803 A.C.) has been marked by the cult of Lord Jagannātha. So far as the administration of this land is concerned, Lord Jagannātha is considered to be the actual sovereign ruler whereas the rulers of Cuttack (the then capital of Orissa) are merely His ***Rāutas*** or ***Prathama Sevakas*** (foremost servants).

So far as the concept of Jagannātha culture is concerned, it is an assimilation of all Ideologies relating to several religions and philosophies and an uncommon synthesis of all diversified cults.. Different saints and savants belonging to different religious communities such as Buddhism, Jainism, Shaktism, Monism and

other systems of Philosophy have come to this sacred arena of Lord Jagannātha to have a minute study of this mysterious image and have ultimately failed to conceive the same. On the otherhand, they have mingled the identity of their thoughts and ideologies with the vast culture of Jagannātha and have accepted Lord Jagannātha as their desired deity (इष्टदेव:).

To define Jagannātha Cult. is to define a unique concept of mysterious significance that advocates a system of living together on the basis of universal fellow feeling. An age-long tradition that has embraced the quint-essence of all religious communities and philosophical concepts of the world has found its revaluation in this mysterious culture which has been trying to bring together all the inhabitants of the country and abroad under the banner of universal brotherhood and global fraternity irrespective of their cast, creed, colour and community. The philosophy of universal brotherhood and communal harmony followed by mutual co-existence with a transparent mind and guile-less heart has enhanced the acceptability of Jagannātha cult throughout the world .

Some of the important factors that constitute the basic tenets of Jagannātha Cult. are - i) origin of Shrī Puruṣottama Jagannātha ii) significance of the sacred abode of Jagannātha iii) history of the construction of the temple of Lord Jagannātha and Art and Architecture reflected therein iv) the daily rituals of Lord , v) Various festivals associated with Lord, vi) involvement of different servitors in the process of worship of Lord Jagannātha , vii) the significance of ***Mahāprasād*** offered daily, viii) mysterious shape of trinity, ix) Jagannātha Cult as related to different systems of philosophy and religion of the world, x) the role of ***Maths*** and monasteries in respect of performance of daily rituals of Lord, xi) advent of various religious leaders like

Acārya Śankar, Nānak, Kavīr, Srī Caitanya, Srī Jayadev etc. and their perception regarding Jagannātha cult and different types of special attires ***(Vesas)*** of the trinity on different occasions , xii) concept of ***Patitapāvan*** in respect of alleviating miseries and sufferings of the downtroddens in furtherance of social justice and (xiv) concept of ***Śankha*** and ***Cakra*** as related to Jagannātha Cult for the protection and preservation of the entire Universe . A thread bare analysis on these points can give a full picture on Jagannātha Cult. for which the ***Vedas***, the ***Upaniṣads*** and almost all the epics and ***Purānaṣ*** and some other important Sanskrit works are to be studied minutely .

The ***Vedas*** and the ***Upaniṣads*** being the store house of knowledge and wisdom relating to each and every branch of learning and culture of this Universe, refer to this cult of Jagannātha in various ways. In ***Ṛgveda***, there is a clear reference to ***Puruṣoṭṭama*** Jagannātha, the ***Dārubigraha*** or the wooden image . The said verse reads as follows :-

अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम् ।
तदारभस्वदुर्हणो तेन गच्छ परस्तरम् ।।
(ऋक्. - १०/१५५/३)

The Sayana's interpretation on this verse runs as follows . The wooden log (यद्दारु) not related to Purusa, a creator (निर्मातृपुरुषेण रहितम्) , which is named as ***Puruṣoṭṭama*** (पुरुषोत्तमाख्यम्) and which is an image of deity (देवताशरीरम्), floats on the coast of the sea (सिन्धो : पारे प्लवते). Take its resort (तद् आरभस्व) O singer ! (स्तोत : !) with the worship of that wooden God (तेन दारुमयेन देवेन उपास्यमानेन) attain the highest region of Vishnu (उत्कृष्टं वैष्णवलोकं गच्छ). Here Acharya Sayana has categorically referred to Lord Jagannātha called as ***Puruṣoṭṭama***, a wooden image of a deity, i.e. दारुमयं पुरुषोत्तमाख्यं देवताशरीरम् ।

The interpretation of Sayana is "अद : विप्रकृष्टदेशे वर्त्तमान्म् अपुरुषं निर्मात्रा पुरुषेण रहितम् यद्दारु दारुमयं पुरुषोत्तमाख्यं देवताशरीरं सिन्धो : पारे समुद्रतीरे प्लवते जलस्योपरि वर्त्तते तद्दारु हे दुर्हाणो दु :खेन हननीय केनाऽपि हन्तुम् अशक्य हे स्तोत : ! आरभस्व आलम्बस्व ! उपास्वेत्यर्थ : । तेन दारुमयेन उपास्यमानेन देवेन परस्परं अतिशयेन तरणीयम् उत्कृष्टं वैष्णवं लोकं गच्छ ।"

In view of the relationship of Jagannātha Cult with that of ***Sanātana Dharma*** as described in the Vedas, it can be mentioned that the Vedas are the primary sources of Jagannātha consciousness.

As regards ***Upaniṣads*** , various ***Upaniṣads*** like ***Śwetāśvetaropaniṣad, Kaivalyopaniṣad*** and ***Chhandogyopaniṣad*** describe the concept of ***Puruṣoṭṭama*** which is a description of the present image as well as divine qualities of Lord Jagannātha. The ***Śwetāsvetaropaniṣad*** mentions that -

अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षु : स शृणोत्यकर्ण : ।
स वेत्ति वेद्यं न च तस्याऽस्ति वेत्ता
तमाहुरग्रं पुरुषं महान्तम् ।। (श्वेताश्वेतर - ३/२८)

Similarly the ***Kaivalyopaniṣad*** says :-

अपाणिपादोऽहमचिन्त्यशक्ति :
पश्याम्यचक्षु : शृणोम्यकर्ण : ।
अहं विजानामि विविक्तरूपो
न चास्ति वेत्ता ममचित्सदहम् ।।
(कैवल्योपनिषद् - २१)

Besides, the concepts of ***'Paraṃbrahmaṇ'*** narrated in various ***Upaniṣads***, very much resembles with the ***"Puruṣoṭṭama Taṭṭva"*** of Jagannātha Cult and all these scriptures written in Sanskrit can be taken as sources of Jagannātha Cult .

Rāmāyaṇ and ***Mahābhārat*** are two famous epics in Sanskrit which describe the facts relating to important aspects

of Indian Culture that also encompasses Jagannātha as the ancestral deity of ***Ikṣvaku*** dynasty. Here Rāmacandra has advised Bibhiṣana to take refuge to Lord Jagannātha after killing of Rāvana.

आराधय जगन्नाथमिक्ष्वाकुकुलदैवतम् ।

(Rāmāyaṇ - Uttarakānda - 108/28)

In the Vanaparva of Mahābhārat of Vyāsa, mention of Puruṣottama Dhāma and Mahodadhi of Puri has been made. The description of Mahāvedi in the Mahābhārat can easily be co-related with the Yajñyavedi or the sacred birth place of Lord of Ṣrī Gundicha Temple. ***(Vanaparva - Chapter - 114 Verses - 22-25).***

Then come some significant scriptures on Tantras which give a picture of the mysterious aspects of Jagannātha Cult. These scriptures in Sanskrit are (i) Rudrayāmal, (ii) Tantrayāmal, (iii) ***Vāmadevasaṃhitā*** and (iv) ***Kapilasaṃhitā***. Most of the day-to-day rituals in Jagannātha temple are performed as per the principles laid down in various treaties on ***Tantras*** and ***Kālikāpurāna.*** Orissa has been described as the first Tantra seat of the country. ओड्राख्यं प्रथमं पीठम् . The Sanskrit Purānas, which deal with the salient features of Jagannātha Cult directly are - ***(i) Brahma, (ii) Skanda, (iii) Padma (iv) Nārada, (v) Garuda, (vi) Matsya, (vii) Agni, (viii) Vāmana (viii) Kūrma, (ix) Viṣṇu***. The Prominent references are -

जगन्नाथं येऽर्च्चयन्ति सुभद्रां बलभद्रकम् ।
ज्ञानं प्राप्य श्रियं पुत्रान् ब्रजन्ति पुरुषोत्तमम् ।।

(गरुडपुराणे - ८६/१८)

सुभद्रां बलभद्रं च प्रपूज्य पुरुषोत्तमम् ।
सर्वकामसमायुक्तः कुलमुद्धृत्य नामभाक् ।।

(अग्निपुराणे - ११६/११)

The Vāmana Purāna says that :-

अनेनैव जगन्नाथं त्वमाराधय केशवम् ।
तत : शापापनोदं तु स्तुते लप्स्यसि केशवे ।।
समाराध्य जगन्नाथं स तत्र पुरुषोत्तमम् ।
सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्तवान् ।।

(वामन - ८६/११४,११९)

All these Purānas narrate the origin and development of Jagannātha Cult and the historicity of these narrations can not be ruled out. One of the important treatises in Sanskrit which gives a clear and vivid picture regarding all the aspects of Jagannātha Cult. is ***"Nīladri Mahodaya"*** written sometimes during the fifteenth to seventeenth century A.D.

The sanskrit works dealing with the various angles of Jagannātha Cult fall in to several categories like ***Purānas, Kāvyas, Drāmās, Tantras, Smṛti*** and ***Jyotiṣ***. A list of these works, excepting the ***Purānas*** of which the mention has already been made is given below :-

1. ***Kapilasaṃhitā*** (Published)
2. ***Puruṣoṭṭama Māhāṭmyaṃ*** (Published) Prof. K.C.Mishra, Centre for Orissan Cult, BBSR
3. ***Mukticintāmaṇi*** - Published by ***Ṣrī*** Jagannātha Sanskrit Visvavidyalaya, Srivihar, Puri
4. ***Jagannātha Caritāmṛta*** (Published)
5. ***Adbhūtasāgara*** (Unpublished) The Mss. preserved in Orissa State Museum, BBSR
6. ***Nityācarapradīpa*** by Narasimha Mishra Vajpayee (Published)
7. ***Saraṣvatīvilāsa*** by Gajapati Pratap Rudradev (Published)
8. ***Jayacintāmani*** by Pandit Godavari Mishra (Published)
9. ***Satarudraratnamālā*** by Acharya Satarudra (Unpublished)

10. *Jyotiṣtaṭṭva Kaumudī* (Unpublished)
11. *Tantrayāmala* (Published)
12. *Durgā Yajña Dīpikā* by Jagannātha Acharya. (Published)
13. *Abhinavgītagovindaṃ* by Raya Divakar Mishra (Published)
14. *Bhagavallilācintāmaṇi* by Kavi Kamala Lochana Khadga Ray (unpublished)
15. *Gangavaṃśānucaritacampu* by Basudev Rath Somayajee (Published).
16. *Gundicā Campu* by Vakravaka Chakrapani Pattanaik (Published)
17. *Candana Campu* by Kavikantha Ṣrī Sadasiva Mishra (Published)
18. *Ṣrī Jagannātha Rathotsavah* by Pandit Gunanidhi Das (Published)

Laghu Kavyas are as follows -

19. *Nīlādriśatakam* by Jagannātha Das (Published)
20. *Nīlādrināthaśatakaṃ* by Pandita Agnichit Nityanand (Published)
21. *Nārāyanaśatakam* by Kavi Gangadhar.
22. *Saṃbodhanaśatakam* by Nilakantha Mohapatra (Unpublished)
23. *Gundicaśatakam* by Kaviraj Bhagavan Brahma (Published)
24. *Haribhakti Sarvasva Śatakam* by Bakravaka Chakrapani Pattnaik (Published)
25. *Viṣṇupādaśatakam* by Kashi Nath Rath (Unpublished)
26. *Jagannāthaśatakam* by Pandit Chandra Shekhar
27. *Ṣrī Jagannātha Aṣtoṭtaraśatakam* by Pandit Sudarshana Acharya (Published).
28. *Ṣrī Jagannātha Suprabhātam Tathā Anyāni Stotraṇi* by S.Sundara Rajan.
29. *Ṣrīmandireṣaśatakam* by Pramod Chandra Mishra (Published)
30. *Ṣrī Jagannāthastutih* by Pandit Bhagirathi Nanda Sharma (Published)

31. *Ṣrī Jagannātha Nakṣtramālā* by Pandit Karunakar Das (Published)

32. *Ṣrī Jagannātha Tāṇdavam* by Gaurikumar Brahma (Published)

33. *Jagannātha Navakalevaravandanā* By Janaki Ballav Patnaik (Published)

34. *Nitya Nīlādrivilāsa* by Ativadi Jagananth Das.

35. *Narasiṃhaśatakam* by Kavi Gangadhar.

35. *(A) Nīlādrināth Suprabhātam* by Ṣrīman Ṣrīvasyam Thiruvengal Ramanujacharyulu (Unpublished)

35. *(B) Ṣrī Jagannātha Suprabhātam* Pandit Narayani Dash.

Sanskrit Dramas related to Jagannātha Culture are :-

36. *Anargharāghavam* by Murari Mishra (Published)

37. *Prabodhacandrodayah Natakam* by Krishna Mishra (Published)

38. *Paraśurāmvijayam* by Gająpati Kapilendra Dev (Published)

39. *Bhaktivaibhavam* by Kavidindima Jivadevacharya.

40. *Ṣrīkriṣṇabhaktivatsalya Nātakam* by Gajapati Ramachandra Dev

41. *Caitanya Candrodaya* by Paramananda Das (Published)

Other Sanskrit works related to Jagannātha

42. *Sangītanārāyaṇam* by Jagananth Narayan Dev (Published)

43. *Haripriyā Commentary on Amarakoṣa* by Daitāri Das

44. *Mahāpuruṣa Vidyā* Publshed by Ṣrī Jagannātha Sanskrit Visvavidyalaya, Puri

45. *Kataka Rājavaṃśavalī* edited by G.C.Tripathy and Harman Kulke (Published)

46. *Jagannātha Ballabha Nātakam* by Ray Ramananda.

47. ***Navakalevara Ṣadaśīti*** by Mahamahopadhyaya Jagannātha Mishra.
48. ***Mukti Cintāmaṇi*** of Gajapati Puruṣoṭṭama Dev (Published)
49. ***Ratha Śīlpam*** by Dvija Bhagirathi Das
50. ***Vāmana Campu*** by Raghunath Ratha Sharma (Published)
51. ***Dārubrahma Śatakam*** by Kavi Pitambar
52. ***Nīlādriśa Vandanam*** by Samanta Chandra Shekhar
53. ***Puruṣoṭṭama Taṭṭvam*** by Raghunandan (Edited by Jivananda Vidyasagar)
54. ***Kālasāra*** by Pdt. Gadadhar Rajguru
55. ***Kṛtya Kaumudī*** (Published) by Brihaspati Suri
56. ***Kāladīpika (Published)*** by Pdt. Divyasingha Mahapatra.
57. ***Kālanirnaya (Published)*** by Pdt. Raghunath Dash.
58. ***Kālacandrika (Published)*** by Dharma Pathy.
59. ***Nityācāra Paḍḍhati (Published)*** by Bidyadhar Vajapai
60. ***Nityācāra Pradīpa (Published)*** by Narasimha Vajapai
61. ***Pratāpamārtanda (Unpublished)*** by Pratap Martanda
62. ***Tīrthacintamaṇi (Published)*** by Vachaspati Mishra
63. ***Nīlādricandrodaya*** by Pdt. Ramachandra Ratha Sharma.
64. ***Odradēśa Rājavaṃśāvalī*** Edited by Prof. K. C. Mishra.

A study of all these above mentiond works will reveal several aspects of Jagannātha Cult and different traditions of worship of Lord Jagannātha . Since all those works are written in sanskrit, an ancient most language of the country, it is also pertinent to underline the importance of those works in respect of evolution, promotion and propagation of Jagannātha Philosophy all over the world. Truly speaking the concept of Purusa and ***Puruṣoṭṭama*** (which has been subsequently identified with the concept of Jagannātha Cult) has evolved from the very Vedic

period and has been nourished during the ***Upaniṣadic*** and Purānaic ages. Besides, several Kāvyas and Nātakas have been written regarding the significance of this famous Lord of Universe.

In order to have a clear picture of Jagannātha Cult, a critical survey and study of all these works is badly necessary.

For this purpose a Major Research Project entitled ***"A Critical Survey of Sanskrit Works on Jagannātha Culture"*** was submitted to the University Grants Commission, New Delhi in the year 2003 and the same was cleared. The main purpose of the Project is to identity various sanskrit works and to bring them to lime light in the form of anthologies so that the scholars engaged in conducting research on Jagannātha Culture can have an easy access to the original Sanskrit works on Jagannātha Culture. It is proposed to prepare seven Volumes with exhaustive introduction relating to the particular works inserted in those volumes. Each volume is proposed to contain the works of similar nature and category and accordingly two volumes are planned to be prepared containing all the Purānas and other pieces of literature of similar type of Jagannātha Culture. All the Sanskrit inscriptions and historical works like ***Cuttack Rājvaṃśavalī, Odra Deśa Rājavaṃśavalī etc.*** on Jagannātha Culture will be accommodated in volume - III. The volume - IV & V will contain all the ***Kavyas***, ***Stotras***, ***Mantras & Aṣtakas*** etc. on Lord Jagannātha, whereas the Volumes - VI & VII are proposed to have all the sanskrit Dramas and Campu Kavyas on Jagannātha Culture.

The present Volume consists of three important paleo-literal texts i.e. ***Vāmadevasaṃhitā***, ***Kapilasaṃhitā*** and ***Nīlādri Mahodaya***. The elaborate descriptions of these three texts and there relevance to ***Jagannātha*** Culture are given below.

वामदेवसंहिता
VĀMADEVA SAṂHITĀ

Vāmadevasaṃhitā, written in Sanskrit, is a unique scripture on Jagannātha Culture . The scope of Jagannātha Culture can include a varities of subject . As mentioned earlier, some of the important facts that constitute the basic tenets of Jagannātha cult are (i) origin and development of Śrī Purusottam Jagannātha and concept of Nilamādhava (ii) significance of the sacred abode of Jagannātha (iii) History of the construction of the temple of Lord and art and architecture reflected therein (iv) the daily rituals of Lord (v) various festivals associated with Lord (vi) Involvement of different servitors in the process of worship of Lord Jagannātha (vii) the significance of ***Mahāprasāda*** offered to Lord daily (viii) mysterious shape of trinity (ix) Jagannātha Cult as related to different systems of Philosophy and religion of the world (x) the role of ***maths*** and monasteries in respect of performance of daily rituals of Lord (xi) advent of various religious leaders like Acārya Śankar, Nānak, Kavir, Śrī Caitanya, Śrī Jayadev etc. and their perception regarding Jagannātha Cult and different types of special attires (Veśas) of the trinity on different occasions (xii) Concept of Patitapāvan in respect of alleviating the miseries and sufferings of the downtrodden and (xiv) concept of ***Śaṃkha*** and ***Cakra*** as related to Jagannātha cult for the protection and preservation of the entire Universe .

A study on *Vāmadevasaṃhitā* reveals that the concerned treatise has dealt with almost all these subject matters in a lucid, convincing and elegant manner . It is so titled because the subject matter of this text has been described in way of conversation

between Lord Śiva, known as Vāmadeva and Goddess Pārvati . The questions asked by Pārvati to Śiva from the beginning are as follows -

एकदा पार्वती देवी देवेशं वृषभध्वजम् ।
पप्रच्छ तीर्थगणने पुरुषोत्तममीरितम् ।।
सर्वक्षेत्रवरं श्रेष्ठं कथितं केन कारणम् ।
बहूनि सन्ति क्षेत्राणि चेदं क्षेत्रवरं कथम् ।।
एतत् ज्ञातुं मया पृष्ट : कथय त्रिपुरान्तक !
पार्वतीवचनं श्रुत्वा प्रोवाच वृषभध्वज : ।।

(वामदेवसंहिता १/२,३,६)

The essence of the question put by Pārvati is as to why the Puruṣottama Kṣhetra (Presently known as Puri) is regarded as ***"Kṣhetravara"*** or "Supreme Pilgrim Centre" despite the existence of so many "***Tirthas***" in the country.

Then the reply given by Siva constitutes the entire theme of the concerned chapter . Thus runs the process of narration of myriads of subjects in this scripture on Jagannātha culture . The ***Vāmadevasaṃhitā*** under discussion was published for the first time by Puri ***Mukti Mandap Pandita Sabhā*** in the year 1972 in Oriya script. The editors under whose care, two palmleaf manuscripts available in the libraries of ***Mukti Mandap Pandit Sabhā*** and ***Bada OdiāMath*** of Puri, were deciphered, edited and published with variants, were Pandit Divakar Dash, Pandit Kashinath Mishra, Pandit Krushna Chandra Rajaguru and Pandit Banamali Mishra. The process of the editing the work was supervised by a great scholar of grammar, Pandit Chintamani Mishra of Puri . The character of these manuscripts of ***Pandit Sabhā*** library and ***Bada Odiyā Math*** is oriya, from which it can be inferred that the author of the ***Vāmadevasaṃhitā*** is a scholar from Orissa . Of course, there is no mention of the name of

author anywhere in the book nor his identity has been given as a result of which it has been difficult to determine regarding the authorship of the book .It may be noted that in the name of same title, another ***Vāmadevasaṃhitā*** is available and the authorship of the same has been attributed to ***Ṛṣi Vāmadeva*.**

Several descriptions are found in Sanskrit literature regarding the identity of Vāmadeva . As per Vanaparva of Mahābharat, chapter 192, the identity of Vāmdev, an ancient hermit has been given as follows . Three sons named ***Sāla, Dāla,*** and ***Bāla*** were born to king ***Parikṣhita*** by his wife ***Suśobhana,*** a princess of ***Mānduka*** . In due course, king ***Parikṣhita*** anointed his eldest son ***sāla*** as king and went to the forest for penance .

Once ***sāla*** went to the forest to hunt . While chasing a deer, the king asked his charioteer to bring horses capable of overtaking the deer . The charioteer told the king that such horses were available at the hermitage of Vāmadeva. They went to the hermitage of Vāmdeva and got the horses on condition that they would be returned .

After the hunting, sāla reached his capital . Seeing the beauty and the vigorous nature of the horse, the king did not like to part with them . Vāmdeva sent his disciple to the court of the king to take the horse back . But the king sent him back empty-handed . Vāmadeva got angry . He came in person and demanded his horses . The king replied that Brahmins did not require such horses . While these two were quarrelling with each other, some fierce giants came there and pierced ***Sala*** with a trident and killed him .

According to Vālmiki Rāmāyana, Bālakānda, sarga-7 and chapter-3, Vāmdeva was a friend of Vaṣiṣtha and priest of Daṣaratha. The tradition says that one hermit Vāmadeva by name,

was the composer of Mandala - 4 of Ṛgveda . Manusmṛti says that once Vāmadeva tried to eat the flesh of a dog because of hunger with a view to save Brahmins . (Manu-chapter-10, Stanza- 17)

As per Matsya ***Purāna***, Vāmadeva was one of the seven sons born from the face, Kṣhatriya from the hand, Vaiśya from the calf of the leg and Sudra from the foot of Vāmadeva, who was an incarnation with ***Candra***, when ***Tārā***, the wife of Vṛhaspati was carried away by ***Candra*** (moon).

[Matsys *Purāna*, 4-13]

The authorship of the other ***'Vāmadevasaṃhitā'*** that deals with the ***Śaivāgama*** theory and the manuscripts of which are available in Govt. Oriental Manuscript Library of Madras in Telugu character and in Sanskrit language is attributed to this ancient Indian hermit . This ***Saṃhitā*** is completely different from the ***Saṃhitā*** under discussion. The former one contains two parts with one hundred two chapters whereas the latter one consists of thirty two chapters only. The benedictory verse of the ***Vāmadevasaṃhitā*** dealing with ***Śaivāgama*** theory runs as 'वन्दे शङ्करमूर्त्तिमाद्यममलं तेजोनिधिं शाश्वतम्" whereas the opening verse of the ***Vāmadevasaṃhitā*** on Jagannātha reads as follows-

नीलाद्रिनाथं जगतामधीशं चिदंशरूपं शरणैकनाथम् ।
श्रीनीलगोत्राधिपतिं वरेण्यं सुरेन्द्रवन्द्यं प्रणतोऽस्मि नित्यम् ।। (वा.सं.१/१)

The ***Vāmadevasaṃhitā*** deals with varieties of topics relating to Jagannātha Culture and ***Puruṣottama*** theory in thirty two chapters . The first and second chapters describe the significance of the sacred place, Puri . In chapter- 3, visit of Vidyāpati to ***Nīlagiri*** and his ***Darśan*** of ***Nīlamādhava*** have been narrated, whereas the fourth chapter deals with the journey of the king

Indradyumna and ***Devarśi Nārạda*** to ***Ṣrīkṣhetra***. The fifth chapter is significant since it reveals the mystery of the construction of ***'Dāruvigrahas' (wooden idols of the deities)***. The sixth, seventh and eighth chapters are about the procedure to be followed while worshipping the idols in the main Shrine. The picture of the kitchen of the temple as well as the process of cooking food therein have been extensively dealt with in the chapters nine and ten . The eleventh chapter gives a list of various kinds of servitors engaged in the temple for worship of the deities . Most of the chapters of ***Vāmadevasaṃhitā*** are devoted to the description of various types of festivals observed in the temple of Lord Jagannātha on different festival days of the year . The main festivals like ***Snānayātra (Bathing Ceremony of Lord), Netroṭsava (Eye-opening ceremony), Śrī Gundica (Car Festival), Hariśayan Ekādaśī (Sleeping Ceremony), Karkata Saṃkranti, Devoṭthana Ekādaśi (Wake up Ceremony), Prāvara Ṣaṣthi (Covering Ceremony), Puṣyābhiṣeka Yātrā (Consecration Ceremony), Makara Saṃkranti (New Year Day Celebration), Dolayātrā (Swing Ceremony), Damanakacaturdaśī (Offering of Dayanās), Candana Yātrā (Sandal Paste applying Ceremony), Vakula Amāvāsyā (Putting "Citā" on the forehead), Rāmanavami (Ṣrī Rama's Birth Day), Janmāṣṭamī (Śrīkriṣhṇa's Birth Day), Durgā Pūjā (Celebration to Mark advent of Goddess Durgā)*** etc. are elaborately discussed in these chapters of the book . The striking feature of this treatise is that it deals with the accidental occurrence of several kinds of calamities like excretion inside the premises of the temple, sitting of vultures and other inauspicious birds on the temple and chariot etc . and the remedial measures to be taken for overcoming these calamities . The chapters eighteen, twenty-

seven, twenty-nine, thirty and thirty-one are significant from the historical points of view since the matter relating to the time of construction and consecration of the main shrine of Jagannātha is dealt with in these chapters .

Regarding the date of the composition of the ***Vāmadevasaṃhitā*** under discussion, it is difficult to determine the exact timing of the work since nowhere in the text, the date has been directly mentioned, although some evidences as found in the text, put the date at the early period of Ganga rule in Orissa . The work is in the way of a conversation between Śiva and Pārvati and the author, who is still unknown, has prudently adopted this method of narrating the significance of Viṣṇu with the help of Lord Śivaand Goddess Pārvati, obviously with an intention to give an impression that Lord Viṣṇu was greater than Śiva . Till the beginning of the rule of the kings of Ganga dynasty, almost all the rulers of Orissa particularly of ***Bhaumakar*** and ***Keśarī*** dynasties, were devotees of Lord Śiva. They were called ***"Paramamaheśwaras"*** . With the advent of ***Rāmānuja***, one of the early powerful exponents and propounders of ***Vaiṣṇavișm*** of ***Ṣrī Saṃpradāya*** in Orissa in the twelfth century A.D., during which some new systems of worship of Lord Jagannātha as per ***"Pancarātra Āgama"*** were introduced in the temple, the kings of Ganga dynasty got motivated towards ***Vaiṣṇavișm*** and gradually they shifted their attention from ***Śaivaṣm*** to ***Vaiṣṇava*** Cult . In this connection, the contributions of the Orissan poet Jayadev, the author of ***Gītagovinda***, deserve a special mention . As a result, the great Vaisnav temple at Puri was constructed and consecrated during that period . In order to shift the attention of the devotees from Saiva community to ***Vaiṣṇava*** cult, this ***Vāmadevasaṃhitā***, with all probabilities, was prepared by a

Sanskrit scholar under the direct supervision of a Ganga king during the period of either ***Ananta Vermā Codaganaga Dev*** or ***Ananga Bhima Dev*** ; the period i.e. 12th or 13th century A.D. when the present temple of Lord Jagannātha is said to have been constructed . Secondly ***Vāmadevasaṃhitā*** must have been written prior to the writing of ***Nīlādri Mahodaya***, a treatise in Sanskrit on Jagannātha, that deals with almost all the aspects of Jagannātha Culture in a detailed manner . Keeping the elaborate discussions on wide ranging topics on Jagannātha Cult including those ones of ***Vāmadevasaṃhitā*** in view, it can be said that ***Nīlādri Mahodaya*** is an extended form of ***Vāmadevasaṃhitā*** . Regarding the date of ***Nīladri Mahodaya***, there are two sets of opinion . According to some scholars including Pandit Ṣrīdhar Mohāpātra, who edited the text for the second time in the year 1984, the ***Nīlādri Mahodaya*** was written during 15th Century A . D . whereas as per Dr. G . C . Tripathy, the book was prepared during 18th Century A.D. . In any case ***Vāmadevasaṃhitā*** was written just after systematic advent of ***Vaiṣṇavisṃ*** in Orissa in general and introduction of ***Vaiṣṇava*** rituals in Jagannātha temple in particular and as such time of composition of ***Vāmadevasaṃhitā*** may be ascribed to 13th Century A . D..

Vāmadevasaṃhitā has been extremely popular in Orissa because of its simplicity of language, clarity of subject matter and elegant style of presentation . Particularly the style of conversation between Lord ***Śiva*** and Goddess ***Pārvati***, adopted during the narration of so many topics on Jagannātha consciousness, has enhanced the significance of the work for which it will be treated as a precious treasure in the history of ***Vaiṣṇava*** literature for years to come .

कपिलसंहिता
KAPILA SAMHITĀ

"Kapilasamhitā" or otherwise known as ***"Kapila Purāna"*** is a treatise in sanskrit, which is famous for description of various sacred places of Orissa including that of the holy land of Lord Jagannātha. Orissa has a long tradition of worshipping four principal deities i.e. "कृष्णार्कपार्वतीहरा:" which means Krishna, ***Arka*** or Sun God, ***Pārvati*** and ***Hara*** or Lord ***Śiva***. There are four main centres of the tradition of worship of these four deities in Orissa. ***Nīlācala***, popularly known as Puri, is famous for its presiding deity Lord Jagannātha and the place has been recognized as a seat of ***Vaiṣṇava*** Culture from time immemorial. ***Ekāmra Kṣhetra*** or Bhubaneswar is the sacred abode of ***Hara*** or ***Lord Lingarāja*** and the said place of pilgrimage is well-known for its Śaiva-culture. Similarly ***Arkakṣhetra*** or the holy land of Sun God, where the famous temple of ***Konārka*** or the Black Pagoda is situated, has been able to attract the attention of world tourists because of its traditional grandeur. The concerned place is recognized as the seat of the tradition of the sun-worship in Orissa. So also the ***Śaktikṣhetra*** or the place famous for its long tradition of ***Śakti*** worship is Jājpur, where locates the holy shrine of Goddess ***Birajā***. In addition to these four sacred places of Orissa, there are also other divine natural resources of national and international importance, which encompass various mountains and rivers. That is the reason why Orissa has been regarded

as the most significant and sacred state in India and no place even in world is a match to this sacred abode of Lord Jagannātha . It is told in ***Kapilasaṃhitā*** that -

वर्षाणां भारत : श्रेष्ठ : देशानामुत्कल : स्मृत : ।
उत्कलस्य समो देशो देशो नास्ति महीतले ।।
(कपिलसंहिता - १/८)

Needless to mention that ***Kapilasaṃhitā*** is one of the important Sanskrit scriptures which has got the rare distinction of describing all these four sacred ***Tirthas*** including other natural divine resources of Orissa.

1. ABOUT THE PUBLICATION

So far, five editions of ***"Kapilasaṃhitā"*** by five different scholars, have been brought out at different times . Following is the list of the publications of ***Kapilasaṃhitā*** in chronological order.

(a) ***Kapilasaṃhitā*** was edited and published by Late Ṣrī Ratnakar Gargabatu in the year 1982 A.D.. This edition consists of 21 chapters and is based upon only single palm-leaf manuscritp available with Ṣrī Gopinath Mohapatra, the then Sanskrit teacher of Ravenshaw Girls' High School . The edition was corrected by Ṣrī Radhakrishna Basu, M.A.. This was printed by H.M.Dutta at the Dutta Press, Cuttack in the year 1928 A.D. . This is the first edition of ***Kapilasaṃhitā*** . While writing a small introduction to this book, the editor has mentioned that -

यदध्ययनमात्रेण कृष्णार्कपार्वतीहरा : ।
क्षेत्रादिनाथा : कृपया प्रापयेयु : परं पदम् ।।
त्रिपुरारिपुरस्थेन श्रीरत्नाकरशर्मणा ।
संहिता कपिलाख्येयं मुद्रिता सदनुग्रहात् ।।

Although the ***Kapilasaṃhitā*** consists of 42 chapters, the edition of Ratnakar Garga Batu contains only 21 chapters . So, this edition appears to be incomplete . But, the efforts made by

the editor to bring out a major portion of the ***Kapilasaṃhitā*** for the first time deserves high appreciation .

(B) ***Kapila Purāna*** edited by Ṣrī Krishnamani Tripathy and published by ***Caukhambā Surabhārati Prakāśana, Vārāṇasī.*** This edition of ***Kapila Purāna*** which is almost same as ***Kapilasaṃhitā*** was brought out in the year 1981 A.D.. In the preface of this book Dr. Tripathy has mentioned that the only hand-written manuscript of ***Kapila Purāna*** is available in the ***Saraśwati Bhavan***, Library of ***Sampurnānanda Sanskrit Viśvavidyālaya, Vārāṇasī***. The accession No. of the manuscript is 16404 and the manuscript contains 36 pages . While editing the ***Kapila Purāna*** Dr. Tripathy has relied upon this manuscript . But this edition of ***Kapila Purāna*** doesn't appear to be a dependable text because Ṣrī Tripathy has not made any efforts to consult other manuscripts available elsewhere in the country particularly in Orissa, which is regarded as the source place of ***Kapilasaṃhitā*** or ***Kapila Purāna***. As a result of which so many confusing and misleading readings are found in this edition . However, this edition has become a leading book for the scholars, those who have been able to bring out a correct edition of ***Kapilasaṃhitā*** in a subsequent period .

This ***Kapilasaṃhitā*** consists of 21 chapters . In the last portion of the book, the editor has given the summaries of all the 21 chapters in Hindi, which is beneficial and useful for the readers . Besides, the list of the geographical names of some historical places as described in ***Kapila Purāna***, given in the last part of the book is a meaningful appendix to the book . The places about which mention has been made in ***Kapila Purāna*** and which find place in the appendix are ***Utkala Puṣkar, Panca Tīrtha, Panca Sarobara, Sāmba, Dwārābati, Bindhya Mounatain, River***

Gandhābati, Koti Tirtha, Gokarna Tirtha, River Baitaraṇi, Narmadā, Saraświtī and Yamunā, Haridwāra, Mahendra Mountain, Bindusara and Badarikāśhrama. Another remarkable feature of the book is a long introduction running to 88 pages by Ṣrī Bijaya Shankar Tiwari giving the details relating to the history and evolution of the ***Purānas*** and ***Upaniṣads*** as well as the subject matter of each chapter in Sanskrit . The concerned edition has been taken in to consideration while preparing a reliable edition of ***Kapilasaṃhitā*** in the present volume.

(c) The third edition of ***Kapilasaṃhitā*** in chronological order, we find, is the edition brought out by Ṣrī Jagannātha Supply agency, Bānkabazār, Cuttack, 753002 . This book has been published in the year 1997 by Ṣrīmati Mamatā Mishra and has been corrected by Late Pdt.Niḷamani Mishra . The name of one Nilakantha Dash has been mentioned at the out set of the book as the original author of ***Kapilasaṃhitā*** . But, no details relating to Ṣrī Dash has been mentioned in the book . This edition also contains 21 chapters and the readings of each chapter widely differ from those of other edition of ***Kapilasaṃhitā*** . This book has been printed by M/S Rameswari Mudrani, Alisha Bazar, Cuttack. This edition has been made dependable and reliable to a maximum extent because it is based upon some original manuscripts preserved in Orissa State Museum, Bhubaneswar .

(d) The next important edition of ***Kapilasaṃhitā*** and 4th in chronological order has been edited by Pandit Sasidhar Mishra of Bhubaneswar . This is a significant edition because the editor Pandit Mishra has brought the second part of the ***Kapilasaṃhitā*** for the first time to the lime-light . The second part consists of 21 chapters i.e. from 22nd to 42nd chapter . Ṣrī Mishra has also given the Oriya translation of all the verses of this part of

Kapilasaṃhitā. The book has been published by Smt.Kanak Lata Mohanty, Kavera, Dhenkanal in the year 1999 and was printed at Duduly Process and Offset, Bapuji Nagar, Bhubaneswar.

As to the availability of the manuscript upon which the edition is based, Pandit Mishra has mentioned that he had collected only one copy of the palm leaf manuscript of ***Kapilasaṃhitā*** (forty-two chapters) from one Śrī Upendranath Mishra, son of Late Pandit Lingaraj Mishra, the then chief priest of Nilamādhav Jew of Kantilo. Pandit Mishra has relied upon the sole palm leaf manuscript while bringing out the second part of ***Kapilasaṃhitā***. He has acknowledged the help rendered by Pdt. Vāmdeva Acharya, Śrī Devraj Pathi and Dr.Bhagavan Panda at the time of preparing the edition for publication. Of course, all these three persons are scholars in the field and their guidance has become a great help for the editor. Still this edition cannot be said to be completely reliable because the publication has been made basing upon only one unpublished manuscript. However, Pandit Mishra, the editor of this publication deserves high appreciation for the pain he has taken to collect the unpublished palm leaf manuscript from a remote village of Nayagarh district of Orissa, by deciphering the correct readings for the benefit of the scholars working in the concerned field. Although some printing errors are found in the slokas here and there which might have escaped the sight of the proof readers, still the book is [illegible] tremely useful and a new step towards [illegible] un-known dimensions of Jagannātha Culture.

(e) The next edition of ***Kapilasaṃhitā*** [illegible] logical order has been brought out by the [illegible] of Śrī Jagabandhu Padhy, a renowned scholar of Jagannātha Culture. This book has been published by M/S Grantha Mandir, [illegible]

Cuttack - 2 in the year 2002 and the edition has been prepared by Ṣrī Padhy under the guidance of ***Kedāranātha Gaveṣaṇā Pratiṣthāna***, Bhubaneswar - 2. ***Kedāranātha Gaveṣaṇā Pratiṣthāna*** is a reputed cultural organization dedicated to the original research and promotion of Sanskrit literature and Indian culture. This edition of ***Kapilasaṃhitā*** appears to be more dependable on the ground that almost all the printed editions along with some unpublished manuscripts preserved in Orissa State Museum of ***Kapilasaṃhitā*** have been consulted by the editor for preparation of the present edition. One of the significant features of this book is that it carries the Oriya prose translation of all the verses it contains . It may be noted that this edition only relates to the first part of ***Kapilasaṃhitā*** i.e. first twenty-one chapters . Although the book has been published much later than that of the book edited by Pandit Sasadhar Mishra, no comments as to the reliability of the second part of ***Kapilasaṃhitā*** have been mentioned in the edition. This is because of the fact that perhaps the second part of the ***Kapilasaṃhitā*** edited by Pandit Msihra was not brought to the notice of ***Kedāranātha Gaveṣaṇā Pratiṣthāna.***

(f) It is learnt that another edition of ***Kapilasaṃhitā*** consisting of first twenty-one chapters only, edited and prepared by Dr. Pramila Mishra for her Doctoral dissertation, is proposed to be brought out by M/S New Bharatiya Book Corporation, New Delhi.

Although several texts on ***Kapilasaṃhitā*** have been brought out, still it appears that the text is incomplete . The forty-second chapter, which deals with the relationship between ***Jīva*** and ***Dharma,*** indicate that ***Kapilasaṃhitā*** may consist of some more chapters, which are yet to be traced . This argument has also been advanced by Late Ṣrī Kedarnath Mohapatra in his Descriptive Catalogue of Sanskrit Manuscripts, Vol. - I .

2. THE AUTHOR AND DATE OF THE KAPILA SAMHITA :

There is no specific mention of the name of the author of ***Kapilasaṃhitā*** anywhere in the text. The tradition ascribed the authorship of ***Kapilasaṃhitā*** - I & II to Kapila Muni, a great saint of Indian tradition. It is not known whether the same Kapila Muni, who has propounded the Sānkhya System of philosophy, has authored this ***Kapilasaṃhitā*** or ***Kapila Purāna***. From the discussions to be made in the following paragraphs, it will be clear that ***Kapilasaṃhitā*** appears to have been written much later than the date of composition of the text on Sānkhya Philosophy by original Kapila Muni. Hence it can be conjectured that Kapila Muni, the author of ***Kapilasaṃhitā*** is different from the saint Kapila, the first exponent of Sānkhya System of Indian philosophy.

It is very difficult to determine the date of composition of ***Kapilasaṃhitā***. So many scholars and historians have discussed this matter in details and have advanced their varied opinions. According to Dr.Krushna Chandra Panigrahi, ***Kapilasaṃhitā*** appears to have been written during 14th or 15th century A.D.. The reasons given by Dr. Panigrahi are as follows. In the seventh chapter of ***Kapilasaṃhitā***, the descriptions regarding the construction of ***Varāha Temple*** of Jaipur are found. As per the legends the temple was constructed by ***Suryavansi*** king Gajapati Prataprudra Dev, who ruled from 1497 AD to 1541 AD (vide Archeological Remains at Bhubaneswar pp 22-23). Considering the description of various places and temples, Dr. Panigrahi has arrived at a conclusion that almost all the ***Purāna***as relating to Orissa must have been written during the rules of ***Suryavamsi*** Gajapati kings of Orissa i.e. in between 14th to 15th Century A.D..

Dr.Kedarnath Mohapatra has prepared a list of the ***Purānas*** and ***Saṃhitās*** written regarding the significance of various cultural and spiritual places of Orissa and that too by Orissan author. The list includes -

1. Puruṣoṭtama Māhātmya of Skanda Purāna
2. Kapilasaṃhitā
3. Mukticintāmaṇi
4. Nīlādri Mahodaya
5. Ekāṃra Purāna
6. Swarnādri Mahodaya
7. Ekāmracandrikā
8. Prācī Māhāṭmya
9. Arkakṣhetra Māhāṭmya
10. Birajā Māhāṭmya
11. Keśara Kṣhetra Māhāṭmaya

Out of these ***Purānaa***s, ***Puruṣoṭṭama*** Māhāṭmaya, Mukti Cintāmaṇi and ***Nīlādri Mahodaya*** are fully devoted to the description of Puri and Lord Jagannātha, whereas ***Kapilasaṃhitā*** narrates the features of almost all the important places of Orissa including that of Puri . Besides, stray description of various important places of Orissa including Puri are also found in certain other principal ***Purānas*** like ***Brahma, Nārada*** and ***Padma.***

In this connection the following verse scribed in Cāteśwar inscription of the famous king Anang Bhima Dev - III of Ganga dynasty deserves a special mention. The verse goes as follows .

उदग्रदोषादपथप्रवर्त्तनस्खलद्गतीनि श्रुतिदृष्टिविभ्रमैः ।
चकार तत्त्वप्रतिपत्तिसम्पदास्पदं पुराणानि पुनर्नवानि यः ।।

(Chateswar Temple Inscription Re.ed Dr Chabra
E.I. XIII Pp 121-121)

It is evident from this verse that *Gajapati* king *Ananga Bhimadev* had taken steps to recast the *Purānas* with the help of different sanskrit scholars. ***Bishnu Acharya,*** a Sanskrit Scholar had played the prominent role. ***Bishnu Acharya*** was the minister and chief general of ***Ananga Bhimadev*** . He had concentrated more on the administration than the work of recasting the ***Purānas*** . Anyway ***Bishnu Acharya*** was instrumental for incorporating many chapters relating to the Jagannātha culture in ***Purānas*** like ***Brahma, Nārad,*** and ***Skanda*** . According to ***Krushna Chandra Panigrahi*** all the Puranic texts, which narrate the significance of various sacred places of Orissa including ***Puri*** or ***Puruṣoṭṭama Kṣhetra,*** were written during the tenure of ***Suryavamsi Gajapati*** kings. ***Kapilasaṃhitā*** concentrates more on the description of Bhubaneswar i.e. ***Ekāmra Kṣhetra*** than other places of Orissa . It is possible that ***Kapilasaṃhitā*** was written after the construction of the ***Lingarāj Temple.*** It was a period when there was a combined and co-ordinated rise of both ***Śaivism*** and ***Vaiṣṇavism*** particularly in Bhubaneswar . It is found that ***Kapilasaṃhitā*** deals with four religious sects and places of Orissa almost with equal importance . These four religious sects are Jagannātha Cult., originated from Puri ; Sun Worship, prevalent at Konark ; ***Śaiviṣm*** and ***Śaktiṣm*** originated from Bhubaneswar and Jajpur respectively By the time ***Kapilasaṃhitā*** was written, it is probable that all the main shrines in these four places were constructed . Hence the date of ***Kapilasaṃhitā*** can be fixed at 14th or 15th century A.D. and not prior to that .

3. A BRIEF SUMMARY OF KAPILASAṂHITĀ :-

Kapilasaṃhitā, in two parts, consists of 42 chapters . Of these chapters the part - I has 21 chapters whereas the part - II

contains 21 chapters . The 3rd, 4th and 5th chapters are important because these elaborately discuss regarding the significance of ***Nīlācalakṣhetra*** and Jagannātha Culture . The Indradyumna episode has been extensively dealt with in chapter-3 and chapter - 4 deals with the significance of ***Kṣhetra*** . It is described as fallows .

क्षेत्रं नीलाचलं पुण्यं दारुब्रह्मस्वरूपिण : ।
यस्मिन् क्षेत्रे त्यजन् देहं नरो वैकुण्ठमाप्नुयात् ।।
नीलाचलं महापुण्यं नीरदाभप्रियं महत् ।
दशयोजनविस्तीर्णमुच्छ्रितं योजनार्द्धकम् ।।
नानामुनिगणाकीर्णं विहङ्गैरुपसेवितम् ।
पादपै : सफलैर्युक्तं पुष्पैर्नानाविधैरपि ।।
साक्षाद् वैकुण्ठरूपं तत् क्षेत्रं श्रीपुरुषोत्तमम् ।
क्षेत्राणामपि क्षेत्रं च तीर्थानामपि यद् वरम् ।।
निद्रा समाधि : प्रासङ्ग : परमानन्दनिर्वृति : ।
सर्वकर्माणि धन्यानि क्षेत्रे श्रीपुरुषोत्तमे ।।
यस्मिन् क्षेत्रे सदा सन्ति ब्रह्माद्या देवतागणा : ।
जगन्नाथं तु पश्यन्ति स्नात्वा तीर्थे महोदधौ ।।
नीलाचलवरे विप्रा पुरा नीलाश्मरूपधृक् ।
इदानीं तु जगन्नाथो भाति दारवलीलया ।।

(कपिलसंहिता - ३/३-९)

As per the contents of chapters - III king Indradyumna, a devotee of Lord ***Viṣṇu*** was to be advised by Lord ***Viṣṇu*** in dream to come to Puri in order to have the ***Darśana*** of the image of the Lord . Then the king, in consultation with his followers and advisers, started his journey towards the blue-mountain or Nilācalam ; where Lord ***Viṣṇu*** had appeared as Jagannātha. Even Yamarāja, the Lord of death, was perturbed with this activity of the king Indradyumna

because he apprehended that there would be no death in ***Nīlācala*** after the arrival of the king Indradyumna and construction of a temple for Lord Jagannātha by the king at that place . Yamarāja thought that he would lose control over this place as the people would get salvation and attain the ***Baikuntha Dhāma*** by leaving their mortal bodies at this place with the grace of ***Lord Viṣṇu*** decided to stay at Puri with a purpose to grant salvation to the inhabitant of that place of pilgrimage .

The fourth chapter deals with the arrival of king Indradyumna to ***Nīlācala***, construction of wooden images of Jagannātha, Balabhadra and Subhadrā ***(Caturdhā Murty)*** and installation and consecration of these four idols in the temple and attainment of salvation by king Indradyumna. A vivid description of various sacred places, hermitages and penance-forests of Puri has been made in the **chapter - V** of the book. The significance of ***Maitreya*** forest, story relating to liberation from curse of and various sacred places of ***Arka Kṣhetra*** i.e the abode of Sun God have been narrated in **chapter - VI.** The subject matter of other chapters of ***Kapilasaṃhitā*** is as follows -

Chapter - VII : The importance of ***Birajā Kṣhetra*** (famous ***Śakti Pīṭha*** of Orissa) and description of various sacred places and pilgrimage of adjoining areas.

Chapter - VIII : The importance of ***Birajā Kṣhetra*** continues.

Chapter - IX : Description of Kailāś (Kapilāsa of Dhenkanal District) mountain, ***Śikhareśvara Mahādeva,*** Payomṛta Tirtha and the liberation of the king Saudāsa.

Chapter - X : Description of Ekāmra garden.

Chapter - XI : Arrival of Lord Śiva with His family to Ekāmra garden and His settlement in that area.

Chapter - XII : The origin and importance of Bindu Tank (Bindu Sāgar).

Chapter - XIII : Various sacred places of Ekāmra garden. The significance of the grace of ***Tribhubaneśwar***, the presiding deity of BBSR i.e. Ekāmra Kānan and description of various side deities and the significance of ***Ekāmra Tree*** as well as ***Tikta Śākha*** tree, penance of the God Indra and description of his victory.

Chapter - XIV : Significance of Ananta Bāsudev, description of different sacred ***Pīthas*** of Lord Śiva and the importance of offering ***sraḍḍha*** in ***Sukṣhmeśwar Tīrtha*** located at Bhubaneswar.

Chapter - XV : Description of some of other Śaiva Pīthas like Rāmeśwar etc. and appearance of Indreśwar.

Chapter - XVI : The arrival of the ***Himālāyan*** Mountain (Father of Goddess Pārvati) at ***Ekāmra Kṣhetra,*** performance of ***Dakṣhya Yajña***, sacrifice of life by ***Sati***, migration of Śiva to ***Kāśī,*** construction of the temple of ***Kedāreśwar.***

Chapter - XVII : The importance of the river like ***Ganges, Gandhāvati*** and various sacred places. Attainment of salvation by the Brahmins.

Chapter - XVIII : Description of the significance of ***Devi Pādaharā Tirtha,*** killing of two demons ***Kirti*** and ***Bāsa*** ; description of the procedure of ***Chāturmāsya Vrata,*** significance of donating food to others and importance of going round the ***Şrīkṣhetra.***

Chapter - XIX : Description of seven Yātrās (ceremonies) arrival of the seers at Ekāmra and attainment of salvation, significance of Utkal.

Chapter - XX : Description of various rivers like Bhārgavī, Kuśa Bhadrā (Puṣpa Bhadrā), Dadhiśrabā (Dayā) & Prācī.

Chapter - XXI : Description of ***Gyāna Yoga ;*** definition of Vaiṣṇava & Śaiva, similarities between Lord Śiva and Lord Viṣṇu.

The second part of the ***Kapilasaṃhitā*** consisting of 21 chapters edited by Pandit Sasadhar Mishra and printed by Duduli Process and offset, Bapuji Nagar, BBSR in the year 1999 also depicts some significant characteristics of Jagannātha culture in particular and Utkal in general. The chapter-wise contents of this book are as follows -

Chapter-1- Almost all the sacred places along with their presiding deities like, Puri, Konārka, Jājpur, Bhubaneswar etc. have been narrated in this chapter.

Second chapter of this book deals with the significance of two Śiva temples like Dadhi Bhubaneswar and Bhubaneswar. It is told that -

य इदं शृणुयाल्लोक: स सुवर्णेश्वरस्य वै ।
दधिभाण्डेश्वरस्य तत् चरितं परमाद्भुतम् ।।
सर्वपापविनिर्मुक्तो मोक्षं प्राप्स्यति शाश्वतम् ।
(कपि.सं. - II/ XXIII - 89-90)

The next chapter describes regarding the sacred seat of the ***Goddess Bārāhi*** at Puri, whereas the next chapter enlightens the readers regarding Siddha Balarām or Lord Balabhadra. It is told that -

बलभद्रस्तु नीलाद्रौ जगन्नाथान्तिके स्थित: ।

In the next chapter i.e. Ch.XXVI the episode on Nilamadhaba which is the primary name of ***Puruṣottama***, Lord Jagannātha has been narrated. The worship of Mādhab in the re-

ligious tradition of Orissa since a long time is well known it is mentioned in various ***Purānas*** that in ***Satya Yuga***. Lord Jagannātha was being worshipped as Nīlamādhaba at ***Nīlācala*** by the tribal chief ***Viśvavasu***. In course of time the same image of Nīlamādhav has been shifted to Kantilo of Cuttack district and is being worshipped there as the original form of Lord Jagannātha. In the remaining chapters, although elaborate descriptions on Jagannātha culture are not found, the allied episodes useful for the deep study and research on Jagannātha Culture has been described. The contents of these chapters beginning from chapter - 27th to 42nd include the topics like description of Bhubaneswar ; location and identification of ***Bāmanagiri*** ; the episode on ***Maṇināga,*** the story of union between ***Maināka*** and ***Maṇināga,*** appearance of Lord Śiva, the story relating to the origin and significance of the Himālaya, the episode relating to ***Maṇilabdha*** and ***Menā,*** identification and significance of ***Śivakṣhetra*** in Orissa, importance of ***Dakṣheśwar, Ladukeśwar, Rāmeśwar*** etc., the significance of river ***Mahānadī*** and location of several deities on her bank, salient features of sacred places for the pilgrimage in Orissa, origin, evolution and advantages of various oceans. Besides, in the last part of Book - II of ***Kapilasaṃhitā***, some elaborate discussions relating to epistemology like three types of ***Guṇas,*** Yoga of knowledge and the science relating to human life have been made. Any way, these contents are no way insignificant to have a deep study on Jagannātha Culture and that is the reason why the second part of the ***Kapilasaṃhitā*** has been incorporated in the present Volume.

The ***Kapilasaṃhitā*** has a great bearing on various aspects of Jagannātha Culture. In particular the chapters III, IV & V describe a lot as to Jagannātha Culture. The origin and development

of Jagannātha Cult. and the contribution of the king Indradyumna towards the construction of Jagannātha temple and four images of Jagannātha, Balabhadra, Subhadrā & Śudarśana are elaborately narrated in these chapters. The other chapters of the text, although not directly connected with the ***Nīlācala*** or blue mountain ; the abode of Lord Jagannātha, are also equally important because they bear the testimony of Orissan Culture with which the Jagannātha Culture has been associated for various reasons . No doubt, Lord Jagannātha is treated as the focal point of the both cultural and religious traditions of the people of Orissa. Although the issue as to whether the second part of ***Kapilasaṃhitā*** published recently is genuine or not is kept open for the scholarly society for further debate and deliberation. The insertion of the second part in this volume will definitely be of immense help for the scholars interested in the topic.

नीलाद्रिमहोदयः

NĪLĀḌRIMAHODAYAḤ

Nīlādri Mahodaya is another important and full-fledged treatise dealing with almost all the rituals of Lord Jagannātha. This book consists of 91 (ninety one) chapters and all the chapters give a clear picture of Jagannātha Culture in a very systematic and methodical manner for which the said scripture has become extremely popular in the circle of servitors and scholars interested in research on Jagannātha Culture. Since ***Nīlādri Mahodaya*** appears to have been written after the composition of ***Bāmadeva Saṃhitā***, it is more extensive a document that

contains so many descriptions as to the significance of ***Puruṣottama Dhāma***, ***Puruṣottama*** Culture, ***Puruṣottama*** tradition and various festivals of Lord Jagannātha held at Puri during different occasions.

There are all total 91 chapters in ***Nīlādri Mahodaya***. A total number of 6500 verses in Sanskrit are found in all these chapters. The first six chapters of this work present a picture of the king Indradyumna whereas the next seven chapters (i.e. from 7th to 13th) describe the daily rituals of Lord Jagannātha in detail. Various types of festivals (Yātrās) have been narrated in next 24 chapters, whereas in the remaining portions of ***Nīlādri Mahodaya*** excepting chapter - 91 the important methods and forms of worship and Tarpan have been minutely analyzed. The last i.e. 91st chapter of this book presents a description of ***"Śānti Karma"*** as well as the procedure of purity of temple.

As to different editions of ***Nīlādri Mahodaya*** published so far, it is observed that even during the 1st half of the 20th Century, the book was in the form of a palm leaf manuscript and for the first time the same was published with the efforts of the then Maharaj of Subarnapur of West Orissa and it was printed by Utkal Sahitya Printing Press at Cuttack in Oriya script. Then in the year 1984, Sri Sridhara Mahapatra Sharma of Sutahat, Cuttack edited this monumental work and the same was printed by Saptarshi Printers and Grantha Prakāsinī, Cuttack with the financial assistance from the Ministry of Education and Culture, Govt. of India, New Delhi. The advantage of this publication was Devanāgarī script in which the book was printed so that it could spread beyond the geographical boundaries of Orissa. Then a critical edition of ***Nīlādri Mahodaya*** was prepared by Dr.Bidyullata Ray with the help of number of manuscripts and the same has

been published by the Delhi based Classical Publication Company in the year 1998.

As to the date and authorship of ***Nīlādri Mahodaya***, the matter is still shrouded in obscurities. Nowhere in the entire work, any kind of evidence is available in this connection. Since the work is a complete one and most of the rituals described in this book are still followed in the temple, it can be told that the treatise is not so ancient as ***Vāmadevasaṃhitā*** or ***Kapilasaṃhitā*** is. Dr. Gaya Charan Tripathy opines that ***Nīlādri Mahodaya*** was written during the second part of the 18th Century (G.C.Tripathy - on the date of ***Nīlādri Mahodaya*** in Prof.A.C.Swain Felicitation Volume, BBSR - 1985 pp.112 - 119).Dr. Tripathy has based upon the Ganapati Veṣa of Jagannātha on ***Snānapurnimā*** day . This Ganapati Veṣa, as per Dr. Tripathy, was introduced during the Marahatta rule in Orissa. Dr.Tripathy's views are as follows -

"The historical facts underlying this anecdote are quite apparent. Of all the people in India the Maharastrians are perhaps most devoted to Ganesh. They introduced the Ganesh-veṣa for Jagannātha and Baladev and entrusted this task to a Math which they must have endowed with land, etc., to meet the expenditure of the Veśa (each of the above mentioned Math used to spend some Rs.800 towards this around the year 1950 according to S.N.Vidyavinoda, 1951:136). Perhaps some difficulties were felt in introducing untraditional Veśa in the regular *Niti* of the temple. It could not be prescribed for any festival taking place inside the Temple, hence was relegated to an occasion when the Deities are as such outside the Temple (on the bathing platform) and there too it was allowed to be observed more or less as a formality devoid of any religious significance. The Marahattas occupied

Orissa in A.D. 1751. (Year of the treaty between Raghuji Bhonsle and Alivardi Khan) and involved themselves in the politics of Orissa already about a decade ago. Marahatta against the Muslim army of Cutttack belonging to Alivardi Khan, the Nizam of Bengal, Bihar and Orissa. In 1761, the Marahattas took over the administrative control of the areas surrounding the ***Puruṣoṭṭama*** Ksetra and also more or less managed the affairs of the Temple. Even if the Ganeś-veśa had been introduced in the early years of the presence of Marahattas in Orissa, we arrive at A.D. 1755-60 as the anterior most limit (terminus post quem) for the composition of the ***Nīlādri Mahodaya.***"

Sri Sridhar Mahapatra in his introduction to ***Nīlādri Mahodaya*** has mentioned that this work was authored before 1435 A.D.

"ग्रन्थस्यास्य रचनाकालविषये निर्दिष्टोल्लेखप्रमाणानि नोपलभ्यन्ते । तथापि अस्मिन् यवनप्रवेशजनितशुद्धिव्यवस्था निर्द्धारिताऽस्ति इति कृत्वा ग्रन्थोऽयं १४३५ खीष्टकालात्प्रागेव प्रणीतो जात इति अनुमीयते । (भूमिका - ख - नीलाद्रिमहोदय :, १९८४, ग्रन्थप्रकाशिनी, कटक)

Dr. Bidyullata Ray in her thesis on ***Nīlādri Mahodaya*** has mentioned the date of the work as the second part of 14th Century. An over-all analysis of ***Nīlādri Mahodaya*** reveals that the work encompasses varieties of topics on Lord Jagannātha and his various rituals and festivals . Sometimes the sequence of the chapters appears to be inconsistent . For example some facts relating to car festival are described in 16th chapter of the book whereas some facts are described in Chapter - 91. It is evident from this scattered narration that the work was not composed during a particular period and by a particular author. Almost all the kings of Ganga and Surya dynasties i.e. from Chodagangadev

to Prataprudradev were all devotees of Lord Jagannātha. It was also one of their duties to codify the day-to-day happenings as well as rituals of Lord Jagannātha by their court authors those who were being patronized by them. Thus ***"Mādalāpānji"*** a great documented chronicle was developed. Similarly the composition of ***Nīlādri Mahodaya*** was under-taken by the Suryavamsi Gajapati kings and the same must have been done during the rule of more than one king . Anyway the work must have been composed before Orissa lost her independence in 1568 A.D., since the political atmosphere after 1568 A.D. was not congenial for creation and codification of such a renowned work in the midst of political turmoils. Prataprudradev was a great scholar in sanskrit as well as a patron of sanskrit literature. He was also a great devotee of Lord Jagannātha. So many Sanskrit scholars like Jagannātha Das, Kavi Dindima Jivadevacārya, Ray Divakar Mohapatra were there in his court. The priests or Poojāpandās engaged in the temple for performing the day-to-day rituals of the deities were also well- versed in Sanskrit, since the medium of Pooja was Sanskrit. It was quite possible that during his rule i.e. 16th century A.D. this work might have been composed by the scholarly priest or Poojāpandā of the temple. But Dr. G.C.Tripathy has mentioned that ***Nīlādri Mahodaya*** was written by one Lokanath Panda. He writes -

"The authorship of ***Nīlādri Mahodaya*** is usually ascribed to '***Lokanatha Panda***' and it is decidedly a work which can be shown to have been written by ***Pujapanda*** of the Jagannātha temple. Not only has the whole work been planned and composed taking the interests and needs of a Pujapanda in to account, but it is also the class of the ***Sevakas*** which has been glorified to the utmost (of.Adhy.9/20-37) in this work. They have been desig-

nated as *"Acāryas"* (which means the highest priest in a religious ceremony) and have been identified with Vishnu since they worship Vishnu with devotion and one who does this, is identical with Viṣṇu Himself (***Viṣṇuṃ yaḥ pūjayeḍbhaktyā sākṣhāḍ Viṣṇusvarūpbhāk 9/32)***. The king should try his best to keep them content since only if they are content, Viṣṇu is content and when Viṣṇu is content, the whole world is content (9/22). This undue glorification of the ***Poojāpandās*** often evokes resentment of the higher class of Brahmin priests like the ***Rājaguru*** and the ***Deula Purohita*** in whose circle the NM does not enjoy the same popularity, much less the same authority."

However, exact name of the author of ***Nīlādri Mahodaya*** is not known so far. It is also quite possible that a number of Sanskrit Pandits were assigned the responsibility of writing various chapters on different aspects of Jagannātha Culture and subsequently all the chapters were compiled together. It is evident from the fact that some chapters differ from other ones particularly in respect of their style of presentation and use of vocabularies.

IS *NĪLADRI MAHODAYA* COMPLETE ?

All the scholars those who have worked on ***Nīlādri Mahodaya*** have arrived at a conclusion that the complete ***Nīlādri Mahodaya*** consists of 91 chapters. Palm-leaf manuscripts discovered so far also corroborate this view advanced by the scholars. But the last but one verse of the 91st chapter creates a confusion in the minds of the readers as regards the completion of this work. The verse runs as follows -

एतद् बुद्ध्वा नृपश्रेष्ठ विभोर्नीतिं समाचर ।
अन्यद् यद् विषयं राजन् तवाग्रे कथयाम्यहम् ।।

Here it seems that the author desires to describe something more regarding the other aspects of Jagannātha culture. But these descriptions are not available because the said chapter i.e. 91st chapter is claimed to be the last one. Moreover in the end of the 91st chapter, it is written that -

"इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकनवतितमोऽध्याय:"

As mentioned in the end of each proceeding chapter instead of the words like "इति श्रीसूतसंहितायां नीलाद्रिमहोदय: समाप्त:". Usually the authors use the words "सम्पूर्ण:" or "समाप्त:" in the end of their works after completing the same. But nowhere in the last chapter of palmleaf manuscripts discovered so far the word like "सम्पूर्ण:" or "समाप्त:" is mentioned. On the otherhand it creates a sense of curiosity in the minds of readers or listeners by reciting "अन्यद् यद् विषयं राजन् तवाग्रे कथयाम्यहम्" obviously with an intention to speak more. Now question arises what are these "अन्यद् विषयम्" or "other subjects" and when did the author say all those things as per his commitment ? It appears that the *Nīlādri Mahodaya* is incomplete or the remaining chapters in which the author must have depicted "अन्यद् विषयम्" or "other subjects" as per his aforementioned assurance are not traceable. In the present Volume *Nīlādri Mahodaya* consisting of 91 chapters has been incorporated.

SUBJECT MATTERS

As mentioned earlier, ***Nīladri Mahodaya*** is a full-fledged treatise, which deals with almost all the aspects of Jagannāthaa Culture in 91 Chapters. The chapterwise subject matter in a nutshell is as follows -

Chapter - 1 : Significance of ***Puruṣoṭṭamakṣhetra*** and ***Rohinī Kunda,*** fears of ***Yama*** or the God of death to enter into this ***Kṣhetra.***

Chapter - 2 : The Indradyumna episode, Indradyumna, the king of Malab was a great Vaishnavite and the description of the significance of ***Dārumaya Bigraha*** or wooden image of Nilamadhab, the earlier form of Lord Jagannāthaa before his sending of ***Bidyāpati*** ; the messenger to Puri and collection of more information regarding ***Puruṣoṭṭama*** dham through him; preparations of king Indradyumna to visit to Puri to have a ***Darśana*** of Vaiṣṇava Lord ***Puruṣoṭṭama*** or ***Nīlamādhaba*** ; while coming Indradyumna feels the significance of various sacred places of Orissa like Mahānadī, Carcikā, Cakratīrtha, Ekāmra forest, Bhubaneswar and Ananta Vāsudev.

Chapter - 3 : Significance of the route by which Indradyumna came to Puri. Description of the origin of Vilweśwara and Kapoteśwar, arrival of Indradyumna at Puri and visit of Nīlakantheśwar ; dialogue between Narad and Indradyumna regarding ***Nīlamādhaba*** ; visit of Ṣrī Nrusingha by Indradyumna in Puri ; description of a great ***Kalpa vṛkṣhya*** or "wish granting tree" ; worship of Nrusingha and performance of Aśwamedha sacrifice ; the creation of Indradyumna tank during the performance of Aśwamedha Yajña ; Indradyumna's dream in the night and ***Viṣṇu Darśan*** in his dream ; both Narada and Indradyumna's visit to ***Mahodadhi*** in search of the sacred log of wood of Lord Krishna ; bringing of that log of wood from the ocean and the placement of the same on the ***Mahāvedi*** and its worship by the king Indradyumna, appearance of Lord Vishnu in the form of an old carpenter ; beginning of the construction of the wooden image of Jagannātha, Balabhadra and Subhadrā etc.

Chapter - 4 : Carving out of the wooden images of seven forms of Lord Viṣṇu (सप्तधामूर्त्तिनिर्माणम्) ; construction of the temple

and journey of Indradyumna to ***Brahmāloka*** to invite Lord ***Brahmā*** for consecration of the temple ; arrival of Gods and Goddesses at ***Nīlādri*** for consecration ceremony etc.

Chapter - 5 : Claim made by the Galamādhaba king for constructing the temple ; controversies ; settlement of controversies ; consecration of the temple by Lord ***Brahmā***; construction of three chariots, installation of sevenfold images in the sanctum sanctorum. etc.

Chapter - 6 : Prayer offered by Lord ***Brahmā***; description of daily rituals particularly the rituals of morning hours .

Chapter - 7 & 8 : Description of daily rituals of Lord Jagannātha.

Chapter - 9 : Various kinds of servitors.

Chapter - 10 : A list of ***Upachāra & Naivedya*** elements.

Chapter - 11 : Procedure for offering ***Naivedya*** to Lord.

Chapter - 12 : Special Poojas to be offered to Lord on specific days like Wednesday, Thursday, Sunday, Ekādaśī (eleventh day of each fortnight), Amāvāsyā (No-moon-day) etc.

Chapter - 13 : Performance of ***Mahāsnāna*** in case **Javanas** enter into the temple.

Chapter - 14 : Description of ***"Snānotsava"*** or bathing ceremony of Lord Jagannāthaa on the full-moon-day of the month of ***Jyeṣtha.***

Chapter - 15 : ***"Aṇavasara Poojā Vidhi"*** or procedure of worship of the Idols during their stay inside the close door room for fifteen days i.e. from the day of bathing ceremony to ***"Ubhā Amāvāsyā"*** or no moon day of the following month during which Lord makes no appearance.

Chapter - 16 : Description of the celebration of car-festival on the second day of the bright fortnight of the month of ***"Aṣadha"***.

Chapter - 17 : Description of the sleeping ceremony.

Chapter - 18 : ***"Dakṣhināyana Yātrāvidhi Varnanam"***

Chapter - 19 & 20 : Description of the Birth Ceremony of Lord Balabhadra.

Chapter - 21 : Description of certain celebration in the temple during the month of ***"Bhādrab"***

Chapter - 22 & 23 : Description of the appearance of Lord Krishna on the 8th day of the dark fortnight of the month of ***Bhādrab*** and description of the birth ceremony of Goddess Durga.

Chapter - 24, 25, 26 & 27 : Description of some other important functions in the temple during the month of ***Bhādrab.***

Chapter - 28 : Description of important functions in the temple during the month of ***Āświna*** particularly the narration of Durga Pooja.

Chapter - 29 : Description of the rising ceremony of Lord Jagannātha on the 11th day of the bright fortnight of the month of ***Kārtika*** .

Chapter - 30 & 31 : Functions during the month of ***Mārgaśīrṣa*** with special reference to ***"Kṣhetra Bhramaṇa"*** .

Chapter - 32 & 33 : Functions during the month of ***Pauṣa*** with special reference to ***Puṣyābhiṣeka ;*** Description of ***Makara Saṃkranti.***

Chapter - 34 : Functions during the month of ***Phālguna*** with special reference to ***Dolayātrā*** or the swing ceremony of the Lord.

Chapter - 35 : Rituals during the month of ***Caitra*** with special reference to offering of ***Damana*** (A kind of sacred leaf)

Chapter - 36 : Descriptions of functions and rituals during the month of ***Baiśakha*** with special reference to ***Candana***

Yātrā & the birth ceremony of Lord Nrusingha and commencement of the constructions of the chariots for car-festivals.

Chapter - 37 : Description of some rituals in the temple during the month of ***Jyeṣtha*** .

Thus a detailed description of the main Annual Festivals or Yatras is found from Chapter - 14 to 37 and then an elaborate picture of the daily rituals of Lord Jagannātha Balabhadra and Subhadrā including ***"Tarpaṇa"*** and ***"Homa" etc.*** are found in the ***Adhyāyas 38 to 90.*** The last Chapter is devoted to the purifying rights to be observed in the temple on the entrance of ***Yavanas*** as well as of inauspicious animals and birds. As regards the contents of ***Nīlādri Mahodaya,*** Prof.G.C.Tripathy observed that -

"One could perhaps logically divide the contents of ***Nīlādri Mahodaya*** into two parts : the first part running upto Adhy.37 and the second starting from Adhy.38 and going till end. The first describes the Indradyumna legend, the daily and periodical ceremonies and the different yearly festivals whereas the second part, which in spite of its 54 ***Adhyāyas*** is only about three-fourth of the first part in extent, is solely devoted to Puja. The first part shows considerable influence of the ***Puruṣoṭṭama Māhātṃya*** of ***Skanda Purāna,*** not only in the subject matter but also in the arrangement of this matter. Both the works begin with the Indradyumna legend and end with the description of the main and subsidiary Yātrās (yearly festivals). The second part, however, exhibits more originality and shows acquaintance with some ***Pancarātra*** texts including the ***Nārada Pancharātra.*** It is one of the most detailed descriptions of Puja that we possess of Jagannāthaa."

CULTURE OF JAGANNĀTHA AS REFLECTED IN THIS WORK

As observed from the contents of ***Nīlādri Mahodaya*** described above ; the culture of Lord Jagannātha has found its fullest expression in the said book. Not a single aspect of Jagannātha culture has been left un-sung and un-noticed in the pages of ***Nīlādri Mahodaya***. All the important aspects of ***Kṣhetra***, construction of monumental shrine at Puri, carving out of the mysterious images of Lord Jagannātha, Balabhadra, Subhadrā and Sudarśana ; different annual festivals, various attires of Lord Jagannātha and daily rituals have been elaborately described in this monumental work for which the work has assumed great importance in the history and tradition of Jagannātha Culture.

Professor H.K. Satapathy
Principal Investigator

Activities of Orissa Chair in a nutshell and its further plan to promote Jagannath Culture, Jayadev Literature and Shri Chaitanya Philosophy

by

Director, Orissa Chair

THE EFFORTS

Orissa Chair was established in this Vidyapeetha with the munificent grant sanctioned by the Government of Orissa. **Shri Janaki Vallabh Pattanaik,** the then Chief Minister of Orissa was kind enough to sanction an amount of Rs.50 lacs to institute a Chair in this Vidyapeetha to carry out research and extension activities on **Shri Jagannatha culture, the philosophy of Shri Chaitanya Mahaprabhu and the poetry of Shri Jayadeva. Prof. S.B.Raghunathacharya,** the then Vice-Chancellor of the Vidyapeetha was instrumental in pursuing the Orissa Government in establishing the Chair. **Prof. Ramaranjan Mukherjee,** former Chancellor of this Vidyapeetha played a key role in getting the chair established.

INAUGURATION

The Chair was formally inaugurated in the year 2000. **Justice Shri Ranganath Mishra,** former Chairman, Central Board of Sanskrit Education and former Chief Justice Government of India inaugurated the Chair on 15th October, 2000. Justice Ranganath Mishra, speaking on the occasion observed that the

Vidyapeetha is the right institution for carrying out research on the subject. **Prof. Harekrishna Satapathy** of Shri Jagannatha Sanskrit University delivered the key note address on the occasion.

THE SOURCE

The activities of the Chair are carried out with the interest of the corpus fund of Rs.50 lacs sanctioned for the purpose.

OBJECTIVES

- ☞ To undertake research on Shri Jagannatha culture.
- ☞ To undertake research on Shri Chaitanya Mahaprabhu and His philosophy .
- ☞ To undertake research on the poetry of Shri Jayadeva.
- ☞ To propagate Shri Jagannatha culture and universal brotherhood.
- ☞ To bring out rare works on all the three subjects.
- ☞ To organize Workshops, Seminars and Conferences on the subjects.
- ☞ To organize extension lecture series.
- ☞ To organize Orissan Culture Day.
- ☞ To prepare bibliography of works available on the subjects.
- ☞ To organize cultural exchange tour of students.

THE FAMILY MEMBERS OF ORISSA CHAIR -

1st Co-ordinator -	Dr. R.Devanathan, Reader in IASE, RSVP, Tirupati from Apr.2000 to 29.03.2004
2nd Co-ordinator -	Professor (Dr.) J.Ramakrishna, Professor of Vyakaran, RSVP, Tirupati from 05.04.2004 to till now.

RESEARCH ASSOCIATES

1- Dr.S.Dakshinamurthy Sarma from 16.04.2000 to 16.10.03
2- Shri Kailash Chandra Dash from 16.04.2000 to 25.03.03
3- Shri Kailash Chandra Nanda from 16.04.2000 to 10.09.02
4- Dr.Radhagovinda Tripathy from 10.04.2003 to 05.07.04
5 - Dr. Dillip Kumar Mishra from 10.04.2003 to till now
6 - Dr. Gyana Ranjan Panda 18.08.2004 to till now
7 - Shri Ajaya Kumar Nanda from 18.08.2004 to till now

ACTIVITIES SO FAR

The Chair has organized three-day National Seminar on the cult of Shri Jagannatha, the philosophy of Shri Chaitanya Mahaprabhu and the poetry of Shri Jayadeva from 11th September to 13th September in the year 2001. The Seminar was inaugurated by Prof. Ramaranjan Mukherjee and was attended by many renowned scholars. The proceeding of the seminar has been brought out.

A lecture series was organized on the eve of Orissa Day from 1st April to 3rd April 2002. Prof. Sinirudha Dash, Professor and Head, Department of Sanskrit, University of Madras, Dr. Harekrishna Mahapatra, S.K.S. Vidyapeetha, Puri and Shri Jami Ayusman Prusthy of Central School, Belgaun, Karnataka have delivered lectures on the subjects. In addition to these lectures, Vidyapeetha students Shri Gyanaranjan Panda, Shri Dillip Kumar Mishra and Shri Saroj Kumar Padhi have also delivered lectures on the subjects.

The second National Seminar was organized at Kolkata under the able guidance of Prof.Ramaranjan Mukherjee. The seminar was held for two days on 18th and 19th of January, 2003.

Eminent scholars have participated in the seminar and presented research papers on the subjects. The proceedings of the seminar is being brought out. Shri Janaki Ballabh Pattanaik ji, former Chief Minister of Orissa had delivered the Inaugural Address and Prof.Vachaspati Upadhyaya, Vice Chancellor of SLBSRS Vidyapeetha, New Delhi had delivered the Key note Address. The Seminar was presided over by our Chancellors Dr.V.R.Panchamukhi. Prof.D.Prahalada Char, Vice Chancellor of the Vidyapeetha was present on all the two days and presided over the valedictory function.

The second Orissa Culture Day was celebrated on 1st April, 2003. Dr.Chakradhara Behera, senior lecturer in the Department of Sanskrit, Pondicherry University has delivered a lecture on Shri Jagannatha cult. Dr.V.R.Panchamukhi, Chancellor of our Vidyapeetha presided over the function and felicitated the guest. Prof.D.Prahlada Char, Vice Chancellor addressed the gathering and briefly explained the objectives of the chair.

The Chair has undertaken the work of bringing out the rare and unpublished commentary of Sarvangasundaritika on Gitagovinda of Jayadeva. The manuscript is copied and the editing work is progressing and the book will be published soon.

The Chair has also undertaken the work of bringing out the bibliography of works on all the three aspects of the Chair. Already the Chair has collected details regarding a good number of works on the subjects and the first volume of the same has published.

The Chair is also publishing an Academic Calendar every year with the aim to propagate literature of Shri Jagannatha, Shri Chaitanya and Shri Jayadeva. The Chair organized competitions

among the students of the Vidyapeetha and others on the subjects relating to Jagannatha Culture, Jayadeva literature and Sri Chaitanya Philosophy

The Chair has also organized several cultural meets at Shri Uttaradhi Shrivaishanava Muth, Tirupati on Orissan culture.

FUTURE PLANS

1. Bringing out a collection of available Sanskrit literature both in print and in manuscript form related to Shri Jagannatha.
2. Launching a Web-site on Orissa Chair.
3. Organizing Slide-shows on the themes of the Chair.
4. Organizing training camps for the students of the Vidyapeetha on the subjects.
5. Organizing Culture Capsule activities on the subjects.
6. Introducing Shri Jagannatha Culture as an optional subject at Shastri level.
7. Organizing short-term certificate course on the subject for the benefit of the students. Who are interested to know the culture heritage of our nation.
8. Encouraging independent individual projects.
9. Bringing out a single volume of Jayadeva literature with commentary.
10. Bringing out a concise philosophical view of Shri Chaitanya Mahaprabhu.

------------ 0 ------------

ACKNOWLEDGMENT

At the outset, I express my deep sense of gratitude to the U.G.C. as well as the authorities of Shri Jagannath Sanskrit Vishvavidyalaya, Shrivihar, Puri for supporting a Major Research Project entitled ***"A Critical Survey of Sanskrit Works on Jagannath Culture"*** under which this volume has been prepared. The U.G.C.'s support was confined only to the critical survey of Sanskrit works related to Jagannath Culture and accordingly so many Sanskrit works have been critically surveyed and analysed. But the Project did not have any provision to support for the publication of the outcome or findings of the work. So I sought the co-operation of Rashtriya Sanskrit Vidyapeeth (Deemed University), Tirupati, where a chair was installed to promote Jagannath Culture under the patronage of Shri J.B.Pattanaik, ***Prajnana Vachaspati***, the then Chief Minister of Orissa. I requested the then Vice-Chancellor, Professor D.Prahallada Char to take necessary steps for publication of complete sanskrit works on Jagannath Culture. I remember his un-conditional willingness to take up the printing work of the complete Sanskrit works on Jagannath Culture by the Orissa Chair of his University. I convey my regards to the former Vice-Chancellor, Prof. Prahallada Char as well as the present Vice-Chancellor, Prof. K.E.Govindan for making provision for publishing this work. My thanks are due to Dr. R.Devanathan, Ex-Director and Dr.J.Ramakrishna, present Director of the Orissa Chair for their help and co-operation for bringing out some significant works on Jagannath Culture including the present one in the interest of the scholars. I am also thankful to Sri S.A.Anand, Finance Officer of the Vidyapeeth for taking keen interest both for the development of Orissa Chair and bringing out this publication. All other officers and scholars associated with the Chair, on behalf of which the publication of this volume has been undertaken, deserve appreciation for their constant efforts to make the publication a success. No doubt, the scholarly contributions of Dr.Dilip Kumar Mishra, Shri Ajaya Kumar

Nanda, Dr. Gyanaranjan Panda of Orissa Chair of R.S.Vidyapeeth, Tirupati and Sri Somanath Dash, Project Fellow of Shri Jagannath Sanskrit Vishvavidyalaya, Puri in respect of publication of this work are praiseworthy and I wish them a bright future in their academic journey.

The valuable guidance given by Professor G.K.Brahma, a scholar of international repute and a doyen of Jagannath Culture for smooth implementation of the Project is unforgettable. I express my profound sense of gratitude to him.

All others connected with the process of publication of the work deserve our sincere thanks. May Lord Jagannath and Lord Venkatnath bless them for their divine endeavour.

Professor H.K.Satapathy
Professor & Head, Sahitya
&
Principal Investigator
Shri Jagannath Sanskrit Vishvavidyalaya, Puri



JAGANNATH TEMPLE AT PURI

CONTENTS

Sl	Subjects		Pages
I	Foreword		I - III
II	Introduction		I - XLIII
III	Acknowledgement		a - b
IV	Activities of Orissa Chair		i - v
वामदेवसंहिता			१ - १७९
१	अध्याय:	श्रीक्षेत्रमाहात्म्यम्	१ - ५
२	अध्याय:	शंखक्षेत्रपरिचय:	६ - ९
३	अध्याय:	विद्यापते: नीलमाधवदर्शनम्	१० - १३
४	अध्याय:	इन्द्रद्युम्ननारदयो: श्रीक्षेत्रं प्रति आगमनम्	१४ - १८
५	अध्याय:	दारुविग्रहनिर्माणम्	१९ - २३
६	अध्याय:	श्रीमन्दिरे देवानां बालधूपादिपूजाविधि:	२४ - ३३
७	अध्याय:	द्वात्रिंशदुपचारवर्णनम्	३४ - ३७
८	अध्याय:	धूपकालनिर्णय:	३८ - ४१
९	अध्याय:	पाकशालाविधि:	४२ - ४७
१०	अध्याय:	रन्धनभाण्डनिर्णय:	४८ - ५०
११	अध्याय:	मन्दिरसेवकलक्षणम्	५१ - ५७
१२	अध्याय:	पूजापात्रलक्षणम्	५८ - ६०
१३	अध्याय:	अमावास्याविधि:	६१ - ६५
१४	अध्याय:	स्नानोत्सववर्णनम्	६६ - ७०
१५	अध्याय:	नेत्रोत्सववर्णनम्	७१ - ७६
१६	अध्याय:	गुण्डिचायात्रावर्णनम्	७७ - ८३
१७	अध्याय:	गुण्डिचायात्रावर्णनं नानाविधोत्पातवर्णनम्	८४ - ८७

१८ अध्यायः नानाविधोत्पातवर्णनं तत्र शान्तिविधानम् ८८ - १०४

१९ अध्यायः १०५ - १०८

शयनैकादशी, कर्कटसंक्रान्तिः, पार्श्वपरिवर्त्तनैकादशी च

२० अध्यायः उत्थापनैकादशी, प्रावरणषष्ठी, पुष्याभिषेकयात्रा च १०९ - ११२

२१ अध्यायः मकरसंक्रान्तिः, दोलयात्रा च ११३ - ११९

२२ अध्यायः दमनकचतुर्द्दशी, चन्दनयात्रा च १२० - १२५

२३ अध्यायः क्षेत्रपरिक्रमाविधिः १२६ - १३२

२४ अध्यायः १३३ - १३६

वकुलामावास्या, भैमी एकादशी, रामनवमी, नृसिंहजन्म च

२५ अध्यायः रुक्मिणीविवाहः, हरिजन्माष्टमी प्रभृतिविधानं च १३७-१४३

२६ अध्यायः विविधा उपयात्राः, शारदीयदुर्गापूजा च १४४-१४७

२७ अध्यायः जगन्नाथस्थितिकालनिर्णयः १४८-१५२

२८ अध्यायः अलभ्ययोगविवरणम् १५३-१६४

२९ अध्यायः प्रतिष्ठाप्रकरणम् १६५-१६७

३० अध्यायः उत्पातविधौ शान्तिविधानम् १६८-१७१

३१ अध्यायः उत्पातनिरूपणम् १७२-१७६

३२ अध्यायः उत्पातदर्शने शान्तिक्रियाः १७७-१७९

कपिलसंहिता **१८०-४१३**

१ अध्यायः १८०-१८२

ऋषिप्रश्नः, पुष्करवने समुपार्जितपुण्यपापयोः प्रभावश्च

२ अध्यायः १८३-१८६

सुक्रान्तितपस्या, गङ्गाविर्भावः, महानद्युत्पत्तिः, महानद्याः माहात्म्यवर्णनञ्च

३ अध्यायः १८७-१९१

नीलाचलमाहात्म्यम्, इन्द्रद्युम्नराजं प्रति भगवतः वरप्रदानञ्च

४ अध्यायः १९२-१९४

इन्द्रद्युम्नस्य नीलाचलागमनम्, दारुमयीचतुर्धा मूर्त्तिप्रतिष्ठा, इन्द्रद्युम्नस्य मोक्षप्राप्तिश्च

५ अध्यायः नीलाचलस्य विभिन्नतीर्थस्थानतपस्स्थलानां वर्णना १९५-१९९

६ अध्यायः २००-२०५

मैत्रेयवनमाहात्म्यं, शाम्बशापमुक्त्युपाख्यानम्, अर्कक्षेत्रस्य विभिन्नतीर्थ-पुण्यस्थलानां वर्णना च

७ अध्यायः २०६-२१०

विरजाक्षेत्रमाहात्म्यं, विरजाक्षेत्रस्य विभिन्नतीर्थ-पुण्यस्थलानां वर्णना, मान्धातृराजस्य शृगालत्वप्राप्तिः, मोक्षश्च

८ अध्यायः विरजाक्षेत्रस्थतीर्थमाहात्म्यकथनम् २११-२१३

९ अध्यायः २१४-२१८

कैलास (कपिलास) पर्वतशिखरेश्वरमहादेवपयोमृततीर्थवर्णना, राज्ञः सौदासस्य मुक्तिश्च

१० अध्यायः एकाम्रवनवर्णना २१९-२२१

११ अध्यायः २२२-२२७

नारदकृतैकाम्रवनवर्णना, तत्र सपरिवारं महादेवगमनमवस्थानञ्च

१२ अध्यायः बिन्दुसरोवरोत्पत्तिः, तस्य माहात्म्यकथनञ्च २२८-२३०

१३ अध्यायः २३१-२३६

एकाम्रक्षेत्रस्य पवित्रस्थानानि, त्रिभुवनेश्वरमहिमा, पार्श्वदेवदेवीवर्णना, एकाम्रवृक्ष-तिक्तशाकवृक्षमहिमा, इन्द्रस्य तपस्या, विजयप्राप्तिश्च

१४ अध्यायः २३७-२४२

अनन्तवासुदेवमाहात्म्यं, ब्रह्मेश्वरप्रभृतिशैवपीठवर्णना, सूक्ष्मेश्वरतीर्थे पीण्डदानमहत्त्ववर्णना च

१५ अध्यायः २४३-२४६

एकाम्रक्षेत्रस्य रामेश्वरादीनां केषाञ्चित् पीठानां तीर्थस्थानानाञ्च माहात्म्यम्, इन्द्रेश्वरोत्पत्तिवृत्तान्तश्च

१६ अध्यायः २४७-२५३

एकाम्रक्षेत्रं हिमालयस्यागमनं, दक्षयज्ञः, सतीदेहत्यागः, शिवस्य काशीवासः, एकाम्रागमनं केदारेश्वरमन्दिरनिर्माणञ्च

१७ अध्यायः २५४-२६१

हिमवता गङ्गास्तुतिः, गङ्गायाः नवधा विभाजनं,गङ्गायाः दशधाराः, स्वर्णकूटगिरौ एकाम्रवनमाहात्म्यम्, गन्धवतीनदीतटे विद्यमानानां सूक्ष्मेश्वर-आम्रातकेश्वर-मध्यमेश्वराणां परिचयः, गन्धवत्यां पिण्डदान-तर्पणफलम्, पर्जन्येश्वरप्रभृतिपीठ-तीर्थमाहात्म्यकथनं, ब्राह्मणानां मोक्षप्राप्तिश्च

१८ अध्यायः २६२-२७०

देवीपादहरातीर्थमाहात्म्यं, कीर्त्तिस्तथा वासः, असुरवधः, चातुर्मास्य-व्रतविधिवर्णना, माहात्म्यकथनञ्च

१९ अध्यायः २७१-२७४

सप्तयात्रावर्णनम्, ऋषीणाम् एकाम्रगमनं, तत्र मुक्तिलाभः, उत्कल-माहात्म्यवर्णनञ्च

२० अध्यायः २७५-२७७

भार्गवीपुष्पभद्रा (कुशभद्रा)-दधिस्रवा(दया)-प्राचीनदीनां माहात्म्य-वर्णनम्

२१ अध्यायः २७८-२८१

ज्ञानयोगवर्णना, वैष्णव-शैवलक्षणं, विष्णुशिवयोः अभेदत्वपरिकल्पनञ्च

२२ अध्यायः उत्कलदेशस्थितदेवतानां क्षेत्रनिरूपणम् २८२-२८९

२३ अध्यायः दधिभाण्डेश्वर-सुवर्णेश्वरकथनम् २९०-२९७

२४ अध्यायः	वाराहपीठनिरूपणम्	२९८-३०४
२५ अध्यायः	सिद्धबलरामप्रसङ्गः	३०५-३०९
२६ अध्यायः	श्रीनीलमाधवमाहात्म्यम्	३१०-३१८
२७ अध्यायः	यक्षस्थाननिरूपणं भुवनेश्वरनिर्णयश्च	३१९-३२६
२८ अध्यायः	वारुणीगिरिनिरूपणम्	३२७-३३३
२९ अध्यायः	मणिनागोपाख्यानम्	३३४-३३८
३० अध्यायः	मैनाकमणिनागसङ्गमकथनम्	३३९-३४५
३१ अध्यायः	शिवागमनम्	३४६-३४९
३२ अध्यायः	हिमालयसम्भवकथनम्	३५०-३५५
३३ अध्यायः	मणिलब्धमेनयोरुपाख्यानञ्च	३५६-३५८
३४ अध्यायः	शैवक्षेत्रनिरूपणम्	३५९-३६४
३५ अध्यायः	दक्षेश्वरमाहात्म्यम्	३६५-३७२
३६ अध्यायः	हिमालयस्य स्वस्थानप्रवेशः लडुकेश्वरोपाख्यानञ्च	३७३-३८२
३७ अध्यायः	रामेश्वरादिविशेषप्रसङ्गकयनम्, रामेश्वर-नीलकण्ठपरिचयः, पञ्चपाण्डवैः पञ्चशिवानां पूजाप्रसङ्गः, पाण्डवगुहा, तत्र रामस्य वनवासकालीनस्थितिः, सुरेश्वरपरिचयश्च	३८३-३८५
३८ अध्यायः	महानदीतीरस्थितदेवताकथनम्	३८६-३९३
३९ अध्यायः	पुण्यक्षेत्रसमावेशकथनम्	३९४-३९६
४० अध्यायः	द्वीपसमुद्रकथनम्	३९७-४०१
४१ अध्यायः	गुणत्रयप्रसङ्गः ज्ञानयोगकथनं च	४०२-४०६
४२ अध्यायः	जीवतत्त्वकथनम्	४०७-४१३

नीलाद्रिमहोदयः **४१४-४७६**

१ अध्यायः ४१४-४२१

सूतं प्रति शौनकादिमुनीनां क्षेत्रफलप्रश्नः ; सूतमुनिकृतपुरुषोत्तम-क्षेत्रप्रशंसा तत्स्वरूपवर्णनञ्च ; नीलमाधवदर्शनपूर्वकं रोहिणीकुण्डजल-पानात्काकस्य चतुर्भुजादिविष्णुसारूप्यवर्णनम् ; पुरुषोत्तमक्षेत्रारण्यादौ यमस्य प्रवेशाभाववर्णनम्।

२ अध्यायः ४२२-४३५

देवपूज्यस्य मणिमयविग्रहस्य नीलमाधवस्य कथं मानवपूज्यत्वं दारु-स्वरूपत्वं चाभूदित्यादिप्रश्नः ; विष्णुपूजकेन्द्रद्युम्नमालवपतिगृहप्रविष्ट-जटिलकर्त्तृकनीलमाधवपुरुषोत्तमक्षेत्रमहिमवर्णनम् ; तस्यैवान्तर्द्धानानन्तरं स्वपुरोहितभ्रातृविद्यापतेरिन्द्रद्युम्नेन पुरुषोत्तमक्षेत्रदर्शनार्थं प्रेरणम् ; विद्यापतेर्विश्वावसुना सह समागमपूर्वककथोपकथनम् ; तेन नीलाद्रौ नीलमाधवदर्शनम् ; विद्यापतिकृतनीलमाधवस्तोत्रम् ; देवदर्शन - प्रसादभक्षणाभ्यां गृहं न गच्छामीति ब्रुवतो विद्यापतेर्देवशवरयो-र्वचनात्स्वपुर-गमनम् ; स्वदेशागतं विद्यापतिं प्रति इन्द्रद्युम्नस्य नीलाद्रि-वृत्तान्तप्रश्नः तन्मुखात्क्षेत्रमाहात्म्यश्रवणञ्च ; माधवमाल्यग्रहणा-वसरेऽकस्मान्नारदप्रवेशः ; नारदमुखाद्योगेन क्लेशेनाथवाऽक्लेशेन नीलाद्रिनायकदर्शनान्मोक्ष इति श्रवणाद्विद्यापतिजटिलयोर्वचनाच्च मुनिस्वामात्याभिः सहेन्द्रद्युम्नस्य नीलाद्रिप्रस्थानम् ; महानद्युत्तरतीरस्थ-नृपपृष्टेन मुनिना महानदी-सुवर्णमेरु-माधव-चर्च्चिका-चक्रतीर्थ-एकाम्रविपिन-भुवनेश्वरानन्तशायिमहिमावर्णनम् ।

नारदोपदेशादिन्द्रद्युम्नस्य एकाम्रविपिने विन्दुसरस्नानदि- भुवनेश्वरानन्तशायि विष्णुदर्शनं च ; बिल्वकपोतेश्वरयोर्मध्यभागस्थितमिन्द्रद्युम्नं प्रति नारदेन तयोरुत्पत्तिकथनम् ; क्षेत्रप्रविष्टस्य राज्ञः शङ्खाग्रे नीलकण्ठदर्शनम् ; क्षेत्रस्य मार्गे गछतो नृपस्य वामभुजचक्षुस्फुरणरूपाशुभशकुनदर्शनात् मम किं फलं भविष्यतीति नारदं प्रति प्रश्नः ; पूर्वोक्तशुभशकुनदर्शनात्ते कुशलं माधवदर्शनादिकं भविष्यतीति नारदस्योत्तरम् ; माधवदर्शनरूपवाक्यश्रवणाद्विषण्णमिन्द्रद्युम्नं प्रति सहस्रेश्वरस्य दर्शनं भविष्यतीति नारदप्रबोधः ; अत्रैव सैन्यस्थापनपूर्वकं मया महानीलाद्रिं गछेति नारदोपदिष्टस्य नृपस्य कृष्णागुरुतरुमूले नृसिंहमूर्त्तिदर्शनम् ; नृपस्य नारदेन कल्पवृक्षनीलमाधवस्थानदर्शनम् ; दारुब्रह्मदर्शनावधि नृपं प्रति मुनेः नृसिंहपूजोपदेशः मुन्युपदेशेन सहस्राश्वमेधाचरणात्तव विष्णुप्रत्यक्षो भविष्यतीत्याकाशवाणी ; नीलकण्ठस्य दक्षिणे नृसिंहस्थापनार्थं प्रसादनिर्मितिं कुरु इति नारदोपदेशः ; नृसिंहप्रासादनिर्मितिप्रतिष्ठोपस्थापनञ्च ; नारदाज्ञया यज्ञशालानिर्मितिसामग्रिसंग्रहान्यराजाह्वानपूर्वकं सहस्राश्वमेधकरणम् ; यज्ञावसानसमये दानार्थमानीतानां कोटिकोटिगवां खुरघातादिन्द्रद्युम्नसरसः उत्पत्तिस्तस्मिन् स्नानदानश्राद्धादौ फलं च ; यज्ञसमाप्त्यवसरे रात्रौ स्वप्नावस्थायां विष्णुमूर्त्तिदर्शनम् ; राजमुखात्स्वप्नवृत्तान्तं श्रुत्वा समुद्रे दारुदर्शनं भविष्यतीति नारदवचनम् ; नारदेन सह समुद्रे स्नानार्थं गच्छतो नृपस्य प्रातर्दारुदर्शनं यज्ञसमापनं दारोरानयनं यज्ञवेद्यां स्थापनपूर्वकं पूजनं च ; विष्णुमूर्त्तिनिर्माता को भविष्यतीति संशयाविष्टयोर्मुनिनृपयोः पुरत आकाशवाणी ; वार्द्धकीमूर्त्तिधरस्य विष्णोः प्रवेशस्तेन मूर्त्तिप्रस्तुत्यारम्भः ।

४ अध्यायः ४४९-४५९

जगदीशस्य निर्माणसमये दिव्यगीतनृत्यपारिजातपुष्पवृष्ट्यादि ; पञ्चदशदिनान्तरं सप्तधा विष्णोराविर्भावः ; तस्मिन्नेव समये नारदवचसा विष्णुनिर्मितिगृहस्य कपाटोत्फेटनं सप्तधा विष्णोः दर्शनं च ; जगदीशस्य स्थापनार्थं प्रासादनिर्माणारम्भः ; प्रासादनिर्मितौ मन्त्रिणं निजात्मजं च नियोज्य प्रासादप्रतिष्ठार्थं नारदेन सह नृपस्य ब्रह्मानयनोद्देशेन ब्रह्मपुरगमनम् ; ब्रह्मणः सामगानसमये प्रवेशन्मानुषं प्रति एकसप्ततियुगानन्तरम् इन्द्रद्युम्नस्य ब्रह्मणा सह सम्भाषणम् ; तवाह्वानाद् गमिष्यामि त्वं सम्भारान् संग्रहितुं नारदेन सह शङ्खपद्मनिधी गृहीत्वा गच्छ इति ब्रह्मण आज्ञा देवपृष्टेन ब्रह्मणा जगदीशस्य ब्रह्मपुरादौ स्थितिकालवर्णनम् ; ब्रह्माज्ञयागतानां नारदादिमुनिसहितानां देवानां नीलाद्रौ प्रवेशः

५ अध्यायः ४६०-४७८

सूतं प्रति ब्रह्मलोकागतैः पूर्वोक्तमुनिदेवनृपैः किं कृतमिति ऋषीणां प्रश्नः ; देवकृतविष्णुपूजनादिप्रासाददर्शनं प्रासादाद्गालवस्थापितमाधव-मूर्त्तिबहिष्करणादिकं च गालवाय तद्भृत्यैर्निवेदनम् ; क्रोधाद् विरजामण्डलादागतं गालवं प्रति नारदेन इन्द्रद्युम्नस्य पूर्ववृत्तान्तवर्णनं तच्छ्रवणात्तस्य सन्तोषश्च ;शङ्खपद्मनिधिसाहाय्येन शालामण्डप-रथादिकरणम् ; नारदकृतस्य प्रतिष्ठावर्णनम् ; रथत्रयोपरि चन्दनजलसेकादि पूर्वकविद्यापतिगोत्रजैः सप्तधा विष्णोः स्थापनम् ; रथोपरि सूर्य्यादिदेवतानां बलिदानम् ; प्रसङ्गाद्रथस्य ईषादिभङ्गैः ब्राह्मणादीनां नाशस्तच्छान्तिश्च ; रथरज्वाकर्षणेन प्रासादनिकटे इन्द्रद्युम्नादिभिः रथस्थापनं तदवसरे ब्रह्मणः आगमनं च ; जगदीशस्य प्रासादप्रतिष्ठा ; रथादानीय क्रमेण सप्तधा जगदीशमूर्त्तिनां स्थापनपूर्वकं प्रतिष्ठाकरणम्

६ अध्यायः ४७९-४९४

शतोपचारपूजनानन्तरं ब्रह्मकृतस्तुतिप्रभृतिः ; ब्रह्मकृत पुनः स्तुत्या प्रतिमाया इन्द्रद्युम्नं प्रत्युक्तिः ; ब्रह्मादेशाद्देवतानां जगदीशसेवक-स्वरूपेणोत्पत्तिः ; त्वया सह त्वत्स्थानं गन्तुमिच्छामीति ब्रूवन्तमिन्द्रद्युम्नं प्रति ब्रह्मवाक्यम् ; यात्रोपयात्रा प्रत्यहनीतयः कीदृश्यो भविष्यन्तीति पृच्छन्तं नृपं प्रति आदौ प्रत्यहनीतितो प्रातर्नीतिं ब्रह्मा प्राह

७ अध्यायः ४९५-५०६

जगदीशस्य प्रातः स्नानानन्तरं नैवेद्यविशेषेण जगन्नाथादिमूर्त्तीनां द्वात्रिंशदक्षरादिभिर्मन्त्रैः पूजनम् ; अशक्तौ दशाक्षरादिगोपालमन्त्रादिभिः पूजनम् ; पाकशालाविधानम् ; प्रातः पयोलाजा विकाराभ्यां नैवेद्याभ्यां पञ्चभिश्चतुर्विंशतिभिश्चोपचारैः पूजनम् ; चतुर्विंशत्युपचारैरन्यद्-द्विकालपूजापि कार्य्या ; पूजास्थानशुद्ध्यादिपूर्वकं प्रातः पूजोचितान्नादिभिः पूजनं महोत्सवश्च

८ अध्यायः ५०७-५१३

मध्याह्नपूजा ; सन्ध्यार्च्चनम् ; यद्यत् पूजायां यद्यद्भावना भवेत्तद्भावना ; प्रति पूजनानन्तरं ताम्बूलदानम् ; प्रातरादिपूजनेषु नीराजनप्रकारः ; त्रिकालपूजनफलम् ; नैवेद्यकालयोः व्यतिक्रमे पूजायाः नैष्फल्यं सेवकानां दण्डविधानञ्च ; चतुर्थकालपूजा तत्र रासमण्डलस्थभावना त्रिकालपूजा दर्शनफलञ्च

९ अध्यायः आचार्य्यादिसेवकलक्षणम् ५१४-५२०

१० अध्यायः ५२१-५३२

उपचारद्रव्यनिर्णयः ; नैवेद्यलक्षणम् ; पाचकानां गीतगानादिनिषेधः ; नित्यनैवेद्यावधिक नैवेद्यं गरुडस्याग्रतः स्थापयित्वा निवेदयेत् ; विष्णुनिर्माल्यान्नभक्षणफलम् ; देशान्तरे प्रत्यहं शुष्कान्नभक्षणे फलम्

११ अध्यायः ५३३-५४०

कानि फलानि मूलानि च विष्णवे देयानि ; केवलार्द्रकादीनां समर्पण-निषेधस्तत् समर्पणे दोषश्च ; प्रपानकादिदेयवस्तूनि पाकशालातोऽन्यत् निर्मितानि नैवेद्यानि विष्णवे न देयानि ; आसनाद्युपचारपात्राणां घण्टायाश्च लक्षणम् ; पूजावसाने रत्ननिर्मितपात्रे ताम्बूलदानं पाकद्रव्येषु तत्सम्पर्कनिषेधः पाकाशालायां तन्नामग्रहणे दोषश्च ; पूर्वोक्तपात्राणां छिद्रादौ पूजनायोग्यान्नूतनपात्रकरणम् ; पाकशालातो विष्णुसन्निधिं नीयमानस्यान्नस्य च कस्यचिद्दृष्टिपातो रविचन्द्रयोः किरणपाताभावश्च ; दैवात् प्रमादाद् वा देवद्वारपालादिमध्ये वामनादिविकृतौ यत्करणीयम् ; द्वारपालद्वयस्याग्रे तथा विकृतौ यत्करणीयम् ; विष्णुसन्निधिं नीयमानस्य मार्गेऽज्ञातविकृतौ यत्करणीयम् ; गरुडपृष्ठस्थे भोगमण्डपस्थिते च नैवेद्यविकृतौ जाते यत्करणीयम् ; देवनैवेद्ययोर्मध्ये विकृतौ यत्करणीयम् ; स्पर्शानधिकारिविप्रस्पृष्टे देवे यत्करणीयम् ; देवे क्षत्रियवैश्यशूद्रस्पृष्टे यत्कर्त्तव्यम् ; ब्राह्मणं विना पूजाजलपात्रस्य स्पर्शनिषेधः ; प्रसादकारस्यापि तत्पात्रस्पर्शनिषेधस्पर्शे यत्कर्त्तव्यम् ; पाककारं विना निवेदनात्पूर्वं पाकद्रव्याणां स्पर्शे पात्रहोतादौ प्रतिनिषेधंस्तैः स्पृष्टे पाकद्रव्ये विष्णोरयोग्यञ्च ; पाकद्रव्ये आचार्य्यसंस्पृष्टे दोषाभावः ; विश्वावसुकुलोत्पन्नैः संस्पृष्टे देवे सामान्यविधिना स्नानम् ; विद्यापतिगोत्रजैः स्पृष्टे दोषाभाववर्णनम्

१२ अध्यायः ५४१-५४८

प्रतिबुधवासरे मध्याह्नपूजान्ते जगदीशस्य चित्रकर्म तदन्ते पञ्चामृत-स्नानम् ; प्रति गुरुवासरे, एकादश्यां गुरुवासरपातेऽपि, प्रति रविवासरे च प्रत्यर्चादीनां पूजादि पूर्वकप्रासादभ्रमणादिवर्णनम् ; प्रत्येकादश्यां

चतुःसमलोप्रनादि प्रासादपरिभ्रमणम् ; एकादश्यां गुरुवासरपाते यत्कर्त्तव्यम् ; एकादश्यां चन्द्रवासरपाते यत्कर्त्तव्यम् ; नेत्रोत्सवं विना प्रत्यमावास्यायां यत्कर्त्तव्यम् ; अमावास्यायां सूर्य्यग्रहे सति यत्कर्त्तव्यम् ; श्रवणा - रोहिणी -ज्येष्ठानक्षत्रेषु त्रिषु यत्कर्त्तव्यम्

१३ अध्यायः ५४९-५५२

प्रासादे यवनादिप्रवेशे यत्कर्त्तव्यम् ; महास्नानविधिः ; प्रथमावरणादौ विप्रादेः कस्य चिन्नरणे यत्कर्त्तव्यम् ;

१४ अध्यायः ज्येष्ठ्यां स्नानोत्सवः ५५३-५६३

१५ अध्यायः ५६४-५७१

निरोधनगृहे चित्रपटलिखितानां विष्णुमूर्त्तीनां विद्यापतिविश्वावसुवंशीयैः पूजनम् ; तत्रैव जगदीशप्रतिमानां विद्यापतिवंशीयैः शितप्रपानकेन पूजनम् ; विष्णुप्रतिमानां क्रमेण विद्यापतिविश्वावसुवंशीयैश्चित्रारम्भः ; स्नानात्पञ्चदशेऽह्नि पट्टदेवविसर्जनपूर्वकमाचार्य्येण विष्णुप्रतिमानां नेत्रोत्सवकरणम्

१६ अध्यायः ५७२-५८६

आषाढशुक्लद्वितीयायां रथयात्राविधिः ; रथोत्सवस्य पञ्चमेऽह्नि नीलाचलाद् यज्ञवेदीं प्रति लक्ष्मीनयनं पुनस्तस्याः प्रत्यावर्त्तनञ्च ; नीलाचले रथयात्रा शेषपर्य्यन्तं रमामाधवविश्वधात्रीणां पूजनम् ; रथोत्सवस्य षष्ठेऽह्नि रथानां दक्षिणाभिमुखीकरणम् ; रथस्थे विष्णौ नैवेद्यसमये काकोलूकगृध्रचिल्लकादीनां प्रवेशे शान्तिः ; कवाटोत्कीलनम् ; जगदीशमूर्त्तीनां मन्दिरप्रवेशः

१७ अध्यायः ५८७-५९०

शायनीयात्राविधिः ; कदाचिद्रथे स्वापयात्रापाते तृतीयकालार्च्चनन्तरं सा कार्य्या ; चातुर्मास्यमध्येऽधिमासपाते श्रावणशुक्लैकादश्यां सा कार्य्या ; आषाढद्वादश्यां गरुडशयनम्

१८ अध्यायः दक्षिणायनयात्राविधिः ५९२-५९३

१९ अध्यायः ' श्रावणपौर्णम्यां बलदेवजन्मोत्सवः ५९४-५९८

२० अध्यायः बलदेवजन्मोत्सवस्यावशिष्टांशः ५९९-६०२

२१ अध्यायः ६०३-६०६

भाद्रवकृष्णपञ्चम्यां स्वर्णरेखादानम् ; भाद्रवकृष्णसप्तम्यां देवकीसान्त्वनार्थं जगदीशाय क्षालितान्ननिवेदनम् ; भाद्रव-कृष्णाष्टमीसायंकाले सूतकागृहनिर्माणं तत्रैव मण्डलकरणम्

२२ अध्यायः कृष्णजन्माष्टम्यङ्गवरुणादिपूजनम् ६०७-६१२

२३ अध्यायः ६१३-६१८

कृष्णजन्मादि अवतारलीलापर्य्यन्तविधिः ; भाद्रवकृष्णनवम्यां महास्नानपूर्वकवर्षवृध्यर्च्चनादिविधिः ; दूर्गाजन्मोत्सवविधिः

२४ अध्यायः ६१९-६१९

भाद्रवकृष्णत्रयोदश्यां पाकशालां प्रति कालरात्रिनयनम् ; भाद्रवामावास्यायां सप्तपुरिकादानम्

२५ अध्यायः ६२०-६२३

भाद्रवशुक्लपञ्चमीतः षोडशदिवसपर्य्यन्तं लक्ष्मीव्रतविधिः तदसम्भवे आदौ चान्ते च पूजनम् ; भाद्रवशुक्लैकादश्यां पार्श्वपरिवर्त्तनविधिः

२६ अध्यायः ६२४-६२८

पवित्रारोपणविधिः ; विधिरयं द्वादश्यां श्रवणाबुधवासरयुक्तायां कार्य्यः, अस्यालाभे भाद्रशुक्लद्वादश्यां कार्य्यः ; वामनजन्मोत्सवविधिः

२७ अध्यायः शक्रध्वजोत्सवविधिः ६२९-६३१

२८ अध्यायः ६३२-६३८

भाद्रवपौर्णमास्यां शक्रध्वजसमीपं गोविन्दनयनम् ; आश्विनकृष्णाष्टम्यां दूर्गायाः सहस्रकुम्भाभिषेकः ; तामेव तिथिमारभ्य दूर्गामाधवयोः

सप्तदशदिनपर्य्यन्तं पूजाविधिः ; अपराजितादशमी ; आश्विनशुक्लैकादशीमारभ्य कार्त्तिकपूर्णिमापर्य्यं सलक्ष्मीकदामोदरपूजनम्

२९ अध्यायः ६३९-६४४

आश्विनपौर्णमीरात्रौ द्युतक्रीडाविधिः ; कार्त्तिकशुक्लैकादश्यामुत्थापनविधिः ; कार्त्तिकशुक्लद्वादश्यां गरुडोत्थापनविधिः ; कार्त्तिकपौर्णम्यां सप्तपंक्तिदीपदानविधिः

३० अध्यायः ६४५-६५१

मार्गशीर्षकृष्णपञ्चम्यां क्षेत्रभ्रमणं तत्रादौ मार्कण्डेयवटं गत्वा क्रमेण जगन्नाथान्तिकं प्रविश्य मानसपूजनादिकम् ; कदांचिज्जगन्नाथे सूतकिना मृतकिना च स्पृष्टे यत्कर्त्तव्यम् ; निरोधनगृहस्थे जगन्नाथे सूतकिना मृतकिना च स्पृष्टे यत्कर्त्तव्यम् ; पाकशालां प्रविष्टे सूतकिनि मृतकिनि च यत्कर्त्तव्यम् ; सूतकिमृतकिस्पृष्टद्रव्यं विष्णवे न देयं तत्र च दोषः

३१ अध्यायः ६५२-६६०

तत्रैव क्षेत्रभ्रमणे जगन्नाथदर्शनानन्तरं श्वेतगङ्गामारभ्य क्रमेण पुनर्जगदीशदर्शनपर्य्यन्तं कृत्वा स्वगृहप्रवेशनम् ; एतत्क्षेत्रभ्रमणं, सोपवासः कुर्य्यात्ततः द्विजैः सह पारणं तत्फलञ्च ; मार्गशीर्षकृष्णाष्टम्यां प्रथमाष्टमीविधिः ; मार्गशीर्षे शुभदिने नवान्नप्रदानविधिः ; मार्गशीर्षकृष्णचतुर्द्दशीमारभ्य एतच्छुक्लप्रतिपत्पर्य्यन्तं त्रिदिनमभिव्याप्य दीपोत्सवविधिः ; मार्गशीर्षशुक्लषष्ठ्यां प्रावरणोत्सवविधिः

३२ अध्यायः ६६१-६६८

पौषामावास्यायां चूताङ्कुरप्रदानविधिः ; पुष्याभिषेकाङ्गाङ्कुरारोपणविधिः स च शुक्लैकादशीमारभ्य वा शुक्लत्रयोदशीमारभ्य कार्य्यः ; स चाङ्कुरारोपणविधिः केषूत्सवेषु कार्य्यस्तस्याकरणे दोषः ; पौषशुक्लचतुर्द्दश्यां पुष्याभिषेकाङ्ग-शतकुम्भाधिवासविधिः ; पुष्याभिषेकविधिः

३३ अध्यायः ६६९-६७४

मकरसंक्रान्तेः पूर्वेद्युर्निशि नवाङ्कयात्राविधिस्तण्डुलाधिवासविधिः ; मकरसंक्रान्तेः प्रातरुत्तरायणयात्राविधिः ; फाल्गुनशुक्लपञ्चम्यां वसन्तपञ्चमीयात्राविधिः ; फाल्गुने मासि सप्त पञ्च त्रीणि वा दिनानि व्याप्य द्विदण्डावशिष्टायां रजन्यां वसन्तभ्रमणविधिः

३४ अध्यायः ६७५-६९३

फाल्गुनशुक्लदशमीमारभ्य त्रयोदशीपर्य्यन्तं फल्गूत्सवविधिः ; फाल्गुनशुक्लचतुर्द्दश्यां बह्न्युत्सवविधिः ; दोलामण्डपनिर्माणविधिः ; दोलायात्राविधिः ; दोलायात्रादर्शनफलम्

३५ अध्यायः ६९४-७०१

कौशल्याशान्त्यर्थं चैत्रशुक्लाष्टम्यां विष्णवे क्षालितान्ननिवेदनम् ; चैत्रशुक्लनवम्यां रामजन्मोत्सवविधिः ; चैत्रशुक्लद्वादश्यां पटलिखित-कामदेवाधिवासः ; चैत्रशुक्लत्रयोदश्यां दमनायनपूर्वकतदधिवासविधिः ; चैत्रशुक्लचतुर्द्दश्यां दमनार्पणविधिः ; एतद्दमनभक्षणादौ फलम्

३६ अध्यायः ७०२-७१३

मेषसङ्क्रान्तौ शष्कुलीपूपनिवेदनविधिः ; वैशाखशुक्लतृतीयामारभ्य ज्येष्ठशुक्लचतुर्द्दशी पर्य्यन्तं चन्दनयात्राविधिः ; वैशाखशुक्लतृतीयायां रथनिर्मित्यारम्भः ; वनयोगविधिः ; विष्णुप्रतिमासु चन्दनदानप्रकारः ; वैशाखशुक्लचतुर्द्दश्यां नृसिंहजन्मोत्सवविधिः

३७ अध्यायः ७१४-७२५

शुक्लदशम्यां राजेन्द्रभावेन कृष्णस्याभिषेकः ;ज्येष्ठशुक्लैकादश्यां प्रातः रुक्मिणीहरणविधिः ; तस्यामेव तिथौ गोविन्दप्रतिमायाः

जलकेलिविधिः ; तस्यामेव तिथौ रात्रौ रुक्मिणीकृष्णयोर्विवाहविधिः ; ज्येष्ठशुक्लद्वादश्यां रुक्मिणीकृष्णयोर्भ्रमणलीलाविधिः ; शुक्लचतुर्दश्यां तयोश्चतुर्थीकर्मविधिः, वस्त्रग्रन्थिपरिफेटनविधिश्च ; स्नानादियात्राणां करणलङ्घनयोः फलदोषौ ; जगदीशपूजाकालनिर्णयस्तदतिक्रमे दोषश्च ; जगदीशालये म्लेच्छादिप्रवेशे यत्कर्त्तव्यम्

३८ अध्यायः ७२६-७३७

ब्राह्मीमुहूर्त्तेऽर्चकस्योत्थानवस्त्रान्तरग्रहणानन्तरं हरिस्मरणम् ; धरणीप्रार्थना ; बाह्यक्रियार्थं नैऋताशागमनादिकम् ; शौचक्रियाविधिः ; वस्त्रान्तरधारणानन्तरमाचमनविधिः ; दन्तधर्षणविधिस्तत्र दन्तकाष्ठलक्षणादिकञ्च ; वारुणस्नानविधिः ; तिलकविधिः ; वैदिकीसन्ध्यानन्तरं वैष्णवीसन्ध्याविधिः ; नृसिंहादिदेवानां गायत्रीमन्त्राः

३९ अध्यायः वैष्णवतर्पणविधिः ; वैष्णवाचमनविधिः ७३४-७३५

४० अध्यायः ७३६-७४२

जगदीशस्य प्रातःस्नानविधिः ; जगदीशस्य पाकशालायां होमविधौ कुष्मण्डिविधानम्

४१ अध्यायः होममन्त्राः ; पूर्णाहुतिविधिः ७४३-७४६

४२ अध्यायः ७४७-७५५

वैष्णवाग्नेः स्वरूपम् ; होममुद्राः ; ब्राह्मणविष्टरयोर्लक्षणम् ; श्रुवस्रुचोर्लक्षणम् ; समिल्लक्षणम् ; पवित्रलक्षणम् ; वटमन्त्रः ; आज्यस्थालीलक्षणम् ; चरुणा वैश्वदेवविधिः ; पाकार्थं लक्ष्मीप्रार्थना, पाकनिर्विघ्नार्थं गणेशप्रार्थना च ; पाकशालास्थाग्निना जगदीशस्य धूपदीपारात्रिकादिकरणम् ; सूर्य्यमन्त्रन्यासः ; सूर्य्यत्रिकालध्यानम् ; सूर्य्यमुद्राः ; अर्घ्यपात्रनिर्णयः ; वैष्णवाग्निं विना धूपादिदाने विष्णोः कोपः

४३ अध्यायः प्रासादस्याग्निकोणे सूर्य्यपूजापूर्वकार्घ्यविधिः ७५६-७६०

४४ अध्यायः ७६१-७६६

वैष्णवद्वारपालपूजाविधिः ; द्वारपालादीनां ध्यानानि

४५ अध्यायः ७६७-७७२

सामान्यपूजायाम् आसनशुद्धि-भूतशुद्धिमातृकां विधायार्घ्यं संस्कृत्य पञ्चोपचारैः पूजनम्

४६ अध्यायः ७७३-७७६

विष्णुचिन्तनम् ; विष्णुपादपद्मचिन्तनम् ; पूर्वोक्तवैष्णवाचमनम् ; देवागारप्रवेशानन्तरं भैरवप्रार्थना ; पूजानुक्रमकारिका।

४७ अध्यायः ७७७-७८५

जगदीश बलभद्रसुभद्राणां पूजार्थं प्रार्थना ; आसनस्य वर्ज्यं ग्राह्यत्वं च ; आसनाभावे दोषः ; पीठनिर्णयः ; पद्माद्यासन लक्षणम् ; पूजकस्य पूजायां घण्टादिङ्मुखनिर्णयः ; पूजायां प्रथमतो घण्टावादनं घण्टावादनफलञ्च ; घण्टावादनकालः ; घण्टालक्षणम् ; स्थानशुद्धिः ; कूर्मानन्तपृथिवीपूजनं तत्प्रार्थना च ; आसनमन्त्रस्य ऋष्यादिन्यासः ; आसनमन्त्रः ; मन्त्रऋष्यादिन्यासे स्थाननिर्णयः ; विघ्नोत्सारणविधिः ; गुरुगणेशादीनां वन्दनम् ; करशुद्धिः ; राक्षसादिप्रवेशनिषेधविधिः ; दिग्बन्धनविधिः ; दिग्देवताद्वारा रक्षणम्

४८ अध्याय; भूतशुद्धिः ७८६-७८७

४९ अध्यायः भूतशुद्धेरपरोऽशः ७८८-७९२

५० अध्यायः भूतशुद्धिप्रशंसा ; प्राणप्रतिष्ठा ७९३-७९६

५१ अध्यायः ७९७-८०१

पराशक्तिस्मरणम् ; प्राणप्रतिमाप्रशंसा ; हस्तशुद्धिः ; प्रणवः

५२ अध्यायः देहस्वरूप भावना ८०२-८०७

५३ अध्यायः ८०८-८१३

षट्चक्रन्यासः; रुद्राक्षविवरादिषोडशाधारनामनिर्द्देशपूर्वकप्रथम-द्वितीयाधारन्यासौ

५४ अध्यायः तृतीयाधारमारभ्य षोडशाधारपर्य्यन्ताः न्यासाः ८१४-८१८

५५ अध्यायः ८१९-८२५

वृहदन्तर्मातृकान्यासः ; अशक्तपक्षे सामान्यान्तर्मातृकान्यासः ; बहिर्मातृकान्यासः ; चतुर्विधबहिर्मातृकान्यासः ; चतुर्विधबहिर्मातृकान्यासफलम् ; बहिर्मातृकान्यासमुद्राः ; मातृकागुप्तागुप्तभेदेन द्विधा तस्याश्च शुद्धादिभेदाः

५६ अध्यायः ८२६-८२८

द्विविधमातृकायाः प्रशंसा ; मातृकायाः ऋष्यादिन्यासाः ; ऋष्यादिन्यासमुद्राः ; मातृकायाः करन्यासः ; मातृकायाः समुद्रा अङ्गन्यासाः ; मातृकायाः षडङ्ग देवता चिन्तनम् ; शुद्धा मातृका लक्षणम्

५७ अध्यायः ८२९-८३८

केशवादिन्यासः ; केशवादिन्यासकरणे फलम् ; शक्तिबीजयुक्तमातृकान्यासः ; श्रीबीजयुक्तमातृकान्यासः ; स्मरबीजयुक्तमातृकान्यासः ; बीजत्रययुक्तदेवताचिन्तनम् ; षड्बीजसंयुक्तमातृकान्यासः ; प्रपञ्चमातृकान्यासः ; कलान्यासः

५८ अध्यायः ८३९-८४२

श्रीकण्ठमातृकान्यासः ; अशक्तपक्षे सबिन्दुकमातृकाकेशवादिन्यासौ

५९ अध्यायः तत्त्वन्यासः ८४३-८४४

६० अध्यायः प्राणायामविधिः ; निज़ाङ्गके योगपीठभावना ८४५-८४७

६१ अध्यायः ८४८-८४९

देहादिभावनाचतुष्टयम् ; व्यापकन्यासः ; मन्त्रफलम्

६२ अध्यायः ८५०-८५१

दशाक्षरगोपालमन्त्रस्योद्धारविधिः ; निष्कामजननं प्रति तस्य ऋष्यादिन्यासाः ; सकामजननं प्रति तस्य ऋष्यादिन्यासाः ; तस्य पञ्चाङ्गन्यासाः ; तस्य बीजम् ; तस्य प्रातःकालीनध्यानम् ; ध्यानफलम्

६३ अध्यायः ८५२-८५५

ततो मध्याह्नार्च्चने वृन्दावनध्यानं तत्रस्थ देवस्य ध्यानम्

६४ अध्यायः ८५६-८५९

तृतीयार्च्चनेऽशितगिरिस्थविष्णोर्ध्यानम् ; सायंकालार्च्चने द्वारावतीस्थविष्णोर्ध्योनम् ; रात्रौ रासमण्डलस्थस्य ध्यानम् ; एतद्ध्यानकरणे फलम् ; अशक्तौ सामान्यध्यानम्

६५ अध्यायः दशाक्षरमन्त्रस्य न्यासविधिः ८६०-८६१

६६ अध्यायः संहारसृष्टिन्यासौ ; विभूतिपञ्जरन्यासः ८६२-८६४

६७ अध्यायः ८६५-८६८

मृत्युपञ्जरन्यासः ; दशाक्षरमन्त्रस्य पुनः ऋष्यादिपञ्चाङ्गन्यासानन्तरं पुनर्ध्यानम् ; मन्त्रमूर्त्तिस्मरणम्

६८ अध्यायः ८६९-८७५

अशक्तपक्षेऽष्टादशाक्षरगोपालमन्त्रविधिः ; मुद्रानामानि ; मुद्राशब्दव्युत्पत्तिः ; मुद्रालक्षणानि ; अन्तर्यजनविधिः ; बाह्यार्च्चने प्रार्थना

६९ अध्यायः ८७६-८७९

पूजापात्रनिर्णयः ; पूजास्थानशोधनादिः ; पूजापात्रे यद्द्रव्यरक्षणीयम् ; पूजापात्राणां पलसंख्या धातुनिर्णयः

७० अध्यायः अर्घ्यसंस्कारविधिः ८८०-८८३

७१ अध्यायः ८८४-८९१

अर्घ्यजलेन देवादिप्रोक्षणम् ; प्रोक्षणीपात्रसंस्कारः तत्र च वीक्षणादि-संस्काराः ; तेन वीक्षणादिद्रव्यशुद्धिः ; पात्रेषु सूक्ष्मवस्त्राच्छादनम् ; मानसीपूजा

७२ अध्यायः ८९२-८९४

तुलसीपात्रसंस्कृतिपूर्वकतुलसीदानविधिः ; बाह्यपूजार्थं देवप्रार्थना ; पीठपूजा

७३ अध्यायः पीठस्थदेवानां ध्यानानि ८९५-९०१

७४ अध्यायः ९०२-९०४

दारुब्रह्मणि नृसिंहादियद्यन्मूर्त्तीनां पूजनमिच्छेत्तत्तन्मूर्त्तीनामावाहनादिविधिः; आवाहनादिमुद्रालक्षणानि

७५ अध्यायः आवाहनादिपरमीकरणान्तानां करणेषु कारणानि ९०४-९०७

७६ अध्यायः ९०८-९०९

दारुब्रह्मणि जीवन्यासविधिः ; देवाङ्गे मातृकाकेशवादिमन्त्रस्य ऋष्यादिसृष्टिस्थितिलयादिक्रमेण मन्त्रदशतत्त्वमन्त्रपुटितमातृका-मूर्त्तिपञ्जरन्यासाः ।

७७ अध्यायः ९१०-९१८

देवाग्रे पूर्ववत् शङ्खादिमुद्राप्रदर्शनम् ; उपचारदानक्रमः ; उपचारदाने स्थाननिर्णयः ; उपचारमन्त्राः ; आसनाद्युपचारदानं तत्तन्मुद्रालक्षणसहितं पुष्पान्तम्

७८ अध्यायः आवरणदेवताच्चर्चनम् ९१९-९२६

७९ अध्यायः ९२७-९३५

घण्टासंस्कारादिविधिः ; मुद्रासहितः धूपदानादिविधिः ; मुद्रासहितः दीपदानादिविधिः ; अर्घ्यादिष्वाचमनदानम् ; दीपदानानन्तरं पुष्पाञ्जलि-त्रयपाद्याचमनदानम् ; नैवेद्यार्थमण्डलकरणं तत्रान्नपूर्णस्थापनादिकम् ; नैवेद्यसंस्कारः ; नैवेद्यार्पणविधिः ; प्राणादिमुद्रादर्शनविधिः

८० अध्यायः ९३६-९३८

पूजकैर्नैवेद्यदानम् ; नैवेद्यमुद्राप्रदर्शनम् ; ततो विष्णोर्भोजनचिन्तनम् ; होमविधिः ; होमाभावे जपविधिः ; अपोशानदानानन्तरं पिष्टकवर्त्तिदानम् ; ततो बहिर्वलिदानविधिः

८१ अध्यायः ९३९-९४६

प्रासादस्याष्टदिक्षु कुमुदादिबलिदानविधिः ; चण्डप्रदानविधिः ; प्रसन्नाच्चर्चाविधिः ; ताम्बूलदानविधिः ; वन्दनाविधिः ; पूर्ववत् स्तुतिः ; ततो दन्तलेखादिभिः विष्णुसन्तोषणम् ; ततो कर्पूरारात्रिकदानम् ; सप्तवर्त्त्यारात्रिकदानं पिष्टकारात्रिकदानञ्च पूजासमर्पणम् ; संहारमुद्राप्रदर्शनपूर्वकदेवस्योद्वासनविधिः ; बलिविभीषणादिभ्यो निर्माल्यदानम् ; तुलस्यादिनिर्माल्यग्रहणविधिः

८२ अध्यायः ९४७-९४९

पूजावशिष्टतुलस्यङ्गमार्जनादौ फलम् ; प्रासादमध्यस्थितविमलादिदेवीनां क्षेत्रस्थदेवीनाञ्च निर्माल्यप्रदानं तत्र फलञ्च ; विष्णोः पादोदकपानफलं तत्पानमन्त्रादिकञ्च ; भूपतेराशीःप्रदानम् ; विष्णोः प्रदक्षिणविधिः ; साष्टाङ्गप्रणामस्तत्फलं च ; पञ्चाङ्गप्रणामः

८३ अध्यायः आसनाद्युपचाराणां प्रदाने फलम् ९५०-९५१

८४ अध्यायः तर्पणविधिः ; मार्जनविधिः ९५२-९५३

८५ अध्यायः ९५४-९५८

बलदेवपूजनविधिः ; वासुदेवमन्त्रस्योद्धारः ऋष्यादिन्यासादिकञ्च ; बलदेवस्य प्रातः ध्यानम् ; बलदेवस्य मध्याह्नध्यानम् ; बलदेवस्य सायाह्नध्यानम् ; केशवादिन्यासः, संहारन्यासः, सृष्टिस्थितिन्यासौ

८६ अध्यायः ९५९-९६०

पूर्ववन्मूर्त्तिपञ्जरन्यासः ; पञ्चाङ्गध्यानदिग्बन्धनव्यापकत्रयकरणं शङ्खादिमुद्रादर्शनञ्च ; अन्तर्यजनम् ; प्राणायामः ; वासुदेवगायत्री ; पूर्ववन्मूलमन्त्रजपादि

८७ अध्यायः ९६१-९६३

अग्निकोणादौ वासुदेवमन्त्रस्य पूजनविधिः ; पीठपूजाविधिः

८८ अध्यायः भूवनेश्वरीमन्त्रेण सुभद्रायाः पूजनविधिः ९६४-९६५

८९ अध्यायः ९६६-९७०

भूवनेश्वरीमन्त्रस्य न्यासविधिः ; भूवनेश्वरीध्यानम् ; आवरणपूजा ; सुभद्रास्तुतिः ; बलजगदीशसुभद्राणां निर्माल्यादिभक्षणे फलादिकम्

९० अध्यायः ९७१-९७४

पीठपूजा ; देवाङ्गे मातृकादिन्यासः ; योन्यादिमुद्राः तल्लक्षणानि च ; भूवनेश्वरीगायत्री च

९१ अध्यायः ९७५-९७६

विष्णोर्नैवेद्यादीनां भक्षणादौ फलम् ; विष्णोर्नैवेद्येन श्राद्धकरणे फलम् ; विष्णोर्निवेदितान्ने म्लेच्छादिस्पृष्टे दोषाभावः ; पाकशालागृहे महोत्पाते शान्तिः ; कूपे महोत्पाते शान्तिविधिः ; रथे कङ्कगृध्रादिप्रवेशे शान्तिः ; देवतापतने शान्तिः ; स्यन्दनाङ्गादिभङ्गे शान्तिः ; प्रासादे यवनकुक्कुरादिप्रवेशे शान्तिः ; प्रासादसीमामध्ये अन्यस्य कीर्त्तिकरणे प्रतिष्ठाभावः केवलम् आनुष्टुभ् नृसिंहमन्त्रेण पञ्चगव्यसेकः

SOME VESAS OF
LORD JAGANNATH, BALABHADRA & SUBHADRA



वडसिंहारिवेशः



श्री राधादामोदरवेश :



अवकासवेश :



गजोद्धारणवेश :



वाङ्कचुलिआवेशः



श्री श्री नागार्जूनवेश :

वामदेवसंहिता

वामदेवसंहिता

प्रथमोऽध्यायः

श्रीजगन्नाथाय नमः

नीलाद्रिनाथं जगतामधीशं
चिदंशरूपं शरणैकनाथम् ।
श्रीनीलगोत्राधिपतिं वरेण्यं
सुरेन्द्रवन्द्यं प्रणतोऽस्मि नित्यम् ।। १ ।।
एकदा पार्वती देवी देवेशं वृषभध्वजम् ।
पप्रच्छ तीर्थगणने पुरुषोत्तममीरितम् ।। २ ।।
सर्वक्षेत्रवरं श्रेष्ठं कथितं केन कारणम् ।
बहूनि सन्ति क्षेत्राणि चेदं क्षेत्रवरं कथम् ।। ३ ।।
सर्वस्थले सर्वहृदि पूर्णः स्यात् पुरुषोत्तमः ।
एतत्क्षेत्रवरेऽप्यात्मनाम यद्दत्तवान् विभुः ।। ४ ।।
यथास्थानं यथारूपं केन वा निर्मितं पुरा ।
विष्णुर्गुह्यतमो ब्रह्मन् केन वात्र प्रकाशितः ।। ५ ।।
एतज्ज्ञातुं मया पृष्टः कथय त्रिपुरान्तक ।
पार्वतीवचनं श्रुत्वा प्रोवाच वृषभध्वजः ।। ६ ।।

श्रीमहादेव उवाच

शृणु देवि मया ज्ञातं तस्य क्षेत्रस्य कारणम् ।
निराकारश्च[1] निर्लेपोऽप्यहमेव नगात्मजे ।। ७ ।।

---

(१) निराकारः स

यदा ब्रह्ममयो देवि स्थितश्चापि निरामयः।
निराकारात्तु जनितो नारायणः शरीरवान् ।। ८ ।।
नारायणात्समुद्भूतो ब्रह्मा पञ्चमुखोऽभवत् ।
ब्रह्मणश्च यदा जन्म तदाप्रभृति माधवः।। ९ ।।
नीलमाधवरूपेण स्थितः स्यात्पुरुषोत्तमे ।
स तु तेनैव रूपेण पूर्वार्द्धे ब्रह्मणः स्थितः।। १० ।।
परार्द्धे स जगन्नाथः[१] स्थितो भवति पार्वति ।
त्रिपुरेण पुरा देवाः क्लेशिता मम पूजकाः।। ११ ।।
निर्गुणोऽहं च गुणवान् जातोऽस्मि क्षितिमण्डले ।
त्रिपुरं हतवान् देवि क्रोधेन क्षितिमण्डलम् ।। १२ ।।
नश्यतीति तदा दृष्ट्वा तुष्टुवुः प्रकृतिं सुराः।
दृष्ट्वा प्रकृतिमाकाशे नष्टा मद्भ्रान्तिरेव सा ।। १३ ।।
रन्तुकामं च मां दृष्ट्वा प्रकृतिर्व्योमरूपिणी ।
सगुणोऽसि मया जातो निर्गुणो देव्यहं सती ।। १४ ।।
भविताऽस्मि स्थिरस्त्वं हि भव देवेति निश्चयः।
ततो यज्ञे सती देवी दक्षस्य तनयाऽभवत् ।। १५ ।।
तस्या मम विवाहश्च गताः कति समाः प्रिये ।
एकदा नारदोऽप्यागात् पुरुषोत्तमक्षेत्रतः।। १६ ।।
विष्णोर्निर्माल्यतः किञ्चिदानीय मन्मुखेऽददत् ।
उदरस्थं च तद्दृष्ट्वा तदा देवी चुकोप सा ।। १७ ।।
जगाद मां पुनर्देवी किमर्थं न तु दत्तवान् ।
प्रभोः प्रसादं न दत्तं ममैव स्थितिमत्र वै ।। १८ ।।

(१) जगन्नाथो वर्तते परमेश्वरि !

करोमि देवदेवेश गदित्वा तूष्णीमावहत् ।
ततः कतिपये काले दक्षो यज्ञकरोऽभवत् ।। १९ ।।
मम चामन्त्रणं सोऽपि नष्टबुद्धिश्च नाकरोत् ।
मह्यं देवी न वदन्ती गता दक्षमखं प्रति ।। २० ।।
अभिमानवशात् पित्रोर्यज्ञकुण्डेऽपि साऽपतत् ।
ततोऽप्यहमगां यज्ञं नाशयित्वा च तां मृताम् ।। २१ ।।
दृष्ट्वाऽऽनीय शवं देवि कैलासं प्रति हे प्रिये ।
शङ्खक्षेत्रगतो यावत् कुणपश्छिन्नतां गतः।। २२ ।।
शङ्खस्यावरणे देवि पतितः प्रथमे स्थिता ।
रोहिणीकुण्डपार्श्वेऽपि विमला नाम नामतः।। २३ ।।
श्रीप्रसादं प्रतिदिनं भक्षिता तत्र केवला ।
सत्यंशेन त्वया जातं पार्वती नाम नामतः।। २४ ।।
क्षेत्रस्य महिमानं हि पुरा ब्रह्मा व्यचारयत् ।
पुराऽहं गुणवान् क्षित्यामभवं हि यदा भवः।। २५ ।।
चतुरायुधं निक्षिप्तं तदा तु ब्रह्मणाऽद्भुतम् ।
पुरुषोत्तमके शङ्खो विरजे च गदा तथा ।। २६ ।।
एकाम्रके चक्रमपि कोणार्के पद्ममेव हि ।
एतत् क्षेत्रवरं देवि यथा ब्रह्म तथैव तत् ।। २७ ।।
यत्र ब्रह्म सप्तधैव राजते नीलपर्वते ।
प्रभवो यत्र शङ्खस्य तस्यैव नाशको न हि ।। २८ ।।
यदा पद्मोद्भवो जज्ञे तदा माधवरूपकः।
चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ।। २९ ।।
पूर्वार्द्धे नीलरूपश्च जगन्नाथः परार्द्धके ।
क्षेत्रस्य महिमा नायं वक्तुं केनापि शक्यते ।। ३० ।।

तच्छ्रुत्वा पार्वती प्राह किंरूपेण प्रतिष्ठितम् ।
देव कथय संक्षेपाद्यच्छ्रुत्वा मुक्तिभाग् जनः।। ३१ ।।
एतच्छ्रुत्वा तु प्रहसन् त्रिपुराररिरुवाच ह ।
शृणु देवि प्रवक्ष्यामि रहस्यं ह्येतदुत्तमम् ।। ३२ ।।

श्रीवामदेव उवाच

यश्चायं भारते वर्षे उत्कलाख्यः कुमण्डनः।
तद्देशे ये जनाः सन्ति लज्जाशीला विनीतकाः।। ३३ ।।
ब्राह्मणाश्चापि यज्वानो नीतिज्ञाः शास्त्रकोविदाः।
सर्वधर्मेषु निपुणा मन्त्रागमविशारदाः।। ३४ ।।
ऊद्र्ध्वपुण्ड्रधराः सर्वे शङ्खचक्राङ्किता द्विजाः।
तप्तमुद्रा शीतला चाप्युभे मुद्रे प्रकीर्त्तिते ।। ३५ ।।
शीतलाऽपि च या मुद्रा चोत्तमा गृहिणस्तथा ।
लिङ्गाङ्किता च चक्राङ्का तप्तमुद्रा न कारिता ।। ३६ ।।
अतो देवि चोत्कलेऽस्मिन् शीतलाधारकाश्च ते ।
स्त्रियोऽपि पतिदेवाश्च लज्जाशीलाः सुपूजिताः ।। ३७ ।।
क्षत्रियाश्चापि शूराश्च वैश्याः सर्वे धनाढ्यकाः ।
शूद्राः सर्वे स्वधर्मेषु तिष्ठन्ति यत्र देशके ।। ३८ ।।
एवंरूपाश्चोत्कलाख्ये सर्वकक्षासु संयुताः ।
नारिकेलादिसहिता नद्यो हि विमलोदकाः ।। ३९ ।।
सिंहादिजन्तुभिर्युक्ता नीलशैलप्रतिष्ठिताः ।
वैतरणीं समारभ्य यावत्क्षेत्रवरं प्रति ।। ४० ।।
पदे पदे श्रेष्ठतमं गच्छन्ति येऽश्वमेधकम् ।
प्राप्नुवन्ति फलं ते वै ये जनाः मानसोत्सुकाः ।। ४१ ।।
गच्छामोऽपि क्षेत्रवरमिति तेऽपि च मोक्षकाः ।
गदाक्षेत्रं च विरजमेकाम्रं चक्रसंज्ञकम् ।। ४२ ।।

कोणार्कं पद्मक्षेत्रं च शङ्खक्षेत्रं चतुर्थकम् ।
त्रयाणां पावनः शङ्खो भुक्तिमुक्तिफलप्रदः ।। ४३ ।।
क्षेत्रत्रयात्तु परमं विद्धि देवि सुपावनम् ।
यथायथं रूपमहं कथयामि तवाग्रतः ।। ४४ ।।

पार्वती उवाच

त्वन्मुखाच्च श्रुतं देव पुरुषोत्तमक्षेत्रकम् ।
येन वा निर्मितं तत्र स राजा कुत्रचित् स्थितः ।। ४५ ।।
किं नामधेयं तस्यापि कथय चन्द्रशेखर ।
पार्वतीवचनं श्रुत्वा प्रहसन् वाक्यमब्रवीत् ।। ४६ ।।

श्रीवामदेव उवाच

अवन्तीदेशे स राजा चेन्द्रद्युम्नो महीपतिः ।
यज्वा च धर्मशीलश्च विधेः पञ्चमपूरुषः ।। ४७ ।।
ये जनास्तत्र तिष्ठन्ति धर्मशीला मुनिव्रताः ।
इन्द्रद्युम्नो नृपश्रेष्ठो वैष्णवाग्र्यो जनप्रियः ।। ४८ ।।
त्रिकालपूजानिरतः पुराणज्ञो रहस्यवित् ।
एकदा पूजने काले सङ्घे विविधभूषिते ।। ४९ ।।
क्षेत्राणां यः प्रसङ्गश्च सर्वेषां मुखतः श्रुतः ।
काश्यादीनां कथां श्रुत्वा राजा तूष्णीमवाप सः ।। ५० ।।
एतत्काले च देवोऽपि तदा जटिलरूपधृक् ।
प्रभया द्योतमानोऽपि सर्वेषां माननाशकः ।। ५१ ।।
तं दृष्ट्वा सहसोत्थाय राजा पूजां चकार ह ।
दिव्यासने समाविष्टो राजानं जटिलोऽब्रवीत् ।। ५२ ।।
शृणु राजन् क्षेत्रवृत्तं स्मृतं श्रीपुरुषोत्तमम् ।
सर्वक्षेत्रवरं श्रेष्ठं शङ्खमध्ये प्रतिष्ठितम् ।। ५३ ।।

तच्छ्रुत्वा नृपतिश्रेष्ठः पप्रच्छ क्षेत्रवृत्तकम् ।
जटिलश्चापि राज्ञे तु सर्वं प्रोवाच सत्वरः ।। ५४ ।।
नीलाद्रिनाथस्य च क्षेत्रवाक्यं
शृण्वन्ति ये वै कथयन्ति नित्यम् ।
नित्यं च ते मद्भुक्तिपथं लभन्ते
वसन्ति चान्ते नृहरेः पदेऽपि ।। ५५ ।।

इति श्रीवामदेवसंहितायां श्रीक्षेत्रमाहात्म्ये हरगौरीसम्वादे प्रथमोऽध्यायः ।।

द्वितीयोऽध्यायः

श्रीवामदेव उवाच

इन्द्रद्युम्नस्य नृपतेर्देवागारेऽपि वैष्णवाः ।
नानाविधानां तीर्थानां कथां चाकथयन्नृपे ।। १ ।।
पुरुषोत्तममाहात्म्यं जगाद च पुनः पुनः ।
भूयो भूयः प्रशंसां च कृत्वा यावच्च तिष्ठति ।। २ ।।
तावद्राजाऽपि क्षेत्रज्ञः श्रुत्वा सानन्दमानसः ।
पप्रच्छ जटिलं देवं साक्षाद्विष्णुस्वरूपकम् ।। ३ ।।

इन्द्रद्युम्न उवाच

जटाधारिन् वैष्णवाग्र्य नरोत्तमकथाः श्रुताः ।
तत्क्षेत्रस्य चरित्राणि कथय वैष्णवोत्तम ।। ४ ।।
क्षेत्रस्य चायतिः का वा देवताः सन्ति का अपि ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते भवसागरात् ।। ५ ।।

वैष्णव उवाच

राज्ञः स वचनं श्रुत्वा प्रोवाच द्विजपुङ्गवः ।
शृणु वैष्णवक्षेत्रस्य चायतं पञ्चक्रोशकम् ।। ६ ।।
द्विक्रोशं सागरेऽपि स्यात् त्रिक्रोशं पृथिवीतले ।
एतयोर्लक्षणं वक्ष्ये समुद्रान्तर्यदा भवेत् ।। ७ ।।
तीर्थराजत्वमगमद् यतः शङ्खस्य स्पर्शनात् ।
प्रत्यहं ये जनास्तत्र स्नानं कुर्वन्ति हे नृप ।। ८ ।।
मुच्यन्ते सर्वपापेभ्यो महापातकसंयुताः ।
त्रिक्रोशस्य विधिं राजन् !शृणु तत्कथयाम्यहम् ।। ९ ।।
दक्षिणावर्त्तशङ्खोऽयं स्मरतां पापनाशनः ।
शङ्खमध्ये स्थितो विष्णुर्नीलरूपश्चतुर्भुजः ।। १० ।।
विराजते नृपश्रेष्ठ दर्शनान्मुक्तिदो नृणाम् ।
शङ्खो भवेत् त्रिरावृत्तस्तस्मिन् या देवताः स्थिताः ।। ११ ।।
तेषां नामानि वक्ष्येऽहं शृणु राजन् सुखं भज ।
प्रथमावरणे देवी विमला चाद्यशक्तिका ।। १२ ।।
तिष्ठन्ती विष्णुनिर्माल्यं ध्यायन्ती च सदोत्थिता [१] ।
तदग्रे रौहिणं कुण्डं कारुण्योदकसंप्लुतम् [२] ।। १३ ।।
तिर्यग् जन्तुर्वायसोऽपि स्पृष्ट्वाऽपो मुक्तिमागतः ।
तदग्रेऽपि [३] नृसिंहश्च तिष्ठेच्चन्दनशाखिनः ।। १४ ।।
तस्य मूले सदा तिष्ठेत्तदग्रे वटवृक्षकः ।
कल्पवृक्षस्तस्य नाम सदा विष्णोर्निवासकः ।। १५ ।।

---

(१) सदा स्थिता (२) संयुतम् (३) यदग्रे

तस्य च्छायां वसेद्योऽपि ब्रह्महत्यां व्यपोहति ।
तस्मिंश्चावरणे देव ईशानेश्वरसंस्थितिः ।। १६ ।।
प्रथमावरणेऽप्येते द्वितीयावरणे कथाम् ।
शृणु त्वं देवतानां च नामानि कथयाम्यहम् ।। १७ ।।
कपालमोचनो नाम देवस्तिष्ठति निष्पृहः ।
मणिकर्णिकेति तीर्थं यतोऽस्य निष्कृतिर्भवेत् ।। १८ ।।
तस्य पार्श्वे चण्डरूपा देवी तिष्ठति सायुधा ।
तदग्रे श्वेतगङ्गा च तत्रापि मत्स्यमाधवौ ।। १९ ।।
तिष्ठतश्च महाराज तदग्रे कालिकास्थितिः ।
कालिकायाः पृष्ठतश्च चण्डरूपाग्रतस्तथा ।। २० ।।
वटसागरयोर्मध्यं पवित्रं पापनाशनम् ।
कपालमोचनाद्राजन् यावदर्द्धाशिनी स्थिता ।। २१ ।।
एतच्छङ्खस्य मध्यं हि विजानीहि नृपोत्तम ।
प्रासादपूर्वभागे तु तिष्ठन्ती सा मरीचिका ।। २२ ।।
तस्याः दर्शनमात्रेण सर्वकामफलं लभेत् ।
मरीचिकापृष्ठदेशे चक्रतीर्थमिति स्मृतम् ।। २३ ।।
(यतोऽभवच्चक्रच्छाया चक्रतीर्थमितीरितम् ।)
प्रासादवायुकोणेऽपि मार्कण्डेयावटः स्थितः ।
मार्कण्डेयेश्वरः शम्भुर्वर्त्तते मुक्तिदो नृणाम् ।। २४ ।।
तृतीयावरणं राजन् !शृणु हि पापनाशनम् ।
समुद्रस्य तटे तिष्ठेद् यमेश्वर इतीरितः ।। २५ ।।
कोटिलिङ्गेश्वरः सोऽपि यमसन्तापनाशनः ।
तत्पार्श्वे कण्डुनामा च तिष्ठेत्स मुनिसत्तमः ।। २६ ।।
प्रासादपश्चिमे देशे तिष्ठति सर्वमङ्गला ।
शङ्खस्य पृष्ठदेशेऽपि जानीयान्नृपसत्तम ।। २७ ।।

तस्य दक्षिणपार्श्वेऽप्यलावुकेश्वर ईरितः ।
भविष्यति नृपश्रेष्ठ जनानां कामदो भवेत् ।। २८ ।।
शङ्खस्य पृष्ठभागे तु एतावपि च संस्थितौ ।
प्रासादतो द्विसहस्रं धेनुकं क्रोशमात्रकम् ।। २९ ।।
प्रासादनिधिपे देशेऽप्यालम्बा च स्थिता नृप ।
तद्वामे मूषिकस्तिष्ठेत्तृतीयावरणोऽप्ययम् ।। ३० ।।
शङ्खाग्रे नीलकण्ठस्य स्थितिः प्रासादतो नृप ।
नीलकण्ठस्य पर्य्यन्तं द्विसहस्रं हि धेनुकम् ।। ३१ ।।
प्रासादतश्चक्रतीर्थप्रभृति द्विसहस्रकम् ।
एतच्च त्रितयं क्रोशं विद्धि राजन् ! तवाग्रतः ।। ३२ ।।
कथये सर्वक्षेत्रेषु यंतः श्रेष्ठतमो भवेत् ।
यत्पृच्छसि महाराज कथितं तत्तवाग्रतः ।। ३३ ।।
शिवो भवानी मनसि विचार्य्यौ भगवद्धिया ।
उपासते महाविष्णुं शिवोऽपि चाष्टधाऽभवत् ।। ३४ ।।
भवानी चाष्टधाशक्तिं विभाज्य क्षेत्रके स्थिता ।
तन्नामानि शृणु ब्रह्मन् ईश्वरस्य च धीमतः ।। ३५ ।।
वटेशो वटमूले तु क्षेत्रपालो यमेश्वरः ।
ईशानो नीलकण्ठः स्यान्मार्कण्डेयश्च विल्वकः ।। ३६ ।।
कपालमोचनो नाम लिङ्गान्यष्टौ महेशितुः ।
रुद्राणी वटमूले तु मङ्गला विमला तथा ।। ३७ ।।
शङ्खस्य पृष्ठभागे तु संस्थिता सर्वमङ्गला ।
अर्द्धाशिनी तथाऽऽलम्बा कौवेरदिशि संस्थिता ।। ३८ ।।

कालरात्री दक्षिणस्यां पूर्वस्यां तु मरीचिका ।
कालरात्र्यास्तथा पश्चाच्चण्डरूपा व्यवस्थिता ।। ३९ ।।
अष्टाभिश्च स्वरूपैस्तु रक्षितं क्षेत्रमुत्तमम् ।
एतज्ज्ञात्वा नृपश्रेष्ठ ! गच्छ त्वं नृपसत्तम !।। ४० ।।
यतस्त्वं वैष्णवाग्र्योऽपि संयतस्तस्य दर्शने ।
इत्युक्त्वा जटिलस्तत्राऽप्यन्तर्धानमुपागतः ।। ४१ ।।

इति श्रीवामदेवसंहितायां श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये शङ्खनिर्णयो नाम द्वितीयोऽध्यायः ।।

तृतीयोऽध्यायः

श्रीवामदेव उवाच

जटिलेऽपि गते राजा क्षेत्रदर्शनलालसः ।
शृण्वन्त्वहो कोविदाश्च तद्गन्तुं केन शक्यते ।। १ ।।
तत्समाचारवृत्तान्तं ज्ञात्वा सर्वं मयि न्यसेत् ।
को वा समर्थः कथय मत्कार्ये सत्वरो भव ।। २ ।।
राज्ञस्ते वचनं श्रुत्वा चोत्तरं न ददुः पुनः ।
पुरोहितानुजस्तस्मिन्नाम्ना विद्यापतिस्ततः ।। ३ ।।
क्षेत्रभ्रमणशीलश्च क्षेत्रं पश्याम्यहं नृप ।
सर्वं ज्ञात्वा त्वयि वार्त्तां कथयामि तवाग्रतः ।। ४ ।।
पुरोहितवचः श्रुत्वा स राजा हृष्टमानसः ।
ततः प्रस्थापयामास सुमुहूर्त्ते द्विजोत्तमम् ।। ५ ।।

रथे तिष्ठन् द्विजवर औत्सुक्येन जगाम सः ।
दिने कतिपये देवि चोत्कलं देशमागतः ।। ६ ।।
महानदीतटे स्थित्वा चर्चिकां च विलोक्य सः ।
ततोऽप्यागतवान् विप्रः सरणिं न च प्राप्तवान् ।। ७ ।।
क्षेत्रस्य पश्चिमे देशे तत्रास्ते शबरालयः ।
विश्वावसुर्नाम तत्र कश्चिच्च शबरोत्तमः ।। ८ ।।
तं दृष्ट्वा ब्राह्मणो ब्रूयान्मित्र मित्र दयां कुरु ।
प्रभोर्दर्शनमाकाङ्क्ष्ये त्वद्गृहं प्राप्तवानहम् ।। ९ ।।
ममोपरि कृपां कृत्वा दर्शय नीलमाधवम् ।
तच्छ्रुत्वा शबरो धीमान् विचार्यात्यन्तदुःखितः ।। १० ।।
विष्णोः पूजादिकं कृत्वा सोऽपि तत्क्षण आगतः ।
मनसा स विचार्याथ किमहो कष्टमास्थितः[१] ।। ११ ।।
एकपदं मार्गमपि चागतो द्विजसत्तमः ।
इति मत्वा द्विजवरं मित्र आगच्छ मन्दिरम् ।। १२ ।।
गृहमध्यं च तं नीत्वा पूजां कृत्वा द्विजं वदेत् ।
फलमूलादिकं भुङ्क्ष्व मित्र मद्भाग्यमागतम् ।। १३ ।।
तच्छ्रुत्वा ब्राह्मणो ब्रूयान्न भक्ष्ये दर्शनावधि ।
ब्राह्मणस्य वचः श्रुत्वा शबरोऽप्याह तं तदा ।। १४ ।।
शृणु विप्र ! कथं देवदर्शनं वाऽपि तद्भवेत् ।
एकपादश्च यन्मार्गः शिलाकण्टकदुस्तरः ।। १५ ।।
अत्र तिष्ठ द्विजश्रेष्ठ दर्शनं त्वं करिष्यसि ।
शबरस्य वचः श्रुत्वा द्विजः प्राञ्जलिरब्रवीत् ।। १६ ।।

---

(१) कष्टमागतः

विलम्बोऽत्र यदि भवेदीश्वरस्य च दर्शने ।
न भक्ष्यामि शृणु ब्रह्मन् यावद्देवस्य दर्शनम् ।। १७ ।।
इति श्रुत्वा हि शबरो ब्राह्मणस्य करं दधौ ।
शिलाकण्टकमार्गे च गत्वा रौहिणसंज्ञकम् ।। १८ ।।
तत्र स्नात्वा वटं नत्वा विमलां तत्र पश्यति ।
ततो गच्छन् प्रसन्नात्मा विष्णोः स्थानमुपागतः ।। १९ ।।
विप्र पश्य हि देवेशं चर्मणा चक्षुषा त्विमम् ।
ब्रह्मादिभिश्च दुर्लभ्यं तव भाग्यवशाद्द्विज ।। २० ।।
द्विजो नत्वा तु तं देवं नीलमाधवमीश्वरम् ।
देवदेव जगन्नाथ नीलमाधवसुन्दर ।। २१ ।।
लक्ष्मीपते हरेकृष्ण सर्वरूपधर प्रभो ।
मम पापविनाशं च कुरु देव नमोऽस्तु ते ।। २२ ।।
शतप्रणामं कृत्वा तु पुनः साष्टाङ्गमाचरत् ।
कृतार्थोऽस्मि कृतार्थोऽस्मि कृतार्थोऽस्मि जगद्गुरो ।। २३ ।।
अपराधं क्षमस्व त्वं त्वद्भक्तिं च प्रदेहि मे ।
दर्शनानन्तरं तं च शबरो वाक्यमब्रवीत् ।। २४ ।।
अतः समुद्रस्नानं च कुरु त्वं तीर्थराजके ।
स्नानानन्तरतो वाचं जगाद शबरोत्तमः ।। २५ ।।
सिंहव्याघ्रादिभिर्जुष्टमेतत्स्थानं भयङ्करम् ।
ईश्वरान्माल्यमानीय ब्राह्मणाय न्यवेदयत् ।। २६ ।।
ततः शबरपल्लीं च प्राप्तवन्तौ च तौ प्रिये ।
रात्रौ दद्याद् ब्राह्मणाय नैवेद्यमीश्वरस्य च ।। २७ ।।
भक्षितवान् द्विजवरः प्राह तं शबरं प्रति ।
कुतो लब्धं भक्ष्यमिदं राज्ञां सद्मनि दुर्लभम् ।। २८ ।।

तच्छ्रुत्वा शबरोऽप्याह चैतद्गुह्यतमं प्रिय ।
रात्रावप्यागतैः सर्वैर्देवैः पूजादिकं कृतम् ।। २९ ।।
पूजानन्तरतो याति प्रातः काले मया गतम् ।
नीलमाधवदेवस्य पूजां कृत्वा मयाऽऽहृतम् ।। ३० ।।
सर्वं त्वद्भक्षणार्थं वै मया दत्तं द्विजोत्तम ।
ब्राह्मणो हृष्टमनसा भक्ष्यं कृत्वा सुषुप्तकः ।। ३१ ।।
पुराणानां कथाभिश्च रात्रिं नीत्वाऽथ मित्रकम् ।
पुनः प्रोवाच विप्रोऽसौ ह्यनुज्ञां देहि मां प्रति ।। ३२ ।।
विप्रस्य वचनं श्रुत्वा शबरो ब्राह्मणं प्रति ।
गच्छ मित्र [१] राजगृहं कथय सर्वकारणम् ।। ३३ ।।
आगच्छतु द्रुतं राजा त्वत्र वासं करिष्यति ।
तत्सकाशाज्जगन्नाथः पूर्वार्द्धं ब्रह्मणोऽवसत् ।। ३४ ।।
न वक्तव्यं गुह्यतमं गच्छ मित्र स्वकं गृहम् ।
गृहात्स्रजं समानीय निर्माल्यं ब्राह्मणाय च ।। ३५ ।।
ददौ विनयपूर्वेण प्रस्थापयति तं द्विजम् ।
मित्रमालिङ्गितं कृत्वा संभ्रमेण रथोपरि ।। ३६ ।।
उषित्वाऽपि द्विजवरो मनस्येवं व्यचारयत् ।
क्षेत्रभ्रमणकं कृत्वा गमिष्यामि नृपं प्रति ।। ३७ ।।
इति मत्वा द्विजवरो क्षेत्रभ्रमणमाचरत् ।
ततो गतो द्विजवरो ह्यवन्तीदेशकं प्रति ।। ३८ ।।
सायंकालेऽप्युपगतः श्रुत्वा राजा त्वरान्वितः ।
प्रतिहारिणा चारेण हठान्नीत्वा द्विजोत्तमम् ।। ३९ ।।

---

(१) विप्र

वेत्रप्रहारिणः सर्वे पार्श्वयोः परितः स्थिताः ।
अवतीर्य रथाद् विप्रोऽप्यालिलिङ्ग नृपोत्तमम् ।। ४० ।।
राजा पूजादिकं कृत्वा चासने सन्न्यवेशयत् ।
राज्ञो गले स्रजं सोऽपि दत्वा निर्माल्यकं शुभम् ।। ४१ ।।
राजा गृहीत्वा चोत्तस्थौ कृतार्थोऽहं न संशयः ।
द्विजः प्रसादान्निर्मुक्तः संसारार्णवतः क्षणात् ।। ४२ ।।
देवदेवं बहु स्तुत्वा साष्टाङ्गं प्रणनाम सः ।
शृण्वन्तु कोविदाः सर्वे यत्कृतं तु द्विजन्मना ।। ४३ ।।
न भूतं न भविष्यं च यत्कृतो वर्तमानके ।
द्विज कथय तत्क्षेत्रप्रमाणं तस्य कारणम् ।। ४४ ।।
सभामध्ये द्विजवरः कथितुं संयतोऽभवत् ।
विरजाक्षेत्रमारभ्य क्षेत्रकार्यं जगाद सः ।। ४५ ।।
हे शैलजे शृणु विभोः पुरुषोत्तमाख्य-
मध्यायमेव तु पठेत् सुजनो मनुष्यः ।
प्राप्नोति विष्णुपदवीं सुरपूज्यमानां
प्राणप्रिये कलिहरां सकलार्थदां च ।। ४६ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तमक्षेत्रमाहात्म्ये तृतीयोऽध्यायः ।।

चतुर्थोऽध्यायः

श्रीपार्वत्युवाच

देव कथय राजा च किं चकार ततः परम् ।
विद्यापतिर्ब्राह्मणोऽपि राज्ञे किं किं न्यवेदयत् ।। १ ।।
तच्छ्रुत्वाऽपि कृतार्थोऽस्मि यच्छ्रुत्वा मुक्तिभाग्जनः ।
पार्वतीवचनं श्रुत्वा प्रोवाच जगतां पतिः ।। २ ।।

श्रीवामदेव उवाच

राजा विद्यापतिं दृष्ट्वा माल्यनिर्माल्यपूर्वकम् ।
ततो हृष्टमना भूत्वा स्तुतिं चक्रे स भूपतिः ।। ३ ।।
मेने तं मुक्तिभाजं स विद्यापतिमभाषत ।
विप्र कथय तत्स्थानं केन रूपेण त्वं गतः ।। ४ ।।
प्रभोः स्वरूपं दृष्ट्वाऽथ तत्तन्मह्यं निवेदय ।
स राज्ञो वचनं श्रुत्वा विद्यापतिरुवाच तम् ।। ५ ।।

विद्यापतिरुवाच

त्वदाज्ञां मूर्ध्नि चादाय गतवान्पुरुषोत्तमम् ।
चर्च्चिकां च समालोक्य तथा चैकाम्रकं गतम् ।। ६ ।।
ततोऽगच्छं क्षेत्रवरमपराह्णे विवेश ह ।
मार्गं न प्राप्तवान् तत्र प्राप्तश्च शबरालयः ।। ७ ।।
विश्वावसुर्नाम तत्र शबरो धर्मशीलवान् ।
तन्मित्रीभूतः शबरो दर्शयामास केशवम् ।। ८ ।।
देवं दृष्ट्वा कृतार्थोऽस्मि तद्गृहे शयितं मया ।
प्रभाते रथमारुह्य तं पुरस्कारपूर्वकम् ।। ९ ।।
क्षेत्रस्य भ्रमणं कृत्वा मन्दिरे याश्च देवताः ।
तच्छृणुष्व महाभाग ! त्वादौ सिंहं प्रणम्य च ।। १० ।।
अहमादौ तीर्थराजजले स्नात्वा समागतः ।
पुनः सिंहं नमस्कृत्य ततश्चक्रं प्रणम्य च ।। ११ ।।
ततो विनायकं दृष्ट्वाऽप्यनन्तं क्षेत्रपालकम् ।
श्रीनृसिंहं ततो दृष्ट्वा रोहिणीकुण्डमज्जनम् ।। १२ ।।
यत्र तिर्यक् वायसोऽपि मज्जनाच्च चतुर्भुजः ।
ततो दृष्ट्वा चाद्यशक्तिं ततो माधवरूपकम् ।। १३ ।।

पश्यामीशानसंज्ञं च त्वत्समीपमुपागतः ।
यथेच्छसि कुरु राजन् यतस्त्वं वैष्णवाग्रणीः ।। १४ ।।
विप्रस्य वचनं श्रुत्वा राजा गन्तुं मनो दधे ।
राज्ये घोषणकं दत्वा कथयन् पुरुषोत्तमम् ।। १५ ।।
ये जनाश्चात्र तिष्ठन्ति सर्वे गच्छन्तु तं प्रति ।
ज्योतिर्विदं समाहूय दृष्ट्वा प्रास्थानिकं शुभम् ।। १६ ।।

गणक उवाच

देव शृणु माधवस्य पञ्चम्यां शुक्लपक्षके ।
जीववारेऽपि यात्रां च कुरु शीघ्रं नृपोत्तम ।। १७ ।।
तच्छ्रुत्वा नृपतिश्रेष्ठ प्राह जनपदानपि ।
सर्वे जनाः शृणुध्वं भो क्षेत्रं प्रति गता इमे ।। १८ ।।
तत्पञ्चमीदिने राजा गन्तुं हन्तोत्सुको यदा ।
तत्क्षणे नारदोऽप्यागात्तं दृष्ट्वा सहसोत्थितः ।। १९ ।।
अर्घ्यादिना च संपूज्य स्वासने संन्यवेशयत् ।
राजाऽथ नारदं प्राह गच्छामि पुरुषोत्तमम् ।। २० ।।
तत्र वासं करिष्यामि दृष्ट्वा च नीलमाधवम् ।
मम भाग्यवशादेव यतोऽपि त्वमिहागतः ।। २१ ।।
एतच्छ्रुत्वा नारदोऽपि जगाद नृपसत्तमम् ।

नारद उवाच

त्वं वैष्णवाग्र्यो नृपते वैष्णवान् फलशालिनः ।। २२ ।।
करोति भगवान् देवो यतस्त्वं वैष्णवाग्रणीः ।
नारदस्य वचः श्रुत्वा इन्द्रद्युम्न उवाच तम् ।। २३ ।।

इन्द्रद्युम्न उवाच

वैष्णवानां यथा धर्मान् कथय वैष्णवोत्तम ।
नारदो नृपतिश्रेष्ठं वैष्णवानां कथादिकम् ।। २४ ।।

भगवद्भजनासक्तास्तेषां दासाश्च ये जनाः ।
तेषां दासाश्च ये केचित्तान् विदुर्वैष्णवोत्तमान् ।। २५ ।।
शालग्रामशिलां ये वै पूजयन्ति दिवानिशम् ।
तुलसीधारिणो ये वै तान् विदुर्वैष्णवोत्तमान् ।। २६ ।।
इत्यादिवचनैर्देवो नृपं प्रति बुबोध सः ।
ततो राजा सर्वजनानाहूयाथ वचोऽब्रवीत् ।। २७ ।।
आगच्छन्तु मया सार्द्धं क्षेत्रवासाय ये जनाः ।
ते सर्वे तत्र तिष्ठन्तु यतो वैकुण्ठवासिनः ।। २८ ।।
इच्छन्नपि नापि चेच्छन् देहनाशोऽपि मुक्तिभाक् ।
पथि स्मशानेऽथ जले मण्डपे वाऽपि व्योमके ।। २९ ।।
पाताले यत्र कुत्रापि मोक्षश्च देहनाशने ।
इति तान् कथयित्वा तु ततः प्रस्थानकं कृतम् ।। ३० ।।
पुत्राय वीरभद्राय दत्वा राज्यमकण्टकम् ।
शुभे मुहूर्ते स नृपो गन्तुं क्षेत्रवरं प्रति ।। ३१ ।।
उत्सुको नारदेनाशु युक्तः सर्वजनैः सह ।
षडङ्गैश्च बलैः सार्द्धमग्निकुण्डजनैः सह ।। ३२ ।।
देवानां पूजनं कृत्वा मङ्गलारोपणं चरन् ।
रथे स्थितौ मुनिनृपौ जग्मतुः पुरुषोत्तमम् ।। ३३ ।।
दिनैः कतिपयैस्तौ च महानद्यास्तटं गतौ ।
चर्च्चिकां च समालोक्य ततश्चित्रोत्पलां नदीम् ।। ३४ ।।
नारदोऽपि च तन्नद्याः माहात्म्यं कथयंस्तदा ।
सायंकाले तत्र स्थित्वा प्रभाते क्षेत्रकं प्रति ।। ३५ ।।
मुनिनृपौ च मध्याह्नेऽप्येकाम्रकसमीपगौ ।
श्रुत्वा च मधुरं वाद्यं राजा पृच्छति नारदम् ।। ३६ ।।

एतत् क्षेत्रवरं देव चक्रक्षेत्रमिति स्मृतम् ।
नारदो नृपतिं बव्रेयत्कृतं त्रिपुरारिणा ।। ३७ ।।
पुरा विष्णुं समाराध्य कैलासाच्च शिवः स्वयम् ।
अत्र वासं सोऽपि चक्रे विष्णोराराधनात् फलम् ।। ३८ ।।
सर्वोन्नतो द्वादशश्च लिङ्गः स्यात् भुवनेश्वरः ।
गणनं लिङ्गमध्येऽपि न कुर्य्याद्वैष्णवोत्तम ।। ३९ ।।
अस्य दर्शनकं कुर्य्यात्ततश्च पुरुषोत्तमम् ।
इति श्रुत्वा नृपवरो नारदेन समाययौ ।। ४० ।।
देवं दृष्ट्वा बहु स्तुत्वा साष्टाङ्गं प्रणिपत्य च ।
ततः स्यन्दनमारुह्य राजा मुनिवरेण सः ।। ४१ ।।
कपोतेश्वरपार्श्वं तौ तिष्ठन्तौ सैनिकैः सह ।
कपोतेश्वरमाहात्म्यं नारद उक्तवान्नृपम् ।। ४२ ।।
विल्वेश्वरस्य माहात्म्यं कथयित्वा समाविशत् ।
मार्गं न लेभेऽप्यागन्तुं वामपाणिस्तथेक्षणम् ।। ४३ ।।
स्फुरद्राजाऽब्रवीद्वाक्यं नारदं मुनिसत्तमम् ।
किं कारणं मुनिवर कथय दुर्गुणः कथम् ।। ४४ ।।
नारदोऽपि नृपं प्राह नीलमाधवदर्शनम् ।
न भवेन्नृपशार्दूल यतो विद्यापतिर्गतः ।। ४५ ।।
सन्ध्याकाले बलवति वायौ प्रचलति सति ।
देवोऽप्यन्तर्हितो गच्छेत् स्वर्णवालुकयावृतः ।। ४६ ।।
राजा श्रुत्वा दुःखितोऽसौ मद्दुर्भाग्यवशाद्गतः ।
प्रायोपवेशनं कृत्वा मरिष्यामि न संशयः ।। ४७ ।।
इति श्रुत्वा नृपवचो नारदो ब्रह्मणः कथाम् ।
कथयित्वा नृपं शान्तं कृत्वा सर्वं न्यवेदयत् ।। ४८ ।।

नीलाद्रिनाथस्य कथां शुभां प्रिये
शृण्वन्ति ये वै विगतज्वरास्तथा ।
भवन्ति तेऽमी पदमव्ययं विभो
गच्छन्ति नीलाचलवासिनोऽपि च ।। ४९ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तमक्षेत्रमाहात्म्ये हरगौरीसंवादे चतुर्थोऽध्यायः ।।

पञ्चमोऽध्यायः

श्रीवामदेव उवाच

शृणु देवि ! ततो राजा प्रभाते नारदेन च ।
शनैः शनैरागतोऽसौ नीलकण्ठान्तिकं प्रिये ।। १ ।।
स्यन्दनं तत्र संस्थाप्य नीलगोत्रं च जग्मतुः ।
वालुकाभिः समायुक्तं शून्यं स्थानमलोकयत् ।। २ ।।
राजानं नारदो बव्रे पूर्ववृत्तान्तमीरितम् ।
ततो वटं दर्शयित्वा प्रभोः स्थानमसूचयत् ।। ३ ।।
कुण्डं च त्वाद्यशक्तिं च नृसिंहं पश्य हेऽनघ ।
ततो राजा देवतानां दर्शनं कृतवांस्तथा ।। ४ ।।
नृसिंहस्यान्तिके तिष्ठन् चन्दनस्य तरोस्तले ।
किं करोमि मुनिश्रेष्ठ न दृष्ट्वा देवमव्ययम् ।। ५.।।
मत्पुत्रो वीरभद्रोऽपि राज्यं करोत्यकण्टकम् ।
मरिष्यामि क्षेत्रवरे भवेयं मुक्तिभाक् ततः ।। ६ ।।
अब्रवीन्नारदो भूपं कुरु देव सहस्रकम् ।
अश्वमेधं शुभं त्वं हि नीलकण्ठसमीपके ।। ७ ।।

यदा यज्ञः समाप्तः स्यात् तदा विष्णुः प्रसीदति ।
श्वेतद्वीपाद्दारुरूपी चाविर्भूतो भविष्यति ।। ८ ।।
सप्तधा रूपमास्थाय जगन्नाथस्वरूपकः ।
करिष्यति चात्र वासं मनोदुःखं विसर्जय ।। ९ ।।
राजा श्रुत्वा मुनिवचो हृष्टरोमा बभूव ह ।
मुनिर्वदति राजानं त्वं गच्छ मम चाग्रतः ।। १० ।।
नीलकण्ठसमीपे त्वं कुरुष्व मन्दिरं शुभम् ।
अस्मान्नृसिंहं नेष्यामि स्थापयित्वाऽश्वमेधकम् ।। ११ ।।
कुरु सहस्रं हे ब्रह्मन् सर्वं सम्पादितं मया ।
मुनेर्वचनमाकर्ण्य राजा सत्वरमागतः ।। १२ ।।
नीलकण्ठसमीपे च मन्दिरं कृतवान् स तु ।
मुनिर्ज्ञात्वा तं नृसिंहं नीत्वा तत्रापि रक्षति ।। १३ ।।
दीपाद्दीप इव देवि राजा यागं चकार ह ।
यदा समाप्तिरभवच्चकारावभृथं नृपः ।। १४ ।।
रात्रौ स्वप्नं ददर्शाथ श्वेतद्वीपान्मनोरमात् ।
चन्दनतरुरागत्य विल्वेश्वरसमीपतः ।। १५ ।।
शङ्खचक्रान्वितं दिव्यं महागन्धसुगन्धितम् ।
जगन्नाथस्वरूपं तु पुष्पवृष्टिसमाकुलम् ।। १६ ।।
ब्रह्मादिभिः सुरगणैर्वेष्टितं वेदनादितम् ।
तं दृष्ट्वा कृतकृत्यस्तु राजा हृष्टो बभूव ह ।। १७ ।।
किमेतदपि आश्चर्यं प्राप्तवानपि चोत्थितः ।
मुनेरग्रेऽपि वृत्तान्तं कथयित्वा मनोरमम् ।। १८ ।।
मुनिः श्रुत्वा तु राजाग्रे त्वया यच्चिन्तितं नृप ।
अधुनैव भवत्येव नात्र कार्य्या विचारणा ।। १९ ।।

ततः प्रभातेऽपि जनाः पश्यन्ति लवणोदके ।
शङ्खचक्रादिसहितं सुगन्धं सुमनोरमम् ।। २० ।।
चन्दनतरुमेवं तं नृपाग्रे कथयन्ति च ।
शृणु देवार्णवतटे महावृक्षोऽपि तिष्ठति ।। २१ ।।
उपमारहितः सोऽपि यदिच्छसि तथा कुरु ।
मुनिमाहूय राजाऽपि वृत्तान्तं सन्न्यवेदयत् ।। २२ ।।
मुनिः श्रुत्वा हृष्टमनाःराज्ञाऽपि प्रतिबोधितः ।
उभौ स्यन्दनयुक्तौ तौ समुद्रं प्रति जग्मतुः ।। २३ ।।
वृक्षरूपं समालोक्य महाहर्षससम्भ्रमौ ।
समुद्रात्तु समानीय शकटे स न्यधापयत् ।। २४ ।।
पट्टवस्त्रेण संवेष्ट्यमहोत्सवतया पुनः ।
आनीय यागशालायां निरोधनगृहे न्यसेत् ।। २५ ।।
ततो मनसि संचिन्त्य किंरूपा प्रतिमा भवेत् ।
एतत्काले समायातो वृद्धो वर्द्धकीराशु च ।। २६ ।।
तं राजा प्राह हे ब्रह्मन् प्रतिमाघटनं कथम् ।
सोऽपि बव्रे नृपश्रेष्ठं प्रतिमांस्ते करोम्यहम् ।। २७ ।।
पञ्चदशदिनं राजन् कोऽपि तत्र न गच्छति ।
येऽपि शब्दं च शृण्वन्ति तेऽपि नरकवासिनः ।। २८ ।।
अतः पञ्चदशदिनं त्यक्त्वा तत्र तु गच्छतु ।
इति कथित्वा तूष्णीं स बभूव ह नृपाग्रतः ।। २९ ।।
राजा तद्वचनं श्रुत्वा रथकारे समर्प्य च ।
तत्र गत्वा वर्द्धकीस्तु दृढं कृत्वा निरोधनम् ।। ३० ।।
दिने दिने पुष्पवृष्टिर्भवति तद्गृहोपरि ।
महोत्सवं च कृतवान् तत्र सद्मनि राजराट् ।। ३१ ।।

पञ्चदशदिने द्वारमुत्पाट्य तत्र पश्यति ।
चतुर्मूर्त्तिधरं देवं ब्रह्ममूर्त्तिं निरामयम् ।। ३२ ।।
पश्चात् त्रयं च द्रष्टव्यं पुनरुत्सवमाचरत् ।
तत्रापि वर्द्धकीर्नास्ति दृष्ट्वा विस्मयमाययौ ।। ३३ ।।
नीलगोत्रेऽपि प्रासादं चकार नृपसत्तमः ।
प्रतिष्ठार्थं ब्रह्मलोकं जगाम नारदेन च ।। ३४ ।।
पथि पश्यन्ति ये देवाः कथयन्ति गुणादिकम् ।
ब्रह्मलोकं यदा प्राप्तः प्रतिहारी तदाऽवदत् ।। ३५ ।।
त्वमग्रे गच्छ हे देव पश्चान्नय नृपोत्तमम् ।
इति श्रुत्वा नारदोऽपि चाग्रे गत्वाऽवदद्विधिम् ।। ३६ ।।
इन्द्रद्युम्नोऽपि राजर्षिरायाति त्वत्समीपकम् ।
ब्रह्मा श्रुत्वा हृष्टमनाः चानय मत्समीपकम् ।। ३७ ।।
ममैव सोऽपीह वंश्यो धर्मज्ञः पृथिवीश्वरः ।
नारदोऽपि ततो गत्वाऽप्यानीय नृपसत्तमम् ।। ३८ ।।
राजा दृष्ट्वा च ब्रह्माणं नमस्कारं पुनः पुनः ।
कृतवान् विधिरुत्तिष्ठनालिङ्ग्य तु प्रपौत्रकम् ।। ३९ ।।
तिष्ठात्र प्रिय हे सामगानं भवतु कथ्यसे ।
कथादिकं तवैव स्यादिति श्रुत्वा नृपोत्तमः ।। ४० ।।
तिष्ठति नृप पूज्यस्तु सामगानसमापनम् ।
भवति प्राह भगवान् किमर्थं त्वं समागतः ।। ४१ ।।
कथय मत्समीपे त्वं सर्वं सम्पादितं मया ।
इति श्रुत्वा नृपवरो जगाद सर्वकारणम् ।। ४२ ।।
विभोः प्रादुर्भावं यत्तु प्रासादघटनादिकम् ।
उभयोश्च प्रतिष्ठार्थं त्वं ह्यागच्छतु सत्वरम् ।। ४३ ।।

ब्रह्मा श्रुत्वा नृपवचो जगाद वचनं तदा ।
शृणु पुत्र मया ज्ञातं नहि तत्समयो भुवि ।। ४४ ।।
गताः कति युगाः पुत्र गच्छ चाग्रे तु सत्वरम् ।
सम्पादय तच्च कार्य्यं पश्चाद्गन्ताऽस्म्यहं भुवम् ।। ४५ ।।
इति श्रुत्वा नृपवरो नारदेन समागतः ।
ददर्श देवतां तत्र प्रासादं न च पश्यति ।। ४६ ।।
सैकतेन च गुप्तः स्याद् गालो राजा क्षितौ प्रिये ।
श्रुत्वा नृपगुणं सोऽपि आचरच्च भुजिष्यवत् ।। ४७ ।।
पुनश्चकार प्रासादं सर्वं तेन कृतं नवम् ।
सर्वसम्पूर्णता यावत्तावत्तत्राभवद्ध्वनिः ।। ४८ ।।
हंसोपरिगतो ब्रह्माऽप्यागतः क्षितिमण्डलम् ।
राजा ननाम शिरसा ब्रह्मा प्रोवाच सादरम् ।। ४९ ।।
देवानहं प्रपश्यामि राजा श्रुत्वा प्रहृष्य च ।
रथे देवान् समास्थाप्य चानीय नीलपर्वतम् ।। ५० ।।
ब्रह्मा प्रतिष्ठां कृतवान् नामग्रहणमाचरत् ।
बलभद्रो जगन्नाथः सुभद्रा च सुदर्शनः ।। ५१ ।।
लक्ष्मी सरस्वती नाम्ना माधवो गृहरक्षकः ।
नामग्रहणमेतेषामेतान् सिंहासनोपरि ।। ५२ ।।
संस्थाप्य पूजामारेभे यथा सर्वदिने कृतम् ।
नृपमाहूय चाग्रेऽपि संस्थाप्य परिपश्य च ।। ५३ ।।
एवंरूपेण हे राजन् प्रत्यहं कुरु पूजनम् ।
आदौ कुर्य्यात् सूर्य्यपूजामर्भकं पूजनं ततः ।। ५४ ।।
प्रातः पूजां तथा देवि ततो मध्याह्नपूजनम् ।
सायंकाले च यत्पूजा तद्रूपं कृतवान् विधिः ।। ५५ ।।

इति कथित्वा राजाग्रे यथा भवति कर्मकम् ।
तत्तत्कर्म समारेभे कथयामि शृणु प्रिये ।। ५६ ।।
अध्यायमेतं जगदीश्वरस्य
पठन्ति ये वै कथयन्ति नित्यम् ।
ते वै सदा मुक्तिपथं लभन्ते
शृण्वन्ति नित्यं सुखिनो भवन्ति ।। ५७ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तममाहात्म्ये हरगौरीसम्वादे पञ्चमोऽध्यायः ।।

षष्ठोऽध्यायः

श्रुत्वा गौरी पुनः प्रष्टुं मनः कृत्वा विभोरपि ।
किं वा रूपेण विधिना कृता पूजा वद प्रभो ।। १ ।।

श्रीवामदेव उवाच

पार्वतीवचनं श्रुत्वा प्रोवाच नीललोहितः ।
शृणु देवि प्रवक्ष्यामि पूजाकर्म यदाचरेत् ।। २ ।।
पादयोः क्षालनं कुर्य्यादिन्द्रियस्पर्शनं ततः ।
एतदकुर्वतः देवि पूजा भवति निष्फला ।। ३ ।।
आदौ तत्र विरञ्चिस्तु पीठोपरि समाविशत् ।
चक्रे ह्यासनशुद्धिं च विघ्नोत्सारणकं ततः ।। ४ ।।
अपसर्पन्तु मन्त्रेण पुनः दिग्बन्धनं कृतम् ।
गुरुवन्दनकं कृत्वा भूतशुद्ध्यादिकं ततः ।। ५ ।।
रमित्यादि षडङ्गं च ततो ध्यानं समाचरत् ।
फुल्लारविन्दवदनं पीतनिर्मलवाससम् ।। ६ ।।

पङ्कजासनमध्यस्थं शुद्धजाम्बुनदप्रभम् ।
केयूरकटकोपेतं हारकुण्डलमण्डितम् ।। ७ ।।
सशङ्खचक्रं सुस्मेरं मुकुटोज्ज्वलभूषितम् ।
सोऽहमस्मीत्यभेदेन चिन्तयित्वाऽऽत्मपूजनम् ।। ८ ।।
मातृकां च ततः कृत्वा ध्यानं कृत्वा ततः परम् ।
प्राणायामं ततश्चक्रे पूरकादिकमाचरत् ।। ९ ।।
आवाहनादिकं कृत्वा ब्रह्मा हृष्टेन चेतसा ।
ध्यानं चक्रे विधानेन तद्वदामि शृणु प्रिये ।। १० ।।
जगन्नाथादिदेवानां शृणु ध्यानं वदामि तत् ।।
फुल्लेन्दीवरकान्तिमिन्दुवदनं वर्हावतंसं प्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्च्चिततनुं गोगोपसंघावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ।। ११ ।।
उद्यद्दिनकरमिन्दुकिरीटां
तुङ्गकुचां नयनत्रययुक्ताम् ।
स्मेरमुखीं वरदाङ्कुशपाशा-
भीतिकरां प्रभजे भुवनेशीम् ।। १२ ।।
इन्दिराभं त्रिनेत्रं मूषलहलधरं वासुदेवाग्रजातं
भोगीशं चारुवक्त्रं विषधरमुकुटं सेवितं देववृन्दैः ।
वन्देऽहं लोकनाथं त्रिभुवनविदितं सर्वसिद्धिं ददानं
रामं रामाभिरामं विकसितवदनं रेवतीप्राणनाथम् ।। १३ ।।
ध्यानानन्तरतो ब्रह्माऽप्यर्घ्यस्थापनमाचरत् ।
पीठपूजां ततश्चक्रे तत्स्वरूपं वदामि ते ।। १४ ।।
तुलसीदलतोयेन लिखित्वा पद्ममेव सः ।
पद्ममुद्रां दर्शयित्वा नवशक्तीरपूजयत् ।। १५ ।।

विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी तथा ।
सत्येशाना तथा देवि नव चैवापराजिता ।। १६ ।।
एवं कृत्वा सीरपाणेः सुभद्रायाः शृणु प्रिये ! ।
जया च विजया चैव अजिता चापराजिता ।। १७ ।।
नित्या विलासिनी चैव दुर्गा घोरा च मङ्गला ।
शक्तिपूजानन्तरतस्ततोऽप्यावाहनं पुनः ।। १८ ।।
देवाङ्गे मातृकां कृत्वा गन्धपुष्पादिनाऽयजत् ।
सुवासितजलेनापि गण्डूषान् द्वादश व्यधात् ।। १९ ।।
दानाय दन्तकाष्ठस्य संस्कृतिर्ब्रह्मणा कृता ।
वीक्षणं प्रोक्षणं चैव ताडनं चावगुण्ठनम् ।। २० ।।
धेनुपीयूषकरणमेवं सर्वत्र संस्कृतौ ।
पुनर्द्वादशगण्डूषं दन्तकाष्ठादनन्तरम् ।। २१ ।।
सुवर्णपत्रिकाभिश्च जिह्वोल्लेखनमाचरत् ।
पुनर्द्वादशगण्डूषं दत्त्वा दर्पणसंस्कृतिम् ।। २२ ।।
गन्धद्वारेति मन्त्रेण दत्त्वाप्यामलकं शुभम् ।
दधिक्राव्णेति मन्त्रेण दधिस्नानं समाचरत् ।। २३ ।।
समुद्रज्येष्ठा मन्त्रेण सुजलैः स्नानमाचरत् ।
शिरः प्रोञ्छनकं चापि वस्त्रेण विधिना कृतम् ।। २४ ।।
एतस्मिन् समये देवि ये पश्यन्ति जनार्दनम् ।
प्राप्नुवन्ति चतुर्वर्गानन्ते मोक्षं व्रजन्ति ते ।। २५ ।।
स्नानानन्तरतो ब्रह्मा सूर्य्यपूजां समाचरत् ।
विधिर्गत्वाग्निकोणं च सूर्य्यमत्युग्रमार्च्चयत् ।। २६ ।।
पवित्रेऽवनिदेशे वा जलेऽग्नावन्तरीक्षके ।
प्रतिमायां तथाऽम्भोजे मण्डले स्थण्डिलेऽपि वा ।। २७ ।।

यन्त्रे वा पूजनं चास्य सूर्य्यस्य च नगात्मजे ।
चतुर्द्वारसमायुक्तं युक्तमष्टदलैस्तथा ।। २८ ।।
कर्णिकारायितं पीठं मध्ये यस्य विराजते ।
सूर्य्ययन्त्रमिदं प्राहुस्तत्रैव पूजनं रवेः ।। २९ ।।
कथयामि च हे गौरि ! विष्णोः प्रीणनहेतवे ।
अष्टाक्षरं चाष्टदलेषु तेषु
संन्यस्य च द्वारचतुष्टये च ।
वेदांश्च विन्यस्य च मध्यदेशे
तारं समान्यस्य च तत्र सूर्य्यम् ।। ३० ।।
उपविश्य च पीठेऽसौ घण्टानादं तदाऽकरोत् ।
आसनं गुरुगणेशौच भैरवं प्रार्थयद्विधिः ।। ३१ ।।
तालत्रयेण क्रमतो दिग्बन्धनमथाचरेत् ।
भूतशुद्ध्यादिकं कृत्वा सूर्य्यमन्त्रं ततोऽवदत् ।। ३२ ।।
अष्टाक्षरस्य सौरस्य मन्त्रस्य ऋषिरेव च ।
ततो ज्वालं चतुर्थ्यन्तामुक्त्वाऽथ मणि हूं फट् ।। ३३ ।।
इत्यादिरूपैः सर्वं च कृत्वा ध्यानं समाचरत् ।।
शोणाम्भोजयुगाभयेप्सितकरं केयूरहाराङ्गद-
भ्राजत्कुण्डलमण्डितं त्रिनयनं माणिक्यसन्मस्तकम् ।
मन्दारद्युतिसुन्दरं सुरभसं घोरान्धकाराच्छिदं
लोकानन्दकरं परात्परतरं वन्दे सदा भास्करम् ।। ३४ ।
देवि त्रिकालपूजायां रवेः कृत्वा च पूजनम् ।
व्योममुद्रा पद्ममुद्रा कम्बुमुद्रा च निष्ठुरा ।। ३५ ।।
गोविषाणा धेनुमुद्रा तापिनी सप्तमुद्रिका ।
एताः मुद्रा प्रदर्श्याथ व्यापकत्रयमाचरत् ।। ३६ ।।

सामान्यार्घ्यं विधायाथ पीठपूजां समाचरत् ।
विलिख्य पद्ममुद्रां च दर्शयत्तदनन्तरम् ।। ३७ ।।
नवशक्तिस्तत्र तत्रापूजयत् प्रतिमाः शुभाः ।
दीप्ता सूक्ष्मा जया भद्रा विभूति विमला तथा ।। ३८ ।।
अमोघा विद्युता चैव तथा च सर्वतोमुखी ।
एतासां पूजनं कृत्वा गन्धपुष्पैश्च पीठके ।। ३९ ।।
सप्तावरणकं देवि भवति समयो न हि ।
धूपदीपौ ततो दत्त्वा सूर्य्यमन्त्रेण चार्च्चयेत् ।। ४० ।।
अर्घ्यं ह्यदाद्यतो देवि विनाऽर्घ्येण च नश्यति ।
त्वमेव वलिदानेन त्वर्घ्यदानेन भास्करः ।। ४१ ।।
अतः सकाशात् हे देवि सूर्य्यार्घ्यं च प्रदापयेत् ।
सूर्य्यपूजां विना विष्णोः पूजां यो मूढधीश्चरेत् ।। ४२ ।।
सा पूजा राक्षसैर्ग्राह्या प्रीतो न स्याज्जनार्द्दनः ।
पूर्वद्वारं प्रविश्यासौ पीठे तत्र महोदये ।। ४३ ।।
उपविश्य ततो धीमानासनादिं समाचरत् ।
मातृकान्तं ततो देवि सामान्यार्घ्यं ततोऽचरत् ।। ४४ ।।
द्वारशाखाद्वयोर्मध्ये तत्र दक्षिणदेशतः ।
जयं चण्डं च धातारं बलं च जाह्नवीं तथा ।। ४५ ।।
एतांस्तु दक्षिणे देशे द्वारस्यापूजयद्विधिः ।
वामपार्श्वेऽथ विजयः प्रचण्डश्च महाबलः ।। ४६ ।।
विधाता प्रबलश्चैव यमुना च नगात्मजे ।
एताश्च देवताः सर्वाःवामेऽभूवन् समर्च्चिताः ।। ४७ ।।
जयं च विजयं चैव चित्रेणैव विनिर्मितम् ।
आवाह्य देवताः सर्वास्तत्पार्श्वेऽपूजयत्क्रमात् ।। ४८ ।।

द्वारोपरिष्टात् व्यलिखन्महालक्ष्मीं सुशोभनाम् ।
निधिं शङ्खं च पद्मं च तस्याः पार्श्वेद्वयेऽपि च ।। ४९ ।।
तदूर्ध्वदेशे परमे ग्रहाणां स्थितिमालिखत् ।
द्वाराधोदेशतः श्रीमद्देहल्यां क्षेत्रपालकम् ।। ५० ।।
कालरात्रीं च सञ्चिन्त्य पूजयद्विधिवद्विधिः ।
विष्णोश्च पुरतः स्तम्भे तिष्ठन्तं वाहनं खगम् ।। ५१ ।।
अपूजयद्यथा ध्यात्वा तत्सर्वं निगदाम्यहम् ।
शृणु देवि तदा ब्रह्मा .आदौ ध्यात्वा च भैरवम् ।। ५२ ।।
हे भैरव !महाबाहो !प्रासादे सावधानकः ।
भवासिं धृतवान् त्वं हि पूजायाःरक्षणं कुरु ।। ५३ ।।
तीक्ष्णदंष्ट्र महाकायाप्यश्वपृष्ठस्थित प्रभो ।
असिं गृहाण वरद पूजायां वरदो भव ।। ५४ ।।
ध्यायेत् सदा भैरवमादिमूर्त्तिं
सर्गस्थितिध्वंसनकारणं च ।
अत्र स्थले हन्त तवाधिकारोऽ-
प्यतः सकाशाद्भव सावधानः ।। ५५ ।।
चण्डादीनां तथा ध्यानं तत्सर्वं शृणु हे प्रिये ! ।
चण्डं च चिन्तयेच्छान्तं श्यामं कमललोचनम् ।। ५६ ।।
विद्रुमाधरशोभाढ्यं नानालङ्कारमण्डितम् ।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।। ५७ ।।
द्वारस्य दक्षिणेभागे सर्वलोकैकवन्दितम् ।। ५८ ।।
शङ्खञ्च चक्रञ्च गदाक्षमाले
करैश्चतुर्भिर्दधतं सुरम्यम् ।
नारायणाकारधरं सुनीलं
सव्ये जयं तं परिचिन्तयामि ।। ५९ ।।

धातारं चिन्तयेत्तं तत्कार्त्तस्वरसमप्रभम् ।
हंसपृष्ठगतं चाक्षसूत्रचारुकमण्डलुम् ।। ६० ।।
सर्वाभरणभूषाढ्यं दक्षदेशे स्थितं परम् ।
बलं भूरिबलं धीरं सुन्दरं भक्तितत्परम् ।। ६१ ।।
मालाखड्गलसद्धस्तं भावयेद्दक्षिणे मुहुः ।। ६२ ।।
कुन्देन्दुहीरधवलां मकराधिरूढां
स्मेरां चिताधरतटीं वरसूक्ष्मचेलाम् ।
नीलोत्पलं करतले कलशं च सव्ये
धृत्वा स्थितां हृदि नमामि च जह्नुकन्याम् ।। ६३ ।।
शङ्खचक्रगदामालालसत्करचतुष्टयम् ।
नीलाभं वामपार्श्वस्थं सर्वाभरणभूषितम् ।। ६४ ।।
सुस्मेरापाङ्गमानन्दप्रदं तं विजयं भजे ।। ६५ ।।
नवाम्बुदश्यामतनुं प्रचण्डं
चण्डांशुवच्चण्डसुतेजसं तम् ।
सुवर्णवेत्रेण च पङ्कजेन
लसत्करद्वन्द्वमहं भजामि ।। ६६ ।।
नमामि तं विधातारं हंसवाहनमुत्तमम् ।
किंजल्कवर्णरम्याभं मालापुस्तकसत्करम् ।। ६७ ।।
सुरासुरकुलानन्दं सुखदुःखप्रदायकम् ।
प्रबलं बलिनां श्रेष्ठं खड्गचर्मधरं शुभम् ।। ६८ ।।
सुवर्णवर्णं रत्नाढ्यं सर्वलोकनमस्कृतम् ।। ६९ ।।
यमुनां नीलवर्णाभां नानाभूषणभूषिताम् ।
कलशाम्बुजसद्धस्तां कृष्णभक्तपरां भजे ।। ७० ।।

द्वारोदूर्ध्वदेशनिलयां कमलासनां तां
स्मेराननां कमलरम्यकरां कटाक्षैः ।
तावत्स्वभक्तजनतापहरां मुरारेः
प्राणप्रियां जलधिराजसुतां नमामि ।। ७१ ।।
नानाशर्मप्रदं शान्तं कुन्देन्दुधवलप्रभम् ।
कोटिपुण्यचयैर्दृश्यं तं च शङ्खनिधिं भजे ।। ७२ ।।
सुरासुरनमस्कारचारुपादतलद्वयं ।
नानाभीष्टचयानन्दप्रदं पद्मनिधिं भजे ।। ७३ ।।
देहल्यन्तिकवासिनं हयचयश्रेष्ठासनं दुर्द्धरं
चञ्चत्खड्गकपालराजितकरं पूर्णेन्दुशोभाधरम् ।
वक्त्रोत्तुङ्गतराग्रदन्तनकरं सर्पावलीभूषितं
राजच्छूलनमन्तकं त्रिनयनं तं क्षेत्रपालं भजे ।। ७४ ।।
तावद्वक्त्रकरालदन्तनकरप्रोभीषणास्यां कृशां
रक्ताक्षीं द्विभुजां महोन्नतकुचां चर्मासिराजत्कराम् ।
देहल्युत्तमशायिनीं त्रिनयनां मुण्डावलीमण्डितां
दुष्टध्वंसनतत्परां सुरनुतां तां कालरात्रिं भजे ।। ७५ ।।
तद्विष्णोर्वहने क्षमं बलवतां मध्ये वरं सुन्दरं
चंचद्भक्तरसप्रसारणपरं कान्त्या तु कार्त्तस्वरम् ।
अग्रे ध्यानपरायणं गुणमयं नागावलीचर्वणं
सर्वेषां वरगर्वणां भयतरं तं पक्षिराजं भजे ।। ७६ ।।
ध्यायेद्रक्तममुं रविं च शशिनं शुभ्रं तु भौमं पुनः
शोणं तावदमुं गुरुं तमधुना पीतं बुधं च क्रमात् ।
शुक्रं शुक्लतमं शनिं च मनसा राहुं च कृष्णत्विषं
केतुं धूमरुचिं शुभाशुभफलं प्रोल्लासदं भावये ।। ७७ ।।

कालरात्रि नमस्तेऽस्तु विष्णोर्देहलिसंस्थिते ।
मार्गं देहि हरेः पूजां करोमि भवदाज्ञया ।। ७८ ।।
तीक्ष्णदंष्ट्र नमस्तेऽस्तु भैरव विष्णुपार्श्वग ।
करोम्यहं हरेः पूजां त्वमेव संयतो भव ।। ७९ ।।
ततो भवनमाविश्य दृढं कृत्वा स्वमासनम् ।
विचार्य्य मनसि ब्रह्माऽप्यर्भकस्य यथारुचि ।। ८० ।।
तथैव पूजनं चक्रे दुग्धलाजेक्षुसम्भवैः ।
आसनादिकमाचक्रे धूपकाले विशेषतः ।। ८१ ।।
शृणु देवि ! पूर्ववाक्यं तद्वदामि तवाग्रतः ।
पुराऽप्येतत् शिवक्षेत्रमेकाम्रं विष्णुक्षेत्रकम् ।। ८२ ।।
नीलरूपोऽसि भगवानत्र तिष्ठति देवराट् ।
वदति त्रिपुरारिं च त्वमत्र रक्षणं कुरु ।। ८३ ।।
अहमेकाम्रकं क्षेत्रं पालयामि शिवाधव ।
इति हेतोस्तु तौ देवौ पालकौ क्षेत्रयोः शुभे ।। ८४ ।।
काश्यादिके सर्वक्षेत्रे महादेवस्तु भैरवः ।
तेन रूपेण देवेन परिपालनकं कृतम् ।। ८५ ।।
इति ब्रह्मा विचार्य्याथ भैरवस्तुतिमावहत् ।। ८६ ।।

वामदेव उवाच

श्रीभैरवं तं प्रणतार्त्तिहारिणं
महोन्नतं दीर्घकरालजिह्वकं ।
करालदंष्ट्रं द्विभुजं सकृष्णकं
धृतासिकं संयुतकेशधारिणम् ।। ८७ ।।
नमामि चोग्रं टीकुभ्रूकरालं
महोग्रदंष्ट्रं च सुदीर्घरूपं
वाजिस्थितं तं जगदीश्वरस्य
श्रीक्षेत्रपालं त्वसिधारिणं च ।। ८८ ।।

श्रीनीलकण्ठं जगदीशितारं
नीलाद्रिनाथस्य च क्षेत्रपालं ।
सिंहासनस्थं धृतयज्ञसूत्रं
तमूर्द्ध्वकेशं शरणं गतोऽहम् ।। ८९ ।।
नीलाद्रिनाथस्य च क्षेत्रमध्ये
त्वं पालकः स्यान्मम पूजनस्य
विघ्नं च मे नाशय देवदेव
श्रीनीलगोत्रेऽपि यतोऽधिकारी ।। ९० ।।
एवं ध्यात्वा भैरवं तं ततो नैवेद्यकं ह्यदात् ।
अज्ञानान्मोहतो वाऽपि समयोऽपि यदा न हि ।। ९१ ।।
धूपकालेऽपि कर्त्तव्यं यदि मोहान्न तत्कृतम् ।। ९२ ।।
धूपानन्तरतो देवि तद्द्रव्यस्य समर्पणम् ।
कृत्वा राजा सेवकेभ्यो दण्डं दत्त्वा च ताडयेत् ।। ९३ ।।
एवमर्भकपूजां च विधिश्चक्रे विभोरपि ।
यदा पूजा समाप्तिः स्यात्तदा स्नानं विधीयते ।। ९४ ।।
एतत्तु पूजनमथो जगदीशितुश्च,
पश्यन्ति येऽपि च जनाः कथयन्ति नित्यम् ।
ते वै सदा सुखचयं त्वरितं लभन्तेऽ-
प्यन्तःवसन्ति भवने नृहरेः सुखेन ।। ९५ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तमक्षेत्रमाहात्म्ये हरगौरीसंवादे षष्ठोऽध्यायः ।।

सप्तमोऽध्यायः

श्रीवामदेव उवाच

अतः परं प्रवक्ष्यामि जगदीशस्य साम्प्रतम् ।
यच्छ्रुत्वा मानवाः सर्वे सर्वान् कामानवाप्नुयुः।। १ ।।
वैष्णवाचमनं कृत्वा हरिद्राचूर्णकेन तु ।
त्रिभागमण्डलं कृत्वा दम्पत्योर्यत्र भोजनम् ।। २ ।।
एतस्मात्कारणाच्चूर्णं पीतवर्णं नगात्मजे ।
रेखावाह्यं न कर्त्तव्यं कृते तु राक्षसैर्हृतम् ।। ३ ।।
अतो मण्डलवाह्यं तु न कर्त्तव्यं सुलोचने ।
एतज्ज्ञात्वा तु विधिना ह्यादौ रेखा समाकृता ।। ४ ।।
सिंहासने प्रविश्याथ भैरवं प्रार्थयद्विधिः।
क्षेत्रपालं च द्विभुजमसिचर्मविधारकम् ।। ५ ।।
वन्देऽहं पूजकः सिद्धिं दधान भैरवं विभुम् ।। ६ ।।
श्रीसिंहासनपार्श्वगं हयकरि श्रेष्ठासनं दुर्द्धरं
चञ्चत्खड्गमथो दधानमपरे सव्ये करे चर्मकम् ।
वक्त्रोत्तुङ्गतरोग्रदन्तनिकरं सर्पावलीभूषितं
धम्मिल्लेन युतं शिवं त्रिनयनं श्रीभैरवं तं भजे ।। ७ ।।
तीक्ष्णदंष्ट्र महाकाय कल्पान्तःदहनोपम ।
अनुज्ञां देहि मे नाथ विष्णुपूजां करोम्यहम् ।। ८ ।।
तीक्ष्णदंष्ट्र नमस्तेऽस्तु भैरव विष्णुपार्श्वग ।
करोम्यहं हरेः पूजां त्वमेव संयतो भव ।। ९ ।।
इति भैरवमाज्ञाप्य देवांश्च प्रार्थयेत्ततः।
पूजाक्रमं शृणु देवि मनसा सावधानतः।। १० ।।

देवतासन्निधिं गच्छेत्पूर्वं संप्रार्थ्य देवताः।
पीठोपरि चोपविश्य ततो घण्टां प्रवादयेत् ।। ११ ।।
आसनं च ततः कुर्य्यात्कूर्मादींश्च प्रपूजयेत् ।
भूतोत्सादनमेवं तु गुरुवन्दनमाचरेत् ।। १२ ।।
पीठस्यानिलकोणके स्थिरतरान् देदीप्यमानप्रभान्
विष्णोर्ध्यानपरायणान् सुवसनान् संज्ञानदानोत्सुकान् ।
भालोद्यद्धरिमन्दिरान् सुतुलसीमालाकृताडम्बरान्
वन्दे तांश्च गुरून् परान् परतरान् यज्ञोपवीतोज्ज्वलान् ।। १३ ।।
हस्तयोः शोधनं कुर्य्यात्तालत्रयमतः परम् ।
दिग्बन्धनं ततः कृत्वा भूतशुद्धिमथाचरेत् ।। १४ ।।
प्राणप्रतिष्ठां कुर्य्यात्तु प्रणवं च ततः परम् ।
ततोऽन्तर्मातृकां कुर्य्यात्सृष्टिस्थितिलयात्मिकाम् ।। १५ ।।
सबिन्दुमातृकां कुर्य्यात्तथैव दशमातृकाम् ।
तत्त्वन्यासं ततः कृत्वा मन्त्रं प्रणवमेव च ।। १६ ।।
पीठन्यासं ततो धीमान् यथाविधि समाचरेत् ।
मूर्त्तिपञ्जरकं कुर्य्यात् षडङ्गन्यासमेव च ।। १७ ।।
ततो ध्यानं समाधाय मुद्रया च्छोटिकाख्यया ।
दिग्बन्धनं व्यापकानि चान्तर्यजनमाचरेत् ।। १८ ।।
निजमुद्रां प्रदर्श्याथ जलपात्रस्य संस्कृतिम् ।
तथाऽर्घ्यसंस्कृतिं कुर्य्यात् प्रोक्षणादिषु भाजनम् ।। १९ ।।
संस्कुर्य्यादथ भूदेवि कुर्य्यादात्मार्च्चनं बुधः।
मुद्राचतुष्टयमथो तिलकं रविसंख्यकम् ।। २० ।।
पञ्चपुष्पाञ्जलिं कृत्वा प्राणायामं चरेद्बुधः।। २१ ।।
जपं कुर्य्यादर्च्चकोऽसौ प्राणायामविधिं चरेत् ।
समर्पणं जपस्यापि कुर्य्याद् यन्त्रस्य निर्मितम् ।। २२ ।।

पीठपूजां ततस्तत्र कृत्वा ह्यावाहनादिकम् ।
ततो देवाङ्गतः कुर्य्यान्मातृकां केशवादिकम् ।। २३ ।।
मुद्राश्च षोडश प्राज्ञो देवाग्रे दर्शयेत्ततः।
आसनं प्रथमं प्रोक्तं स्वागतं तदनन्तरम् ।। २४ ।।
पाद्यमर्घ्यं तथाऽऽचामं मधुपर्कं ततः परम् ।
पुनराचमनं स्नानं वस्त्रं यज्ञोपवीतकम् ।। २५ ।।
उत्तरीयं ततो दद्यात्तथाऽऽभरणमेव च ।
गन्धं पुष्पं च मतिमान् दत्त्वाऽथावरणार्च्चनम् । २६ ।।
घण्टावादनकं कुर्य्याद्धूपदीपौ क्रमात् पुनः।
पुष्पाञ्जलित्रयं दत्त्वा पूर्ववच्च हिमात्मजे ।। २७ ।।
पाद्यमाचमनं चैव नैवेद्यं च ततः परम् ।
अपोशनं च तत्र स्यात्ततो नीराजनार्पणम् ।। २८ ।।
रविसंख्यांश्च गण्डूषान् जलधारांश्च दापयेत् ।
ताम्बूलं च प्रसन्नार्च्चां दूर्वाक्षतसमर्पणम् ।। २९ ।।
विलोमार्घ्यं ततो दद्यादाचरेद्धीनपूरणम् ।
ब्रह्मार्पणं ततः कुर्य्यात्प्रसादं वैष्णवान् प्रति ।। ३० ।।
स्वयं प्रसादं गृह्णीयान्नमस्कुर्य्यात्पुनः पुनः।
पठन् स्तुतिं च परमां कर्पूरावर्त्तिमाचरेत् ।। ३१ ।।
नीराजनं च देवानामग्रे कुर्य्यान्मनोरमम् ।
अनेन विधिना देवि ! पूजयेद्विष्णुमव्ययम् ।। ३२ ।।

श्रीमहादेव उवाच

पुनः शृणु प्रिये ! विष्णोर्नैवेद्यंस्य च प्रान्तके ।
चण्डनैवेद्यकं दत्त्वा विश्वक्सेनो हरेस्तथा ।। ३३ ।।
ममार्च्चनेऽपि चण्डाय चण्डनैवेद्यकं भवेत् ।
मातङ्गिनी तवापि स्याप् गणेशस्य च कुण्डकः।। ३४ ।।

सूर्य्यस्य तेज इत्युक्तं पूजासु सकलार्थदः।
ऐशान्ये चण्डनैवेद्यं दद्यात् पूजकसत्तमः।। ३५ ।।
तच्चण्डं पूजकस्यैव न नीत्वा नरकं व्रजेत् ।
मोहाद् वा स्खलनाद्वाऽपि मनश्चञ्चलतोऽपि वा ।
न कृत्वा चण्डनैवेद्यं नरके पतति ध्रुवम् ।। ३६ ।।
पूजकस्यापि चाहार एतद्भवति पार्वति !।
अन्ते नैवेद्यकं चापि द्विजाय प्रतिदापयेत् ।। ३७ ।।
अतः कारणतो देवि किञ्चिद्दद्यात्तु पूजके ।
पूजकस्य तु सन्तोषे तुष्टा भवति देवता ।। ३८ ।।
तन्नैवेद्यस्य षड्भागं दद्याद्देवस्य तुष्टये ।
यदि चण्डं न दद्याद्वै संघाते परिपच्यते ।। ३९ ।।
चण्डहीनं च नैवेद्यं व्यर्थं भवति पार्वति !।
चण्डं दद्यात्तु यो देवि स वसेद्विष्णुमन्दिरे ।। ४० ।।
एको देवः पञ्चविधो भवतीह नृपालने ।
मम तस्य न भेदोऽस्ति भेदं कुर्य्यात्स मूढधीः।। ४१ ।।
सूर्य्यस्य तेन रूपेण ह्यभेदो ज्ञायतां प्रिये !।
यत्तु चण्डं हरेर्देवि तद्दद्याद्ब्रह्मणोत्तमे ।। ४२ ।।
भिक्षुकाय ममैव स्यात्प्रथमाश्रमिणे तव ।
अवधूताय दातव्यं गणेशस्य वरानने ।। ४३ ।।
सूर्य्यस्य वैष्णवायापि न दत्त्वा नरके पतेत् ।
एवं प्रमाणतः कुर्य्यात्तस्माद्दद्यात्तु पूजके ।। ४४ ।।
पूजको देवरूपः स्यान्नात्र कार्य्या विचारणा ।
जगदीशगृहे देवि पूजकः सर्वपूजितः।। ४५ ।।
तस्मै देयं यदा किञ्चित्सन्तुष्टः पुरुषोत्तमः।
तस्मिन्तुष्टे देवतुष्टिर्भवेत्तु चारुलोचने ।। ४६ ।।

इति ज्ञात्वा प्रिये दद्याच्चण्डनैवेद्यकं तदा ।
तवाग्रे कथितं देवि भूयः शृणु विभोरपि ।। ४७ ।।
हे देवि मर्त्या विधिना यजन्ते,
द्वात्रिंशदर्च्चां जगदीशितुश्च ।
शृण्वन्ति नित्यं कथयन्ति येऽपि,
ते वै लभन्ते यजतां फलं च ।। ४८ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तमक्षेत्रमाहात्म्ये हरगौरीसंवादे सप्तमोऽध्यायः ।।

अष्टमोऽध्यायः

श्रीपार्वती उवाच

अधुना कथय ब्रह्मन् सत्यलोक य ईरितः ।
तस्मिन् स्थले व्यवस्था या तां त्वं कथय हे प्रभो ।। १ ।।
पार्वतीवचनं श्रुत्वा शिवः प्रोवाच सादरम् ।। २ ।।

श्रीवामदेव उवाच

पूजानन्तरतो ब्रह्मा जगाद नृपसत्तमम् ।
शृणु राजन्नवहितः द्वारपालात्प्रजापतिः ।। ३ ।।
तत्पर्य्यन्तं सत्यलोके यत्र सिंहासने हरिः ।
सप्तधावस्थितं देहं धृत्वा मानुषलीलया ।। ४ ।।
विराजते नृपश्रेष्ठ पूजाकाले विशेषतः ।
तिष्ठन्तं येऽपि पश्यन्ति ते नराः मुक्तिभागिनः ।। ५ ।।
अतस्त्वं सावधानः स्यात्तस्य स्थानस्य रक्षणे ।
तत्र युक्ताः प्रमत्ताश्चेत् तेषां त्वं दण्डदो भव ।। ६ ।।

ये जनास्तत्र गच्छन्ति चरेयुर्मुखबन्धनम् ।
सावधानपराःये च स्थले तत्र विशन्ति ते ।। ७ ।।
धृत्वोष्णीषं च शिरसि विशन्ति गर्वमानसाः।
ते सर्वे नरके घोरे पतन्त्याभूतसंप्लवम् ।। ८ ।।
वेत्राधिकारिणो ये च स्थलेऽत्र तान्नियोजयेत् ।
लगुडादीन् प्रगृह्णन्तो ये जनास्तद्विशन्ति हि ।। ९ ।।
गर्वस्य हेतोर्नरकं प्राप्नुवन्ति न संशयः।
अस्मिन् स्थले च रुधिरं मलमूत्रं यदा पतेत् ।। १० ।।
तस्मिंस्तु वमनं वापि येषां च नखरः पतेत् ।
सृणिकादिः पतेद्यस्य गच्छतः सावधानतः।। ११ ।।
एते दोषाःभवेयुश्चेदेष्वेकोऽपि भवेद्यदि ।
महास्नानं च देवानां कृत्वा शान्तिमवाप्नुयात् ।। १२ ।।
धूपकाले च हे राजन्नवधानपरो भव ।
अधिकारं विना राजन्न विशन्ति तथा कुरु ।। १३ ।।
वृद्धातुराणां बालानां मत्तानां च नृपोत्तम ।
हीनवर्णसङ्कराणामन्त्यजानां यथाङ्घ्रयः।। १४ ।।
तत्र स्थले न पतन्ति तस्मिंस्त्वं संयतो भव ।
अंशुकावरणं कंश्चिल्लङ्घयेच्चेत्प्रमादतः।। १५ ।।
धूपकाले तदा शीघ्रं चरुं च दीर्घखातके ।
प्रक्षिप्य नृपशार्दूल पुनर्भोगं समाचर ।। १६ ।।
पूजाधिकारिणो ये च सर्वे तत्र विशन्तु हि ।
अथैतद्दोषतः कश्चिद्धूपकाले यदा भवेत् ।। १७ ।।
सर्वान् चरून् दीर्घखाते पातयित्वा चरुं कुरु ।
अवधानपरो राजन् भव त्वं जगदीशितुः।। १८ ।।

भोजनस्थानमेतत्तु तस्मिंस्त्वं सत्वरो भव ।
यदि दोषो भवेत्तत्र दण्डदोऽप्यधिकारिषु ।। १९ ।।
एवं त्रिकालपूजासु सावधानमना भव ।
मन्दिरे यानि कर्माणि तानि सर्वाणि पश्य च ।। २० ।।
आचार्य्योऽपि यथा पूजाकार्य्यं कुर्य्यात्तु तच्छृणु ।। २१ ।।

ब्रह्मोवाच

शृणुष्व राजन्नथ बालपूजा-
विधेः समाप्तौ प्रथमां च पूजाम् ।
पुरा मया यत्कथिता यदेतत्
सर्वं समानीय प्रभोः समीपम् ।। २२ ।।
नानाविधं व्यञ्जनपूपयुक्तं
चारोहितान्नं कृशरासमेतं ।
चिञ्चारसैर्युक्तमपीह वीर
त्वं शृङ्गवेरं कुरु संयतश्च ।। २३ ।।
पङ्क्तींश्च तत्रैव तु सप्त कृत्वा
तद्भोगमेवं कुरु चाद्रितुल्यं ।
यतोऽपि देवस्य च भोजनस्य
स्थानं हि विद्धि क्षितिपालपूज्य ।। २४ ।।
भोगं कुर्य्याद्गिरिवरसमं व्यञ्जनपूपयुक्तं
यस्मान्नित्यं त्रिभुवनगुरोर्भोजनस्थानमेतत् ।
एवं कुर्य्याः प्रतिदिनमथो राजवर्य्य त्वमेव
यैर्यैः कार्य्यं न भवति यदा दण्डदस्त्वं च तेषु ।। २५ ।।
आचार्य्यवर्य्यस्तु करोतु पूजां
गोपालमन्त्रेण जगत्पतेश्च ।
श्रीवासुदेवस्य च मन्त्रकेण
करोतु सोऽर्च्चामपि सीरपाणेः ।। २६ ।।

ततश्च मन्त्री भुवनेश्वरी सन्
मन्त्रेण पूजां स तु भद्रदेव्याः।
सुदर्शनीयेन च मन्त्रकेण
सुदर्शनस्यापि करोतु पूजाम् ।। २७ ।।
धरा रमायास्त्वपि माधवस्य
गतार्थ एवं जगदीशितुश्च ।
आचार्य्यवर्य्यैरपिशोधनीयं
किंचित्तु तिष्ठेद्यदि पूर्वतश्च ।। २८ ।।
पूजां न कुर्य्याद्यदि चौतुभिश्च
उच्छिष्टमेवं यदि पादलग्नम् ।
यदा भवेन्मण्डलवाह्यमेव
तस्योपरिवल्लभभाषणं च ।। २९ ।।
अन्ये च वर्णार्यदि वा विशन्ति
लालादिकं वा रुधिरं वमिश्च ।
भाषा यदा स्याद्यवनादिकानां
तदा न कुर्य्यादपिं भोगमेव ।। ३० ।।
भाण्डस्य भङ्गो यदि तत्र देव
पुरः स्थले तच्च बहिः क्षिपेच्च ।
एतच्च ज्ञात्वा स तु पूजकश्च
कुर्य्यात्तु पूजां जगदीशितुश्च ।। ३१ ।।
एवं त्रिकालं कुरु भूपवर्य्य
मध्याह्नकालेऽपि च दिव्यमन्नम् ।
दध्योदनं सायमपि प्रदेयं
द्वात्रिंशदर्च्चां कुरु हे नरेन्द्र!।। ३२ ।।

तदन्तिके षोडशकं च कुर्य्याद्
बाह्ये तथा षोडशकं तु मन्त्री ।
प्रासादमध्येऽपि कृताकृतं च
स्यात्पूजकस्योपरि न्यस्तमेव ।। ३३ ।।
परीक्षकेणापि समानबुद्ध्या
तत्पाकशाला परिशोधनीया ।
प्रासादकृत्येषु स पूजनीयः
कार्य्यानुसारं स च दण्डनीयः।। ३४ ।।

इति श्रीवामदेवसंहितायां धूपकालनिर्णयो नामाष्टमोऽध्यायः।।

नवमोऽध्यायः

श्रीवामदेव उवाच

अथातः सम्प्रवक्ष्यामि पाकशालाविधिं मुदा ।
शृणु देवि !सावधाना पाकशालां हरेरपि ।। १ ।।
प्रासादवह्निकोणे तु प्राकारं कारयेद्दृढम् ।
चतुरस्रां ततः शालां बृहद्वातायनान्विताम् ।। २ ।।
महोन्नतां च सुसमां प्रतिवर्षपिधानकाम् ।
दृढां शिल्पिभिरचितां धूमनिर्गममार्गकाम् ।। ३ ।।
काकबन्धेन रचितां दत्तसंज्ञां [१] महायताम् ।
यद्यल्लिखति पाकेऽपि तत्कुरुष्वात्र हे नृप ।। ४ ।।

---

(१) द्विजसंज्ञा

एवं कुर्य्यात्पाकशालामुत्तरस्थितकूपकाम् ।
द्वारं कुर्य्यादुत्तरेऽपि तस्मिन् गणपतेस्तथा ।। ५ ।।
पूजादिकं तु चाचार्य्यस्तदनु होमकर्म च ।
नमामि गणनाथ त्वां पाकविघ्नोपशान्तये ।। ६ ।।
अस्मिन् पाके न विघ्नो वै यतस्त्वं विघ्ननाशकृत् ।
कमले सिन्धुजे देवि नीलाचलनिवासिनः।। ७ ।।
जगन्नाथस्य पाकार्थं शीघ्रमागच्छ रन्धने ।
समाप्य दिक्षु सर्वासु दिक्पालानपि पूजयेत् ।। ८ ।।
हरिणोच्चतया चुल्लीं कुर्य्यान्नृपतिसत्तम ।
चरुहोता पाककर्म कुर्य्याच्छुद्धेन चेतसा ।। ९ ।।
प्रादेशमात्रां समिधमार्द्रां क्षीरयुतां शुभाम् ।
कीटादिरहितां ग्रन्थिकण्टकादिविवर्जिताम् ।। १० ।।
त्रिकालार्च्चां चतुर्थार्च्चां विदध्यात्पूजकोत्तमः।
सावधानश्च त्वं तिष्ठ तस्मिन् सद्मनि हे नृप !।। ११ ।।
स्थलत्रये पाककर्म कुर्य्यान्नृपतिसत्तम ।
महादेव्यां सप्तदिनमस्मिन् स्थाने प्रतिक्षणम् ।। १२ ।।
दैवयोगात् पाकगृहे विघ्नो भवति वै यदा ।
वटस्य पूर्वभागे तु यद्गृहं तत्र कारयेत् ।। १३ ।।
कालान्तरेऽप्यत्र राजन् न पाको दैवयोगतः।
भविष्यति यदा नूनं तदा त्वत्कीर्त्तिरेव सा ।। १४ ।।
देवक्रोधवशान्नाशमुपैति पाकमन्दिरम् ।
अन्येनापि कृतं तच्चेत्तव कीर्त्तिर्न संशयः।। १५ ।।
त्वत्कीर्त्या च गता सा तु प्रतिष्ठा कस्यचिन्न हि ।
अस्मिन् स्थले च यो दोषो वैष्णवाग्नौ स नश्यति ।। १६ ।।

रन्धनस्थानमेतद्धि राजंस्त्वं सावधानकः।
ममापराद्धे तस्यैतद् यतो नित्यस्थलं परम् ।। १७ ।।
सुधारसं गोमयं वा पञ्चगव्यं विनिक्षिपेत् ।
अस्य निर्माणकं शीघ्रं करिष्यति भवांस्तदा ।। १८ ।।
अतः शृणुष्व भो पूज्य शालायां दैवयोगतः।
विपत्तिः पतितास्तस्यां पाककर्म न कारयेत् ।। १९ ।।
प्रतिवर्षं पिधानं स्यादकृतं बहुदोषकृत् ।
अतः पिधानकाभावे न कुर्य्याद्रन्धनं हरेः।। २० ।।
प्रदेशे भज्यमानेऽपि न कुर्य्यात्पाककर्म च ।
शूद्रादयोऽपि ये नीचा वर्णसङ्करकारकाः।। २१ ।।
न विशेयुस्तु ते सर्वे लङ्घयेयुर्न देहलीम् ।
वैगुण्यमपि जातं चेत्तदा पाकं न कारयेत् ।। २२ ।।
गतरन्धनतः किञ्चिद्विद्यते चेन्न रन्धनम् ।
आदौ परीक्षको वीक्ष्य ततः पाकं च कारयेत् ।। २३ ।।
प्रथमावरणे राजन् अस्थ्नां तु पतनं यदा ।
कुणपोऽपि पतत्यस्मिन् यवनस्य च सङ्गतिः।। २४ ।।
तदा पाकस्य यद्द्रव्यं दीर्घखातेऽपि पातयेत् ।
भग्नप्रदेशोऽपि यदा पाककर्म न तत्र हि ।। २५ ।।
सारमेयादिको जन्तुर्निविशेच्चेत्तथाऽऽचरेत् ।
न कर्त्तव्यं न कर्त्तव्यं न कर्त्तव्यं कदाचन ।। २६ ।।
अज्ञानाद्येऽपि कुर्वन्ति पतन्ति नरके चिरम् ।
पाकशालाहोमविधिं श्रुत्वा विधिमुखाद्यदा ।। २७ ।।
मनस्यैवं विचार्य्याथ ब्रह्माणं चावभाषत ।। २८ ।।

इन्द्रद्युम्न उवाच

देव देव जगन्नाथ सर्वं त्वत्तः श्रुतं मया ।
भविष्ये दैवयोगाच्च व्युत्पातश्च भवेद्यदा ।। २९ ।।
कलौ जनाः दुष्कृतिनो मूर्खाः पण्डितमानिनः।
तत्काले किं च कर्म स्यात्कथयस्व कृपान्वितः।। ३० ।।
इन्द्रद्युम्नवचः श्रुत्वा ब्रह्मा प्रोवाच हे प्रिय !।। ३१ ।।

ब्रह्मोवाच

इन्द्रद्युम्न नृपश्रेष्ठ यतस्त्वं वैष्णवोत्तमः।
त्वामत एष वै प्रश्नः प्रष्टव्यः केन धीमता ।। ३२ ।।
शृणु भूप ! पाकशालास्थाने च दैवयोगतः।
उत्पातस्तु यदा जातो दाहो वासपिधानके ।। ३३ ।।
अत्र कार्य्ये महोत्पाते मरुद्योगेऽपि भङ्गके ।
तदा शीघ्रं च निर्माणं कर्त्तव्यं च दृढं नृप ।। ३४ ।।
तद्दिने यदि पाकेन शीतलेन च भोगकम् ।
कुर्य्यान्नृपवर त्वं हि चैतद्भोगस्थलं यतः।। ३५ ।।
जगदीशस्य यत्पाकमन्दिरं तत्क्षणं कुरु ।
यथाशीघ्रगति प्राज्ञः प्रतिष्ठां नैव कारयेत् ।। ३६ ।।
किं कर्तव्यं शृणु नृप !आचार्य्यो मन्त्रपारगः।
शीघ्रं यथास्यात्तत्कार्य्यं बहिष्कुर्य्याच्च शिल्पिनः ।। ३७ ।।[१]
सुधारसं गोमयं च पञ्चगव्यं ततः क्षिपेत् ।
आचार्य्यस्तत्र कुर्वीत मन्त्रराजेन होमकम् ।। ३८ ।।
कुण्डे वा स्थण्डिले वाऽपि शीघ्रीकुण्डं न कारयेत् ।
स्थण्डिले मन्त्रराजेन होमं कुर्य्यात्सहस्रकम् ।। ३९ ।।

---

(१) कार्य्यसमाप्तौ शूद्रादीन् वहिष्कुर्य्याद् यथाविधि ।।

अग्निकार्य्यादिकं तत्र ऋषिभिर्यच्च कारितम् ।
आदौ कुर्य्याद्वैष्णवाग्नौ तदा वैष्णवसत्तम ।। ४० ।।
बहुहोमो न कर्त्तव्यःयतोऽपि समयो न हि ।
मन्त्रराजेन सलिलं प्रक्षिपेत्तत्र सद्मनि ।। ४१ ।।
आचार्य्याय दक्षिणां च दत्त्वा शान्तिकमाचरेत् ।
मन्त्रराजजपं कुर्य्यात्सावधाने त्वयि स्थिते ।। ४२ ।।
ब्राह्मणान् भोजयेद्भक्त्या कृत्वाऽच्छिद्रावधारणम् ।
एवं कुर्य्यान्नृपश्रेष्ठ चोत्पातो यदि जायते ।। ४३ ।।
श्रुत्वा देवी पाकशालाविधिं पप्रच्छ सादरम् ।
उत्तरे कूपनिर्माणं स्वामिनं नीललोहितम् ।। ४४ ।।
विपत्तिस्तत्र चेद्देव किं विधेयं ब्रवीहि माम् ।
पार्वतीवचनं श्रुत्वा प्रोवाच भूतभावनः।। ४५ ।।
एतत्कथां पुरा राजा पप्रच्छ विधिमुत्सुकः।
तत्कथां कथयिष्यामि तवाग्रे शृणु पार्वति ।। ४६ ।।

श्रीवामदेव उवाच

यदा जगन्नाथगृहस्य कूपे
विघ्ना भविष्यन्ति च दैवयोगात् ।
मद्भिस्तु कुर्य्यात्परिपूर्णमेनं
तस्मिन् वपेदेव च सर्षपादीन् ।। ४७ ।।
गावः समश्नन्तु च तान् प्ररोहान्
ततोऽपि वत्साञ्च बहिः प्रकुर्य्यात् ।
जलं क्षिपेदेव सहस्रकुम्भ-
मितञ्च निः शेषमृदं बहिश्च ।। ४८ ।।
ततस्तु जीर्णोद्धरणं च कार्य्यं
तस्य प्रतिष्ठाञ्च ततः प्रकुर्य्यात् ।
आचार्य्यवर्य्यास्तु ततः समन्तात्-
कूपप्रतिष्ठादिकमाचरेयुः।। ४९ ।।

तदा प्रतिष्ठा परिपूर्णतैषा
पश्चात्तु आचार्य्यवरैः कृता च ।
आनुष्टुभेनापि सहस्रकं वा
.पेत् क्षिपेच्चापि हि पञ्चगव्यम् ।। ५० ।।
नृसिंहमन्त्रेण ततस्तु पश्चात्
क्षिपेच्च पञ्चामृतकं हि देवि ।
एतत्क्षिपेद्वाऽपि च यत्नपूर्वं
मन्त्रेण पातालनृसिंहकस्य ।। ५१ ।।
त्वत्कीर्त्तिमध्येऽपि हि ये तु कीर्त्ति
कुर्वन्ति राजन् कथयामि सर्वम् ।
तस्याः प्रतिष्ठादिककर्म नास्ति
कुर्वन्ति ये वै नरके पतन्ति ।। ५२ ।।
अतश्च हेतोरिह पञ्चगव्यं
पञ्चामृतं चापि च विक्षिपेत्तु ।
नृसिंहमन्त्रेण जलं च सिञ्चे-
त्ततश्च शुद्धिर्भवतीति देव ।। ५३ ।।
ततोऽप्यच्छिद्रावधितं च कुर्य्या-
दनन्तरं ब्राह्मणभोजनं च ।
भविष्यगाथामभिधाय ब्रह्मा
ततोऽवददीश्वरभाण्डलक्ष्म ।। ५४ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तमक्षेत्रमाहात्म्ये पाकशालाविधिर्नाम नवमोऽध्यायः ।।

दशमोऽध्यायः

सुपाकशालां विदधीत विष्णो-
स्तामुन्नतां पञ्जरिकावृतां च ।
आदित्यरश्म्यप्रसरां तु चुल्यां
समांशभक्तां च रदाङ्कया च ।। १ ।।
तत्रापि निर्माणमथो जलस्य
कुवेरदेशेऽपि च कार्यमेव ।
द्वारस्य निर्माणमथो विधेयं
स्नानादिकं चापि समाप्य मन्त्री ।। २ ।।
स्नानं च देवस्य ततस्तु कुर्य्यात्
किं चैवमत्राप्यरुणोदयेऽपि ।
होमाय गच्छेद्विधिवद्विधिज्ञो
द्वारान्तिकं चापि दिशोऽप्युदीच्याः।। ३ ।।
गजाननस्यापि च पूजनं हि
तत्प्रार्थनां पूजक एव कुर्य्यात् ।
हेरम्व विघ्नेश हरेस्तु पाक-
सिद्धावविघ्नं कुरु विघ्नराज ।। ४ ।।
अथापि चुल्लीं च यथैव कुर्य्या-
त्तथा शृणु त्वं कथयामि राजन् ।
तामेव चुल्लीं सुदृढां च भव्या-
मुच्चां तु कुर्य्याद्धरिणप्रमाणम् ।। ५ ।।
तथा विदध्यान्मुखमेव सप्त-
जिह्वं ततः स्यादिह चाग्निपूजा ।
पूजामिमां वीक्ष्य परीक्षकेण
सार्द्धं समिद्धोममतः प्रकुर्य्यात् ।। ६ ।।

श्रीवैष्णवाग्नौ हुतमेव कुर्य्या-
त्ततस्तु संप्रार्थ्य रमां च देवीम् ।
हे देवि ! देवेशचरोर्विभागं
यत्नेन सुस्वादुतरं सुसिद्धम् ।। ७ ।।
कुरु द्रुतं देवि त्रिकालपूजां
भवेद्यथा योग्यतमा तथैव ।
तद्धूपकालेऽपि च पात्रवर्णं
रक्तं च कुर्य्यान्न तु कृष्णवर्णम् ।। ८ ।।
बृहत्सु भाण्डेषु न पाककर्म
भाण्डं च कीदृक् शृणु भूपपूज्य ।
हस्तप्रमाणं बलिकण्ठदेशं
कुर्य्याच्च तत्रैव यथैव योग्यम् ।। ९ ।।
सार्द्धप्रदेशं ह्युपरि प्रकुर्य्यात्
क्षुद्रेऽत्र भाण्डेऽपि च रन्धनं स्यात् ।
प्रादेशयुग्मप्रमिते प्रमाणेऽ-
प्यत्रैव पाके कृशरं प्रकुर्य्यात् ।। १० ।।
वह्निप्रदेशप्रमितं तथाऽत्र
पाकं विदध्यादिह खेचरान्नम् ।
पात्रे च कार्या खलु चक्रमुद्राऽऽ-
नयेत् सदैतत्खलु कुम्भकारः ।। ११ ।।
शरावकार्य्यं शृणु हे नरेन्द्र !
स्यादुत्तमं मध्यममेव नूनम् ।
एतानि पात्राण्यपि रक्तवर्णा-
न्यथो न कुर्य्यादसितानि तानि ।। १२ ।।

अन्येषु पात्रेषु च येऽपि कुर्य्युः
पतन्ति घोरे नरके चिरं ते ।
एकप्रदेशो यदि भग्न एव
तस्मिन् गृहे पाकविधिं न कुर्य्यात् ।। १३ ।।
तिष्ठेद्यदा पूर्वदिनस्य पाकात्
किंचित्तदा पाकविधिर्न कार्य्यः ।
एवं प्रमाणां नृहरेस्तु पाक-
शालां सुयत्नां सुसमां पिधानाम् ।। १४ ।।
प्रत्यब्दमेवं च पिधानका स्यात्,
न स्याद्यदा भूसुरराज्यनाशः ।
यथा पिधानं प्रतिहायनं च
तथा विधानेऽपि च संयतः स्यात् ।। १५ ।।
शूद्रादयो नापि विशन्ति तत्रा-
प्यतो भवेदत्र सुसंयतश्च ।
ततस्तु सूर्य्यस्य च पूजनं च
द्वाराधीपानामथ पूजनं हि ।। १६ ।।
कृत्वैवमाचार्य्यवरो विधिज्ञः
पश्चाच्च कुर्य्यात्स तु धूपपूजाम् ।
भोगं च कुर्य्याद् गिरिराजवच्च
नानाविधं व्यञ्जनपूपयुक्तम् ।। १७ ।।
शृणुष्व राजन् ! जगदीशितुश्चा-
प्यत्र स्थले भोजनमेव तस्य ।
मध्याह्नपूजां तु ततश्च कुर्य्यात्
सायं च पूजादिकमेव तद्वत् ।। १८ ।।

एतत्स्थले पाकमपीह कुर्य्या-
दत्र स्थले तं प्रतिवासरं च ।
यदा विपत्तिश्च भवेन्नृपेन्द्र !
वटस्य पूर्वेऽपि गृहे तु पाकम् ।। १९ ।।
कुर्य्यान्महावेदितलेऽपि सप्त
दिनानि कुर्य्यान्न तु चान्यदेशे ।
विज्ञाय कुर्य्याद्विधिमेव राजन् !
शेषेऽपि गच्छेन्नृहरेः पदं च ।। २० ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तमक्षेत्रमाहात्म्ये भाण्डनिर्णयो नाम दशमोऽध्यायः ।।

एकादशोऽध्यायः

श्रीपार्वत्युवाच

महादेवं पुनर्देवी पप्रच्छ जगदीशितुः ।
यथा भवेत्पूजकादिस्तत्तत्कथय सुव्रत !।। १ ।।
पूजाधिकारिणो ये च तांश्च ब्रह्मा यथाऽकरोत् ।
पार्वतीवचनं श्रुत्वा जगाद भूतभावनः।। २ ।।

श्रीवामदेव उवाच

शृणु देवि !यथा ब्रह्मा पूजकादीन् यथा पुरा ।
कृतवानपि तत्रैव कथयामि तवाग्रतः।। ३ ।।
ब्रह्मांशात् पूजको जातस्तथा ब्रह्माऽप्यजायत ।
चरुहोता पात्रहोता उभावपि तथैव च ।। ४ ।।

शृणु देवि !प्रवक्ष्यामि चैतेषां लक्षणं यथा ।
पूजको धर्मशीलश्च स्नानत्रयपरो भवेत् ।। ५ ।।
परित्यक्तपरान्नश्च प्रतिग्रहविवर्जितः।
नक्तभोजी कुण्डली च मुद्रिकाधारकस्तथा ।। ६ ।।
ऋतुगामी च विद्यावान् वेदवेदाङ्गपारगः।
सत्यवादी जितक्रोधो नीतिज्ञोऽप्यागमी तथा ।। ७ ।।
सर्वतन्त्रागमो नित्यं पूजायां तत्परो भवेत् ।
ऊर्द्ध्वपुण्ड्रं वहेच्छ्रीमान् चन्दनं वा यथारुचिः।। ८ ।।
यवद्वयप्रमाणं हि श्लक्ष्णं तु यष्टिवत्कृतम् ।
वेणुपत्राकृतिर्बाह्वोर्हृदये पद्मवद्भवेत् ।। ९ ।।
शङ्खचक्रादिचिह्नः स्यात् काष्ठेन निर्मिता तथा ।
शीतलाऽपि च या मुद्रा सर्वकार्य्येषु शोभना ।। १० ।।
गृह्णीयात्सकलान्मन्त्रान्नानातन्त्रागतांश्च तान् ।
एतन्मन्त्रगणे देवि गोपालो भुवनेश्वरी ।। ११ ।।
नारायणश्च नीलाद्रिनाथश्चापि सुदर्शनः।
बलदेवो महालक्ष्मीस्तद्वदेव सरस्वती ।। १२ ।।
महिषमर्द्दिनी चापि श्रीनृसिंहो रविस्तथा ।
गणेशो गरुडश्चैव हनुमांश्च शिवोऽपि च ।। १३ ।।
नवदुर्गा जयदुर्गाऽप्यन्तर्भूता महेश्वरि ।
एतेषामपि चान्येषां मन्त्रेषु कुशली भवेत् ।। १४ ।।
त्रयोऽपि पूजकाः श्रेष्ठाः देवतानां च तिसृणाम् ।
सीरपाणेः पूजकस्तु कुर्य्याच्च भस्मधारणम् ।। १५ ।।
भद्रायाः पूजकश्चापि तथैव च समाचरेत् ।
जगन्नाथपूजको यः स कुर्य्यादूर्द्ध्वपुण्ड्रकम् ।। १६ ।।

यथा लिखति शात्रेऽपि तथैव चक्रधारणम् ।
देवानां पूजने काले बृहत्तिलकमाचरेत् ।। १७ ।।
मुद्रा च शीतला धार्य्या तप्तमुद्रां न धारयेत् ।
तप्तधारणमात्रेण जगन्नाथस्य पूजने ।। १८ ।।
अन्येषु चापि कार्य्येषु स गर्हित इतीरितः ।
यः कुर्य्यात् श्वपचाद्धीनो यतः संकल्पवान्नहि ।। १९ ।।
दग्घदेहो न कर्त्तव्यो न कर्त्तव्यो नगात्मजे ।
मन्दिरे सेवकाःयेऽपि ते च स्मार्त्तमते स्थिताः ।। २० ।।
यथा राजा स्मार्त्तमते वर्त्तते ज्ञायतां हि तत् ।
यदि मोहात्कृतं देवि न योग्यो देवपूजने ।। २१ ।।
भवेच्च यदि सर्वेषां संमतिस्तदनन्तरम् ।
केशादिमुण्डनं कुर्य्यात्तीर्थस्नानं ततः परम् ।। २२ ।।
शतरुद्रं जपेद्यत्नात्तथा चायुतसंख्यया ।
लक्षमात्रं तु गायत्रीं कलावपि चतुर्गुणम् ।। २३ ।।
ततो नारायणं मन्त्रं जप्त्वा वै कोटिसंख्यकम् ।
व्रतं कुर्य्यान्मासमात्रं चरेद्विप्रः प्रयोजनम् ।। २४ ।।
पञ्चगव्यं ततः पीत्वा ततश्चान्द्रायणं चरेत् ।
प्रायश्चित्तं तु कुर्वीत चैतत् पातित्यशोधकम् ।। २५ ।।
एवं कृत्वा ब्राह्मणोऽपि ततश्च शुद्धिभाग्भवेत् ।
शङ्खचक्राङ्कितो विप्रो विष्णुरेव न संशयः ।। २६ ।।
एवं ब्रह्मा भवेद्देवि पूजकस्यानुवर्त्तकः ।
पुनः शृणु महादेवि चरुहोतृविधिं च तम् ।। २७ ।।
शुक्लाम्बरधराः सर्वे उद्ध्र्वपुण्ड्रधराः शुभे ।
प्रातः सन्ध्यादि कर्माणि तानि कुर्वन्ति ते सदा ।। २८ ।।

होमानन्तरतः सर्वे पाकं कुर्वन्तु ते नृप ।
एतेषामुत्सवदिनं मञ्चस्नानदिनं विभोः।। २९ ।।
सीमन्तिनीनां कर्माणि यतः कुर्वन्ति ते प्रिये ।
यथा सीमन्तिनी मेध्या तथैवामी भवन्ति हि ।। ३० ।।
तवाज्ञया सेवकाश्च विशन्त्वेतन्नृनाद्दिप ।
यथेष्टं पाककर्त्तॄणां तेषां त्वं भवदण्डदः।। ३१ ।।
विवाहे चोपनयने सप्ताहं च परित्यजेत् ।
यथा माङ्गलिको विष्णुस्तथैवायं जनो नृप ।। ३२ ।।
यतः कङ्कणधारी स्यान्न क्षमः पाककर्मणि ।
प्रातः कर्म देवतानां स्नानादिश्च यथा भवेत् ।। ३३ ।।
ब्राह्मे मुहूर्त्ते चोत्थाय स्नानकर्मादिकं चरेत् ।
प्रासादं प्रति गत्वा स कवाटात्फेटनं चरेत् ।। ३४ ।।
उत्तिष्ठन्तु च हे देवा जनानां मोक्षहेतवे ।
भृङ्गा इव जनाः सर्वे पश्यन्त्वब्जमुखानि वः।। ३५ ।।
इति विज्ञाप्य मतिमांश्चाचरेत् करताडनम् ।
पर्य्यङ्कादीन् बहिष्कृत्य ततः सिंहासनं चलेत् ।। ३६ ।।
कर्पूरावर्त्तिकां राजा कुर्य्यात्पूजकसत्तमैः।
आरात्रिकं तथा कुर्य्यात्ततः पूजकसत्तमाः।। ३७ ।।
माल्यं वस्त्रं बहिष्कृत्य स्थापयेयुर्यथास्थलम् ।
परिधाप्य सूक्ष्मवस्त्रं तथैवाप्युत्तरीयकम् ।। ३८ ।।
ततः पूजासने पूते भूतशुद्ध्यादिकं चरेत् ।
वीक्षणं प्रोक्षणादींश्च कृत्वा मन्त्रेण मन्त्रवित् ।। ३९ ।।
द्वादशाक्षरमन्त्रेण सीरपाणेश्च वीक्षणम् ।
दशाक्षरेण गोपालमन्त्रेण जगदीशितुः।। ४० ।।

मन्त्रेण भुवनेश्वर्य्याःभद्रायाःवीक्षणादिकम् ।
सौदर्शनेन मन्त्रेण चक्रस्य परिकीर्त्तितम् ।। ४१ ।।
जगन्नाथस्य मुकुरे चतुर्णां तु गतार्थता ।
ततोऽप्यामलकं चूर्णं गन्धद्वारेति चार्पयेत् ।। ४२ ।।
प्रोक्तैर्मन्त्रैर्वीक्षमाणं ततः पञ्चामृतं क्षिपेत् ।
समुद्रज्येष्ठामन्त्रेण ततो गन्धादिकं क्षिपेत् ।। ४३ ।।
मानवानां यथा धर्मास्तान् विदध्युश्च पूजकाः।
वस्त्रमाल्यादिकैर्देवान् भूषयेयुः द्विजोत्तमाः।। ४४ ।।
शृणु देवि ! पूजकानां स्मार्त्तधर्मेषु निष्ठिताः।
अर्भकेभ्यो यथा दत्तं तथैव भोगमाचरेत् ।। ४५ ।।
एतद्भोगसमाप्तिश्चेत् ततो धूपं समाचरेत् ।
यदि मोहात्कृतं नोचेद्धूपे तच्च प्रकल्पयेत् ।। ४६ ।।
यदि धूपे नहि कृतं कुर्य्यात्पश्चात्समर्पणम् ।
धूपानन्तरतः किञ्चिन्नृपते नावशेषयेत् ।। ४७ ।।
आचार्य्यः स्नानमाकुर्य्यात्ततो मध्याह्नपूजनम् ।
यदि किञ्चित्पूर्वतश्च तिष्ठेद्भोगं न कारयेत् ।। ४८ ।।
सायंकालेऽप्येष विधिरन्येषां लक्षणं यथा ।
अन्ये ये सेवका देवि तेषामेव विधिं शृणु ।। ४९ ।
ब्रह्मेन्द्रद्युम्नं प्रोवाच लक्ष्म प्रतिनिधेस्तदा ।
शान्तो दान्तो गुणोपेतो याज्ञिकः सर्वधर्मवान् ।। ५० ।।
नीतिज्ञो ब्राह्मणश्रेष्ठः सर्वकर्मसु पूजितः।
ऊद्ध्र्वपुण्ड्रधरः श्रीमान् स्वर्णवेत्रधरः शुचिः। ५१ ।।
वेदवेदाङ्गविद् विद्वान् सर्वधर्मेषु निष्ठितः।। ५२ ।।

श्रीवामदेव उवाच

शृणु देवि ! चाग्निशर्मा यथा भवति कथ्यते ।
शिरः पिधानं वस्त्रेण देहो वस्त्रावृतो भवेत् ।। ५३ ।।
मुनिवर्षात् सूर्य्यवर्षपर्य्यन्तमस्य कर्मकम् ।
देशत्यागमतश्चोद्ध्र्वं तस्य कारय भूपते ।। ५४ ।।
यस्तं पश्येन्नारकी सः स्पर्शे शववदाचरेत् ।
इन्द्रद्युम्नोऽपि ब्रह्माणं पुनः पप्रच्छ सादरम् ।। ५५ ।।
सेवकानां तु ये धर्मास्त्वन्मुखात्ते श्रुताः प्रभो !।
महानवसरे देवस्येशस्य सेवकः कथम् ।। ५६ ।।
तत्तत्कथय देवेश करिष्ये भवदाज्ञया ।
स राज्ञो वचनं श्रुत्वा ब्रह्मा प्रोवाच सादरम् ।। ५७ ।।

ब्रह्मोवाच

शृणु राजन् !मया ख्यातमीश्वरस्य ह्यदर्शने ।
अनवसर इत्येवं कथितं मुनिभिः पुरा ।। ५८ ।।
विश्वावसुश्च शबरो जगन्नाथस्य सेवकः।
शङ्खचक्राङ्कितः सोऽपि लीनोऽभवदिहेश्वरे ।। ५९ ।।
विश्वावसुकुलोद्भूतास्तथा विद्यापतेः सुताः।
उभावपि च कुर्य्यातां घटानां पूजनं क्रमात् ।। ६० ।।
तत्रापि सेवका राजन् विश्वावसुकुलोद्भवाः।
ऊद्ध्र्वपुण्ड्रधराः सर्वे श्वेतांशुकयुता हि ते ।। ६१ ।।
शीतलापि या च मुद्रा तां धारयन्तु ते नृप ।
ब्राह्मणास्तु यथाचारास्तथाऽऽचारा भवन्तु ते ।। ६२ ।।
शूद्रत्वात्कण्ठलग्नं च तन्न कृत्वा नृपोत्तम ।
त्यक्त्वाऽनवसरं पक्षमन्यदा चैव मुण्डनम् ।। ६३ ।।

कुर्वन्ति तेऽपि हे राजंस्तद्गोत्रे यः शिशुर्भवेत् ।
एकादशदिनादूर्ध्वं तं नीत्वा चरणान्तिके ।। ६४ ।।
समर्प्य तं गृहं नीत्वाऽपीशस्य घटनादिकम् ।
कुर्वन्ति ते च नृपते विद्यापतिकुलोद्भवाः।। ६५ ।।
धूपकालो यदि भवेत् प्रतिहारी ततो वदेत् ।
अस्मात्सर्वे बहिर्यान्तु नैवेद्यसमयो यतः।। ६६ ।।
अररं च दृढं कृत्वा ततो नैवेद्यमानयेत् ।
पूजकोऽपि ततो भोगं कुर्य्यात्तु पूर्ववत्प्रिये ।। ६७ ।।
धूपानन्तरतस्तेऽपि कुर्य्युः कर्माणि सर्वशः।
एवं त्रिकालपूजायां कुरु त्वं नृपसत्तम ।। ६८ ।।
तेऽपि पूजादिकं कृत्वाऽप्येतत्कर्मसु संयताः।
स्नानं रथोत्सवं चापि कुर्य्युः श्रावणमासके ।। ६९ ।।
श्रावण्यां पौर्णमास्यां तु बलभद्रस्य पूजनम् ।
भाद्रवे कृष्णपञ्चम्यां लेखाष्टम्य सिते तथा ।। ७० ।।
कुमारपूर्णिमायां तु तेषां कर्म च तद्विना ।
न कुर्य्यान्नृपतिश्रेष्ठ चैते स्मार्त्तमते स्थिताः।। ७१ ।।
एते वैष्णवधर्मेषु प्रवृत्ताश्चेन्नृपेश्वर ।
एषामुपरि यत्नेन दण्डदस्त्वं सदा भव ।। ७२ ।।
इन्द्रद्युम्नं प्रति ब्रह्मा यदवोचत्तदीरितम् ।
पात्रस्य लक्षणं वक्ष्ये यथा भवति पार्वति ।। ७३ ।।
तच्छृणुष्व मया ख्यातं नीलगोत्राधिपस्य हि ।। ७४ ।।

अध्यायमेतं पठतीह यश्च
नीलाद्रिनाथप्रथितस्ववृत्तम् ।
पुण्यं पवित्रं परमं मनोज्ञं
प्राप्नोति नित्यं हि सुखं मनुष्यः।। ७५ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तमक्षेत्रमाहात्म्ये सेवकलक्षणं नाम एकादशोऽध्यायः।।

द्वादशोऽध्यायः

पार्वत्युवाच

प्रभो कथय देवस्य कीदृक् पात्रस्य लक्षणम् ।
जलपात्रं कति पलं घण्टादिश्च यथा भवेत् ।। १ ।।
तत्तत् कथय देवस्य शृण्वतां पापनाशनम् ।
नगात्मजावचः श्रुत्वा कथितुं संयतो भव ।। २ ।।

श्रीवामदेव उवाच

शृणु देवि !यथा स्रष्टुः करे पात्रं च शोभते ।
विधिनात्र कराद्दत्तं गडुकं जलपात्रकम् ।। ३ ।।
कलापलैस्तु तत्कुर्य्याद् यथा यज्ञोपवीतकम् ।
यज्ञसूत्रं नवगुणं तथैव जलपात्रकम् ।। ४ ।।
पूजाकाले देशिकेन्द्रो यत्र यत्र विधिस्थितः।
घण्टादीनां यथा कार्य्यं तद्वदामि शृणु प्रिये !।। ५ ।।
रविसंख्यापलेनैव कुर्य्याद् घण्टां सुशोभनाम् ।
चतुर्वेदमयी घण्टा प्रतिवेदं पलत्रिकम् ।। ६ ।।

गरुडेनाङ्किकतां कुर्य्यादथवा चक्रचिह्निताम् ।
यस्य देवस्य पूजा स्यात्तत्च्चिह्नेन चिह्निताम् ।। ७ ।।
घण्टाशब्दं यदा कुर्य्यान्नश्यन्ति राक्षसादयः।
कृशरान्नस्य यत्पात्रं च्छतेन पलैः स्मृतम् ।। ८ ।।
सौवर्णं राजतं वापि त्वारकूटं च ताम्रकम् ।
मध्याह्ने वाऽपि चान्नस्य पात्रमेव हि कारणम् ।। ९ ।।
दिक्पलेन पुष्पपात्रं कुर्य्याद्देवि यथारुचि ।
अन्यामि यानि पात्राणि वेदसंख्यपलैः प्रिये ।। १० ।।
ब्रह्मणाऽपीन्द्रद्युम्नेन कथितं पात्रलक्षणम् ।
कृष्णवर्णानि पात्राणि नात्र कुर्य्यात् प्रिये शुभे ।। ११ ।।
शृणु राजन् !सेवका ये व्याधिभिः परिपीडिताः।
कुष्ठेन युक्ता ये केचित् पत्नीहीनाश्च ये नृप ।। १२ ।।
दग्धाङ्गताश्च ये केचिदङ्किहीनाश्च ये नृप ।
जगन्नाथपूजनेषु ते न स्युरधिकारिणः।। १३ ।।
यत्र स्थले आवयोश्चाप्यधिकारस्तयोस्तथा ।
अहं च खगरूपेण तस्यैव वाहनं प्रिये ।। १४ ।।
सोऽपि वृषभरूपेण ममेव वाहकस्तथा ।
अहं भैरवरूपेण त्वमेव भैरवी भव ।। १५ ।।
तत्राप्यावां स्थितौ देवि करिष्यावस्तु पूजनम् ।
सोऽप्यत्र चण्डरूपेण लक्ष्मीस्तु चण्डीरूपिणी ।। १६ ।।
मम पार्श्वे स्थितौ चोभौ मम पूजनकर्मणि ।
संयतौ दर्शनफलं ददेतां पश्यतां नृणाम् ।। १७ ।।
मम विष्णोर्भेदरूपं ये कुर्वन्ति नराधमाः।
पतन्ति नरके घोरे यावच्चन्द्रदिवाकरौ ।। १८ ।।

अहं सोऽपि सोऽप्यहं वै अत्र भेदं प्रकुर्वताम् ।
तेषामुद्धरणं नास्ति यावदिन्द्राश्चतुर्द्दश ।। १९ ।।
मुद्राङ्किता यदज्ञानात्तप्तचक्रादि चिह्निताः।
तान्न कुर्य्युर्नृपश्रेष्ठ स्मार्त्तकार्य्ये न तन्मतम् ।। २० ।।
संसारे निष्पृहा ये वै ते वै कुर्य्युर्मतं शुभम् ।
पूजाकालेऽपि यत्पुष्पं तत्तु कुर्य्यान्महीश्वर ।। २१ ।।
आर्द्रद्रव्यं च यद् ब्रह्मन् तत् कुर्य्यात् पाकमन्दिरे ।
प्रपानकं हि राजेन्द्र पाकवेश्मनि तत्कृतम् ।। २२ ।।
यतस्त्वं वैष्णवश्रेष्ठः सर्वं ज्ञात्वा द्रुतं कुरु ।
वामदेवोऽपि पार्वत्यै कथाश्च जगदीशितुः।। २३ ।।
कथयित्वा पुनर्वक्तुमारम्भं कृतवान् प्रभुः।। २४ ।।
नीलाद्रिनाथस्य कथाः शुभावहाः
शृण्वन्ति ये वै कृतनिश्चयात्मिकाः।
विधूय पापानि हरेः पदं गता
भवन्ति ते सन्ति न वै पुनर्भवाः।। २५ ।
श्रीमज्जगन्नाथपुराणमेतत्
पठन्ति ये वै सततं मनुष्याः।
श्रीशङ्करोऽप्याह नगात्मजायै
गच्छन्ति विष्णोः परमं पदं ते ।। २६ ।।

इति श्रीवामदेवसंहितायां पात्रलक्षणं नाम द्वादशोऽध्यायः।।

त्रयोदशोऽध्यायः

श्रीवामदेव उवाच

शृणु देवि ! चेश्वरस्य यथा भवति वासरे ।
मुखमण्डनकं कुर्य्याद्देवानां च नगात्मजे ।। १ ।।
शुक्लकृष्णपीतकैश्च करोतु बुधवासरे ।
यदि वा समयोनास्ति तत् कुर्याद् गुरूवासरे ।। २ ।।
एतस्मिन् समये देवि न गच्छन्ति हि केऽपि च ।
अज्ञानात् यदि गच्छन्ति प्रभूणां नसुखानि च ।। ३ ।।
१अस्मिन् काले प्रियतमे सर्वत्र क्षालनं मतम् ।
सिंहासनस्य सर्वत्र बृहत्प्रक्षालनं मतम् ।। ४ ।।
महास्नानं ततः कृत्वा कुर्य्यात्तु भूषणं ततः।। ५ ।।
बृहस्पतिवासरेऽपि धूपानन्तरतः प्रिये ।
महालक्ष्मीप्रतिनिधिमानीय तु क्वचित् स्थले ।। ६ ।।
स्नापयित्वा ततः पूजां कुर्य्यादुत्सवपूर्वकम् ।
पुनस्तत्र स्थलं नीत्वा पुनः सन्ध्याच्र्चनात्ततः।। ७ ।।
उभावपि समानीय शिविकायां निधापयेत् ।
महोत्सवेन तौ नीत्वा स्थापयेत्तु क्वचित्स्थले ।। ८ ।।
पूजनं नृत्यगीतादि कृत्वा तत्र निवेशयेत् ।। ९ ।।
नक्षत्रे चापि यत्कुर्य्यान्नृपाग्रे प्रोक्तवान् विधिः।
रोहिण्यामिन्द्रनक्षत्रे हरौ देवि यथा भवेत् ।। १० ।।
मध्याह्नपूजनान्ते तु देवनीराजनं स्मृतम् ।
प्रभोरग्रात्तु गोपालमानीय शिविकोपरि ।। ११ ।।
संस्थाप्य चोत्सवेनापि प्रासादभ्रमणं भवेत् ।
नित्यस्थले तं च रक्षेत्तिथीनां यद्विधिर्भवेत् ।। १२ ।।

तच्छ्रुणुष्व मया ख्यातं संक्षेपेण तवाग्रतः।
शुक्ले कृष्णे दिने हरि मध्याह्ने च समाप्तके ।। १३ ।।
प्रभोः प्रतिनिधिं देवमाज्ञामाल्येन भूषयेत् ।
प्रासादभ्रमणं कृत्वा ततो वन्दापनां चरेत् ।। १४ ।।
सायमर्च्चासमाप्तिश्चेत् प्रभोरग्रे तु स्थापयेत् ।
तथा च कदलीशाखां घृतवस्त्रेण वेष्टिताम् ।। १५ ।।
नीराजनादिकं कृत्वा हस्ते धृत्वा च पूजकैः।
प्रासादभ्रमणं कृत्वा प्रासादोपरि नीयते ।। १६ ।।
बृहत्प्रदीपं तत्रैव ज्वालयित्वा विभुं वदेत् ।। १७ ।।
हे देवदेव जगतामधीश करोतु नित्यं जगतां नृणां च ।
सुखानि सर्वाणि च सर्व एव चान्ते च वैकुण्ठपदे वसन्तु ।। १८ ।।
कथयित्वा तु चक्रस्य भ्रमणं त्रितयं चरेत् ।। १९ ।।

श्रीवामदेव उवाच

एकादश्यां सोमवारे भवेच्च यदि सुन्दरि ।
ततो राजाधिराजं स्वं दर्शयेत् सोमवासरे ।। २० ।।
शिवं दृष्ट्वा च ज्ञात्वा वै मम रूपं च पश्यति ।
मध्याह्नपूजाशेषे च कार्य्यमेतद्भवेत् प्रिये ।। २१ ।।
एकादश्यां यदि भवेज्जीववासरकः प्रिये ।
रात्रौ राजाधिराजस्य वेशं कृत्वा च पूजयेत् ।। २२ ।।
आतपत्रं देवपार्श्वे नियोज्य कमलायुताम् ।
पूजां कृत्वा विभोरेव तेषां नित्यस्थले प्रिये ।। २३ ।।
शुक्लपक्षे विशेषं तु पुनः प्रष्टुं किमिच्छसि ।
इति श्रुत्वा हैमवती हृष्टेन मनसा तदा ।। २४ ।।

श्रीपार्वत्युवाच

एकादशीविधिं श्रुत्वा पप्रच्छ वृषभध्वजम् ।
अमावास्याविधिं देव किं वा रूपेण तद्भवेत् ।। २५ ।।
कथय देवदेवेश किं विधानं तदा प्रभोः।
पार्वतीवचनं श्रुत्वा प्रोवाच जगतां पतिः।। २६ ।।

श्रीवामदेव उवाच

उदयतिथिमारभ्य दर्शयात्राविधिः स्मृतः।
तिथेर्मलं यदापि स्यात्तदा तत्र न कारयेत् ।। २७ ।।
अमावास्यादिने प्रातः पूजनं च समाचरेत् ।
आचार्य्योऽपि जगन्नाथसमीपं प्राप्नुयात्तदा ।। २८ ।।
देवाज्ञापय गोविन्दं त्वन्मूर्त्तिं वरुणस्य च ।
पूजां गृहाण देवेश लक्ष्मीप्रीणनहेतवे ।। २९ ।।
आज्ञामाल्यं तु गृह्णीयात् सिंहासनगताद्विभोः।
तद्गले तु स्रजं दद्याच्छिविकायां विमानके ।। ३० ।।
स्थापयित्वा दृढं कृत्वा च्छत्रकाहालसंयुतम् ।
अग्रे प्रतिनिधिर्गच्छेन्महोत्सवेन तं नयेत् ।। ३१ ।।
एतद्विधिं कथं देवि किमर्थं कृतवान् विधिः।
त्रेतायुगे रामजन्म चाभवत् धरणीतले ।। ३२ ।।
रावणादीन् नाशयित्वा वैकुण्ठगमनं यदा ।
हनुमांश्च तदाऽवोचद् गच्छामि तव सन्निधिम् ।। ३३ ।।
तच्छ्रुत्वा राघवः प्राह चिरञ्जीवी भव प्रिय !।
यावच्च मेदिनी तिष्ठेज्जीववान् भव वानर ।। ३४ ।।
पश्चात्त्वमेव ब्रह्माऽपि भविष्यसि न संशयः।
मत्स्थानं चोत्कले देशे पुरुषोत्तमविश्रुतम् ।। ३५ ।।

तत्क्षेत्रमध्ये त्वं तिष्ठ कुमुदो नाम मत्प्रियः।
तव समीपं गच्छामि मन्मूर्त्तिदर्शनं कुरु ।। ३६ ।।
दर्शं दर्शं प्रति ब्रह्मन् तत्स्थानं मत्स्वरूपकम् ।
नारायणस्वरूपं मे पश्यसि प्लवगोत्तम ।। ३७ ।।
कथित्वा सरयूतोयं सृष्ट्वा धाम स गच्छति ।
रामस्य वचनं श्रुत्वा ध्यानरूपधरः कपिः।। ३८ ।।
पुरुषोत्तमरक्षार्थं धृतपर्वतवृक्षकः।
दुष्टानां निग्रहार्थाय तस्मिंस्तिष्ठति कीशराट् ।। ३९ ।।
तन्नामश्रवणाद्देवि नश्यन्ति हि ज्वरादयः।
एकाहिको द्वाहिकश्च त्र्याहिकादिश्च नश्यति ।। ४० ।।
पुनः शृणु देव देवि द्वापरस्य कथामिमाम् ।
द्वापरे कृष्णजन्मापि कंसनाशाय चाभवत् ।। ४१ ।।
वसुदेवगृहे जातो यदासीच्चार्भकं तदा ।
गृहीत्वा वसुदेवोऽपि यमुनातटमागतः।। ४२ ।।
तदोग्रसेनं दृष्ट्वाऽपि भयात् कम्पितविग्रहः।
उग्रसेनोऽपि तत्काले दृष्ट्वाऽप्यद्भुतरूपकम् ।। ४३ ।।
मातामहाय देवोऽपि वचनं तत्क्षणेऽब्रवीत् ।
तव कार्य्यं करिष्यामि सुस्थिरं गच्छ सुव्रत ।। ४४ ।।
त्वमेव राजा भविताऽप्यन्ते च पुरुषोत्तमे ।
तिष्ठ दक्षिणपार्श्वे तु सद्रूपं च निरामयम् ।। ४५ ।।
नारायणस्वरूपं मां द्रक्ष्यसि नात्र संशयः।
कथयित्वा गोपपुरं जगाम जनकेन च ।। ४६ ।।
द्वापरे यानि कर्माणि कृत्वा धाम जगाम सः।
अतः सकाशाद् हे देवि ! नारायणस्वरूपकम् ।। ४७ ।।

तस्मै प्रदर्श्य सामुद्रं तटं गत्वा च पाणिनः।
प्रीतये तस्य पूजादीन् गृह्णाति जगदीश्वरः।। ४८ ।।
स्नानं तत्र करोत्येष यतः शङ्खोऽपि तिष्ठति ।
मर्त्यानां च यथा धर्मांस्तान् कुरु नृपसत्तम ।। ४९ ।।
अष्टाक्षरेण मन्त्रेण सेचयेद्देवपादयोः।
आचार्य्येण कृतं सर्वं नीत्वा हरिहरान्तिकम् ।। ५० ।।
संनिवेश्य तु तस्याग्रे स्नानं कृत्वा तु पूजनम् ।
वन्दापनां तयोः कुर्य्यादानयेन्नीलपर्वतम् ।। ५१ ।।
संस्थापयेत्प्रभोरग्रे त्यक्त्वाऽप्याषाढकं प्रिये ।
सूर्य्यग्रहो यदि भवेत्तदा स्नानादिकं चरेत् ।। ५२ ।।
लाजादिकैश्च पूजां तु कुर्वीत कार्य्यमुत्तमम् ।
एतद्विधिः नृपस्याग्रे विधिना कथितः पुरा ।। ५३ ।।
एवंरूपेण राज्ञाऽपि दर्शयात्रोत्सवः कृतः।
तवैतत् कथितं देवि वैष्णवानां शुभावहम् ।। ५४ ।।
येऽपि स्नानं न कुर्वन्ति ह्यमावास्यादिनेऽपि ते ।
भवन्ति रोगिणः सर्वे अतः स्नानं समाचरेत् ।। ५५ ।।
अमावास्याविधिं चैव येऽपि शृण्वन्ति नित्यशः।
सर्वपापानि नश्यन्ति चान्ते वैकुण्ठवासिनः।। ५६ ।।
समुद्रस्य स्नानफलं प्राप्नुवन्ति न संशयः।। ५७ ।।

इति श्रीवामदेवसंहितायाम् अमावास्याविधिकथनं नाम त्रयोदशोऽध्यायः।।

चतुर्द्दशोऽध्यायः

श्रीपार्वत्युवाच

प्रभो ! कथय देवेश !रवियात्रा यथा भवेत् ।
किं वा रूपेण राज्ञा च कृता यात्रा शुभप्रदा ।। १ ।।
देवेन राज्ञे कथितमेतद्यात्रां कुरु प्रिय ।
पुरा मया श्रुतं देव सर्वं त्वन्मुखपङ्कजात् ।। २ ।।
अपर्णावचनं श्रुत्वा जगाद नीललोहितः।। ३ ।।

श्रीवामदेव उवाच

शृणु देवि ! पुरा देवपूजानन्तरतो विधिः।
नृपं सन्तुष्टमनसा प्रोवाच जगतां पतिः।। ४ ।।
राजन् !शृणोतु मद्वाक्यं तव संप्रीतये मम ।
अत्र स्थाने स्थितिरेतन्न त्यजामि कदाचन ।। ५ ।।
प्रासादप्रतिमाभङ्गे तवैव कीर्त्तिरेव सा ।
मत्तः शृणु नृपवर !प्रति सम्वत्सरं त्वया ।। ६ ।।
सूर्य्ययात्रा विधातव्या यतो मत्प्रीतिकृद्भवेः।
आदौ शृणु नृपवर ज्येष्ठे स्नानोत्सवं शुभम् ।। ७ ।।
रथोत्सवं च शयनं कर्कटे दक्षिणायनम् ।
परिवृत्तिं हि पार्श्वस्याप्यूर्ज्जे चोत्थापनं ततः।। ८ ।।
मार्गशीर्षे प्रावरणं पौषे पुष्योत्सवं ततः।
तथोत्तरायणं फल्गूत्सवं कुरु हि फाल्गुने ।। ९ ।।
चैत्रशुक्लचतुर्द्दश्यां कुर्य्याद्दमनकं प्रिय ।
वैशाखशुक्लपक्षे तु तृतीयामक्षयात्मिकाम् ।। १० ।।
यात्रैषा घृणिसंख्याता उपयात्राःयथा स्मृताः।
विधिना सहितो राजन् ! कुरुष्व मम सम्मतम् ।। ११ ।।

पुनः प्रोवाच राजाग्रे शृणु राजन् !वचो मम ।
मत्स्थाने मम पूजायां भैरवध्यानकं कुरु ।। १२ ।।
मत्पार्श्वे वर्तते रुद्रो नाम्ना भैरवसम्मतः।
अहं हि तस्य पार्श्वेऽपि चण्डरूपधरः स्थितः।। १३ ।।
ममैव पार्श्वे स तिष्ठेदहं तस्यापि पार्श्वके ।
तिष्ठामि शृणु राजेन्द्र !मम तस्य न भेदकम् ।। १४ ।।
इति कथित्वा देवस्तु तूष्णीं भूत्वा तिरोदधे ।
राजा श्रुत्वा देववचश्चकार विधिना सह ।। १५ ।।
ज्येष्ठे शुक्लचतुर्दश्यां प्रातः पूजादिकं चरेत् ।
देवानां सर्वकर्माणि शीघ्रं कुर्य्युश्च पूजकाः।। १६ ।।
प्रहरानन्तरं देवि उदीच्यां दिशि कूपके ।
होमादिकं च संस्कारं कृत्वा तज्जलमानयेत् ।। १७ ।।
एतत्कार्य्ये कार्य्यकारी ब्रह्मचारी प्रतिष्ठितः।
एतत्कार्य्यं चाग्निशर्मा कुर्वीत तद्दिने प्रिये ।। १८ ।।
अन्यत्र दिवसे देवि तज्जलं न हि कारणम् ।
पूर्वे मण्डपकं कुर्य्यात्तत्र संस्थाप्य तज्जलम् ।। १९ ।।
शतमष्टोत्तरं स्वर्णकुम्भं तत्र निधापयेत् ।
रौप्यं वा ताम्रकं चैव तथा मृण्मयभाजनम् ।। २० ।।
चतुः पंक्तितया रक्षेत् पञ्चत्रिंशद्घटांस्तथा ।
जगन्नाथनिमित्तं च त्रयस्त्रिंशद्घटांस्तथा ।। २१ ।।
बलदेवाय भद्रार्थं घटान् द्वाविंशतिं प्रिये ।
अष्टादश स्युश्चक्रस्य क्रमतस्तु सुरक्षयेत् ।। २२ ।।
तज्जलं तु समानीय प्रथमाश्रमिणश्च ये ।
आचार्य्योऽपि ततो गत्वा घटेषु जलपूरणम् ।। २३ ।।

कुर्य्युश्च चन्दनं क्षिप्त्वा गन्धद्वारेति मन्त्रकैः।
तस्योपरि नारिकेलं चूतपत्रसमन्वितम् ।। २४ ।।
कृत्वांऽशुकं पिधायाथ जगन्नाथसमीपकम् ।
गत्वा गदन् देवदेवं देवस्नानोत्सवे तव ।। २५ ।।
गमनं कुरु देवेश चतुर्द्धामूर्त्तिसंयुतः।
इति कथित्वा तूर्ष्णीं च भिल्लजातौ ततो नृपः।। २६ ।।
आज्ञां कुर्वीत तत्रैवमुष्णीषादिं दृढं कुरु ।
विद्यापतिभवा ये वै विश्वावसुकुलोद्भवाः।। २७ ।।
सज्जीभवेयुस्ते सर्वे देवानां क्रमशो द्विजाः।
मङ्गलारोपणं कुर्य्यान्महोत्सवयुतं नृपः।। २८ ।।

श्रीवामदेव उवाच

स्नानमण्डपकार्य्याणि संपाद्य प्रभुमानयेत् ।
सुदर्शनं सीरपाणिं सुभद्रां जगतां पतिम् ।। २९ ।।
नीत्वा स्थलेऽत्र संस्थाप्य यथा दृढतरं भवेत् ।
यथा दिवा तथा रात्रावेवं कुर्य्यान्नृपोत्तमः।। ३० ।।
दृढं कृत्वा तु देवानां बहिष्कुर्य्याज्जनान् ततः।
क्षालयेच्च देवपुरोऽप्यंशुकावरणं ततः।। ३१ ।।
आचार्य्याः स्नानकर्मादीन् समाप्य पूजने स्थिताः।
एतस्मिन् समये कर्म न कुर्य्युः भिल्लजातयः।। ३२ ।।
आचार्य्यवर्य्यास्तु गताश्च तत्र
तोयास्य पूजादिकमाचरेयुः।
श्रीभैरवं प्रार्थनकं तु कुर्य्युः
सिंहासनात्त्वं स्थलमेतदेहि ।। ३३ ।।

पूजादिकार्य्ये तव चाधिकारोऽ-
प्यतः सकाशादिह संयतश्च ।
श्रीविष्णुपार्श्वस्थित उग्ररूप-
स्त्वमत्र तिष्ठेर्गुरुदेवयुक्त ।। ३४ ।।
अस्मिन् स्थले पूजनके त्वमेव
सर्वं च पश्येर्मम नास्ति दोषः। ३५ ।।

श्रीवामदेव उवाच

तत्र स्थले चासनभूतशुद्ध्या-
दिकं तु कुर्य्याच्च ततोऽपि ब्रह्मा ।
समाह्वयेत्तत्र च ब्रह्मवर्गान्
जलानि सर्वे परिसंस्कृतानि ।। ३६ ।।
आनीय ते देवपुरः स्थलेषु
रक्षेयुरत्रार्च्चितकुम्भवर्गम् ।
पूजासमाप्तौ च यदापि विप्रा-
स्तदग्निशर्मा खलु पूजकाश्च ।। ३७ ।।
सर्वे प्रभूणां शिरसि प्रदद्यु-
र्ब्रह्मादिदेवाः सहिताः स्तुवन्ति ।
तस्मिंश्च काले महदुत्सवाश्च
भवन्ति नादैः सह मर्द्दलैश्च ।। ३८ ।।
अस्मिंश्च काले मनुजाश्च ये वै
पश्यन्ति देवान् सुरसत्तमांश्च ।
ते वै सदा मुक्तिपथान् लभन्ते
वैकुण्ठधाम प्रविशन्ति नित्यम् ।। ३९ ।।

तच्चन्दनस्यापि हि यन्महत्त्वं
शृणोतु देव्यत्र पिबन्ति ये वै ।
कुष्ठादिरोगेभ्य इहापि मुक्ता
भवन्ति बाला यदि काकबन्ध्याः ।। ४० ।।
भक्षन्ति चेत्ता बहुपुत्रवत्यो
भवन्ति किं वा कथनेन देवि ।
सर्वेप्सितानि प्रभवन्ति तेषां
मनोरथास्ते सफला भवन्ति ।। ४१ ।।
ततोऽपि देवि प्रभुविग्रहेषु
वेशान् प्रकुर्य्युश्च ततोऽपि भोगम् ।
समानयेयुः प्रतिहारिणश्च
प्रविश्य तत्रापि च पाकशालाम् ।। ४२ ।।
त्रासेन च्छत्रेण समं तथैव
नानाविधं व्यञ्जनपूपयुक्तम् ।
कुर्य्याच्च देवस्य तथैव पूजां
प्रभूंश्च नीत्वापि पुरा हि यद्वत् ।। ४३ ।।
नीराजनं तत्र विधेयमेव
यावन्मुखं दक्षिणदिक्स्थितं च ।
नीराजनं तत्र करोतु राजा
तथा सुपर्णस्य च सम्मुखे च ।। ४४ ।।
अस्मिन् प्रपश्यन्ति हि येऽपि काले
ते वै सदा मुक्तिपथान् लभन्ते ।
नीत्वा तमेकैकमथो नृपश्च
संस्थापयेत्तान् विजने स्थले च ।। ४५ ।।

तस्य संज्ञाऽनवसर इति प्रख्यापिता बुधैः।
तत्राधिकारिणो ये ते विश्वावसुकुलोद्भवाः।। ४६ ।।
तत्स्थानसंज्ञां तु मनीषिणश्च
वदन्ति देव्यप्यनवसरं हि ।
तत्राधिकारी भवतीह देवि
विश्वावसोर्वंशभवः प्रवृद्धः।। ४७ ।।
इमां तु यात्रां जगदीशितुः प्रिये
शृण्वन्ति नित्यं कथयन्ति येऽपि च ।
पदं लभन्ते जगदीशितुः परं
तमुत्सवं ये जगदुः सुखावहाः।। ४८ ।।

इति श्रीवामदेवसंहितायां श्रीक्षेत्रमाहात्म्ये हरगौरीसम्वादे स्नानोत्सववर्णने चतुर्द्दशोऽध्यायः।।

पञ्चदशोऽध्यायः

श्रीवामदेव उवाच

शृणु प्रिये ! त्वं जगदीशितुश्च
स्नाने समाप्ते सति यच्च कर्म ।
निरोधगेहेऽपि च तान्निवेश्य
वंशांशुकैरावरणं च कुर्य्यात् ।। १ ।।
बृहच्च पर्य्यङ्कमथो नियोज्य
तत्रांशुके चित्रपटं विधेयम् ।
श्रीवासुदेवस्य च मूर्त्तिमेवं
नारायणस्यापि च तत्र मूर्त्तिम् ।। २ ।।

तत्रापि देवी भुवनेश्वरीति
तस्याश्च मूर्त्तिं विदधीत राजा ।
आनीय मूर्त्तीश्च नृपप्रवीरः
प्रासादकस्य भ्रमणं च कुर्य्यात् ।। ३ ।।
महोत्सवैस्तत्र तु संन्यसेच्च
चित्रं पटं हस्तमितं विदध्यात् ।
रामं च कृष्णं च नृसिंहरूपं
न्यसेयुरेतान् बलदेवपार्श्वे ।। ४ ।।
भद्रासमीपे तु नृपो न्यसेच्च
श्रीविश्वधात्रीं च रमासमेताम् ।
नीलाद्रिनाथस्य पुरः स्थले च
कृष्णं च गोविन्दमपि न्यसेच्च ।। ५ ।।
ता देवतास्तत्र नियोज्य देवि !
प्रक्षालयेत् स्नानमिदं प्रभूणाम् ।
पञ्चामृतैः स्नानमपीह कुर्य्या-
न्मध्याह्नभोगं खलु पूर्ववच्च ।। ६ ।।
सन्ध्यार्च्चनादिं च करोतु राजा
पश्चात्तु यत्कर्म शृणु प्रिये ! त्वम् ।
स्नानावधि पक्षदिनेषु तेषु
देवान्न पश्यन्तु जनाः कदाचित् ।। ७ ।।
स्वरूपकान् वापि विरूपकान् येऽ-
प्यत्रापि पश्यन्ति जनाश्च देवान् ।
ते वै च घोरे नरके पतन्ति
नातः सकाशात्परिदर्शनीयम् ।। ८ ।।

राज्ञाऽपि कृत्वा मनसा विचारं
तस्मिन्नियुक्ताः शबराश्च ये वै ।
विद्यापतेरुद्भवकाश्च पूजने
कृताः पुनर्देवि वदामि सर्वम् ।। ९ ।।
उभे च सन्ध्ये शितशर्कराभिः
प्रपानकं देवपुरः प्रदेयम् ।
तदापि भोगावसरेऽपि राजा
सर्वाणि कर्माणि च तानि कुर्य्यात् ।। १० ।।
तद्देवभोज्यैश्च हविष्यकं च
कुर्वन्ति ये ते नरके पतन्ति ।। ११ ।।
विश्वावसुकुलोद्भूता येऽपीह धर्मकारिणः।
तेऽपि सर्वे चेश्वरस्य कर्म कुर्वन्ति यत्नतः।। १२ ।।
यथा शास्त्रेऽपि लिखितं तेऽपि कुर्य्युर्वरप्रदे !।
तेषां नैवाधिकारः स्यान्नैवेद्यसमये सदा ।। १३ ।।
राजा ज्ञात्वा रौद्रकर्म भिल्लिजातौ न योजयेत् ।
ईश्वरघटनादींश्च सर्वान् कुर्य्युश्च भिल्लिकाः।। १४ ।।
प्रपानकादि भोगांश्च विद्यापतिकुलोद्भवाः।
कुर्वन्ति भोगकाले ते शबराश्च बहिष्कृताः।। १५ ।।
नैवेद्यसमये देवि प्रतीहार्य्यकरोच्च यत् ।
शब्देन शोधनं कुर्य्याद्धाररं सुदृढं तथा ।। १६ ।।
भोगं समानयेत् पूर्वं यथाविधि प्रभोः स्थले ।
नैवेद्यस्य समाप्तौ च विशन्ति भिल्लिजातयः।। १७ ।।
यो विद्यापतिसम्बन्धी स एव स्याच्च पूजकः।
एवं त्रिकालपूजायां बहिर्भूताश्च भिल्लिकाः।। १८ ।।

प्रभूणां यानि कर्माणि भवन्ति यत्र यत्र च ।
एतेष्वपीह देवानां सप्तावरणकं भवेत् ।। १९ ।।
एतत्सर्वं प्रवक्ष्यामि मनसा धारय प्रिये ।
लेपनादिं बहिष्कृत्य प्रभूणां तु शनैः शनैः।। २० ।।
षड्भिर्दिनैरिदं कुर्यात् सप्तमेऽहनि तद्भवेत् ।
सुवासितं च यत्तैलं मर्द्दयेत्तु तिलोद्भवम् ।। २१ ।।
सुदिनेऽपि च सूत्राणि पट्टस्य रुचिराणि च ।
वद्ध्वा चित्रतरं विष्णोः सर्वाङ्गे नाडिकल्पनम् ।। २२ ।।
ततः सर्जतरोः क्षीरं शुष्कं संचूर्ण्य यत्नतः।
सुवासितैस्तिलोद्भूतैस्तैलैर्युक्तं च मर्द्दयेत् ।। २३ ।।
तच्चूर्णं तु हरेर्देहे लिम्पेन्मज्जप्रकल्पने ।
नवमे दिवसे देवि सूक्ष्माद्रांशुकपातनात् ।। २४ ।।
शोषयेत्तादृशं लेपं देवाङ्गेषु च सर्वतः।
दशमेऽहनि संप्राप्ते नेत्रपट्टांशुकैः पुनः।। २५ ।।
विष्णोः सर्वाङ्गमाच्छाद्य कार्य्या शोणितकल्पना ।
चन्दनानि च कस्तूरीं कुङ्कुमं हिमवालुकाम् ।। २६ ।।
तथा चन्दनसारं च सर्वमेकत्र पेषयेत् ।
एकादश्यां तिथौ विष्णोः सायं पूजावसानतः।। २७ ।।
ततो काहालघण्टादि ध्वनौ जाते मनोरमे ।
तच्चन्दनादिकं विष्णोर्देहेषु च विलेपयेत् ।। २८ ।।
तद्विलिप्य प्रिये कुर्य्यात् तामेव मांसकल्पनाम् ।
रवावहनि शुक्लानि दृढानि वसनानि च ।। २९ ।।
दत्त्वा यत्नेन परमं लेपं दद्यात् पुनर्दृढम् ।
चर्मकल्पनमाकुर्य्यात्तस्माल्लेपविलेपनात् ।। ३० ।।

ततो देवि पुनर्नव्यैः शुक्लैर्द्दढतरांशुकैः।
श्रीहरेः पादरचनां कुर्य्याद्देव दृढां तदा ।। ३१ ।।
एतद्दिने तु जातेऽपि सार्द्धयामे हिमात्मजे ।
शङ्खमर्द्दलघण्टानां निः स्वनैश्च मुहुर्मुहुः।। ३२ ।।
तत्पादरचनाशब्दः श्रूयेत नहि केनचित् ।
तत्कर्णौ वधिरौ स्यातां तच्छब्दं श्रवणे प्रिये ।। ३३ ।।
स्यात्तत्र तत्परो राजा भृत्यवर्गैश्च संयतः।
कर्पूरकठिनीलेपं कायेषु च मुहुश्चरेत् ।। ३४ ।।
चित्रविच्च तदा कुर्य्यात्तेषां लोमप्रकल्पने ।
त्रयोदश्यामिदं कुर्य्याद्वर्णैरेव विचक्षणः।। ३५ ।।
यथारूपं प्रभूणां तु लेख्यं कार्य्यं तथा तथा ।
विद्यापतिकुलोद्भूतचित्रविच्चित्रकर्मणा ।। ३६ ।।
चतुर्द्दशीदिने चापि तथा पञ्चदशीदिने ।
दिनद्वयेऽपि तत्कर्म चित्रं चारुतरं चरेत् ।। ३७ ।।
जगदीशाङ्गसम्बन्धि लेपचन्दनकादिकम् ।
निरोधनालयात्तस्माद्बहिष्कुत्य सुलोचने ।। ३८ ।।
द्वादश्यामेव तद्दद्याद्राज्ञे निर्माल्यमादरात् ।
तद्देहलेपितं पूर्वं चन्दनं पापमोचनम् ।। ३९ ।।
भक्त्या ये मनुजाः शीघ्रं भजन्तेऽत्र महीतले ।
कुष्ठादिरोगतो मुक्तास्तथा निष्पापिनश्च ते ।। ४० ।।
अथ पक्षदिने रात्रौ गते यामत्रये प्रिये ।
स्नात्वाऽऽचार्य्यस्तदा शीघ्रं पट्टदेवस्य पूर्ववत् ।। ४१ ।।
ततः स्नानं विधायाथ तेषां कृत्वा विसर्जनम् ।
पर्य्यङ्काहरणं कृत्वाऽप्यन्तरावरणं हरेत् ।। ४२ ।।

अथ प्रक्षालयेदग्रं देवदेवस्य सुन्दरि ।
पुनश्छत्रद्वयं धृत्वा घण्टादि ध्वनिमाचरेत् ।। ४३ ।।
तत्र कालेऽपि संप्राप्याचार्य्यको देवसन्निधिम् ।
तच्चक्षुरिति मन्त्रेण दद्याच्चक्षुद्वयं तदा ।। ४४ ।।
नेत्रोत्सवे सोऽपि भूपस्तत्र तिष्ठति तत्पुरः।
इत्थं नेत्रोत्सवे जाते विद्यापतिकुलोद्भवाः।। ४५ ।।
चतुः समं हरेर्गात्रे लेपयेयुः समंततः।
चतसृणां देवतानां मुदा लेपनकं चरेत् ।। ४६ ।।
कुर्य्याद्वन्दापनां तत्र देवतानां पुरस्तदा ।
पद्मं कृत्वा वर्णभेदैःहस्तमात्रप्रमाणकम् ।। ४७ ।।
महास्नानं ततः कृत्वा द्विसहस्रपलेन तु ।
मन्त्रैश्च विधिवत् कुर्य्यात् प्रतिबिम्बे हरेस्तदा ।। ४८ ।।
सुवेशरचनां कृत्वा देवतानां महीपतिः।
देवाग्रे मण्डलं कृत्वा चतुः पंक्तितया नयेत् ।। ४९ ।।
च्छत्रकाहालसंयुक्तः पाकशालाप्रदेशतः।
भोगमानीय संस्थाप्य त्वग्निशर्मा तु चन्दनम् ।। ५० ।।
पीतवस्त्रद्वयं माल्यं दद्याच्च मुरजिष्णवे ।
आचार्य्यस्तु ततो भक्त्या प्रातः पूजनमाचरेत् ।। ५१ ।।
पीतवस्त्रस्य यद्वाक्यं विष्णोर्वस्त्रं तु पीतकम् ।
शुभकारीति विज्ञाय राज्ञे तद्वस्त्रकं ददौ ।। ५२ ।।
इत्थं नेत्रोत्सवं कुर्य्यात् षोडशेऽह्नि श्रियः पतेः।
क्षये वा चाथवा वृद्धौ दश-पञ्च-दिनस्य च ।। ५३ ।।
प्रान्ते नेत्रोत्सवं प्रातर्विदधीत शृणु प्रिये !।
दैवयोगाच्च भवति त्रयोदशदिनात्मकम् ।। ५४ ।।

अङ्गालस्यं प्रकुर्वीत दश-पञ्च-दिनावधि ।
पक्षमात्रे चोत्सवादिं न कुर्वन्ति हि मन्दिरे ।। ५५ ।।
द्वितीयायां तिथौ देवि कृत्वा नेत्रोत्सवादिकम् ।
प्रातः पूजां प्रकुर्य्याद्वै ततो वन्दापनां चरेत् ।। ५६ ।।
घोषयात्रां ततः कुर्य्याच्छृणु देवि रविग्रहम् ।
नेत्रोत्सवे वा भवति तदा स्नानादिकं चरेत् ।। ५७ ।।
लाजादिकविकारोत्थैः प्रातः पूजनमाचरेत् ।। ५८ ।।
ये वै पश्यन्ति तस्मिन्मधुमुरमथनं नीलगात्रं सुरम्यं
विष्णुं नेत्रोत्सवान्ते सकलरुचिहरं पूर्णचन्द्राननं च ।
ते वै सर्वार्थसिद्धिं हरिपदकमलं प्राप्नुवन्तीह मर्त्त्याः
तेषां नित्यं भवेयुः खलु सकलसुखं पुत्रपौत्रादयश्च ।। ५९ ।।

इति श्रीवामदेवसंहितायां नेत्रोत्सववर्णनं नाम पञ्चदशोऽध्यायः ।।

षोडशोऽध्यायः

श्रीवामदेव उवाच

आषाढशुक्लपक्षे तु प्रतिपद् या तिथिर्भवेत् ।
तस्यां कुरु महाराज प्रातःकर्माणि यानि च ।। १ ।।
महास्नानविधिं कुर्य्यात् प्रातः पूजनमाचरेत् ।
स्यन्दनं दक्षिणावर्त्तं कृत्वा द्वारेऽपि स्थापयेत् ।। २ ।।
स्यन्दनानां प्रतिष्ठां तु कुर्य्याच्च नृपसत्तम ।
दिवसे सत्वरं देवि रात्रिकृत्यं समापयेत् ।। ३ ।।
नीतिं समाप्य कुर्य्यात्तु उष्णीषादि दृढं तदा ।
ब्राह्मे मुहूर्त्ते देवानां कुर्य्यात् स्नानादि कर्मकम् ।। ४ ।।

प्रातः पूजनकं कुर्य्यान्मङ्गलारोपणं चरेत् ।
वन्दापनादिकं कुर्य्याद् देवाग्रे कथयन्नृप ।। ५ ।।
पुरा मह्यं कृताऽऽज्ञा तु त्वया च पुरुषोत्तम ।
गुण्डिचामण्डपे राजन् स्थास्यामि सप्तवासरम् ।। ६ ।।
अतः कारणतो देव रथे तिष्ठ शुभप्रद ।
बलभद्रसुभद्राभ्यां सहितो गच्छ सत्वरम् ।। ७ ।।
पतितानां पावनस्त्वं म्लेच्छादीनां च मोक्षणम् ।
कुरु देव कथित्वा तु इन्द्रद्युम्नपुरः सरः ।। ८ ।।
वेदघोषादिकं ब्रह्मा कृत्वा च पुरतो व्रजेत् ।
विश्वावसुकुलोद्भूता विद्यापतिकुलोद्भवाः ।। ९ ।।
सर्वे आःकारशब्दांश्च कुर्य्युस्ते हृष्टमानसाः ।
पथि तूलिनियोगेन सीरपाणिस्ततो व्रजेत् ।। १० ।।
ततः पश्चात् सुभद्रा च जगन्नाथस्ततः परम् ।
सुदर्शनं ततः पश्चादेकत्र समयेऽपि ते ।। ११ ।।
बहिर्भूयाथ गच्छन्ति छत्रकाहालसंयुताः ।
वाद्यैर्डिण्डिमकैश्चैव पुरः कृत्वा महोत्सवम् ।। १२ ।।

श्रीवामदेव उवाच

शृणु प्रिये ! त्वं कथयामि तत्र
तमुत्सवं देवपतेरलभ्यम् ।
श्वेतातपत्रैरसितातपत्रै-
स्त्रासैश्च युक्तं निविडं जनैश्च ।। १३ ।।
आःकारनादैः परिचारकाणां
वीरातपत्रादिकमेव तत्र ।
विराजितो देववरोऽपि लीला
रूपं गतः सर्वदिशं विलोक्य ।। १४ ।।

शनैः शनैर्गच्छति देवदेव
तस्मिन्नियुक्तैर्बलिबल्लभैश्च ।
महोत्सवैस्तांश्च रथस्य पार्श्वे
नीत्वा रथानां च प्रदक्षिणं हि ।। १५ ।।
कृत्वाऽपि सर्वे च दृढं नयेयुः
सोपानके काष्ठमये नियुक्ते ।
रथोपरिस्थं महदद्भूतं च
प्रिये भवेद्वा यमुना स्वयं च ।। १६ ।।
मेरुं समालिङ्गति पर्वतस्य
गुहान्तरं किं विशतीह चाभ्रम् ।
सायं दिवा संघटनं किमेत-
च्चक्रायुधे स्यन्दनसंगते च ।। १७ ।।
ततश्च राजा परिशोधनं च
रथस्य कृत्वा परिमार्जनं हि ।
तत्रापि सिञ्चेत्स तु राजवर्य्यः
श्रीचन्दनस्योदकमेव देवि ।। १८ ।।
पुनस्तु संमार्जनकं तु कुर्य्यात्
काहालशब्दस्तदनन्तरं हि ।
तस्मिंश्च काले खलु पृष्ठतश्च
अत्युन्नता यष्टिधराश्च सर्वे ।। १९ ।।
ततश्च ते स्यन्दनरज्जुहस्ताः
हृष्टाः नटन्तः परितो भ्रमन्ति ।
घण्टानिनादाः प्रसरन्ति दिक्षु
काहालनादैश्च मृदङ्गनादैः ।। २० ।।

ढक्कानिनादैरपि डिण्डिमैश्च
वंश्यादिनादैः परितः स्फुरन्ति ।
श्रीवेदघोषैर्जयघोषनादै-
र्टटंनिनादैः खलु घण्टिकानाम् ।। २१ ।।
श्रीनन्दिघोषे रथिदेवराजो
रथाश्च धावन्ति नृणां समूहे ।
चौरस्य चाग्रे पततीह द्रव्यं
विटे विश्यन्ते गणिकासमूहाः।। २२ ।।
क्वचित् स्थले वा जटिलस्य चाग्रे
विशन्ति नित्यं विधवासमूहाः।
एवं भवेद्वापि हि तेऽपि लोका
नीलाद्रिनाथं च विलोकयन्ति ।। २३ ।।
रथस्य रेखामवलोक्य लोका
वदन्ति ता अत्र च जह्नुकन्याः।
सरस्वतीं वाप्यथ गोमतीं च
पुनन्तुनस्ता रथपादरेखाः।। २४ ।।
रथेषु घण्टं परिवादयन्ति
नटन्ति सर्वे परिवाहकाश्च ।
अधश्च तिष्ठन्ति हि भूमिदेवाः
भवन्ति सर्वे पुलकाश्रुदेहाः।। २५ ।।
ग्राम्याङ्गनास्ता धवमाभणन्ति
कोऽयं च कृष्णो धवलश्च कोऽयम् ।
केयं च गौरी वद जीवनेश
धवोऽपि कान्तां वदतीह काले ।। २६ ।।

बलस्तु सङ्कर्षण एव नाम्नाऽ-
प्ययं जगन्नाथ इतीह कृष्णः।।
गौरी सुभद्रा परिपश्य चैतान्
त्वद्बन्धुवर्गैः सहिता भवापि ।
रथस्थितं वामनकं च पश्येत्
संकर्षणं वाऽपि हि यस्तु पश्येत् ।। २७ ।।
भद्रां तथा वाऽपि रथस्थितां च
स याति नित्यं हरिधामपूतम् ।
प्राप्नोति देवं हि रथस्थितं वा
पश्यन्ति ये वै सुरपूज्यदेवम् ।। २८ ।।
ते प्राप्नुवन्तीह हरेश्च धाम
यत्रैव गत्वा न पुनर्भवाश्च ।
यज्ञोत्सवं देवगणैश्च युक्तं
यान्तं प्रभुं येऽप्यवलोकयन्ति ।। २९ ।।
पदं हि विष्णोः सततं लभन्ते
यद्धाम गत्वा न पुनर्भवाश्च ।
मध्याह्नभोगं बलिमण्डपे च
कुर्य्यात्स आचार्य्यवरो विधिज्ञः।। ३० ।।
आराममध्ये शुकसारिकाश्च
पठन्ति हे कृष्ण तु राम राम ।
शुकाश्च सर्वान्मनुजान् वदन्ति
सर्वे तु पश्यन्तु हरेर्मुखं च ।। ३१ ।।
पश्यन्ति ये ते न पुनर्भवाश्च
न ते लभन्ते खलु गर्भकष्टम् ।
श्रीसाधुचक्रेऽपि विचित्ररूपं
नीलाद्रिनाथं च विलोक्य देवाः।। ३२ ।।

मध्याह्नकालेऽपि च तत्र गन्तुं
मनांसि कुर्वन्त्यपि हृष्टचित्ताः।
रथोत्सवं तेऽपि पुनश्च कृत्वा
नीत्वा जनान् यज्ञगृहस्य पार्श्वम् ।। ३३ ।।
सायं च नीराजनकं प्रभूणां
पुराऽपि यद्वद्गमने च कुर्य्यात् ।
यज्ञोत्सवे मण्डपके निवेशं
चैषां प्रभूणां क्रमतस्तु कुर्य्यात् ।। ३४ ।।
सोपानकं तच्च बहिश्च कुर्य्यात्
सायं सपर्य्यादिकमाचरेयुः।
कुर्य्याच्च पूजां प्रतिवासरं च
पश्यन्ति ये देववरांश्च तत्र ।। ३५ ।।
सप्ताहके मण्डपके स्थितांश्च
पश्यन्ति येऽपीह जनार्द्दनं च ।
ते मानवाः सप्तकुलानि नीत्वा
वसन्ति वैकुण्ठपदे चिराय ।। ३६ ।।
सप्ताहके येऽपि वसन्ति तत्र
ते वै जगन्नाथपदं लभन्ते ।
अस्मिंश्च काले सरसीन्द्रखाते
स्नानं च कृत्वा परिमुण्डनं च ।। ३७ ।।
पिण्डादिकं तत्र विधेयमेव
यदा भवेत् पितृभपञ्चमी च ।
जनाश्च श्राद्धादिकमेव तत्र
कृत्वा च ते वै फलमाप्नुवन्ति ।। ३८ ।।

शतं गयायां शृणु हे ह्यपर्णे !
किंचिच्च दद्यात् फलमक्षयं च ।
सद्यो लभन्ते शृणु सिन्धुजायाः
कथां विचित्रां विरहातुरा सा ।। ३९ ।।

आहूय देवीं विमलामवादीत्
वृत्तान्तजालं विहितं प्रभोश्च ।
प्रिये वयस्ये भगिनीं च नीत्वा
रथं समारुह्य गतोऽन्यदेशम् ।। ४० ।।

देवेन मह्यं न हि किञ्चिदुक्तं
या यस्य जाया किमु सा न भाव्या ।
कृतं मया किं कथय प्रिये त्वं
तद्दुर्गुणं किं कथयामि देवि ।। ४१ ।।

अहं तथा प्रेषितभर्तृकाऽपि
स्नानादिकं वाऽपि न मेऽपि जातम् ।
श्रुत्वा गिरं तां विमला जगाद
शृणु प्रिये ! त्वं मम वाक्यमेव ।। ४२ ।।

यदा धवो वापि विवेकशून्योऽ-
प्युच्चाटनं तत्र प्रसिद्धमेव ।
चूर्णं गृहीत्वाऽपि धवोऽपि यत्र
तत्पार्श्वकं गच्छ सुरेश्वरि त्वम् ।। ४३ ।।

एतत्कथित्वा विमला गता यत्
श्रिया कृतं कर्म च तद्वदामि ।
श्रीगुण्डिचाख्यां कथयन्ति ये वै
शृण्वन्ति नित्यं शृणु देवपूज्ये ।। ४३ ।।

ते वै जनाः सप्तकुलानि नीत्वा
तिष्ठन्ति देवेन्द्रसमीपके च ।। ४४ ।।

इति श्रीवामदेवसंहितायां षोडशोऽध्यायः।।

सप्तदशोऽध्यायः

श्रीवामदेव उवाच

द्वितीया-पञ्चमदिने तया यात्रा कृता प्रिये ।
धवं सा वीक्षितुं तत्र गुप्ता यात्रा कृता तया ।। १ ।।
हरं च मनसा कृत्वा हेरेति नाम योगतः।
राज्ञे क्रुद्धवती चापि सायं पूजासमापने ।। २ ।।
देव्या दत्तं च यच्चूर्ण्णं तद्धृत्वा तद्गृहं गता ।
अञ्जनं सर्वमोहं च तत्तु घृष्टं विभावपि ।। ३ ।।
लक्ष्मीमुखं प्रभुर्दृष्ट्वा व्रीडितश्चञ्चलोऽभवत् ।
एतत्कथां सीरपाणिर्न जानाति नगात्मजे ।। ४ ।।
रथभङ्गं रमा कृत्वा कथ्यमाना तु सारथिम् ।
गुप्ता लक्ष्मीरागताऽपि प्रासादे तूष्णीमेव सा ।। ५ ।।
तिष्ठति प्राणनाथस्य चित्तोद्वेगस्तदाऽभवत् ।
तेन नृपाग्रे कथितं रथं सज्जीकुरु प्रिय ।। ६ ।।
राज्ञा श्रुत्वा प्रभोर्वाक्यं रथो याम्यमुखः कृतः।
स्थिते देवे यज्ञगृहे सप्ताहं शृणु तत्फलम् ।। ७ ।।
सप्ताहे येऽपि पश्यन्ति बलभद्रं सुदर्शनम् ।
सुभद्रां च जगन्नाथमन्ते वैकुण्ठमन्दिरम् ।। ८ ।।

प्राप्नुवन्ति प्रिये इन्द्रद्युम्ने मज्जनकं च ये ।
कुर्वन्ति पिण्डकार्य्याणि तेषां च पितरश्च ये ।। ९ ।।
वैकुण्ठभवने नित्यं ते वसन्ति न संशयः।
अत्र स्थले नक्तकाले ये पश्यन्ति सुपूजितान् ।। १० ।।
विष्णोः पदं प्राप्नुवन्ति नात्र कार्य्या विचारणा ।
अश्वमेधाङ्गसंभूत तीर्थ सर्वाघनाशन ।। ११ ।।
स्नानं करोमि देवेश सर्वपापक्षयं कुरु ।
अश्वमेधाङ्गगोकोटिखुरक्षुण्णमहीतल ।। १२ ।।
तन्मूत्रफेनदानाम्बुपूरिताखिलपावन ।
तत्तच्छ्लोकं ये वदन्ति गुण्डिचा गुण्डिचेत्यपि ।। १३ ।।
तेषां स्थानानि वैकुण्ठे भवन्ति सुरसत्तमे ।
प्रातःकर्माणि नवमे समाप्य पूर्ववच्चरेत् ।। १४ ।।
उषाकाले तत्र भोगं कुर्य्याच्च जगदीशितुः।
अत्र स्थले कृतं यद्वत् तद्वत्तत्र च कारयेत् ।। १५ ।।
रथसम्मार्जनं राजा करोति कालपृष्ठगाः।
सर्वे रज्जुधरा देवि गच्छन्ति दक्षिणामुखम् ।। १६ ।।
ये पश्यन्ति सप्तकुलमुद्धरन्ति नगात्मजे ।
दक्षिणाभिमुखान् देवान् ये पश्यन्ति नराश्च तान् ।। १७ ।।
कुलकोटिं समुद्धृत्य गच्छन्ति विष्णुमन्दिरम् ।। १८ ।।

श्रीवामदेव उवाच

मध्याह्नभोगं बलिमण्डपे ते
कुर्य्युश्च तिष्ठन्ति रवेः सकाशात् ।
पुरा यथा चोत्सवमेव कुर्य्या-
द्रथान्नयेद्द्वारमुखं प्रभोश्च ।। १९ ।।

रथानां घटनस्थाने यदा तिष्ठति स्यन्दनः।
तदा लक्ष्मीर्नृपं नीत्वा गच्छत्यपि धवान्तिकम् ।। २० ।।
प्रभोर्मुखं समालोक्य भृत्या वन्दापनां तयोः।
कुर्य्युः प्रदक्षिणं कृत्वा गता चान्तर्हिता सती ।। २१ ।।
गता प्रासादके देवीस्थले कुत्र गवाक्षके ।
यावद्द्वारसमीपं च तावद्द्वारं दृढं कृतम् ।। २२ ।।
स्यन्दनानां च सोपानं कृत्वा तत्रावरोहणम् ।
अत्र स्थले तु चैकैकमान्निजमन्दिरम् ।। २३ ।।
आयुधानां वरं चक्रमिति मत्वा कृतं पुरा ।
अग्रे सुदर्शनं नीत्वा बलनीराजनं ततः।। २४ ।।
सीरपाणेः सुभद्रायाः गतोऽप्यन्तरके रमा ।
अररं च दृढं कृत्वा ईश्वरस्य पुरः स्थिता ।। २५ ।।
तदा राजा समालोक्याप्युभयोर्दासवर्गकम् ।
यथा प्रभुस्तथा लक्ष्मीरिति मत्वा च प्रोक्तवान् ।। २६ ।।
तयोर्वन्दापनां कृत्वा मातरं पितरं यथा ।
अवतीर्य्य रथाद्देवमररान्तिकमानयेत् ।। २७ ।।
दासीवर्गान् समाहूय देवी चाज्ञां ददाति हि ।
तत्र गच्छत हे दास्यः तं ब्रूत देवराजकम् ।। २८ ।।
अत्र स्थलेऽस्माकमपि देवी चण्डी स्थिता विभो ।
अस्मिंस्थलेऽपि त्वत्सौख्यं देव नास्ति प्रिया न हि ।। २९ ।।
चन्दनादि सुगन्धं यद्भक्ष्यभोज्यादिकं च यत् ।
इदं विरहिणीस्थानं तत्स्थानं गच्छ हे विभो ।। ३० ।।
देवीवाक्यं नृपः श्रुत्वा सान्त्वनां दत्तवान् तदा ।
द्वारस्योद्घाटनं देवि व्यदधाद् ह्रीसमन्विता ।। ३१ ।।

मन्दिरं गतवान् देवी दक्षिणाभिमुखो यदा ।
वैष्णवा ये स्थिता दैत्यास्तेषां च प्रीतिरागता ।। ३२ ।।
अतो वन्दापनां कुर्य्यात्तेषां च प्रीतिपूर्वकम् ।
सुपर्णस्य समीपे तु तत्र वन्दापनां चरेत् ।। ३३ ।।
एतस्मिन् समये देवि ये पश्यन्ति जनार्द्दनम् ।
तेषां पुनर्भवो नास्ति जीवन्मुक्ताश्च ते नराः।। ३४ ।।
ततो नीत्वा जगन्नाथं द्वारपालान्तिके स्थिताम् ।
लक्ष्मीं दृष्ट्वा तदा राज्ञा चोभयोर्मेलकं कृतम् ।। ३५ ।।
ब्रह्मादयः सुराः सन्तोषितवन्तो हरिप्रियाम् ।
उभयोरंशुकग्रन्थिमुन्मोच्य तु तयोरपि ।। ३६ ।।
तत्र वन्दापनां कुर्य्यात् सिंहासनगते विभौ ।
तत्र वन्दापनां कुर्य्याद् धरां लक्ष्मीं च माधवम् ।। ३७ ।।
संस्थाप्य च बहिर्भूय सोपानं क्षालयेत्ततः।
सायं पूजादिकं यच्च कारयित्वा प्रभोः पुरः।। ३८ ।।
स्थितो राजा पातयित्वा पल्यङ्कादीननुत्तमान् ।
सेवकास्तत्र संस्थाप्य राजा हृष्टेन चेतसा ।। ३९ ।।
गच्छेच्च मन्दिरं तस्य शयीत हृष्टधीस्ततः।
एतद्विधिर्गुण्डिचायास्तवाग्रे कथितः प्रिये ।। ४० ।।
येऽपि शृण्वन्ति सततं लभन्ते गुण्डिचाफलम् ।। ४१ ।।
इमां च यात्रां जगदीशितुश्च
पठन्ति ये वै कथयन्ति नित्यम् ।
ते वै लभन्ते पदमव्ययं तद्
हरेर्निवासं कृतपुण्यकास्ते ।। ४२ ।।

इति श्रीवामदेवसंहितायां गुण्डिचायात्राकथनं नाम सप्तदशोऽध्यायः।।

अष्टादशोऽध्यायः

देवी स्यन्दनयात्रां च श्रुत्वा पुनरभाषत ।
घटनासमये देव चोत्पातो जायते यदा ।। १ ।।
गृध्रादयो वसेयुश्चेन्नृपः कुर्य्याच्च तत्र किम् ।
रथस्येषादिभङ्गे च प्रायश्चित्तं वदस्व माम् ।। २ ।।
देवीवाक्यं ततः श्रुत्वा प्रोवाच प्रहसन् विभुः।। ३ ।।

श्रीवामदेव उवाच

शृणु देवि !प्रवक्ष्यामि रथनिर्माणकालके ।
इन्धने मलमूत्रं चेत्तत्काष्ठं च बहिः क्षिपेत् ।। ४ ।।
रथोपरि वसेद्गृध्रस्तदा शान्तिं समाचरेत् ।
पुनः शृणु वको वाऽपि वसेत्खलु तथैव च ।। ५ ।।
आततायी प्रविशेद्वा प्रायश्चित्तं तथा प्रिये ।
कङ्काः कपोता उलुका प्रविशन्ति यदि प्रिये ।। ६ ।।
तदा शान्तिं प्रकुर्वीत कथयामि तवाग्रतः।
प्रविशन्ति स्यन्दनेषु पुरं नष्टं तदा भवेत् ।। ७ ।।
एतच्छ्रुत्वा पार्वती च पुनः प्राह कृपाकरम् ।
क्रमं कथय देवेश नराणां हितकारणात् ।। ८ ।।
तच्छ्रुत्वा देवदेवोऽपि कारणं वदति स्म सः।। ९ ।।

श्रीवामदेव उवाच

शृणु देवि !प्रवक्ष्यामि शास्त्रदृष्ट्या च यद्भवेत् ।
आदौ सर्वं च सम्पाद्य कुण्डशालां दृढां चरेत् ।। १० ।।
गणपूजां प्रथमतः स्वस्तिवाक्यं ततश्चरेत् ।
संकल्पं च ततः कुर्य्यात् मातृपूजादिकं चरेत् ।। ११ ।।

आचार्य्यवरणं कृत्वा विधेर्वरणमाचरेत् ।
अन्येषां वरणं कुर्य्यात् यथासम्भवमाचरेत् ।। १२ ।।
अस्मिन् स्थलेऽपि चाचार्य्यवरणं प्रथमं स्मृतम् ।
सदस्यादीन् ततःवृत्वा वाराजिवरणं चरेत् ।। १३ ।।
ततस्तु पूजको देवि भूतशुद्ध्यादिकं चरेत् ।
इन्द्रादिलोकपालानां पूजां कृत्वा च मण्डपम् ।। १४ ।।
आगत्य नृहरिं तत्र चोपचारैश्च पूजयेत् ।
वैष्णवाग्निं ततः कृत्वा नृसिंहाग्निमथापि वा ।। १५ ।।
यस्मिन् वारेऽपि चोत्पातस्तद्वारसमिधं चरेत् ।
समिदाज्यचरूणां च होमं कुर्य्याद्विचक्षणः।। १६ ।।
स्थानाधिपतिदेवानां होमं कुर्य्याद्यथाविधि ।
आनुष्टुभेन मन्त्रेण सहस्रं वायुतं हुनेत् ।। १७ ।।
पूर्णाहुतिं ततः कृत्वा शान्तिकर्म समाचरेत् ।
समाप्त्यनन्तरद्रूपं ब्राह्मणाय प्रदापयेत् ।। १८ ।।
पुनः शृणु प्रिये !मत्तः शान्तिकर्म यथाविधि ।
अश्वत्थसमिधामेकमयुतं जुहुयात्ततः।। १९ ।।
कृशरैश्च चरुं कृत्वा सहस्रमयुतं तथा ।
जातवेदसमन्त्रेण ततः संपद्यते शुभम् ।। २० ।।
हेम दद्याच्च विप्राय तत्र दोषोपशान्तये ।
गृध्रादीनां च रूपाणि स्वर्णेन निर्मितानि च ।। २१ ।।
ब्राह्मणाय च देयानि तदा शान्तिर्भवेत् प्रिये ।
प्रभूंश्च गन्धमाल्याद्यैः पूजयित्वा सपूपकैः।। २२ ।।
तानि सर्वाणि विप्रेभ्यः प्रयच्छेच्च यथाविधि ।
एवं यदि नृपः कुर्य्यात् पुत्रपौत्रैश्च संयुतः।। २३ ।।

इहलोके सुखं भुङ्क्त्वाऽप्यन्ते विष्णुपुरं ब्रजेत् ।
भूयो देवी भूतनाथं पप्रच्छ जगदीशितुः।। २३ ।।
पथि याते स्यन्दने च भङ्गोत्पातो यदा भवेत् ।
तदा राजा च किं कुर्य्यात्प्रजानां नाशको यतः।। २४ ।।
ईषादौ भज्यमानेऽपि तेषां शान्तिं वदस्व माम् ।
मृडानीवचनं श्रुत्वा मृडः प्राह प्रसन्नधीः।। २५ ।।

श्रीवामदेव उवाच

रथानां चलने काले पाशादौ भज्यमानके ।
चक्रस्य पतनं चेत्तु सर्वेषां च वदाम्यहम् ।। २६ ।।
ईषभङ्गेऽक्षभङ्गे च तुलाशम्योस्तथैव च ।
क्रमाच्चतुर्ण्णां वर्ण्णानां नाशः स्यान्नात्र संशयः।। २७ ।।
अनावृष्टिर्धुराभङ्गे पीठके तु प्रजाक्षयः।
रथस्य चक्रभङ्गे च परचक्रागमो भवेत् ।। २८ ।।
ध्वजस्य पतने देवि जायतेऽन्यो नृपो ध्रुवम् ।
कलशस्य तु भङ्गेन दुर्भिक्षं प्राणिसंक्षयः।। २९ ।।
शिरोभङ्गे जायमाने पुत्रभ्रातृधनक्षयः।
च्छेदनेऽपि पताकायाःभवेद्वायोरुपप्लवः।। ३० ।।
विभङ्गे तोरणानां च शतॄणां वर्द्धनं महत् ।
पतने नित्यमश्वानामनावृष्टिश्च जायते ।। ३१ ।।
सारथेर्भङ्गमात्रेण सर्वभङ्गो भवेत् प्रिये ।
रथस्य करभङ्गेऽपि प्रजापीडादिकं भवेत् ।। ३२ ।।
प्रतिमा भज्यमाना चेद्राज्ञो मरणमादिशेत् ।
रथे विपर्य्यये देवि सर्वजानपदक्षयः।। ३३ ।।
उत्पाते जायमाने तु चाशुभं भवति ध्रुवम् ।
पूर्वद्वारं पतेद्देवि पूर्वदेशक्षयो भवेत् ।। ३४ ।।

ऐन्द्रीं शान्तिं प्रकुर्वीत शामन्यां दिशि यद्भवेत् ।
दक्षदेशविनाशः स्याद् याम्यशान्तिं ततश्चरेत् ।। ३५ ।।
यद्येवं वरुणद्वारं पतेत्पाश्चात्यनाशनम् ।
वारुणीं शान्तिमाकुर्य्यादुदीच्यां धननाशनम् ।। ३६ ।।
कौवेरीं शान्तिमाकुर्य्यादन्येषां यद्विधिर्भवेत् ।
तच्छृणु त्वं प्रवक्ष्यामि विधिना यत्कृतं प्रिये ।। ३७ ।।
रथस्य पूर्वदिग्भागे सर्वं संपाद्य यत्नतः।
आचार्य्यः सर्वकर्माणि कृत्वा होमं समाचरेत् ।। ३८ ।।
नृसिंहाग्निं समाधाय समिदाज्यादिकैः प्रिये !।
पालाशीभिः समिद्भिश्च सहस्रमयुतं हुनेत् ।। ३९ ।।
आनुष्टुभेन मन्त्रेण दिक्पालेभ्यो बलिं चरेत् ।
शान्तिकर्म ततः कुर्य्यात्तद्वदामि शृणु प्रिये ।। ४० ।।
ब्राह्मणैः सहितः कुर्य्याद्धोमान्ते शान्तिवाचनम् ।
शतरुद्रादिकैर्वामदेवगानं चरेत्पुनः।। ४१ ।।
स्वस्तिर्भवतु विप्रेभ्यः स्वस्ति राज्ञेऽस्तु नित्यदा ।
गोभ्यः स्वस्ति प्रजाभ्यश्च जगतः शान्तिरस्तु वै ।। ४२ ।।
स्वस्त्यस्तु द्विपदे नित्यं शान्तिरस्तु चतुष्पदे ।
शं प्रजाभ्यस्तथैवास्तु शं तथास्तु सदा च नः।। ४३ ।।
शान्तिरस्तु च देवस्य भूर्भुवः स्वः शिवं तथा ।
शान्तिरस्तु शिवं चास्तु सर्वतः स्वस्तिरस्तु नः।। ४४ ।।
त्वं देव जगतःस्रष्टा पोष्टा तु चैवमेव हि ।
प्रजाः पालय देवेश शान्तिं कुरु जगत्पते ।। ४५ ।।
यात्राकरणभूतस्य पुरुषस्य च भूपतेः।
दुष्टान् ग्रहांस्तु विज्ञाय ग्रहशान्तिं समाचरेत् ।। ४६ ।।

ब्राह्मणान् भोजयेद्भूयो दद्याद्दानानि भूरिशः।
एतद्विधौ कृते राज्ये राज्ञि चापि शुभं भवेत् ।। ४७ ।।
प्रजानां च शुभं भूयः श्रुत्वा दुःखविमोचनम् ।
देवी श्रुत्वा हृष्टचित्ता देवेशं पुनरब्रवीत् ।। ४८ ।।
प्रतिमा भज्यमाना चेद् दोषस्तु कथितस्त्वया ।
तस्य शान्तिं वद ब्रह्मन् प्रजानां शान्तिकाम्यया ।। ४९ ।।
स्नानघोषे गम्यमाने विष्णौ च सेवकान्विते ।
अकस्मात्पतनं वाऽपि चाङ्गभङ्गोऽभिजायते ।। ५० ।।
पतेत्किं कर्म कुर्वीत नृपादीनां भयं यतः।
देवीवाक्यं प्रभुः श्रुत्वा कथितुं संयतोऽभवत् ।। ५१ ।।

श्रीवामदेव उवाच

शृणु पार्वति ! देवानां पतने शान्तिकर्म च ।
अङ्गभङ्गे जायमाने अकस्माच्छृणु पार्वति ! ।। ५२ ।।
पतेद्यदि विनाशः स्यान्नृपतेश्च भयं भवेत् ।
पूर्वाशायां पतेद्देवश्चातुर्वर्ण्यं विनश्यति ।। ५३ ।।
तदा शान्तिं प्रकुर्य्याच्च सावधानं च तच्छृणु ।
मोहाद्भ्रमाद्वा गमनेऽप्यङ्गभङ्गो भवेद्यदि ।। ५४ ।।
बाहौ भङ्गे जायमाने तदा च नृपतिक्षयः।
देशो महाभयग्रस्तो भवति भुवनेश्वरि ।। ५५ ।।
कटिर्वा पतिता चेत्तु बृहद्भयमुपस्थितम् ।
तदा गुप्ततमं कुर्य्याद्वस्त्रेणापि पिधापयेत् ।। ५६ ।।
निर्दिष्टं च स्थलं नीत्वा वनयागविधिं चरेत् ।
सहसा दारु चानीय गुप्तेन संयुतं कुरु ।। ५७ ।।
पूर्वदारु यदा तिष्ठेत्तद्दारुनिर्मितं कुरु ।
नवीनं रचयेत्क्षिप्रं न प्रकाश्यं कदाचन ।। ५८ ।।

तद्वत्कुर्य्याच्च विधिना शान्तिकर्मापि तत्क्षणे ।
सिंहासने स्थापयित्वा महास्नानं ततश्चरेत् ।। ५९ ।।
आनुष्टुभेन मन्त्रेण जापयित्वा त्रिलक्षकम् ।
पतनादेकलक्षं तु भङ्गे वापि द्विलक्षकम् ।। ६० ।।
सर्वाङ्गभङ्गे देवस्य त्रिलक्षं जापयेन्मनुम् ।
तद्दशांशेन होमः स्यात्तर्पणादिकमाचरेत् ।। ६१ ।।
एतन्मन्त्रेण होमं च पलाशसमिधादिकैः।
कृत्वा शान्तिं यथाशास्त्रं ब्राह्मणान् भोजयेत्ततः।। ६२ ।।
देव्ये तद्गुप्तकार्य्ये तु पूजकोऽत्र प्रशंस्यते ।
दक्षिणां च ततो दद्याद् गोहिरण्यादिकं ततः।। ६३ ।।
सर्वं कृत्वा प्रयत्नेन यथा देवोऽपि तुष्यति ।
सोऽपि देवः कालरूपी पालनादिं करोति सः।। ६४ ।।
तदा जनानां सर्वेषां मङ्गलानि भवन्ति हि ।
इति श्रुत्वाऽऽह सा गौरी हृष्टचित्ता वृषध्वजम् ।। ६५ ।।
भोगकालेऽपि चत्वारः सप्त वा वद तत्त्वतः।
तच्छ्रुत्वा देवदेवोऽपि जगाद प्रति तां प्रभुः।। ६६ ।।
सप्तसु यदि नास्त्येकः तदा भोगं न कारयेत् ।
ऋषीणां सम्मतेऽप्येवं चतुर्ष्वेको न चेद्यदि ।। ६७ ।।
तदा भोगं न कर्त्तव्यं गुण्डिचामण्डपे प्रिये ।
पश्य चत्वार एवं तु चतुर्द्धा मूर्त्तयो यतः।। ६८ ।।
अतः कारणतो देवि वेदरूपस्य कारणम् ।
चत्वारो यदि गच्छन्ति तत्र तिष्ठति माधवः।। ६९ ।।
यथा शून्यं न च भवेन्न त्यजेच्च कदाचन ।
एकश्चतुर्षु नास्ति चेन्नैवेद्यं तत्र नार्पयेत् ।। ७० ।।

यतो नीलाद्रिनाथाय चतुर्द्धामूर्त्तये नमः।
इत्यादिवाक्यतो देवि बुध्यस्व मम सम्मतम् ।। ७१ ।।
एतत्कथादिकं योऽपि श्रुत्वा विष्णुपुरं ब्रजेत् ।
प्राप्नोतीह सर्वसुखं मनसा यद्यदीप्सितम् ।। ७२ ।।
भूयो देवं महादेवी पप्रच्छ चन्द्रशेखरम् ।
निर्लेपं निर्गुणं ब्रह्म जगन्नाथः प्रशस्यते ।। ७३ ।।
मर्त्त्यानां नाशकृच्चेत्स्यात् तदोत्पातः कथं भवेत् ।
अट्टहासादि स्वेदं च ह्येतदुत्पातलक्षणम् ।। ७४ ।।
मह्यं वद प्राणनाथ कथं शान्तिर्भवेद् विभोः।
अम्बिकावचनं श्रुत्वा प्रहसन् वाक्यमब्रवीत् ।। ७५ ।।

श्रीवामदेव उवाच

सच्चिदानन्दरूपस्य जगन्नाथस्य सुन्दरि ।
उत्पातः तत्स्थले नास्ति जायते चेदकार्य्यकृत् ।। ७६ ।।
वदेद्भक्तजनान् वाक्यं तदा दोषो न हि प्रभोः।
अकस्मात् साट्टहास्यं च तनौ स्वेदोद्गमो यदा ।। ७७ ।।
ग्रीष्मकाले शृणु प्रिये ! न दोषो विदुषां मतम् ।
अन्यकाले यदि भवेत्तत्र दोषोपशान्तये ।। ७८ ।।
देवतानां च प्रासादे पित्र्यादिकर्म यद्भवेत् ।
तदा प्रजानां नाशः स्याद् जायते नरकं भयम् ।। ७९ ।।
पीठे च भज्यमानेऽपि प्रासादः कट्कटायते ।
छत्रभङ्गस्त्रासभङ्गः शिविकाभङ्ग एव च ।। ८० ।।
एते दोषा भवन्तीह शान्तिकर्म वदामि ते ।
अकस्मात्तु पताकानां छेदो भवति चेत्प्रिये ।। ८१ ।।
चक्रभङ्गो यदि भवेद्देवि तत्र महद्भयम् ।
सिंहो पतति वा तस्मात्प्राचीदिग्भङ्ग एव च ।। ८२ ।।

एतत्सर्वं महोत्पातः तदा शान्तिं करिष्यति ।
प्रासादोपरि कङ्को वा वकचिल्लौ कपोतकः।। ८३ ।।
उल्लूकगृध्रौ यदि वोपविशन्त्यवनीक्षयः।
रक्तपिपीलिका वाऽपि भवति चेन्महद्भयम् ।। ८४ ।।
वटवृक्षेऽपि चोत्पातः कूपे वा जननाशकः।
श्रुत्वैतद्वाक्यमाहेदं देवी त्रिपुरसुन्दरी ।। ८५ ।।
एतद्दोषो जायते च्छान्तिकर्म कथं भवेत् ।
आचार्य्यः केन रूपेण कुर्य्याच्च तद्विधिं वद ।। ८६ ।।
को मन्त्रः का समिच्चैव किं दानं कस्य पूजनम् ।
देवस्तद्वचनं श्रुत्वा प्रोवाच पार्वतीं प्रति ।। ८७ ।।

श्रीवामदेव उवाच

शृणु देवि !प्रवक्ष्यामि शान्तिकर्म यथा भवेत् ।
अकस्मात् कम्पते देवस्तदा शान्तिं समाचरेत् ।। ८८ ।।
दूर्वां च समिधं कुर्य्याच्चर्वादिकमतः परम् ।
काण्डात्काण्डादिति मन्त्रमुच्चार्य्य तु सहस्रकम् ।। ८९ ।।
शतमष्टोत्तरं वाऽपि होमं कुर्य्यात्तु पूजकः।
शान्तिपाठं ततः कुर्य्याद्दद्याद्धेनुं सदक्षिणाम् ।। ९० ।।
सर्वरूपी जगन्नाथस्तस्य पूजादिकं चरेत् ।
ब्राह्मणान् भोजयेत् पश्चात्त्वच्छिद्रादिकमाचरेत् ।। ९१ ।।
सन्ति बहूनि कर्माणि संक्षेपेण वदाम्यहम् ।
सर्वं सम्भारमाचार्य्यः सम्पाद्य कर्म चाचरेत् ।। ९२ ।।
वरुणस्यार्च्चनं कृत्वा स्वस्तिवाक्यं ततश्चरेत् ।
संकल्पं च ततः कुर्य्यान्मातृपूजादिकं चरेत् ।। ९३ ।।
द्वारादिवरणं कृत्वा ब्रह्मादिवरणं ततः।
मण्डपादिकमाकुर्य्यान्मध्ये कुण्डं च स्थण्डिलम् ।। ९४ ।।

स्वर्णे वा रौप्यके वाऽपि नरसिंहाकृतिं चरेत् ।
तस्य पूजादिकं कृत्वा नृसिंहाग्निं ततश्चरेत् ।। ९५ ।।
आनुष्टुभेन मन्त्रेण होमं कुर्य्यात् सहस्रकम् ।
शतमष्टोत्तरं वाऽपि ततः पूर्णाहुतिं चरेत् ।। ९६ ।।
शान्तिपाठं ततश्चोक्त्वा शान्तिपाठं शृणु प्रिये !।
ब्राह्मणैः सहितः कुर्य्याद्धोमान्ते शान्तिवाचनम् ।। ९७ ।।
शतरुद्रादिकैर्वामदेवगानं स्मृतं पुनः।
श्रीसूक्तं देवीसूक्तं च पुरुषसूक्तमेव च ।। ९८ ।।
स्वस्तिर्भवतु विप्रेभ्यः स्वस्ति राज्ञेऽस्तु नित्यदा ।
गोभ्यः स्वस्ति प्रजाभ्यश्च जगतः शान्तिरस्तु वै ।। ९९ ।।
स्वस्त्यस्तु द्विपदे नित्यं शान्तिरस्तु चतष्पदे ।
शं प्रजाभ्यस्तथैवास्तु शं तथा चास्तु नः सदा ।। १०० ।।
शान्तिरस्तु च देवस्य भूर्भुवः स्वः शिवं तथा ।
शान्तिरस्तु शिवं चास्तु सर्वतः स्वस्ति चास्तु नः ।। १०१ ।।
त्वं देव जगतःस्रष्टा पोष्टा तु चैवमेव हि ।
प्रजापालनदेवेश शान्तिं कुरु जगत्पते !।। १०२ ।।
पात्राकरणभूतस्य पुरुषस्य च भूपतेः।
दुष्टान् ग्रहांस्तु विज्ञाय ग्रहशान्तिं समाचरेत् ।। १०३ ।।
ब्राह्मणान् भोजयेद्भूयो दद्याद्दानानि भूरिशः।
राजैतद्विधिना कृत्वा ततः शान्तिमवाप्नुयात् ।। १०४ ।।
पुनः शृणु तथा देवि ! चलने जगदीशितुः।
तदा शान्तिं प्रकुर्वाणः केन रूपेण तच्चरेत् ।। १०५ ।।
इमा रुद्राय तपसे मन्त्रमुच्चार्य्य पूजकः।
होमं कुर्य्यात् श्रीफलेन चर्वादिभिरनुत्तमैः।। १०६ ।।

पूर्ववत्कर्म कुर्य्यात्तु ततः शान्तिर्भवेन्नृणाम् ।
वदामि शृणु कान्ते ! त्वं देवदेवस्य रोदने ।। १०७ ।।
दन्तानां कट्कटे शब्दे स्वेदे नृत्ये च यो विधिः।
इमा रुद्राय मन्त्रेणौदुम्बरीं समिधं हुनेत् ।। १०८ ।।
पूर्ववत् कर्म कुर्य्यात्तु ततः शान्तिर्भवेन्नृणाम् ।
रोदने कम्पने नृत्ये स्वेदे च तु यथा भवेत् ।। १०९ ।।
तत्कर्मणि कृतेऽप्यस्मिन् ततः शान्तिर्भवेन्नृणाम् ।
स्वेदे च प्रतिमायास्तु विश्वतश्चक्षुरित्यृचा ।। ११० ।।
अर्कस्य समिधं कुर्य्याद्धोमं कृत्वा सहस्रकम् ।
शतमष्टोत्तरं वाऽपि राज्ञः शान्तिर्भवेत्प्रिये ।। १११ ।।
अथवा शृणु देवि ! त्वमकस्माद्देवकम्पने ।
हसने पतने वाऽपि गर्जनादौ च होमयेत् ।। ११२ ।।
शन्नो देवीति मन्त्रेण शमीसमिधमेव च ।
चरुं कृत्वा यवैर्देवि पूर्ववत्कर्म चाचरेत् ।। ११३ ।।
राज्ञः प्रजानां शान्तिर्वै भवतीह नगात्मजे ।
अथवा शृणु देवि ! त्वं वक्ष्यामि रोदनादिके ।। ११४ ।।
रोदने ज्वलने वाऽपि हसनेऽपक्रमे तथा ।
कोपने पतने स्वेदे वीक्षणे युद्धधूमके ।। ११५ ।।
स्नेहदधिपयोरक्ते निर्निमित्तप्रवर्त्तके ।
व्यङ्गेऽश्रुणि धावनेऽपि पातने रटनेऽपि वा ।। ११६ ।।
प्रायोपवेशने हृष्टे देवानामपि शान्तये ।
पलाशसमिधं कृत्वा चाचार्य्योऽपि विचक्षणः।। ११७ ।।
दधिमध्वाज्यसंयुक्तं यवैश्चापि चरुं चरेत् ।
आनुष्टुभेन मन्त्रेण नृसिंहाग्नौ च होमयेत् ।। ११८ ।।

शान्तिपाठं ततः कृत्वा पूपान्नैर्देवमर्च्चयेत् ।
ब्राह्मणान् भोजयेत् पश्चात्त्वच्छिद्रादिकमाचरेत् ।। ११९ ।।
राजैतद्विधिना कुर्य्यात् ततः शान्तिर्भवेन्नृणाम् ।। १२० ।।

श्रीवामदेव उवाच

प्रासादोपरि कङ्कश्च बकचिल्लौ कपोतकः।
उल्लूकगृध्रौ यदि वा विद्यन्ते तद्भयावहम् ।। १२१ ।।
अश्वत्थसमिधं कृत्वा सहस्रं वा शतेन वा ।
होमयेत्तस्य शान्त्यर्थं जातवेदस इत्यृचा ।। १२२ ।।
आचार्य्यः सर्ववित् कुर्य्यात् शान्तिकर्मसमापनम् ।
ब्राह्मणान् भोजयेत्पश्चात्ततः शान्तिर्भवन्नृणाम् ।। १२३ ।।
गृध्रादयश्चेदथवा विशन्ति मन्दिरोपरि ।
अश्वत्थसमिधं कृत्वा तथा यवचरुं हुनेत् ।। १२४ ।।
मनसः काममात्रेण ततः शान्तिर्भवन्नृणाम् ।
बाहुल्येऽपि च कर्त्तव्यं त्रातारमिन्द्रमित्यृचा ।। १२५ ।।
उदुम्बरस्य समिधं हुनेत् शन्तिर्भवन्नृणाम् ।। १२६ ।।
रुद्रगायत्रीमन्त्रेण प्रासादचलने तथा ।
उदुम्बरस्य समिधं होमं कुर्य्यात् सहस्रकम् ।। १२७ ।।
शतमष्टोत्तरं चैव ततः शान्तिर्भवेन्नृणाम् ।। १२८ ।।
कुक्कुरस्य शृगालस्य खरोष्ट्रयोः प्रवेशने ।
जातवेदस मन्त्रेण हुनेदौदुम्बरीं प्रिये ।। १२९ ।।
पूर्वच्छान्तिकर्माणि कुर्वन्तु पूजकाः सदा ।
नृपाज्ञयाऽपि दक्षास्ते इति शास्त्रविदां मतम् ।। १३० ।।
प्रासादे कट्कटः शब्द आयुधादौ भवेद्यदि ।
ऐन्द्रीं शान्तिं तत्र कुर्य्याद्धोमं त्रातारमित्यृचा ।। १३१ ।।

औदुम्बरस्य समिधा सहस्रं वा शतेन वा ।
प्रासादे चायुधादौ तु पीठे सिंहासनादिके ।। १३२ ।।
एतेषां कट्कटः शब्दो भवेद्यदि विनाशकः।
पूर्ववच्छान्तिकर्माणि कृत्वा शान्तिमवाप्नुयात् ।। १३३ ।।
अकस्मात्पीठभङ्गे च भग्ने सिंहासनेऽपि वा ।
छत्रभङ्गे त्रासभङ्गे शिविकाभङ्ग एव च ।। १३४ ।।
इमं देवेति मनुना पताकाद्वारभङ्गयोः।
पलाशसमिधं कुर्य्याच्चरुं कृत्वा विचक्षणः।। १३५ ।।
पूर्वच्छान्तिकर्माणि कुर्वन्तु पूजकाः प्रिये ।
तदा शान्तिर्मनुष्याणां नागराणां शुभं भवेत् ।। १३६ ।।
अथवा शृणु भो देवि ! चोत्पातःयद्दिने भवेत् ।
तद्दिनाधिपमन्त्रेण तद्ग्रहस्य समिद्भवेत् ।। १३७ ।।
समिदाज्यचरुभिस्तु कृत्वा होमं सहस्रकम् ।
शतमष्टोत्तरं वापि चैतत्तु मुनिभिर्मतम् ।। १३८ ।।
पूवच्छान्तिकर्माणि कृत्वा शान्तिमवाप्नुयात् ।
पूर्वस्यां यदि भङ्गः स्यात् प्राग्दिशि भयमाप्नुयात् ।। १३९ ।।
ऐन्द्रीं शान्तिं तत्र कुर्य्यात्ततः शान्तिर्भवन्नृणाम् ।
आग्नेय्यां यदि भङ्ग स्यादाग्नेयीं शान्तिमाचरेत् ।। १४० ।।
याम्ये चेद् भङ्गमाप्नोति याम्यशान्तिं ततश्चरेत् ।
नैर्ऋते यदि भङ्गः स्यान्नैर्ऋतीं शान्तिमाचरेत् ।। १४१ ।।
पश्चिमे वारुणीं शान्तिं कुर्य्यादाचार्य्यसत्तमः।
वायव्ये वायवीं शान्तिं कुर्य्याद्भुवनशान्तये ।। १४२ ।।
कौवेरीं चोत्तरे कुय्याच्छान्तिं भुवनसुन्दरि।
ऐशानीं शान्तिमैशान्ये कुर्य्याद्देशिकसत्तमः।। १४३ ।।

शान्तिपाठादिकं कुर्य्यादकस्माद्भङ्ग एव चेत् ।
तदा शान्तिं च कुर्य्याद्वै देशोपद्रवनाशिनीम् ।। १४४ ।।
राज्ञः प्रजानां शान्तिश्च भवतीह न संशयः।
अतः कारणतो देवि दिग्देवो बलवत्तरः।। १४५ ।।
पूजां न कुर्य्यात्तु यदा मनुष्याणां शुभं नहि ।
पलाशं केचिदिच्छन्ति केचिदौदुम्बरं तथा ।। १४६ ।।
प्रभूणां पूजनादींश्च कुर्य्यान्नृपतिसत्तमः।
भूयो वदामि देवेशि चक्रादीनां तु यद्भवेत् ।। १४७ ।।
प्रासादचक्रभङ्गे च परचक्रागमो भवेत् ।
ध्वजस्य पतने देवि जायतेऽन्यो नृपस्तदा ।। १४८ ।।
भङ्गे तु कलशस्यापि दुर्भिक्षं प्राणीनां भयम् ।
शिरोभङ्गे यदि गते पुत्रभ्रातृधनक्षयः।। १४९ ।।
पताकाच्छेदने वायुर्वहत्येव तदब्दके ।
एतेषां दोषशान्त्यर्थमाचार्य्यः कर्मविद्बुधः।। १५० ।।
प्रासादपश्चिमे भागे सर्वं सम्पाद्य यत्नतः।
नरसिंहस्य मूर्त्तिं वा कृत्वा लक्ष्मीनृसिंहकाम् ।। १५१ ।।
नृसिंहाग्निं समाधाय समिदाज्यादिकैः प्रिये ।
पालाशीभिः समिद्भिश्च सहस्रमयुतं हुनेत् ।। १५२ ।।
आनुष्टुभेन मन्त्रेण दिक्पालेभ्यो बलिं हरेत् ।
आचार्य्यः सर्वकर्माणि कृत्वा होमं समाचरेत् ।। १५३ ।।
शान्तिकर्मादिकं कृत्वा ततः शान्तिमवाप्नुयात् ।
रक्तादिदर्शनं देवि सिद्धान्ने वा यदा भवेत् ।। १५४ ।।
नृपमन्त्रिविनाशः स्यात्तत्क्षिपेद्दीर्घखातके ।
चन्दनादि सुवेशैश्च बह्वन्नैः पायसादिभिः।। १५५ ।।

देवान् संपूज्य नृपतिः सुस्थितो भवति प्रिये ।
ईश्वरस्यायुधादौ च धूमादिश्चेन्महद्भयम् ।। १५६ ।।
राज्ञः प्रजानां नाशः स्यात् शस्त्रं पञ्चामृतेन च ।
स्नापयेच्चेत्स्वस्थचित्तो भवतीह नृपः प्रिये ।। १५७ ।।

श्रीवामदेव उवाच

अकस्माद्वटवृक्षस्य भङ्गे युद्धं प्रकीर्त्तितम् ।
हसनेऽपि देशभयं रोदने व्याधयो नृणाम् ।। १५८ ।।
जल्पे नृपभयं प्रोक्तं पतने व्याधिरेव च ।
क्षीरस्रावे द्रव्यनाशः शोणितं युद्धकृद्भवेत् ।। १५९ ।।
धूमे च रोगनिर्द्देशः स्नेहे दुर्भिक्षकारणम् ।
सलिले चाप्यनावृष्टिस्तैले मुख्यवधः स्मृतः।। १६० ।।
लाजवस्ते भवेतां चेद्विप्रादीनां वधः स्मृतः।
एते दोषा भवेयुश्चेत्कुर्य्याच्च शिवपूजनम् ।। १६१ ।।
तथा रुद्रजपं कृत्वाऽप्याज्यं पञ्चाक्षरेण च ।
होमं कुर्य्यात्प्रयत्नेन सम्भारश्च यथाविधि ।। १६२ ।।
पूर्वच्छान्तिपाठं च कुर्य्याच्छान्तिर्भवन्नृणाम् ।
अथवाश्रीनृसिंहाग्निं कृत्वाऽप्यानुष्टुभेन च ।। १६३ ।।
होमयेद्वा सहस्रं तु शतमष्टोत्तरं प्रिये ।
एतत्स्थले कालरूपी जगन्नाथस्तु तिष्ठति ।। १६४ ।।
तेषां च पूजने देवि सर्वशान्तिर्भवन्नृणाम् ।
ममालये त्रिशूलादेस्तथैव मन्दिरे तथा ।। १६५ ।।
आवयोर्मन्त्रकैर्होममेवं कुर्य्यात्तु कर्मवित् ।
तदा प्रजानां शान्तिश्च भवतीह वरप्रदे ।। १६६ ।।
रक्तधारा अकस्मात्तु प्रासादे पततीह चेत् ।
घृतं तैलं वसा मांसं पांशुरङ्गार एव च ।। १६७ ।।

एतेऽपीह महद्दोषा भवन्ति प्राणिनाशकाः।
राजोपद्रवमायान्ति मुख्यजनविनाशकाः।। १६८ ।।
प्रभूंश्चापि पूजयित्वा हुनेत् त्रातारमित्यृचा ।
पूर्ववच्छान्तिकर्माणि कुर्य्युश्चाचार्य्यवर्य्यकाः।। १६९ ।।
ततः शान्तिर्भवेद्देवि सर्वेषां सुखिवर्द्धिनी ।
वदामि शृणु देवेशि !यदा रक्तपिपीलिकाः।। १७० ।।
भवन्ति खलु प्रासादे जननाशकराः प्रिये ।
एतत्सकाशाद्राजाऽपि तत्र शान्तिं समाचरेत् ।। १७१ ।।
उदुम्बरस्य समिधं कुर्य्यादाग्नेयमन्त्रकैः।
जहुयात्तिलसर्पिभ्यां ततः शान्तिर्भवेन्नृणाम् ।। १७२ ।।

श्रीवामदेव उवाच

पुनर्वदामि देवेशि कूपस्य विषयं शृणु ।
उत्पातं यदि कूपे स्यान्महद्दोषो भवेत् प्रिये ।। १७३ ।।
जगन्नाथस्य कूपे वाऽप्यकस्माद्धूम एव वा ।
घटो वा प्लवतेऽकस्मादिति पूर्णतरोऽपि वा ।। १७४ ।।
रक्तादिश्च यदि भवेन्महद्दोषस्तदा प्रिये ।
अतः कारणतो राजा कूपस्योत्तरभागके ।। १७५ ।।
मण्डपादिकमाकुर्य्यात्तत्र कर्म समाचरेत् ।
आचार्य्यः पूर्वकर्माणि कृत्वा देवं प्रपूजयेत् ।। १७६ ।।
नारायणस्य देवेशि वरुणस्य प्रपूजनम् ।
उदुम्बरस्य समिधा होमं कुर्य्यात् प्रयत्नतः।। १७७ ।।
उदुत्तमस्य मन्त्रेण सहस्रमयुतं हुनेत् ।
आकलय्यापि समयं सर्वं ज्ञात्वा तथाऽऽचरेत् ।। १७८ ।।
अथानुष्टुभमन्त्रेणाप्याज्यं हुत्वा विचक्षणः।
पूर्णाहुतिं ततः कृत्वा जगन्नाथं प्रपूजयेत् ।। १७९ ।।

पायसान्नैर्बहुविधैर्भोगं कृत्वा प्रदापयेत् ।
ब्राह्मणान् भोजयेत् सुभ्रूर्दद्याच्च दक्षिणादिकम् ।। १८० ।।
जगन्नाथस्तु चेत्तुष्टो जगत्तुष्टं प्रियम्वदे ।
गवि पयस्तिष्ठतीति सर्वे जानन्ति सुन्दरि ।। १८१ ।।
पयो न गवि सर्वत्र स्तनद्वारे प्रकाशते ।
एतत्स्थले जगन्नाथोऽप्येवं तिष्ठति चान्यथा ।। १८२ ।।
सर्वस्थले सर्वहृदि चिद्रूपेण प्रकाशते ।
एवं ज्ञात्वा तत्र राजा शान्तिं तत्र समाचरेत् ।। १८३ ।।
पूर्ववत् शान्तिकर्माणि कृत्वा शान्तिमवाप्नुयात् ।
कुशलोऽपि यदा राजा चोत्पातं यदि पश्यति ।। १८४ ।।
शीघ्रं शान्तिं सोऽपि कुर्य्यात्ततः संपद्यते शुभम् ।
प्रजापीडादिकं सर्वं नश्यति यत्त्वयोदितम् ।। १८५ ।।
तवाग्रे कथितं देवि चोत्पातविधिलक्षणम् ।
अत्र स्थले ये विषयाः चोत्पातादिभयं तु यत् ।। १८६ ।।
त्वरितेनापि कर्माणि विधेयानि वरानने ।
अतः कारणतो देवि संक्षेपेण वदाम्यहम् ।। १८७ ।।
य इदं शृणुयान्नित्यं भयं सर्वं विनश्यति ।
पुनः शृणु प्रिये ! देवि ! देवदेवस्य यत् कथाम् ।। १८८ ।।
अकस्मात्तु देवदेहे वसेयुः क्रूरजातयः।
महान् दोषो भवेद्राष्ट्रे नश्यन्ति क्षत्रियादयः।। १८९ ।।
आतायी वायसोल्लूकौ कपोतो वक एव वा ।
एषामन्योऽपि देवाङ्गे महान् दोषो वसेद्यदि ।। १९० ।।
नकुलश्चोतुस्सरटः पल्ली श्वा खर एव वा ।
शृगालश्चाप्यहिर्देवि तथैव यवनादयः।। १९१ ।।

स्पृशन्ति चेत्तु देवाङ्गं महादोषो भवेद्ध्रुवम् ।
तदा शान्तिं प्रकुर्य्याद्वै महास्नानं तथाचरेत् ।। १९२ ।।
प्राणप्रतिष्ठामन्त्रेण देवस्य हृदि संन्यसेत् ।
वस्त्रालङ्करणाद्यैश्च भूषयेयुः प्रभूंस्तथा ।। १९३ ।।
गन्धपुष्पादिभिर्देवि यजेत्पायसपूपकैः।
स देवः सर्वाभयदस्तस्मिन् तुष्टे जगत्सुखि ।। १९४ ।।
पूजानन्तरतो देवि होमकार्य्यं समाचरेत् ।
पातालस्य नृसिंहस्य मन्त्रेण होमयेत्सुधीः।। १९५ ।।
अयुतं वा सहस्रं वा समयापेक्षयाऽपि वा ।
समिदाज्यचरुभिश्च पालाशी समिदत्र हि ।। १९६ ।।
आनुष्टुभेन मन्त्रेण मूलमन्त्रेण वा हुनेत् ।
ग्रहहोमादिकं तत्र तद्वासरपतिं हुनेत् ।। १९७ ।।
पूर्णाहुतिं ततः कुर्य्याद्राज्ञश्चाप्यभिसेचनम् ।
शान्तिपाठादिकं श्रुत्वा दद्युः सर्वेऽधिकारिणः।। १९८ ।।
स्वर्णदानं बृहच्चैव गोभूदानादिकं तथा ।
सुवर्णदक्षिणां दद्यादाचार्य्याय प्रयत्नतः।। १९९ ।।
अनेन विधिना राजा कृत्वा शान्तिमवाप्नुयात् ।
राष्ट्राणां च प्रजानां च हृष्टिः पुष्टिश्च जायते ।। २०० ।।
नृपतिः सर्वकालेषु आयुरारोग्यमाप्नुयात् ।। २०१ ।।
नीलाद्रिनाथस्य पवित्रगाथां
पठन्ति पुण्यां कथयन्ति ये वै ।
सोऽपीह लोके कुशलं समस्तं
चान्ते लभन्ते हरिधाम नित्यम् ।। २०२ ।।

श्रीमन्नीलगिरिप्रभोः श्रुतिशुभस्यापीह देवस्य तां
दिव्यां सुन्दरमञ्जुलामनुपमामुत्पातगाथां शुभाम् ।
दैत्यारेर्मुरलीधरस्य च विभोर्नानावतारा कृते-
र्ये शृण्वन्ति सदा समस्तविभवं ते प्राप्नुवन्ति ध्रुवम् ।। २०३ ।।

इति श्रीवामदेवसंहितायां श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये नानाविधउत्पातादिविधिकथनो नामाष्टादशोऽध्यायः ।।

एकोनविंशोऽध्यायः

श्रीवामदेव उवाच

शृणोतु भद्रे ! जगदीशितुश्च
यथा भवेद्वा शयनस्य यात्रा ।
आषाढमासे हरिवासरे तां
सिते च पक्षे कृतवान्नरेन्द्रः ।। १ ।।
यदा समाप्ता च तृतीयपूजा
ह्याचार्य्यवर्य्याश्च तदा विशन्ति ।
रक्षन्ति तेऽपि प्रभुसन्निधौ च
ता देवतास्तु क्रमतस्तु देवि ।। २ ।।
हे देवदेव !बलिराजपूज्य !
त्वाज्ञां कुरु त्वं शयनस्य कृत्ये ।
हे देवि !भद्रे ! जगदेकभद्रेऽ-
प्याज्ञां कुरु त्वं शयननिमित्ते ।। ३ ।।
हे देवदेव ! जगदेकभद्र !
सुरेन्द्रपूज्य ! जगदेकवन्द्य !।
आज्ञां कुरु त्वं शयनस्य कार्य्ये
माल्यं समानीय गलेऽपि दद्युः ।। ४ ।।

तासां महास्नानविधानकानि
ते पूजकाः कुर्य्युः शुभप्रदानाम् ।
ततश्च पूजादिकमाचरेयु-
स्ततोऽग्निशर्मा द्वयपीतवस्त्रम् ।। ५ ।।
ददौ च माल्यं हि प्रभोः समीपा-
त्ता आनयेयुः प्रतिमाश्च देवि ।
प्रासादपूर्वे सुदृढं च कुर्य्या-
न्निरोधगेहेऽपि च पूजका हि ।। ६ ।।
तास्तातुनीत्वा दृढपेटिकासु
संरक्षयेयुः कृतपूजनाश्च ।
चतुः समैस्ताश्च विलेपयेयुः
सुगन्धमाल्यैः परिभूषयेयुः ।। ७ ।।
तासां च पूजादिकमाचरेयु-
स्ता पेटिका वै सुदृढं च कुर्य्युः ।
वद्ध्वा कवाटं च ततोऽपि गत्वा
प्रभोः समीपं खलु पूजकाश्च ।। ८ ।।
चतुः समैर्लेपनकानि कुर्य्युः
सुसूक्ष्मवस्त्रैः परिभूषणैश्च ।
तान् भूषयित्वा प्रतिभोगपूजां
कुर्य्युश्च वन्दापनमाचरेयुः ।। ९ ।।
तत्रापि काले मनुजाश्च सर्वे
पश्यन्ति ये वै न पुनर्भवाश्च ।
इहैव लोके सुखमाप्नुवन्ति
चान्ते च वैकुण्ठपदं लभन्ते ।। १० ।।

यदाऽधिमासो भवतीह देवि !
तदा न कार्य्यं त्वधिमासकेऽपि ।
कुर्य्यादिमां श्रावणशुक्लपक्षे
नृपप्रवीरो हरिवासरे च ।। ११ ।।
यात्रा तदा चद् जगदीशितुश्च
क्रोधे भवेद्देवि ! नृपस्य नाशः।
कदापि देवि प्रभवो रथेषु
तिष्ठन्ति चेद्वर्त्मनि तां हि कुर्य्यात् ।। १२ ।।
हे देवदेवि !शयनस्य यात्रां
पश्यन्ति ये वै कथयन्ति नित्यम् ।
ते प्राप्नुवन्तीह पदं मुरारेः
सर्वेप्सितानि प्रभवन्ति तेषाम् ।। १३ ।।
उमा शयनयात्रां वै श्रुत्वा पुनरभाषत ।
कर्कटस्य च संक्रान्तौ कथयस्व विधिं प्रभो ।। १४ ।।
पार्वतीवचनं श्रुत्वा प्रोवाच धूर्जटिस्तदा ।। १५ ।।

श्रीवामदेव उवाच

शृणु देवि ! कुलीरस्य संक्रान्तौ यद्विधिर्भवेत् ।
कथयामि तवाग्रेऽपि राज्ञा येन कृतः प्रिये ।। १६ ।।
तद्दिने कुशली राजा तस्य पूजनमाचरेत् ।
महास्नानं ततः कुर्य्याद्दिव्यवस्त्रैश्च भूषयेत् ।। १७ ।।
अलङ्कारैर्भूषयेच्च ततो मध्याह्नमाचरेत् ।
पीतवस्त्रद्वयं माल्यं दत्त्वा दामनकं तदा ।। १८ ।।
एतद्दत्वाऽप्यग्निशर्मा प्रतिहारी ततो ब्रजेत् ।
नैवेद्यं पाकशालायाश्च्छत्रकाहालसंयुतम् ।। १९ ।।

आनीय तु प्रभोरग्रे सुधौ ते देवसद्मनि ।
पूजाकर्म समारभ्य दीपस्य समये प्रिये ।। २० ।।
छत्रकाहालसंयुक्तं बलिं धृत्वा च पूजकः।
दशदिक्षु बलिं दत्त्वा ततः पूजां समापयेत् ।। २१ ।।
वन्दापनां ततः कुर्य्यात् पूर्ववद्विधिमाचरेत् ।
रथस्य समये देवि संक्रान्तिः पतिता यदि ।। २२ ।।
एतद्रूपेण कुर्य्याच्च बलिं दत्त्वा तु मन्दिरे ।
एतस्मिन्समये देवि ये पश्यन्ति जनार्द्दनम् ।। २३ ।।
सुखानि प्राप्नुवन्तीह चान्ते वैकुण्ठमाप्नुयुः।। २४ ।।

श्रीवामदेव उवाच

पुनस्त्वं शृणु देवेशि ! पार्श्वावृत्तिर्यथा भवेत् ।
भाद्रवस्य सिते पक्षेऽप्येकादश्यां नगात्मजे ।। २५ ।।
सायंकालस्य या पूजा तत्समाप्तेरनन्तरम् ।
महास्नानविधिं कुर्य्याद्भूषणादिकमाचरेत् ।। २६ ।।
नैवेद्यं च ततो दद्याद्देवान् विज्ञाय पूजकाः।
त्रयस्ते शयनागारं विशन्त्युत्फेटनं तदा ।। २७ ।।
पार्श्वावृत्तिं विधेहीश जगतां सुखहेतवे ।
कथयित्वा महास्नानं कुर्य्यात्पूजां ततश्चरेत् ।। २८ ।।
देवान् तत्र तु संस्थाप्य पूर्ववच्च समाचरेत् ।
वन्दापनादि कुर्य्युस्तेऽप्यग्निशर्मादयो द्विजाः।। २९ ।।
अस्मिंश्च काले ये देवि पश्यन्ति भुवनेश्वरम् ।
ते सर्वे मुक्तिमायान्ति जगन्नाथं सुरेश्वरम् ।। ३० ।।

एषा तु यात्रा जगदीशितुश्च
ससारसम्मोहननाशिनी च ।
अस्मिंश्च पश्यन्ति जनार्द्दनं ये
गच्छन्ति वैकुण्ठपदं मुरारेः।। ३१ ।।

इति श्रीवामदेवसंहितायाम् एकोनविंशोऽध्यायः।।

विंशोऽध्यायः

श्रीवामदेव उवाच

भूयः शृणु प्रिये ! देवस्याप्युत्थानं यथा भवेत् ।
ऊर्जमासे शुक्लपक्षे तद्दिने हरिवासरे ।। १ ।।
सायं पूजानन्तरतोऽप्यर्च्चकाः देवसन्निधिम् ।
गच्छेयुः प्रार्थनां कुर्य्युः देवदेव !हलायुध! ।। २ ।।
उत्थापनं देव ! कुरु जगन्मङ्गलहेतवे ।
देवि !सुकेशि !भद्रे ! त्वं निद्रां मुञ्च शुभप्रदे! ।। ३ ।
नीलगोत्राधिप !श्रीमन् !· शिवप्रिय ! नमोऽस्तु ते ।
निद्रां मुञ्च जगन्नाथ ! ह्यपराधं क्षमस्व मे ।। ४ ।।
इति तानपि संप्रार्थ्य ते ततः शुद्धमानसाः।
महास्नानं चरेयुश्च देवानां पूजनानि च ।। ५ ।।
कुर्युरानीय प्रतिमाः पेटिकोत्फेटपूर्वकम् ।
तस्मात्तास्तु समानीय महास्नानं यथाविधि ।। ६ ।।
पूजां कुर्य्युर्यथास्थानं रक्षयेयुर्हिमात्मजे ।
वन्दापनादिकं तस्मिन् काले कुर्य्युश्च भूमिपाः।। ७ ।।

एतस्मिन्समये देवि ये पश्यन्ति जनार्द्दनम् ।
लोकेऽस्मिन् सुखिनस्ते स्युश्चान्ते वैकुण्ठवासिनः।। ८ ।।

श्रीवामदेव उवाच

जगन्नाथप्रावरणं यथा भवति पार्वति !।
शृणु मार्गशुक्लपक्षे पञ्चम्यां कर्म यच्चरेत् ।। ९ ।।
सायं पूजानन्तरतः प्रासादपूर्वदेशके ।
चतुर्द्वारसमायुक्तं मण्डपं तत्र कारयेत् ।। १० ।।
पट्टाधिवासं कुर्य्याच्च त्रिपङ्क्तिकतया न्यसेत् ।
त्रयाणां जगदीशस्य पङ्क्तिमध्ये न्यवेशयेत् ।। ११ ।।
महोत्सवतया रक्षेत्परिधास्येति मन्त्रकैः।
कर्पूरगन्धयुक्तैश्च सेचयेत्तत्र तत्र हि ।। १२ ।।
नरसिंहस्य मन्त्रेण रक्षेत्तु चक्रमुद्रया ।
चतुरर्च्चास्ततः कुर्य्यात्तस्यां षष्ठ्यां नृपोत्तमः।। १३ ।।
कारयित्वा यथान्यायं तच्छृणुष्व नगात्मजे ।
यदि षष्ठ्या भवेद्वृद्धिस्तद्विधिं कथयाम्यहम् । १४ ।।
तिथेर्मले न वै कार्य्यः देवप्रावरणोत्सवः।
प्रातः पूजनकं कार्य्यमरुणोदयकालके ।। १५ ।।
देवाग्रं क्षालनं कृत्वाऽप्यग्निशर्मा ततः परम् ।
आचार्य्यकुलसंभूतावुभावपि धृतांशुकौ ।। १६ ।।
आनीय मण्डपाच्छीघ्रं महोत्सवतया तदा ।
प्रासादभ्रमणं कृत्वा त्रिवारं देवसन्निधौ ।। १७ ।।
तत्र त्रिवारं कृत्वा वै देवाग्रे स्थापयेच्च तत् ।
पूजका वीक्षणं कुर्य्युः दद्युः तच्च यथाविधि ।। १८ ।।
मध्याह्नपूजनं कृत्वा ततो वन्दापनां चरेत् ।
एतत्कालेऽपि ये देवि ! पश्यन्तीह सुखानि च ।। १९ ।।

प्राप्नुयुः पापजालेभ्यो मुक्तास्ते हरिरूपकाः।
भवन्ति विष्णुपदवीं गच्छन्ति विगतज्वराः।। २० ।।

श्रीवामदेव उवाच

शृणु देवि पुष्ययात्रा देवस्य तु यथा भवेत् ।
एकादश्यां तु पौषस्य प्रासादस्येशकोणके ।। २१ ।।
चतुरस्रं चतुर्द्वारं वितानोत्तममण्डितम् ।
मण्डपं रचयेत्तत्र पताकावलिभिर्युतम् ।। २२ ।।
अङ्कुरारोपणं कुर्य्याद्यथाविधितया प्रिये ।
तृतीयार्च्चावसानेऽपि आचार्य्यवरणं चरेत् ।। २३ ।।
ब्रह्मणो वरणं कुर्य्यात्तत्तत्कर्म समाचरेत् ।
चतुर्द्दश्यां ततो विष्णोश्चतुरर्च्चावसानतः।। २४ ।।
मण्डपेऽपि चतुः पंक्तीर्लिखेत्तण्डुलचूर्णकैः।
सौवर्णान् रौप्यकान् कुम्भानथवा ताम्रसम्भवान् ।। २५ ।।
निर्मलोदकसंपूर्णानष्टोत्तरशतं च तान् ।
चन्दनागुरुकर्पूरैर्युतान् पंक्तिषु योजयेत् ।। २६ ।।
पञ्चविंशतिसंख्यातान् त्रिपंक्तिषु च योजयेत् ।
सुदर्शनस्य पङ्क्त्यां च न्यसेद्द्वादशसंख्यकान् ।। २७ ।।
पङ्क्त्यां पङ्क्त्यां घृतैः पूर्णान्न्यसेद्दतुमितांश्च तान् ।
सुदर्शनस्य पङ्क्त्या वै घृतपूर्णं घटत्रयम् ।। २८ ।।
कृत्वा चेत्थं घटानां वाऽप्यष्टोत्तरशतं भवेत् ।
गन्धपुष्पादिकं चैव प्रक्षिपेच्च नगात्मजे ।। २९ ।।
रात्रौ जागरणं कुर्य्याद्रात्रेः पश्चिमयामके ।
ब्रह्माचार्य्यौ च गच्छेतामग्निशर्मा ततः परम् ।। ३० ।।
पञ्चोपचारविधिना होमकर्म समाचरेत् ।
प्रथमं संहुनेद्देवि चाघारस्य चतुष्टयम् ।। ३१ ।।

पुण्याहवाचनं कृत्वा भूरादिकनवाहुतीः।
ब्रह्मविष्णुमहेशानां स्व स्व मन्त्रैश्च वैदिकैः।। ३२ ।।
अष्टोत्तरशतं तावज्जुहुयाच्च पृथक् पृथक् ।
ततश्च मन्त्रराजेन त्रिशतं जुहुयाद् द्विजः।। ३३ ।।
ततः पूर्णाहुतिं कुर्य्याद्ब्रह्मणश्च विसर्जनम् ।
अग्नेर्विसर्जनं कृत्वा दद्यादाचार्य्यदक्षिणाम् ।। ३४ ।।
प्रातः पूजाद्वयस्यान्ते घटानानीय चोत्सवैः।
कलशान् तान् प्रभोरग्रे न्यसेत्पंक्तितया द्विजः।। ३५ ।।
ततोऽर्च्चकः सुरेशं तं षण्मूर्त्या चैकमूर्त्तिकम् ।
भावयित्वा ततो देवि तदग्रे कमलां नयेत् ।। ३६ ।।
गन्धादिना यजेत्तावदुपचारैर्यजेद्धरिम् ।
तज्जलं मन्त्रराजेन संस्कुर्य्यात् प्रार्थनां ततः।। ३७ ।।
जगन्नाथ नमस्तेऽस्तु नीलगोत्राधिप प्रभो ।
दिव्येऽस्मिन् प्रतिबिम्बे त्वां त्वत्कुम्भजलतोऽधुना ।। ३८ ।।
स्नापयामि सुराधीश चापराधं क्षमस्व मे ।
इत्युक्त्वा सेचयेद्देवं जलैः पुरुषसूक्तकैः।। ३९ ।।
श्रीसूक्तेन पावमानी देवीसूक्तेन सेचयेत् ।
सहस्राक्षेण गायत्र्या पठन्नाचार्य्यसत्तमः।। ४० ।।
घृतेन स्नापयेद्देवं मन्दं मन्दं जगत्प्रभुम् ।
सहस्रधाराकलशे ताम्रेण च सुवासितैः।। ४१ ।।
जलैस्तावत् स्नापयेत्तं प्रोञ्छनं च ततः परम् ।
वस्त्रादिकं बहिष्कृत्य चन्दनं लेपयेत्ततः।। ४२ ।।
वस्त्रालङ्कारमाल्यैश्च भूषयेत्परमेश्वरम् ।
छत्रं काहालघण्टादिनादं कुर्य्यात्सुसंयतः।। ४३ ।।

आनीय पाकशालायाश्चारुनैवेद्यकं प्रिये ।
पञ्चपङ्क्तितया रक्षेद्देवाग्रे श्वेतछत्रकम् ।। ४४ ।।
संस्कृत्याऽप्यग्निशर्माऽपि पीतवस्त्रद्वयं तथा ।
माल्यं दामनकं पीतवस्त्रं देवाय दापयेत् ।। ४५ ।।
कुर्य्यान्मध्याह्नपूजां तु चाचार्य्यः पूर्ववद्बलिम् ।
दत्त्वा वाह्येऽर्च्चको ब्रह्माऽप्यग्निशर्मा च ते प्रिये ।। ४६ ।।
वन्दापयेयुः क्रमतो भक्तिभावसमन्विताः।
पुष्याभिषेकं ये वै ते पश्यन्ति भुवि मानवाः।। ४७ ।।
सर्वपापविनिर्मुक्ता विष्णुलोकं व्रजन्ति च ।। ४८ ।।

इति श्रीवामदेवसंहितायां पुष्याभिषेकयात्राकथने विंशोऽध्यायः।।

एकविंशोऽध्यायः

श्रीवामदेव उवाच

प्रिये !शृणु पुनश्च त्वं संक्रान्त्यां मकरस्य च ।
याऽपि लीला भवेद्देवि कथयामि तवाग्रतः।। १ ।।
संक्रान्त्याःमकरस्यापि पूर्वेद्युः केशवस्य च ।
सायं पूजावसानेऽथ नानापुष्पैर्मनोहरैः।। २ ।।
भूषयेत्तं सुरेशं च प्रत्यर्च्चां तत्समीपकम् ।
नीत्वा चतुर्थयजनं कृत्वा ध्यायेच्च तं विभुम् ।। ३ ।।
प्रसीद जगदानन्द जगन्नाथ सुरेश्वर ।
प्रासादभ्रमणार्थं वै चाज्ञापय जगत्प्रिये ।। ४ ।।
इत्युक्त्वाऽङ्गाद्धरेर्माल्यं प्रत्यर्च्चायै समर्पयेत् ।
सिंहासनं वारत्रयं भ्रामयित्वा विमानके ।। ५ ।।

वासयित्वा तु प्रत्यर्च्चां चामरैश्छत्रकाहालैः।
महोत्सवतया तत्र गीतनृत्यादिभिस्तथा ।। ६ ।।
प्रासादं भ्रामयेद् भूयः सर्वोपद्रवशान्तये ।
प्रथमभ्रमणं पश्येन्महापातकनाशनम् ।। ७ ।।
द्वितीयमुपपातघ्नं तृतीये सर्वयज्ञकम् ।
विष्णुप्रीतिश्चतुर्थे स्यादेवं भवति पार्वति ।। ८ ।।
कुर्वन्ति भक्त्या ये मर्त्याः पश्यन्ति च पुनः पुनः।
सर्वे ते सुखमैश्वर्य्यं भुक्त्वा भूमितले प्रिये! ।। ९ ।।
पितॄनुद्धृत्य नरकात्प्रापयन्ति हरेः पदम् ।
जनानां पितरः सर्वे वाञ्छन्ति हि प्रतिक्षणम् ।। १० ।।
एतन्नवाङ्कभ्रमणं के वा पश्यन्ति मत्कुले ।
तत्सकाशाद्वयं सर्वे वसामो विष्णुमन्दिरे ।। ११ ।।
तस्मिन् काले पूर्वभागे मण्डपं रचयेत् शुभम् ।।
विलिखेत् शोभनं पद्मं न्यसेत् सुवर्णपात्रके ।। १२ ।।
तण्डुलांस्तु वाससा चाप्याच्छाद्य चन्दनानि च ।
पातयित्वा चाधिवासं कुर्य्यात् संक्रमणे प्रिये! ।। १३ ।।
प्रातः पूजां समाधाय महास्नानं हरेरपि ।
कुर्य्याद्देहे लेपयेत्तु सुगन्धं चन्दनादिकम् ।। १४ ।।
नवांशुकैरलङ्कारैर्भूषयेत् परमेश्वरम् ।
मध्याह्नकालयजनं कुर्य्यात्पूजकसत्तमः।। १५ ।।
मुखनीराजनान्तं वै ततः स चरुपाचकः।
किञ्चिन्नैवेद्यमागृह्य देवदेवस्य पङ्क्तितः।। १६ ।।
पात्रहोत्रा समं मन्त्री ब्रह्मणा सहितस्तदा ।
पूर्ववत्तु बलिं दद्यात्ततश्च परमेश्वरे ।। १७ ।।

गण्डूषान् जलधारांश्च ताम्बूलं च समर्पयेत् ।
नीराजनं ततः कुर्य्यात्पश्यतां पुण्यवर्द्धनम् ।। १८ ।।
द्वितीयपूजाकर्मान्ते तण्डुलानधिवासितान् ।
शुचिर्भूत्वा ततस्तत्र दुग्धं च शर्करां शुभाम् ।। १९ ।।
शकलं नारिकेलस्य चार्द्रकं क्षुद्रकं बहु ।
दुग्धसारं घृतं देवि ! दिव्यामृतकसंज्ञकम् ।। २० ।।
बहुरम्भाफलं तत्र कर्पूरक्षोदसंचयम् ।
पातयित्वा तण्डुलांस्तानालोड्य च पुनः पुनः ।। २१ ।।
सौवर्णेषु च पात्रेषु स्थापयेदतियत्नतः ।
नवांशुकैस्तदाच्छाद्य चरुहोतार एव ते ।। २२ ।।
आच्छाद्य वाससा वक्त्रं धृत्वा पात्राणि तानि च ।
प्रासादं भ्रामयेयुश्च वारत्रयमनिन्दिते ।। २३ ।।
छत्रचामरघण्टालिकाहालादिध्वनौ सति ।
महोत्सवे जायमाने भ्रामयेत्तच्छनैः शनैः ।। २४ ।।
ततो दधिशर्करां च ताम्बूलं च क्रमात्तदा ।
ताम्बूलस्य व्यतिकरात्तत्सर्वं द्रव्यमुत्तमम् ।। २५ ।।
व्यञ्जनान्नानि दिव्यानि पूपांश्च विविधानपि ।
चतुः संख्याधिकाशीतिप्रकारं विविधं बहुम् ।। २६ ।।
तादृक् नैवेद्यसंघातं पङ्क्त्या पङ्क्त्या नियोजयेत् ।
अग्निशर्मा ततः पीतवस्त्रयुग्मं मनोरमम् ।। २७ ।।
दाम दामनकं दिव्यं चन्दनं च समर्पयेत् ।
तदन्ते विष्णवे दद्यात्ताम्बूलं सुखवर्द्धनम् ।। २८ ।।
आचार्य्योऽप्यग्निशर्मा च ब्रह्मा वन्दापनां चरेत् ।
एतस्मिन् समये देवान् ये पश्यन्ति जनाश्च ते ।। २९ ।।

राजसूयफलं लब्ध्वा ब्रजन्ति हरिमन्दिरम् ।। ३० ।।

श्रीवामदेव उवाच

पार्वति !शृणु वक्ष्यामि दोलाकेलिर्यथा भवेत् ।
यत्र देवो जगन्नाथो दोलायिततरः स्वयम् ।। ३१ ।।
फल्गूत्सवं प्रकुर्वीत पञ्च त्रीणि दिनानि वा ।
फाल्गुनस्य सिते पक्षे दशम्यां च प्रिये विभोः।। ३२ ।।
मध्याह्नार्च्चासमाप्तौ च जगन्नाथं जनार्द्दनम् ।
सुरक्तवस्त्रालङ्कारैर्भूषयेज्जगदीश्वरम् ।। ३३ ।।
गोविन्दाख्यां च प्रतिमां जगन्नाथान्तिके नयेत् ।
पञ्चोपचारविधिना पूजयेदर्च्चकोत्तमः।। ३४ ।।
देवाग्रं क्षालयित्वाऽथ कर्पूरक्षोदसंयुतम् ।
फल्गु चापि समानीय क्रमेणैव विनिक्षिपेत् ।। ३५ ।।
बलं तावदग्निशर्मा भद्रां ब्रह्मापि पूजकः।
जगन्नाथं च चक्रं च माधवं कमलां प्रिये ।। ३६ ।।
विश्वधात्रीं क्रमेणैव फल्गुना च विभूषयेत् ।
शिरसः पादपर्य्यन्तं देवदेवान् नगात्मजे ।। ३७ ।।
फल्गूत्सवानन्तरं च पीतवस्त्रद्वयं तथा ।
माल्यं दामनकं फल्गुपुञ्जं च क्रमतोऽर्पयेत् ।। ३८ ।।
वन्दापनादिकं कृत्वा प्रार्थयेत जनार्द्दनम् ।
आज्ञापय जगन्नाथ गोविन्दं च रमां धराम् ।। ३९ ।।
बहिःफल्गूत्सवार्थं च माल्यमुत्तार्य्य दीयते ।
तस्मादानीय प्रतिमां द्वारपालान्तिकं नयेत् ।। ४० ।।
फल्गूत्सवं तत्र कृत्वा ततो वन्दापनां चरेत् ।
ततो विमाने संन्यस्य महोत्सवतया नयेत् ।। ४१ ।।

अहं तत्र प्रधानश्च यमेश्वर इतीरितः।
मार्कण्डेयनीलकण्ठकपालमोचनादिकैः।। ४२ ।।
सहितो भ्रामयित्वाऽपि प्रासादं तु शनैः शनैः।
महोत्सवतया नीत्वा मरीचान्तिकमुत्तमम् ।। ४३ ।।
फल्गूत्सवं तत्र कृत्वा वसन्तभ्रमणात् प्रिये ।
देवानां शीघ्रगमनं कृत्वाऽथ स्वपदं नयेत् ।। ४४ ।।
त्रयोदशीदिनं चाधिकृत्य भूतदिने यथा ।
राजाग्निं च प्रकुर्वीत यथा भवति तच्छृणु ।। ४५ ।।
दोलामण्डपपूर्वस्यां कुर्य्यात् सामान्यसद्म च ।
अग्निमावाह्य तत्रापि मेषपुङ्गववाहनम् ।। ४६ ।।
अग्निस्थापनकं कुर्य्यादाचार्य्यवरणं ततः।
ब्रह्मणो वरणं कुर्य्यादग्निशर्मा यथाविधि ।। ४७ ।।
कुशाण्डिविधिमाकुर्य्यादाघारावाज्यभागकौ ।
पुण्याहवाचनं कुर्य्यान्मन्त्री भूरादिकं हुनेत् ।। ४८ ।।
अष्टाक्षरस्य मन्त्रेण शतमष्टोत्तरं हुनेत् ।
पूर्णाहुतिं चरेत् तत्र त्वच्छिद्रं तु समाचरेत् ।। ४९ ।।
ततो वन्दापनां कृत्वाऽप्यग्निं दत्त्वा तु सद्मनि ।
आशुःशिशानमन्त्रेण मुनिसंख्यं प्रदक्षिणम् ।। ५० ।।
कृत्वा स्वस्थानके दिव्ये स्थापयेत् प्रतिमाश्च ताः।
दोलमण्डपनिर्माणं कथयाम्यवधारय ।। ५१ ।।
षोडशस्तम्भविस्तीर्ण्णः सुधालेपेन संयुतः।
चारुचामरकीरालिप्रमुखैः कृत्रिमैः खगैः।। ५२ ।।
नारिकेलादिभिर्युक्तं फलैर्मण्डपमाचरेत् ।
रुचिराः तोरणाः कार्य्याः गोविन्दप्रीतिदायिनः।। ५३ ।।

योजयेत्तत्र दोलां तु दिव्यनव्याम्बरैर्युताम् ।
चतुर्द्दशीदिने कृत्वा रात्रेः पश्चिमयामतः।। ५४ ।।
गोविन्दप्रतिमां नीत्वा न्यसेद् देवान्तिके ततः।
ततः परं महाविष्णुं सामान्यविधिनाऽर्च्चयेत् ।। ५५ ।।
लाजाविकारजं दिव्यं नैवेद्यं तत्र दापयेत् ।
पूजावसाने हे देवि ! क्षालयेद्देवतापरः।। ५६ ।।
अर्च्चकः प्राञ्जलिर्भूत्वा प्रार्थयेत जनार्द्दनम् ।
जगन्नाथ नमस्तेऽस्तु नानालीलावतारक ।। ५७ ।।
आज्ञां देहि देवदेव गोविन्दप्रतिमां प्रति ।
रमां च विश्वधात्रीं च दोलाक्रीडनहेतवे ।। ५८ ।।
कथित्वेति च देवाङ्गान्मालामानीय तद्गले ।
न्यसेद्विभावयेज्ज्योतिं भ्रामयेत्सप्तवारकम् ।। ५९ ।।
देवानभिमुखीकृत्य द्वितीयावरणे क्वचित् ।
स्थले संस्थाप्य हे देवि ! तांस्तु भद्रासनोपरि ।। ६० ।।
पञ्चामृतैः स्नापयेच्च श्रीसूक्तेन ततः परम् ।
गन्धतोयेन तान् देवि !प्रोञ्छयेदतियत्नतः।। ६१ ।।
वस्त्रालङ्कारमाल्याद्यैर्भूषयेद्देवताः प्रिये !।
पञ्चोपचारविधिना पूजां कृत्वा मनोरमाम् ।। ६२ ।।
वन्दापनां ततः कुर्य्यादारोप्य ताः विमानके ।
महोत्सवतया देवि !भ्रामयेन्मुनिसंख्यकम् ।। ६३ ।।
महोत्सवेन नीत्वा वै दोलमण्डपसन्निधिम् ।
देवि ! तन्मण्डपस्याधो भ्रामयेत्ताश्च सप्तशः।। ६४ ।।
ऊर्द्ध्ववेदीं समालम्ब्य सप्तशो भ्रामयेत्पुनः।
तदूर्द्ध्ववेद्यां दोलां तां भ्रामयित्वा च सप्त वै ।। ६५ ।।

दोलान्तरेऽपि संरक्षेत् स्थापयेद्दक्षिणामुखम् ।
केतकीच्छत्रयुगलं न्यस्येदुभयपार्श्वयोः।। ६६ ।।
स्थापनानन्तरं देवि बहिष्कुर्य्यात्तु माल्यकम् ।
नानालङ्कारसंयुक्तं कृत्वा प्रक्षालयेत् पुरः।। ६७ ।।
अंशुकावरणं कृत्वा नैवेद्यं च समाचरेत् ।
लाजादीनां विकारोत्थैः सुभव्यं चणकैर्युतम् ।। ६८ ।।
भोगं कुर्य्यादर्च्चकोऽपि चाग्निशर्मा ततः परम् ।
पीतवस्त्रद्वयं दाम दत्त्वा वन्दापनां चरेत् ।। ६९ ।।
पुनर्वारं द्वयं कुर्य्यादेतस्मिन् समये जनाः।
ये तु पश्यन्ति ते सर्वे भुक्त्वा शर्म परं पदम् ।। ७० ।।
गच्छन्ति पुनरावृत्ता न स्युर्देवि !सुरप्रिये !।
प्रातःकाले यथैव स्यात्तथैव भ्रामयेच्च ताः।। ७१ ।।
महोत्सवतया भद्रे प्रासादं प्रति चानयेत् ।
सप्तभ्रमणकं कुर्य्यात्समाप्तिकालके शुभे ।। ७२ ।।
त्रिवेणीं पश्चिमे ध्यायेत् सरस्वत्यां तमर्च्चयेत् ।
सरस्वतीसमीपे तु स्थापयेत् पूजनादिभिः।। ७३ ।।
वन्दापनादिकं कुर्य्यात्पुनर्नीत्वा विमानके ।
प्रभोः समीपे स्थातव्यं हस्तैर्नीत्वा तदन्तिकम् ।। ७४ ।।
अधिकृत्य प्रिये ! देवान् भ्रामयेत्सप्तवारकम् ।
फग्लूत्सवादि सर्वत्र कुर्य्युस्ते पूजकोत्तमाः।। ७५ ।।
रक्षेयुः स्वपदे ताश्च भक्तिभावसमन्विताः।
एषा यात्रा तु देवस्य देवानामपि दुर्ल्लभा ।। ७६ ।।

ये पश्यन्ति जनाः विवेकनिपुणाः श्रीनीलगोत्राधिप-
स्येमं दोलमहोत्सवं च सुखदं चायुः प्रदं मुक्तिदम् ।
ते सर्वेऽखिललोककेऽपि सकलं शर्मापि भुक्त्वा परे
श्रीविष्णोः परमं धाम सततं गच्छन्ति नूनं क्षणात् ।। ७७ ।।

इति श्रीवामदेवसंहितायाम् एकविंशोऽध्यायः ।।

द्वाविंशोऽध्यायः

श्रीवामदेव उवाच

पुनः शृणुष्व हे देवि !यात्रा दमनकस्य च ।
येनैव विधिना राज्ञा कृता यात्रा वदामि ताम् ।। १ ।।
मधुमासे शुक्लपक्षे द्वादश्यां मीनकेतनम् ।
सम्पाद्य हस्तमात्रे तु पट्टे चित्रं मनोहरम् ।। २ ।।
रूपं कृत्वा रक्तवर्णं दक्षपाणौ दधच्छरम् ।
सव्ये धृतधनुं शुभ्रं स्कन्धे तूणीरमेव च ।। ३ ।।
केषां मते श्यामवर्णं दक्षपाणौ दधत् शरम् ।
सव्ये पुष्पधनुः शुभ्रं स्कन्धे तूणीरमेव च ।। ४ ।।
केषां मते गौररूपमिन्द्रपुत्रं मनोहरम् ।
पुष्पं शरं दधानं च सव्ये पुष्पधनुर्धरम् ।। ५ ।।
स्कन्धे तूणीरमेव च यतः सःरक्तवर्णकः ।
विश्वामित्रसकाशात्तु रक्तवर्णमितीर्यते ।। ६ ।।
रजःकर्मसकाशात्तु चात्रैव रक्तवर्णकः ।
इति सकाशाद्धे देवि ! ह्यत्र रूपं सरक्तकम् ।। ७ ।।

सायं पूजावसाने तु कृत्वा पञ्चामृतेन च ।
स्नानं तथा वस्त्रमाल्यैर्भूषयेन्मीनकेतनम् ।। ८ ।।
पट्टाधिवासनं कुर्य्यात् त्रयोदश्यां यथाविधि ।
पञ्चदण्डस्थिते काले निद्राभङ्गं जगत्पतेः ।। ९ ।।
कृत्वाऽऽनीय रामकृष्णाधिवासपट्टकं तथा ।
उभयोर्देवयोरग्रे स्थापयित्वाऽर्च्चको वदेत् ।। १० ।।
नमस्ते बलिनां श्रेष्ठ नमस्ते भक्तवत्सल ।
वसन्तभ्रमणार्थायाहर्त्तुं दमनकोत्करम् ।। ११ ।।
राममाज्ञापय शीघ्रं जगतां च हिताय च ।
देवदेव ! जगन्नाथ ! नानालीलाकर! प्रभो! ।। १२ ।।
हर्त्तुं दमनकवृन्दं कृष्णमाज्ञापय प्रभो! ।
कन्दर्पं तु सर्वपूज्यमाज्ञापय जगत्प्रिय ।। १३ ।।
इति विज्ञाप्य देवांस्तु देवाङ्गान्माल्यमादरात् ।
आनीय रामकृष्णस्य गले दद्यात् पृथक् पृथक् ।। १४ ।।
रक्षेच्च शिविकायां तौ पट्टं तत्र निधाय च ।
महोत्सवतया नीत्वाऽप्यारामं प्रति हे प्रिये! ।। १५ ।।
शम्बरारिं पृथक् रक्षेदग्निशर्मा ततः परम् ।
संकल्पं कारयित्वाऽथ स्वस्तिवाचनपूर्वकम् ।। १६ ।।
भूरादिकं होमयेत्तु नवाहुतीरतः परम् ।
गायत्र्या कामदेवस्याप्यशोककुसुमेन च ।। १७ ।।
सहस्रं होमयेत् पश्चात् पूर्णाहुतिमतः परम् ।
पायसेन कामदेवमग्निशर्माऽपि पूजयेत् ।। १८ ।।
रामकृष्णौ पूजयित्वा ततो वन्दापनां चरेत् ।
अर्च्चकः प्रार्थनां कुर्य्याद्वृक्षे दमनके प्रिये ।। १९ ।।

कामदेवस्य गायत्रीं वदेद्दमनकं हरेत् ।
एकैकं मूलसंयुक्तं न्यस्येत्तं रामकृष्णयोः ।। २० ।।
करे विसृज्य पट्टं तं पात्रहोता च वाससा ।
आच्छादितमुखस्तावदेकविंशतिसंख्यकान् ।। २१ ।।
सप्त-सप्तद्रुमान् दिव्यान् वाससाऽऽच्छादितान् तदा ।
महोत्सवतया चाग्रे पृष्ठतःरामकृष्णयोः ।। २२ ।।
प्रासादं प्रति चानीय स्वस्थाने रामकृष्णकौ ।
रक्षेच्च पूर्वदिग्भागे प्रासादस्य विभूषिते ।। २३ ।।
सैकतेन गृहं कुर्य्यात् स्थापयित्वा च तान् द्रुमान् ।
गन्धपुष्पार्पणं तत्र वस्त्रैराच्छादयेत् प्रिये ।। २४ ।।
कृष्णं रमां विश्वधात्रीं पूजयेच्चन्दनादिना ।
द्रुमौ दामनकौ द्वौ च करस्थौ रामकृष्णयोः ।। २५ ।।
करे धृत्वा प्रार्थयेत तदाचार्य्यः जगत्पतिम् ।
जगन्नाथ जगद्बन्धो नमस्ते पापनाशक ।। २६ ।।
त्रैलोक्यकण्टको यो वै सोऽभूद्दमनकोऽसुरः ।
एतद्गृहाण देवेश ! पुरा तस्मै वरप्रदः ।। २७ ।।
इत्युक्त्वा कृष्णहस्तेऽसौ त्वर्पयेदतिभक्तितः ।
गीतनृत्यैर्निशां नीत्वाऽप्यरुणोदयकालके ।। २८ ।।
चतुर्द्दश्यां तु हे देवि !प्रातर्यजनमाचरेत् ।
महास्नानं ततः कुर्य्याच्चतुः समविलेपनम् ।। २९ ।।
वस्त्रादिभिरलङ्कारैर्मण्डनं कारयेदसौ ।
महोत्सवं विधायाथ भ्रामयित्वा त्रिवारतः ।। ३० ।।
प्रासादं च सुरश्रेष्ठान् प्रापयित्वा तथा प्रिये ।
देवाग्रे स्थापयेच्चासौ देवानां यजनं ततः ।। ३१ ।।

संस्कृत्य देवान् संप्राथ्र्य दच्छिरसि तद्‌द्रुमान् ।
बलभद्रादिदेवेभ्यः क्रमाद्दद्युश्च तेऽर्च्चकाः।। ३२ ।।
ततो मध्याह्नयजनं कृत्वा प्रक्षालयेत् पुरः।
वन्दापयेयुस्ते सर्वे पुनर्दमनकं प्रिये !।। ३३ ।।
शिरसस्तद् बहिष्कृत्य दद्युर्नृपतये मुदा ।
एतत्कालेऽपि ये भक्त्या पश्यन्ति केशवं च ते ।। ३४ ।।
इहलोके महान् भोगान् भुक्त्वाऽप्यन्ते हरेः पदम् ।
गच्छन्ति ये वै खादन्ति धृत्वा दमनकं प्रिये ।। ३५ ।।
सर्वपापविनिर्मुक्तास्तथा रोगविवर्जिताः।
धृत्वा शिरसि ते मर्त्याः सर्वशत्रून् जयन्ति हि ।। ३६ ।।
एतां तु यात्रां जगदीशितुश्च
पश्यन्ति ये ते न पुनर्भवाश्च ।
इहैव लोके सकलार्थसिद्धि-
श्चान्ते लभन्ते पदमीश्वरस्य ।। ३७ ।।

श्रीवामदेव उवाच

वैशाखशुक्लपक्षे च द्वितीयायां तिथौ प्रिये ।
सायंपूजां समाप्याथ प्रासादपूर्वदेशके ।। ३८ ।।
चतुरस्रं मण्डपं च कृत्वा पद्मत्रयं प्रिये ।
कृत्वा भद्रासने स्वर्णे पात्रे वाऽपि सहस्रकम् ।। ३९ ।।
पलं चन्दनकं तत्र पातयेच्चन्द्रसंज्ञकम् ।
कस्तूरिकादिभिर्युक्तं पेषयेत् पाणिना मुहुः।। ४० ।।
जगन्नाथकृते तत्तु सहस्रार्द्धपलं स्मृतम् ।
त्रिशतं बलदेवाय सुभद्रायाः कृते तथा ।। ४१ ।।
एवंरूपेण पात्रेषु न्यसेच्चीनपटांशुकैः।
यत्नादासादयेत्तेषु वीक्षणादिकमाचरेत् ।। ४२ ।।

पातयेत् केतकीपर्णं गन्धद्वारामनुं जपेत् ।
गन्धाधिवासः कर्त्तव्योऽप्यरुणोदयकालके ।। ४३ ।।
प्रातः पूजां ततः कृत्वा ततः पञ्चामृतैः प्रिये ।
महास्नानं ततः कृत्वा नववस्त्रार्पणं चरेत् ।। ४४ ।।
पूजकोऽप्यग्निशर्मा तु विरञ्चिभक्तितत्परः।
छत्रघण्टादिसंराजदुत्सवैश्च मनोहरैः।। ४५ ।।
प्रासादं भ्रामयित्वा तु चन्दनं च त्रिवारतः।
देवान् तथा भ्रामयित्वा देवाग्रे तत्तु संनयेत् ।। ४६ ।।
ततः पञ्चोपचारेण लाजाद्रव्यैश्च पूजयेत् ।
भूतशुद्धिं तु कुर्य्युस्तेऽप्यर्च्चकप्रमुखा द्विजाः।। ४७ ।।
चन्दनं तत्र संस्कुर्युर्वीक्षणप्रोक्षणादिभिः।
प्रार्थयेत बलं देवं चाग्निशर्मा शुभप्रदः।। ४८ ।।
नीलाम्बर नमस्तेऽस्तु तापत्रयनिवारण ।
चन्दनैर्लेपयामि त्वामपराधं क्षमस्व मे ।। ४९ ।।
जगन्नाथ जगद्वन्द्य नमस्ते भवतारक ।
गृहाण चन्दनं दिव्यमपराधं क्षमस्व मे ।। ५० ।।
भद्रे ! देवि ! नमस्तेऽस्तु जगद्धात्रि ! कृपामयि !।
अङ्गीकुरु जगन्मातस्त्वपराधान् क्षमस्व मे ।। ५१ ।।
सुदर्शनादिदेवेषु लेपयेच्चन्दनं पृथक् ।
सूक्ष्मवस्त्रैरलङ्कारैर्भूषयेत्तान्नगात्मजे ।। ५२ ।।
कृष्णं न्यस्येद्धरेः पार्श्वे रामं च हलिपार्श्वके ।
ततो मध्याह्नयजनं कृत्वा वन्दापयेत् क्रमात् ।। ५३ ।।
देवानां भूषणेष्वेवामलकं तत्र दापयेत् ।
प्रार्थयेत च तान् देवान् जलक्रीडार्थमादरात् ।। ५४ ।।

माल्यमादाय रामात्तु स रामाय समर्पयेत् ।
जगन्नाथात्तु यन्माल्यं दद्यात् कृष्णोपरि प्रिये ।। ५५ ।।
लक्ष्म्यै पृथ्वै क्रमाद्दद्यात् प्रार्थयेत पुनश्च तान् ।
आज्ञापयन्तु हे देवा !रथानां घटनेषु च ।। ५६ ।।
वनयागं करिष्यामि गुण्डिचोत्सवकर्मणि ।
विमाने स्थापयेत् कृष्णं रमां पृथ्वीं शुभप्रदाम् ।। ५७ ।।
शिविकायां रामकृष्णौ न्यस्येत् हरिहरादिकैः।
सहितोऽप्युत्सवैस्तत्र प्रासादभ्रमणं चरेत् ।। ५८ ।।
वनयागं पथे कृत्वा सरोवरसमीपकम् ।
नीत्वा नौयुगले तस्मिन् मण्डपं रचयेत्ततः।। ५९ ।।
स्थापयेच्च क्रमाद्देवान् गीतनृत्यमहोत्सवैः।
भ्रामयेदेकवारं च तत्रस्थे जलमण्डपे ।। ६० ।।
तत्र नीत्वा तु प्रतिमाः कुण्डेषु विविधेषु च ।
गन्धपुष्पोदकैः पूर्णेष्वेषु ता वासयेत् पृथक् ।। ६१ ।।
क्वचित्स्थले रामकृष्णौ मां धरां कृष्णरूपकम् ।
एकत्र वासयेद्देवि महेशांश्च क्वचित् स्थले ।। ६२ ।।
वासयद्विहूर्त्तं च ततः प्रोञ्छनमाचरेत् ।
वस्त्रमालार्पणं कृत्वा वन्दापयेच्च सादरम् ।। ६३ ।।
नानाविधैश्चोपहारैर्नैवेद्यं च पृथक् पृथक् ।
दत्त्वा सुभूषणं कुर्य्यात् प्रतिमानां पृथक् पृथक् ।। ६४ ।।
जलयन्त्रमण्डपेऽपि स्थापयेत्ताः क्रमात्पुनः।
तृतीयभ्रमणं कुर्य्याद् गीतनृत्यमहोत्सवैः।। ६५ ।।
भ्रमणानन्तरं देवि ! तस्मादानीय ताः क्रमात् ।
विमाने शिविकायां वा स्थापयेत् सुदृढं यथा ।। ६६ ।।

एतां यात्रां तु ये देवि ! पश्यन्ति विपुलं धनम् ।
प्राप्नुवन्ति च ते नूनमन्ते वैकुण्ठमन्दिरम् ।। ६७ ।।
जलभ्रमणिका यात्रा त्वेकविंशतिघस्रका:।
दिने विंशतिके देवि ! जलभ्रमणिका बहु:।। ६८ ।।
चतुष्कोणे सप्त-सप्त मध्येऽप्येवं नगात्मजे ।
कुर्य्याच्च तद्दिने राजा महोत्सवतया प्रिये ।। ६९ ।।
वारत्रयं पूर्ववत्तु कुर्य्याद्धि चैकविंशके ।
तद्दिनेऽप्येकवारं तु कृत्वा वन्दापनां चरेत् ।। ७० ।।
मार्गे चानीय प्रतिमां गीतनृत्यमहोत्सवै:।
प्रासादमध्ये संरक्षेत् स्वपदेषु हरप्रिये ।। ७१ ।।
एषा यात्रा चन्दनस्य ये तां पश्यन्ति सादरा:।
लभन्ते ते सुखानीति ब्रजन्त्यन्ते हरे: पदम् ।। ७२ ।।
सूर्य्ययात्रां कुरु ब्रह्मन् ! नृपाय प्रतिमाऽगदत् ।
एषा तवाग्रे कथिता पुन: शृणु नगात्मजे !।। ७३ ।।

इति श्रीवामदेवसंहितायां द्वाविंशोऽध्याय:।।

त्रयोविंशोऽध्याय:

एतच्छ्रुत्वा तु शर्वाणी हृष्टेन मनसा तदा ।
केन रूपेण देवस्य उपयात्रा कथं भवेत् ।। १ ।।
श्रुतिस्मृतिस्वरूपो यो भासते नीलकन्दरे ।
जनानामनुरागात्तु तेन सर्वं समाहितम् ।। २ ।।
तस्योपयात्रां कथय संक्षिप्तां हितकारणात् ।
मृडानीवचनं श्रुत्वा जगाद नीललोहित:।। ३ ।।

श्रीवामदेव उवाच

श्रुतिस्मृत्योश्च गहनो जगन्नाथस्तु सर्वशः।
अस्मिंस्थले नीलगिरौ वर्त्तते भुवनेश्वरः।। ४ ।।
पुरा देवि !सती देवी दक्षस्याप्यवमानतः।
देहं तत्याज यज्ञाग्नौ तत्राहं च समागतः।। ५ ।।
तस्मात् कुणपमानीय बभ्राम क्षितिमण्डले ।
पुरुषोत्तमके क्षेत्रे त्वन्नाभिः पतितस्तदा ।। ६ ।।
एकपञ्चाशत्पीठानि भवन्ति क्षितिमण्डले ।
वैतरणीं समासाद्य यावत्तु ऋषिकुल्यका ।। ७ ।।
एतन्नाभिस्थलं विद्याद्यत्र त्वं भैरवी मता ।
भैरवोऽपि जगन्नाथो यत्र तिष्ठति नित्यशः।। ८ ।।
सोऽयं तिष्ठति नीलाद्रौ नानाकारधरः प्रभुः।
श्रुतिस्मृतिभ्यां विहितं यत्कर्म तत्करोति सः।। ९ ।।
जगन्नाथगृहे देवि !सर्वेषां च मतस्थितिः।
किंचित् कृतं स्मृतेर्वाक्यात् किंचिद्राजाधिराजतः।। १० ।।
ब्रह्मणा चोपयात्रा तु कृत्वा च जगदीशितुः।
सहो मासश्चादिभूतो देवदेवः पुराऽवदत् ।। ११ ।।
इति मत्वा देववरश्चकार हितकाम्यया ।
मार्गशीर्षे कृष्णपक्षे पञ्चम्यवधिघस्त्रके ।। १२ ।।
पञ्चमेऽपि दिने कार्य्यं क्षेत्रभ्रमणमाचरेत् ।
प्रातःकृत्यादिकं कृत्वा मार्कण्डेयावटं गतः।। १३ ।।
धौतपादः कृताचामः नरः संकल्पमाचरेत् ।
प्रार्थयेत द्विजस्तीर्थं विष्णुप्रीत्यर्थमेव च ।। १४ ।।
तीर्थोत्तम नमस्तेऽस्तु सर्वपापविनाशन ।
मार्कण्डेयावटे स्नानं करोमि हर किल्विषम् ।। १५ ।।

अततीष्णेति मन्त्रं चोच्चारयेत्संयतो नरः।
नमः शिवाय शान्ताय सर्वपापहराय च ।। १६ ।।
स्नानं करोमि देवेश मम नश्यतु पातकम् ।
इति संप्रार्थ्य च स्नायाद् ह्रदे च निर्मलोदके ।। १७ ।।
सन्ध्यादिकं ततः कुर्य्यान्मार्कण्डेयस्य दर्शनम् ।
मार्कण्डेयह्रदे स्नात्वा दृष्ट्वा देवं तु शङ्करम् ।। १८ ।।
दशानामश्वमेधानां फलं प्राप्नोति मानवः।
ततो मौनं समाधाय प्रासादान्तिकमाविशेत् ।। १९ ।।
पादप्रक्षालनं कृत्वाऽप्यादौ चक्रस्य दर्शनम् ।
चक्रस्य प्रार्थनां कृत्वा विशेच्च हरिमन्दिरम् ।। २० ।।
मुक्तेश्वरं ततः पश्येन्मुक्तेर्मार्गं ददाति सः।
वटमूलं ततो गत्वा ध्यायेच्च वटमुत्तमम् ।। २१ ।।
त्वमेव विष्णुरूपोऽसि वटवृक्ष नमोऽस्तु ते ।
यतोऽक्षयो ब्रह्मलये मम पापं प्रमोचय ।। २२ ।।
वटप्रदक्षिणं कृत्वा गणेशं प्रणमेद्बुधः।
ततो वटेश्वरं नत्वा मङ्गलादर्शनं ततः।। २३ ।।
अनन्तं क्षेत्रपालं च मध्यस्थं मुक्तिमण्डपम् ।
श्रीनृसिंहमादिशक्तिं नत्वा स्तुत्वा पुनः पुनः।। २४ ।।
सरस्वतीं च कमलामैशान्ये चेशमव्ययम् ।
ईशानेश्वर हे देवि ! क्षेत्राधिप ! जगद्गुरो! ।। २५ ।।
अत्र तवाधिकारोऽस्ति देहि मे दर्शनं प्रभो ।
ततस्तार्क्ष्यं तु संपश्येत् स्तुत्वा कृत्वा प्रदक्षिणम् ।। २६ ।।
ततो जयं च विजयं बहु नत्वा ततो ब्रजेत् ।
सिंहासनस्थलं गत्वा भैरवप्रार्थनां चरेत् ।। २७ ।।

हे भैरव ! कालरूप श्रीसिंहासनपार्श्वग ।
उभयोर्दर्शने त्वं हि सावधानो भव प्रभो! ।। २८ ।।
ततः कृत्वा जगन्नाथदर्शनं नरसत्तमः।
जय कृष्ण जगन्नाथ जगदानन्दकारक ।। २९ ।।
रावणारेऽपि कंसारे जय संसारतारक ।
करोमि क्षेत्रभ्रमणं देहि विष्णोः परं पदम् ।। ३० ।।
बलभद्रं ततो नत्वा भक्तिभावसमन्वितः।
जय नीलाम्बर श्रीमन् नमस्ते मुषलायुध ।। ३१ ।।
सीरपाणे जगद्बन्धो मधुघूर्णितलोचन ।
संसारसागरे मग्नं मां समुद्धर सुन्दर ।। ३२ ।।
ततो भद्रादर्शनं च कृत्वा देवि नरोत्तमः।
भद्रे देवि नमस्तुभ्यं सुभद्रे भक्तवत्सले ।। ३३ ।।
अनुज्ञां देहि मे मातः क्षेत्रभ्रमणके शुभे ।
ततः सुदर्शनं नत्वा विष्णुहस्ताङ्गशोभन ।। ३४ ।।
सुदर्शन नमस्तेऽस्तु विष्णोर्मार्गं प्रदर्शय ।
नानाविधैश्च स्तोत्रैश्च प्रणाममाचरेज्जनः।। ३५ ।।
देवदेव जगन्नाथ चानुज्ञां देहि मे प्रभो ।
त्वत्क्षेत्रभ्रमणं देव करोम्याज्ञां कुरु द्रुतम् ।। ३६ ।।
चतुः प्रदक्षिणं कृत्वा न कुर्य्याद्बाहुकम्पनम् ।
ततो गच्छेत्श्वेतगङ्गां स्तुवीत पापशान्तये ।। ३७ ।।
दक्षपार्श्वस्थिते देवि निमज्जामि तवाम्भसि ।
कोटिजन्मार्जितं पापं देवि मे नाशय द्रुतम् ।। ३८ ।।
कुर्य्यात्तु विधिवत् स्नानं माधवौ श्वेतमत्स्यकौ ।
उभौ च दर्शनं कृत्वाऽप्युग्रसेनं च भक्तितः।। ३९ ।।

उग्रसेनमहाबाहो पुरा कृष्णाज्ञया स्थितः।
अत्र रत्नाकरस्यापि स्नाने त्वं संयतो भव ।। ४० ।।
स्तुत्वा नत्वा ततो गच्छेत् कुमुदं वानरेश्वरम् ।
स्तुत्वा प्रदक्षिणं कृत्वा समुद्रस्यान्तिकं ब्रजेत् ।। ४१ ।।
स्वर्गसोपानकं स्पृष्ट्वा पादयोः क्षालनं चरेत् ।
संकल्पं विधिवत् कुर्य्यात् सैकतेन च वेदिकाम् ।। ४२ ।।
कृत्वा चाष्टदलं पद्मं लिखित्वा चतुरस्रकम् ।
कृत्वा चक्राकृतिं तस्योपरि वृत्तं विधाय च ।। ४३ ।।
नारायणं च संपूज्य ह्युपचारैर्मनोहरैः।
प्रार्थयित्वा तदा विष्णुं स्तूयादम्बुनिधिं ततः।। ४४ ।।
पिप्पलादसमुद्भूत सर्वलोकभयङ्कर ।
पाषाणं ते मया दत्तमाहारं परिकल्पय ।। ४५ ।।
जन्मशतसहस्राणां यत्पापं विहितं मया ।
तत्सर्वं विलयं यातु स्नात्वा च लवणाम्भसि ।। ४६ ।।
इत्युक्त्वा परमप्रीतस्त्रिवारं स्नानमाचरेत् ।
तीर्थराजं नमस्कुर्य्यात्ततश्च तर्पणादिकम् ।। ४७ ।।
कृत्वा लोकेश्वरं गच्छेमन्मूर्त्तिस्तत्र सोऽपि हि ।
मद्भक्तो रामचन्द्रस्तु स्थापयामास तं पुरा ।। ४८ ।।
तत्र तद्दर्शनं कुर्य्यात् स्तुत्वा नत्वा पुनर्ब्रजेत् ।
पश्चिमे मङ्गलां दृष्ट्वाऽप्यालम्बायाः समीपके ।। ४९ ।।
तत्र तद्दर्शनं कुर्य्यान्मूषिकं प्रणमेत् तदा ।
ततो गच्छेदिन्द्रद्युम्नसरः प्रत्यतिभक्तितः।। ५० ।।
स्नात्वा च तर्पणं कुर्य्यान्नीलकण्ठस्य दर्शनम् ।
कृत्वा गच्छेत्तु विल्वेशसमीपं तस्य पूजनम् ।। ५१ ।।

कृत्वा ब्रजेच्चक्रतीर्थसमीपं चक्रबिम्बतः।
चक्रतीर्थे नरः स्नात्वा याति वैकुण्ठमन्दिरम् ।। ५२ ।।
ततो गच्छेद्धरिहरसमीपं तस्य दर्शनम् ।
कृत्वा गच्छेत्तु चामुण्डादर्शनार्थं ततो नरः।। ५३ ।।
कपालमोचनं दृष्ट्वा ततो गच्छेत्तु मन्दिरम् ।
देवानां दर्शनं कृत्वाऽप्युपवासादिकं चरेत् ।। ५४ ।।
यस्तु कुर्य्याच्च भ्रमणं क्षेत्रस्य चण्डिके नरः।
सोऽश्वमेधफलं प्राप्य गच्छेदन्ते हरेः पदम् ।। ५५ ।।

श्रीवामदेव उवाच

पुनः शृणु प्रिये ! विष्णोः प्रथमामष्टमीं तथा ।
तत्र यद्विषयो देवि विद्यते कथयामि ते ।। ५६ ।।
उभयव्यापिनी चेत्स्यान्मध्याह्नव्यापिनी यदा ।
उदयां तिथिमारभ्य चेत्यादि पूर्ववाक्यतः।। ५७ ।।
पूर्वविद्धा न कर्त्तव्या परविद्धा हरेरपि ।
इत्यादि वाक्यतो देवि नवमीसंयुता भवेत् ।। ५८ ।।
तद्दिने प्रथमार्च्चान्ते महास्नानविधिं चरेत् ।
चन्दनं लेपयेद्गात्रे नववस्त्रार्पणं चरेत् ।। ५९ ।।
पुष्पादिभिरलङ्कारैर्भूषयेत्कमलाधवम् ।
पुरोदेशे देवतानां कलशान् स्थापयेत्प्रिये ।। ६० ।।
अर्च्चका रचयेयुस्ते वरुणार्च्चनमुत्तमम् ।
मध्याह्नपूजा कर्त्तव्या मूलकैर्व्यञ्जनादिभिः।। ६१ ।।
नानापूपसमूहैश्च कृत्वा नैवेद्यमुत्तमम् ।
अग्निशर्मार्च्चको ब्रह्मा चरेयुर्मङ्गलार्पणम् ।। ६२ ।।
वन्दापयेयुः क्रमतोऽप्येतदुत्सवमादरात् ।
यः पश्येद्भक्तिभावेन मुक्तः स्यात् पापवृन्दतः।। ६३ ।।

अस्मिन्मासे वृश्चिकेऽपि शुभवासरके तिथौ ।
नवान्नमतुलं दद्यान्मध्याह्ने पूपकैः सह ।। ६४ ।।
ततो वन्दापनां कुर्य्युर्द्दर्शनान्मुक्तिभाग् जनः।
शृणु देवि ! पुनर्विष्णोर्दीपोत्सर्गं हि कर्म यत् ।। ६५ ।
भवेन्नराणामूर्जेऽपि देवानां सहमासके ।
अतः सकाशाद्विधिना कृता दीपोत्सवाः प्रिये ।। ६६ ।।

श्रीवामदेव उवाच

कृष्णपक्षे चतुर्द्दश्यां त्रिकालार्च्चावसानतः।
वृक्षं तण्डुलकैः कुर्य्यात्तन्मध्ये गोघृतैर्युतान् ।। ६७ ।।
अष्टाविंशतिसंख्यकान्न्यस्येद् दीपान् त्रिपंक्तितः।
बलस्य नवदीपांश्च सुभद्रायास्तथा नव ।। ६८ ।।
दिक्संख्यकान् जगद्‌बन्धोरन्तः कर्पूरसंयुतान् ।
स्थापयित्वाऽऽसनादिं च कुर्य्याद्देवांस्तुवीत च ।। ६९ ।।
नमस्तेऽस्तु जगन्नाथ जगतां पतये नमः।
तुभ्यं दीपानर्पयामि गृहाण कमलाधव ।। ७० ।।
मुषलायुध देवेश नमस्ते भक्तवत्सल ।
दीपान् गृहाण विश्वेश भद्रायाः प्रार्थनां ततः।। ७१ ।।
भद्रे देवि नमस्तेऽस्तु गृहाण परमेश्वरि ।
दीपानेतान् महादीप्तान् प्रार्थयेरंश्च पूजकाः।। ७२ ।।
देवान् वन्दापयेत्पश्चादेकादशीवदाचरेत् ।
प्रासादोपरि दीपांश्च ज्वालयेच्च क्रमात्तथा ।। ७३ ।।
अमावास्यादिनेऽप्येवं विशेषः प्रतिपत्तिथौ ।
कृष्णं रमां धरां चैव न्यस्येत्तु जगदीशितुः।। ७४ ।।
पुरतः स्थापयेदेता आज्ञामाल्यं गले क्षिपेत् ।
प्रासादे कुत्रचिद्देशे दीपोत्सर्गं ततश्चरेत् ।। ७५ ।।

विमाने प्रतिमाः न्यस्य महोत्सवतया नयेत् ।
मरीचिकाऽन्तिके पूजा कार्य्या पञ्चोपचारतः ।। ७६ ।।
दीपोत्सर्गं ततः कृत्वा भक्त्या वन्दापनां चरेत् ।
प्रासादमध्यं चानीयाप्येकादशीवदाचरेत् ।। ७७ ।।
प्रतिमाः स्वपदे रक्षेदेतत्पश्यति यो नरः।
इहलोके सुखं भुक्त्वा ब्रजेदन्ते हरेः पदम् ।। ७८ ।।

इति श्रीवामदेवसंहितायां त्रयोविंशोऽध्यायः ।।

चतुर्विंशोऽध्यायः

श्रीवामदेव उवाच

पौषे मासि दर्शके वा प्रातःकालार्च्चने प्रिये ।
लाङ्गलीखण्डयुक्तांश्च पूपांश्च वर्त्तुलांश्च हि ।। १ ।।
पूजाकालेऽपि तान् दद्यात्तथा चूताङ्कुरैः सह ।
ततो वन्दापनां कुर्य्याद्ये पश्यन्ति नरोत्तमाः ।। २ ।।
ते गच्छन्ति हरेः स्थानं योगिनामपि दुर्ल्लभम् ।
माघे मासि शुक्लपक्षे पञ्चम्यास्तद्विधिं शृणु ।। ३ ।।
द्वितीयपूजनस्यान्ते रक्तवस्त्रैः सुभूषयेत् ।
नानालङ्कारनिचयैर्भूषयेत्सुरसत्तमान् ।। ४ ।।
नानाविधैश्च नैवेद्यैः पूजां कृत्वा स्तुवीत च ।
पूर्ववत् पीतवस्त्रादिं दत्त्वाऽप्यर्च्चकसत्तमः ।। ५ ।।
पुष्पाञ्जलिं ततो दद्यात् फल्गुं दद्यात्सुभक्तितः ।
जगन्नाथ महाबाहो वसन्तोत्सवहेतवे ।। ६ ।।

नारायणं रमां पृथ्वीमाज्ञापय जगद्गुरो ।
इति संप्रार्थ्य माल्यं च विष्णोरङ्गात्तु चानयेत् ।। ७ ।।
विमाने ताः समारोप्य दृढं कृत्वा महोत्सवैः।
आरामं प्रति नीत्वाऽथ नीलकण्ठसमीपकम् ।। ८ ।।
तत्र पूजादिकं कृत्वा ततो वन्दापनां चरेत् ।
आनीय प्रतिमास्तस्मात् स्वपदे विनिवेशयेत् ।। ९ ।।
एतदुत्सवमानन्दात् ये पश्यन्ति जनार्द्दनम् ।
घोषयात्राफलं तेषां नात्र कार्य्या विचारणा ।। १० ।।

श्रीवामदेव उवाच

पुरा भीमं कुरुक्षेत्रे श्रीकृष्णोऽपि समादिशत् ।
कुरु चैकादशीं प्राज्ञ मुक्तः स्याद्भवबन्धनात् ।। ११ ।।
इत्यादिवाक्यतो देवि बृहदेकादशीसमा ।
माघे मासि शुक्लपक्षेऽप्येकादश्यां नगात्मजे ।। १२ ।।
प्रातः पूजानन्तरतो महास्नानं समाचरेत् ।
गन्धमाल्याद्यलङ्कारैर्भूषयेत्परमेश्वरम् ।। १३ ।।
मध्याह्नपूजनं कृत्वा ततो वन्दापनां चरेत् ।
एतस्मिन् समये देवि !ये पश्यन्ति जनार्द्दनम् ।। १४ ।।
ते सर्वे पापनिर्मुक्ताः सुखसौभाग्यभागिनः।
फाल्गुनेऽपि च कर्त्तव्या मृगया तु हरेरपि ।। १५ ।।
यतो राजाधिराजः स कुर्य्यात् पञ्चदिनानि च ।
चैत्रे मासि शुक्लपक्षेऽप्यष्टम्यां निशि यो विधिः।। १६ ।।
तं वदामि शृणुष्व त्वं या कथा रामजन्मतः।
सायं पूजानन्तरतः कौशल्यायाश्च शान्तये ।। १७ ।।
पर्युषितान्नं पूपं च नानाव्यञ्जनसंयुतम् ।
भोगं कुर्य्याच्चन्दनादिं समाप्य नवमीदिने ।। १८ ।।

प्रथमार्च्चाऽवसानेऽपि महास्नानादिकं चरेत् ।
ततो मध्याह्नयजनं कुर्य्याद्रामस्वरूपकम् ।। १९ ।।
जगन्नाथान्तिके रक्षेत् स्तुवीत परमेश्वरम् ।
देव देव जगन्नाथ रामजन्मोत्सवाय वै ।। २० ।।
आज्ञापय महाबाहो रामप्रतिकृतिं प्रति ।
इति संप्रार्थ्य देवाङ्गान्माल्यमादाय तद्गले ।। २१ ।।
दत्त्वा नयेच्च सहसा निरोधनगृहं प्रति ।
सर्वतोभद्रमालिख्य तत्र तत्पूजनं चरेत् ।। २२ ।।
नानोपहारैर्विविधैस्ततो वन्दापनां चरेत् ।
कृष्णजन्म यथा देवि ! तद्वदरव च जन्म हि ।। २३ ।।
यः कुर्य्याद्रामजननं स तु पापाद्विशुद्ध्यति ।। २४ ।।

श्रीवामदेव उवाच

भूयः शृणुष्व देवस्य नीलशैलाधिपस्य च ।
माधवे सितपक्षे च ह्यष्टम्यां यद्दिने नृपः।। २५ ।।
प्रासादघटनां चक्रे ततस्तु प्रतिवत्सरम् ।
यथा पुष्याभिषेकस्तु तद्वत्तच्च समाचरेत् ।। २६ ।।
सप्तम्यां निशि कुम्भानां जलपूरणकं चरेत् ।
गन्धपुष्पादिकं तेषु प्रक्षिपद् वाससा ततः।। २७ ।।
आच्छादयेच्च क्रमतो वीक्षणादिकमाचरेत् ।
अष्टोत्तरशतं कुम्भानधिवासगृहं नयेत् ।। २८ ।।
अष्टम्यां प्रथमार्च्चान्ते देवाग्रे स्थापयेद् घटान् ।
महास्नानादिकं कुर्य्यात्स्नापयेच्च प्रयत्नतः।। २९ ।।
गन्धवस्त्रादिकैर्देवान् भूषयेच्चातिभक्तितः।
मध्याह्नपूजनं कृत्वा बलिं दद्यात्तु बाह्यतः।। ३० ।।

वन्दापनां ततः कुर्य्याद्रवियात्रासमां प्रिये!।
द्वादश्यां देवि ! देवानां महास्नानादिकं चरेत् ।। ३१ ।।
मध्याह्नपूजनं कुर्य्यात्ततो वन्दापनां चरेत् ।
राधाशुक्लचतुर्दश्यां महास्नानादिकं चरेत् ।। ३२ ।।
सायं पूजानन्तरतो नृसिंहप्रतिमां नयेत् ।
देव देव जगन्नाथ दैत्यान्तक जगत्प्रिय ।। ३३ ।।
नृसिंहजन्मने देव चाज्ञापय सुरेश्वर ।
इत्युक्त्वापि जगन्नाथान्माल्यमानीय तद्गले ।। ३४ ।।
दत्त्वा महोत्सवतया नृसिंहं च निवेशयेत् ।
महास्नानादिकं कुर्य्यात्ततो वन्दापनां चरेत् ।। ३५ ।।
स्थापयेत् स्वपदे तां च तद्दिने जगदीशितुः।
चन्दनस्य च या यात्रा तस्याः किंचित्तु उन्नताः।। ३६ ।।
कृता देवि यथा विष्णोः पुनर्यदुत्सवादिकम् ।
तद्वदामि शृणुष्व त्वं ज्येष्ठेऽपि हरिवासरे ।। ३७ ।।
तद्दिने प्रथमार्च्चान्ते देवदेवं स्तुवीत च ।
देव कृष्ण जगन्नाथ दैत्यनाशकर प्रभो ।। ३८ ।।
वारिलीलारसं भोक्तुमाज्ञापय सुरेश्वर ।
कृष्णं रमां धरां चैवेत्युक्त्वा देहात्तु माल्यकम् ।। ३९ ।।
आनीय तद्गले दद्यान्महोत्सवतया नयेत् ।
जलकुण्डान्तिकं नीत्वा निक्षिपेच्च क्रमात्क्रमात् ।। ४० ।।
गीतनृत्यादिकं कृत्वा ततो वन्दापनां चरेत् ।
स्वपदेषु च तान् रक्षेत् पुनरन्यदिने भवेत् ।। ४१ ।।
दर्शे षष्ठ्यां शुक्लपक्षे तथैव हरिवासरे ।
तद्दिने दोलगोविन्दं धरया सहितं प्रिये ।। ४२ ।।

अर्च्चयेदुत्सवं चैनं यः पश्यति स मुक्तिभाक् ।। ४३ ।।

इति श्रीवामदेवसंहितायां चतुर्विंशोऽध्यायः ।।

पञ्चविंशोऽध्यायः

श्रीवामदेव उवाच

ज्येष्ठे दशम्यां शुक्लायां सायमर्च्चासमापने ।
जगन्नाथान्तिकं नीत्वा कृष्णं स्तुवीत भक्तितः ।। १ ।।
देवदेव जगन्नाथाभिषेकाय कृपां कुरु ।
स्वयम्वरस्तु रुक्मिण्या दूतश्चाप्यागतोऽधुना ।। २ ।।
इति संप्रार्थ्य तं देवं स्थापयेन्नन्दिघोषके ।
राजराजेन्द्रभावेन त्वभिषेकं समाचरेत् ।। ३ ।।
महास्नानादिकं वन्दापनां कृत्वा च रक्षयेत् ।
एकादश्यां प्रथमार्च्चाद्यन्ते कृष्णं च पार्श्वके ।। ४ ।।
संस्थाप्य प्रार्थनां कृत्वा स्थापयेन्नन्दिघोषके ।
या ऋक्मिणी साऽपि लक्ष्मीः तस्यामेतत्समाचरेत् ।। ५ ।।
अयं राजाधिराजः स्याद्विमला तस्य चण्डिका ।
कृष्णं नीत्वा स्थले कुत्र स्थापयित्वा गृहाद्रमाम् ।। ६ ।।
आनीय विमलापार्श्वे कृत्वा देवीप्रपूजनम् ।
ततोऽप्यानीय शिविकासमीपं तत्क्षणे प्रभोः ।। ७ ।।
रमां गृहीत्वा संन्यस्येद्रथोपरि गतो विभुः ।
प्रासादभ्रमणं कृत्वा पुरा यद्वृत्तिमाचरेत् ।। ८ ।।
ततो कृष्णं रमां देवि !स्थापयेत्कुत्रचित्स्थले ।
ततः सायं पूजनस्याप्यन्ते वैवाहिकी कृतिः ।। ९ ।।

यद्वा रूपेण भवति तच्छ्रुणुष्व नगात्मजे ।
आचार्य्यो भूतशुद्ध्यादिं कृत्वा कर्म समाचरेत् ।। १० ।।
वरुणं पूजयित्वा च पुण्याहवाचनं ततः।
पादप्रक्षालनं पश्चाद्वरणं प्रथमं चरेत् ।। ११ ।।
सत्यवाक्यं ततः कृत्वा पुण्याहवाचनं ततः।
अच्छिद्रकरणं चैतद् गर्गं तत्रापि भावयेत् ।। १२ ।।
पुनः कृत्वा वरुणस्य पूजनं च ततः परम् ।
पुण्याहवाचनं कृत्वाऽप्येतदुच्चारयेत्क्रमात् ।। १३ ।।
गन्धादिवासं च ततो बहिः शालां ततो व्रजेत् ।
हरिद्रावासनं चैव मातृपूजां ततश्चरेत् ।। १४ ।।
वसोर्द्धाराभ्युदयिकं कौतुकं सूत्रमापठेत् ।
सप्तसूत्रं सप्तग्रन्थिं पञ्चग्रन्थिं च पञ्च च ।। १५ ।।
कुकर्म चोभयोर्नास्ति षडर्घ्यं च समाचरेत् ।
द्वितीयं वरणं दत्त्वा समञ्जत्वादिमन्त्रकम् ।। १६ ।।
पठित्वाऽप्यग्निमावाह्य चोभयोर्गोत्रपूर्वकम् ।
उच्चारणं तयोः कृत्वा येन रूपेण तद्वदेः।। १७ ।।
महावाक्येऽप्येतदुक्त्वा कात्यायनसगोत्रकः।
कीलकीर्ण्णि ततः पश्चाद्विश्वामित्रपदद्वयम् ।। १८ ।।
यदुरथप्रपौत्रः स्यात् शूरसेनस्य पौत्रकः।
पुत्रस्तु वसुदेवस्य ऋक्मिण्याश्च ततः शुभे ।। १९ ।।
कौण्डिन्यस्य च गोत्रस्य मैत्रावरुणकौ तथा ।
वशिष्ठप्रवरस्यैव तत्पित्रादिकमाचरेत् ।। २० ।।
कौण्डिन्यदेववर्मा च तत्प्रपौत्रीं पुनः पठेत् ।
विदर्भदेववर्मा च तस्य पौत्रीं च भीष्मकः।। २१ ।।

तस्य पुत्रीं त्रिवारं च क्रमादुच्चारयेत्तयोः।
दद्याच्छङ्खजलं चैव गुवाकसहितं तथा ।। २२ ।।
हस्ते वस्त्रस्य च ग्रन्थिं कुशग्रन्थिं विनिर्द्दिशेत् ।। २३ ।।
वेदपाठादिकं कृत्वा मेलनं वरकन्ययोः।
ब्रह्माचार्य्यस्य वरणं कुशाण्डिं च ततश्चरेत् ।। २४ ।।
होमं कृत्वा ततो लाजाकर्म कृत्वा त्रिवारतः।
शिलादिरोहणं कर्म ततः सप्तपदीं चरेत् ।। २५ ।।
कुम्भाभिषेकंमैत्रादिं ततोऽपि ध्रुवदर्शनम् ।
अच्छिद्रकर्मकं कुर्य्याद्देवतानां विसर्जनम् ।। २६ ।।
इति वैवाहिकं कर्म भूयः शृणु वदामि ते ।
नैवेद्यं च ततो दत्त्वा ततो वन्दापनां चरेत् ।। २७ ।।
स्वस्थाने तौ रक्षेतां द्वादश्यां शृणु तद्विधिम् ।
मध्याह्नयजनं कृत्वा जगन्नाथं तु प्रार्थयेत् ।। २८ ।।
कृष्णं रमां च तत्पार्श्वे न्येस्येद्देवं पुनर्वदेत् ।
कृष्ण कृष्ण जगत्पूज्य उभावाज्ञापय प्रभो ।। २९ ।।
विवाहोत्सवकृत्येऽपि माल्यमानीय तद्गले ।
दत्त्वा नीत्वा यमेशस्य निकटं प्रति चानयेत् ।। ३० ।।
नैवेद्यान्तं ततः कृत्वा ततो वन्दापनां चरेत् ।
महोत्सवतयाऽऽनीय स्वपदे तौ च रक्षयेत् ।। ३१ ।।
त्रयोदश्यां शृणु प्रिये !सायं पूजावसानतः।
काष्ठैः सोपानकं कुर्य्याद्रत्नसिंहासनस्य च ।। ३२ ।।
पुनः शृणु त्वं देवस्य या यात्रा तां वदामि ते ।। ३३ ।।

श्रीवामदेव उवाच

यात्रा तु देवस्य च श्रावणेऽपि
यथा भवेत्तच्च शृणुष्व देवि ।
नीलाद्रिनाथस्य कथां पवित्रां
वदामि दर्शेऽपि हि तद्विधिं च ।। ३४ ।।
श्रावणस्य च दर्शेऽपि ह्यरुणोदयकालके ।
नैवेद्यमधिकं दद्यात् प्रातः पूजनकालके ।। ३५ ।।
सुवर्णरचितं दिव्यं नानारत्नसमुज्ज्वलम् ।
तिलकं तु कपालेषु देवानां भिल्लजातयः।। ३६ ।।
तथा विद्यापतेर्वंश्या दद्युः पञ्चामृतेन च ।
वन्दापनां ततः कुर्य्यात् पौर्णम्यां यद्विधिं शृणु ।। ३७ ।।
प्रातः पूजां तद्दिने च कृत्वाऽप्यर्च्चकसत्तमः।
महास्नानादिकं कृत्वा भूषणादिकमाचरेत् ।। ३८ ।।
बलभद्रस्य पुरतः कलशं स्थापयेन्नवम् ।
भद्रासनोपरि त्वेवं पिष्टकैःरचयेत्तदा ।। ३९ ।।
तयोः प्रतिकृतिं कृत्वा षष्ठीमृत्कण्डुपुत्रयोः।
सप्तानां चिरजीविनां कुम्भे यत्प्रतिमादिकम् ।। ४० ।।
एतेषां पूजनं कृत्वा ततो मध्याह्नपूजनम् ।
समाप्य बलभद्रस्य मङ्गलारोपणं चरेत् ।। ४१ ।।
वन्दापनां ततः कुर्य्यादाचार्यो जगदीशितुः।
वन्दापनां तु भद्रायाःब्रह्मा वन्दापनां चरेत् ।। ४२ ।।
दूर्वाक्षतार्पणं कृत्वा न्यस्येच्चक्रं पुरः प्रभोः।
दीनबन्धो कृपासिन्धो चाज़्ञापय सुदर्शनम् ।। ४३ ।।
बलदेवस्य जनने वटादिकप्रदक्षिणे ।
इति कथित्वा देवाङ्गान्माल्यमानीय तद्गले ।। ४४ ।।

दत्त्वा चानीय तं चक्रं स्थापयेत्कुत्रचित् स्थले ।
गन्धपुष्पैरलङ्कारैर्भूषयेत्तु सुदर्शनम् ।। ४५ ।।
दिव्यदोलान्तः संस्थाप्य महोत्सवतया पुनः।
प्रासादभ्रमणं कुर्य्यान्मृकुण्डुतनयं प्रति ।। ४६ ।।
नीत्वा तत्रैव संस्थाप्य बलभद्राकृतिं चरेत् ।
तस्य पूजादिकं कृत्वा ततो वन्दापनां चरेत् ।। ४७ ।।
सुदर्शनस्य पूजां वै कृत्वा वन्दापनां चरेत् ।
देवादीनां तर्पणं च गायत्रीं प्रजपेत्ततः।। ४८ ।।
सुदर्शनं ततो नीत्वा यत्र नारायणो वटः।
तत्समीपं च गत्वा वै चक्रस्य पूजनादिकम् ।। ४९ ।।
कृत्वा दोलान्तरे धृत्वा वटप्रदक्षिणं चरेत् ।
सप्तवारान् तथा तेषां फलं यच्च वदाम्यहम् ।। ५० ।।
ब्रह्महा स्वर्णस्तेयी च सुरापायी गुरोरपि ।
तल्पगः तस्य संसर्गी सर्वयज्ञफलं ब्रजेत् ।। ५१ ।।
एतेषां दुष्कृतं नश्येत् स क्रमाद्विष्णुमन्दिरम् ।
गच्छेद्धरिहरस्यापि समीपे तत्र स्थापयेत् ।। ५२ ।।
पूजां वन्दापनां कृत्वाऽप्यानयेन्मन्दिरं प्रति ।
स्वपदे स्थापयेन्मन्त्री महास्नानं ततश्चरेत् ।। ५३ ।।
सायं पूजादिकं कृत्वा देवानां स्वापनं चरेत् ।। ५४ ।।

श्रीवामदेव उवाच

भाद्रवे कृष्णपक्षे तु पञ्चम्यां यो विधिर्भवेत् ।
तच्छृणुष्वाप्यहं वक्ष्ये प्रातः पूजासमापने ।। ५५ ।।
विद्यापतेश्च कुलजास्तथा विश्वावसोः प्रिये ।
एते गत्वा तु देवानां स्वर्णरेखादिकं द्रुतम् ।। ५६ ।।

दत्त्वा कृत्वा महास्नानं भूषयेत् सुरसत्तमान् ।
कृत्वा मध्याह्नपूजां च ततो वन्दापनां चरेत् ।। ५७ ।।
कृष्णजन्मोत्सवार्थं वै सप्तम्यां यजनं चरेत् ।
सायं पूजानन्तरतो देवकीशान्तये तदा ।। ५८ ।।
नानाविधं च नैवेद्यं क्षालितान्नं च पूपकम् ।
दत्त्वा तत्रापि ह्यष्टम्यां सायंकालेऽपि यद्विधिः।। ५९ ।।
तं शृणुष्वापि कालिन्दीघटनां रचयेत्क्वचित् ।
आचार्य्योऽपि ततो गत्वा सूतिकागृहमुत्तमम् ।। ६० ।।
विशदं मण्डलं कुर्य्यात् सर्वतोभद्रमुत्तमम् ।
तन्मध्ये देवकीगर्भे कृष्णं संचिन्तयेत्तदा ।। ६१ ।।
आदौ कृत्वा तु देवक्याः पूजां कृष्णं ततोऽर्च्चयेत् ।
एतयोः पद्ममध्येऽपि दलाग्रेषु ततोऽर्च्चकः।। ६२ ।।
एतान् संपूजयेद्देवि लक्ष्मीं च वसुदेवकम् ।
यशोदां चैव गर्गं च ह्युग्रसेनं तु रोहिणीम् ।। ६३ ।।
नन्दं च बलदेवं च ह्येतेषां पूजनं क्रमात् ।
ताम्बूलान्तं च गन्धाद्यं कुसुमाञ्जलिमर्पयेत् ।। ६४ ।।
ततः कृत्वा कृष्णजन्म शास्त्रेऽपि लिखितं च यत् ।
कुर्य्याद्दत्वाऽथ गण्डूषं नीत्वाऽप्यन्यस्थलं प्रिये ।। ६५ ।।
पथि द्वापरकर्माणि कृत्वा कुत्र स्थलेऽर्पयेत् ।
नाडीच्छेदनकर्माणि वसोर्द्धारां ततश्चरेत् ।। ६६ ।।
दशकर्म ततः कृत्वा स्नानं शुद्धोदकेन तु ।
कृत्वा जयस्य निकटे दोलायां स्थापयेच्च तम् ।। ६७ ।
जगन्नाथस्य यत्कर्म कृत्वा शयनमाचरेत् ।
प्रातः पूजां नवम्यां तु कृत्वा पञ्चामृतेन च ।। ६८ ।।

महास्नानं तु देवानां भूषणादिकमाचरेत् ।
वर्षवृद्ध्यर्च्चनं कुर्य्यात्ततो मध्याह्नपूजनम् ।। ६९ ।।
कृत्वा मङ्गलकर्माणि ततो वन्दापनां चरेत् ।
भद्रायाः प्रार्थनां कुर्य्याद्दुर्गायाः जन्महेतवे ।। ७० ।।
आज्ञापय जगन्मात इत्युक्त्वाऽऽनीय चाम्बिकाम् ।
कृष्णाग्रेऽपि च संस्थाप्य महास्नानं समाचरेत् ।। ७१ ।।
पूजां कृत्वा नन्दगृहे जन्मसम्भाव्यदेशिकः।
वन्दापनां ततः कृत्वा स्वपदे तां तु रक्षयेत् ।। ७२ ।।
कृष्णजन्मापि कर्त्तव्यं सप्तम्यामर्द्धरात्रके ।
अष्टमी तु यदि भवेत्तदा पूजा विधीयते ।। ७३ ।।
नक्षत्रकार्य्यं न हि देवि ग्राह्यो
बुधस्य सोमस्य च वासरो वा ।
भेदं जयन्त्या न करोति चात्र
तिथिश्च मूलं ह्यसिते गिरौ च ।। ७४ ।।
यदा भवेद्व्यापिनी त्वर्द्धरात्रे
पूर्वा तु ग्राह्या न परा कदाचित् ।
नक्षत्रमूलं हि तु वैष्णवानां
विद्धा नवम्यां खलु देवतानाम् ।। ७५ ।।
एतत्कालेऽपि ये देवि पश्यन्ति भुवनेश्वरम् ।
तेऽपि सर्वे सुखं भुक्त्वा चान्ते वैकुण्ठवासिनः।। ७६ ।।

इति श्रीवामदेवसंहितायां पुरुषोत्तममाहात्म्ये हरगौरीसंवादे पञ्चविंशोऽध्यायः।।

षड्विंशोऽध्यायः

श्रीपार्वत्युवाच

पुनः कथय देवेश विधिना का कृता पुरा ।
उपयात्रा तु देवस्य शृण्वतां पापनाशिनी ।। १ ।।
पार्वत्याःवचनं श्रुत्वा भूयस्तां प्राह भूतराट् ।। २ ।।

श्रीवामदेव उवाच

शृणु देवि ! दक्षपार्श्वे स्थिता दक्षिणकालिका ।
सा देवी पाकशालायां तस्याश्चाप्यधिकारिका ।। ३ ।।
एतस्मात्कारणात्तस्याः कृत्वाऽऽचार्य्यो निमन्त्रणम् ।
भाद्रवस्यासिते पक्षे चतुर्द्दश्यां तृतीयकाम् ।। ४ ।।
पूजां समाप्य देवस्य प्रार्थनां रचयेद्बुधः।
देव त्वत्पाकशालायामस्ति तदधिकारिका ।। ५ ।।
इति कथित्वा देवाङ्गान्माल्यमानीय सत्वरम् ।
धृत्वा महोत्सवैर्गच्छेद्दत्वा तद्गलके प्रिये ।। ६ ।।
विष्णुप्रिये कालरात्रे त्वाज्ञां कुरु जगत्पते ।
पाकशालां समागच्छ दर्शे पूपनिमित्तके ।। ७ ।।
इति पठित्वा तद्देहान्माल्यमानीय देशिकः।
क्वचित्स्थले पाकगृहे बध्नीयात्तु पुनर्विधिम् ।। ८ ।।
शृणुष्व देवि ! दर्शे वा वंशनिर्मितपात्रके ।
दत्त्वा सप्तपूरकानि चोर्द्ध्वेऽधोदेशके तथा ।। ९ ।।
पूपद्वयं सप्त सप्त कृत्वा रम्भादलोपरि ।
स्थापयित्वा ततो नीत्वा जगन्नाथसमीपकम् ।। १० ।।
पूर्ववत् पङ्क्तिमध्येषु रक्षयेयुर्भृगूद्वये ।
नानाविधैश्च पूपैश्चाप्यन्नव्यञ्जनसंयुतैः।। ११ ।।

प्रातः पूजनकं कृत्वा ततो वन्दापनां चरेत् ।
ततो नारायणं देवं समुद्रनिकटं प्रति ।। १२ ।।
एतद्वन्दापनां देवि !ये पश्यन्ति जनार्द्दनम् ।
इहलोके सुखं तेषामन्ते गच्छन्ति तत्पदम् ।। १३ ।।

श्रीवामदेव उवाच

भाद्रवे शुक्लपञ्चम्यां प्रातः पूजावसानतः।
मृकुण्डुतनयस्यापि निकटं कमलां नयेत् ।। १४ ।।
तत्र पूजादिकं कुर्य्यात्ततो वन्दापनां चरेत् ।
लक्ष्मीं स्वपदमानीय शुक्लपक्षेऽष्टमीदिने ।। १५ ।।
प्रथमार्च्चानन्तरतो देवाग्रे कमलां नयेत् ।
तस्यैवाज्ञास्रजं दत्त्वा स्वस्थानं तां समानयेत् ।। १६ ।।
लक्ष्मीव्रतं कारयित्वाऽप्येतत्पक्षदिनात्मकम् ।
रक्षेत्तां स्वपदे देवि ! पुनरेतद्विधिं शृणु ।। १७ ।।
तद्दिने तु द्वितीयस्य पूजान्ते माधवान्तिके ।
सुदर्शनं च संस्थाप्य प्रार्थनां कारयेद् द्विजः।। १८ ।।
देव ! त्वं राजराजोऽसि क्षेत्रस्य परिशीलने ।
आज्ञापय तु चेत्युक्त्वा देवाङ्गात् स्रजमानयेत् ।। १९ ।।
सुदर्शनगले दत्त्वा ततो दोलान्तरं नयेत् ।
यमेश्वरान्तिकं नीत्वा महोत्सवतया प्रिये !।। २० ।।
तत्र पूजादिकं कृत्वा ततो वन्दापनां चरेत् ।
सुदर्शनस्य पूजान्ते ततो हरिहरौ वदेत् ।। २१ ।।
सुदर्शन महाबाहो कथय त्वं विभोः पुरः।
नित्यं तद्भोगसम्भाराद्दशभागःव्ययं गतः।। २२ ।।
अन्येषां पार्षदानां च हेतवे च गतं द्वयम् ।
भागद्वयं सेवकानामतिथीनां द्वयव्ययः।। २३ ।।

एवं सर्वगतं द्रव्यं नावशिष्टं तु किञ्चन ।
इति कथित्वा प्रस्थाप्य स्वयं तत्रैव संस्थितः।। २४ ।।
सुदर्शनं समानीय प्रासादे स्वपदे तथा ।
संस्थाप्य पूर्ववत्पूजां कुर्य्याद् भूयः शृणु प्रिये! ।। २५ ।।
एकादश्यां निशीथे वा पवित्राः सप्तविंशतिः।
अग्निकोणेऽप्यधिवासं कृत्वा तु द्वादशीदिने ।। २६ ।।
मध्याह्नपूजनस्यान्ते वामनस्य च पूजनम् ।
जन्मोत्सवं वामनस्य वर्षवृद्ध्यर्च्चनं चरेत् ।। २७ ।।
ततः शक्रध्वजं न्यस्य प्रासादपूर्वदेशके ।
ध्वजे सप्तपुरं कृत्वाऽप्यूर्द्ध्वे मर्द्दलरूपकम् ।। २८ ।।
पूजयित्वा यथाशास्त्रं रक्षेत्सप्तदिनावधि ।
रात्रिशेषे च तन्नीत्वा पातयेत्पुण्यके जले ।। २९ ।।
कदा वाऽप्यष्टमदिने ये च पश्यन्ति मृत्युगाः।
भवन्ति पौर्णमीदिने सायंकाले विभोरपि ।। ३० ।।
इन्द्रस्यापि च पूजां हि कृत्वा वन्दापनां चरेत् ।
देवं स्वस्थानके रक्षेदाश्विनस्य विधिं शृणु ।। ३१ ।।

श्रीवामदेव उवाच

इषकृष्णेऽपि सप्तम्यां प्रातः पूजावसानतः।
जयदुर्गां समानीय तस्याः कुम्भाभिषेचनम् ।। ३२ ।।
जगन्नाथो राजवर्य्यो यतोऽप्येतस्य कर्मकम् ।
दिनं देव्युत्थापनकं यतस्तत् स्नानमाचरेत् ।। ३३ ।।
पूजां कृत्वा नयेत्स्थानेऽप्यष्टम्यां प्रथमार्च्चनम् ।
कृत्वा दुर्गामाधवं च समानीय प्रपूजयेत् ।। ३४ ।।
तयोर्वन्दापनां कृत्वा देवस्य चण्डिकागृहम् ।
नीत्वा रक्षेत् क्वचिद्देशे विमलापूजनं शुभम् ।। ३५ ।।

कृत्वा त्रिकालपूजान्ते उभावानीय स्वस्थले ।
रक्षेत्तु चावधिर्देवि ह्यष्टदिवसपूर्वकम् ।। ३६ ।।
नवमे बाह्यपूजां च कृत्वा पूजां तृतीयकाम् ।
ततोऽप्यानीय स्वस्थानं संरक्षेत्तु पुनः शृणु ।। ३७ ।।
विमलायां बृहत्पूजां कृत्वा शास्त्रविधिर्यथा ।
दशम्यां प्रथमार्च्चान्ते देवानपि सुभूषयेत् ।। ३८ ।।
मङ्गलारोपणं कृत्वा रामचन्द्रं च कृष्णकम् ।
माधवं जयदुर्गां च नयेद्देवस्य सन्निधौ ।। ३९ ।।
आयुधानि समारक्षेद्देवाङ्गान्माल्यमानयेत् ।
तेषां गलेषु ते दद्युर्यानेषु चोपवेशयेत् ।। ४० ।।
महोत्सवैः समानीय प्रासादभ्रमणं चरेत् ।
मरीचिकासमीपं तु नीत्वा पूजादिकं चरेत् ।। ४१ ।।
ततो वन्दापनां कृत्वा देवान् स्वपदमानयेत् ।
एतस्मिन् समये देवि ! पश्यन्ति ये जनार्द्दनम् ।। ४२ ।।
ते सर्वे सुखमाभुज्य गच्छन्त्यन्ते हरेः पदम् ।
एकादशीदिने देवि ! धूपानन्तरतो विधिम् ।। ४३ ।।
शृणुष्व नारिकेलादिलाजादीनां विकारजैः।
एतैरेव पुनर्भोगं कृत्वा वन्दापनादिकम् ।। ४४ ।।
एवं कृत्वा कार्त्तिकस्य पूर्णमीं प्रति हे प्रिये! ।
आश्विने पूर्णिमायां तु मध्याह्नपूजने सति ।। ४५ ।।
प्रार्थनां देवदेवस्य कुमारोत्सवहेतवे ।
इति दित्वा देवाङ्गान्माल्यमानीय देशिकः।। ४६ ।।
सुदर्शनगले दत्त्वा भूषणादिकमाचरेत् ।
ततोऽप्यानीय सहसा पूर्वद्वारे समाविशेत् ।। ४७ ।।

तत्र वन्दापनां कृत्वा स्वपदे तं च रक्षयेत् ।
नानाविधानि रम्याणि फलानि देशिकोत्तमः।। ४८ ।।
समर्पयेच्च देवेभ्यो द्यूतलीलां समाचरेत् ।
चित्रकपर्द्दिकाभिश्च लक्ष्म्यादींश्च विभावयेत् ।। ४९ ।।
ततो वन्दापनां कृत्वा ततः पूजां समाचरेत् ।
एतल्लीलां तु यः पश्येत् सुखानि प्राप्नुयाद्ध्रुवम् ।। ५० ।।
कार्त्तिके पूर्ण्णिमायां तु चतुर्थार्च्चावसानतः।
दीपं दत्त्वा तु देवाय ततो वन्दापनां चरेत् ।। ५१ ।।
एतद्वन्दापनां ये वै पश्यन्ति क्षेत्रवासजम् ।
फलं ते प्राप्नुवन्तीह गच्छन्त्यन्ते हरेः पदम् ।। ५२ ।।
नीलाद्रिनाथस्य गृहे तु ये वै
पश्यन्ति नानाविधकौतुकानि ।
सर्वेऽपि ते वै सकलार्थसौख्यं
भुक्त्वाऽपि गच्छन्ति पदं मुरारेः।। ५३ ।।

इति श्रीवामदेवसंहितायां षड्विंशोऽध्यायः।।

सप्तविंशोऽध्यायः

पार्वती हृष्टमनसा पप्रच्छ चन्द्रशेखरम् ।
जगन्नाथस्थितिमहं न जानामि वद प्रभो !।। १ ।।
त्वया च कथितं पूर्वं जगन्नाथः परार्द्धके ।
ब्रह्मणो वर्तते देवः केन रूपेण मे वद ।। २ ।।
यच्छ्रुत्वा सर्वपापेभ्यो जनाः मुक्तिमवाप्नुयुः।
चतुर्युगसहस्रेण ब्रह्मणो दिनमुच्यते ।। ३ ।।

ब्रह्मणोऽप्येकदिवसात्पलद्वादशकं गतम् ।
जगन्नाथकथां मह्यं ब्रूहि त्वं भुवनेश्वर!।। ४ ।।

श्रीवामदेव उवाच

शृणु देवि !प्रवक्ष्यामि जगन्नाथस्थितिर्यथा ।
ब्रह्मणोऽप्येकदिवसे मनवस्तु चतुर्द्दश ।। ५ ।।
गताश्चतुर्द्दशेन्द्राश्च तेषां नामानि सुप्रिये !।
शृणु प्रथमतो देवि !स्वायंभुव इति स्मृतः।। ६ ।।
स्वारोचिषोऽप्यौत्तमिश्च तामसो रैवतस्तथा ।
चाक्षुषश्च गतोऽप्यद्य वैवस्वतमनुस्तथा ।। ७ ।।
सूर्य्यसावर्णिकश्चातः दक्षसावर्णिको भवेत् ।
ब्रह्मसावर्णिकश्चैव धर्मसावर्णिकस्तथा ।। ८ ।।
रुद्रसावर्णिकश्चैव उभयोर्नाम यच्छृणु ।
रोचमानस्तथा भौत्यो मनवस्तु चतुर्द्दश ।। ९ ।।
शचीपतिर्दिवश्चित्रः शान्तिः प्रोक्तः शिवो वृतः।
मनोजवस्ततो देवि ! तस्मादपि पुरन्दरः।। १० ।।
शान्तिर्वर्षः क्रतुश्चैव सूत्रामा च दिवस्पतिः।
मरुत्माश्च शुचिश्चैव त्वत्प्रेम्णा कथितं मया ।। ११ ।।
एते चतुर्द्दश प्रोक्ता इन्द्राः स्वः पतयः स्मृताः।
विधेश्चैकदिने देवि ! चानुकल्पाःभवन्ति हि ।। १२ ।।
प्रथमे श्वेतकल्पस्तु ततस्तु नीललोहितः।
वामदेवस्ततः पश्चात्ततो गाथान्तरः स्मृतः।। १३ ।।
रौरवश्चैव प्राणाश्च बृहत्कल्पश्च सुन्दरि ।
कन्दर्पश्चैव सव्यश्च ईशानश्चैव ध्यानकः।। १४ ।।
सारस्वत उदानश्च गरुडः कौर्म एव च ।
पौर्णमासी नारसिंहः समाधिश्चाग्नयस्तथा ।। १५ ।।

विष्णुजश्चैव वंशश्च सोमवंशस्तु भावनः।
वैकुण्ठोऽप्यर्च्चिसश्चैव वल्लीकल्पस्ततः परम् ।। १६ ।।
वैराजो गौरीकल्पश्च तथा माहेश्वरः प्रिये !।
पितृकल्पः कुहूश्चैव एते च ह्यनुकल्पकाः।। १७ ।।
चतुर्द्दश तु मनव इन्द्राश्चैव चतुर्द्दश ।
एते चाप्यनुकप्लाश्च भवन्ति ब्रह्मणो दिने ।। १८ ।।
इन्द्रद्युम्नं पुरा विष्णुः प्राह तत्कथितं शृणु ।
अनेन दारुवपुषा स्थास्याम्यत्र परार्द्धकम् ।। १९ ।।
मनोः स्वायम्भुवस्याद्य कृते च प्रथमे युगे ।
ज्यैष्ठ्यामहं चावतीर्णः स पुण्यो जन्मवासरः।। २० ।।
पुनः प्राह स राजानं रवियात्रां कुरु नृप !।
कथयित्वा गतो मौनं राजा सर्वं चकार सः।। २१ ।।
स्वायम्भुवाच्चाक्षुषस्य पर्य्यन्तं च वदाम्यहम् ।
वैवस्वतो नाम मनुरधुना भवति प्रिये! ।। २२ ।।
श्वेतवाराहकल्पे तु विधेराद्यपरार्द्धकम् ।
गतं देवि विधेरद्य द्वितीये तु परार्द्धके ।। २३ ।।
अधुनाऽपि गता देवि तस्माद्द्वादशदण्डकाः।
वैवस्वतो मनुरद्य जानीहि लोकसुन्दरि ।। २४ ।
एतस्मिन् जगदीशस्य स्थितिं च कथयाम्यहम् ।
विद्यापतिर्यदा यातस्तदा च नीलमाधवः।। २५ ।।
गतोऽपि चेन्द्रद्युम्नश्च राजा बभूव तत्र वै ।
जगन्नाथस्थितिं कृत्वाऽप्यन्ते च ब्रह्मणः स्थलम् ।। २६ ।।
गतो देवि तवाग्रेऽपि कथयामि हि तत्कथाम् ।
स्वायम्भुवं समारभ्य यावच्च चाक्षुषो मनुः।। २७ ।।

तास्ताः समाः गताः देवि तद्वदामि तवाग्रतः।
कथं मन्वन्तरं दिव्ययुगानामेकसप्ततिः।। २८ ।।
एकस्मिंस्तु मनौ कान्ते याः समाः कथयामि ताः।
सत्यं त्रेता द्वापरश्च कलिश्चापि चतुर्युगम् ।। २९ ।।
सत्यादीनां मानुषकैर्वत्सरैर्मानमुच्यते ।
ह्यष्टाविंशसहस्राणि सप्तदशकलक्षकम् ।। ३० ।।
सहस्राणि षण्णव च मार्त्तण्डलक्षमेव च ।
चतुःषष्टिः सहस्राणि वसुलक्षमिति स्मृतम् ।। ३१ ।।
द्वात्रिंशच्च सहस्राणि तथैव वेदलक्षकम् ।
एतच्चतुर्युगस्यापि मेलने चैकमेव हि ।। ३२ ।।
चतुर्युगानां मेलनं चेत्तद्धि भवति कृतम् ।
संख्यानां च स्वरूपं हि वदामि च त्वदग्रतः।। ३३ ।।
तस्माद् बुध्यस्व भो सुभ्रूः चैतं च गणनक्रमम् ।
एकं दश शतं चैव सहस्रमयुतं तथा ।। ३४ ।।
लक्षं नियुतं कोटिश्च ह्यर्बुदं वृन्दखर्वकम् ।
निखर्वश्च तथा शङ्खः पद्मश्चापि ततः परम् ।। ३५ ।।
जलधिश्चान्त्यमध्यं च परार्द्धं दिग्गुणोत्तरम् ।
एतत्प्रयुज्यते देवि गणने सततं जनैः।। ३६ ।।
विंशतिश्च सहस्राणि त्रिचतुर्लक्षमेव च ।
तस्मिन्नेकसप्ततिश्च गुणिते भवति प्रिये! ।। ३७ ।।
विंशतिश्च सहस्राणि सप्तषष्टिकलक्षकम् ।
त्रिंशच्च कोटयश्चैव वर्षैरेभिश्च मानुषैः।। ३८ ।।
मन्वन्तरं समाख्यातं कथितं च तवाग्रतः।
षण्मनूनां मेलनं चेदेतद्भवति पार्वति! ।। ३९ ।।

विंशतिश्च सहस्राणि लक्षत्रयमितीरितम् ।
चतस्रः कोटयश्चैवार्बुदमष्टादश प्रिये! ।। ४० ।।
एतत्संख्यकवर्षाणि गतानि च नगात्मजे! ।
यथागताश्चानुकल्पास्तेषां तु यद्गताः प्रिये! ।। ४१ ।।
तद्वदामि शृणुष्व त्वं श्वेतकल्पादुदानकम् ।
एतेषामेव पर्य्यन्तं त्वनुकल्पाः त्रयोदश ।। ४२ ।।
विंशतिश्च सहस्राणि तृतीयमयुतं तथा ।
षड्लक्षं सप्तनियुतं चैककोटिः पुनः शृणु ।। ४३ ।।
सप्तदशमर्बुदं च यद्गतं कथितं मया ।
आदौ स्वायम्भुवो देवि ततः स्वारोचिषस्तथा ।। ४४ ।।
औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ।
मनवस्तु गता ह्येते चाद्य वैवस्वतो मनुः।। ४५ ।।
त्वत्प्रश्नात् कथिता चैषा जगन्नाथस्थितिः प्रिये ।
एते कालाः गता देवि ! जगन्नाथस्य तिष्ठतः।। ४६ ।।
एतन्मनूनां मध्येऽपि चाभूद्रामजनिस्तथा ।
कृष्णजन्म प्रादुरभूत् पाण्डवानां तथैव च ।। ४७ ।।
नीलमाधवकाले च कति रामाः गताः प्रिये !।
एको रामः समायातो रोहिण्यां तस्य मुद्रिकाम् ।। ४८ ।।
पतितां तां समाहर्त्तुं प्रवृत्तं वायसोऽवदत् ।
हास्यं कृत्वाऽपि हे देव !बहुरामस्रुमुद्रिकाः।। ४९ ।।
पतिता रोहिणीकुण्डेऽप्यानीय तास्तु पश्य च ।
दर्शनानन्तरं गच्छ देवानां कार्य्यकं कुरु ।। ५० ।।
रावणादीन्नाशयित्वा पुनश्चोत्तरकोशलाम् ।
गच्छ पुनश्च वैकुण्ठं गच्छ देव !यथेच्छया ।। ५१ ।।

इति श्रुत्वाऽपि स रामस्त्यक्त्वा तु हस्तमुद्रिकाम् ।
देवकार्य्यं ततः कृत्वाऽप्येकाम्रं च समागतः।। ५२ ।।
तन्नाम्ना मम लिङ्गं च स्थापयित्वा गतो विभुः।
जगन्नाथस्थलं देवि ! ह्यनादि तत्सनातनम् ।। ५३ ।।
तत्स्थितिश्च त्वदग्रेऽपि मया च कथिता प्रिये !।। ५४ ।।
नीलाद्रिनाथस्य स्थितिस्तूदग्रे
मया च प्रेम्णा कथिता हि सुभ्रूः।
शृणोति वा यः पठतीह नित्यं
मनोरथं मोक्षपदं लभेत ।। ५५ ।।

इति श्रीवामदेवसंहितायां जगन्नाथस्थितिनिर्णयो नाम सप्तविंशोऽध्यायः।।

अष्टाविंशोऽध्यायः

पुरुषोत्तमके क्षेत्रे समुद्रस्तीर्थतां गतः।
मत्तः शृणु चाप्यलभ्यं योगं यत्राप्यनन्तकम् ।। १ ।।
तत्र स्नात्वाऽपि ये मर्त्याश्चान्ते वैकुण्ठवासिनः।
आदौ भवेन्महाज्यैष्ठीत्यादि सर्वं वदामि ते ।। २ ।।

श्रीवामदेव उवाच

शृणुष्वादौ देविवरे महाज्यैष्ठ्यास्तु लक्षणम् ।
गुरुरैन्द्रे तथा चन्द्रः प्राजापत्यगते रवौ ।। ३ ।।
पौर्णमासी गुरौ ज्येष्ठा महाज्यैष्ठीति सा स्मृता ।
महाज्येष्ठ्यां तु यो गच्छेत् क्षेत्रं श्रीपुरुषोत्तमम् ।। ४ ।।

ब्रजेत् पदानि यावन्ति क्रतुतुल्यानि तानि तु ।
तत्र गत्वा हरेर्धाम्नि दृष्ट्वा श्रीपुरुषोत्तमम् ।। ५ ।।
विश्रम्य विधिवत् स्नायात्प्रतितीर्थं च वै क्रमात् ।। ६ ।।
पुनः पापनाशिनीति योगं तं शृणु पार्वति !।
फाल्गुनस्य सिते पक्षे कुम्भस्थे दिवसाधिपे ।। ७ ।।
बृहस्पतौ मत्स्यगते पुष्यर्क्षे गुरुवासरे ।
एकादशी यदि भवेत्तदा सा पापनाशिनी ।। ८ ।।
एतद्योगेऽपि ये यान्ति क्षेत्रं श्रीपुरुषोत्तमम् ।
आदावपि जगन्नाथदर्शनं तत्क्षणे द्विजाः।। ९ ।।
कृतवन्तोऽपि गच्छेयुः समुद्रस्य तटं प्रति ।
जगन्नाथं पूजयित्वा यथावत्स्नानमाप्नुयुः।। १० ।।
स्नानमन्त्रं प्रार्थनायां यथा शृणु नगात्मजे ।
पापनाशिनीयोगेऽहं त्वत्तीर्थे लवणोदके ।। ११ ।।
स्नानं करोमि देवेश सर्वं पापं विनाशय ।
पुरुषोत्तम पापघ्न सर्वतीर्थमय प्रभो! ।। १२ ।।
स्नानात्सर्वाणि पापानि नाशमायान्तु हे विभो !।
एतद्योगे क्षेत्रवरे स्नानं दानं जपस्तथा ।। १३ ।।
होमपूजादिकं सर्वं यद्यत्कर्म करोति च ।
उपोष्य दिनमेकं तु जागरेण निशां नयेत् ।। १४ ।।
एतत्सकाशाद्ये पूज्ये सर्वे विगतकल्मषाः।
गोविन्दद्वादशीयोगं कथयामि शृणु प्रिये !।। १५ ।।
फाल्गुनस्यामले पक्षे कुम्भस्थे दिवसाधिपे ।
जीवे धनुषि योगे च शोभने रविवासरे ।। १६ ।।
पुष्यर्क्षे यदि सम्पूर्णे गोविन्दद्वादशी स्मृता ।
गोविन्दद्वादशीं प्राप्य गच्छेच्छ्रीपुरुषोत्तमम् ।। १७ ।।

व्रतमायुज्य तत्रैव विष्णुसायुज्यमाप्नुयात् ।
महाज्येष्ठ्यां दशगुणं फलं प्राप्नोति मानवः।। १८ ।।
स्नानमन्त्रं प्रार्थनां च वदामि शृणु पार्वति !।
गोविन्दद्वादशीयोगे लवणाब्धेर्जलेऽमले ।। १९ ।।
स्नानं करोमि गोविन्द मम नश्यतु पातकम् ।। २० ।।
(प्रार्थना) गोविन्द परमानन्द मुकुन्द लवणाम्बुधौ ।
गोविन्दद्वादशीयोगे मम पापानि नाशय ।। २१ ।।
तवाग्रे कथयामीशे महतीयोगलक्षणम् ।
वृश्चिकस्थो यदा भानुर्वृश्चिकस्थो यदा शशी ।। २२ ।।
अमा वै सोमवारे च महती सा प्रकीर्त्तिता ।
भगवन् शङ्खचक्राब्जगदाधर जनार्द्दन ।। २३ ।।
स्नानं करोमि देवेश महत्यां लवणाम्भसि ।
महतीयोगमात्रेण क्षेत्रे श्रीपुरुषोत्तमे ।। २४ ।।
कोटिजन्मार्जितं पापं महती दहति क्षणात् ।
उदधेरप्यमावास्याविधिं शृणु वदामि ते ।। २५ ।।
मार्गे मासि सिनीवाल्यां सागरे यत्र कुत्रचित् ।
स्नात्वाऽश्वमेधावभृथस्नानस्य लभते फलम् ।। २६ ।।
सोमवारे विशेषेण साऽप्यक्षय्यफला कुहूः।
महाज्यैष्ठ्यां तु यत्पुण्यमस्यामेव हि तत्समम् ।। २७ ।।

श्रीवामदेव उवाच

अर्द्धोदयाख्यो यो योगस्तं वदामि शृणु प्रिये !।
अमार्कपातश्रवणैर्युता चेत्पुष्यमाघयोः।। २८ ।।
अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः।
तस्मिन् काले च गन्तव्यं नगजे पुरुषोत्तमम् ।। २९ ।।

सागरे विधिवत्स्नात्वा दृष्ट्वा नारायणं प्रभुम् ।
कोटिजन्मार्जितं पापं नाशयेत्तत्क्षणाद्ध्रुवम् ।। ३० ।।
अर्द्धोदये तिथावब्धौ स्नानमद्य करोम्यहम् ।
पापं नाशय देवेश ! क्रोडरूपि ! जनार्द्दन! ।। ३१ ।।
अर्द्धोदये तिथौ देव जगन्नाथ जनार्द्दन ।
विनाशय दुष्कृतं च सुकृतं चाक्षयं कुरु ।। ३२ ।।
रोहिणीप्रतिपद्योगं निगदामि तवाग्रतः।
अनुमत्यामतीतायां प्रतिपद् रोहिणी शशी ।। ३३ ।।
यदैषां स्याच्च संयोगः कार्त्तिकान्ते विशेषतः।
एवं ज्ञात्वा विशेषेण गन्तव्यं पुरुषोत्तमम् ।। ३४ ।।
कोटिसंख्यं च सुकृतं स्नात्वाऽब्धौ लभते पुमान् ।
राका संपूर्णचन्द्रा स्यात् कलौ नानुमतिः स्मृता ।। ३५ ।।
पौर्णमासीदिने दृष्टे शशिन्यनुमतिः स्मृता ।
रात्रिदृष्टे पुनस्तस्मिन् सैव राकेति कीर्त्तिता ।। ३६ ।।
पूर्वोदिते कलाघस्रे पूर्णिमायां निशाकरे ।
पूर्णिमाऽनुमतिर्ज्ञेया तथाऽस्तमितभास्करा ।। ३७ ।।
यदा त्वस्तमियात्सूर्य्यः पूर्णश्चेन्दुरुपागमत् ।
युगपत्सोत्तरा राका तदा भवति पूर्णिमा ।। ३८ ।।
स्नानं करोमि देवेश व्रतं मे सफलं कुरु ।
प्रतिपद्युक्तरोहिण्यां स्नामि देव महोदधौ ।। ३९ ।।
पापं नाशय देवेश सोमरूपिन् जनार्द्दन ।
तीर्थराज नमस्तेऽस्तु विष्णुरूपोऽसि नान्यथा ।। ४० ।।
निमज्जामि तवाम्भः सु पापं हर सहस्रधा ।
जनार्द्दन जगन्नाथ परमानन्द सुन्दर ।। ४१ ।।

पापं नाशय मे देव सोमरूपिन् कृपाकर ।
पुनर्वक्ष्यामि देवेशि गोविन्दद्वादशीफलम् ।। ४२ ।।
कुम्भस्थे भास्करे जीवे धनुषि फाल्गुने पुनः।
द्वादशीशुक्लपक्षस्य पुष्यर्क्षे जायते यदि ।। ४३ ।।
तिथिरेषा महापुण्या ब्रह्मणा परिकीर्त्तिता ।
गोविन्दद्वादशी नाम महापातकनाशिनी ।। ४४ ।।
तस्यां कृत्वोदधिस्नानं दृष्ट्वा च पुरुषोत्तमम् ।
यत्फलं प्राप्यते सम्यक् शृणुष्वावहिता प्रिये !।। ४५ ।।
त्रयोदशमहाज्यैष्ठीफलमाप्नोति मानवः।
तस्यामुपोष्य विधिवन्नरः संक्षीणकल्मषः।। ४६ ।।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावर्त्तते न च ।
दशम्यामेकभक्तं च स्नात्वा च सागरेऽहनि ।। ४७ ।।
पञ्चतीर्थं नरः कृत्वा एकादश्यामभोजनम् ।
ततः प्रभाते विमले दुर्ल्लभे पुरुषोत्तमे ।। ४८ ।।
द्वादशयोगयुक्तेयं महापातकनाशिनी ।
पञ्चतीर्थं पुनः कुर्य्यात्पूजां च मण्डले हरेः।। ४९ ।।
मण्डलं कारयेत्तत्र सर्वतोभद्रसंज्ञकम् ।
भूतशुद्धिं ततः कृत्वाऽप्यङ्गन्यासं चरेद्व्रती ।। ५० ।।
पीठपूजादिकं कृत्वा न्यस्येद्गोविन्दमासने ।
पाद्यमर्घ्यादिकं दत्त्वा पूजयेदञ्जलित्रयम् ।। ५१ ।।
गोविन्देति समुच्चार्य्य पुरुषसूक्तमेव वा ।
गन्धपुष्पादिनैवेद्यैः पूपैर्नानाविधैरपि ।। ५२ ।।
समभ्यर्च्च्य जपेन्मत्रं तत्त्वं गोविन्दसंज्ञकम् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।। ५३ ।।

अष्टाविंशतिकं वाऽपि जपेन्मत्रं समाहितः।
प्रदक्षिणं ततः कुर्य्यात्प्रणमेद्दण्डवत्क्षितौ ।। ५४ ।।
कृताञ्जलिपुटो भूत्वा इमं मन्त्रमुदीरयेत् ।
नमो ब्रह्मण्यदेवाय श्रीधरायाव्ययात्मने ।। ५५ ।।
ऋग्यजुः सामरूपाय गोविन्दाय नमोऽस्तु ते ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।। ५६ ।।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।
कृष्णस्य मुखमालोक्य होमं कुर्य्याद्यथाविधि ।। ५७ ।।
आज्यं संस्कृत्य विधिवज्जुहुयात् षोडशाहुतीः।
पुरुषसूक्तमन्त्रेण सर्वपापापनुत्तये ।। ५८ ।।
धान्यं च तिलसंयुक्तं व्याहृत्या द्वादशाहुतीः।
पुनराज्येन जुहुयात् सहस्रं शतमेव वा ।। ५९ ।।
मूलमन्त्रेण मेधावी वाग्यतः पापशुद्धये ।
पूर्णाहुतिं ततो दद्याद्धुत्वा स्विष्टकृतं परा ।। ६० ।।
जुहुयान्मूलमन्त्रेण घृतेनैवाहुतित्रयम् ।
दक्षिणां च ततो दद्याद् वित्तशाठ्यविवर्जितः।। ६१ ।।
गोभूहिरण्यवासांसि ब्राह्मणेभ्यो विमत्सरः।
रात्रौ जागरणं कुर्य्याज्जपदानपरायणः।। ६२ ।।
प्रातःकाले तु सम्प्राप्ते त्रयोदश्यां तु पारणम् ।
ब्राह्मणान् भोजयेत्तत्र दीनान्धवधिरानपि ।। ६३ ।।
य इमं कुरुते योगं क्षेत्रे श्रीपुरुषोत्तमे ।
स याति परमं स्थानं यत्र देवो निरञ्जनः।। ६४ ।।
बालवृद्धातुराः कन्याःये समर्थाःउपोषितुम् ।
हविष्यपारणं कृत्वा विष्णुपूजनतत्पराः।। ६५ ।।

आप्तोर्यामफलं प्राप्य विष्णुलोकं ब्रजन्ति ते ।
यत्र तत्र हरेः स्थाने यः कुर्य्याद्व्रतमीदृशम् ।। ६६ ।।
स विष्णोः स्थानमासाद्य भुङ्क्ते भोगानशेषतः।
पुनर्ब्रह्मण्यमासाद्य जातो जातिस्मरो भवेत् ।। ६७ ।।
वैष्णवं योगमासाद्य कैवल्यं लभते तु सः।
महावैशाखीयोगं च वदामि शृणु पार्वति ।। ६८ ।।
मेषेऽर्के कार्मुके जीवे मकरस्थेऽथवाऽद्विजे ।
पूर्णिमा रविवारेण तुलास्थे तु शनैश्चरे ।। ६९ ।।
वरीयोयोगयुक्तेन विशाखर्क्षे यदा शशी ।
महच्छब्दा तदा ज्ञेया कोटिसूर्य्यग्रहाधिका ।। ७० ।।
कोटिजन्मकृतं पापं दृष्ट्वा श्रीपुरुषोत्तमम् ।
महावैशाखे मुञ्चन्ति स्नानं कृत्वा महोदधौ ।। ७१ ।।
पुरुषोत्तम देवेश स्नानमद्य करोम्यहम् ।
महावैशाखीयोगे च सर्वं पापं विनाशय ।। ७२ ।।
देवदेव जगन्नाथ परमानन्द निर्मल ।
महावैशाखस्नानाच्च प्रसन्नो भव देवराट् ।। ७३ ।।
व्यतीपाताख्ययोगं च वदामि शृणु पार्वति !।
रविवारसमेतायाममायां वासवो यदि ।। ७४ ।।
वैष्णवं रौद्रमाग्नेयमाश्विनं च भवेदुडु ।
योगोऽयं स्याद् व्यतीपातः शतार्कग्रहसन्निभः।। ७५ ।।
महोदधौ कृतात् स्नानात्पुनर्जन्म न विद्यते ।
व्यतीपाते च योगेऽहं स्नानमब्धौ करोमि च ।। ७६ ।।
पापं नाशय देवेश ! सर्वतीर्थफलप्रद !।
दीनबन्धो ! जगद्बन्धो ! करुणाकर ! सुन्दर ! ।। ७७

व्यतीपातस्य स्नानाच्च फलं देहि सुरेश्वर !।

महाव्यतीपातयोगं शृणु त्वं पार्वति ! ध्रुवम् ।। ७८ ।।

पञ्चाननस्थौ गुरुभूमिपुत्रौ

मेषे रविः स्याद् यदि शुक्लपक्षे ।

मासाभिधानाकरभेन युक्ता

महाव्यतीपात इतीह योगः।। ७९ ।।

अस्मिंस्तु गोभूमिहिरण्यवासो

दानेन सर्वं परिहाय पापम् ।

सुरत्वमिन्द्रत्वमनामयत्वं

मर्त्याधिपत्यं लभते मनुष्यः।। ८० ।।

लवणोदे वारिपूर्णे व्यतीपाते च योगके ।

स्नानं करोमि देवेश विष्णोर्मार्गं प्रदर्शय ।। ८१ ।।

देव देव ! जगन्नाथ !सुन्दर !भुवनेश्वर !।

अस्माद्योगात्तु नश्यन्तु पापानि सुबहूनि च ।। ८२ ।।

देव महाव्यतीपातयोगे स्नानं करोम्यहम् ।

लवणाम्भसि देवेश पापं हर सहस्रधा ।। ८३ ।।

देव देव हृषीकेश गोविन्दाच्युत माधव ।

महाव्यतीपातस्नानफलं देहि जनार्द्दन ।। ८४ ।।

शृणु प्रिये ! त्वथो वच्मि श्रवणद्वादशी यथा ।

शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता ।। ८५ ।।

तयोरेकोपवासश्च त्रयोदश्यां च पारणम् ।

बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् ।। ८६ ।।

अत्यन्तमहती यस्यां सर्वं कृतमथाक्षयम् ।

अस्मिन्योगे समुद्रे च स्नानं कुर्य्याद्विचक्षणः।। ८७ ।।

जगन्नाथं ततो दृष्ट्वा मुच्यते सर्वकिल्विषैः।
वामन सर्वदेवेश जगन्नाथ जनार्द्दन ।। ८८ ।।
द्वादश्यां श्रवणात्तायां स्नाने पापं विनाशय ।
देवदवे जगन्नाथ सर्वतीर्थप्रद प्रभो ।। ८९ ।।
एतत्स्नानात्तु यत्पापं विनाशय सुरेश्वर ।
भाद्रवे शुक्लपक्षे तु द्वादशी श्रवणायुता ।। ९० ।।
तस्यां कुर्य्याद्वामनस्य पूजां सर्वां यथाविधि ।
द्वादश्यां च निराहारो वामनं पूजयाम्यहम् ।। ९१ ।।
आवाहयाम्यहं विष्णुं वामनं शङ्खचक्रिणम् ।
पीतवस्त्रयुगच्छन्ने पट्टे सततपादुके ।। ९२ ।।
स्नापयामि जलैः शुद्धैर्विष्णुंपञ्चामृतादिभिः।
छत्रदण्डधरेशाय वामनाय नमो नमः।। ९३ ।।
अर्घ्यं ददामि देवेश सर्वपापविनाशन ।
भुक्तिमुक्तिप्रदाभीति सर्वैश्वर्य्ययुतं कुरु ।। ९४ ।।
वामनाय नमो गन्धो होमोऽनेनाष्टकं शतम् ।
ओं नमो वासुदेवाय गिरः संपूजयेद्धरेः।। ९५ ।।
श्रीधराय मुखं द्योतं कण्ठं कृष्णाय वै नमः।
नमः श्रीपतये दक्षभुजौ सर्वार्थधारिणे ।। ९६ ।।
व्यापकाय नमो नाभिं वामनाय नमः कटिम् ।
त्रैलोक्यजनकायेति मेढ्रं जङ्घे वदेद्धरेः।। ९७ ।।
सर्वाधिपतये पादौ विष्णोः सर्वात्मने नमः।
घृतपक्वं च नैवेद्यं दद्याद्दध्योदनैर्घटान् ।। ९८ ।।
रात्रौ जागरणं कृत्वा प्रातः स्नात्वा च सङ्गमे ।
गन्धपुष्पादिभिः प्राच्यं दद्यात्पुष्पाञ्जलिं त्विमम् ।। ९९ ।।

नमो नमस्ते गोविन्द बुधश्रवणसंयुते ।
अघोघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ।। १०० ।।
प्रीयतां देवदेवेशो मम नित्यं जनार्द्दनः।
वामनो बुद्धिदाता च द्रष्टव्यो वामनः स्वयम् ।। १०१ ।।
वामनः प्रतिगृह्णाति वामनाय नमो नमः।
वामनः प्रतिगृह्णाति वामनो मे ददाति च ।। १०२ ।।
द्रव्यस्थो वामनो नित्यं वामनाय नमो नमः।
विप्रेभ्यो दक्षिणां दत्त्वा संभोज्यान्नं स्वयं चरेत् ।। १०३ ।।
श्रवणद्वादशीयोगे समुपोष्य जनार्द्दनम् ।
अर्च्चयित्वा विधानेन त्वहं भोक्ष्येऽपरेऽहनि ।। १०४ ।।
नदीनां सङ्गमे स्नायात्पूजयेत्तत्र वामनम् ।
विष्णुशृङ्खलयोगं च वदामि शृणु पार्वति ।। १०५ ।।
एकादशी द्वादशी च तत्रापि श्रवणा यदि ।
सा विष्णुशृङ्खला नाम विष्णुसायुज्यकृद्भवेत् ।। १०६ ।।
द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदि ।
स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः।। १०७ ।।
उपोष्य विधिवच्चाब्धौ स्नानं कृत्वा प्रयत्नतः।
जगन्नाथमुखं दृष्ट्वा सिद्धिं प्राप्नोत्यनुत्तमाम् ।। १०८ ।।
विष्णुशृङ्खलयोगे चाप्यब्धौ स्नानं करोम्यहम् ।
त्वमेव जगदाधार सर्वं पापं विनाशय ।। १०९ ।।
कृष्ण केशव गोविन्द मुकुन्द मधुसूदन ।
विष्णुशृङ्खलयोगस्य फलं देहि जनार्द्दन ।। ११० ।।
नीलगोत्राधिप श्रीमन्नमस्ते कमलाधव ।
स्नानं करोमि गोविन्द !सर्वपापं विनाशय ।। १११ ।।

देवशृङ्खलयोगे च यच्च स्नानं कृतं मया ।
तत्स्नानात् सर्वपापानि नश्यन्तु जगदीश्वर ।। ११२ ।।
तं महाकार्त्तिकीयोगं प्रवक्ष्यामि शृणु प्रिये ।
ऊर्जे मासि पूर्णिमायामृक्षे दहनसंज्ञके ।। ११३ ।।
रविवारे विशाखायां स्थिते सूर्य्ये च वृश्चिके ।
मेषराशौ स्थिते चन्द्रे सा महाकार्त्तिकी स्मृता ।। ११४ ।।
तर्पणादौ च दानेन महती सा तिथिः स्मृता ।
इति ज्ञात्वा द्विजवरे गच्छेद् वै परुषोत्तमम् ।। ११५ ।।
गत्वा स्नात्वा समुद्रे च पश्येत्तु गरुडध्वजम् ।
कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ।। ११६ ।।
महाकार्त्तिकीयोगे च स्नाम्यहं लवणार्णवे ।
दामोदर हृषीकेश सर्वपापं विनाशय ।। ११७ ।।
दामोदर जगन्नाथ गोविन्द गरुडध्वज ।
स्नानेनानेन देवेश स्नानं मे सफलं कुरु ।। ११८ ।।
महोदध्यमावास्यां च निगदामि शृणु प्रिये !।
मार्गशीर्षे सिनीवाल्यां सागरे यत्र कुत्रचित् ।। ११९ ।।
विशाखायां तुरीयेंऽशे सचन्द्रे च गते रवौ ।
तथा मैत्रगते भानौ षड्गुणं फलमाप्नुयात् ।। १२० ।।
तथैवेन्द्रगते सूर्य्ये षड्गुणात् षड्गुणं फलम् ।
सोमवारे विशेषेण सायुज्यफलदा कुहूः।। १२१ ।।
तस्यां मोक्षोत्तमे देशे क्षेत्रे श्रीपुरुषोत्तमे ।
तत्रोषसि समुत्थाय शुचिराचम्य वाग्यतः।। १२२ ।।
मनसा केशवं ध्यायन् दक्षिणाभिमुखो ब्रजेत् ।
सागरे विधिवत् स्नात्वा पुराणपुरुषं स्मरेत् ।। १२३ ।।

पुनर्मौनं समास्थाय केशवं चिन्तयन् व्रजेत् ।
तत्रासौ विद्यते देवः पुराणपुरुषोत्तमः।। १२४ ।।
महत्याः स्नानवाक्यादिं कृत्वा गच्छेत्प्रसन्नधीः।
प्रणम्य च ततो गच्छेत् प्रासादद्वारदेशतः।। १२५ ।।
अवलोक्य ततो देवान् गोविन्दादीन् पुनः पुनः।
प्रासादान्तं परिभ्रम्य पूर्ववत्प्रतिनामभिः।। १२६ ।।
प्रविश्य मन्दिरं रामं सुभद्रां च सुचारिणीम् ।
कृष्णं च पूर्ववज्जप्त्वा प्रणवं च प्रणम्य च ।। १२७ ।।
तथैवाभ्यर्च्य देवेशानवलोक्य तथैव च ।
सह विष्णुकथाभिश्च विष्णु विष्णिवति वा जपन् ।। १२८ ।।
शिरस्यञ्जलिमादाय कुर्य्याद्वाचो विसर्जनम् ।
मध्याह्ने च ततः कुर्य्यात्स्नानदानादिकाः क्रियाः।। १२९ ।।
पूजां होमं तथा श्राद्धमम्भः पानं च भोजनम् ।
दशायुताश्वमेधानां कृत्वा फलमवाप्नुयात् ।। १३० ।।
सागरस्य जलान्ते च श्रीकृष्णस्य च दक्षिणे ।
सर्वमक्षय्यमाप्नोति कृष्णमुद्दिश्य कर्मणः।। १३१ ।।
स्नानादिकं च यत्कर्म सर्वं तत्सागराम्भसि ।
कर्त्तव्यश्चोपवासश्च दद्याद्दानं यथाविधि ।। १३२ ।।
महाज्यैष्ठ्यां तु यत्पुण्यमस्यामेव हि तत्समम् ।
देशकालहितं पुण्यं हरिणा कूर्मरूपिणा ।। १३३ ।।
विरञ्चिना पुरा प्रोक्तं महाज्यैष्ठीफलं तथा ।
अथ वक्ष्ये महामाघीफलं तच्छृणु पार्वति !।। १३४ ।।
मेषपृष्ठे यदा शौरिः सिंहे च गुरुचन्द्रकौ ।
भास्करे श्रवणामध्ये महामाघीति सा स्मृता ।। १३५ ।।

अस्मिन् योगे समागच्छेत्क्षेत्रं श्रीपुरुषोत्तमम् ।
समुद्रे विधिवत् स्नात्वा दृष्ट्वा च पुरुषोत्तमम् ।। १३६ ।।
महामाघ्यामहं देव ! समुद्रे लवणोदके ।
स्नानं करोमि देवेश !मम नश्यतु पातकम् ।। १३७ ।।
देवदेव !हृषीकेश ! केशव ! पुरुषोत्तम !।
अस्मात् स्नानात्तु यत्पापं सर्वं नाशय मे प्रभो !।। १३८ ।।
देवदेव जगन्नाथ लोकानुग्रहकारक ।
अनेन स्नानयोगेन सर्वपापं विनाशय ।। २३९ ।।
इति ते कथितो देवि विष्णोश्चालभ्ययोगकः।
शृणुयाद्यो ब्रजेन्मुक्तिं सर्वत्र विजयी भवेत् ।। १४० ।।
एतेषु योगेषु च ये मनुष्याः
स्नानं समुद्रे विधिवच्चरन्ति ।
तेऽपीहलोके सकलेप्सितानि
प्राप्य ब्रजन्ति स्थलमीश्वरस्य ।। १४१ ।।

इति श्रीवामदेवसंहितायाम् अलभ्ययोगकथनं नाम अष्टाविंशोऽध्यायः।।

ऊनत्रिंशोऽध्यायः

जगन्नाथस्थितिं श्रुत्वा प्रासादविषयं पुनः।
देवी पप्रच्छ देवेशं पुरा हि कथितं त्वया ।। १ ।।
विष्णुना गदितं पूर्वमिन्द्रद्युम्नाय भूभृते ।
सत्यं सत्यं पुनः सत्यं सत्यमेव पुनः पुनः।। २ ।।

प्रासादप्रतिमाभङ्गे न त्यजामि कदाचन ।
यदा भवेद्धि चोत्पातः प्रासादभङ्ग एव च ।। ३ ।।
केन राज्ञा कृता कीर्त्तिस्तत्कीर्त्तिर्वा कथं भवेत् ।
कथं प्रतिष्ठा भवति प्रतिष्ठा तत्र नास्ति वै ।। ४ ।।
आज्ञा कृता भगवता प्रासादो येन वा कृतः।
प्रतिष्ठा नास्ति तत्कीर्त्तिस्त्वत्कीर्त्तिर्भवति ध्रुवम् ।। ५ ।।
अम्बिकावचनं श्रुत्वा वामदेवोऽप्यभाषत ।। ६ ।।

श्रीवामदेव उवाच

शृणु देवि !प्रवक्ष्यामि विषयं चेश्वरस्य च ।
यदि प्रासादभङ्गः स्यादन्येन यदि वा कृतः।। ७ ।।
तत्प्रतिष्ठा न वा देवि ! गर्वेण येन वा कृतः।
तस्य कीर्त्तिर्न हि भवेदितिहासकथा पुरा ।। ८ ।।
अस्ति वच्मि शृणुष्व त्वं मिथिलायां नृपः स्थितः।
गोविन्दनामा त्रेतायां युगे जनप्रियङ्करः।। ९ ।।
एतत्स्थलं सोऽपि राजा ह्यागतः प्रभुदर्शने ।
जगन्नाथदर्शनं तु कृत्वा राजा समाहितः।। १० ।।
पञ्चतीर्थादिकं कृत्वा तस्थावत्र महीपतिः।
जलवायुसकाशात्तु भग्नप्रासादमेव च ।। ११ ।।
दृष्ट्वा सोऽचिन्तयद्राजा धनं बहु ममास्ति च ।
तस्मिंश्च समये राजाऽप्युत्कलानां स आगतः।। १२ ।।
जगन्नाथो नाम तस्य गदाक्षेत्रे वसन् सुधीः।
दृष्ट्वा गोविन्दं राजानं सम्मान्य बहुधा नृपः।। १३ ।।
उत्कलेशोऽपि राजानमवदन्मन्दिरं कुरु ।
तस्याज्ञापालनं कृत्वा प्रासादं स चकार ह ।। १४ ।।

समाप्तिं याते प्रासादे प्रतिष्ठां कारयाम्यहम् ।
मनस्येवं विचार्य्याथ सम्भारं कृतवान्नृपः।। १५ ।।
एतस्मिन् समये तत्राप्यागतो नारदो मुनिः।
राजा पूजादिकं कृत्वा नारदस्य मुदा स्थितः।। १६ ।।
एतत्सर्वं स विज्ञाय नारदः प्रत्यभाषत ।। १७ ।।

नारद उवाच

इन्द्रद्युम्नकृता कीर्त्तिर्नैषा कीर्त्तिस्तवानघ ।
प्रासादमध्ये या कीर्त्तिस्तदुद्धारस्त्वया कृतः।। १८ ।।
देवेन कथितं पूर्वं राज्ञे कीर्त्तिस्तवैव च ।
भग्नोद्धारं ये कुर्वन्ति साऽपि कीर्त्तिस्तवैव हि ।। १९ ।।
प्रतिष्ठाऽन्या न राजंस्त्वत्प्रतिष्ठायां गता च सा ।
समयेऽस्मिन् श्रुता वाणी प्रतिष्ठा नहि भो जनाः।। २० ।।
इन्द्रद्युम्नप्रतिष्ठायां प्रतिष्ठा भवति ध्रुवम् ।
तच्छुत्वा सोऽपि राजा तत्प्रतिष्ठां न चकार ह ।। २१ ।।
कथयित्वा नारदोऽपि गतश्चैव यदृच्छया ।
गोविन्दराजा तत्रैव नैवेद्यं कृतवान् बहु ।। २२ ।।
तत्र स्थलेऽपि संस्थाप्य देवांश्च क्षेत्रवासगः।
इह भोगादिकं भुक्त्वाऽप्यन्ते मोक्षमवाप सः।। २३ ।।
अतः कारणतो देवि !प्रतिष्ठा तत्स्थले नहि ।
येन केन कृता कीर्त्तिरिन्द्रद्युम्नस्य सा मता ।। २४ ।।
विधेश्च दिवसे गौरि चावतारा विभोर्दश ।
चतुर्द्दशापि मनवःइन्द्राश्चैव चतुर्द्दश ।। २५ ।।
यदि ब्रह्मा प्रसुप्तस्य स्थानं न त्यजति प्रभुः।
इन्द्रद्युम्नकृता कीर्त्तिर्विधेश्च दिवसे स्थिता ।। २६ ।।

शयनानन्तरं धातुर्यत् किञ्चिच्च भविष्यति ।
शतायुषो विधेश्चापि पूर्वार्धे च विभुस्तथा ।। २७ ।।
नीलमाधवरूपेण भोगं कृत्वा पुनः शृणु ।
जगन्नाथस्वरूपेण भोगान् भुङ्क्ते परार्द्धके ।। २८ ।।
इन्द्रद्युम्नस्य या कीर्त्तिः सा कीर्त्तिस्तु परार्द्धके ।
जगन्नाथो यदा तिष्ठेत्तस्य कीर्त्तिस्तु गर्जति ।। २९ ।।
महानसं नवीनं चेत्तृणैरेव पिधापयेत् ।
यतोऽप्येतत्सकाशात्तु कृतं शिख्यादिपूजनम् ।। ३० ।।
ये वै कुर्वन्ति गर्वेण तत्फलं निष्फलं भवेत् ।। ३१ ।।

इति श्रीवामदेवसंहितायां प्रतिष्ठाप्रकरणं नाम ऊनत्रिंशोऽध्यायः।।

त्रिंशोऽध्यायः

उत्पातानां विधिं श्रुत्वा पार्वती हृष्टचेतसा ।
पुनः पप्रच्छ देवेशमुत्पातं मन्दिरस्य च ।। १ ।।
दिक्षु भङ्गो यदा जातः दिक्पतिं तत्र पूजयेत् ।
इत्यादिष्टं त्वया ब्रह्मन् केन रूपेण वा भवेत् ।। २ ।।
तद्विधिं सकलं ब्रूहि येन सुस्थो भवेन्नरः।
एतद्वाक्यं हि पार्वत्याः श्रुत्वा प्रोवाच तां शिव।। ३ ।।

श्रीवामदेव उवाच

शृणु देवि !प्रवक्ष्यामि प्रासादोत्पातकर्म यत् ।
ऐन्द्र्यां दिशि यदोत्पात ऐन्द्रीं शान्तिं समाचरेत् ।। ४ ।।
दिक्पतीनामेवमेव तां तां शान्तिं समादिशेत् ।
तद्वासरपतेः पूजां समिदाज्यादिकैश्चरेत् ।। ५ ।।

यथा कुर्य्यात् तथा देवि !भूयः शृणु वदामि ते ।
तद्देशे मण्डपं कुर्य्याच्छालां च सूर्य्यहस्तकाम् ।। ६ ।।
तन्मध्ये वेदिकां कृत्वा चतुर्हस्तां सुशोभनाम् ।
शालायां च चतुर्द्वारं कुर्य्यात्तोरणशोभनम् ।। ७ ।।
अश्वत्थोदुम्बरवटप्लक्षैश्च तोरणं स्मृतम् ।
पताकादिं च संबद्ध्य वातो वावेतिमन्त्रकैः।। ८ ।।
पीतां रक्तां च कृष्णां च नीलां च शुक्लिकां तथा ।
धूमां चित्रां पताकाश्च बद्ध्वा चन्द्रातपेन च ।। ९ ।।
दिक्षु चाष्टादशाम्भोजं शालायामुपरि कृतम् ।
वेदिकायां च द्वे पद्मे ऐशान्ये ग्रहमण्डलम् ।। १० ।।
मध्ये कृत्वा लिखेद्देवि सर्वतोभद्रमण्डलम् ।
वेदीमध्ये लिखेद्देवी सर्वतोभद्रमण्डलम् ।। ११ ।।
आचार्य्यो भूतशुद्ध्यादीन् कृत्वा वरुणपूजनम् ।
स्वस्तिवाक्यं ततः कुर्य्यात् संकल्पं च ततश्चरेत् ।। १२ ।
देशकालादिकं चोक्त्वा गोत्रस्यामुकशर्मणः।
अमुकस्यापि गोत्रस्याप्यमुकदेवशर्मणः।। १३ ।।
राज्ञः सर्वोपद्रवस्य शान्त्यै सर्वार्थसिद्धये ।
ऐन्द्रीं शान्तिमहं कुर्य्यां कुर्वीयेति जलं क्षिपेत् ।। १४ ।।
मातृपूजादिकं कृत्वा सर्वेषां वरणं ततः।
वर्द्धनीं पूजयित्वैवमिन्द्रस्य पूजनं चरेत् ।। १५ ।।
त्रातारमिन्द्रमन्त्रस्य ऋषिर्ब्रह्मा तथैव च ।
गायत्रीच्छन्द एव स्यादिन्द्रोऽपि देवता स्मृता ।। १६ ।।
पूर्ववद्विनियोगः स्यात्ततो ध्यानं समाचरेत् ।
गजारूढं वज्रहस्तं द्विभुजं सुरनायकम् ।। १७ ।।

सर्वालङ्कारसंयुक्तं ध्यायेच्चक्षुः सहस्रकम् ।
त्रातारमिन्द्रमन्त्रेण ततः पूजादिकं चरेत् ।। १८ ।।
होमे कुण्डं प्रकुर्वीत शान्तिकर्मणि यो विधिः।
तं वदामि शृणुष्व त्वं राज्ञो हस्तप्रमाणकम् ।। १९ ।।
इष्टकैश्च दृढं कृत्वा षट्कोणं ह्युपरि स्मृतम् ।
एवं कुण्डं तु प्रासादे कुर्य्यादाचार्य्यसत्तमः।। २० ।।
स्थण्डिलं च तथा कुर्य्याद्धस्तमात्रोच्छ्रितं चतुः।
दशाङ्गुलं समित्काष्ठं कृत्वा होमं समाचरेत् ।। २१ ।।
इन्द्राग्निं च ततः कुर्य्यात्तद्विधिं वच्मि तच्छृणु ।
कुशत्रयमिति ब्रूयात्कुशं धृत्वाऽस्त्रमन्त्रकैः।। २२ ।।
रेखां कृत्वा चोत्तराग्रां पूर्वाग्रां च द्विरेखकाम् ।
मध्ये रेखात्रयं कृत्वा कवचेनैव प्रोक्षयेत् ।। २३ ।।
कुशविष्टरकं कुर्य्यात् स्थापयेत् हृदयेन वा ।
चिन्तयेदिन्द्रशक्तिं च शचीमृतुमतीं तथा ।। २४ ।।
हृदयेनैव मन्त्रेण पूजयेत्तां स्वशक्तितः।
ततोऽग्निमानीय पुनरात्मानमग्निरूपकम् ।। २५ ।।
ब्रह्मणो वरणं कुर्य्यात् क्रव्यादांशं परिक्षिपेत् ।
इन्द्रस्य तु स्वरूपं च ध्यात्वा गर्भे विनिक्षिपेत् ।। २६ ।।
प्रादेशमात्रां समिधमग्नौ दत्त्वा घृतान् कुशान् ।
वारत्रयं परिस्तीर्य्य ईध्मर्हिः शृणु प्रिये !।। २७ ।।
आज्यस्थाली चरुस्थाली स्रुक्स्रुवश्च घृतं पयः।
तिलतण्डुलकैर्युक्तमासाद्य समिदादिकम् ।। २८ ।।
जलं प्रोक्षणीपात्रे च कृत्वाऽस्त्रेणैव प्रोक्षयेत् ।
पुनः प्रोक्षणीपात्रे च पूरयित्वा जलं प्रिये !।। २९ ।।

पवित्रं च द्वयं कुर्य्यात् पवित्रेणैव वेष्टयेत् ।
छित्वा पवित्रं तत्पात्रे सव्यहस्ते धृतं पुनः। ३० ।।
मस्तकमभिषिच्याथ सर्वमस्त्रेण प्रोक्षयेत् ।
अग्निप्रणीतयोर्मध्ये न्यस्येदेव च प्रोक्षणीम् ।। ३१ ।।
स्थाल्यां निर्वापयेदाज्यं सर्वं कृत्वा तु पूर्ववत् ।
कुशद्वयं घृताक्तं तु इन्द्राय नम इत्यपि ।। ३२ ।।
स्वाहेति चाष्टौ होमांश्च कृत्वा तिस्रस्तिलाहुतीः।
हुत्वा वदेच्च इन्द्राग्नेर्गर्भाधानमिति ब्रूवन् ।। ३३ ।।
कर्मेदमिति चोक्त्वा वै चाग्नौ पुष्पाक्षतं क्षिपेत् ।
ततः पुंसवनं कर्म सीमन्तं जातकर्म च ।। ३४ ।।
नामकर्म निष्क्रमणमन्नप्राशनमेव च ।
चूडोपनयनं वेदारम्भं चैव विवाहकम् ।। ३५ ।।
पूर्ववद्धोमयेत् देवि ! पुनस्त्रातारमन्त्रकैः।
समिदाज्यचरुभिस्तु सहस्रं होमयेद् बुधः।। ३६ ।।
इन्द्रस्यैव तु गायत्र्या होमं कुर्य्याद्विचक्षणः।
सुरेशाय विद्महे वज्रहस्ताय धीमहि ।। ३७ ।
तन्न इन्द्रः प्रचोदयात् ।। ३८ ।।
पालाशसमिधं केचित् केचिदौदुम्बरीं प्रिये !।
ततश्च वाराधिपतिं तिथिदेवं च संहुनेत् ।। ३९ ।।
ग्रहादीनां पुनर्होमं ततः पूर्णाहुतिं चरेत् ।
वर्द्धनीकलशेनैव कृत्वा राज्ञोऽभिषेचनम् ।। ४० ।।
शान्तिपाठं ततश्चोक्त्वा पावमानादिकैर्नृपः।
अच्छिद्रकरणं कृत्वा दीनानाथांश्च तोषयेत् ।। ४१ ।।
भोजनादिकमाकुर्य्यात्कथितं हि तवाग्रतः।
एवं राज्ञा कृतं तस्य शान्तिर्भवति निश्चयः।। ४२ ।।

यद्यकस्माद् भङ्ग एव तदा शान्तिं समाचरेत् ।
अन्यासां च विधिं भद्रे ! कथयामि शृणु प्रिये !।। ४३ ।।

इति श्रीवामदेवसंहितायां पुरषोत्तमक्षेत्रमाहात्म्ये उत्पातविधौ ऐन्द्रीशान्तिकथने त्रिंशोऽध्यायः।।

एकत्रिंशोऽध्यायः

शृणु देवि !प्रवक्ष्यामि चाग्नेय्यां दिशि यद्भवेत् ।
ऐन्द्रीशान्त्यां यथा कुर्य्यादन्यासु तद्वदाचरेत् ।। १ ।।
वह्निदिशि यदोत्पातस्तदा शान्तिं समाचरेत् ।
पुरा मया तु कथितं तच्छा शालादिकं चरेत् ।। २ ।।
विशेषं च वदिष्यामि पूजाहोमं तु यद्भवेत् ।
अग्निदूतमन्त्रस्य तु ऋषिर्ब्रह्मा तथैव च ।। ३ ।।
अनुष्टुप्च्छन्द एव स्याद्देवता वह्निरीरिता ।
अग्नेर्ध्यानं प्रकुर्वीत तद्वदामि हि सूक्ष्मतः।। ४ ।।
सप्तहस्तं सप्तजिह्वं मेषवाहनमुत्तमम् ।
स्वधास्वाहाप्रियं देवं ध्यायेदग्निं कृपाकरम् ।। ५ ।।
अग्निदूतस्य मन्त्रेण तिथिवारपतिं यजेत् ।
पूजयेद्विविधैः पुष्पैः नैवेद्यैर्विविधैरपि ।। ६ ।।
अग्नेरग्निं समाधाय ततो होमं समाचरेत् ।
तद्विधिं चाधुना वच्मि शृणु देवि !यथाविधि ।। ७ ।।
कुशत्रयमितीहोक्त्वा कुशं धृत्वाऽस्त्र मन्त्रकैः।
रेखां कृत्वा चोत्तराग्रां पूर्वाग्रां च द्विरेखकाम् ।। ८ ।।

मध्ये रेखात्रयं कृत्वा कवचेनैव प्रोक्षयेत् ।
कुशविष्टारकं कुर्य्याद्धृदयेनैव स्थापयेत् ।। ९ ।।
चिन्तयेदग्निशक्तिं च स्वाहामृतुमतीं तथा ।
हृदयेनैव मन्त्रेण पूजयित्वा स्वशक्तितः।। १० ।।
ततोऽग्निमानीय पुनरात्मानमग्निरूपकम् ।
ब्रह्मणो वरणं कुर्य्यात् क्रव्यादांशं परिक्षिपेत् ।। ११ ।।
अग्नेः स्वरूपं ध्यात्वा वै तं च गर्भे विनिक्षिपेत् ।
प्रादेशमात्रां समिधमग्नौ दत्त्वा धृतान् कुशान् ।। १२ ।।
वारत्रयं परिस्तीर्य्य ईध्मवर्हिः पुनः शृणु ।
आज्यस्थाली चरुस्थाली स्रुक्श्रुवश्च घृतं पयः।। १३ ।।
तिलतण्डुलकैर्युक्तमासाद्य समिदादिकम् ।
जलं प्रोक्षणीपात्रे च कृत्वाऽस्त्रेणैव प्रोक्षयेत् ।। १४ ।।
पुनः प्रोक्षणीपात्रे च पूरयित्वा जलं प्रिये !।
पवित्रं च द्वयं कुर्य्यात् पवित्रेणैव वेष्टयेत् ।। १५ ।।
छित्वा पवित्रं तत्पात्रे सव्यहस्ते धृतं पुनः।
शिरसि चाभिषिच्याथ सर्वमस्त्रेण प्रोक्षयेत् ।। १६ ।।
अग्निप्रणीतयोर्मध्ये न्यस्येदेव च प्रोक्षणीम् ।
स्थाल्यां निर्वापयेदाज्यं सर्वं कृत्वा तु पूर्ववत् । १७ ।।
कुशद्वयं घृताक्तं तु अग्नये नम इत्यपि ।
स्वाहेति चाष्टौ होमांश्च कृत्वा तिस्रस्तिलाहुतीः।। १८ ।।
हुत्वा वदेत्तु चाप्यग्नेर्गर्भाधानमितीरयेत् ।
कर्मेदमिति चोक्त्वा वै चाग्नौ पुष्पाक्षतं क्षिपेत् ।। १९ ।।
ततः पुंसवनं कर्म सीमन्तं जातकर्म च ।
नाम बहिर्निष्क्रमणमन्नप्राशनमेव च ।। २० ।।

चूडोपनयनं वेदारम्भं चैव विवाहकम् ।
पूर्ववद्धोमयेद्देवि !अग्निदूतस्य मन्त्रकैः।। २१ ।।
समिदाज्यचरुभिस्तु सहस्रं वा शतं हुनेत् ।
अग्नेश्चैव तु गायत्र्या होमं कुर्य्याद्विचक्षणः।। २२ ।।
पलाशसमिधं केचित्केचिदौदुम्बरीं तथा ।
ततश्च वाराधिपतिं तिथिदेवं च संहुनेत् ।। २३ ।।
ग्रहादीनां पुनर्होमं ततः पूर्णाहुतिं चरेत् ।
वर्द्धनीकलशेनैव कृत्वा राज्ञोऽभिषेचनम् ।। २४ ।।
शान्तिपाठं ततश्चोक्त्वा पावमानादिकैर्नृपः।
आनुष्टुभेन मन्त्रेण सेचयेत्तु नृपं प्रिये! ।। २५ ।।
अच्छिद्रकरणं कृत्वा दीनानाथांश्च तोषयेत् ।
उत्सर्गं भोजनस्यापि कथितं तु तवाग्रतः ।। २६ ।।
एवं राज्ञा कृतं तस्य शान्तिर्भवति निश्चितम् ।
यद्यकस्माद्भङ्ग एव चोत्पातो वा भवेद्ध्रुवम् ।। २७ ।।
याम्यां दिशि यदोत्पातो भङ्गो वा शान्तिमाचरेत् ।
विशेषं यद्भवेद्देवि ! तद्वदामि शृणु प्रिये! ।। २८ ।।
शालां कृत्वा पूर्ववत्तु सर्वकर्म समाचरेत् ।
यमस्य पूजनं कृत्वा ऋषिच्छन्दादिकं चरेत् ।। २९ ।।
यमेन दत्तमन्त्रस्य ऋषिर्ब्रह्मा तथैव च ।
अनुष्टुप्छन्द एव स्याद्यमो वै देवता स्मृता ।। ३० ।।
यमस्य ध्यानं वक्ष्यामि तच्छृणुष्वाऽम्बिके! प्रिये! ।
कृष्णरूपं च द्विभुजं दण्डपार्श्वधरं विभुम् ।। ३१ ।।
महिषीवाहनं देवं ध्यायेत्तं समवर्तिनम् ।
यमेन दत्तमन्त्रेण पूजयेद्विविधैरपि ।। ३२ ।।

नैवेद्यैश्च ततो होमो यमाग्निं च ततश्चरेत् ।
कुशत्रयमिति प्रोच्य पूर्वेऽपि गदितं मया ।। ३३ ।।
कुशत्रयमिति ब्रूयात् कुशं धृत्वाऽस्त्रमन्त्रकैः।
रेखां कृत्वा चोत्तराग्रां पूर्वाग्रां च द्विरेखकाम् ।। ३४ ।।
मध्ये रेखात्रयं कृत्वा कवचेनैव प्रोक्षयेत् ।
कुशविष्टरकं कुर्याद् हृदयेनैव स्थापयेत् ।। ३५ ।।
चिन्तयेद्यमशक्तिं सुशीलामृतुमतीं तथा ।
हृदयेनैव मन्त्रेण पूजयेत्तां स्वशक्तितः।। ३६ ।।
ततोऽग्निमानीय पुनरात्मानमग्निरूपकम् ।
ब्रह्मणो वरणं कुर्य्यात् क्रव्यादांशं परिक्षिपेत् ।। ३७ ।।
यमस्य तु स्वरूपं च ध्यात्वा गर्भे विनिक्षिपेत् ।
प्रादेशमात्रां समिधमग्नौ दत्त्वा धृतान् कुशान् ।। ३८ ।।
वारत्रयं परिस्तीर्य्य ईध्मवर्हिः शृणु प्रिये !।
आज्यस्थाली चरुस्थाली स्रुक्श्रुवश्च घृतं पयः।। ३९ ।।
तिलतण्डुलकैर्युक्तमासाद्य समिदादिकम् ।
जलं प्रोक्षणीपात्रे च कृत्वाऽस्त्रेणैव प्रोक्षयेत् ।। ४० ।।
पुनः प्रोक्षणीपात्रे च पूरयित्वा जलं प्रिये !।
पवित्रं च द्वयं कुर्य्यात्पवित्रेणैव वेष्टयेत् ।। ४१ ।।
छित्वा पवित्रं तत्पात्रे सव्यहस्ते धृतं पुनः।
मस्तकमभिषिच्याथ सर्वमस्त्रेण प्रोक्षयेत् ।। ४२ ।।
अग्निप्रणीतयोर्मध्ये न्यस्येदेव च प्रोक्षणीम् ।
स्थाल्यां निर्वापयेदाज्यं सर्वं कृत्वा तु पूर्ववत् ।। ४३ ।।
कुशद्वयं घृताक्तं तु यमाय नम इत्यपि ।
स्वाहेति चाष्टौ होमांश्च कृत्वा तिस्रस्तिलाहुतीः।। ४४ ।।

हुत्वा वदेद्यमाग्नेश्च गर्भाधानमितीरयेत् ।
कर्मेदमिति चोक्त्वा वै चाग्नौ पुष्पाक्षतं क्षिपेत् ।। ४५ ।।
ततः पुंसवनं कर्म सीमन्तं जातकर्म च ।
नाम बहिर्निष्क्रमणमन्नप्राशनमेव च ।। ४६ ।।
चूडोपनयनं वेदारम्भं चैव विवाहकम् ।
पूर्ववद्धोमयेद्देवि !यमेन दत्तमन्त्रकैः।। ४७ ।।
समिदाज्यचरुभिस्तु सहस्रं होमयेद्बुधः।
यमस्यैव च गायत्र्या होमं कुर्य्याद्विचक्षणः।। ४८ ।।
वैवस्वताय विद्महे दण्डहस्ताय धीमहि ।
तन्नो यमः प्रचोयदयात् ।। ४९ ।।
औदुम्बरस्य समिधं चरुभिः समिदाज्यकैः।
ततश्च वाराधिपतिं तिथिदेवं च संहुनेत् ।। ५० ।।
ग्रहादीनां पुनर्होमं कृत्वा पूर्णाहुतिं चरेत् ।
वर्द्धनीकलशेनैव कृत्वा राज्ञोऽभिषेचनम् ।। ५१ ।।
शान्तिपाठं ततः कुर्य्यात् पावमानादिकैर्नृपः।
ब्रह्मा प्रतिपदः प्रोक्तो द्वितीयायास्तु त्वाष्ट्रकः।। ५२ ।।
जनार्द्दनस्तृतीयायाः चतुर्थ्यास्तु यमस्तथा ।
पञ्चम्याः सोम एव स्यात् षष्ठ्याश्चैव कुमारकः।। ५३ ।।
सप्तम्याः मुनयः प्रोक्ता अष्टम्याःवसवस्तथा ।
नवम्यास्तु पिशाचाश्च दशम्याः धर्म एव च ।। ५४ ।।
एकादश्यास्तथा रुद्रः द्वादश्यास्तु रविस्तथा ।
त्रयोदश्या मन्मथस्तु चतुर्द्दश्यास्तु यक्षकाः।। ५५ ।।
पञ्चदश्यास्तु पितरः विश्वे च पौर्णमासके ।
अच्छिद्रकरणं कुर्य्याद् दीनानाथांश्च तोषयेत् ।। ५६ ।।
पुनः शृणु नैऋतस्य संक्षेपेण वदामि ते ।। ५७ ।।

इति श्रीवामदेवसंहितायामुत्पातविधिकथने एकत्रिंशोऽध्यायः।।

द्वात्रिंशोऽध्यायः

इदानीं शृणु भो देवि ! नैऋतस्य च यो विधिः।
एवमेव कृतं सर्वं विशेषं शृणु पार्वति !।। १ ।।
नैऋतस्य च यद्ध्यानं तद्वदामि शृणु प्रिये !।
द्विभुजं नैऋतं देवं प्रेतवाहनमुत्तमम् ।। २ ।।
कृष्णं खड्गधरं नित्यं वन्देऽहं राक्षसान्तकम् ।
इत्येतैर्नैर्ऋतैर्मन्त्रैः पूजयेत्प्रेतवाहनम् ।। ३ ।।
अग्निं कुर्य्यान्नैर्ऋतस्य कटाभिस्तस्य पत्नीका.।
पूर्ववदग्निसंस्कारं कृत्वा होममनन्तरम् ।। ४ ।।
तद्वासरपतेर्होमं कृत्वा गायत्री तस्य च ।
नैऋताय विद्महे खड्गहस्ताय धीमहि ।
तन्नो निर्ऋतिः प्रचोदयात् ।। ५ ।।
पुनः शृणु देववरे !वरुणस्य च यो विधिः।
तद् वदामि तस्य ध्यानं यद्विशेषं शृणुष्व मे ।। ६ ।।
शुक्लरूपं पाशधरं वरुणं हंसपृष्ठगम् ।
द्विभुजं शान्तवपुषं शुक्लवस्त्रधरं भजे ।। ७ ।।
पूजयेत्तं तस्य मन्त्रैर्मतोऽप्यग्निं शृणुष्व मे ।
पूर्ववच्च ततः कृत्वा तत्पत्नी वरुणानी च ।। ८ ।।
दशकर्मविधानेन होमं कुर्य्याद्विचक्षणः।
तद्वासरपतेः पूजां कृत्वा होमं समाचरेत् ।। ९ ।।
वैतसं समिधं प्रोक्तां तद्गायत्रीं शृणुष्व मे ।
ओं वरुणाय विद्महे जलाधिपाय धीमहिमन्त्रांशः त्यक्तः।। १० ।।
पुनर्वच्मि शृणुष्व त्वं वायोश्च यो विधिर्भवेत् ।
तद्ध्यानं शृणु भो देवि! यच्छ्रुत्वा सुखमेधते ।। ११ ।।

मृगवाहनकं देवं रक्तवर्णं द्विहस्तकम् ।
गदाधरं प्राणधरं वन्दे वायुं वरप्रदम् ।। १२ ।।
एवं ध्यात्वा पूजयेत्तं वातो वावेनमन्त्रकैः।
तदग्निं शृणु गौराङ्गि ! तत्पत्नी प्राणवल्लभा ।। १३ ।।
चिन्तयेत्तामृतुमतीं दशकर्म च कारयेत् ।
तद्वासरपतेः पूजां कृत्वा होमं चरेद्द्विजः।। १४ ।।
मत्तः शृणु पुनर्देवि ! कुवेरस्य च यो विधिः।
सर्वं कृत्वा पूर्ववच्च विशेषं ध्यानमुच्यते ।। १५ ।।
गौरवर्णं द्विभुजं च गदाहस्तं सुनिर्मलम् ।
ईशमित्रं यक्षराजं भजे तं शान्तिकारकम् ।। १६ ।।
कुविदङ्गेन मन्त्रेण कुवेरं पूजयेद्बुधः।
तत्पत्नीं सुन्दरीमेव चैतामृतुमतीं स्मरेत् ।। १७ ।।
दशकर्मविधानेन होमयेत्तदनन्तरम् ।
तद्वासरपतेर्होमं कुर्य्याद् गायत्री तस्य च ।। १८ ।।
ओं कुवेराय विद्महे गदाहस्ताय धीमहि ।
तन्नः कुवेरः प्रचोदयात् ।। १९ ।।
पुनः शृणु ह्यम्विके ! च तथेशानस्य कर्मणि ।
विशेषं शृणु देवेशि ! पूर्ववच्च नृपश्चरेत् ।। २० ।।
तद्ध्यानं वच्मि संक्षेपादुत्पातशान्तिकारकम् ।
वृषध्वजं शूलहस्तं शुक्लवर्णं च त्रीक्षणम् ।। २१ ।।
भस्मभूषितसर्वाङ्गं भजेऽहं सुखदायकम् ।
शशिकलां च तत्पत्नीं ध्यायेदृतुमतीं तथा ।। २२ ।।
दशकर्मविधानेन होमयेत्तद्विचक्षणः।
तद्वासरपतेर्होमं कृत्वा गायत्री तस्य च ।। २३ ।।

तत्पुरुषाय विद्महे महादेवाय धीमहिं ।
तन्नो रुद्रः प्रचोदयात् ।। २४ ।।
भूयः शृणु महादेवि !ब्रह्मणोऽप्यूर्द्ध्वदेशके ।
विशेषं वच्मि तद्ध्यानं यच्छ्रुत्वा मोक्षमाप्नुयात् ।। २५ ।।
चतुर्मुखं गौरवर्णं चतुर्भुजमपि प्रभुम् ।
श्रुवस्रुग्धारिणं देवं वन्देऽहं सकलप्रदम् ।। २६ ।।
आब्रह्मन् ब्रह्मणो मन्त्रेणार्च्चयेत्तं यथाविधि ।
तत्पत्नीं चापि सावित्रीं ध्यायेदृतुमतीं तथा ।। २७ ।।
दशकर्मविधानेन होमो गायत्री तस्य च ।
तत्पुरुषाय विद्महे सुरेन्द्राय धीमहि
तन्नो ब्रह्मा प्रचोदयात् ।। २८ ।।
पुनर्वच्मि शृणुष्व त्वमनन्तस्य च यो विधिः।
तद्ध्यानं येन रूपेण कथयामि नृप स्मृतम् ।। २९ ।।
सहस्रशिरसं गौरं सहस्रमुखमेव च ।
सीरपाणिं बहुभुजं वन्दे पृथ्वीधरं शुभम् ।। ३० ।।
नमोऽस्तु सर्पेभ्य इति मन्त्रेण पूजयेच्च तम् ।
नागपत्नीमृतुमतीं दशकर्मणि होमयेत् ।। ३१ ।।
तद्गायत्रीं वदामि त्वं प्रयत्नाच्छृणु पार्वति! ।
तत्पुरुषाय विद्महे लाङ्गलहस्ताय धीमहि ।
तन्नो नागः प्रचोदयात् ।। ३२ ।।
एतत्कृत्यं भवेद्देवि ! जनाश्च शुभमाप्नुयुः।
जगन्नाथगृहे देवि चोत्पातो जायते यदा ।। ३३ ।।
विधिनैतेन कुर्य्याच्चेत्तत्सर्वं सफलं भवेत् ।। ३४ ।।

इति श्रीवामदेवसंहितायां श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये हरगौरीसंवादे उत्पातविधिकथनं नाम द्वात्रिंशोऽध्यायः।।


CHANDANA YATRA

कपिलसंहिता

कपिलसंहिता

प्रथमोऽध्यायः

श्रीशिवाय नमः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव [1] ततो जयमुदीरयेत् ।। १ ।।
पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिवाहवः ।। २ ।।

सत्यजिदुवाच

मया श्रुतानि क्षेत्राणि पुण्यान्यघहराणि च ।
इदानीं श्रोतुमिच्छामि क्षेत्राण्युत्कलदेशके ।। ३ ।।
तेषु क्षेत्रेषु यत् पुण्यं यत्तीर्थं याश्च देवताः ।
यदाश्रमं च या नद्यस्तान् सर्वान् कथयस्व माम् ।। ४ ।।
त्वत्प्रसादाद्भविष्यामि कृतार्थोऽहं महामुने ।
सर्वाभिर्देवताभिस्त्वं वन्द्यः पूज्यतमः प्रभो ।। ५ ।।
त्वं हि सर्वाणि जानासि पुराणानि दशाष्ट च ।
सर्वशास्त्राणि जानासि सर्वज्ञस्त्वं महामुने ।। ६ ।।

कपिल उवाच

कथयामि रहस्यं त्वं शृणुष्वेकमना नृप ।
येषां स्मरणमात्रेण किल्विषा यान्ति वै क्षयम् ।। ७ ।।

---

(१) व्यासं

वर्षाणां भारतः श्रेष्ठो देशानामुत्कलः स्मृतः ।
उत्कलस्य समो देशो देशो नास्ति महीतले ।। ८ ।।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
ऋषीणां चैव संवादं भरद्वाजेन धीमता ।। ९ ।।
पुष्करे च वने पुण्ये तिष्ठन्तो मुनिसत्तमाः ।
भरद्वाजमिदं प्रोचुस्ते सर्वे तु हतांहसः ।। १० ।।

ऋषय ऊचुः

अस्मिन् पुण्यवने विप्र यत्पुण्यं समुदाहृतम् ।
पापानां चैव यद्भोग्यं तत्सर्वं कथयस्व नः ।। ११ ।।

भरद्वाज उवाच

अस्मिन् पुण्यवने विप्रा ये वसन्ति नरोत्तमाः ।
तेषां भाग्यवतां जन्म सफलं गीयते द्विजैः ।। १२ ।।
पुष्करेऽस्मिन् वने विप्रा येऽर्च्चयन्ति जनार्द्दनम् ।
सर्वपापक्षयं कृत्वा हरेः पदमवाप्नुयुः ।। १३ ।।
अत्र ये स्थातुमिच्छन्ति वीतरागादिकल्मषाः ।
तेषां भाग्यवतां पित्रोः सफलं जीवितं श्रुतम् ।। १४ ।।
येऽत्र दानं द्विजातिभ्यः संप्रयच्छन्ति भक्तितः ।
ते स्वर्गलोकमासाद्य न च्यवन्ति कदाचन ।। १५ ।।
स्वल्पपुण्यं बहुतरं भवत्यत्र तपोधनाः ।
देवताः स्थातुमिच्छन्ति अन्येषां का कथा द्विजाः ।। १६ ।।
स्वपन्त्यत्र तु ये ते वै प्रणमन्ति जनार्द्दनम् ।
भोजनं कुर्वते येऽत्र ते यजन्ति महेश्वरम् ।। १७ ।।
एवमादिगुणाश्चास्य पुष्करस्य तपोधनाः ।
अत्र प्राणान् परित्यज्य गताः स्वर्गं नरोत्तमाः ।। १८ ।।

एतत् पुण्यतमं तीर्थं वनानामुत्तमं श्रुतम् ।
देवताभिः समाजुष्टं सर्वतीर्थैरभिप्लुतम् ।। १९ ।।
वकुलैश्चम्पकैवृक्षैर्दाडिमैरुपशोभितैः ।
अशोकैश्चैव पुन्नागैः कर्णिकारैः सपाटलैः ।। २० ।।
पुगैः पनसकैर्वृक्षैर्नारिकेलैश्च खर्जुरैः ।
सालतालतमालैश्च वटैरश्वत्थकैस्तथा ।। २१ ।।
एवं नानाविधैर्वृक्षैः पूरितं तत् समन्ततः ।
मल्लीजातीसमाकीर्णं कुन्दपुष्पैस्तु शोभितम् ।। २२ ।।
तुलसीदमनैर्युक्तं कुन्दपुष्पैस्तु शोभितम् ।
तुलसीदमनैर्युक्तं पवित्रं पापनाशनम् ।। २३ ।।
अत्र पापं तु कुर्वन्ति ये नराः मोहसंयुताः ।
न तेषां तु पुनर्जन्म भवेद् वै भूमिपालकाः ।। २४ ।।
अणुमात्रमघं चात्र भवेद् वै पर्वतोपमम् ।
अत्र प्रतिग्रहं घोरं हालाहलविषोपमम् ।। २५ ।।
अन्यक्षेत्रेषु यत् पुण्यं तदत्रापि क्षयं भवेत् ।
ईषत्पापं भवेच्चात्र मेरुतुल्यं महीसुराः ।। २६ ।।
एतस्मात्कारणाद्विप्रा यदिच्छथ परां गतिम् ।
पापानि च परित्यज्य पुण्यमत्र समाचर ।। २७ ।।
इति तस्य वचः श्रुत्वा मुनयः पुण्यलालसाः ।
ऊचुस्ते घनगम्भीरं भरद्वाजं महद्वचः ।। २८ ।।

ऋषय ऊचुः

दुश्चारं त्वत्र पुण्यं वै भरद्वाजमहामुने ।
पापं पुण्यं समं यत्र तत्स्थानं वद नः प्रभो ।। २९ ।।

भरद्वाज उवाच

अयमर्थो मया पृष्टः कुशकेतुः पुरा द्विजाः ।
स यदाह शृणुध्वं तद् भवपाशविमोचनम् ।। ३० ।।

देशानां प्रवरो ह्येक ओड्रदेशोऽतिविश्रुतः ।
पुण्यायन्ते च पापानि तत्र देशे वृषप्रदे ।। ३१ ।।
पुण्यक्षेत्राणि तीर्थानि तत्र सन्ति महर्षयः ।
अल्पपुण्यं बहुतरं भवेत्तत्र न संशयः ।। ३२ ।।

इति श्रीकपिलसंहितायाम् ऋषिप्रश्नो नाम प्रथमोऽध्यायः ।।

द्वितीयोऽध्यायः

ऋषय ऊचुः

विस्तरेण समाख्याहि ओड्रदेशमाहात्म्यकम् ।
यास्यामस्तद् वयं देशं तिष्ठामस्तत्र देशके ।। १ ।।

भरद्वाज उवाच

सर्वपापहरं देशं ओड्रं देवैस्तु कल्पितम् ।
शृणुध्वं कथ्यमानं हि विस्तरेणास्य भो द्विजाः ।। २ ।।
तस्मिन्नोड्रे [१]सदा सन्ति कृष्णार्कपार्वतीहराः ।
एकस्यैकस्य क्षेत्रं तु सर्वपापप्रणाशनम् ।। ३ ।।
तत्र देशे द्विजश्रेष्ठा नदीनामुत्तमा नदी ।
महानदीति विख्याता सर्वपापप्रणोदिनी ।। ४ ।।
तस्या नद्यास्तु माहात्म्यं कथयामि पुनः पुनः ।
यस्यां स्नात्वा नरः श्रेष्ठं दिव्यलोकमवाप्नुयात् ।। ५ ।।
पुरा त्रेत्रायुगे विप्राः सुकान्तिर्नामतो श्रुतः ।
ब्राह्मणः सर्वशास्त्रज्ञो नीतिज्ञः पुलहात्मजः ।। ६ ।।

---

(१) तस्मिन्क्षेत्रे

महेन्द्रपर्वते तिष्ठन् स प्राह पितरं द्विज ।

सुकान्तिरुवाच

एतत्स्थानं जनाकीर्णं बभूव हि पितः प्रभो ।
तपश्चर्त्तुं महारण्यं प्रयत्नात्कथयस्व माम् ।। ७ ।।

पुलह उवाच

सर्वद्वन्दपरित्यक्तं सर्वपक्षिसुखावहम् ।
मृगानेकैः समाकीर्णं सिद्धगन्धर्वसेवितम् ।। ८ ।।
तपसस्तु महास्थानं विद्वद्भिः परिकीर्त्तितम् ।
ब्रज त्वं सुमना भूत्वा फलदं विन्ध्यपर्वतम् ।। ९ ।।

भरद्वाज उवाच

पितृवाक्यमिदं श्रुत्वा सुकान्तिः सहसा ययौ ।
फलदं सर्वपुण्यानां विन्ध्याद्रिं तपसे बुधाः ।। १० ।।
गत्वा स दृष्टवान् स्थानं तपसे विजनं महत् ।
तपोऽत्र च करिष्यामि मनसेदं व्यचारयत् ।। ११ ।।
तत्र दृष्ट्वा च सलिलं सलिलार्थं तपोऽकरोत् ।
आयाहि निम्नतो देवि सरित्श्रेष्ठेऽम्बुधिप्रिये ।। १२ ।।
तपोऽत्राहं करिष्यामि मयि गङ्गे कृपां कुरु ।
जप्त्वेवं परमं मन्त्रं मन्त्रसिद्धिमवाप ह ।। १३ ।।
मन्त्रस्यास्य प्रसादेन विप्रस्य तपसस्तथा ।
सर्वपापहरा तत्र गङ्गात्ववततार ह ।। १४ ।।

गङ्गोवाच

साधु पुत्र महाभाग तपस्तप्तं त्वया महत् ।
त्वदर्थमाजगामाहं विन्ध्यशैलं नगोत्तमम् ।। १५ ।।
इदानीं स्वेच्छया विप्र त्वं कुरुष्व तपो महत् ।
तावदत्र तु तिष्ठामि यावत्ते तपसः फलम् ।। १६ ।।

विन्ध्यादस्माद् गमिष्यामि पश्चाच्च पूर्वसागरम् ।
इदानीमत्र तिष्ठामि तपसोऽर्थे तवानघ ।। १७ ।।
देवानां दुर्लभा चाहं मनुष्याणां च का कथा ।
प्राप्ताहं च त्वया ब्रह्मन् पुलहस्य प्रभावतः ।। १८ ।।

भरद्वाज उवाच

गङ्गायाः वचनं श्रुत्वा प्रीतात्मा पुलहात्मजः ।
उवाच घनगम्भीरं वचनं जाह्नवीं द्विजाः ।। १९ ।।
भूतनाथस्य देवस्य प्रिया च चक्रपाणिनः ।
ब्रह्मणस्त्वं प्रिया देवि सर्वेषां चैव दुर्लभा ।। २० ।।
ब्रह्मलोकात् पुरा जाता तस्माच्छङ्करमूर्द्धनि ।
तस्मात् वहसि मेदिन्यां प्राणिनां हितकारणात् ।। २१ ।।
जाह्नवीमिदमुक्त्वा तु कृताञ्जलिपुटोऽग्रतः ।
प्रसन्नात्मा द्विजश्रेष्ठः स्तुतिमेतां चकार ह ।। २२ ।।

सुकान्तिरुवाच

नमामि देवीं पापघ्नीं जाह्नवीं भक्तवत्सलाम् ।
त्रैलोक्यपावनी त्वं हि रक्ष मां शरणागतम् ।। २३ ।।
सर्वपापक्षयकरी सर्वलोकार्त्तिनाशिनी ।
पूज्या त्वं सर्वदेवैस्तु त्वां नतोऽस्मि पुनः पुनः ।। २४ ।।
गिरिजानाथशिरसि स्थिता त्वं जनपावनी ।
त्वां नतोऽस्मि स्थितां गङ्गां पितामहकमण्डलौ ।। २५ ।।
विष्णोः पदाब्जजां त्वां हि भगीरथवरप्रदाम् ।
प्रणतोऽस्मि महाभागां पावनीं सगरात्मजाम् ।। २६ ।।
इति कृत्वा स्तुतिं विप्रः पपात धरणीतले ।
अथ गङ्गा महापुण्या दृष्ट्वा भक्तिं द्विजस्य च ।। २७ ।।

विप्रमुत्तोलयामास बाहुभ्यां पतितं भुवि ।
मुखे तु चुम्बनं दत्त्वा मार्जयित्वा तनो रजः ।।
क्रोडे निवेशयामास उवाच मधुरं वचः ।। २८ ।।

गङ्गोवाच

पुत्रस्त्वं मे महाभाग धर्मतो नात्र संशयः ।
तवाद्यापि च माताहं वरं वरय सुव्रत ।। २९ ।।

सुकान्तिरुवाच

यदुक्तं हि त्वया पूर्वं गतास्मि पूर्वसागरम् ।
इदानीं गच्छ भो मातर्मम कीर्त्तिः सदास्तु वै ।। ३० ।।
अपरं वरमिच्छामि प्रसन्ना यदि दीयताम् ।
भवत्पुत्रस्य सम्पूर्णं तपो मे विघ्नवर्जितम् ।। ३१ ।।

गङ्गोवाच

एवमस्तु महाभाग तपस्ते विघ्नवर्जितम् ।
स्वनाम्ना चात्र विख्यातिं न गतास्मि द्विजोत्तम ।। ३२ ।।
महानदीति विख्यातं गमिष्याम्यत्र सर्वदा ।
भगीरथेन आनीता यथार्थं पापनाशिनी ।। ३३ ।।
तस्माच्छतगुणा प्रोक्ता त्वयाहं दुरितापहा ।
सर्वदा तव कीर्त्तिस्तु स्थास्यत्यत्र महीतले ।। ३४ ।।

भरद्वाज उवाच

इति दत्वा वरं तस्मै गङ्गा त्रैलोक्यपावनी ।
धृत्वाम्बुविग्रहं सा च ववाह पूर्वसागरम् ।। २५ ।।
महानदी महापुण्या महादेवप्रिया शुभा ।
द्वितीयविग्रहं कृत्वा आस्ते गङ्गा तु मायया ।। ३६ ।।
उत्पलेशं समासाद्य यावच्चित्रा महेश्वरी ।
तावच्चित्रोत्पला ख्याता सर्वपुण्यप्रदा नदी ।। ३७ ।।

महानद्यां नरः स्नात्वा दृष्ट्वा वै पार्वतीहरम् ।
सर्वपापविनिर्मुक्तो गङ्गास्नानफलं लभेत् ।। ३८ ।।

इति श्रीकपिलसंहितायां महानदीमाहात्म्यं नाम द्वितीयोऽध्यायः ।।

तृतीयोऽध्यायः

ऋषय ऊचुः

पुरा ते कथिता विप्र कृष्णार्कपार्वतीहराः ।
तेषां क्षेत्रं च तीर्थं च कथयस्व यथार्थतः ।। १ ।।

भरद्वाज उवाच

आदौ कृष्णस्य माहात्म्यं माहात्म्यं क्षेत्रतीर्थयोः ।
संक्षेपेण प्रवक्ष्यामि शृणुध्वं भो द्विजोत्तमाः ।। २ ।।
क्षेत्रं नीलाचलं पुण्यं दारुब्रह्मस्वरूपिणः ।
यस्मिन् क्षेत्रे त्यजन् देहं नरो वैकुण्ठमाप्नुयात् ।। ३ ।।
नीलाचलं महापुण्यं नीरदाभप्रियं महत् ।
दशयोजनविस्तीर्णमुच्छ्रितं योजनार्द्धकम् ।। ४ ।।
नानामुनिगणाकीर्णं विहङ्गैरुपसेवितम् ।
पादपैः सफलैर्युक्तं पुष्पैर्नानाविधैरपि ।। ५ ।।
साक्षाद् वैकुण्ठरूपं तत् क्षेत्रं श्रीपुरुषोत्तमम् ।
क्षेत्राणामपि क्षेत्रं च तीर्थानामपि यद् वरम् ।। ६ ।।
निद्रा समाधिः प्रासङ्गः परमानन्दनिर्वृतिः ।
सर्वकर्माणि धन्यानि क्षेत्रे श्रीपुरुषोत्तमे ।। ७ ।।
यस्मिन् क्षेत्रे सदा सन्ति ब्रह्माद्या देवतागणाः ।
जगन्नाथं तु पश्यन्ति स्नात्वा तीर्थे महोदधौ ।। ८ ।।

नीलाचलवरे विप्रा पुरा नीलाश्मरूपधृक् ।
इदानीं तु जगन्नाथो भाति दारवलीलया ।। ९ ।।

ऋषय ऊचुः

पुरा कथं भरद्वाज देवदेवो जगत्पतिः ।
नीलाश्माङ्गस्तु नीलाद्रौ साम्प्रतं च कथं पृथक् ।। १० ।।

भरद्वाज उवाच

संक्षेपेण प्रवक्ष्यामि तां कथां वै सनातनीम् ।
यां श्रुत्वा च पुनर्मोहं न गच्छन्ति च मानवाः ।। ११ ।।
आसीत् सत्ययुगे विप्रा इन्द्रद्युम्नो महीपतिः ।
स वै क्षीरसमुद्रेन्दुसमः शत्रुकुलान्तकः ।। १२ ।।
देवदेवे जगन्नाथे भक्तिर्यस्य दृढा मता ।
यस्तु साक्षात् स्वयं विप्रा ब्राह्मणः पञ्चमस्तनुः ।। १३ ।।
यदा श्रीभगवान् शम्भुर्गृह्णाति स्म हिमाद्रिजाम् ।
तदा जघान सहसा ब्रह्मणः पञ्चमं शिरः ।। १४ ।।
तदा प्रभृति भो विप्रा ब्रह्मा चैव चतुर्मुखः ।
तच्छिरस्तु महाबाहुरिन्द्रद्युम्नेति विश्रुतः ।। १५ ।।
यद्वा तपस्वी दान्तस्तु शान्तश्चातिथिपूजकः ।
वैष्णवः सत्यसम्पन्नो जितक्रोधो जितेन्द्रियः ।। १६ ।।
एवमेष महीपालश्चिन्तयामास चेतसि ।
विष्णुं जिष्णुं महाबाहुं लोचनाभ्यां पिबाम्यहम् ।। १७ ।।
इत्थं चिन्तयतस्तस्य महीपालस्य भो द्विजः ।
स्वप्नेन दर्शनं दत्वा विष्णब्रूयादिदं वचः ।। १८ ।।

श्रीभगवानुवाच

इन्द्रद्युम्न महीपाल शृणु मद्वचनं हितम् ।
यच्छ्रुत्वा त्वं पुनर्मोहं नैव यास्यसि सुव्रत ।। १९ ।।

लवणस्योदधेस्तीरे बालुकाभिः समावृते ।
तत्र नीलाचलं क्षेत्रं मम तिष्ठति मुक्तिदम् ।। २० ।।
रहस्यं परमं स्थानं ब्रह्मादीनां च दुर्लभम् ।
योगिनो वीतरागाश्च न जानन्ति मम स्थलम् ।। २१ ।।
गोप्यं पुण्यप्रदं क्षेत्रं मत् पूज्यं पुरुषोत्तमम् ।
प्रलये च महीपाल नष्टे स्थावरजङ्गमे ।।
विश्वेऽस्मिन् दुःखिते चैव कारुण्यजलसंप्लुते ।। २२ ।।
महाक्षेत्राणि पुण्यानि तीर्थान्यायतनानि च ।
आश्रमादीनि रम्याणि वैकुण्ठं क्षीरसागरम् ।। २३ ।।
एतानि संपरित्यज्य सुस्थानानि महीपते ।
वटपत्रपुटस्थोऽहमास्ते श्रीपुरुषोत्तमे ।। २४ ।।
तत्र गच्छ महीपाल प्रयत्नेन सुसंयतः ।
द्रक्ष्यसे त्वं तपस्तप्त्वा इन्द्रनीलतनुं हि माम् ।। २५ ।।
रोहिण्याख्यं महत्तीर्थं तत्पार्श्वे चैव तिष्ठति ।
तत्र भक्त्या नरः स्नात्वा मद्देहे लीयते ध्रुवम् ।। २६ ।।
एवं निगदते तस्मिन् केशवे केशिसूदने ।
इन्द्रद्युम्नस्य राजर्षेः स्वयं निद्रा बभञ्ज ह ।। २७ ।।
तत्र सुप्तोत्थितो राजा न दृष्ट्वा श्यामसुन्दरम् ।
रुरोद भृशदुःखार्त्तः कृष्ण कृष्णेति कीर्त्तयन् ।। २८ ।।
देवानां ब्राह्मणानां च किं मयापकृतं कृतम् ।
पश्यतो मे गतः कुत्र घनश्यामो निरञ्जनः ।। २९ ।।
जलार्थमागता गावः किं मे नियमिता पुरा ।
पश्यतो मे गतः कुत्र शङ्खचक्रधरो हरिः ।। ३० ।।
चूतनिम्बकदम्बाद्याः द्रुमाः किं छेदिता मया ।
पश्यतो मे गतः कुत्र पीतवासो गदाधरः ।। ३१ ।।

वैश्वदेवस्य वेलायां न दत्तश्चातिथिर्मया ।
पश्यतो मे गतः कुत्र देवदेवो जगत्पतिः ।। ३२ ।।
परनिन्दा कृता किं मे प्राणिप्राणं हृतं मया ।
पश्यतो मे गतः कुत्र सिन्धुजारतिदायकः ।। ३३ ।।
किं मे हता ब्राह्मणाश्च गावः किं मे सहस्रशः ।
पश्यतो मे गतः कुत्र शङ्करार्द्धशरीरकः ।। ३४ ।।
किं मे न रक्षिताः क्षिप्रं प्रजाः दुःखे परिप्लुताः ।
पश्यतो मे गतः कुत्र राघवो रावणान्तकः ।। ३५ ।।
किं मे लोष्टं तृणं काष्ठं क्षिप्तं कूपे जलाशये ।
पश्यतो मे गतः कुत्र तेन पापेन केशिहा ।। ३६ ।।
सन्ध्या किं न कृता काले तर्पणं न कृतं मया ।
पश्यतो मे गतः कुत्र गोपिकानन्दवर्द्धनः ।। ३७ ।।
इत्थं विलपतस्तस्य इन्द्रद्युम्नस्य धीमतः ।
आययुर्मन्त्रिणः पौरा धीमन्तश्च पुरोहिताः ।। ३८ ।।
ते दृष्ट्वा रोदनं तस्य इन्द्रद्युम्नस्य भूपतेः ।
प्रोचुरिदं वचः सर्वे भृशं दुःखितमानसाः ।। ३९ ।।

मन्त्रिण ऊचुः

महीपते महाबाहो किमर्थं रुदितं त्वया ।
कथयस्व यथार्थं नः साधयामो न संशयः ।। ४० ।।
इत्थं प्रबोधितो भूपो मन्त्रिभिश्च पुरोहितैः ।
तानुवाच प्रयत्नेन हर्षगद्गदया गिरा ।। ४१ ।।

इन्द्रद्युम्न उवाच

स्वप्ने दृष्टो जगन्नाथः शङ्खचक्रगदाधरः ।
वनमाली पीतवासो घनश्यामो रमापतिः ।। ४२ ।।

स उवाच हृषीकेशो मां स्वप्ने पापकारिणम् ।
गच्छ भूप तपस्तप्त्वा द्रक्ष्यसे नीलपर्वते ।। ४३ ।।
इदानीं च गमिष्यामि नीलाद्रिं निर्मलप्रदम् ।
कुरुध्वं मन्त्रिणो दीर्घं सम्भारं मम सम्मतम् ।। ४४ ।।
स्वीकृत्य सर्वपौराश्च मन्त्रिणश्च पुरोहिताः ।
आविवेश पुरं राजा ययुः स्वं स्वं पुरं च ते ।। ४५ ।।

भरद्वाज उवाच

एतस्मिन्नन्तरे विप्रा यमस्तु रविनन्दनः ।
स्वपदद्दढकामस्तु नीलपर्वतमाविशत् ।। ४६ ।।
दुःखितो यमुनाभ्राता वेपमानः पुनः पुनः ।
स्थिताग्रे वासुदेवस्य वाक्यमेतदुवाच ह ।। ४७ ।।

यम उवाच

नमोऽस्तु विष्णवे तुभ्यं सर्वलोकहितात्मने ।
रजस्तमोविमुक्तस्त्वं स्वप्रकाश नमोऽस्तु ते ।। ४८ ।।
सृष्टोऽहं प्रेतराजस्ते देवदेव जगत्पते ।
किं करोमि महाबाहो त्वं वै दीनार्त्तिनाशनः ।। ४९ ।।

श्रीभगवानुवाच

किं ते दुःखं समुत्पन्नं कथयस्व ममाग्रतः ।
तद् दुःखं छेदयिष्यामि सत्यं च रविनन्दन ।। ५० ।।

यम उवाच

कृतं देव त्वया सत्यमिदानीं कथयाम्यहम् ।
तत् कुरुष्व महाबाहो श्वणुष्व मधुवंराज ।। ५१ ।।
इन्द्रद्युम्नस्तु नृपतिरागच्छति वलान्वितः ।
कारयिष्यति प्रासादं तवार्थं सुमनोहरम् ।। ५२ ।।

तत्रस्थं माधवं दृष्ट्वा मानवाः पापकृत्तमाः ।
मुक्तिं यास्यन्ति ते सर्वे किं करोमि वद प्रभो ।। ५३ ।।
इदानीं च जगन्नाथ नीलेन्द्राङ्गं परित्यज ।
पातालं यातु तत्तीर्थं रोहिणाख्यं च केशव ।। ५४ ।।
यस्मिन् स्नात्वा महाबाहो काको मुक्तिमवाप ह ।
यद्रूपं च समालोक्य शवरस्त्वजरामरः ।। ५५ ।।

श्री भगवानुवाच

सत्यमुक्तं मया पूर्वमिदानीं किं करोम्यहम् ।
यदुक्तं ते वचः सर्वमेवं भवतु भास्करे ।। ५६ ।।
भरद्वाज उवाच
आज्ञां प्राप्य जगन्नाथात् स्वगृहं भास्करिर्ययौ ।
देवदेवोऽपि भगवानास्ते नीलाचले शुभे ।। ५७ ।।

इति श्री कपिलसंहितायां यमवरदानं नाम तृतीयोऽध्यायः ।।

चतुर्थोऽध्यायः

नीलशैलं जगमाथ मन्त्रिभिः सह पार्थिवः ।
पुरोहितैः पुराणज्ञै प्रजाभिरश्ववारणैः ।। १ ।।
तत् कुरुष्व म ज्ञैः प्रजाभिरश्ववारणैः ।। १ ।।
गच्छन्मार्गे ददर्शाथ वनैकाम्रे शिवोत्तमम् ।
पूजयित्वा च तं नत्वा गतवान्नीलपर्वतम् ।। २ ।।
स्वर्णकूटात्परं यावत् नीलशैलो विराजते ।
एतन्मध्ये ददर्शासौ शङ्खचक्रधरान् नरान् ।। ३ ।।
समीपं तस्य सम्प्राप्य राजासौ दीनमानसः ।
करसम्पुटिकां बद्ध्वा नारदं पर्यपृच्छत ।। ४ ।।

इन्द्रद्युम्न उवाच

स्फुरते दक्षिणं चक्षुर्वामाङ्गश्च प्रकम्पते ।
ममैतत्कारणं ब्रूहि त्रिकालज्ञस्त्वमेव हि ।। ५ ।।

नारद उवाच

इन्द्रद्युम्न महाबाहो इन्द्रनीलतनुर्हरिः ।
पातालं गतवानद्य रोहिण्याख्यं गतं तथा ।। ६ ।।

भरद्वाज उवाच

इन्द्रद्युम्नस्तु तच्छ्रुत्वा वज्रपातसमं वचः ।
पपात धरणीपृष्ठे गिरेः शृङ्गमिवापरम् ।। ७ ।।
तं दृष्ट्वा दुःखिताः सर्वे मन्त्रिणश्च पुरोहिताः ।
शीघ्रमुत्तोलयामासुर्नृपतिं पतितं भुवि ।। ८ ।।
एतस्मिन्नन्तरे विप्रा नारदो मुनिपुङ्गवः ।
उवाच वचनं रम्यं राजानं दीनमानसम् ।। ९ ।।

नारद उवाच

ब्रह्मणा प्रेषितोऽहं च तवार्थं नात्र संशयः ।
इदानीं तु जगन्नाथः पुनश्चावतरिष्यति ।। १० ।।

भरद्वाज उवाच

इत्युक्ते नारदे चैव चक्रुः कोलाहलं जनाः ।
शङ्खचक्राङ्किततनुः दारुरुत्प्लवते द्विजाः ।। ११ ।।
जनानां तद्वचः श्रुत्वा स नृपो हर्षमानसः ।
तपोधनं करे कृत्वा वेलामब्धेः समाययौ ।। १२ ।।
तत्र दृष्टवतौ दारु समुद्रान्तःव्यवस्थितम् ।
दृष्ट्वा हृष्ट्वा समानीतं दारु राज्ञा जनैः सह ।। १३ ।।
विश्वकर्मा ततः शीघ्रं प्रतिमां निर्ममेऽद्वयाम् ।
बलभद्रो जगन्नाथः सुभद्रा च सुदर्शनम् ।। १४ ।।

बनमाली पीतवासः शङ्खचक्रधरो हरिः ।
हलपाणिर्गदापाणिः फणाविकटमस्तकः ।। १५ ।।
सुभद्रा पद्महस्ता च स्मम्भरूपं सुदर्शनम् ।
एताश्च प्रतिमाः कृत्वा स्थापयित्वा च मण्डपे ।।
ब्रह्मलोकं महाबाहुः प्रतिष्ठार्थं समाययौ ।। १६ ।।
गत्वा च दृष्टवान् तत्र ब्राह्मणं कुशलाञ्छनम् ।
उवाच वचनं नत्वा कृताञ्जलिपुटोऽग्रतः ।। १७ ।।

राजोवाच

नमस्ते ब्रह्मणे तुभ्यं प्रजानां पतये नमः ।
त्राहि मां करुणापाङ्ग पूरयस्व मनोरथम् ।। १८ ।।

ब्रह्मोवाच

साधु पुत्र महाबाहो वैष्णवस्त्वदृशो भुवि ।
नातीतो वर्तमानश्च न भविष्यति मे मतिः ।। १९ ।।
अधुनाहं गमिष्यामि तवार्थं चक्रपाणिनः ।
प्रतिष्ठां च करिष्यामि तत्र शीघ्रं महीपते ।। २० ।।

भरद्वाज उवाच

ब्रह्मणो वचनं श्रुत्वा राजा हृष्टमनाऽभवत् ।
ब्रह्मलोकात् परिभ्रष्टो भूमिलोकं समाविशत् ।। २१ ।।
आगत्य दृष्टवान् तत्र गालं नृपतिकुञ्जरम् ।
निगृह्य तं तु राजेन्द्रो जग्राह हरिमव्ययम् ।। २२ ।।
ततो ब्रह्मा ब्रह्मलोकात् भूमिलोकं समाविशत् ।
आगत्य क्षिप्रं तद्देशं प्रतिष्ठां कृतवान् च तम् ।। २३ ।।
जितं त इति मन्त्रेण अस्तुवन् देवतागणाः ।
आविर्बभूव भगवान् शङ्खचक्रधरो हरिः ।
इन्द्रद्युम्नमुवाचेदं प्रजापतिमपि च तम् ।। २४ ।।

श्रीभगवानुवाच

पुण्यक्षेत्राणि तीर्थानि परित्यज्य महीपते ।
अत्र वै सर्वभावेन स्थास्येऽहं वै परार्द्धकम् ।। २५ ।।
इन्द्रद्युम्न महीपाल शृणु मद्वचनं हितम् ।
स्नानं ज्यैष्ठं प्रकुर्वीथा गुण्डिचाख्यं महोत्सवम् ।। २६ ।।
स्नानकाले नरा ये मां द्रक्ष्यन्ति च मुदान्विताः ।
तेषां मुक्तिं प्रयच्छामि सत्यं सत्यं वदामि वाम् ।। २७ ।।
गुण्डिचाख्यां महायात्रां ये पश्यन्ति मुदान्विताः ।
सर्वपापविनिर्मुक्तास्ते यान्ति भवनं मम ।। २८ ।।
तूष्णीं बभूव भगवान् इदमुक्त्वा जनार्द्दनः ।
ब्रह्मापि ब्रह्मलोकं च गतवान् भो द्विजोत्तमाः ।। २९ ।।
इन्द्रद्युम्नोऽपि राजर्षिर्देवदेवं जगत्पतिम् ।
पूजयित्वा प्रयत्नेन ततो मुक्तिमवाप सः ।। ३० ।।
एवं पुरा जगन्नाथ इन्द्रनीलस्वरूपधृक् ।
दारुब्रह्मस्वरूपेण भातीदानीं जगत्पतिः ।। ३१ ।।

इति श्रीकपिलसंहितायां नृपमोक्षप्राप्तिर्नाम चतुर्थोऽध्यायः ।।

पञ्चमोऽध्यायः

भरद्वाज उवाच

तस्मिन् क्षेत्रे द्विजश्रेष्ठा ये वसन्ति नराः किल ।
ते यान्ति विष्णोः सान्निध्यं भासमानाः सुतेजसा ।। १ ।।
महादधौ नरः स्नात्वा दृष्ट्वा श्रीपुरुषोत्तमम् ।
ब्रह्महत्यादिपापानि क्षयित्वा मोक्षमाप्नुयात् ।। २ ।।

गङ्गायां च सरस्वत्यां गोदावर्यां च भो द्विजाः ।
यत्तत्फलमवाप्नोति लवणाम्बुधिदर्शनात् ।। ३ ।।
मार्कण्डेयं च तत्रैव तीर्थं त्रैलोक्यपावनम् ।
यत्र स्नात्वा सुराः सर्वे स्वपदं प्राप्नुयुः पुरा ।। ४ ।।
मार्कण्डेयावटं विप्राः स्वयं कृष्णेन निर्मितम् ।
हितार्थाय महर्षेश्च मार्कण्डेयस्य धीमतः ।। ५ ।।
तत्र स्नात्वा नरः श्रेष्ठो दृष्ट्वा शैलसुतापतिम् ।
कोटिजन्मकृतं पापं तत्क्षणादेव नाशयेत् ।। ६ ।।
तस्मिन्नीलाचले विप्रा देवराजस्य दक्षिणे ।
यमेश्वर इति ख्यातो यमसंयमतत्परः ।। ७ ।।
यमेश्वरं समालोक्य पूजयित्वा च भक्तितः ।
नरः शिवमवाप्नोति यमदण्डविवर्जितः ।। ८ ।।
तस्य पश्चिमदिग्भागेऽलाबुकेश्वरसंज्ञकः ।
समाश्रित्य नरस्तं च मनोरथमवाप्नुयात् ।। ९ ।।
अपुत्रः पुत्रमांश्चैव व्यङ्गः कन्दर्परूपधृक् ।
भवत्येवं महीपाल तस्य लिङ्गस्य सेवनात् ।। १० ।।
कपालमोचनं नाम लिङ्गं सन्निहितं प्रभो ।
तं दृष्ट्वा विधिवद्भक्त्या ब्रह्महत्यां व्यपोहति ।। ११ ।।
तत्र नीलाचले विप्रा श्वेतगङ्गा इति श्रुता ।
श्वेतमाधवरूपेण तत्रास्ते भगवान् प्रभुः ।। १२ ।।
मत्स्यमाधवस्तत्रैव देवदेवाङ्गपार्श्वगः ।
उभयोर्दृष्टियोगेन कीटो मुक्तिमवाप्नुयात् ।। १३ ।।
ब्रह्महा च सुरापश्च गोघ्नो वा भृणघातकः ।
ते सर्वे मुक्तिमायान्ति मध्ये च श्वेतमत्स्ययोः ।। १४ ।।

श्वेतायां च नरः स्नात्वा दृष्ट्वा च श्वेतमत्स्यकौ ।
पापानि च परित्यज्य श्वेतद्वीपं व्रजेद् ध्रुवम् ।। १५ ।।
इन्द्रद्युम्नसरस्तत्र इन्द्रेण समपूजितम् ।
तदासाद्य नरो विप्रा इन्द्रेण सह मोदते ।। १६ ।।
तत्रस्थं नरसिंहं च शङ्करं नीलकन्दरम् ।
दृष्ट्वा नत्वा पूजयित्वा ज्योतिर्लोकं व्रजेन्नरः ।। १७ ।।
हरिशङ्करयोर्मध्ये यो दद्यात् पिण्डमुत्तमम् ।
पितॄणामुद्धृतिं कृत्वा रविलोकं व्रजेन्नरः ।। १८ ।।
पुण्यं कल्पवटं तत्र दारुब्रह्मसमीपतः ।
यस्य छायां समाक्रम्य ब्रह्महत्याया मुच्यते ।। १९ ।।
कृत्वा प्रदक्षिणं तस्य यस्तु तं पूजयेद् वटम् ।
तस्य जन्मशतोद्भूतं दोषं च क्षमते हरिः ।। २० ।।
मङ्गला वटमूले च देवी मङ्गलदायिनी ।
तां दृष्ट्वा पूजयित्वा च मोहबन्धाद् विमुच्यते ।। २१ ।।
वटस्य पश्चिमे भागे विमला विमलप्रदा ।
तस्या दर्शनमात्रेण विद्यावान् जायते नरः ।। २२ ।।
तदग्रे काकतीर्थश्च कोटिसूर्यसमप्रभः ।
दैत्येन्द्रोरोविदार्य्यास्ते दर्शनान्मुक्तिदो मतः ।। २३ ।।
तस्याग्रे वासुदेवस्तु शेषशायी गदाधरः ।
शङ्खचक्राङ्कितो भूत्वा वनमालाविभूषितः ।। २४ ।।
क्षीरशायी जगन्नाथः साक्षादत्र स्थितः प्रभुः ।
लक्ष्मी पादतले चास्ति कर्णमूले सरस्वती ।। २५ ।।
नाभिपद्मोपरि ब्रह्मा वेदवेदाङ्गपारगः ।
कमण्डलुधरो देवश्चतुर्बाहुश्चतुर्मुखः ।। २६ ।।

ईश्वरः पार्वतीनाथः शेषदेहत्वमाप्तवान् ।
यस्मादभिन्नः पुरुषस्तस्माद् देवत्वमास्थितः ।। २७ ।।
अनन्तोपरि देवेशः पुरुषोत्तमसंज्ञकः ।
तस्मात् वेदे पुराणे च अनन्त पुरुषोत्तमः ।। २८ ।।
पुरुषोत्तमनाम्नैत् क्षेत्रं श्रीपुरुषोत्तमम् ।
नरो मुक्तिमवाप्नोति दृष्ट्वा श्रीशेषशायिनम् ।। २९ ।।
तत्र दारुस्वरूपस्य निर्माल्यं पापनाशनम् ।
अन्नाद्यं पिष्टकं चैव यदन्यत् प्राप्यते परम् ।। ३० ।।
जगन्नाथस्य नैवेद्यं महापातकनाशनम् ।
भक्षणात् फलमाप्नोति कपिला कोटिदानजम् ।। ३१ ।।
किं तेन न कृतं पुण्यं किं तेन न कृतं तपः ।
भक्षितं येन चान्नाद्यं दारुब्रह्मस्वरूपिणः ।। ३२ ।।
जगन्नाथो यथा साक्षाद् दर्शनान्मुक्तिदो ध्रुवम् ।
तथैव मुक्तिदं ह्यन्नं जगन्नाथस्य भो द्विजाः ।। ३३ ।।
देशान्तरगतं वापि शुष्कमार्द्रमथापि वा ।
भक्षणाद् दर्शनाच्चैव द्विजातीनां च मुक्तिदम् ।। ३४ ।।
पुरुषोत्तमात् परं क्षेत्रं नास्ति नास्ति महीसुराः ।
द्विजास्तु श्वपचादन्नं यत्र भुञ्जन्ति पूपकम् ।। ३५ ।।
तस्मात् सर्वप्रयत्नेन गन्तव्यः पुरुषोत्तमः ।
द्रष्टव्यश्च जगन्नाथ आत्मनो मुक्तिकारणात् ।। ३६ ।।
वटमूले वटेशश्च सर्वपापप्रणाशनः ।
तस्य दर्शनमात्रेण सर्वपापाद् विमुच्यते ।। ३७ ।।
वाराणस्याः समं त्वस्ति क्षेत्रमेकाम्रकं वनम् ।
पुरुषाख्यं समं क्षेत्रं नास्ति त्रैलोक्यमण्डले ।। ३८ ।।

सर्वेषां चैव क्षेत्राणां राजा श्रीपुरुषोत्तमः ।
सर्वेषां चैव देवानां राजा श्रीपुरुषोत्तमः ।। ३९ ।।
किं चात्र बहुनोक्तेन भाषितेन पुनः पुनः ।
सत्यं सत्यं पुनः सत्यं क्षेत्रं न पुरुषोत्तमात् ।। ४० ।।
पुरुषोत्तममाहात्म्यं वक्तुं वर्षशतैरपि ।
न समर्थो द्विजश्रेष्ठाः किमन्यत् श्रोतुमर्हथ ।। ४१ ।।

ऋषय ऊचुः

सम्यक् प्रोक्तं त्वया क्षेत्रं मुक्तिदं पुरुषोत्तमम् ।
कथयस्व तपःस्थानं तस्मिन् क्षेत्रे द्विजोत्तम ।। ४२ ।।

भरद्वाज उवाच

पूर्वमुक्तं मया विप्रा यमेशो मुक्तिदायकः ।
इन्द्राद्या देवताः सर्वे तत्र सन्ति तपस्विनः ।। ४३ ।।
ईषत्पुण्यं भवेत्तत्र मेरुतुल्यं न संशयः ।
कुरुध्वं तत्र भो विप्रास्तपो मुक्तिप्रदायकम् ।। ४४ ।।
तत्स्थानं सुमहत्पुण्यं देवादीनां च दुर्लभम् ।
बहुपुण्येन देवाश्च तत्र सन्ति महर्षयः ।। ४५ ।।
नाना पुष्पसमायुक्तं पूगवृक्षविराजितम् ।
पनसैर्नारिकेलैश्च पूरितं तत्समन्ततः ।। ४६ ।।
करवीरैः कर्णिकारैः पाटलैश्चम्पकैस्तथा ।
मल्लिकायूथिकाभिश्च जातिभिः परिपूरितम् ।। ४७ ।।
ये जपन्ति नरास्तत्र शान्तास्तद्गतमानसाः ।
यमेश्वरप्रसादेन मन्त्रसिद्धिमवाप्नुयुः ।। ४८ ।।
सनकाद्याश्च मुनयो वसिष्ठाद्याः परन्तपाः ।
तत्र कृत्वा तपस्तीव्रं ते सर्वे मुक्तिमास्थिताः ।। ४९ ।।

एवं श्रीपुरुषाख्यस्य माहात्म्यं गदितं मया ।
अधुना च मुनिश्रेष्ठाः किं वदामि च तद्वद् ।। ५० ।।

इति श्रीकपिलसंहितायाम् ऋष्युपदेशो नाम पञ्चमोऽध्यायः ।।

षष्ठोऽध्यायः

ऋषय ऊचुः

पुरा ते गदिता विप्र कृष्णार्कपार्वतीहराः ।
इदानीं भास्करस्येह माहात्म्यं वद नः प्रभो ।। १ ।।

भरद्वाज उवाच

कथयामि रहस्यं वो मैत्रेयाख्यं वनोत्तमम् ।
तत्र गत्वा पुरा विप्राः शाम्बः कुष्ठान् मुमोच ह ।। २ ।।

ऋषय ऊचुः

कुतः समागतः शाम्बः कमाराध्य च मोचितः ।
किमर्थं तस्य देहे च वद कुष्ठं बभूव ह ।। ३ ।।

भरद्वाज उवाच

दुष्टानां निग्रहार्थाय शिष्टानां पालनाय च ।
द्वापरे कृष्णरूपेण विष्णुस्त्ववततार ह ।। ४ ।।
सोऽपि कृष्णो जगन्नाथो गोपीभिश्च समावृतः ।
बाल्यकाले स्थितो गोपे ततः कंसं जघान ह ।। ५ ।।
मथुरायां कृतो राजा उग्रसेनो महामनाः ।
कालनेमिभयात्तस्मान्निर्मिता द्वारकापुरी ।। ६ ।।
तस्या स्थितो रमाकान्तः पाण्डवानां हितप्रदः ।
यौधिष्ठिरे धर्मयज्ञे गतवान् हस्तिनापुरम् ।। ७ ।।

श्वेतातपत्रं दत्वा च आगतो द्वारकापुरीम् ।
एवं पालयतस्तस्य जगन्नाथस्य शार्ङ्गिणः ।। ८ ।।
सुतः शाम्बोऽभवद् विप्रा द्वितीयो रतिनायकः ।
यथा कृष्णस्तथैवासौ नीलजीमूतसन्निभः ।। ९ ।।
शङ्खचक्राङ्कितभुजः पीतवासोऽब्जलोचनः ।
जलक्रीडाविनोदेऽथ योषिद्भिश्च समावृतः ।। १० ।।
चक्रपाणेरविज्ञातो गतो जाम्बवतीसुतः ।
त्वं दृष्ट्वा योषितः सर्वा ययुर्मोहं च विह्वलाः ।। ११ ।।
तासां च स्यन्दते रेतश्चक्रे निन्दां तदा हरिः ।
धिक् धिग्भवतु नारीणामसतीत्वं च धिक् च धिक् ।। १२ ।।
पुत्रं दृष्ट्वा कथं सर्वा ययुर्मोहं पुनः पुनः ।
ततः शाम्बं उवाचाथ ईषत्क्रोधसमन्वितः ।। १३ ।।

श्रीभगवानुवाच

मातॄणां स्यन्दते रेत आगते त्वयि पुत्रक ।
इदानीं तव देहे च कुष्ठं भवतु सर्वतः ।। १४ ।।
एवं निगदते कृष्णे कुष्ठं सर्वाङ्गकेष्वभूत् ।
शाम्बोऽपि वेपमानः सन् पितरं वाक्यमब्रवीत् ।। १५ ।।

शाम्ब उवाच

अपराधे कृते पुत्रे क्षमते जनकः प्रभो ।
इदानीं किं करिष्यामि शापमुक्तिं वदस्व मे ।। १६ ।।

श्रीभगवानुवाच

मैत्रेयाख्यं वनं गत्वा तपस्तप्त्वा जितेन्द्रियः ।
प्रसादयित्वा छायेशं ततो मुक्तिं गमिष्यसि ।। १७ ।।

भरद्वाज उवाच

इति श्रुत्वा वचस्तस्य शार्ङ्गिणो रुक्मिणीपतेः ।
एकाकी च जगामाशु शाम्बो दुःखपरिप्लुतः ।। १८ ।।
गत्वा तत्र प्रयत्नेन तपस्तेपे सुदारुणम् ।
शान्तो दान्तो निराहारो वायुभक्षो जितेन्द्रियः ।। १९ ।।
शाम्बो द्वादशवर्षाणि सूर्यध्यानपरायणः ।
पूजयंश्च स्तुवन् गायन् सूर्य सूर्येति कीर्त्तयन् ।। २० ।।
दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते ।
त्राहि मां करुणापाङ्ग व्यङ्गं च पतितं भुवि ।। २१ ।।
इति मन्त्रं स्तुवन् गायन् शाम्बः कृष्णात्मजो द्विजाः ।
पपात सहसा भूमौ पुनः पुनरुदीरयन् ।। २२ ।।
गते च कतिचित्काले भास्करो भक्तवत्सलः ।
उवाच वचनं स्वप्ने शापनिर्मुक्तिकारणम् ।। २३ ।।
अत्र तिष्ठ महाबाहो दर्शयामि स्वकां तनुम् ।
तां दृष्ट्वा मुच्यते रोगान्नान्यथा शृणु शाम्बक ।। २४ ।।
यदि जाम्बवतीसूनो शापमुक्तिमपेक्षसे ।
एतानि मम नामानि कीर्त्तयस्व निरन्तरम् ।। २५ ।।
भास्करो भगवान् सूर्यश्चित्रभानुर्विभावसुः ।
यमतातोंऽशुमाली च यमुनाप्रीतिदायकः ।। २६ ।।
दिवाकरो जगन्नाथः सप्ताश्वश्च प्रभाकरः ।
लोकचक्षुः स्वयम्भूश्च छायारतिप्रदायकः ।। २७ ।।
तिमिरारिर्ग्रहधवो लोकत्रयप्रकाशकः ।
भक्तबन्धुर्दयासिन्धुः कर्मसाक्षी परात्परः ।। २८ ।।

एकविंशतिनामानि यः पठेदुदिते मयि ।
तस्य शान्तिं प्रयच्छामि सत्यं सत्यं वदाम्यहम् ।। २९ ।।
इत्युक्त्वा गतवान् सूर्यः शाम्बो निन्द्रां च मुक्तवान् ।
ततः प्रभातसमये नदीं स्नानार्थमाययौ ।। ३० ।।
चन्द्रभागां महापुण्यां देवलोकप्रदायिनीम् ।
तत्र गत्वा च शाम्बाऽसौ द्विभुजां पद्मलाञ्छिताम् ।। ३१ ।।
प्रतिमां पङ्कजस्थां च जलमध्ये ददर्श ह ।
दृष्ट्वा परमहृष्टश्च स वेलान्तिकमानयत् ।। ३२ ।।
मार्जयित्वा वपुस्तस्याः प्रक्ष्याल्य सलिलेन च ।
गृहीत्वा प्रतिमां तां च ययौ शाम्बो महामतिः ।। ३३ ।।
प्रासादं कारयित्वा च स्थापयामास सत्वरम् ।
पूजयित्वा तां विधिवद् भक्त्या नत्वा परं ततः ।। ३४ ।।
विमुक्तरोगः सहसा ययौ द्वारावतीं पुरीम् ।

भरद्वाज उवाच

एवं पुरा गतः शाम्बस्तपस्तप्त्वा दिवाकरम् ।
अर्च्चयित्वा प्रयत्नेन ततः कुष्ठात् विमुक्तवान् ।। ३५ ।।

ऋषय ऊचुः

श्रुतमस्माभि भो विप्र शाम्बस्य तप ईदृशम् ।
इदानीं श्रोतुमिच्छामो माहात्म्यं क्षेत्रतीर्थयोः ।। ३६ ।।

भरद्वाज उवाच

मैत्रेयाख्यं वनं नाम मैत्रेयतपसार्जितम् ।
यत्र गत्वा नरः शीघ्रं महद् रोगाद्विमुच्यते ।। ३७ ।।
तत्र ये स्थातुमिच्छन्ति वीतरागा विकम्लषाः ।
तेषां मनोरथफलं पूरयेद् दिवसाधिपः ।। ३८ ।।

मैत्रेयाख्ये वने रम्ये ये त्यजन्ति कलेबरम् ।
पापनि च परित्यज्य ज्योतिर्लोकं ब्रजन्ति ते ।। ३९ ।।
रविक्षेत्रे नरा ये च रविवारे समाहिताः ।
भक्त्या पश्यन्ति तं रविं ते गच्छन्ति रवेर्गृहम् ।। ४० ।।
मैत्रेयाख्ये मृता ये च अमृताश्चापुनर्भवाः ।
देवलोकं समासाद्य रविणा सह मोदते ।। ४१ ।।
येऽर्च्चयन्ति नरास्तत्र भास्करं भक्तिमानसाः ।
विमुक्तपापाः सहसा लभन्ते वाञ्छितं फलम् ।। ४२ ।।
तत्र श्रीमङ्गलं तीर्थं देवानां मङ्गलप्रदम् ।
मङ्गले च नरः स्नात्वा मङ्गलं प्राप्नुयाद् ध्रुवम् ।। ४३ ।।
तत्र श्रीशाल्मलीभाण्डं तीर्थं त्रैलोक्यपावनम् ।
सर्वपापहरं गुह्यं सिद्धगन्धर्वसेवितम् ।। ४४ ।।
नानामुनिजनाकीर्णं सर्वेषां मुक्तिदायकम् ।
यत्र स्नात्वा नरः साक्षाद्रविदीधितिमाप्नुयात् ।। ४५ ।।
स्नात्वा श्रीशाल्मलीभाण्डे दृष्ट्वा छायापतिं ततः ।
अघौघं नाशयित्वा च आदिलोकं ब्रजेन्नरः ।। ४६ ।।
सूर्यगङ्गाजले स्नात्वा सूर्यलोकं ब्रजेन्नरः ।
सूर्यगङ्गासमं तीर्थं नास्ति नास्ति महीसुराः ।। ४७ ।।
महोदधौ नरः स्नात्वा सर्वपापाद् विमुच्यते ।
सर्वतीर्थवरश्चासौ सागरः सरितां पतिः ।। ४८ ।।
रामेश्वरस्तु तत्रैव वेंलायां च नदीपतेः ।
यं रामः पूजयामास प्राणिनां हितकारणात् ।। ४९ ।।
रामेश्वरं प्रयत्नेन येऽर्च्चयन्ति नरोत्तमाः ।
तेषामिष्टवरं विप्रा रामश्चन्द्रः प्रयच्छति ।। ५० ।।

गन्धैः पुष्पैश्च नैवेद्यैर्येऽर्च्चयन्ति महेश्वरम् ।
ते यान्ति शिवसालोक्यं विमानेन विराजितः ।। ५१ ।।
चन्द्रभागाजले तत्र ये स्नान्ति विधिपूर्वकम् ।
चन्द्रतुल्यवपुर्धृत्वा चन्द्रलोकं ब्रजन्ति ते ।। ५२ ।।
तत्र चार्कवटो नाम कल्पवृक्षस्तु तिष्ठति ।
नानामुनिजनाकीर्णो विहङ्गैरुपशोभितः ।। ५३ ।।
अच्छेद्यश्चाप्यवध्योऽयं वटो मुक्तिप्रदो ध्रुवम् ।
प्राणिनां च हितार्थाय सूर्यः साक्षाच्च पादपः ।। ५४ ।।
तत्र वृक्षतले ये च जपन्ति मन्त्रमुत्तमम् ।
त्रिपक्षाभ्यन्तरे मन्त्रः साधकाभीष्टसिद्धिदः ।। ५५ ।।
भूमावर्कवटो विप्राः स्वर्लोके नन्दनं श्रुतम् ।
तत्र सिद्धगणाः सन्ति सत्यं सत्यं वदामि वः ।। ५६ ।।
तत्र ध्यायन्ति ये विष्णुं तेषां विष्णुः प्रसीदति ।
वटछायास्तु ये सन्ति ते तु सिद्धा न संशयः ।। ५७ ।।
विजयायां च सप्तम्यां येऽर्च्चयन्ति दिवाकरम् ।
तेषां विमुक्तपापानां सर्वत्र विजयो भवेत् ।। ५८ ।।
मैत्रेयाख्ये वने पुण्ये रथयात्रां महोत्सवम् ।
ये पश्यन्ति नरा भक्त्या लीयन्ते स्वतनौ रवेः ।। ५९ ।।
एवमादिगुणाः सन्ति मैत्रेयाख्ये वनोत्तमे ।
न समर्थाः द्विजश्रेष्ठा वक्तुं वर्षशतैरपि ।। ६० ।।
किञ्चित् प्रोक्तं मया विप्रा भवतां हितमुत्तमम् ।
वरेण्यं परमं पुण्यं किमन्यत् श्रोतुमर्हथ ।। ६१ ।।

इति श्रीकपिलसंहितायां मैत्रेयवनमाहात्म्यं नाम षष्ठोऽध्यायः ।।

सप्तमोऽध्यायः

ऋषय ऊचुः

इदानीं कथयास्माकं पार्वतीक्षेत्रमुत्तमम् ।
त्वत्प्रसादाद् भविष्यामः कृतार्था नात्र संशयः ।। १ ।।

भरद्वाज उवाच

कथयामि महापुण्यं विरजाख्यं सुनिर्मलम् ।
यत् क्षेत्रं सृष्टिरक्षार्थं ब्रह्मणा च कृतं पुरा ।। २ ।।
तस्मिन् क्षेत्रे द्विजश्रेष्ठा विरजा विरजःप्रदा ।
विरजामुखमालोक्य रजःप्रक्षालनं भवेत् ।। ३ ।।
तत्र श्रीविरजादेवी भुक्तिमुक्तिप्रदायिनी ।
साधकानां हितार्थाय विरजा उत्कले स्थिता ।। ४ ।।
दशवर्षसहस्राणि काश्यां पूजयते हरम् ।
यत्तत्फलमवाप्नोति विरजालोचने नरः ।। ५ ।।
कुरुक्षेत्रे हरिद्वारे यत्फलं लभते नरः ।
तत्फलं समवाप्नोति नान्यथा भो द्विजोत्तमाः ।। ६ ।।
वराहरूपी भगवान् तत्रास्ते मुक्तिदायकः ।
तं दृष्ट्वा पूजयित्वा च विष्णुलोकमवाप्नुयात् ।। ७ ।।
आखण्डलस्तु तत्रास्ते पार्वतीशो जगद्गुरुः ।
तमालोक्य प्रयत्नेन यमदण्डश्च खण्ड्यते ।। ८ ।।
यत्राखण्डलदेवेशस्तत्र मुक्तिर्न संशयः ।
तमासाद्य च गच्छन्ति तद्विष्णोः परमं पदम् ।। ९ ।।
आखण्डलं समासाद्य कुष्ठी कुष्ठात् प्रमुच्यते ।
अपुत्रा चैव या नारी ध्रुवं सा सुतमाप्नुयात् ।। १० ।।

आखण्डल नमस्तुभ्यं सिद्धानां सिद्धिदायकः ।
अखण्डमण्डलाकारं कारणाशेषकारण ।। ११ ।।
अनेन मन्त्रयोगेन यः पश्येत् पार्वतीपतिम् ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ।। १२ ।।
क्रोडाखण्डलयोर्मध्ये देवानां दुर्लभे पदे ।
मुक्तिं गच्छन्ति कीटाद्याः किं पुनर्मानवा मृताः ।। १३ ।।
गुरुहा ब्रह्महा गोघ्नः सुरापो विष्णुनिन्दकः ।
तत्र देहं त्यजन् विप्रा वैकुण्ठं लभते ध्रुवम् ।। १४ ।।
तत्र मुक्तेश्वरं लिङ्गं मुक्तिदं पापनाशनम् ।
यं दृष्ट्वा च पुरा विप्रा ययुर्मुक्तिं त्वरान्विताः ।। १५ ।।
तत्र श्रीविरजाक्षेत्रे देव्या ईशानकोणतः ।
गयानाभिर्महापुण्या पितॄणां मुक्तिदायिकाः ।। १६ ।।
तत्र पिण्डं प्रयच्छन्ति नरा ये शीतकल्मषाः ।
पितृनुद्धृत्य नराकात्ते ब्रजन्ति पदं हरेः ।। १७ ।।
तत्र वैतरणी देवी नदी मुक्तिप्रदायिनी ।
गङ्गादेवी त्वसौ विप्राः सत्यं सत्यं न संशयः ।। १८ ।।
वैतरणी महापुण्या भुक्तिदा मुक्तिदा नृणाम् ।
महापातककोटिघ्नी सकृद्दर्शनमात्रतः ।। १९ ।।
तस्यां स्नात्वा नरः श्रेष्ठो दृष्ट्वा श्रीदंष्ट्रिणं हरिम् ।
कुलकोटिसमायुक्तो ब्रजेद् विष्णुपुरीं द्विजाः ।। २० ।।
त्रिलोचनस्तु तत्रास्ते भवपाशविमोचनः ।
तं दृष्ट्वा विधिवत् पूज्य त्रिलोचनमवाप्नुयात् ।। २१ ।।
त्रिलोचनस्तु भो विप्रास्तापत्रयविभञ्जनः ।
त्रैलोक्यस्य अधिष्ठाता तं नरः कोऽपि नाश्रयेत् ।। २२ ।।

तत्र क्षेत्रवरे विप्राः कापिलं तीर्थमुत्तमम् ।
प्रसन्नसलिलं चैव मनोज्ञा चारुदर्शनम् ।। २३ ।।
पितृपक्षे चतुर्दश्यां कापिले स्नाति यो नरः ।
तस्य तुष्टो भवेत् क्षिप्रं शैलेन्द्रतनयापतिः ।। २४ ।।
तीर्थे श्रीकापिले विप्रा विधिवत् स्नाति यो नरः ।
कपिलाकोटिजं पुण्यं लभते नात्र संशयः ।। २५ ।।
तत्रैव गोग्रहं तीर्थं मुनीन्द्रैरुपसेवितम् ।
तत्र स्नात्वा च विधिवत् गोलोकस्य फलं लभेत् ।। २६ ।।
सोमतीर्थवरं चास्ते निर्मितं वै हिमांशुना ।
स्नात्वा तत्र नरः श्रेष्ठश्चन्द्रलोकं च गच्छति ।। २७ ।।
तत्र भोगाननेकांश्च भुक्त्वा चन्द्रप्रसादतः ।
भूमिलोकं समासाद्य स राजा भवति ध्रुवम् ।। २८ ।।
ततो भक्तिं समुत्पाद्य देवदेवे महेश्वरे ।
सर्वपापं परित्यज्य गच्छेद्विष्णुपुरं नरः ।। २९ ।।
एवं श्रीसोमतीर्थस्य माहात्म्यं गदितं मया ।
इदानीमन्यतीर्थानि शृणुध्वं कथयाम्यहम् ।। ३० ।।
अल्पाम्बुसंज्ञकं नाम तत्रास्ते विरजे द्विजाः ।
अल्पपुण्यं भवेत्तत्र मेरुतुल्यं न संशयः ।। ३१ ।।
तस्मिन् क्षेत्रे पुरावृत्तं शृणुध्वं द्विजसत्तमाः ।
आसीत् सत्ये च नृपतिर्मान्धाता नाम विश्रुतः ।। ३२ ।।
यज्वाध्वरवरैर्देवं दाता भोक्ता प्रियंवदः ।
क्षमाशीलो दयाशीलः सत्यवागनसूयकः ।। ३३ ।।
महीपतिरसौ गच्छन् निर्जने गहने वने ।
मृगयार्थं महाबाहुरेकाकी च परंतपः ।। ३४ ।।

ददर्श वनखण्डे चाऽजगरं रोमहर्षणम् ।
तं दृष्ट्वा घातयामास शरणैकेन धीमतिः ।। ३५ ।।
तस्य पत्नी च तं दृष्ट्वा स्वपतिं पतितं भुवि ।
दुःखशोकसमाविष्टा ददौ शापं नृपाय तम् ।। ३६ ।।

सर्पपत्न्युवाच

अद्रोहकारिणं क्रूरं मत्पतिं प्राणवल्लभम् ।
जघ्नीथ त्वं यतो भूप शृगालत्वं ततो व्रज ।। ३७ ।।

भरद्वाज उवाच

तस्याः शापप्रभावेण शृगालत्वं ययौ नृपः ।
गत्वा वाचमुवाचेदं सर्पपत्नीं पतिव्रताम् ।। ३८ ।।

राजोवाच

शापमुक्तिं वदाशु त्वं त्राहि मां द्रोहकारिणम् ।
शृगालशरीरं प्राप्य जीवितुं नास्ति कारणम् ।। ३९ ।।

सर्पपत्न्युवाच

यदा त्वं च वसिष्ठेन विरजाख्या गमिष्यसि ।
तस्मिन्नल्पाम्बुतीर्थे च स्नात्वा मुक्तिमवाप्स्यसि ।। ४० ।।
विरजाख्यं नृपश्रेष्ठ क्षेत्रं परमपावनम् ।
रम्यं पापापनोदं च स्वर्गतुल्यं न संशयः ।। ४१ ।।
ब्राह्मणैः क्षत्रियैर्वैश्यैः समन्तादभिपूरितम् ।
नानादेवगणाकीर्णं देवदुन्दुभिनादितम् ।। ४२ ।।
तिन्तिडीशालतालैश्च नारिकेलैश्च खर्जुरैः ।
आम्रजम्बुपिप्पलैश्च पनसैरुपशोभितम् ।। ४३ ।।
एवं च सुखसञ्चारं सुखजं सुखदायकम् ।
पापानां मुक्तिदं भूप विरजाख्यं सुनिश्चितम् ।। ४४ ।।

तत्रैव तव शापस्य विमुक्तिश्च भविष्यति ॥

भरद्वाज उवाच

एतच्छ्रुत्वा शृगालश्च वेपमानः सुदुःखितः ।
वसिष्ठस्याश्रमं गत्वा त्राहि त्राहीत्युवाच ह ॥ ४५ ॥
श्रुत्वाश्चर्यं च तद्वाक्यं वसिष्ठः परमं तपः ।
आश्रमाद्धि बहिर्गत्वाब्रवीद्वाक्यं प्रियं तु तम् ॥ ४६ ॥

वसिष्ठ उवाच

त्राहि त्राहि कथं ब्रूहि कस्मादागतवानिह ।
किं च ते भयमुत्पन्नं कथयस्व ममाग्रतः ॥ ४७ ॥

शृगाल उवाच

मृगयार्थं गतोऽरण्यं मान्धाताऽहं महापतिः ।
तत्र दृष्टो ह्यजगरः सहसा स हतो मया ॥ ४८ ॥
ततो हि पवित्रतया शप्तोऽहं तस्य जायया ।
शृगालो भव भूप त्वं यत्त्वया मत्पतिर्हतः ॥ ४९ ॥
कृपया च पुनः प्राह वसिष्ठस्याश्रमं ब्रज ।
गत्वा श्रीविरजं तेन ततो मुक्तिश्च लप्स्यसे ॥ ५० ॥
इदानीं त्राहि मां नाथ गच्छवो विरजं मुने ।
मां तत्र नीत्वा क्षिप्रेण नरकादुद्धर प्रभो ॥ ५१ ॥

भरद्वाज उवाच

तच्छ्रुत्वा वचनं तस्य वसिष्ठः करुणान्वितः ।
तेन श्रीविरजं क्षेत्रं जगामाशु तपोधनाः ॥ ५२ ॥
तत्र गत्वा मुनीन्द्रोऽसौ तीर्थे चाल्पाम्बुसंज्ञके ।
स्नापयित्वा प्रयत्नेन ददौ तस्मै स्वकां तनुम् ॥ ५३ ॥
मान्धाता शापनिर्मुक्तस्ततः प्राप स्वविग्रहम् ।
आकाशात् पुष्पवृष्टिश्च पपात धरणीतले ॥ ५४ ॥

धरित्रीशस्ततो गत्वा स्वराज्यं द्विजसत्तमाः ।
प्रजाश्च पालयामास धर्मेण विनयेन च ।। ५५ ।।
वसिष्ठोऽपि महातेजाः शिष्यैः परिवृतस्ततः ।
सर्वपुण्यमयं रम्यं जगाम स्वाश्रमं हि तत् ।। ५६ ।।
एवं तस्मिन् पुरावृत्तं तीर्थे चाल्पाम्बुसंज्ञके ।
श्रुतं मया द्विजश्रेष्ठाः सर्वपापप्रणाशनम् ।। ५७ ।।
अल्पपुण्यं बहुतरं पुण्ये ह्यल्पाम्बुके द्विजाः ।
शृगालत्वं परित्यज्य एवं राजा विमुक्तवान् ।। ५८ ।।
यः पठेदिदमाख्यानं पुण्यपापहरं महत् ।
शृणुयाद्वापि यत्नेन स पुण्यां लभते गतिम् ।। ५९ ।।
इदं श्रुत्वा जनाः सर्वे न घ्नन्तु भुजगं कदा ।
मान्धाता भुजगं हत्वा ह्यवाप गतमीदृशम् ।। ६० ।।

इति श्रीकपिलसंहितायां विरजामाहात्म्ये शृगालविमुक्तिर्नाम सप्तमोऽध्यायः ।।

अष्टमोऽध्यायः

ऋषय ऊचुः

अल्पाम्बुतीर्थमाहात्म्यं श्रुतमस्माभिरादरात् ।
तत्र गुह्यानि तीर्थानि श्रोतुकामा वयं मुने ।। १ ।।

भरद्वाज उवाच

तत्र मृत्युञ्जयं नाम तीर्थं देवगणैः श्रुतम् ।
मृकण्डुतनयो यत्र स्नात्वा मृत्युं जिगाय च ।। २ ।।

मृत्युञ्जये तीर्थवरे यो नरः स्नानमाचरेत् ।
मृत्युञ्जयं समालोक्य सोऽपि मृत्युं जिघांसति ।। ३ ।।
क्रोडतीर्थे च तत्रास्ते परमं पावनं महत् ।
क्रोडरूपी जगन्नाथ साक्षात्तीर्थत्वमागतः ।। ४ ।।
तत्र स्नानं विधायाशु क्रोडदेहे च लीयते ।
इति मन्त्रं समुच्चार्य स्मरेन्मृत्युञ्जयं प्रभुम् ।। ५ ।।
तीर्थराज नमस्तुभ्यं कारुण्यकजलाप्लुत ।
अघौघादुद्धर त्वं मां मज्जन्तं तव वारिणि ।। ६ ।।
तत्र श्रीवासुकं तीर्थं वासुदेवपदप्रदम् ।
तत्र स्नात्वा सकृल्लोके दिव्यलोकात्परं ब्रजेत् ।। ७ ।।
तीर्थं सिद्धेश्वरं नाम सिद्धिदं सर्वकामदम् ।
यदाश्रयित्वा विधिवत्सिद्धाः सिद्धत्वमाययुः ।। ८ ।।
सिद्धेश्वरे सकृद्येन मस्तकं पातितं द्विजाः ।
तस्य तुष्टः प्रजानाथः सिद्धिं दद्यात् यथेप्सिताम् ।। ९ ।।
सिद्धेश्वरे मनोज्ञे च प्रसन्नसलिले शुभे ।
स्नातं येन दिनैकं च स्नातं तेन जगत्रयम् ।। १० ।।
एवं बहुविधं तस्य पुण्यं सिद्धेश्वरस्य च ।
सिद्धेश्वरे नरः स्नात्वा सिद्धिं प्राप्नोत्यसंशयः ।। ११ ।।
नानाविधानि तीर्थानि तत्र सन्ति द्विजोत्तमाः ।
नानाविधास्तथा देवा नानासिद्धगणास्तथा ।। १२ ।।
यो ब्रजेद्विरजःक्षेत्रं मधुमासे नरोत्तमः ।
आश्विने माधवे वापि तस्य सिद्धिर्भवेद् ध्रुवम् ।। १३ ।।
दोलायमानं क्रोडं च तत्र पश्यन्ति ये नराः ।
ब्रह्महत्यादिपापानि क्षयित्वा मुक्तिमाययुः ।। १४ ।।

भौमवारे चतुर्दश्यां वारे वाथ बृहस्पतेः ।
यः पश्येद्विरजां भक्त्या स विष्णोर्भक्तिमाप्नुयात् ।। १५ ।।
तत्र श्रीविरजाग्रे च यो जपेन्मन्त्रमुत्तमम् ।
स मन्त्रः सिद्धिदस्तस्य सत्यं सत्यं द्विजोत्तमाः ।। १६ ।।
तत्पृष्ठभागे यो नित्यं पूजयेत् सिन्धुजापतिम् ।
स्थण्डिले प्रतिमायां वा शालग्रामेऽथवा शुभे ।। १७ ।।
गन्धैः पुष्पैश्च नैवेद्यैः धूपैर्दीपैः स्तवैस्तथा ।
मालाभिर्वासभिश्चैव ताम्बूलेन जनार्द्दनम् ।। १८ ।।
षण्मासाभ्यन्तरे देवो ददाति वरमीप्सितम् ।
प्राप्य सिद्धिं मृते चैव गच्छेद् विष्णुमनामयम् ।। १९ ।।
एवं चास्य गुणाः सन्ति विरजाख्यस्य निर्मलाः ।
वक्तुं शक्नोति को देही विना शेषेण सत्तमाः ।। २० ।।
सहस्रयोजनान्ते च यो भजेद् विरजां शुभाम् ।
तस्येप्सितमसौ देवी ददाति किल सत्वरम् ।। २१ ।।
विरजाख्यं द्विजश्रेष्ठा एवं निगदितं मया ।
तत्र यूयं तपस्तप्त्वा परां सिद्धिं गमिष्यथ ।। २२ ।।

इति श्रीकपिलसंहितायां विरजामाहात्म्यं नाम अष्टमोऽध्यायः ।।

नवमोऽध्यायः

ऋषय ऊचुः

पुरा त्वया निगदिता कृष्णार्कपार्वतीहराः ।
अधुना श्रोतुकामाश्च वयं शम्भोर्वदस्व नः ।। १ ।।
सङ्कीर्त्तितं त्वया विप्र मुक्तिदं पुरुषोत्तमम् ।
मैत्रेयं विरजाख्यं च सर्वपापनिसूदनम् ।। २ ।।
नीलाद्रिस्तु जलाकीर्णो विरजाख्यस्ततोऽधिकः ।
मैत्रेयं बालुकाकीर्णं दुःसहं रवितेजसा ।। ३ ।।
तस्मात्पवित्रमपरं किञ्चिदस्ति तपोधन ।
अस्माकं तपसे क्षेत्रं तस्मिनोड्रे वद प्रभो ।। ४ ।।
तत्र विश्वेश्वरश्चास्ते इति प्रोक्तं त्वयं पुरा ।
तस्य स्थानं वदास्माकं तदेव तपसः स्थलम् ।। ५ ।।

भरद्वाज उवाच

वक्ष्यामि परमं पुण्यं स्थानं शम्भोर्द्विजोत्तमाः ।
सर्वपापहरं रम्यं कैलासं पर्वतोत्तमम् ।। ६ ।।
विरजैकाम्रयोर्मध्ये कैलासं च श्रुतं द्विजाः ।
सर्वपापहरो देवस्तत्र श्रीशिखरेश्वरः ।। ७ ।।
वकुलैश्चम्पकैर्वृक्षैः सपुष्पैरुपशोभितम् ।
सपल्लवैश्चूतपूगैर्नारिकेलैः सदामरैः ।। ८ ।।
खर्जुरैरर्जुनैश्चैव पनसैः सुमनोहरैः ।
कर्कन्धुकुलकैर्वृक्षैर्दाडिमैः प्रियदर्शनैः ।। ९ ।।
विल्वैर्लोध्रैः पलाशैश्च पुन्नागैस्तुङ्गकेशरैः ।
जम्बुदन्तशटैर्वृक्षैः कोविदारैः फलान्वितैः ।। १० ।।

तिन्तिडी वीरवृक्षैश्च खादिरैश्चञ्चुकैस्तथा ।
पारिभद्रैर्नक्तमालैर्धात्रीभिर्नागकेशरैः ।। ११ ।।
जातिकायूथिकाभिश्च पुष्पैश्चैव सुवासितैः ।
तगरैर्मल्लिभिश्चैव करवीरैः सपाटलैः ।। १२ ।।
अशोकैर्मालतीभिश्च माधवीभिः कदम्बकैः ।
सेवतीभिश्च कुन्दैश्च काञ्चनैः श्वेतरक्तकैः ।। १३ ।।
एवं नानाविधैर्वृक्षैः पुष्पैर्नानाविधैर्वरैः ।
विश्वनाथस्य तत्स्थानं पूरितं वै समन्ततः ।। १४ ।।
शिखरेशं समासाद्य संवत्सरं व्रतान्वितः ।
मन्त्रमाश्रयते यस्तु तस्य मन्त्रः प्रसिद्ध्यति ।। १५ ।।
तत्रासौ विश्वनाथस्तु विश्वस्योत्पादने रतः ।
मोक्षदः कामदः श्रीमान् लिङ्गरूपी न संशयः ।। १६ ।।
पुण्यक्षेत्राणि संत्यज्य पुण्यस्थानान्यनेकशः ।
कैलासे पार्वतीनाथ एकाकी च परंतपः ।। १७ ।।
यदोद्धृतश्च कैलासो रावणेन दुरात्मना ।
तदेकशृङ्गं पतितं तत्कैलासमिहोच्यते ।। १८ ।।
कैलासादधिकं मन्ये कर्मभूमौ यतः स्थितम् ।
तत्र कर्मफलभोगस्तत्र भोगं च केवलम् ।। १९ ।।
कैलासे शङ्करस्थाने ये वसन्ति नरोत्तमाः ।
इह भोगफलप्राप्तिर्मुक्तिस्तेषां करे स्थिता ।। २० ।।
कैलासनिलयं शम्भोर्दुर्लभं मुक्तिदायकम् ।
तत्र देवगणाः सन्ति नित्यं शम्भोः समीपतः ।। २१ ।।
आलोक्य शिखरेशं च पूजयित्वा प्रणम्य च ।
सुरभिमारणं दोषं क्षिप्त्वोदूर्ध्वं च व्रजेन्नरः ।। २२ ।।

गुरुपत्नीहृतं दोषं गुरुनिन्दाकृतं तथा ।
व्रजेत् क्षिप्रं क्षयं ह्येतत् स्मरन् वै शिखरेश्वरम् ।। २३ ।।
ब्रह्माद्या देवताः सर्वाः काङ्क्षन्ति च मुहुर्मुहुः ।
भूमिलोकं कदा गत्वा द्रक्ष्यामः शिखरेश्वरम् ।। २४ ।।
काङ्क्षन्ति पितरश्चैव प्रजाश्च सुनृपं यथा ।
कदास्माकं कुले जातः कैलासाद्रिं गमिष्यति ।। २५ ।।
तत्र गत्वा प्रयत्नेन स्नात्वा तीर्थे पयोऽमृते ।
अस्माकं तर्पयित्वा च नरकादुद्धरिष्यति ।। २६ ।।
तस्मिन्नद्रौ द्विजश्रेष्ठास्तीर्थमस्ति पयोऽमृतम् ।
अग्रे श्रीशिखरेशस्य ऐशानीं दिगमास्थितम् ।। २७ ।।
वरेण्यं परमं पुण्यं पितॄणां मुक्तिदायकम् ।
यत्र स्नात्वा च सौदासो राजा मुक्तिमवाप ह ।। २८ ।।

ऋषय ऊचुः

तत्तीर्थस्य च माहात्म्यं विस्तरेण वदस्व नः ।
अन्य तीर्थस्य माहात्म्यं तस्मिन्नद्रौ द्विजोत्तमः ।। २९ ।।

भरद्वाज उवाच

भोगवत्यां च भूर्लोके स्वर्लोके सचराचरे ।
पयोऽमृतसमं तीर्थं नास्ति नास्ति वदाम्यहम् ।। ३० ।।
पुरा सत्ये च सौदासो रविवंशे महीपतिः ।
बभूव नृपशार्दूलः प्रजापालनतत्परः ।। ३१ ।।
वक्ता श्रोता महाशान्तो बृहस्पतिरिवापरः ।
रूपेण रतिनाथस्तु सङ्ग्रामे शचीनायकः ।। ३२ ।।
तस्य बुद्धिः समुत्पन्ना मन्त्रं साधयितुं पुरा ।
वसिष्ठं परिपप्रच्छ नृपतिः स्वपुरोहितम् ।। ३३ ।।

सौदास उवाच

मन्त्रसिद्धिर्भवेत्कुत्र तत्स्थानं वद सत्तम ।
यत्र स्नात्वा च जप्त्वा च गमिष्यामि परं पदम् ।। ३४ ।।

वसिष्ठ उवाच

आस्ते वाराणसीक्षेत्रं मुक्तिदं सिद्धिकामदम् ।
यत्र विश्वेश्वरो देवः साधकानां वरप्रदः ।। ३५ ।।
वाराणस्याः समं भूप क्षेत्रं नास्ति महीतले ।
लिङ्गरूपधरः साक्षात् यत्र देवो जगत्पतिः ।। ३६ ।।
तस्मिन् क्षेत्रे महीपाल तीर्थं श्रीमणिकर्णिका ।
स्नात्वा तत्र नरो नारी ब्रह्मघातात्प्रमुच्यते ।। ३७ ।।
यत्र भागीरथी पुण्या नराणां मुक्तिदायिनी ।
भूर्लोके चैव पाताले स्वर्लोके या प्रतिष्ठिता ।। ३८ ।।
भागीरथ्याश्च माहात्म्यं विस्तरं गदितं पुरा ।
यदम्बुकणमात्रं च ब्रह्महत्याक्षयं नयेत् ।। ३९ ।।
वाराणसी विश्वनाथो जाह्नवी मणिकर्णिका ।
एकैका दुर्लभा लोके किमु यत्र चतुष्टयम् ।।
तत्र गत्वा तपस्तप्त्वा परां सिद्धिं गमिष्यसि ।। ४० ।।

भरद्वाज उवाच

इति श्रुत्वा वचस्तस्य महर्षेः स नराधिपः ।
तमृषिं प्रणिपत्याशु प्रतस्थे क्षेत्रमुत्तमम् ।। ४१ ।।
गत्वा स्नात्वा च गङ्गायां दृष्ट्वा श्रीपार्वतीपतिम् ।
क्षमासत्यसमायुक्तस्तपस्तेपे सुदारुणम् ।। ४२ ।।
एवं च कतिचित्काले गते देवो महेश्वरः ।
स्वरूपं दर्शयित्वा तं स्वप्ने वाक्यमुवाच ह ।। ४३ ।।

शङ्कर उवाच

आगतं ते महाबाहो क्षेत्रं मुक्तिप्रदं मम ।
इदानीं गच्छ तपसे कैलासनिलयं मम ।। ४४ ।।
तत्राहं दर्शयिष्यामि सत्यं त्वां मामकीं तनुंम् ।
मुक्ति चैव प्रदास्यामि सत्यं सत्यं मयोदितम् ।। ४५ ।।
मत्पार्श्वे चैव राजेन्द्र तीर्थं नाम पयोऽमृतम् ।
चतुर्वर्गप्रदश्चैव तत्राहं शिखरेश्वरः ।। ४६ ।।
सर्वपापहरं लिङ्गं नाम्ना श्रशिखरेश्वरम् ।
यो मां पश्यति तत्रस्थं तस्य मुक्तिं ददाम्यहम् ।। ४७ ।।
तत्रस्थः तपसा तुष्टो युगे सत्ये महीपते ।
त्रेतायां द्वापरे चैव दर्शनात् सिद्धिदः स्वयम् ।। ४८ ।।
कलौ च दर्शनेनैव सिद्धिदोऽहं नृणां किल ।
तस्मिन्नद्रौ तीर्थवरे यः स्नाति च पयोऽमृते ।। ४९ ।।
स याति परमं स्थानं मद्देहे च प्रलीयते ।
पयोऽमृत महीतीर्थ ! पयस्ते ह्यमृतोपमम् ।।
अमृतत्वं प्रयच्छाशु कृते स्नाने तवाम्भसि ।। ५० ।।
अनेन मनुना भूप तत्र स्थानं समाचर ।
तत्र स्नात्वा च मां दृष्ट्वा परां सिद्धिं गमिष्यसि ।। ५१ ।।
तत्रैव तीर्थप्रवरं मदग्रे पापनाशनम् ।
जम्भकुण्डमिति ख्यातं किञ्चिदाग्नेयमास्थितम् ।। ५२ ।।
पतन्ति तत्र गाङ्गानि वारीणि शुभदानि च ।
सर्वलोकपवित्राणि सर्वलोकशुभानि च ।। ५३ ।।
पर्वतोद्भवशीतानि तत्र स्नात्वा सुखं लभेत् ।।
तज्जलेषु शिरो दत्वा शुद्धो भूत्वा नरोत्तम ।
स्नायाच्च मनुनानेन शृणुष्व रविवंशज ।। ५४ ।।

कैलासोद्भवगंतोयं शिवप्रीतिप्रदं परम् ।
नतोऽस्मि सिद्धिदं वारि शिवप्रीतिं कुरुष्व नः ।। ५५ ।।
जम्भकुण्डे नरः स्नात्वा पूजयित्वा महेश्वरम् ।
सर्वसिद्धिमवाप्नोति मत्प्रसादान्न संशयः ।। ५६ ।।
ततो हेमन्ततीर्थे च तिष्ठ यत्र स्थितो ह्यहम् ।
तत्र गत्वा मनुं जप्त्वा लप्स्यसे मुक्तिमुत्तमाम् ।। ५७ ।।

भरद्वाज उवाच

इत्युक्त्वा गतवान् देवो राजा निद्रोत्थितस्तदा ।
एकाकी च गतः श्रीमान् कैलासाचलमुत्तमम् ।। ५८ ।।
तत्र राजा तपस्तप्त्वा स्नात्वा तीर्थे पयोऽमृते ।
किञ्चित्कालं स्थितश्चासौ पश्चान्मुक्तिं जगाम ह ।। ५९ ।।
एकाकी देवदेवेशस्तत्र कैलासपर्वते ।
तत्र कोलाहलं कृत्वा नरके पच्यते ध्रुवम् ।। ६० ।।
एवं मया निगदितं तत्स्थानं पर्वतोत्तमम् ।
तत्र गत्वा तपस्तप्त्वा परां सिद्धिं गमिष्यथ ।। ६१ ।।

इति श्रीकपिलसंहितायां सौदासमुक्तिप्राप्तिर्नाम नवमोऽध्यायः ।।

दशमोऽध्यायः

ऋषय ऊचुः

यत्र कोलाहलं कृत्वा नरो नरकमाविशेत् ।
वयं तत्र गमिष्यामो भरद्वाज कथं वद ।। १ ।।
सम्यक् स्थानं त्वया प्रोक्तं कैलासं पार्वतीपतेः ।
तपस्तप्तुं महास्थानं केवलं दोषवर्जितम् ।। २ ।।

उत्कले क्षेत्रमपरं किं किमस्ति तपोधन ।
तद्वदाशु द्विजश्रेष्ठ अस्माकं च हितेच्छया ।। ३ ।।
त्वत्प्रसादाद् भविष्यामः कृतार्था मुनिसत्तम ।
गुह्यं किमपरं चास्ति क्षिप्रं वद महामते ।। ४ ।।

भरद्वाज उवाच

एकाग्रमनसो भूत्वा शृणुध्वं मुनिसत्तमाः ।
आख्यातं कस्यचित्पूर्वं गोपनीयं प्रयत्नतः ।। ५ ।।
गुह्याद् गुह्यतरं ज्ञेयं परात्परतरं श्रुतम् ।
एकाम्रकवनं नाम तस्मिन् क्षेत्रे तपोधनाः ।। ६ ।।
प्राणिनां मुक्तिदं शस्तं देवानां जयवर्द्धनम् ।
निर्मलं च निराकारं क्षेत्रं हरिहरात्मकम् ।। ७ ।।
नानासिद्धगणाकीर्णं मुनीन्द्रैरुपसेवितम् ।
गन्धर्वैकिन्नरैर्जुष्टं विद्याधरैश्च चारणैः ।। ८ ।।
आम्रनिम्बकदम्बैश्च सपुष्पैश्च फलान्वितैः ।
पूगैः पनसकैर्वृक्षैर्न्यग्रोधैर्वकुलैस्तथा ।। ९ ।।
पलाशैर्मुचुकुन्दैश्च पारिजातैः प्रियङ्गुभिः ।
कर्कन्धुर्भिर्नागरङ्गैः प्लक्षैः राजादनैरपि ।। १० ।।
खादिरैश्चैव विल्वैश्च चंचुभिः करहाटकैः ।
कणिकारैर्जयापुष्पैः कपित्थैः पिचुमर्द्दकैः ।। ११ ।।
चम्पकैरतिमुक्तैश्च सपुष्पैर्नागकेशरैः ।
शालतालशिरीषैश्च जम्भीरैः प्रियदर्शकैः ।। १२ ।।
कदलीवनषण्ढैश्च पूरितं सुमनोहरैः ।
करवीरैः कर्णिकारैरश्वत्थैर्वकुलैर्वटैः ।। १३ ।।
यूथिकामल्लिकाभिश्च जातीकुरुवकैस्तथा ।
अशोकैर्वकुलैश्चैव द्विरेफगणशोभितैः ।। १४ ।।

मालतीलतिकाभिश्च दाडिमैर्बीजपूरकैः ।
एवं नानाविधैर्वृक्षैस्तद्वनं पूरितं द्विजाः ।। १५ ।।
शशादनैः खञ्जरीटैः कोकिलैः कलानिःस्वनैः ।
चटकैश्चातकैश्चैव चकोरैश्चित्रपक्षिभिः ।। १६ ।।
व्याघ्राटैः कुक्कुटैश्चैव शिरोमुकुटभूषितैः ।
पारावतैः सूक्ष्मपक्ष्मैर्लोहपृष्ठैर्वरानकैः ।। १७ ।।
कादम्बै राजहंसैश्च प्रियायुक्तैः शुकैस्तथा ।
वर्त्तकैस्तित्तिरीभिश्च मयूरैर्घननृत्यकैः ।। १८ ।।
व्यालुलापैश्च खड्गैश्च भूदारैश्च प्लवैर्मृगैः ।
एवं नानाविधैरन्यैश्चतुष्पादैर्विहङ्गमैः ।। १९ ।।
पूरितं विपिनं पुण्यं स्वजातिपरिनिष्ठितैः ।
दीर्घिकाभिस्तडागैश्च पद्मोत्पलविराजितैः ।। २० ।।
कारण्डवैः प्लवैर्हंसैस्तथैव जलकुक्कुटैः ।
अकर्दमैः स्वच्छतायैः सोपानेन विराजितैः ।। २१ ।।
एवं नानाविधगुणैः समन्तात् परिपूरितम् ।
एकाम्रं परमं पुण्यं वनं विष्णुप्रियं महत् ।। २२ ।।
सुवासितैर्गन्धवत्या ऊर्मिभिर्गुरुचञ्चलैः ।
वातविक्षेपितैः पुण्यैः शितलं सुमनोहरम् ।। २३ ।।
साक्षाद् वैकुण्ठभुवनं जानीध्वं मुनिसत्तमाः ।
एकाम्रे तु जगन्नाथो भाति पाषाणलीलया ।। २४ ।।
शङ्खचक्रधरः श्रीमान् वनमालाविभूषितः ।
यत्र विश्वेश्वरः शम्भुः साक्षान्नारायणात्मकः ।
यस्माद् यूयं मुक्तिकामास्तस्माद्वै तत्र गच्छथ ।। २५ ।।

इति श्रीकपिलसंहितायाम् एकाम्रवर्ण्णनं नाम दशमोऽध्यायः ।।

एकादशोऽध्यायः

ऋषय ऊचुः

विस्तरेण समाख्याहि क्षेत्रमेकाम्रकं वनम् ।
आश्रमाणि च रम्याणि तत्र लिङ्गानि कोटिशः ।। १ ।।
श्रोतुकामा वयं सर्वे गमिष्यामो न संशयः ।
पूजयामो विरूपाक्षं नीरदाभं जनार्द्दनम् ।। २ ।।

भरद्वाज उवाच

क्षेत्रमेकाम्रकं श्रीमत् परामानन्ददायकम् ।
समन्तात् क्रोशमात्रं च कोटिलिङ्गावृता मही ।। ३ ।।
तत्रासौ देवदेवस्तु स्वगणैः पार्वतीपतिः ।
वरदो मुक्तिदो नृणां साधकानां च सिद्धिदः ।। ४ ।।
परमानन्दकन्दस्तु शिवरूपेण संस्थितः ।
परात्परतरो ज्ञेयो ब्रह्मादीनां वरप्रदः ।। ५ ।।
वाराणसीं परित्यज्य जनाकीर्णं महेश्वरः ।
प्रार्थयित्वा हरिं पुण्यमेकाम्रवनमास्थितः ।। ६ ।।

ऋषय ऊचुः

प्रार्थितं च तदानेन शम्भुना चारुरूपिणा ।
सर्वमेतत्तु वृत्तान्तं विस्तरेण वद प्रभो ।। ७ ।।

भरद्वाज उवाच

पुरा त्रेतायुगे विप्रा वाराणस्यां महेश्वरः ।
तिष्ठन् वाक्यमुवाचेदं नारदं मुनिपुङ्गवम् ।। ८ ।।

शिव उवाच

अस्यां पुर्यां न तिष्ठामस्त्वधुनासौ विनश्यति ।
बभूव च जनाकीर्णा तपोविघ्नकरी मुने ।। ९ ।।

यत् स्थानं च जनाकीर्णं तत्र स्थातुं न युज्यते ।
उपद्रवो भवेत्तत्र नास्तिकैर्ज्ञानदुर्बलैः ।। १० ।।
नास्तिका यत्र तिष्ठन्ति तत्र धर्मो न विद्यते ।
अधर्माच्च भजेल्लोपं हविर्भागो मुनीश्वर ।। ११ ।।
एतत्स्थानं प्रयत्नेन पार्वत्यर्थं कृतं पुरा ।
पार्वत्या रुचिरं यत्र तत्स्थानं मम हर्षदम् ।। १२ ।।
अधुनात्र मुनिश्रेष्ठ स्थातुं नोत्सहते मनः ।
रहस्यं परमं स्थानं कुत्रास्ते मां वदाशु च ।। १३ ।।

नारद उवाच

लवणस्योदधेस्तीरे नीलशैलो नगोत्तमः ।
तदुत्तरस्यां विख्यातं क्षेत्रमेकाम्रकं प्रभो ।। १४ ।।
तत्रास्ते वासुदेवाख्यो रमानाथो जगद्गुरुः ।
अनन्तेन सह श्रीमानेकाकी विजने वने ।। १५ ।।
तत्स्थानं परमं गुह्यं न जानाति प्रजापतिः ।
भवानपि न जानाति देवतानां च का कथा ।। १६ ।।
एकाम्रं परमं गुह्यं जगन्नाथस्य चक्रिणः ।
क्रोडस्थिताब्धिकन्याऽपि नैव जानाति शङ्कर ।। १७ ।।
साक्षात् विग्रहवान् तत्र अनन्तेन जनार्द्दनः ।
सृष्ट्युत्पादननाशौ च स्थितिस्तेन विचार्यते ।। १८ ।।
सर्वदा सोऽप्यनन्तस्तु देवेन सह तिष्ठति ।
लक्ष्मणो रामचन्द्रेण कृष्णेन रोहिणीसुतः ।। १९ ।।
दिवसानेकपर्यन्तं तपस्तप्त्वा महेश्वरः ।
प्रसन्ने वासुदेवे च ज्ञातं मे क्षेत्रमुत्तमम् ।। २० ।।
अहं शेषो जगन्नाथस्त्रयाणां तत्र सङ्गतिः ।
इन्द्रादीनां च देवानामन्येषां च न विद्यते ।। २१ ।।

एवं परमगुप्तं तन्मया ज्ञातं पुरा प्रभो ।
इदानीं भवता ज्ञातं क्षेत्रं परमपावनम् ।। २२ ।।

भरद्वाज उवाच

एवं निगदिते तस्मिन् नारदे चण्डिकापतिः ।
मुनिपाणौ करं दत्वा गन्तुं चक्रे मनस्तदा ।। २३ ।।
गणाध्यक्षमुवाचेदं वचनं नन्दिकेश्वरम् ।
एकाम्रकं गमिष्यामि सज्जीभवतु पुत्रक ।। २४ ।।
गृहीत्वा तरसागच्छ वृषेन्द्रं गिरिजां शुभाम् ।
यथाज्ञां शिरसा धृत्वा शुलपाणेर्ययौ तदा ।। २५ ।।
मण्डयामास वृषभं पार्वतीं निजगाद ह ।
कोटिलिङ्गान् यथासङ्ख्यं कथयामास सत्वरः ।।
सज्जीभवध्वं यूयं च गत्वैकाम्रं जगद्गुरुः ।। २६ ।।
इत्युक्त्वा गतवांस्तत्र गृहीत्वा गिरिजां वृषम् ।
स्वयं वेशधरो भूत्वा देवदेवं समासदत् ।। २७ ।।
कोटिचन्द्रप्रतीकाशं नानाभूषणभूषितम् ।
दृष्ट्वा स्ववाहनं शम्भुर्नन्दिनं प्रशसंस ह ।। २८ ।।
ततोऽसौ नन्दिकेशस्तु देवदेवस्य कर्णयोः ।
कुण्डलं खञ्जयामास नानारत्नविराजितम् ।। २९ ।।
कोटिसूर्यप्रतिकाशं हेमवैदुर्यनिर्मितम् ।
मूर्द्धदेशे च मुकुटं अर्धचन्द्रविभूषितम् ।। ३० ।।
कर्पूरमिश्रितं शुद्धं चन्दनं च सुवासितम् ।
शीतलं पार्वतीशस्य भालपट्टे च लेपितम् ।। ३१ ।।
ततो गण्डस्थले चैव कुङ्कुमं मृगपत्रिकाम् ।
अधरे शुद्धताम्बूलं ददौ नन्दी स सत्वरः ।। ३२ ।।

हृदये चोज्वलं हारं माणिक्यं मौक्तिकं तथा ।
यत्नेन रञ्जयामास चन्दनं पुष्पमालिकाम् ।। ३३ ।।
पद्मरागयुतौ हैमौ कङ्कणौ सुप्रकाशितौ ।
ददौ श्रीकरयोर्नन्दी विद्युदाभाश्च मुद्रिकाः ।। ३४ ।।
तत्र पट्टाम्बरं कंट्यां नीलवस्त्रं तदुत्तरम् ।
मेखलां खञ्जयामास क्षुद्रघण्टासुशोभिताम् ।। ३५ ।।
पादयोर्नूपुरं दिव्यं नीलेन्द्रमणिसंयुतम् ।
सुवेशमेवं देवस्य नन्दिकेशश्चकार ह ।। ३६ ।।
सुवेशः सुमुखः श्रीमान् कोटिचन्द्रद्युतिः हरः ।
वसति स्म वृषे देवः क्रोडे कृत्वा हिमाद्रिजाम् ।। ३७ ।।
इत्थं कृत्वा जगामाशु व्जज्यमानः पुरःसरैः ।
चामरैर्व्यजनैः शुभ्रैः सिद्धगन्धर्वकिन्नरैः ।। ३८ ।।
श्वेतातपत्रं शिरसि कोट्यर्कद्युतिनिन्दकम् ।
दीर्घनालं सुविस्तीर्णं रौप्यं भृकुटिना धृतम् ।। ३९ ।।
जयशब्दं तथा नृत्यं कुर्वन्ति शिवसत्तमाः ।
त्रिशूलं डमरुं चैव जटास्वक्षं च धारिणः ।। ४० ।।
एवं श्रीपार्वतीनाथो भूतानां वरदायकः ।
एकाम्रं प्रापयामास नारदेन महात्मना ।। ४१ ।।
भूत्वैकाम्रे ददर्शासौ वासुदेवं सनातनम् ।
साष्टाङ्गेन प्रणम्याशु स्तुतिमेतां चकार ह ।। ४२ ।।

श्रीशङ्कर उवाच

नमस्ते परमानन्द पद्मनाभ सुलोचन ।
नमोऽस्तु तस्मै हरये त्रयीमूर्त्तिधराय च ।। ४३ ।।
नीलजीमूतवपुषे नमस्त्रैलोक्यनायक ।
देवानां वरदातासि प्रपन्नार्त्तिहर प्रभो ।। ४४ ।।

एकाम्रकनिवासाय नमस्ते पीतवाससे ।
त्रैगुणैर्बाह्यरूपाय शङ्खचक्राब्जधारिणे ।। ४५ ।।
त्वमेव जगतामादिः कारणानाञ्च कारणम् ।
भक्तबन्धो जगन्नाथ करुणामयसागर ।। ४६ ।।
तव स्थानानि रम्याणि सन्ति देव सहस्रशः ।
एकाम्रे गुप्तरूपञ्च न जानामि कथं प्रभो ।। ४७ ।।
मामुवाच पुरा विष्णो त्वं ममार्द्धशरीरकः ।
इदानीं तु कथं बाह्यः कृतवानसि केशव ।। ४८ ।।
नारदस्तव भक्तस्तु शय्या ते भुजगेश्वरः ।
केवलं तौ हि जानीतः कृपा नास्ति मयि प्रभो ।। ४९ ।।
गोपीनां प्रेमभक्तानां दत्ता मुक्तिस्त्वया प्रभो ।
सनकाद्यश्च तिष्ठन्ति ईश्वरेच्छा निरङ्कुशाः ।। ५० ।।
एकाम्रविपिने रम्ये तिष्ठसे परमेश्वर ।
योगनिद्रां समाश्रित्य लोचनाब्जे च मुद्रिते ।। ५१ ।।
इदानीं करुणापाङ्गं देहि मे जगदीश्वर ।
स्वस्थानं देहि मे स्थातुमागतोऽहं तवान्तिकम् ।। ५२ ।।
स्तुतिमित्थं प्रकुर्वाणे हिमाद्रितनयापतौ ।
उन्मील्य लोचने विष्णुर्विहसन् वाक्यमब्रवीत् ।। ५३ ।।

वासुदेव उवाच

शृणु मद्वचनं शम्भो कथयामि हितं तव ।
स्थातुं स्थानं प्रदास्यामि कुरु सत्यं ममाग्रतः ।। ५४ ।।
नैव काशीं गमिष्यामि स्थास्याम्यत्र हि सर्वदा ।
स्वगणैरावृतो नित्यमिति सत्यं महेश्वर ।। ५५ ।।

श्रीशङ्कर उवाच

काशीं कथं न यास्यामि तत्रास्ते जाह्नवी मम ।
सर्वतीर्थमयी पुण्या तीर्थं मे मणिकर्णिका ।। ५६ ।।

वासुदेव उवाच

अत्रास्ते मणिकर्णेति मदग्रे पापनाशिनी ।
आच्छादिता च पाषाणैर्गुल्मवृक्षलतादिभिः ।। ५७ ।।
नारदस्तु न जानाति नैव शेषो गिरीश्वर ।
अहमेव विजानामि विद्धि त्वमधुना हर ।। ५८ ।।
अत्रैव जाह्नवी तेऽस्ति मत्पादाग्रच्युता शुभा ।
आग्नेय्यां दिशि पृष्ठे मे गङ्गायमुनासंज्ञिता ।। ५९ ।।
अन्यान्यत्र च तीर्थानि सुगुप्तानि च सन्ति मे ।
पश्चात् सर्वाणि वक्ष्यामि कुरु सत्यं च शङ्कर ।। ६० ।।

शङ्कर उवाच

सत्यं सत्यं वदाम्यत्र तिष्ठामि मधुसूदन ।
वाराणसीं परित्यज्य चान्यक्षेत्राणि माधव ।। ६१ ।।
एकाम्र विपिने स्थास्ये तव सन्निहिते प्रभो ।
सत्यं सत्यं पुनः सत्यं न यास्यामि च कुत्रचित् ।। ६२ ।।
इत्युक्त्वा भगवान् शम्भुस्तद्विष्णोर्दक्षिणे दिशि ।
लिङ्गरूपधराश्चास्ते चतुर्वर्गफलप्रदः ।। ६३ ।।
माणिक्याभं तथोदूर्ध्वं च लिङ्गं त्रिभुवनेश्वरम् ।। ६४ ।।

भरद्वाज उवाच

ततः प्रभृति भो विप्राः क्षेत्रे राजा महेश्वरः ।
कोटिलिङ्गावृतः श्रीमान् वासुदेवस्तु पालकः ।। ६५ ।।

तत्र पश्यन्ति ये लिङ्गमेकाम्रे मुनिसत्तमाः ।
ब्रह्महत्यायुता वाऽपि मुक्तिस्तेषां करे स्थिता ।। ६६ ।।
एवं शम्भुः प्रार्थयित्वा वासुदेवं सनातनम् ।
एकाम्रविपिने ह्यास्ते कोटिलिङ्गधरः प्रभुः ।। ६७ ।।

इति श्रीकपिलसंहितायां महेशागमनं नाम एकादशोऽध्यायः ।।

द्वादशोऽध्यायः

ऋषय ऊचुः

तस्मिन् क्षेत्रे द्विजश्रेष्ठ वद तीर्थं फलप्रदम् ।
नामधेयं तथोत्पन्नं सुगुप्तं चक्रपाणिना ।। १ ।।

भरद्वाज उवाच

गते च कतिचित्काले तत्र देवो महेश्वरः ।
परिपृच्छ्य मुरारातिमग्रे पाषाणमाखनत् ।। २ ।।
तस्मिन्नेव क्षणे विप्राः स्रवन्ति जलबिन्दवः ।
तस्माद् बिन्दुसरो नाम चक्रे देवगणैस्सह ।। ३ ।।
पुष्करादीनि तीर्थानि क्षीरोदादींश्च सागरान् ।
गङ्गाद्याः सरितश्चैव सर्वान् देवः समाहूयत् ।। ४ ।।
सर्वे तत्र स्रवन्ति स्म जलविन्दूनहर्निशम् ।
तस्माद्देवे पुराणे च नाम्ना बिन्दुसरोवरः ।। ५ ।।
गङ्गा गोदावरी रेवा तुङ्गभद्रा च नर्मदा ।
कावेरी सरयूश्चैव तापी तत्र स्रवन्ति च ।। ६ ।।
मानसं पुष्करं गङ्गा सुतीक्ष्णं शैलनिर्मलम् ।
स्रवन्त्येतानि सर्वाणि तीर्थे विन्दूद्भवे द्विजाः ।। ७ ।।

क्षीराब्धिलवणाब्धिश्च पयोधिर्दुग्ध एव च ।
सन्ति विन्दूद्भवे तीर्थे दधिसर्पिः सुरार्णवाः ।। ८ ।।
द्वारावत्यां च यत्तीर्थं नैमिषे दण्डके वने ।
तानि बिन्दूद्भवे नित्यं तथा वदरिकाश्रमे ।। ९ ।।
एकाम्रकवने विप्रास्तीर्थं बिन्दुसरः स्मृतम् ।
तत्र स्नात्वा जलं पीत्वा न नरो नरकं ब्रजेत् ।। १० ।।
तीर्थं बिन्दूद्भवं विप्रा मुनीन्द्रैरुपसेवितम् ।
पवित्रं निर्मलजलं सोपानैरुपशोभितम् ।। ११ ।।
स्वर्गे मर्त्ये च पाताले ह्यन्तरीक्षे तथा दिशि ।
न भूतं न भविष्यत् च तीर्थं बिन्दूद्भवात् परम् ।। १२ ।।
बिन्दूद्भवजलं विप्रा अमृतं नात्र संशयः ।
तज्जले यो नरः स्नायात् सोऽमृतत्त्वाय कल्पते ।। १३ ।।
यथेष्टं पिबते यस्तु बिन्दूद्भवजलं शुभम् ।
यावत् भास्करपर्यन्तं स शिवत्वं च गच्छति ।। १४ ।।
बिन्दूद्भवजलं विप्रा पापान्मुक्तिप्रदं मतम् ।
कृते पाने फलं ह्येतन्मज्जने स्नानजं फलम् ।। १५ ।।
रविसङ्क्रमणे चैव यस्तु स्नायात् ह्रदोत्तमे ।
तुष्यन्ति पितरस्तस्य वासवाद्याश्च देवताः ।। १६ ।।
मासे मासे नरो यस्तु चतुर्दश्यां विशेषतः ।
भक्त्या बिन्दूद्भवे स्नायात् वाञ्छितं स लभेत् फलम् ।। १७ ।।
कृष्णपक्षे चतुर्दश्यां सोमवारो यदा भवेत् ।
तदा तत्र नरः स्नात्वा वैकुण्ठं लभते ध्रुवम् ।। १८ ।।
अमावास्यायां यः स्नायात् पौर्णमास्यामथापि वा ।
दत्वा पिण्डं पितृभ्यश्च ब्रह्मघातात् प्रमुच्यते ।। १९ ।।

विशेषं कथयिष्यामि ग्रहणे चन्द्रसूर्ययोः ।
मन्त्रं विन्दूद्भवे जप्त्वा सिद्धिमाप्नोत्यसंशयः ।। २० ।।
बिन्दूद्भवे नरः स्नात्वा यः पश्येद् वृषभध्वजम् ।
सर्वपापविनिर्मुक्तः शिवदेहे प्रलीयते ।। २१ ।।
तत्र चैव द्विजश्रेष्ठा देवीपादहरा श्रुता ।
तां दृष्ट्वा पूजयित्वा च नरस्तु सुखमेधते ।। २२ ।।
पादे देव्या हरो यस्मात्तस्मात् पादहरा स्मृता ।
तत्र स्नात्वा च तां दृष्ट्वा पश्चात् पश्येन्महेश्वरम् ।। २३ ।।
यासौ पादहरा देवी नराणां सुखदायिनी ।
द्वितीयविग्रहश्चेयं लिङ्गराजस्य भो द्विजाः ।। २४ ।।
स्नात्वा बिन्दूद्भवे तीर्थे दृष्ट्वा पादहरां शुभाम् ।
तस्मात्तीर्थेश्वरं पूज्य नरो मुच्येत पातकात् ।। २५ ।।
बिन्दुतीर्थे नरः स्नात्वा दृष्ट्वा श्रीपुरुषोत्तमम् ।
देवीं पादहरां दृष्ट्वा ह्यक्षयं फलमालभेत् ।। २६ ।।
यस्तु पश्यति तल्लिङ्गं नाम्ना त्रिभुवनेश्वरम् ।
देवदेवो जगत्स्वामी तस्य मुक्तिं प्रयच्छति ।। २७ ।।
तस्मिन् तीर्थवरे स्नात्वा दृष्ट्वा त्रिभुवनेश्वरम् ।
कामगेन विमानेन वैष्णवं पदमाप्नुयात् ।। २८ ।।
सर्वतीर्थाद्वरिष्ठञ्च तीर्थं बिन्दूद्भवं द्विजाः ।
सर्वदेवाद्वरिष्ठोऽयं लिङ्गरूपी न संशयः ।। २९ ।।
देवतानां यथा श्रेष्ठो वासवः समुदाहृतः ।
तीर्थानां च तथा श्रेष्ठं बिन्दूद्भवमुदाहृतम् ।। ३० ।।
एतन्निगदितं विप्रास्तीर्थं बिन्दूद्भवं शुभम् ।
अपरं कथयिष्यामि किं विप्रा वद सत्वरम् ।। ३१ ।।

पुण्याख्यानमिदं यस्तु पठति श्रूयतेऽथवा ।
सर्वपापक्षयं कृत्वा सोऽमृतत्त्वमवाप्नुयात् ।। ३२ ।।

इति श्रीकपिलसंहितायां बिन्दूद्भवो नाम द्वादशोऽध्यायः ।।

त्रयोदशोऽध्यायः

ऋषय ऊचुः

विस्तरेण समाख्याहि क्षेत्रमाहात्म्यमुत्तमम् ।
वासुदेवस्य माहात्म्यं कोटिलिङ्गेश्वरस्य तु ।। १ ।।

भरद्वाज उवाच

एकाम्रकवनं श्रीमत् क्षेत्राणामुत्तमं श्रुतम् ।
एकाम्रसदृशं क्षेत्रं भूमौ नास्ति द्विजोत्तमाः ।। २ ।।
तदेव परमं स्थानं तदेव परमं पदम् ।
निर्भयान्निवसन्त्यत्र सदा देवाः सवासवाः ।। ३ ।।
सर्वतीर्थमयं ह्येतदेकाम्रवनसंज्ञितम् ।
यत्र साक्षात् परंब्रह्म लिङ्गरूपी वसत्यसौ ।। ४ ।।
एकाम्रकं महापुण्यं सर्वक्षेत्राधिकं फलम् ।
कामदं मोक्षदं तीर्थं जन्तूनां पुण्यवर्द्धनम् ।। ५ ।।
ये नरास्तत्र गच्छन्ति कृतसङ्कल्पमानसाः ।
ते पापं निर्दहन्त्याशु चोद्धरेयुः कुलानि वै ।। ६ ।।
एकाम्रसदृशं क्षेत्रं नेह पश्यामि किञ्चन ।
प्राणिनो यत्र गत्वा च लभेयुर्मोक्षमव्ययम् ।। ७ ।।
शरीरं विपिने तस्मिन् ये त्यजन्ति नरोत्तमाः ।
ते यान्ति शिवसान्निध्यं भासमानाः प्रियम्बदाः ।। ८ ।।

हत्याकोटियुतो वाऽपि गोघ्नो वा गुरुतल्पगः ।
एकाम्रे विग्रहं त्यक्त्वा याति विष्णुं सनातनम् ।। ९ ।।
हरिशङ्करयोर्मध्ये जले बिन्दूद्भवे द्विजाः ।
कीटकोऽपि त्यजन् देहं सत्यं याति परं पदम् ।। १० ।।
अग्रे श्रीवासुदेवस्य शरीरं त्यजते तु यः ।
जलमध्ये द्विजश्रेष्ठा वासुदेवे स लीयते ।। ११ ।।
तत्र त्यक्त्वा शरीरं स्वं कीटाद्या जङ्गमास्तथा ।
सर्वे मुक्तिपथं यान्ति मनुष्याणां च किं पुनः ।। १२ ।।
एकाम्रक्षेत्रेऽत्र यो जन्तुस्त्यजते स्वशरीरकम् ।
तदा श्रीभगवान् शम्भुः कर्णमूले पठेदिदम् ।। १३ ।।
त्वमत्र त्यजसे देहं पुण्यापुण्यं कृतं त्वया ।
तुष्यत्यामलकं शम्भुर्वासुदेवप्रियं शुभम् ।
विशेषोऽयं तरुर्विप्राः क्षेत्रराजे स्थितो यतः ।। १७ ।।
तन्मूले ये त्यजन्ति स्म शरीरं पापकृत्तमाः ।
ते च मुक्तिं गता विप्राः किं पुनः पुण्यकारिणः ।। १८ ।।
अविश्वासकृतानां च नराणां परमेश्वरः ।
इममामलकं वृक्षं विश्वासार्थं चकार ह ।। १९ ।।
अत्रैकाम्रे गृहे बाह्ये अन्तरीक्षे स्थले जले ।
यत्र तत्र शरीरञ्च त्यक्त्वा मुक्तिमवाप्नुयात् ।। २० ।।
दुर्वृत्तः साधुवृत्तो वा यो वा सोऽपि द्विजोत्तमाः ।
त्यक्त्वैकाम्रे स्वदेहं च नरो वैकुण्ठमालभेत् ।। २१ ।।
एवं नानाविधगुणास्तस्यैकाम्रवनस्य च ।
यत्र साक्षाज्जगत्स्वामी दर्शनान्मुक्तिदो मतः ।। २२ ।।
विघ्नेश्वरं वृषं देवं देवीं चण्डं गुह्यं तरुम् ।
सावित्रीं च समालोक्य न मातुः स्तनपो भवेत् ।। २३ ।।

कोटिलिङ्गेश्वरं तत्र येऽर्च्चयन्ति समाहिताः ।
तेषां भाग्यवतां जन्म सफलं परिकीर्त्तितम् ।। २४ ।।
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैरपि ।
मालाभिश्चैव ताम्बुलैरेकाम्रविपिने शिवम् ।। २५ ।।
पूजयन्ति नराः श्रेष्ठा ये च तद्गतमानसाः ।
तेषां गतिं द्विजश्रेष्ठाः शृणुध्वं कथयामि वः ।। २६ ।।
नानाविधविमानैश्च सिद्धगन्धर्वसेवितैः ।
पताकाध्वजकैः शुभ्रैरप्सरोगणनृत्यकैः ।। २७ ।।
इन्द्रनीलप्रतीकाशैः पद्मरागनिभैस्तथा ।
निर्मितैः स्वर्णमुक्ताभ्यां शिवकिङ्करवेष्टितैः ।। २८ ।।
व्रजन्ति शिवसान्निध्यं ते नरा हृष्टमानसाः ।
यथेप्सितानि भोग्यानि तत्र भुञ्जन्ति नित्यशः ।। २९ ।।
असौ देवो विरूपाक्षो ब्रह्मरूपी न संशयः ।
अस्य दर्शनमात्रेण ब्रह्महत्या विनश्यति ।। ३० ।।
एकाम्रकवनस्थं च लिङ्गरूपिणमव्ययम् ।
भक्त्या पश्यन्ति ये नित्यं तेषां मुक्तिः करे स्थिता ।। ३१ ।।
नैवेद्यं तस्य देवस्य महापातकनाशनम् ।
ब्रह्मादीनां च देवानां भोग्यं ब्राह्मणसत्तमाः ।। ३२ ।।
एकाम्रविपिने विप्रा लिङ्गं साक्षात् सनातनम् ।
नैवेद्यमस्य वाञ्छन्ति शक्राद्यास्त्रिदिवौकसः ।। ३३ ।।
अग्राह्यमीशनैवेद्यं न भोक्तव्यमिति द्विजाः ।
यानि वाक्यानि तान्यत्र नाद्रियन्ते कदाचन ।। ३४ ।।
काश्यामेकाम्रके सेतौ तथोंकारेश्वरे द्विजाः ।
महाप्रसादं नैवेद्यमिति प्राहुर्महर्षयः ।
एकाम्रकानने विष्णोर्गेहे ब्राह्मणसत्तमाः ।। ३५ ।।

नैवेद्ये लिङ्गराजस्य पुण्ये शङ्कां च मा कृथाः ।
तदनादृत्य नरकं यान्ति नास्त्यत्र संशयः ।। ३६ ।।
तस्य श्रीलिङ्गराजस्य ध्वजारोपणमुत्तमम् ।
यः करोति नरः श्रेष्ठः स शिवत्वं च गच्छति ।। ३७ ।।
पट्टवस्त्रैर्नीलवस्त्रैः पीतशुक्लाम्बरैस्तथा ।
ये कुर्वन्ति नरास्तत्र ध्वजारोपणमीश्वरे ।। ३८ ।।
ब्रह्महत्यादि पापानि क्षयित्वा ते नरोत्तमाः ।
पितॄनुद्धृत्य नरकात्ते व्रजन्ति शिवं ध्रुवम् ।। ३९ ।।
पूजाकाले च ये तस्य शृण्वन्ति मुरजध्वनिम् ।
मृदङ्गं शङ्खनादं च पट्टहं भेरीमेव च ।। ४० ।।
काहालं डिण्डिमं शब्दं प्रयत्नेन नरोत्तमाः ।
तैस्सर्वैर्वेष्टितास्ते च व्रजन्ति शिवमव्ययम् ।। ४१ ।।
श्रुत्वैवं तस्य शब्दं च नरो मुक्तिं व्रजेद् द्विजाः ।
तस्य पूजां समालोक्य न जाने किं फलं भवेत् ।। ४२ ।।
कोटिलिङ्गेश्वरस्याग्रे यस्तु भक्त्या जपेन्मनुम् ।
इहलोके सुखं भुक्त्वा देहान्ते शिवमाप्नुयात् ।। ४३ ।।
कोटिलिङ्गेश्वरो यस्तु तद् ब्रह्मैव न संशयः ।
यमालोक्य नराः नित्यं प्राप्नुवन्ति मनोरथम् ।। ४४ ।।
ब्रह्माद्या देवताः सर्वा यमर्च्चयन्ति ह्यहर्निशम् ।
भक्त्या बिन्दूद्भवे स्नात्वा स्वपदं प्राप्नुवन्ति ते ।। ४५ ।।
नास्ति नास्ति समं लिङ्गं कोटिलिङ्गेश्वरात् परम् ।
भोगवत्यां भुवि स्वर्गे सत्यं सत्यं वदामि वः ।। ४६ ।।
एकाम्रविपिने विप्रा योऽसौ त्रिभुवनेश्वरः ।
तस्य दर्शनमात्रेण नरो मोक्षं च गच्छति ।। ४७ ।।

प्रदक्षिणं प्रकुर्वन्ति कोटिलिङ्गेश्वरस्य ये ।
पदात् पदात् ब्रह्मपदं तेषां सन्निहितं भवेत् ।। ४८ ।।
चण्डेश्वरं समासाद्य सव्यासव्य प्रदक्षिणम् ।
लङ्घनं सोमसूत्रस्य कृत्वा नरकमश्नुते ।। ४९ ।।
तस्याग्रे वृक्षराजश्च स्वयं विग्रहवान् द्विजाः ।
तं दृष्ट्वा पूजयित्वा च शिवप्रीतिं लभेन्नरः ।। ५० ।।
देवस्य पृष्ठभागे तु नैऋर्तीं दिशमाश्रिताम् ।
सावित्रीं पूजयित्वा च दृष्ट्वा वाञ्छितमाप्नुयात् ।। ५१ ।।
अग्रे विघ्नेश्वरं दृष्ट्वा पार्श्वे चण्डं हिमाद्रिजाम् ।
पूजयित्वा प्रयत्नेन नरकांश्च जिघांसति ।। ५२ ।।
देवस्योत्तरभागे किञ्चिदुत्तरदिग्गतम् ।
शिखिध्वजं समालोक्य नरः सम्पदमालभेत् ।। ५३ ।।
तस्य सन्निहिते लिङ्गमेकाम्रेश्वरसंज्ञकम् ।
एकाम्रवृक्षस्तत्रासीत् पुराकल्पे तु मुक्तिदः ।। ५४ ।।
तत्र चैको यतश्चाम्रस्तस्मादेकाम्रकं वनम् ।
महोच्छ्रायः सुशाखी च नवविद्रुमपल्लवः ।। ५५ ।।
धर्मार्थकाममोक्षदं पत्रपुष्पफलान्वितम् ।
तं वृक्षं गोपनीयञ्च चकार मुरनाशनः ।। ५६ ।।
तस्य मूले महेशस्तु तन्नाम्ना ख्यातिमागतः ।
तं दृष्ट्वा विधिमन्त्रेण धर्मकामार्थमाप्नुयात् ।। ५७ ।।
तत्र श्रीशैलजाग्रे च तिक्तशाको महान् द्रुमः ।
पुरा श्रीभगवान् शम्भुः पादपं तमवाप्तवान् ।
तस्य वृक्षस्य माहात्म्यं शृणुध्वं पापनाशनम् ।। ५८ ।।
पुरा देवासुरे युद्धे भैरवेऽत्यन्तसङ्कटे ।
इन्द्राद्या निर्जिताः सर्वे राक्षसैर्बलदर्पितैः ।। ५९ ।।

तदेन्द्रः शङ्कमानस्तु वाक्यमूचे वृहस्पतिम् ।
किं करोमि वदाशु त्वं देवता निर्जिताः परैः ।। ६० ।।

वृहस्पतिरुवाच

गच्छैकाम्रं शचीनाथ पश्य देवं सनातनम् ।
तिक्तशाकतले तत्र तपस्तप्त्वा च जेष्यसि ।। ६१ ।।
श्रुत्वेत्थं वचनं तस्य हृष्टरोमा परंतपः ।
ययावेकाम्रकं तिक्तशाकवृक्षतलं त्वसौ ।। ६२ ।।
विडौजाः परमं मन्त्रं बहुकालं जजाप ह ।
ततः श्रीभगवान् भर्गः तपसा परितोषितः ।
रम्यसुश्लिष्टवचनमूचे तं बलसूदनम् ।। ६३ ।।

शम्भुरुवाच

पादपोऽयमहं साक्षात् शृणुध्वं पाकशासन ।
तस्य मूले जपन्तं त्वां ददामि वरमीप्सितम् ।। ६४ ।।
अधुनाहूय तान् दैत्यानस्मिन्नेकाम्रके वने ।
जेतासि कुरु सङ्ग्रामं पुरन्दर मदाज्ञया ।। ६५ ।।
ततोऽसौ त्रिदशाधीशः स्वीकृत्य वचनं विभोः ।
जगाम त्रिविदं सर्वा देवताश्च समाहूयत् ।। ६६ ।।
सह दैत्यैस्ततो युद्धं चकार बलसूदनः ।
आज्ञया देवदेवस्य जघान वरदानवान् ।। ६७ ।।
ततोऽम्बरात् पुष्पवृष्टिः पुरुहूतस्य मस्तके ।
पपात देवताः सर्वा ययुः स्वं स्वं पुरस्ततः ।। ६८ ।।
एवं श्रीतिक्तशाकस्तु वृक्षः परमसिद्धिदः ।
स्वमन्त्रेण च तं दृष्ट्वा स्पष्ट्वा सिद्धिमवाप्नुयात् ।। ६९ ।।

एवं मया वो गदितं समासतो
वृक्षस्य माहात्म्यमतीव निर्मलम् ।
मूलेऽस्य कृत्वा परमं तपः पुरा
जघान दैत्यान् त्रिदशाधिपो द्विजाः ।। ७० ।।

इति श्रीकपिलसंहितायां शक्रजयवर्द्धनं नाम त्रयोदशोऽध्यायः ।।

चतुर्दशोऽध्यायः

भरद्वाज उवाच

अथ वक्ष्यामि माहात्म्यं वासुदेवस्य भो द्विजाः ।
वासुदेवेति सङ्कीर्त्त्य नरो मुक्तिमाप्नुयात् ।। १ ।।
तत्र एकाम्रके पुण्ये वासुदेवो जगद्गुरुः ।
वैकुण्ठं च परित्यज्य आस्ते विग्रहवान् स्वयम् ।। २ ।।
नानारत्नैः सुघटितैः कङ्कणैर्भुजशोभितः ।
शङ्खचक्रगदापाणिः वरदो भक्तवत्सलः ।। ३ ।।
वनमाली पितवासः कौस्तुभेन विराजितः ।
ब्रह्मयज्ञोपवितेन सोभितोरःस्थलः प्रभुः ।। ४ ।।
किङ्किणीभूषितकटिर्नवपल्लवपादकः ।
कम्बुग्रीवो दीर्घघोणी निद्राघूर्णितलोचनः ।। ५ ।।
कुण्डलाभ्यां विचित्राभ्यां गण्डस्थलविराजितः ।
भ्राजमानो जटाभिश्च मुकुटेनार्कतेजसा ।। ६ ।।
इन्द्रनीलमणिश्यामः श्रीवत्साङ्कितविग्रहः ।
दाडिमीपुष्पसङ्काशस्त्वधरोऽमृतदायकः ।। ७ ।।

शेषदेवः स्वयं साक्षात् फणाविकटमस्तकः ।
हलपाणिः स्थितो दक्षे चिह्नितो वनमालया ।। ८ ।।
जगद्गुरुः जगन्नाथ एकाम्रपरिपालकः ।
रामकृष्णस्वरूपेण स्थितोऽसौ कमलाधवः ।। ९ ।।
साक्षात् ब्रह्मस्वरूपोऽयं परंब्रह्म उदाहृतः ।
अद्वितीयोऽक्षयो नित्यो वासुदेवेति संज्ञितः ।। १० ।।
स एव गतिदाता च स एव परमात्मकः ।
कीटवृक्षपतङ्गेषु स आस्ते हृदयस्थितः ।। ११ ।।
ये निन्दन्ति नरा मूढा वासुदेवं निरञ्जनम् ।
भक्त्या तं नैव पश्यन्ति पच्यन्ते रौरवे चिरम् ।। १२ ।।
सर्वक्षेत्राणि रम्याणि तीर्थान्यायतनानि च ।
परित्यज्य जगन्नाथ एकाम्रवनमास्थितः ।। १३ ।।
एकाम्रं प्रलये विप्रा न नाशमधिगच्छति ।
तस्मात् सर्वाणि संत्यज्य आस्ते तत्र गदाधरः ।। १४ ।।
एकाम्रके बिन्दुसरोवरान्ते
परात्परं ब्रह्मसदात्मकोऽस्ति ।
अनीश्वरः शाश्वत ईश्वरस्तु
श्यामोपलाङ्गो हरिरर्कतेजः ।। १५ ।।
ब्रह्मस्वरूपोऽयमकल्मषस्तु
भक्तप्रियः शान्तमना सुदेहः ।
ज्ञात्वा मनो मानवराक्षसानां
स वै फलं यच्छति तद्यथोक्तम् ।। १६ ।।
अदौ मुरारिः पुरदानवारे
रक्षार्थमेकः किल सर्वदास्ते ।
कौमोदकीशङ्खरथाङ्गधारी
पीताम्बरः कौस्तुभमादधानः ।। १७ ।।

श्रीवासुदेवस्य च दर्शनेन
दक्षस्य शेषस्य गदायुधस्य ।
शठाः खला नास्तिककर्मयुक्ता
एकाम्रके मुक्तिमवाप्नुयुस्ते ।। १८ ।।
योऽसौ सर्वगतो देवो मुरारिर्मधुसूदनः ।
आस्ते स भगवान् साक्षादेकाम्रवनमध्यगः ।। १९ ।।
पृथिव्यां यानि तीर्थानि ऋषिणामाश्रमाणि च ।
हरिस्तानि परित्यज्य शिलारूपधरः स्वयम् ।। २० ।।
नीलाद्रौ दारुवपुषं कदाचित् संत्यजेद्धरिः ।
एकाम्रकानने भाति सदा पाषाणलीलया ।। २१ ।।
कलौ तीर्थानि संत्यज्य विशेषं कथयाम्यहम् ।
एकाम्रवनमध्यास्ते शङ्खचक्रधरो हरिः ।। २२ ।।
यस्य स्मरणमात्रेण पातकानि ययुः क्षयम् ।
किं फलं तन्न जानीमस्तस्य देवस्य दर्शने ।। २३ ।।
पुरुषोत्तम इत्युक्त्वा तस्य नाम समुच्चरन् ।
क्रोधेन लीलया वापि नरो मुक्तिमवाप्नुयात् ।। २४ ।।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।
स्वर्णकूटाचले दृष्ट्वा नरा मोक्षं व्रजन्ति च ।। २५ ।।
प्राप्ते कलियुगे घोरे यथा धर्मो वनं व्रजेत् ।
तथा तीर्थानि संत्यज्य एकाम्रे पुरुषोत्तमः ।। २६ ।।
एकाम्रकं गमिष्यामि द्रक्ष्यामि पुरुषोत्तमम् ।
इत्युच्चरति यस्त्वास्ये सोऽपि विष्णुपुरं व्रजेत् ।। २७ ।।
यस्तु वेदे पुराणे च प्रणवः पठ्यते सदा ।
स एष प्रणवो नित्यो भाति पाषाणदेहभृत् ।। २८ ।।

यद् वेद परमं ब्रह्म ब्रह्मलोके पितामहः ।
चतुर्वेदेषु शास्त्रेषु तद्ब्रह्मैतत् शिलाङ्गकम् ।। २९ ।।
ततः बिन्दूद्भवे स्नात्वा यः पश्येन्मुखपङ्कजम् ।
जीवन्निह कृतार्थस्तु स भवेन्नात्र संशयः ।। ३० ।।
मुखपद्मं समालोक्य तस्य श्रीब्रह्मरूपिणः ।
सनकाद्याः शुकाद्याश्च परंनिर्वाणमाययुः ।। ३१ ।।
कृष्ण कृष्णेति गायन्ति तस्याग्रे ये नरोत्तमाः ।
भावग्राही भक्तबन्धुस्तेभ्यः मुक्तिं प्रयच्छति ।। ३२ ।।
यस्तु तच्चरणोद्भूतं सलिलं पिबते नरः ।
बहिरन्तर्गतं पापं तस्य नश्यति नान्यथा ।। ३३ ।।
दण्डप्रणामं कुरुते यस्तं मर्त्त्यो जनार्द्दनम् ।
रजसि च भवेत् पुण्यमश्वमेधशतोद्भवम् ।। ३४ ।।
तस्य श्रीवासुदेवस्य लीलया च प्रदक्षिणे ।
पदात् पदानि नश्यन्ति ब्रह्महत्या सहस्रशः ।। ३५ ।।
एकाम्रविपिने विप्रा देवदेवो जनार्द्दनः ।
तदेव परमं ब्रह्म परमानन्ददायकम् ।। ३६ ।।
एकाम्रे परमं ब्रह्म वासुदेवेति संज्ञितम् ।
भाति पाषाणवपुषा मुक्तिदो मुरनाशनः ।। ३७ ।।
तस्याग्रे च जपन् मन्त्री तं ध्यायन् पुरुषोत्तमम् ।
तदेव याति वैकुण्ठं नरो विष्णुपरायणः ।। ३८ ।।
कृत्वा कार्य्यमकार्य्यं वा दृष्ट्वैकाम्रे जनार्द्दनम् ।
नरो वैकुण्ठमाप्नोति नान्यथा मुनिसत्तमाः ।। ३९ ।।
वासुदेवस्य तत्स्थानं वैकुण्ठं जानीथ द्विजाः ।
सर्वदा तत्र यस्तिष्ठेद् जीवन्मुक्तो भवेत्तु सः ।। ४० ।।

एवं नानागुणाः सन्ति वासुदेवस्य चक्रिणः ।
यस्य स्मरणमात्रेण नरो ब्रह्माधिगच्छति ।। ४१ ।।
शङ्खचक्राङ्कितभुजं विपिनैकाम्रमध्यगम् ।
कञ्जाक्षं पीतवसनं नीरदाभं हरिं भजे ।। ४२ ।।
इति मन्त्रं जपेद् यस्तु भक्तियुक्तेन चेतसा ।
वासुदेवो द्विजाः सत्यं तस्मै मुक्तिं प्रयच्छति ।। ४३ ।।
सहस्रयोजनान्ते च शङ्खचक्रेति यो मनुम् ।
भजते दुर्लभां मुक्तिं शङ्खचक्रधरो भवेत् ।। ४४ ।।
मन्त्रस्यास्य द्विजश्रेष्ठा उपदेशो न विद्यते ।
प्राप्तमात्रेण जप्त्वा च मुक्तिदं हरिमाव्रजेत् ।। ४५ ।।
क्रूरे भक्तिविहीने च न दातव्यः परो मनुः ।
कर्त्तव्यो गोपनीयश्च न वाच्यश्च परे जने ।। ४६ ।।
शङ्खचक्रमनुर्विप्रा मन्त्रराजः स्मृतः बुधैः ।
गोपनीयः परो मन्त्रो गुह्यो वः कथितो मया ।। ४७ ।।
तस्मिन् पुण्यवने विप्रा लिङ्गं ब्रह्मेश्वरं श्रुतम् ।
तस्य दर्शनमात्रेण ब्रह्मलोकमवाप्नुयात् ।। ४८ ।।
भास्करेशं च मेघेशं गोकर्णेश्वरसंज्ञकम् ।
स्वर्णजालेश्वरं लिङ्गं स्वर्णकूटेश्वरं तथा ।। ४९ ।।
एतान् दृष्ट्वा नमस्कृत्य पूजयित्वा प्रयत्नतः ।
सर्वपापान् परित्यज्य कैलासनिलयं व्रजेत् ।। ५० ।।
आग्नेये देवदेवस्य लिङ्गं सूक्ष्मेश्वरं द्विजाः ।
अर्च्चयित्वा तमालोक्य पापराशिं परित्यजेत् ।। ५१ ।।
तत्रैवाम्रातकेशस्तु मध्यमेश्वर एव च ।
एतयोर्दर्शने विप्राः काशीवासफलं लभेत् ।। ५२ ।।

तत्रैव पिण्डं वितरन् पितॄणां सूक्ष्म दक्षिणे ।
पितॄनुद्धृत्य नरकाद्देवलोकं व्रजेन्नरः ।। ५३ ।।
तत्र सूक्ष्मेश्वरस्थाने पिण्डदानं करोति यः ।
स करोत्यक्षयां तृप्तिं पितॄणां शिवसम्मताम् ।। ५४ ।।
विशेषं कथयिष्यामि देशकालं यथा द्विजाः ।
आश्विने चामावास्यायां यतात्मा नियतः शुचिः ।। ५५ ।।
यः कुर्यात् पिण्डदानं च श्रीसूक्ष्मेश्वरदक्षिणे ।
पितरस्तस्य तुष्यन्ति कल्पकोटिशतान्तरम् ।। ५६ ।।
तस्य पश्चिमदिग्भागे कपिलेश्वरसंज्ञकः ।
सर्वकामप्रदो देवः पूजितः कपिलेन सहः ।। ५७ ।।
कपिलेशं परं लिङ्गं देवानां वरदायकम् ।
प्राणिनां भक्तियुक्तानां मनोरथफलप्रदम् ।। ५८ ।।
तत्र श्रीकपिलं कुण्डं सर्वतीर्थफलप्रदम् ।
तस्मिन् स्नात्वा च तं दृष्ट्वा ह्यक्षयं फलमालभेत् ।। ५९ ।।
तत्र उग्रेश्वरं लिङ्गं कौवेरीं दिशमास्थितम् ।
दशलक्षैकलक्षानां लिङ्गानां प्रभुरेव सः ।। ६० ।।
तं दृष्ट्वा प्रीतियुक्तेन लक्षैकादशमाप्नुयात् ।
तत्र नन्दीश्वरः साक्षाद्देवाग्रे भ्रूकुटिस्तथा ।।
तौ दृष्ट्वा च नमस्कृत्य सुखमाप्नोति मानवः ।। ६१ ।।
यमेश्वरस्तु तत्रास्ते मारुतिं दिशमास्थितः ।
तं पश्यन्तं नरं विप्रा यमदण्डो न बाधते ।। ६२ ।।
तस्याग्रे परमं तीर्थं पापनाशनसंज्ञकम् ।
पापानि विलयं यान्ति तज्जले स्नानमात्रतः ।। ६३ ।।
मार्गशीर्षे कृष्णपक्षे ह्यष्टम्यां द्विजसत्तमाः ।
तत्र स्नात्वा पितॄन् तर्प्य यः पश्येन्मैत्रवारुणौ ।।
तस्य तुष्टो भवेत् शम्भुः कलिकाले विशेषतः ।। ६४ ।।

तत्राऽष्टतीर्थं विधिवद् यः करोति नरोत्तमः ।
शिवलोकं समासाद्य न च्यवेत् स कदाचन ।। ६५ ।।
कुण्डस्य दक्षिणे भागे ईशानेश्वरसंज्ञकः ।
तमाश्रयित्वा विधिवत् पदमैन्द्रमवाप्नुयात् ।। ६६ ।।
एकाम्रकाननं पुण्यं कोटिलिङ्गाभिपूरितम् ।
कोटितीर्थसमायुक्तं देवानां जयवर्द्धनम् ।। ६७ ।।
अनेकानि च लिङ्गानि तत्र सन्ति द्विजोत्तमाः ।
सङ्ख्यातुं शिवलिङ्गानि शेषदेवो न शक्यते ।। ६८ ।।
कः शक्नोति गुणान् वक्तुं क्षेत्रस्यैकाम्रकस्य च ।
आश्रमाणि च रम्याणि यत्र सन्ति महर्षयः ।। ६९ ।।
किञ्चित् प्रोक्तं मया विप्रा भवतां हितमुत्तमम् ।
किमन्यत् श्रद्धया श्रोतुमिच्छथ परमं तपाः ।। ७० ।।

इति श्रीकपिलसंहितायां लिङ्गवर्ण्णनं नाम चतुर्द्दशोऽध्यायः ।।

पञ्चदशोऽध्यायः

ऋषय ऊचुः

पुनः किमस्ति ह्यपरमाश्रमं मुनिसत्तम ।
ब्रूहि सर्वमशेषेण तस्मिन्नेकाम्रके वने ।। १ ।।

भरद्वाज उवाच

तस्मिन् पुण्यवने विप्रा देवदेवस्य चोत्तरे ।
रामेश्वर इति ख्यातो रामचन्द्रेण पूजितः ।। २ ।।
रामचन्द्राश्रमं तच्च स्थानं पुण्यप्रदं शुभम् ।
नानामुनिगणाकीर्णं ब्रह्मवासववन्दितम् ।। ३ ।।

वकुलैः पनसैराम्रैः पादपैरुपशोभितम् ।
खगानेकैर्मृगानेकैः समन्तात् परिपूरितम् ।। ४ ।।
तत् स्थानं रघुनाथस्य तपोवृद्धिकरं महत् ।
तत्रास्ते जानकीनाथो नित्यमर्च्चति तं शिवम् ।। ५ ।।
तत्राध्वरसमुद्भूतं तस्य लिङ्गस्य पश्चिमे ।
अशोकझरविख्यातं तीर्थं पापप्रणाशनम् ।। ६ ।।
न तस्मादधिकं तीर्थमस्त्यत्र पृथिवीतले ।
यत्र स्नात्वा नरो विप्राः शिवलोकं च गच्छति ।। ७ ।।
यः स्नाति तत्र सरसि ध्यात्वा हृदि महेश्वरम् ।
शुक्लाष्टम्यां विशेषेण स पापेषु न लीयते ।। ८ ।।
दिश्युत्तरस्यां विख्यातं सरसो मुनिसत्तमाः ।
सर्वपापहरं रम्यमाश्रमं चोत्तरेश्वरम् ।। ९ ।।
अग्रे देव्यास्तथेशस्य जपन् वै संयतात्मवान् ।
त्रिपक्षाभ्यन्तरे मन्त्रं तत्र सिद्धिर्भवेद् ध्रुवम् ।। १० ।।
अभ्यासे तस्य देवस्य धेन्वन्तरशतद्वये ।
तत्र सिद्धाश्रमं पुण्यं सिद्धानां सिद्धिकारकम् ।। ११ ।।
वरेण्यं वरदं विप्राः सिद्धाश्रममनुत्तमम् ।
नानापक्षीयुतं रम्यं पूरितं मुनिसत्तमैः ।। १२ ।।
अशोकैर्नीपलोध्रैश्च वकुलैर्नागकेशरैः ।
मालतीमाधवीभिश्च षट्पदाग्रस्थितैर्युतम् ।। १३ ।।
तथा वृक्षैरामलकैः सफलैरुपशोभितम् ।
करवीरैः कर्णिकारैः पाटलैः सहकारकैः ।। १४ ।।
एवं नानाविधैर्वृक्षैः पूरितं सुमनोहरम् ।
तत्र सिद्धेश्वरं लिङ्गमास्ते मुक्तिप्रदायकम् ।। १५ ।।

मध्ये पुष्करिणी रम्या पद्मोत्पलसुशोभिता ।
स्वादुतोया महापुण्या शीतला चाप्यकर्दमा ।। १६ ।।
सिद्धेश्वरं समाराध्य मुनयः परमं तपाः ।
प्राप्ताश्चैवोत्तमां सिद्धिमिह लोके परत्र च ।। १७ ।।
सिद्धेश्वरात्परो देवो न भूतो न भविष्यति ।
यं दृष्ट्वा मुच्यते पापात् गोस्त्रीब्रह्मघ्नवान्नरः ।। १८ ।।
शिवाच्युतस्वरूपं च पाषाणे विदधाति यः ।
स एव भगवान् विष्णुः स एव भगवान् शिवः ।। १९ ।।
चतुर्दशेषु लोकेषु प्रसिद्धो भगवान् हरिः ।
तेन संपूजितो यस्मात्तस्मात् सिद्धेश्वरो मतः ।। २० ।।
तं दृष्ट्वा मुच्यते पापात् स्पृष्ट्वा दीर्घायुराप्नुयात् ।
पूजायां मुक्तिमाप्नोति सत्यं सत्यं मयोदितम् ।। २१ ।।
अस्य दक्षिणपार्श्वेऽस्ति कुण्डं सर्वाघनाशनम् ।
विख्यातं तस्य नाम्ना तु स्वादुतोयं सुनिर्मलम् ।। २२ ।।
तत्र स्नात्वा सकृल्लोके नाकपृष्ठे च मोदते ।
तस्य सिद्धेश्वरस्याग्रे यो जपेन्मनुमुत्तमम् ।
स मन्त्रः सिद्धिदस्तस्य षण्मासेन न संशयः ।। २३ ।।
तत्र मुक्तेश्वरं लिङ्गं मुक्तिदं पापनाशनम् ।
अभ्यासे तस्य लिङ्गस्य तं दृष्ट्वा मुच्यते नरः ।। २४ ।।
एवं मया मुनिश्रेष्ठा गदितं क्षेत्रमुत्तमम् ।
गच्छध्वं तत्र शीघ्रेण कुरुध्वं च महत्तपः ।। २५ ।।

कपिल उवाच

श्रुत्वेत्थं वचनं तस्य भरद्वाजस्य भो नृप ।
सानन्दा मुनयः सर्वे पुनः पप्रच्छुरादरात् ।। २६ ।।

कृतार्थाश्च वयं सर्वे भवामस्तव शासनात् ।
पुनर्नो धृष्टता जाता क्षेत्रस्यास्य तु ज्ञिप्सया ।। २७ ।।
सिद्धेश्वरसमीपे तु यानि लिङ्गानि सन्ति वै ।
तानि नो वद विप्रेन्द्र यद्यस्ति करुणा तव ।। २८ ।।
श्रुत्वेत्थं वचनं तेषां ऋषीणां भावितात्मनाम् ।
उवाच वचनं रम्यं भरद्वाजो महामतिः ।। २९ ।।

भरद्वाज उवाच

शृणुध्वं मुनिशार्दूला लिङ्गमिन्द्रेश्वरं शुभम् ।
पुरा तं पूजयामास विडौजास्तु शचीपतिः ।। ३० ।।
अग्रे सिद्धेश्वरस्याथ धेन्वन्तरस्य सप्ततिः ।
पूर्वस्यां दिशि देवस्य देव इन्द्रेश्वरः स्मृतः ।। ३१ ।।
तत्रेज्यां कृतवान् शक्रः सर्वदेवैर्वृतो द्विजाः ।
चक्रुर्विघ्नं दितिसुताः कृते यज्ञे विडौजसि ।। ३२ ।।
चक्रेऽसौ दितिजैः सार्द्धं महद् युद्धं रणाङ्गने ।
ततः पराजितो शक्रो हरं शरणमागतः ।। ३३ ।।
उवाच शङ्करं वीक्ष्य यज्ञकाले जयप्रद ।
दैत्यैश्च निर्जितोऽहं वै त्राहि मां परमेश्वर ।। ३४ ।।
ततस्तद् वचनं श्रुत्वा महादेवोऽभ्यभाषत ।
मयागच्छ शचीनाथ शमयिष्यामि दानवान् ।। ३५ ।।
इत्युक्त्वा शङ्करस्तं च जगमाशु तदन्तिकम् ।
जघान दानवान् सर्वान् विद्धेनामितवर्चसा ।। ३६ ।।
दत्वा वरं मघोनेऽथ तत्रैवान्तरधीयत ।
ततो वृद्धश्रवा लिङ्गं पूजयामास शङ्करम् ।। ३७ ।।
सम्पूज्य विधिवल्लिङ्गं धूपदीपैर्मनोहरैः ।
चन्दनेन सुगन्धेन जगमाश्वमरावतीम् ।। ३८ ।।

एवमिन्द्रेश्वरोत्पन्नं प्रख्यातं च पुरानघाः ।
इन्द्रेश्वरमात्म्येन विलयं यान्ति कल्मषाः ।। ३९ ।।
एतदिन्द्रेश्वरस्थानं सवपुण्यप्रदं मतम् ।
नानामुनिजनाकीर्णं सर्ववृक्षविराजितम् ।। ४० ।।
येऽर्च्चयन्ति तमीशानमपि दुर्वाङ्कुरैर्नराः ।
ते यान्ति विमलं स्थानं भासमानाः सुतेजसः ।। ४२ ।।
इत्थमिन्द्रेश्वराख्यानं कथितं मुनिसत्तमाः ।
सर्वपापहरं पुण्यं परं स्वस्त्ययनं महत् ।। ४३ ।।

इति श्रीकपिलसंहितायां इन्द्रेश्वराख्यानं नाम पञ्चदशोऽध्यायः ।।

षोडशोऽध्यायः

भरद्वाज उवाच

अथ वक्ष्ये महापुण्यं नमस्कृत्य महेश्वरम् ।
दक्षिणे सिद्धनाथस्य केदारेश्वरसंज्ञकम् ।। १ ।।
केदारेशस्थलीं प्राप्य नरो भक्तिपरायणः ।
पूजयित्वा महेशानां प्राप्नुयात् फलमीप्सितम् ।। २ ।।
दक्षिणामूर्त्तिनामाऽसौ सर्वसिद्धिप्रदायकः ।
फलं तु दर्शनेनास्य वाजपेयाश्वमेधयोः ।। ३ ।।
लिङ्गस्य पश्चिमे चैव दक्षिणे चोत्तरे तथा ।
सदा स्रवति तेजोऽम्भः पुनात्यखिलभूर्भुवम् ।। ४ ।।
तेन वारा शिरोऽभ्युक्ष्य नरः शिवपरायणः ।
दुरितं नाशयत्याशु केदारेशप्रसादतः ।। ५ ।।

तस्यां स्थल्यां तु देव्यास्ते गौरी त्रैलोक्यसुन्दरी ।
विशेषतो युगप्रान्ते साधकानां वरप्रदा ।। ६ ।।
त्रयाणां जगतां माता गौरीरूपेण संस्थिता ।
तस्यास्तु दर्शने राजन् लोकनाथः प्रसीदति ।। ७ ।।
एनमासादयेद्देवीं मन्त्राणां फलरूपिणीम् ।
यामुपास्य पुरा राजा नहुषोऽभून्महीतले ।। ८ ।।
सा तत्रैव पुरा चक्रे कुण्डं केदारसंज्ञकम् ।
विविक्तनिर्मलजलं सोपानपदसंयुतम् ।। ९ ।।
बिन्दूद्भवे तनुत्यागात् श्रीसूक्ष्मे पिण्डदानतः ।
केदारे उदकं पीत्वा पुनर्जन्म न विद्यते ।। १० ।।
नवम्यामसिते पक्षे मूर्ध्नि दत्वाऽसितं तिलम् ।
स्नात्वा तस्मिन् ह्रदे विप्राः किं वा न लभते नरः ।। ११ ।।
तत्र श्रीदक्षिणामूर्तेरग्रे पीठो महान् स्मृतः ।
भवपीठेति विख्यातः साधकानां फलप्रदः ।। १२ ।।
नक्तव्रतं समास्थाय संयतात्मा जितेन्द्रियः ।
जप्त्वा त्रयोदशाहेन मन्त्रसिद्धिमवाप्नुयात् ।। १३ ।।
यस्य केदारके स्थाने मन्त्रसिद्धिर्न जायते ।
विंशत्या जन्मभिस्तस्य सिद्धिर्न स्यात् कदाचन ।। १४ ।।
केदारं स्थानमासाद्य किञ्चिद् जप्त्वा मुनीश्वराः ।
न नरो नरकं याति सत्यं सत्यं पुनः पुनः ।। १५ ।।
स्नात्वा केदारके तीर्थे दृष्ट्वा गौरीं महेश्वरम् ।
सकृज्जप्त्वा भवे पीठे कृतकृत्यो भवेन्नरः ।। १६ ।।
कथयामि पुरावृत्तं केदारे तत्र वै द्विजाः ।
श्रुत्वा पापं परित्यज्य पुण्यराशिं गमिष्यथ ।। १७ ।।

दक्षयज्ञे प्रवृत्ते च वासवाद्याश्च देवताः ।
हविर्भागं हि भुञ्जन्ति ऋते देवान्महेश्वरात् ।। १८ ।।
तदा दाक्षायणी देवी ज्ञात्वा पत्युर्विगर्हितम् ।
प्रविवेश स्वयं वह्नौ भर्त्तृभक्तिपरायणा ।। १९ ।।
ततो महेश्वरो देवो दक्षयज्ञं व्यनाशयत् ।
पलायन्ति स्म देवाश्च भयाद्रुद्रस्य कम्पिता ।। २० ।।
कृत्तिवासो जगामाथ हिमवन्तं नगेश्वरम् ।
तपश्चचार केनापि कामेन सर्वदा स्थितः ।। २१ ।।
साऽपि साध्वी हिमवतो जाता कमललोचना ।
पूजयामास तं देवं प्रेषिता जनकेन च ।। २२ ।।
कन्दर्पस्तत्र गत्वा च सुब्रह्मण्यस्य जन्मने ।
पार्वती सम्मुखं देवं प्रेषयामास सायकम् ।। २३ ।।
धृते धनुषि कामेन सशरे कृत्तिवाससः ।
तृतीयाच्चक्षुषो वह्निः पपात मदनोपरि ।। २४ ।।
दग्धकामशरीरोऽसौ महादेवो जगद्गुरुः ।
ज्ञात्वा दाक्षायणीं देवीं उपयेमे समाधिना ।। २५ ।।
ततो नगे हिमवति तस्थे देवो महेश्वरः ।
पार्वत्या सह स देवो विजहार यथा सुखम् ।। २६ ।।
संतृप्ताश्चाभवन् देवास्तारकाराति जन्मनः ।
मेनोवाचाऽथ तनयां स्थानं नास्त्ययि किं तव ।।
युवां स्वं गच्छतं स्थानं तवैतत् सुखदं न हि ।। २७ ।।
स्त्रीणां पितृगृहे वासो निन्दितव्यः पुनः पुनः ।
जामातरं भवेन्निन्दा न स्थेयं श्वशुरे गृहे ।। २८ ।।
इति श्रुत्वा हैमवती कोपात् प्रस्फुरिताधरा ।
बहुधा विलपन्ती सा हरायेदं जगाद ह ।। २९ ।।

ईश्वरस्त्वं महाबाहो जगतामादिकृद् विभुः ।
स्थातुं स्थानं न तावास्ते किं किमेतद् भवद्गृहम् ।। ३० ।।
न स्थातव्यं क्षणमपि मयास्मिन् हिमवद् गृहे ।
देवदेव महेशाशु स्थानमेकं प्रकल्पय ।। ३१ ।।
कृशानुरेता तच्छ्रुत्वा वचनं नगजोदितम् ।
ययौ सर्वगणैः सार्धं मध्यदेशं त्वरान्वितः ।। ३२ ।।
पूर्वससागरगामिन्या गङ्गायाः उत्तरे तटे ।
वाराणसी नाम पुरं निर्ममे पार्वतीहितम् ।। ३३ ।।
तत्र तिष्ठन् जगन्नाथो नारदं परिपृच्छति ।
एकान्तं परमं पुण्यं कुत्रारण्यं महामुने ।। ३४ ।।
वाराणस्यां मम प्रीतिं जानासि त्वमनेकधा ।
गङ्गा सकलपापघ्नी यत्रास्ते मणिकर्णिका ।। ३५ ।।
वाराणस्यां तनुत्यागात् ब्रह्मविद्याऽवबोधनात् ।
द्वाभ्यामेव भवेन्मुक्तिर्नास्त्यन्यन्मुक्तिकारणम् ।। ३६ ।।
इयं बहुजनाकीर्णा बभूव मुनिसत्तम ।
अतो मनो न रमते मम नारद निश्चितम् ।। ३७ ।।
विविक्तामवटीं यास्ते त्वया विष्णुपुरष्क्रियाम् ।
इत्युक्त्वा नारदेनासौ ययावेकाम्रकं वनम् ।। ३८ ।।
लिङ्गरूपधरस्तस्थौ नत्वा श्रीपुरुषोत्तमम् ।
ज्ञात्वेतत्सर्ववृत्तान्तं हिमवान् पर्वताधिपः ।। ३९ ।।
सर्वग्रावैः परिवृतो मैनाकेन च मेनया ।
गङ्गया लोकपाविन्या मुनिभिस्तत्त्वदर्शिभिः ।। ४० ।।
आजगाम वनश्रेष्ठमेकाम्रं मुनिसत्तमाः ।
बिन्दुतीर्थे नगः स्नात्वा दृष्ट्वा नारायणं हरिम् ।।
देवस्य द्वारमासाद्य स्तौति स्तुत्यानया तदा ।। ४१ ।।

आदिकन्द नमस्तुभ्यं नमस्तेऽव्यक्तयोनये ।
कामवारणसिंहाय दुरितेन्धनवह्नये ।। ४२ ।।
भक्तप्रिय नमस्तुभ्यं विष्णुचक्रप्रदायक ।
त्रिपुरघ्न नमस्तेऽस्तु बाणासुरवरप्रद ।। ४३ ।।
नागार्जुनसहायस्त्वं काशीराजवरप्रदः ।
विश्वगोप्ता लोकसाक्षी ह्यन्धकद्विपकेशरी ।। ४४ ।।
नमो मोक्षप्रदात्रे च भगीरथवरप्रद ।
नीलकण्ठ नमस्तुभ्यमुमाप्रियकृते नमः ।। ४५ ।।
नमस्ते सच्चिदानन्द कुमारगुरवे नमः ।
रामचन्द्रप्रतिष्ठात्रे पञ्चवक्त्र नमोऽस्तु ते ।। ४६ ।।
क्षमस्व परमेशान ह्यपराधः कृतो मया ।
इदानीं करुणापाङ्गैः पूरयस्व मनोरथम् ।। ४७ ।।
इति स्तुत्वा च बहुभिर्वचोभिर्नीललोहितम् ।
पपात भूभृतां श्रेष्ठः साष्टाङ्गेनावनीतले ।। ४८ ।।
ततो दृष्ट्वा गिरिवरममृताक्षरभाषिणम् ।
स्तुत्या नम्रेण सन्तुष्टो महादेवोऽभ्यभाषत ।। ४९ ।।
किमिच्छसि गिरिश्रेष्ठ ब्रूहि कामं यथेप्सितम् ।
सन्तुष्टो वरदोऽहं वैं स्तोत्रेणानेन चानघ ।। ५० ।।
इति श्रुत्वा वचस्तस्य धूर्जटेर्हिमवांस्तदा ।
वद्ध्वाञ्जलिकरपुटे वाचमूचे प्रियंवदाम् ।। ५१ ।।
अस्मिन् क्षेत्रे जगन्नाथ द्वितीयं लिङ्गमुत्तमम् ।
दिदृक्षुरस्मि तत्राहं प्रासादं करवाणि च ।। ५२ ।।
यतो मद्वेश्म संत्यज्य ह्यागतस्त्वं सहो मया ।
अतो दिदृक्षुस्तां साध्वीमागतोऽहं तवालयम् ।। ५३ ।।

तस्यां च महती प्रीतिर्विदुः पुत्रः स्थितोऽपि मे ।
तद्वात्सल्यात् त्वयि कृतमनुरागं हि वर्द्धते ।। ५४ ।।
अधुना बहुभिः रत्नैः प्रासादं करवाणि ते ।
आज्ञापय महेशान यद्यस्ति करुणा मयि ।। ५५ ।।
गिरीन्द्रमथ देवेशो वाक्यमेतदुवाच ह ।
दुर्लभं देवताभिश्च किं त्वया प्रार्थितं गिरे ।। ५६ ।।

महादेव उवाच

ब्रह्मणा विष्णुनेन्द्रेण यमेन वरुणेन च ।
प्रसादस्तु ह्यसाध्योऽयं कलौ चन्द्रः करिष्यति ।। ५७ ।।
इदानीं मत्समं लिङ्गं केदारेश्वरसंज्ञकम् ।
सिद्धेश्वरसमीपे त्वं प्रासादं कुरु सुव्रत ।। ५८ ।।
तत्राहं सर्वभावेन साधकानां वरप्रदः ।
भवपीठस्तु तत्रैव भवभीतिहरः सदा ।। ५९ ।।
तत्र ते तनया गौरी ह्यस्मत्प्रीतिविवर्द्धिनी ।
आस्ते लोकोपकाराय कुण्डं कृत्वा स्वपाणिना ।। ६० ।।
रूपसौभाग्यदं श्लक्ष्मं विविक्तं सुमनोहरम् ।
मन्त्रेणानेन विधिवन्निमज्जेत् कुण्डवारिणि ।। ६१ ।।
गौरीपुत्र! नमस्तुभ्यं सर्वकामफलप्रद ।
पापापनोदं कुरु मे निमज्जेहं तवाम्भसि ।। ६२ ।।
इत्युक्त्वा त्रीणि वाराणि निमज्जेत्तत्र वारिणि ।
कृताञ्जलिपुटो भूक्त्वा देवं स्तोत्रमुदीरयेत् ।। ६३ ।।
दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ।
ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ।। ६४ ।।
एवं यः कुरुते धीमान् शुचिस्तद्गतमानसः ।
कैलासभुवनं याति स नरो नात्र संशयः ।। ६५ ।।

नवम्यां शुक्लपक्षस्य ईषे मासि विशेषतः ।
दत्वा कृष्णतिलान् मूर्द्ध्नि यो मज्जेत् पार्वतीह्रदे ।। ६६ ।।
स यात्याखण्डलस्थानं विमानेन विराजितः ।
क्वचिदूर्ध्वगतिस्तत्र ब्रह्मणः सदनं परम् ।। ६७ ।।
गच्छ तत्र गिरिश्रेष्ठ कुरुष्वायतनं मम ।
पूजयस्व प्रयत्नेन मदीयं लिङ्गमुत्तमम् ।। ६८ ।।

हिमवानुवाच

वाचमित्येव स प्राह गिरीन्द्रः प्रहसन्निव ।
यास्ये त्वद्वचनं शम्भो करवाणि न संशयः ।। ६९ ।।

भरद्वाज उवाच

इत्युक्त्वा गोत्रराजोऽसौ प्रासादं बहुविस्तृतम् ।
प्राङ्गणैर्विततैर्युक्तं तोरणैश्च समन्ततः ।। ७० ।।
बहुकोषप्रपूर्णं च छत्रव्यञ्जनसङ्कुलम् ।
चकार विधिवत्प्राज्ञो येन तुष्यति शङ्करः ।। ७१ ।।
पूजां तत्र महेशस्य कृत्वा स्तुत्वा प्रणम्य च ।
तदाद्रिः कृतकृत्योऽभूत् समस्तैर्बान्धवैर्वृतः ।। ७२ ।।
ततो गन्धवतीनाम्नीं गङ्गां तत्र विसृज्य च ।
ययौ गोत्रकुलश्रेष्ठः स्वस्थानं हरभुक्तये ।। ७३ ।।
एतत्तीर्थवरं विप्राः श्रुतं त्रैलोक्यपावनम् ।
सर्वापापघ्नमतुलं मुनीनां प्रीतिवर्द्धनम् ।। ७४ ।।
यासौ वै दक्षिणामूर्त्तिर्महेशस्य प्रकीर्त्तिता ।
एतत्तुल्या कर्मभूमौ फलदा नास्ति देवता ।। ७५ ।।
तस्यैव सन्निधानेन रुद्रलिङ्गं वरं स्वयम् ।
मरुद्भिः पूजितश्चायं नाम्ना शान्तिशिवेति च ।। ७६ ।।

दृष्ट्वा शान्तिशिवं विप्राः सर्वशान्तिमवाप्नुयात् ।
शान्तात्मा विजितात्मा च याति सत्यं शिवालयम् ।। ७७ ।।
नाम्ना शान्तिशिवो लिङ्गो दक्षिणामूर्त्तिरप्यसौ ।
एवं पूज्य नमस्कृत्य शिवसायुज्यमाप्नुयात् ।। ७८ ।।
केदारेश्वरमाख्यानं य इदं कीर्त्तयेन्नरः ।
शृणुयाद्वा नरो यस्तु तस्य वै शाश्वती गतिः ।। ७९ ।।

इति श्रीकपिलसंहितायां हिमवदागमनं नाम षोडशोऽध्यायः ।।

सप्तदशोऽध्यायः

ऋषय ऊचुः

पुरा हिमवाता त्यक्ता तत्र गन्धसरित् कथम् ।
एतन्नो वद विप्रर्षे कामदं सर्वमङ्गलम् ।। १ ।।
तस्यास्तीरे पवित्राणि लिङ्गानि विविधानि च ।
ब्रूहि नस्तीर्थयुक्तानि फलदानि विशेषतः ।। २ ।।

भरद्वाज उवाच

कथयामि मुनिश्रेष्ठा यूयं यत् परिपृच्छत ।
शृणुतैकमनोयुक्ता यदि श्रद्धा च वर्त्तते ।। ३ ।।
न सन्ति त्रिषु लोकेषु नद्यो गन्धवतीसमाः ।
यस्या दर्शनमात्रेण नरो मुच्यते किल्विषात् ।। ४ ।।
यामासाद्य पुरा विप्राः प्रापुः सप्तर्षयो दिवम् ।
पावनीं सर्वभूतानां तां नदीं को न संश्रयेत् ।। ५ ।।
आजगाम यदा विप्रा हिमवान् पर्वताधिपः ।
तदात्र देवं सम्पूज्य केदारेश्वरमुत्तमम् ।। ६ ।।

क्ष्माभृत्प्रभुः कृतार्थः सन् तल्लिङ्गार्च्चनजैः सुखैः ।
ननान्दारमुवाचेदं जाह्नवीं गिरीशप्रियाम् ।। ७ ।।
गङ्गा भागीरथीनाम्ना यथा ख्यातिस्तवाच्युत ।
तथा हैमवती नाम्ना इति मां मुनयोऽवदन् ।। ८ ।।
त्वया ह्यलङ्कृतोऽहं च बहुपुत्रोऽपि निम्नगे ।
बहुरत्नयुतोऽब्धिस्तु यथा कुमुदबन्धुना ।। ९ ।।
क्षेत्रेऽस्मिन्नधुना गङ्गे कीर्त्तिः परमशाश्वती ।
मम स्थास्यति पापघ्ने त्वमत्र स्थितिमाचर ।। १० ।।
गङ्गा च नवधा प्रोक्ता ह्यधुना दशधा भव ।
ब्रह्महत्यादिपापानां नाशिनी पुण्यबर्द्धिनी ।। ११ ।।
आद्या गोदावरी गङ्गा द्वितीया च पुनः पुना ।
तृतीया कथिता रेवा चतुर्थी जाह्नवी स्मृता ।। १२ ।।
कावेरी पञ्चमी प्रोक्ता षष्ठी वै गोमती तथा ।
कृष्णा च सप्तमी प्रोक्ता ब्राह्म्यष्टमीत्युदाहृता ।। १३ ।।
नवमी वै वैतरणी नवधारेति विश्रुता ।
अधुनैकाम्रके देवी दशधारा भव शुभे ।। १४ ।।
गोदावरी गोमती च कृष्णा चैव पुनः पुना ।
ब्राह्मी रेवा च कावेरी ततो वैतरणी स्मृता ।। १५ ।।
जाह्नवी च ततः प्रोक्ता ततो गन्धवहा सरित् ।
इत्येता दशधारा च क्षेत्रे सन्तु सुरार्च्चिते ।। १६ ।।
इति तस्य वचः श्रुत्वा गङ्गोवाच हिमालयम् ।
यूयं मे गुरवस्तात करवाणि वचस्तव ।। १७ ।।
ख्यातिं चात्र कमिष्यामि केन नाम्ना गिरीश्वर ।
तन्नाम वद मां शीघ्रं यद्येवं प्रीतिरस्ति ते ।। १८ ।।

हिमवानुवाच

काननोद्भवपुष्पाणां केतकीनां लतान्तरे ।
केशराणां च पद्मानां चम्पकानां विशेषतः ।। १९ ।।
फलानां वायुसंसर्गाद्गन्धलाभान्महीतले ।
नाम्ना गन्धवती गङ्गे भवैकाम्रवने शुभे ।। २० ।।
अत एव मम प्रीतिर्भविता महती त्वयि ।
शङ्करस्त्वयि सन्तुष्टो भविता नात्र संशयः ।। २१ ।।
वाढमित्येव सा प्राह हिमवन्तं नगेश्वरम् ।
उवाह दक्षिणं गङ्गा सागरं काननान्तरे ।। २२ ।।
ततो वै पुष्पवृष्टिस्तु शक्रादिकरसञ्च्युता ।
पपात हिमवन्मूर्द्धि्न देवदुन्दुभिनादिता ।। २३ ।।
कृतकृत्यस्ततो गावो जगाम स्वाश्रमं द्विजाः ।
गङ्गा गन्धवतीनाम्ना दक्षिणार्णवगामिनी ।। २४ ।।
एवं मया निगदिता नाम्ना गन्धवती सरित् ।
एकाम्रकवने विप्रा गङ्गा प्रच्छन्नरूपिणी ।। २५ ।।
पुनराख्यानकं वक्ष्ये गन्धवत्या महीसुराः ।
श्रुत्वा पापं क्षयं याति सुकृतं चापि वर्द्धते ।। २६ ।।
पुरा श्रुत्वा मया विप्रा या कथा वदराश्रमे ।
तावहं संप्रवक्ष्यामि शृणुध्वं चैकचेतसः ।। २७ ।।
अथैकदा हि देवेषु तिष्ठत्सु मुनिसत्तमाः ।
वदरिकाश्रमे पुण्ये ययौ तत्र च नारदः ।। २८ ।।
दृष्ट्वा च मुनयः सर्वे नारदं योगिनां वरम् ।
वलिभिर्बहुभिश्चैव सन्तोष्य वाचमब्रुवन् ।। २९ ।।

ऋषय ऊचुः

दर्शनेन त्वदीयेन देवर्षे मुनिपुङ्गव ।
कृतार्थाश्च भवामोऽद्य तीर्थान् शुश्रूषवो वयम् ।। ३० ।।

कस्मिन् क्षेत्रेऽथवा तीर्थे नद्यां कस्यां द्विजोत्तम ।
धर्मो नानाविधः प्रोक्तः स्वल्पोऽप्यक्षयमेधते ।। ३१ ।।
शिवाश्रमाणि रम्याणि कस्मिन् सन्ति महोदय ।
कुत्र वा मरणात् क्षेत्रे नृभिर्मुक्तिमवाप्यते ।। ३२ ।।

नारद उवाच

नानातीर्थानि क्षेत्राणि नद्यस्तु बहुशस्तथा ।
तिष्ठन्ति हि महीपृष्ठे पापिनां सिद्धिहेतवे ।। ३३ ।।
तथाऽपि स्थानमेकं तु विविक्तं चक्रपाणिनः ।
तत्रासते सर्वगुणा यद् यूयं परिपृच्छथ ।। ३४ ।।
महोदधेरुत्तरतो योजनैस्त्रिभिराततम् ।
एकाम्रकं वनं नाम अगतीनां गतिप्रदम् ।। ३५ ।।
स्वर्णकूटे गिरौ रम्ये कोटिलिङ्गान्वितो विभुः ।
भूतेश्वरो महाभागा आस्ते तत्र महेश्वरः ।। ३६ ।।
दानमल्पतरं तत्र तैलबिन्दुमिवाम्भसि ।
अक्षयं च भवेन्नूनं वित्तं विप्रकरार्पितम् ।। ३७ ।।
गजाश्वकन्यावस्त्रं च मधुदुग्धघृतादिकम् ।
तत्क्षेत्रे सर्वदानेभ्यो ह्यन्नदानं विशिष्यते ।। ३८ ।।
अन्नदानात् परं दानं नास्त्यन्यत् पृथिवीतले ।
अन्नमासाद्य तिष्ठन्ति प्राणाः प्राणभृतां सदा ।। ३९ ।।
विनान्नेन न जीवन्ति प्राणिनः प्राणविह्वलाः ।
तस्मादन्नप्रदातारः प्राणदातार एव हि ।। ४० ।।
अर्थिभ्योऽन्नं प्रदातव्यं नार्थिभ्योऽस्तु कदाचन ।
एवं सर्वाणि दानानि अर्थिभ्यस्तु प्रदापयेत् ।। ४१ ।।
तस्मिन् क्षेत्रवरे पुण्ये दानमल्पतरं यदि ।
स्नानसन्ध्यादिकं कर्म भवेद्वहु नं संशयः ।। ४२ ।।

गङ्गादिषु च तीर्थेषु वाराणस्यादिषूत्तमा ।
या च कीर्त्तिः स्वर्णकूटे सा सिद्धिरेकवत्सरे ।। ४३ ।।
वाराणस्यां सहस्राब्दैर्यत्फलं समवाप्नुयात् ।
एकाम्रके दिनैकेन तत्फलं खलु सम्भवेत् ।। ४४ ।।
प्रयागात् पुष्करात् काश्याः विशेषमिदमुच्यते ।
प्रयागकाशीफलदमेकाम्रं मुनिसत्तमाः ।। ४५ ।।
स्वर्णकूटाचले तस्मिन् पापिनां पुण्यकर्मिणाम् ।
तनुत्यागाद्भवेन्मुक्तिः किमत्र ह्यधिकं फलम् ।। ४६ ।।
त्यजन्ति ये तत्र देहं तेषां कर्णे महेश्वरः ।
मन्त्रं मुक्तिप्रदातारं ब्रह्मतारकमादिशेत् ।। ४७ ।। ।
तस्मिंश्च वैष्णवे क्षेत्रे विष्णुस्तु परिपालकः ।
तत्र विष्णुपराः सर्वे ये च माहेश्वरा जनाः ।। ४८ ।।
तत्र सिंहैश्च सम्वादं गजानां परिशुश्रुमः ।
नकुलैर्जिह्मगानां तु मार्जारैराखूनां तथा ।। ४९ ।।
मित्राणि च यथा तत्र तथा शत्रव आत्मिकाः ।
अन्योऽन्यं न विरुद्धयन्ति तत्क्षेत्रस्य प्रभावतः ।। ५० ।।
नानाविधान्याश्रमाणि सन्ति तत्र महेशितुः ।
पावनानि च तीर्थानि नदी विमलवाहिनी ।। ५१ ।।
तस्मिन्नास्ते क्षेत्रवरे नाम्ना गन्धवती सरित् ।
आद्या गङ्गा समाख्याता त्रिकोटिकलुषापहा ।। ५२ ।।
पुरा भगीरथेनाशु तोषितश्च सदाशिवः ।
बभार शिरसा देवीं गङ्गां त्रैलोक्यपावनीम् ।। ५३ ।।
जटाकलापे रुद्रस्य भ्रममाणा महातपाः ।
नीता भगीरथेनैव गङ्गा त्रैलोक्यपावनी ।। ५४ ।।

तां क्षेत्रमध्ये हिमवान् ससर्ज शिवभुक्तये ।
पावनार्थाय लोकानां कलिकल्मषनाशिनीम् ।। ५५ ।।
आद्यां गङ्गां विदुस्तां तु त्रिकोटिकुलतारिणीम् ।
पुण्यां गन्धवतीनाम्ना मुनयो ब्रह्मवादिनः ।। ५६ ।।
पापिष्ठा ये च पाषाण्डा ये च ब्राह्मणनिन्दकाः ।
गुरुभक्तिविहीनास्ते स्नात्वा तत्र दिवं गताः ।। ५७ ।।
कलौ गन्धवतीनाम्ना कृते भागीरथीति च ।
त्रेतायां जह्नुतनया द्वापरे हरिपादजा ।। ५८ ।।
एवं नामानि पुण्यानि कीर्त्तितानि मनीषिभिः ।
चत्वारि त्रिषु लोकेषु चतुर्षु च युगेषु च ।। ५९ ।।
कलावन्तर्हितां गङ्गां मोहाद् वाप्यवमन्यते ।
नरकं याति पापीयान् ब्रह्मस्वहारको यथा ।। ६० ।।
तस्या सरिद्वरायास्तु स्नानमन्त्रं निबोधत ।
यस्याः संस्पर्शनादेव स्वर्गादिसुखमाप्नुयात् ।। ६१ ।।
गुप्तगङ्गे नमस्तुभ्यं ऋषिदेवाभिवन्दिते ।
निमज्जेऽहं महाभागे मां समुद्धर पातकात् ।। ६२ ।।
इत्युक्त्वा मज्जयेत्तस्याः शम्बरे कलुषापहे ।
विशेषतः कलियुगे त्रिकोटिकुलपावने ।। ६३ ।।
ततः पापानि संत्यज्य ब्रह्महत्यादिकानि च ।
जिहीतेऽत्र दिवं सत्यं शृणुध्वं मुनिसत्तमाः ।। ६४ ।।
गन्धवत्यां नरः स्नात्वा कृतकृत्यो भवेद्ध्रुवम् ।
सर्वपापच्युतो धीमान् गङ्गायां पिण्डदो यथा ।। ६५ ।।
तस्यास्तीरे महेशस्तु पर्जन्येशोऽतिविश्रुतः ।
पूज्यः पुरासौ पर्जन्यैः पीतये कृतिवाससः ।। ६६ ।।

तस्यां स्नात्वा च तं दृष्ट्वा पूजयित्वा विधानतः ।
नरः पापक्षयं कृत्वा राजसूयफलं लभेत् ।। ६७ ।।
ततो मेघेश्वरं तीर्थं पापघ्नं पुण्यवर्द्धनम् ।
तस्मिन् स्नात्वा नरो विप्राः शिवसालोक्यमाप्नुयात् ।। ६८ ।।
तस्यास्तीरे पुनर्लिङ्गं ब्रह्मणाराधितं पुरा ।
ब्रह्मेश्वरमिति ख्यातं ब्रह्मलोकप्रदायकम् ।। ६९ ।।
ब्रह्मयज्ञोद्भवं तीर्थं तत्रास्ते जनपावनम् ।
तत्र स्नात्वा महेशस्य पूजनं त्वघनाशनम् ।। ७० ।।
स्नात्वा गन्धवतीतीर्थे दृष्ट्वा ब्रह्मेश्वरं हरम् ।
स्वकुलैरेकविंशत्या ब्रह्मलोकमवाप्नुयात् ।। ७१ ।।
गोकर्णेश्वरलिङ्गं तु पुनस्तस्यास्तटे श्रुतम् ।
सुषेणेनैव पूज्यं तु गोकर्णेनासुरेण च ।। ७२ ।।
गन्धनद्यां नरः स्नात्वा दृष्ट्वा गोकर्णमीश्वरम् ।
शिवप्रीतिमवाप्नोति मन्त्रसिद्धिमवाप्नुयात् ।। ७३ ।।
गन्धनद्यास्तटे विप्राः पुनरुत्पलकेश्वरम् ।
तत्र स्नानं पूजनं च दर्शनं मुक्तिलक्षणम् ।। ७४ ।।
पुनस्तस्यास्तटे विप्रा लिङ्गं भीमेश्वरं स्मृतम् ।
दर्शने तस्य लिङ्गस्य भवभीतिर्विनश्यति ।। ७५ ।।
तटे तस्यास्तु लिङ्गानि त्रीणि सन्ति महीसुराः ।
सूक्ष्मेश्वरः प्रथमतस्तत आम्रातकेश्वरः ।। ७६ ।।
अनयोर्लिङ्गयोर्मध्ये मध्यमेश्वरसंज्ञकः ।
सूक्ष्मेश्वरं समासाद्य ब्रह्मसायुज्यमश्नुते ।। ७७ ।।
पिण्डदानादिकं तत्र पितॄणां मुक्तिकारणम् ।
तत्र पिण्डानि वितरन् पितृभिः सह मोदते ।। ७८ ।।

विशेषं कथयामि त्वां स्थानं तस्या महीसुराः ।
यत्र सूक्ष्मेश्वरो देवस्तत्र सा मुक्तिदायिनी ।। ७९ ।।
श्रीसूक्ष्मेश्वरदेवस्य शतधेन्वन्तरे तु सा ।
कलावन्तर्हिता गङ्गा दक्षिणां दिशमाश्रिता ।। ८० ।।
अहो गन्धवती पुण्या त्रिकोटिकुलपावनी ।
सकृत् स्नात्वा नरस्तस्यां जिहीते ब्रह्मणः पदम् ।। ८१ ।।
इत्युक्त्वा नारदो धीमान् ययौ ब्रह्मगृहं ततः ।
गतेऽस्मिन्नारदे विप्राः सानन्दं मुनयो ययुः ।। ८२ ।।
ततस्ते क्षेत्रमागत्य मुनिसङ्घा जितेन्द्रियाः ।
चक्रुः स्नानं गन्धवत्यां ददृशुर्लिङ्गमैश्वरम् ।। ८३ ।।
तर्पयित्वा शुद्धजले पितॄनथ पितामहान् ।
पिण्डदानादिकं तत्र चक्रुस्ते सुसमाहिताः ।। ८४ ।।
ततोऽम्बराद् विमानानि जाम्बुनदनिभानि च ।
सहस्राणि स्वरूपाणि आगतानि महीतलम् ।। ८५ ।।
तान्यारुह्य तदा विप्रा मुनयो ब्रह्मणः पदम् ।
ययुः सर्वकुलैः सार्द्धं दशसप्तशतेन च ।। ८६ ।।
अहोभाग्यमहोभाग्यं मुनीनां ब्रह्मवादिनाम् ।
सकृद्गन्धवतीस्नानं दुरितौघविनाशनम् ।। ८७ ।।
माहात्म्यं गन्धवत्याश्च श्रुत्वा पापं विनश्यति ।
दीर्घमायुरवाप्नोति सुकृतस्यापि बृंहणम् ।। ८८ ।।
यः शृणोति नरस्त्वेदमाख्यानं पुण्यवर्द्धनम् ।
धनस्य सन्ततेस्तस्य विच्छेदो नैव जायते ।। ८९ ।।

इति श्रीकपिलसंहितायां गन्धवत्यनुकीर्त्तनं नाम सप्तदशोऽध्यायः ।।

अष्टादशोऽध्यायः

भरद्वाज उवाच

अथानुवक्ष्यामि महेशतीर्थं
श्रीपार्वतीपादविनिःसृतं च ।
कीर्त्तिं सवासं विनिमर्द्य पद्भ्यां
चकार देवी जनपावनाय ।। १ ।।
देवीपदद्वयं तीर्थं स्वर्णकूटे द्विजोत्तमाः ।
आस्ते सर्वपवित्रं च सर्वदेवनमस्कृतम् ।। २ ।।

ऋषय ऊचुः

कीर्त्तिः कस्य सुतो विप्र स कुत्र स्थितवान् पुरा ।
वासश्चैवेति कः प्रोक्तः कया देव्या हतावुभौ ।। ३ ।।
कस्त्वकार्षीत्तीर्थवरं देविपदवीनिर्मितम् ।
विस्तरं वै महापुण्यां तां कथां कथयाशु नः ।। ४ ।।

भरद्वाज उवाच

प्रवक्ष्यामि मुनिश्रेष्ठाः कीर्त्तिर्नाम महासुरः ।
द्रुमिलस्य सुतो घोर आसीदृषिविनाशकः ।। ५ ।।
दुर्द्धर्षो दुर्विनीतश्च देवब्राह्मणकण्टकः ।
वासश्चैवेति तद्भ्राता विश्वस्य निधनोद्यतः ।। ६ ।।
शतमेकोत्तरं तस्य भ्रातरः परिकीर्त्तिताः ।
सर्वे भीमवला भीमाः सह्यपर्वतवासिनः ।। ७ ।।
जघानोनशतं भ्रातॄन् मृगव्याजेन हिंसकः ।
त्रासितः सततं पित्रा ययावेकाम्रकं वनम् ।। ८ ।।
तेन दृष्टा भगवती सहवासेन भूमिप ।
उवाचार्ये मम प्राणं देहि सुन्दरी रक्ष माम् ।। ९ ।।

अहं कीर्त्तिरयं वासो नास्ति लोकेषु मत्समः ।
ऐश्वर्यगुणरूपाढ्यः सौभाग्यवलपूजितः ।। १० ।।
सीदामि त्वामहं दृष्ट्वा त्राहि मां वरवर्णिनि ।
रक्ष मामरविन्दाक्षि रतिमात्रं प्रयच्छ मे ।। ११ ।।
इति तस्य वचः श्रुत्वा देवी कात्यायनी तथा ।
उवाच मेघनीर्घोषं शृणु कीर्त्ते हि मद्वचः ।। १२ ।।
शीर्षेण कृत्वा मत्पादौ यो मां धृत्वा चरिष्यति ।
तस्याहं तु प्रिया नित्यं भवेयं नात्र संशयः ।। १३ ।।
इति तस्याः वचः श्रुत्वा संहृष्टौ द्रुमिलात्मजौ ।
सन्निभूतौ तदा वीरौ गिरिराजेन्द्रनन्दिनी ।। १४ ।।
ततो सव्येन पादेन वासं जघ्ने महासुरम् ।
कीर्त्तिं वामेन सा देवी सुस्था वेदास्तदाभवन् ।। १५ ।।
स्फटिकामलपृष्ठे च पापघ्ने शिवसद्मनि ।
समागत्य ततो देवाः स्नानं चक्रुर्दिवौकसः ।। १६ ।।
देवीपदद्वयं तत्र तीर्थं त्रैलोक्यपावनम् ।
मुनिभिर्बहुभिर्वन्द्यं लोकत्रयफलप्रदम् ।। १७ ।।
फाल्गुनस्याऽसिताष्टम्यां स्नात्वा देवीपदे नरः ।
गोपालिनीं समभ्यर्च्याभीष्टकाममवाप्नुयात् ।। १८ ।।
एवं बहूनि तीर्थानि तत्र सन्ति द्विजोत्तमाः ।
किमन्यत् कथयिष्यामि क्षेत्रे तस्मिन् फलप्रदे ।। १९ ।।
विचित्राणि च नामानि प्रवक्ष्यामि महीसुराः ।
येषां स्मरणमात्रेण निष्पापो जायते नरः ।। २० ।।
स्वर्णकूटो रसालश्च मेध्याश्म शिवसद्म च ।
स्मर्त्तव्यं प्रातरुत्थाय सुखं नयति तद्दिनम् ।। २१ ।।

कपिल उवाच

राजन्नित्थं वचः श्रुत्वा भरद्वाजस्य ते तदा ।
सानन्दाः मुनयः सर्वे पुनः पप्रच्छुरादरात् ।। २२ ।।

मुनय ऊचुः

भगवन् श्रोतुमिच्छामः स्वर्णकूटे शिवालये ।
चातुर्मास्यव्रतेनैव किं वा फलमवाप्नुयात् ।। २३ ।।
तत्र दानेन किं पुण्यं तपसा वाथ किं फलम् ।
अन्नदानेन किं पुण्यं व्रतं केन समाचरेत् ।। २४ ।।

भरद्वाज उवाच

कथयामि महापुण्यं चातुर्मास्यविधिं द्विजाः ।
दिनेनैकेन क्षेत्रेऽस्मिन् काशीवासफलं मतम् ।। २५ ।।
करोत्येकाम्रके क्षेत्रे चातुर्मास्यं तु यः पुमान् ।
फलं काश्याः शतगुणं सहस्राधिकमाप्नुयात् ।। २६ ।।
केदारे यत्फलं प्रोक्तं यत्फलं पुरुषोत्तमे ।
तत्फलं कोटिगुणितं स्वर्णकूटाचले द्विजाः ।। २७ ।।
कुरुक्षेत्रे यदुक्तं च ग्रहणे चन्द्रसूर्ययोः ।
एकाम्रे तत्फलं प्रोक्तं चातुर्मास्ये न संशयः ।। २८ ।।
गोदावर्यां तु गङ्गायां तपस्तप्त्वा तु यल्लभेत् ।
तत्फलं तु दिनैकेन चातुर्मास्ये शिवालये ।। २९ ।।
शयनान्तरमालभ्य यस्तस्मिन्निवसेन्नरः ।
वाराणस्याः प्रयागाच्च फलं कोट्यधिकं लभेत् ।। ३० ।।
यत्र सन्निहितो विष्णुर्वासवादिभिरावृतः ।
कस्तस्य शक्नुयाद्वक्तुं चातुर्मास्यं फलं प्रति ।। ३१ ।।
कृत्तिवासस्तु यत्रास्ते देवदेवः सहोमया ।
को वास्य शक्नुयाद्वक्तुं माहात्म्यं बहुविस्तरम् ।। ३२ ।।

युगानष्टौ तपस्तप्त्वा काश्यां सुबहुदारुणम् ।
या गतिस्तामवाप्नोति चातुर्मास्ये शिवालये ।। ३३ ।।
यो हरेः शयनादूर्ध्वमेकाम्रेऽधिवसेद्दिनम् ।
या गतिः साङ्ख्ययोगिनां ब्रजत्येतां गतिं स वै ।। ३४ ।।
चातुर्मास्यविधिं वक्ष्ये शृणुध्वं द्विजसत्तमाः ।
आषाढदशमीं शुक्लां प्राप्य सङ्कल्पमाचरेत् ।। ३५ ।।
नवम्यामष्टतीर्थं च कुर्यात्तु सुसमाहितः ।
वासुदेवपरो भूत्वा इमं मन्त्रमुदीरयेत् ।। ३६ ।।
आजन्मदुरितानां च क्षयाय मधुसूदन ।
अष्टतीर्थविधिं कुर्वे आज्ञापय जनार्द्दन ।। ३७ ।।
इत्यनुज्ञाप्य गोविन्दं ततो बिन्दुसरोव्रजेत् ।
तत्रापि वासुदेवं च इत्यनुज्ञामुदीरयेत् ।। ३८ ।।
वासुदेव नमस्तुभ्यं वसुदेवात्मज प्रभो ।
स्नातुमिच्छामि देवेश सिद्धिर्मे त्वं प्रकल्पय ।। ३९ ।।
वासुदेवं पार्थयित्वा ततो न्यासं च विन्यसेत् ।
हृदि स्कन्दं न्यसेद्विप्राः दक्षिणे नन्दिकेश्वरम् ।। ४० ।।
वामभागे महाकालं पृष्ठे देवमनन्तकम् ।
मूर्ध्नि न्यसेद्वासुदेवमेवं न्यासञ्च कारयेत् ।। ४१ ।।
ततः शुद्धमना भूत्वा सपवित्र उदङ्मुखः ।
नाभिमात्रे जले स्थित्वा इमं मन्त्रमुदीरयेत् ।। ४२ ।।
बिन्दुह्रद नमस्तुभ्यं महादेवेन निर्मित ।
विश्ववन्द्य जगद्बीज मज्ज्यामि तवाम्भसि ।। ४३ ।।
अनेन मन्त्रयोगेन स्नानं कृत्वा महीसुराः ।
कृताञ्जलिपुटो भूत्वा मन्त्रेणानेन प्रार्थयेत् ।। ४४ ।।

एष विश्वेश्वरो देव एषैव मणिकर्णिका ।
कलावन्तर्हिता काशी मुक्तिरेव न संशयः ।। ४५ ।।
एवं स्नात्वा ह्रदवरे दृष्ट्वा देवं त्रिलोचनम् ।
वायव्यां दिशि देवस्य व्रजेत् पापविनाशनम् ।। ४६ ।।
देवस्याभिमुखो भूत्वा कृताञ्जलिपुटस्तदा ।
कृतकृत्यो यतात्मासौ अनुज्ञां समुदीरयेत् ।। ४७ ।।
सान्निध्यं भवता पूर्वमादिष्टं शूलपाणिना ।
प्रतिपालय चास्माकं निमज्जेऽहं ह्रदे तव ।। ४८ ।।
इत्युच्चार्य जलं गत्वा सपवित्र उदङ्मुखः ।
हृदि ध्यात्वा विरूपाक्षं ततो मन्त्रमनुस्मरेत् ।। ४९ ।।
ॐ जगद्बीज अनाद्यन्त अशरीर शरीरधृक् ।
प्रसीद देव ईशान स्थिरा भक्तिरिहास्तु मे ।। ५० ।।
मज्जयेत् त्रीणि वाराणि पिबेत्तोयं षडक्षरम् ।
ततो गत्वा प्रयत्नेन पश्येत् त्रिभुवनेश्वरम् ।। ५१ ।।
अथैशान्यां दिशि विभोर्गङ्गायमुनासंज्ञिनी ।
तस्यास्तटं समासाद्य पूर्वानुज्ञामुदीरयेत् ।। ५२ ।।
ततो जल्पान्तरं गत्वा सपवित्र उदङ्मुखः ।
स्मृत्वा तु चण्डिकाकान्तं मन्त्रमेतदुदीरयेत् ।। ५३ ।।
गङ्गाधर नमस्तुभ्यं गङ्गायमुनासंस्थित ।
स्नानं करोमि देवेश ब्रह्माविष्णुशिवात्मकम् ।। ५४ ।।
मन्त्रेणानेन वै स्नात्वा तत्र गङ्गां समर्च्चयेत् ।
ततः पश्येत् प्रयत्नेन लिङ्गं त्रिभुवनेश्वर ।। ५५ ।।
तथैशान्यां दिशीशस्य कोटितीर्थमुदीरितम् ।
पूर्वानुज्ञां तु वै स्मृत्वा ततो मन्त्रमुदीरयेत् ।। ५६ ।।

स्नात्वा जगदीदं कृत्स्नं यत्पुण्यं च मया हृतम् ।
तदिहाप्यक्षयं पुण्यं ममास्तु त्रिपुरान्तक ।। ५७ ।।
स्नात्वैवं विधिवत्तत्र दृष्ट्वा त्रिभुवनेश्वरम् ।
पूर्वस्यां दिशि देवस्य ततो ब्रह्मेश्वरं व्रजेत् ।। ५८ ।।
नमोऽस्तु परमार्थाय प्रजानां पतये नमः ।
यज्ञाङ्गसम्भवे कुण्डे मज्जयेऽहं तवाज्ञया ।। ५९ ।।
तत्र त्रिभुवनेशं तु दृष्ट्वा मेघेश्वरं व्रजेत् ।
पूर्वानुज्ञां तु वै स्मृत्वा ततो मन्त्रमुदीरयेत् ।। ६० ।।
ॐ नमस्ते शितिकण्ठाय पर्जन्यपतये नमः ।
प्रसीद सुमुखो नाथ मज्जयेहं तवाम्भसि ।। ६१ ।।
स्नात्वा तु विधिनानेन दृष्ट्वा तं तु कपर्द्दिनम् ।
कौवेर्यां दिशि देवस्यालावुकं तीर्थमाव्रजेत् ।। ६२ ।।
समासाद्य तटं तस्य स्मृत्वानुज्ञां तु पूर्ववत् ।
मज्जये त्रीणि वाराणि मन्त्रेणानेन वै द्विजाः ।। ६३ ।।
ॐ नमस्तु ध्यानयोगाय शाश्वतायकपर्द्दिने ।
मनोरथफलावाप्तिं पूरयस्व महेश्वर ।। ६४ ।।
ततो गत्वा महेशानं दृष्ट्वा त्रिभुवनेश्वरम् ।
वन्दयित्वा नमस्कृत्य व्रजेदुत्तरपर्वतम् ।। ६५ ।।
रामेश्वर इति ख्यातस्तत्र स्नानं समाचरेत् ।
अनुज्ञां पूर्ववत् स्मृत्वा मन्त्रमेतदुदीरयेत् ।। ६६ ।।
वृषभस्योत्तरे शृङ्गे देवि वससि दक्षिणे ।
अशोकझरनामा त्वं पापं हर नमोऽस्तु ते ।। ६७ ।।
विधिनानेन वै स्नात्वा दृष्ट्वा श्रीकृतिवाससम् ।
सर्वपापक्षयादन्ते ज्योतिर्लोकमवाप्नुयात् ।। ६८ ।।

एवं कृत्वाऽष्टतीर्थानि नवम्यां मुनिसत्तमाः ।
दशम्यामेकभक्तं च नक्तं वापि समाचरेत् ।। ६९ ।।
रात्रौ तु शयनं कार्यं कुशानास्तीर्य भूतले ।
दशम्यामष्टतीर्थं तु कुर्याद् वाथ द्विजोत्तमाः ।। ७० ।।
पुनः प्रभातसमये एकादश्यां विचक्षणः ।
कुर्याद् बिन्दुसरःस्नानं वन्दनं श्रीरमापतेः ।। ७१ ।।
मौनी पूर्वमुखो भूत्वा ध्यात्वा श्रीचक्रिणं हृदि ।
अनुज्ञाप्य जगन्नाथं ततः सङ्कल्पमाचरेत् ।। ७२ ।।
निर्विघ्नेन यथा विष्णो चातुर्मास्यव्रतं मम ।
भवेत्तथा कुरुष्वाशु पापघ्नं पुण्यबृंहणम् ।। ७३ ।।
एकादश्यां यतात्मासावनुज्ञाप्येत्थमच्युतम् ।
गणानां त्वेति मन्त्रेण विघ्नराजं समर्च्चयेत् ।। ७४ ।।
विघ्नराजं समर्च्च्याथ एकाम्रेश्वरसन्निधौ ।
यथाकामेन सङ्कल्पं ततः कुर्यात्स वै व्रती ।। ७५ ।
ततो प्रतिदिनं विप्राः स्नानं कुर्याद् ह्रदोत्तमे ।
दर्शनं प्रत्यहं कुर्य्यात् व्रती श्रीकृत्तिवाससम् ।। ७६ ।।
देव्याः पापहरायास्तु तथाऽनन्तस्य भो द्विजाः ।
भेदं न कारयेद्धीमान् ब्रह्मणः कृत्तिवाससः ।। ७७ ।।
एषां तु दर्शनं कुर्यात् प्रत्यहं व्रतीनां वरः ।
वर्जयेत् प्रथमे मासि शाकं विगतमत्सरः ।। ७८ ।।
दधिवर्जं भाद्रवे तु आश्विने वर्जयेत् पयः ।
कार्त्तिके मासि सम्प्राप्ते वर्ज्या माषा द्विजोत्तमाः ।। ७९ ।।
दीपदानं तु वै कुर्याच्छिवमुद्दीश्य प्रत्यहम् ।
स तु स्त्रियं न वीक्षते वर्जयेत्तैलमामिषम् ।। ८० ।।

नयेयुः कार्त्तिकं मासं दीक्षया व्रतचारिणः ।
क्षुधार्त्तेभ्योऽन्नदानं च कर्त्तव्यं व्रतिना सदा ।। ८१ ।।
अन्यतीर्थाद्विशिष्टं हि पुण्यं ह्यस्मिन्नुदाहृतम् ।
तस्मादन्नप्रदो ह्यस्मिन् क्षेत्रे मुक्तिकरस्थितः ।। ८२ ।।
अन्नं प्रतिदिनं विप्रा दातव्यं पुण्यमिच्छता ।
सर्वं तु विफलं तस्य क्षेत्रेऽस्मिन् विमुखेऽन्यथा ।। ८३ ।।
सर्वदानादन्नदानं विशिष्टं समुदाहृतम् ।
तस्माद्विप्राः क्षेत्रवरे ह्यन्नदः सर्वदानदः ।। ८४ ।।
अन्नदानात् परं दानं न भूतं न भविष्यति ।
गजाऽश्वरथदानेभ्यो ह्यन्नदानं विशिष्यति ।। ८५ ।।
अन्नदं सर्वदं प्राहुः पुरा विद्याविचक्षणाः ।
अन्नदानं सदाकाले कर्त्तव्यं शिवसद्मनि ।। ८६ ।।
चातुर्मास्यव्रतं विप्रा य एवं कुरुते पुमान् ।
नारी वाथ द्विजश्रेष्ठाः स मोक्षं लभते ध्रुवम् ।। ८७ ।।
दिने दिनेऽश्वमेधस्य फलमाप्नोति मानवः ।
राजसूयस्य यज्ञस्य कार्त्तिके समुदाहृतम् ।। ८८ ।।
धर्मार्थकामी धर्मार्थानवाप्नोति न संशयः ।
वेदज्ञो ब्राह्मणो धीमान् राजा च विजयी भवेत् ।। ८९ ।।
वैश्यो धनसमृद्धः स्याच्छूद्रः सद्गतिमाप्नुयात् ।
चातुर्मास्ये द्विजश्रेष्ठाः सर्वपापक्षयं भवेत् ।। ९० ।।
अन्यक्षेत्रकृतं पापं शिवसद्मनि नाशयेत् ।
ब्रह्महत्यादि पापानि अन्यक्षेत्रे कृतानि च ।। ९१ ।।
अन्यक्षेत्रकृतं पापं स्वर्णकूटे विनश्यति ।
स्वर्णकूटे कृतं पापं वज्रलेपो भवेद्ध्रुवम् ।। ९२ ।।

ऋषय ऊचुः

अस्मिन् क्षेत्रे कृतं पापं वज्रलेपो भवेदिति ।
त्वयोक्तं यद् द्विजश्रेष्ठ तत्क्षयं केन वा भवेत् ।। ९३ ।।

भरद्वाज उवाच

माघे मासि कृष्णपक्षे चतुर्दश्यां द्विजोत्तमाः ।
क्षेत्रप्रदक्षिणं कुर्य्याद् यो नरः संयतात्मवान् ।। ९४ ।।
देवस्य दक्षिणे पूर्वे पश्चिमे चोत्तरे तथा ।
क्रोशमात्रं परं क्षेत्रं शिवस्य परमेष्ठिनः ।। ९५ ।।
प्रदक्षिणं च यः कुर्यान्मेरुं सूर्य इवापरः ।
तस्य क्षेत्रकृतं पापं विनश्यति न संशयः ।। ९६ ।।
तत्र मौनी भवेद्धीमान् कुर्यादनशनव्रतम् ।
दिनेनैकेन वै कुर्यात्तत्र सर्वप्रदक्षिणम् ।। ९७ ।।
नैव तिष्ठेत्क्षणमपि न हासं नैव रोदनम् ।
हासे च रोदने विप्रा विफलं स्यात् प्रदक्षिणम् ।। ९८ ।।
प्रदक्षिणेन चैकेन कोटिजन्माघनाशनम् ।
द्वितीयेन द्वितीयस्य तृतीयेन त्रिजन्मनः ।। ९९ ।।
एकाम्रकृतपापानां क्षयाय द्विजसत्तमाः ।
क्षेत्रप्रदक्षिणादृते नान्यः पन्थास्तु विद्यते ।। १०० ।।
अन्यतीर्थकृतं पापं स्वर्णकूटे विनाशयेत् ।
स्वर्णकूटकृतं पापं विनश्यति प्रदक्षिणे ।। १०१ ।।

इति श्रीकपिलसंहितायां भरद्वाजऋषिसंवादो नाम

अष्टादशोऽध्यायः ।।

ऊनविंशोऽध्यायः

मुनय ऊचुः

तस्मिन् क्षेत्रे द्विजश्रेष्ठ काः काः यात्राः समीरिताः ।
सङ्क्षेपेण तु ता यात्रास्त्वमस्मान् कथय प्रभो ।। १ ।।

भरद्वाज उवाच

तस्मिन्नेकाम्रकवने सप्तयात्राः प्रकीर्त्तिताः ।
अहं ताः कथयिष्यामि शृणुध्वं मुनिपुङ्गा वाः ।। २ ।।
मार्गशीर्षे कृष्णपक्षे यदा स्यात्प्रथमाष्टमी ।
तदा यात्रा समुद्दिष्टा देवदेवेन शम्भुना ।। ३ ।।
आज्ञां वरुणभूपाय पुरा शम्भुः प्रदत्तवान् ।
समीपं तव लिङ्गस्य यास्यामि प्रथमाष्टमी ।। ४ ।।
ततः प्रभृति भो विप्रा यात्रैषा प्रथमाष्टमी ।
तत्र स्नानं जपो दानमक्षयं पापनाशनम् ।। ५ ।।
अथान्यामभिधास्यामि यात्रां पापप्रणाशिनीम् ।
भास्कराय पुरा विप्रा आज्ञा दत्ता तु शम्भुना ।। ६ ।।
शृणु मद्वचनं हंस तव प्रीत्यै वदाम्यहम् ।
यात्रां पापघ्नीमतुलां माघशुक्लस्य सप्तमे ।। ७ ।।
तस्यां तिथौ सहस्रांशो तव लिङ्गस्य सन्निधिम् ।
यास्यामि च प्रदास्यामि लोकानां फलमुत्तमम् ।। ८ ।।
तिलदानं तु तत्रैव महापुण्यप्रदायकम् ।
तत्र श्रीभास्करेशस्य पूजनं मुक्तिलक्षणम् ।। ९ ।।
अथान्यं च प्रवक्ष्यामि कपिलस्य महात्मनः ।
लिङ्गस्य सन्निधानञ्च देवदेवस्य शूलिनः ।। १० ।।

कपिले पूजिते लिङ्गे वरो दत्त कपर्द्दिना ।
अत्राहं सर्वभावेन पूजां गृह्णामि वै मुने ।। ११ ।।
फाल्गुनस्य सिते पक्षे यदा स्यात् सौरिवासरः ।
तत्र यात्रां करिष्यामि सनन्दिश्च सहोमया ।। १२ ।।
प्रणिनां तत्र दास्यामि वाञ्छितं फलमुत्तमम् ।
पवित्रे कपिले क्षेत्रे भोक्तॄणां च विशेषतः ।। १३ ।।
तैलं दत्वा शिरोगात्रे मज्जनं कापिले ह्रदे ।
मन्त्रेणानेन विधिवत्तत्र स्नानं समाचरेत् ।। १४ ।।
नमः कपिलतीर्थाङ्ग गङ्गाम्वुधिफलप्रद ।
पापं नाशय मे तीर्थ मज्जयेऽहं तवाम्भसि ।। १५ ।।
इति मन्त्रं समुच्चार्य तत्र स्नानं समाचरेत् ।
ब्रह्महत्यादिपापानि नाशयेन्नात्र संशयः ।। १६ ।।
एवमुक्त्वा तु भगवान् तत्रैवान्तरधीयत ।
अथान्यां यात्रां वक्ष्यामि अशोकाख्यां महाफलाम् ।। १७ ।।
राघवाय पुरा विप्राः प्रसन्नो भगवानभूत् ।
उवाच मधुरं वाक्यं वाक्यज्ञश्चोत्तमौजसा ।। १८ ।।
राम राम महाबाहो मद्वाक्यं शृणु राघव ।
मोक्षाय सर्वभूतानां वक्ष्ये यात्रां महाफलाम् ।। १९ ।।
चैत्रे मासि च सम्प्राप्ते यदा शुक्लाष्टमी भवेत् ।
यास्ये गिरिजया सार्द्धं तव लिङ्गस्य सन्निधिम् ।। २० ।।
रथस्थं तत्र मां दृष्ट्वा ब्रह्महत्यादिपातकैः ।
मुच्यते नात्र सन्देहः योऽपि चण्डालयोनिजः ।। २१ ।।
ततः प्रभृति भो विप्रा अशोकाख्या महाफला ।
अथान्यां च प्रवक्ष्यामि यात्रां दमनभञ्जिकाम् ।। २२ ।।

चैत्रे शुक्लचतुर्द्दश्यां दमनेनार्च्चयेच्छिवम् ।
सर्वपापविनिर्मुक्तः शिवलोकं व्रजेद्ध्रुवम् ।। २३ ।।
विशेषेण तु कर्त्तव्या श्रीतीर्थेश्वरसन्निधौ ।
यात्रामथान्यां वक्ष्येऽहं पर्शुरामस्य भो द्विजाः ।। २४ ।।
रामेण पूजितं यच्च श्रीरामेश्वरसंज्ञकम् ।
तदेव लिङ्गं रामस्य जामदग्न्यस्य सम्मतम् ।। २५ ।।
आषाढस्य च शुक्लायामष्टम्यां परिकीर्त्तिता ।
जामदग्न्याय रामाय पुरा दत्तवरो हरः ।। २६ ।।
प्राणिनां पापनाशाय यास्येऽहं तव सन्निधौ ।
अथान्यमभिधास्यामि द्वितीयायां महाफलम् ।। २७ ।।
शुक्लपक्षे द्वितीयायां कार्त्तिकस्य विशेषतः ।
यात्रा कामप्रदा विप्राः श्रीयमेश्वरसन्निधौ ।। २८ ।।
इत्येताः सप्तयात्रास्तु कथिता मे महाव्रताः ।
अतः किमधिकं विप्राः पुराणं श्रोतुमिच्छथ ।। २९ ।।

कपिल उवाच

तस्योक्तमिदमाकर्ण्य भरद्वाजस्य ते तदा ।
आनन्दाश्रुजलैर्युक्ता गमनं चक्रिरे वनम् ।। ३० ।।
आद्ये च दिवसे सर्वे ययुर्वाराणसीं पुरीम् ।
स्नात्वा च जाह्नवीतोये ददृशुर्लिङ्गमुत्तमम् ।। ३१ ।।
ततस्ते हर्षमतुलमवापुर्मुनिसत्तमाः ।
पुनस्तं पूजयामासुर्देवदेवं महेश्वरम् ।। ३२ ।।
द्वितीये दिवसे चैव गयां प्रापुर्महीसुराः ।
पिण्डदानादिकं तत्र गदाधरकरे कृतम् ।। ३३ ।।
ततो बहुदिने ते च प्रापुर्विरजमण्डलम् ।
स्नात्वा वैतरणीतोये ददृशुः क्रोडरूपिणम् ।। ३४ ।।

ततस्ते विरजां देवीं मुक्तेश्वरं हरम् ।
आखण्डलेश्वरं चैव त्रिलोचनमहेश्वरम् ।। ३५ ।।
ततो ब्राह्मीं नदीं प्रापुः स्नानं तत्र प्रचक्रिरे ।
पितॄन् देवांश्च सन्तर्प्य पिण्डदानं कृतास्तथा ।। ३६ ।।
ततो महानदीं प्राप्य पूर्वसागरगामिनीम् ।
सर्वपापक्षयकरीं स्नानं चक्रुर्द्विजोत्तमाः ।। ३७ ।।
तृतीये दिवसे राजन् प्रापुरेकाम्रकं वनम् ।
तत्र गत्वा मुनिश्रेष्ठा आश्रमाणि व्यलोलयन् ।। ३८ ।।
सिद्धाश्रमं समाश्रित्य प्रापुर्मुक्तिं महीपते ।
एवं तीर्थे नृपश्रेष्ठ वरिष्ठे पुष्करे पुरा ।। ३९ ।।
ऋषीणां चैव सम्वादं भरद्वाजेन धीमता ।
कथितं तव तुष्ट्यर्थमुत्कलं देशमुत्तमम् ।।
इदानीं च महीपाल किमन्यत् श्रोतुमिच्छसि ।। ४० ।।
य इदं परमं पुण्यं माहात्म्यं चोत्कलस्य च ।
शृणोति हृष्टरोमा सन् स पुण्यां गतिमाप्नुयात् ।। ४१ ।।
य इदं चोत्कलाख्यानं पठेद्वै नरसत्तमः ।
स याति परमं स्थानं देवादीनां च दुर्लभम् ।। ४२ ।।
उत्कलस्य च माहात्म्यं ये शृण्वन्ति महीपते ।
गोसहस्रप्रदानस्य ते नराः फलमाप्नुयुः ।। ४३ ।।
यस्त्विदं परमं पुण्यं करोति नरसत्तमः ।
तस्य धर्मे स्थिता बुद्धिर्न च्यवेत् स कदाचन ।। ४४ ।।

इति श्रीकपिलसंहितायां भरद्वाजऋषिसम्वादे ऋषीणां मुक्तिप्राप्तिर्नाम ऊनविंशोऽध्यायः ।।

विंशोऽध्यायः

सत्यजिदुवाच

श्रुतानि धर्माणि पुरातनानि श्रुतानि क्षेत्राणि नदीवनानि ।
श्रुतानि तीर्थानि बहूनि मेऽद्य पुनः किमास्ते वद तत्र देशे ।। १ ।।

कपिल उवाच

फलदानि च क्षेत्राणि कथितानि मया पुरा ।
इदानीं कथयिष्यामि शृणु त्वमवनीपते ।। २ ।।
कथिता या पुरा राजन् बहुपुण्या महानदी ।
तस्यास्तु तनया ख्याता दक्षिणं गमा ।। ३ ।।
सा नदी भृगुणानीता तपसा च महात्मना ।
ततः सा भार्गवी ख्याता गोसहस्रफलप्रदा ।। ४ ।।
सिद्धेश्वरसमीपाच्च तथा सिद्धेश्वरावधि ।
भार्गवी भृगुणानीता गङ्गासमफलप्रदा ।। ५ ।।
तस्यास्तटे महीपाल यत्र स्याच्छिवलिङ्गम् ।
तत्र सा मोक्षदा ख्याता ह्याभिमुख्ये विशेषतः ।। ६ ।।
स्नानमन्त्रं निबोध त्वं पुण्यं नृपतिसत्तम ।
विफलं भवति स्नानं स्नानमन्त्रमृते यतः ।। ७ ।।
भृगुकन्ये नमस्तुभ्यं गोसहस्रफलप्रदे ।
पापानि विलयं यान्तु मज्जने तव वारिणि ।। ८ ।।
इत्युक्त्वा मज्जयेत्तस्यां तर्पयेत् पितृदेवताः ।
प्राप्नोति परमं स्थानमेकविंशतिपुरुषैः ।। ९ ।।
तस्यास्तु तनया राजन् पुष्पभद्रेति विश्रुता ।
पूर्वस्यां दिशि सा ख्याता पूर्वसागरगामिनी ।। १० ।।

तस्या स्नानं महीपाल कार्त्तिके सर्वकामदम् ।
तथा माघे तथाषाढे फाल्गुने च विशेषतः ।। ११ ।।
पुष्पभद्रा नदी या तु सा कृष्णा नात्र संशयः ।
शम्बरं निर्मलं यस्या वाञ्छन्ति पितृदेवताः ।। १२ ।।
तस्यास्तु दुहितामन्यां प्रवक्ष्ये भूभृतां वर ।
दधिस्रवेति विख्याता एकाम्रवनसन्निधौ ।। १३ ।।
आनीता ऋषिणा यासौ तापसेन दधीचिना ।
तज्जले स्नानमात्रेण सोमालोकं व्रजेन्नरः ।। १४ ।।
तत्रैव दृश्यते लिङ्गं व्योमकेशस्य भूपते ।
तटे तस्याः प्रयत्नेन पुण्यस्नानं समाचरेत् ।। १५ ।।
अन्यस्थानाच्छतगुणं सहस्रगुणितं फलम् ।
प्राप्नोत्यभिमतं कामं स्नानकृन्नरसत्तमः ।। १६ ।।
महीपाल शृणुष्वाथ प्राचीं गुप्तसरस्वतीम् ।
यया कालाग्निना दग्धं रक्षितां सचराचरम् ।। १७ ।।
एकाम्रकाननात् पूर्वे योजनान्ते महीपते ।
नाम्ना प्राचीति विख्याता सरिदास्ते सरस्वती ।। १८ ।।
प्राच्यां दिशि महेशस्य यत्र स्यात् सागरंगमा ।
क्रोशे क्रोशे तटे लिङ्गं ततः प्राची सरस्वती ।। १९ ।।
तस्यां स्नात्वा महीपाल ज्योतिर्लोकं व्रजेन्नरः ।
सर्वपापविनिर्मुक्तः सप्तविंशतिपुरुषैः ।। २० ।।
सर्वपुण्यप्रदा धन्या वैकुण्ठभुवनप्रदा ।
साक्षात् सरस्वती प्राची नान्यथा नृपसत्तम ।। २१ ।।
क्रोशे क्रोशे च लिङ्गानि तटे तस्या मनोरमे ।
सर्वत्र सुखसञ्चारे विद्वज्जनसुसेविते ।। २२ ।।

तत्र विल्वेश्वरो नाम विल्वमूलाश्रितो हरः ।
तं दृष्ट्वा पूजयित्वा च नरः शिवमवाप्नुयात् ।। २३ ।।
विल्वशाखी महीपाल कल्पवृक्षसमो भुवि ।
तस्य प्रदक्षिणं कृत्वा मुच्यते ब्रह्महत्यायाः ।। २४ ।।
त्रिवेणीसङ्गमं तत्र महापुण्यप्रदायकम् ।
तत्र स्नानं महीपाल माघमासे प्रकीर्त्तितम् ।। २५ ।।
विशेषेण प्रवक्ष्यामि अमावास्याफलं महत् ।
स्नानं सन्ध्या जपो दानमक्षयं तु समीरितम् ।। २६ ।।
प्राच्यां तु पाण्डवे तीर्थे स्नानं कृत्वा विधानतः ।
सर्वापापक्षयादन्ते शिवसालोक्यतां व्रजेत् ।। २७ ।।
महल्लिङ्गं प्रवक्ष्येऽहं तत्तटे चामरेश्वरम् ।
अमरेशं समालोक्य नरो ह्यमरतामियात् ।। २८ ।।
तस्यास्तटे महेशस्तु कपिलेश्वरसंज्ञकः ।
सर्वपापहरो देवस्तल्लिङ्गं पूजितं मया ।। २९ ।।
एवं बहूनि लिङ्गानि सन्ति तस्यास्तटे शुभे ।
कः शक्नोति गुणान् वक्तुं तस्या प्राच्या महीपते ।। ३० ।।

सत्यजिदुवाच

उत्कलस्य च माहात्म्यं श्रुतं च सकलं मया ।
इदानीं तु मुनिश्रेष्ठ ज्ञानयोगं वदस्व मे ।। ३१ ।।

इति श्रीकपिलसंहितायाम् उत्कलदेशमाहात्म्यं नाम विंशोऽध्यायः ।।

एकविंशोऽध्यायः

कपिल उवाच

ज्ञानयोगं परं गुह्यं कथयामि नराधिप ।
शृणुष्वैकमना भूत्वा यदि श्रद्धा प्रवर्त्तते ।। १ ।।
नन्दिकेश्वरसम्वादं देवदेवेन शम्भुना ।
पुरा श्रुतं मया भूप इदानीं शृणु चानघ ।। २ ।।

नन्दिरुवाच

नमस्ते पार्वतीनाथ भक्तानां करुणाकर ।
कथं विमुच्यते जन्तुः संसारात्कर्मबन्धनात् ।। ३ ।।

महादेव उवाच

कामं क्रोधं परित्यज्य यो जन्तुर्भजते च माम् ।
परां मुक्तिं प्रयच्छामि तमहं नात्र संशयः ।। ४ ।।
कामक्रोधौ यदि पुत्र परित्यज्यति मानवः ।
तदा तस्य हृदिस्थोऽहं प्रकाशं सोऽधिगच्छति ।। ५ ।।
पुत्रदारसमायुक्ता ये चानन्दन्ति मानवाः ।
परया मायया ते च वञ्चिता शृणु पुत्रक ।। ६ ।।
अनेकजन्मसंशुद्धान्मानुषं प्राप्य मानवाः ।
न जानन्ति परं ज्योतिं हृत्स्थं नारायणं प्रभुम् ।। ७ ।।
मदेन मोहिता नार्या ये क्रीडन्ति नराधमाः ।
तेषां च निरये वासः सत्यं सत्यं मयोदितम् ।। ८ ।।
कामं क्रोधं मदं मोहं हिंसां पैशुन्यमेव च ।
अहङ्कारं तथा लोभं त्यज त्वं नन्दिकेश्वर ।। ९ ।।
कर्मणा मनसा वाचा सङ्कल्पं त्यजते तु यः ।
हरिनाम्नो जपेन्नैव भवाब्धिं तरते तु सः ।। १० ।।

हरिनामामृतं चास्ये कृत्वा वैष्णवसत्तमाः ।
अवतेरुर्भवाम्भोधिं कामसङ्कल्पवर्जिता ।। ११ ।।
हरिर्यथा जगन्नाथस्ता थाहं जगतां पतिः ।
आवयोरन्तरं नास्ति आकाशे पवनो यथा । १२ ।।
मम नाम हरेर्नाम कीर्त्तयस्व निरन्तरम् ।
ददावः परमां मुक्तिं सायुज्यं नात्र संशयः ।। १३ ।।
विश्वासः क्रियतां तस्मिन् हरौ त्रैलोक्यनायके
यस्य मायासमाविष्टो ब्रह्मा भ्रमति सर्वदा ।। १४ ।।
जगत्पितरि गोविन्दे मयि वा तत्स्वरूपिणि ।
कुरु भक्तिं दृढां पुत्र मोक्ष्यसे कर्मबन्धनात् ।। १५ ।।
योऽयं नारायणो देवः स त्वहं नीलन्धरः ।
मया विचार्यते चाहं करोमि च करोति सः ।। १६ ।।
शङ्करो नीलकण्ठश्च श्रीधरो नीलविग्रहः ।
गौरीशो गोपिकाकान्तो ध्यायतामेकचेतसा ।। १४ ।।
माधवस्योमाधवस्य नास्ति भेदं मयोदितम् ।
मूढा भेदं प्रकुर्वन्ति प्रपच्यन्ते हि रौरवे ।। १८ ।।

कपिल उवाच

इत्यक्त्वा भगवान् शम्भुस्तत्र तूष्णीं बभूव ह ।
एवं तं पार्वतीनाथं नन्दिः पुनरभाषत ।। १९ ।।

नन्दिरुवाच

वैष्णवानां च चिह्नानि तस्य विष्णोर्मनुं तथा ।
त्वत्तोऽहं श्रोतुमिच्छामि वद मां करुणाकर ।। २० ।।

महादेव उवाच

शङ्खचक्राङ्कितं देहं तुलसीदामभूषिताम् ।
कामक्रोधपरित्यक्तं चिह्नं वैष्णवसंज्ञकम् ।। २१ ।।

कट्यां कौपीनकं शुद्धं मुखे च मधुरं वचः ।
सर्वदानन्दहृदयं चिह्नं वैष्णवसंज्ञकम् ।। २२ ।।
आनन्दाश्रुसमायुक्तमुच्चैर्गोविन्दकीर्त्तनम् ।
सत्सङ्गप्रीतिजनकं चिह्नं वैष्णवसंज्ञकम् ।। २३ ।।
सर्वस्मिन्नात्मबुद्धित्वं सर्वसत्त्वसुखावहम् ।
दयासत्यसमायुक्तं चिह्नं वैष्णवसंज्ञकम् ।। २४ ।।
निर्ममं निरहङ्कारं देवताब्राह्मणार्च्चनम् ।
असत्सङ्गपरित्यक्तं चिह्नं वैष्णवसंज्ञकम् ।। २५ ।।
एवं वैष्णवचिह्नानि यस्य सन्ति स वैष्णवः ।
अन्ये ये दाम्भिका लुब्धास्तेषां लङ्घनकारिणः ।। २६ ।।
इदानीं कथयिष्यामि मन्त्रमष्टाक्षरं शृणु ।
अष्टाक्षरं महामन्त्रं नारायणप्रसन्नदम् ।। २७ ।।
ॐ नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ।
लक्षमष्टाक्षरं जप्त्वा स्वयं नारायणो भवेत् ।। २८ ।।
अष्टाक्षरं प्रपद्यन्ते ये नरास्तदुपाश्रयाः ।
कोटिजन्मार्जितं दोषं तेषां च क्षमते हरिः ।। २९ ।।
मन्त्रमष्टाक्षरं जप्त्वा सनकाद्या महर्षयः ।
संसारबन्धनिर्मुक्तास्तिष्ठन्ति ह्यजरामराः ।। ३० ।।
पूर्वमष्टाक्षरं जप्त्वा मृकण्डुतनयो नृप ।
सप्तकल्पायुषो ह्यास्ते मार्कण्डेयेति विश्रुतः ।। ३१ ।।
इदमष्टाक्षरं मन्त्रं मयोक्तं तं समाश्रय ।
अपरं श्रोतुकामास्त्वं किं वदामि वदाशु तत् ।। ३२ ।।

नन्दिरुवाच

केषु केषु च स्थानेषु चिन्त्योऽसि भगवन्मया ।
तद् वदाशु प्रयत्नेन नाम निर्मुक्तिकारणम् ।। ३३ ।।

महादेव उवाच

कैलासे पार्वतीनाथं नानाभरणभूषितम् ।
पार्वत्या सह तिष्ठन्तं करे ताम्बूलदत्तया ।। ३४ ।।
हरिणं परशुं चैव धारिणं सूर्यवर्च्चसम् ।
भज मां योगिभिर्ध्येयं सर्पाभरणभूषितम् ।। ३५ ।।
हिमालये विरूपाक्षं जटामण्डलधारितम् ।
क्रोधरूपं दग्धकामं भज मां वह्निरूपिणम् ।। ३६ ।।
काश्यां विश्वेश्वरं रूपं कोटिलिङ्गैः समावृतम् ।
नृणां वरप्रदातारं गुप्तरूपं भजस्व माम् ।। ३७ ।।
गयायां पादरूपं च दर्शनान्मुक्तिदायकम् ।
पितृप्रीतिप्रदं रुद्रं भज मां शून्यरूपिणम् ।। ३८ ।।
विरजे ब्रह्मणः क्षेत्रे द्विजानां मुक्तिदायकम् ।
त्रिलोचनं नदीतीरे तत्र मां भज नित्यशः ।। ३९ ।।
तद्दक्षिणे च कैलासे तीर्थाभ्यां च समाश्रिते ।
भज त्वं शिखरेशं मामेकाकिनं तपस्विनम् ।। ४० ।।
तस्मादेकाम्रके पुण्ये शिवं जाग्रत्स्वरूपिणम् ।
बिन्दुतीर्थतटासीनं ब्रह्मादीनां वरप्रदम् ।। ४१ ।।
कृष्णेन सह तिष्ठन्तं नाम्ना त्रिभुवनेश्वरम् ।
दातारं सर्वलोकानां भज मां लिङ्गरूपिणम् ।। ४२ ।।
तत्पूर्वस्यां नदीतीरे बिल्वमूलाश्रितं च माम् ।
सर्वसम्पत्प्रदातारं सर्वापद्भयनाशनम् ।। ४३ ।।
तस्माद्रामेश्वरं पुत्र सिन्धुतीरनिवासिनम् ।
भज मां द्विभुजं तत्र त्रिनेत्रं धूलिधूसरम् ।। ४४ ।।
तस्मान्नीलाचले क्षेत्रे दक्षिणे दारुरूपिणः ।
यमेश्वरं सुखागारं यमदण्डविनाशनम् ।। ४५ ।।

एवं सर्वत्र मां मुख्यं विद्धि त्वं नन्दिकेश्वर ।
मनसा वचसा चैव कर्मणा मां भजस्व च ।। ४६ ।।

कपिल उवाच

इत्युक्त्वा गतवान् शम्भुर्गौरीक्रीडागृहान्तरम् ।
प्रतिहारस्त्वसौ नन्दी तत्रास्ते धृतदण्डकः ।। ४७ ।।
नन्दिकेश्वरसम्वादमेवं देवेन शम्भुना ।
सर्वशान्तिकरं पुण्यं गुह्यं ते कथितं मया ।। ४८ ।।
अवैष्णवे न वाच्यं तु देवब्राह्मणनिन्दके ।
ज्ञानयोगं मनोयत्नं न वाच्यं संशयात्मनि ।। ४९ ।।
य इमं परमं गुह्यं ज्ञानयोगं पठेन्नरः ।
शृणुयादपि भक्त्या यः स शान्तिमधिगच्छति ।। ५० ।।

इति श्रीकपिलसंहितायां ज्ञानयोगो नाम एकविंशोऽध्यायः ।।

द्वाविंशोऽध्यायः

ॐ श्रीगणेशाय नमः

उत्कलदेशस्थितदेवताकथनम्

श्रीसत्यजिदुवाच

भो भो कपिलदेव त्वं शृणु मद्वचनं शुभम् ।
त्वया तु कथितं सर्वं चरितं चोत्कलोद्भवम् ।। १ ।।
मयापि तत् श्रुतं सर्वं सन्निवृत्तोऽस्मि यद्यपि ।
तथापि पुनरित्थं मे मनसा भासते स्मृतिः ।। २ ।।
नास्ति किं चोत्कले देशे चतुःक्षेत्रकथां विना ।
अस्ति वा चरितं त्वन्यत्तन्मां कथय सुव्रत! ।। ३ ।।

श्रीकपिल उवाच

सत्यजित्त्वं शृणुष्वैतत्सम्यक् प्रश्नः कृतः पुनः ।
श्रद्धा मे महती जाता तद्वार्त्तां गदितुं पुनः ।। ४ ।।
इदमेव पुरा राजन्नारदाय महात्मने ।
इन्द्रद्युम्नो महाराज पप्रच्छ बहुसादरम् ।। ५ ।।
नारदस्त्वं यथा प्राह सर्ववृत्तान्तमौत्कलम् ।
तत्तेऽहं कथयाम्यत्र सावधानं शृणुष्व भो ।। ६ ।।

श्रीइन्द्रद्युम्न उवाच

भो नारद मुनिश्रेष्ठ कथ्यतामधुना त्वया ।
नीलाद्रेस्तु परिसरो दिवं जनपदं तु तत् ।। ७ ।।
वनं नास्ति कथं त्वत्र पर्वतस्यान्तिमे मुने ।
शिवरूपा विष्णुरूपा दुर्गारूपाश्च कास्त्विह ।। ८ ।।
देवतास्तत्र वर्त्तन्ते अन्या वा मुनिसत्तम ! ।

श्रीनारद उवाच

यत्पृष्टं नृपशार्दूल कथयामि शृणुष्व तत् ।
पर्य्यन्ते नीलशैलस्य वनमस्ति सुदुर्लभम् ।। ९ ।।
आम्राणां पनसानां च नारिकेलमहीरुहाः ।
क्रमुकानां चूतकानां खर्जुराणां समन्ततः ।। १० ।।
कदलीनां च सर्वत्र वर्त्तते गहनं वनम् ।
फलोत्तमानां वृक्षाणां वनं तत्रापि वर्त्तते ।। ११ ।।
तगरावर्त्तिकानां च तिन्दुकानां नृपोत्तम ।
पुष्पाणामपि सर्वेषामुत्कले वर्त्तते वनम् ।। १२ ।।
चम्पकानामशोकानां च नागकेशरभूरुहाम् ।
कदम्बानां वनं त्वत्र केतकीनां च सर्वतः ।। १३ ।।

वकुलानां शिरीषाणां नवमालिकानामिकाम् ।
तुलसीनां च पद्मानां कुमुदानां वनं महत् ।। १४ ।।
सिन्धुवारोत्पलानां बन्धूकानां नृपोत्तम ।
तगराणां काञ्चनानां तराटानां महीरुहाम् ।। १५ ।।
छुरितकानां नाम्ना वै पुंनागानां वनं महत् ।
करुणानां च जम्बूनां मन्दाराणां तथैव च ।। १६ ।।
माधवीपाटलीनां च दृढकायवनं तथा ।
पुंनागानां च तत्रास्ति वनं नृपतिसत्तम ।। १७ ।।
मल्लिकानां च यूथीनां रङ्गणीकुन्दकामिनाम् ।
अम्लानकुसुमानां चामलकाख्यमहीरुहाम् ।। १८ ।।
मालतीनां लतानां च नानानामकपुष्पिणाम् ।
अतिभीबीजपूराणां जम्बीराणां वनं नृपः ।। १९ ।।
लिम्पाकनागरङ्गानां लकुचानां तथैव च ।
दाडिमानां तथा लङ्कापनसानां नृपोत्तम ।। २० ।।
स्वर्गीयं चापरं तत्र वर्त्तते वनमीदृशम् ।
इक्षुकाणां महारण्यं समन्तात्तत्र वर्त्तते ।। २१ ।।
क्षुद्राम्र डिम्विरी नाम शाल्मलीनां वनं तथा ।
पलाशधौतनाम्ना च सिग्रुणां च वनं तथा ।। २२ ।।
गम्भारी वरुणाख्यानां वैकंकतवनं तथा ।
वनं विल्ववटाश्वत्थनिम्बानां वर्त्तते क्वचित् ।। २३ ।।
वेत्राणां च वनं तत्र वनं दमनकोद्भवम् ।
वनं मरिचकानां च केवलं तत्र वर्त्तते ।। २४ ।।
ग्राम्यलताश्च वृक्षाश्च तत्र सन्ति नृपोत्तम ।
अरण्यानि लतास्तत्र गुल्मी वीरुध एव च ।। २५ ।।

दिव्यमूलफलानां च लतानां च वनं बहु ।
पूर्णमूलफलानां च लताः क्षुद्रद्रुमास्तथा ।। २६ ।।
ये सम्भवन्ति राजेन्द्र प्रजानां कपिभिर्विना ।
चन्द्रसूर्य्यप्रभाभिर्ये सम्भवन्ति समं ततः ।। २७ ।।
जीवातुकारणान्यानि वनानि सर्वजीविनाम् ।
ख्याता ज्ञाता त्वया नद्यः ख्याताश्च बहुविश्रुताः ।। २८ ।।
नद्यः सन्ति कियत्यो वा वक्ष्यन्ते भवग्रतः ।
वर्त्तते शृणु भो राजन् देवता कथयामि ते ।। २९ ।।
नीलाद्रेरुत्तरे तीरे क्रोशयुग्मेऽस्ति भार्गवी ।
पुरुषोत्तमरथ्याया मध्ये तस्य जलस्य तु ।। ३० ।।
वाराहीपीठमप्यस्ति दीपरूपं तु सिद्धिदम् ।
देवी तत्रास्ति वाराही तत्तीरे भयनाशिनी ।। ३१ ।।
पुरुषोत्तमशम्भूनामादिविल्वेश्वराश्च ये ।
शक्तीनां च नृपश्रेष्ठ विदितोऽस्ति स्थितिक्रमः ।। ३२ ।।
वाराह्याः सिद्धिदेव्याश्च सन्निधौ देवताः शृणु ।
कोणेष्वस्याश्चतुर्ष्वास्ते शिवलिङ्गचतुष्टयम् ।। ३३ ।।
ऐशान्ये सिद्धिनाथोऽस्ति पातालेशोऽग्निकोणकः ।
नैऋतेऽस्ति कपोतेशो वायव्ये ग्रामकेश्वरः ।। ३४ ।।
एवमेते महादेवाः सिद्धाः सर्वे स्वयम्भुवः ।
तद्देशीयजनानां च महाभयविनाशनाः ।। ३५ ।।
शराशनविनिर्युक्ता यत्र काण्डाः पतन्ति हि ।
चत्वारस्ताद्दशे दूरे षट्कोणकचतुष्टये ।। ३६ ।।
अस्यां क्रोशे नृपैशान्ये गङ्गाकुण्डं च वर्त्तते ।
जले यत्र नृपश्रेष्ठ भार्गवी चोत्तराङ्कुरा ।। ३७ ।।

कोणे क्रोशार्द्धके चास्याः केणेषु च चतुर्द्दिशाम् ।
चत्वारस्तादृशाः सन्ति महेशा लिङ्गरूपिणः ।। ३८ ।।
ऐशान्ये रुद्रनाथोऽस्ति आग्नेये वालुकेश्वरः ।
नैऋते सोमनाथोऽपि पश्चिमाभिमुखः शिवः ।। ३९ ।।
चण्डेश्वरोऽस्ति कौवेरे हरचण्डी च तत्प्रिया ।
दिशि तस्यास्तु पूर्वस्यां स्थाने सुन्दरनामनि ।। ४० ।।
सुभद्राबलदेवाभ्यां सहायः सर्वदा हरिः ।
पश्चिमायां शिवौ तस्याः पातालेश्वर एककः ।। ४१ ।।
नीलकण्ठेश्वरस्त्वेक पादमात्रे तु दूरतः ।
कौवेरे वर्त्तते तस्य शिवो नाम्ना वटेश्वरः ।। ४२ ।।
कोणे पादाधिके नृणां सर्वसिद्धिप्रदायकः ।
उत्तरस्यां पुनस्तस्यां शिवाः क्रोशद्वयेऽस्त्यपि ।। ४३ ।।
गतिश्वरोऽतिविख्यातः शिवस्तस्योत्तरेऽस्ति वै ।
कुमारेश्वर नामास्ति सर्वसिद्धिप्रदायकः ।। ४४ ।।
उत्तरस्यां पुनस्तस्य सार्द्धक्रोशे शिवद्वयम् ।
लक्षेश्वराभिधं पुण्यं सर्वदा सर्वसिद्धिदम् ।। ४५ ।।
महामहिमसम्पन्नो महेशो वालुकेश्वरः ।
ऐशान्ये तु पुनस्तस्य वर्त्तते शङ्करत्रयम् ।। ४६ ।।
एको वक्रेश्वरो नामा नीलकण्ठेश्वरोऽपरः ।
कुण्डेश्वरस्तृतीयोऽपि सिद्ध एते स्वयम्भुवः ।। ४७ ।।
वाराह्या उत्तरे पार्श्वे शिवः क्रोशत्रयेऽस्त्यपि ।
वृद्धेश्वरश्च विख्यातः पञ्चक्रोशस्य सीमनि ।। ४८ ।।
क्रोशाष्टकेऽस्ति तस्याश्च वायव्यां दिशि माधवः ।
प्राचीनदीतटे देवो हरिर्नेयालयाभिधः ।। ४९ ।।

प्राची तत्र त्रिवेणी स्यान्नदीद्वयसमन्विता ।
माघे मासि सदा तस्यां शुक्ला त्वैकादशी यदा ।। ५० ।।
तदागच्छति योगोऽपि अर्द्धोदयसमो नृपः ।
देवभूमिश्च तत्तीरे देवास्तिष्ठन्ति तत्र वै ।। ५१ ।।
न दृश्यते परं मर्त्ये सुवर्णेशः शिवस्तथा ।
शिवाश्च द्वादशा ख्याता दुर्गा द्वादश एव हि ।। ५२ ।।
क्रेशे क्रोशोत्तरे तेषां तासां च नृपसत्तम ।
पञ्चक्रोशे नैऋते‍ऽस्ति तस्यास्तु नृपसत्तम ।। ५३ ।।
चिल्लिकास्ते तटे तस्या देवी भगवती पुरा ।
शिवोऽपि तस्याः पार्श्वेऽस्ति सर्वसिद्धिप्रदायकः ।। ५४ ।।

इन्द्रद्युम्न उवाच

केयं सा चिल्लिका नाम्नी वर्त्तते जलरूपिणी ।
आयाता कुत एवेयं कथ्यतां मुनिसत्तम ।। ५५ ।।

श्रीनारद उवाच

बाणासुरः पुरा भूप प्रसाद्य वृषभध्वजम् ।
प्रापयामास सीम्नि च निजदेशस्य स स्वयम् ।। ५६ ।।
समुद्रं निश्चलं निम्नं जलक्रीडोत्सवोत्सुकः ।
चिल्लीयते दर्शनेऽस्यास्तस्मात्तन्नाम चिल्लिका ।। ५७ ।।
वृत्तोत्तरं पुण्यतमं तीर्थराजतटोपमम् ।
तीर्थं च चिल्लिका राजन् स्नानात् पापप्रणाशिनी ।। ५८ ।।
येषु देशेषु सम्पर्को नदीष्वेव च यासु च ।
देशाः पुण्यतमास्ते च नद्यः पुण्यतमास्तु ताः ।। ५९ ।।
शिवलिङ्गानि सन्त्येव तदीयेषु पदेष्वपि ।
विष्णोः स्थानं तदीयं च स्थलं नृपतिसत्तम ।। ६० ।।

क्रोशद्वये चिल्लिकायाः कौवेर्य्यां दिशि सिद्धिदम् ।
आस्ते विष्णुः सुभद्रा च बलरामोऽपि निश्चलः ।। ६१ ।।
तत्पूर्वे सन्निधौ चास्ति ईशानेश्वर नामकः ।
वरं ददाति भक्तेभ्यो मनसा यद् विक्ष्यति ।। ६२ ।।
सिद्धश्रीबलरामस्य पश्चादस्त्यन्तिके शिवः ।
सिद्धेश्वर इति ख्यातो हृष्टः सिद्धिप्रदायकः ।। ६३ ।।
तत्पार्श्वे पश्चिमे चास्ति शिवो वै भेङ्कटेश्वरः ।
भेङ्कटेनासुरेणापि भक्त्या सम्पूजितः पुरा ।। ६४ ।।
इदं ते कथितं ख्यातं शिवलिङ्गं नृपोत्तम ।
ख्यातानि शिवलिङ्गानि पश्चाद् वक्ष्यामि तानि तु ।। ६५ ।।
एवमुत्कलदेशस्य सर्वेष्वैव हि सर्वदा ।
कति वा सम्भवस्तेषु कृता वा कति विष्णवः ।। ६६ ।।
धातुभिर्घटिता वापि कति विष्णुशिवादिकाः ।
देव्यो वा कति दुर्गा वा कति वा राममूर्त्तयः ।। ६७ ।।
गणेशार्काश्च कति वा माणिकी स्फटिकोद्भवाः ।
कति वा रजता भूप शम्भवः सन्ति सर्वतः ।। ६८ ।।
कति वा दारुघटिताः कृता रामादयो नृप ।
चतस्रो वा नृपश्रेष्ठ न वर्त्तते पदे पदे ।। ६९ ।।
मुद्‌जपाषाणघटिताः कति वा कृष्णमूर्त्तयः ।
नृसिंहो वा वराहो वा कति पाषाणमूर्त्तयः ।। ७० ।।
पाषाणमूर्त्तयो देव्यः श्रियश्च स्वर्णमूर्त्तयः ।
कति वा रौप्यघटिताः सुवर्ण्णघटिताः कति ।। ७१ ।।
देवताः सन्ति राजेन्द्र पुरुषा वा स्त्रियोऽपि वा ।
लिङ्गानि बाणपूज्यानि कति स्थाप्यानि सम्भवैः ।। ७२

नानास्थानेषु वर्त्तन्ते देशे ह्युत्कल नामनि ।
वृक्षेषु सन्ति पथिषु कति वा सन्ति वेश्मसु ।। ७३ ।।
गुप्ताश्च कति वा सन्ति नानानामसमुद्भवाः ।
देवतागणानां भूप स्थाने चोत्कलसीमसु ।। ७४ ।।
कर्त्तुं शक्तः पृथिव्यां को वर्त्तते नृपसत्तम ।
पुनः शृणु नृपश्रेष्ठ यद्वा पृष्टं त्वयानघ ।। ७५ ।।
इन्द्रद्युम्न श्रुतं सर्वं भाग्यतो मे तवापि च ।
शृणु राजन्निजं वृत्तं देवतानां महीतले ।। ७६ ।।
अवतारप्रसङ्गेन युगेष्वपि यथाक्रमम् ।
सत्यत्रेताद्वापरेषु कलौ च नृपसत्तम ।। ७७ ।।
कतिकल्पयुगा ह्येते समायान्त्यपि यान्त्यपि ।
अस्मिन् युगेऽपि यत्स्थानं भवेत्तस्य च नाम यत् ।। ७८ ।।
अन्यान्यं यद् भवेदन्यद् युगेऽपि स्यात्तदेव हि ।
युगेऽपि तेषु विप्रर्षे विष्णुः स भगवान् प्रभुः ।। ७९ ।।
शिवश्च दुर्गापि तथा देवा देव्यस्तथापराः ।
अवतारा भवन्त्येषां क्रमयोगाद्युगे युगे ।। ८० ।।
पूर्वपश्चादवस्थापि तेषां तद्रुचिना भवेत् ।
प्रादुर्भावस्तिरोभावो भवत्येषां युगे युगे ।। ८१ ।।
भूतभव्यभवद्भावस्ततस्तेषां भवत्यपि ।
ततोऽवताराः लोकेऽस्मिन् कति कत्यभवन्न वा ।
भवति च भविष्यन्ति व्यवस्था समशासनात् ।। ८२ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे उत्कलदेशस्थितदेवताकथनं नाम द्वाविंशोऽध्यायः ।।

त्रयोविंशोऽध्यायः

दधिभाण्डेश्वरसुवर्णेश्वरकथनम्

श्रीनारद उवाच

इन्द्रद्युम्न नृपश्रेष्ठ पुरावृत्तमिदं शृणु ।
कथयामि प्रसङ्गेन श्रुत्वा सर्वं च वेत्थ भो ।। १ ।।
द्वापरे चावतीर्णस्य युगे शम्भोर्महेशितुः ।
नेयालमाधवस्यास्ति सन्निधौ शङ्करः प्रभुः ।। २ ।।
सुवर्णेश्वर नामासौ सौवर्ण्णलिङ्गमादधत् ।
एकान्ते निवसन् शम्भुः स्वेच्छया मुमुदे स्वयम् ।। ३ ।।
न दृष्टो नरमात्रेण पशुमात्रेण वा पुनः ।
स्वकीयया गवा ज्ञातः स्वकीयेन वृषेण च ।। ४ ।।
सुरभिर्देवतानां गौः सेवितुं प्रभुमीश्वरम् ।
श्रद्दधे मनसा पूर्वं मर्त्त्यलोकनिवासिनी ।। ५ ।।
तच्छ्रद्धा श्रद्धया शम्भुश्चिन्तयामास तां हृदि ।
सा स्मृता क्षणमात्रेण ह्युपतस्थौ हराग्रतः ।। ६ ।।
आज्ञापयामास सतां सुरभि त्वं मदर्च्चने ।
श्रद्धा कृतवती पूर्वं ततः सेवस्व मामिह ।। ७ ।।
आज्ञापितैवं सुरभिर्गुप्ता संसेव्य शङ्करम् ।
प्रत्यहं याता सा स्वर्गं तत्रास्त्येवं कथा ध्रुवा ।। ८ ।।
एवं गतेषु वर्षेषु ज्ञात्वा तं माधवः स्वयम् ।
नृसिंहरूपी स वने विचचारास्य सन्निधौ ।। ९ ।।
त्वं सुवर्णेश्वरो ज्ञात्वा स्वं ज्ञातं माधवेन च ।
हिरण्यगर्भो भवितुं तस्मादायामि तेऽन्तिकम् ।। १० ।।

श्रीशिव उवाच

त्वं भोऽन्तर्भवितुं मेयं व्यवस्था या भवेन हि ।
लोकेभ्यस्तत्समे युक्तं सौवर्णं लिङ्गमेव यत् ।। ११ ।।
त्वं द्रक्ष्यसि सदा लिङ्गं सौवर्णं नान्य एव हि ।
अहं द्रक्ष्यामि ते रूपं सुगुप्तं केवलं मम ।। १२ ।।
गुप्तं सर्वेषु लोकेषु तिष्ठेव त्वमहं त्विह ।
ज्ञातस्तेऽपि मया प्रेम्णा मयि चान्यविलक्षणः ।। १३ ।।
सिंहरूपी भवांस्तत्र भ्रमसि स्थल एव मे ।
वनेऽस्मिन् गहले पुण्ये सिंहरूपेण माधवः ।। १४ ।।
स्थास्यसि त्वं मम प्रीत्या कल्पितावधि सर्वदा ।। १५ ।।

श्रीमाधव उवाच

एवमस्तु महाशम्भो ममैवेच्छेदृशी सदा ।
न भेदमावयोरस्ति नाम्ना वा रूपतोऽपि वा ।। १६ ।।
अहं त्वमेव त्वमहं सदेव त्वन्नाम मन्नामसमं सुपुण्यम् ।
त्वद्रूपमेतन्मम रूपमेव त्वत् शक्तिरेषा मम शक्तिरेव ।। १७ ।
स्थानं मम स्थानमिहास्ति यत्ते तवैव भक्तो मम भक्त एव
तव प्रसादोऽपि मम प्रसादस्तवैव शापो मम शाप एव ।। १८ ।
न चावयोरल्पतरोऽस्ति भेदस्तेजश्च सर्वं सममावयोर्वै ।
अग्नेर्यथा काष्ठकृतो न भेदो न न्यूनतानाधिकता च सत्त्वे ।। १९ ।।
तस्मादावां महाशम्भो तिष्ठावोऽत्रैव सर्वदा ।
इत्युक्त्वा माधवो रुद्रं जगाम निजमन्दिरम् ।। २० ।।
सुवर्णेशस्य सुरभिः रूपान्तरमुपाश्रिता ।
गोष्ठे गोपस्य तत्रैव संस्थितस्य तु तिष्ठति ।। २१ ।।
गोपो जानाति तामेव मदीये सेति सर्वदा ।
गौः पुनः सा सुवर्णेशं प्रभुं नित्यं सुसेवते ।। २२ ।।

स्नापयत्येव दुग्धेन निःसृतेन निजस्तनात् ।
गुप्ता सा नित्यदा भक्त्या सुवर्णेशं मनस्विनी ।। २३ ।।
लौकिकव्यवहाराय गर्भमप्यादधाति सा ।
जनयित्वा वत्सतरीं प्रकाशयति दोहिनी ।। २४ ।।
शिवाभिषेकं कुरुते नित्यं दुग्धक्षरस्तनी ।
इदं गोपो न जानाति दधाति ममतां गवि ।। २५ ।।
गाभिः नितरामेवास्याः दोहकालो यदा भवेत् ।
नाप्नोति दुग्धं गोपोऽस्याः समाप्तं शिवसेवया ।। २६ ।।
किमेतदिति गोपालो न जानन्नपि कारणम् ।
चिन्ताकुलो बभूवासौ नहि जानाति निश्चितम् ।। २७ ।।
एकादश्यां सुवर्णेशः कृपया तस्य चित्ते वै ।
प्रेरयामास उदयं गोपं स निजदर्शने ।। २८ ।।
ततो मतिरभूद्गोपे तस्यैव परिमार्गणे ।
दुग्धं नाप्नोति यद्धेतो मृगयामास सोऽनिशम् ।। २९ ।।
एकदा स्नापयन्तीं तां स्वर्णलिङ्गोपरि स्वयम् ।
प्रस्तुतेन स्वदुग्धेन गोपालोऽपि ददर्श सः ।। ३० ।।
तदद्भुततमं मत्वा स कृतार्थोऽभवत्तदा ।
जगाम च ततो गेहं भार्यां दर्शयितुं च तत् ।। ३१ ।।
त्वरया भार्यया सार्द्धं तत्रागत्य च साद्भुतम् ।
तत्रोपविश्य तं लिङ्गं न ददर्श भयान्वितः ।। ३२ ।।
बहुचिन्ताकुलो भूत्वा गोप गोपी च भो द्विजाः ।
निराशश्च जनान् पौरान् कथयामास साद्भुतम् ।। ३३ ।।
तस्य भार्या न दृष्ट्वा तच्चिन्तया सा पुनः पुनः ।
स्वप्नकाले समादिष्टं स्वर्णलिङ्गेन शम्भुना ।। ३४ ।।

गोपालिनी समागच्छ कपोतेशस्थलीं प्रति ।
द्रष्टव्योऽहं त्वया तत्र गृहाण वचनं मम ।। ३५ ।।
आदिष्टेत्थं जगामासौ कपोतेशस्थलीं प्रति ।
भर्त्ता सह गृहं तत्र चकार नृपसत्तम ।। ३६ ।।
गोपालिनी स्वाभावेन विसस्माराखिलं च तत् ।
ईश्वरस्येच्छया व्यग्रं प्रसक्ता गृहकर्मणि ।। ३७ ।।
अथ रामोऽपि तां प्राप्य सवर्णेशस्थलीं नृप ।
स्वर्णलिङ्गेश्वरं द्रष्टुं सीतया सह लक्ष्मणः ।। ३८ ।।
तं न दृष्ट्वाऽनुतापेन रामो दशरथात्मजः ।
हिरण्यगर्भं स्मृत्वा तं परितुष्टाव शङ्करम् ।। ३९ ।।

श्रीराम उवाच

सुवर्णो भव त्वं सुवर्णस्तवेन
ततो ब्रह्ममुख्यैः सुरेन्द्रादिदेवैः ।
सुवर्णाजिनाक्ष्मा न दृश्योऽसि नाथ
सुवर्णं वपुर्मां स्वयं दर्शय त्वम् ।। ४० ।।
नमस्ते नमस्ते महादेव शम्भो
नमस्ते नमस्ते त्रिनेत्रेन्दुमौले ।
नमस्ते नमस्ते हरायेश्वराय
नमस्ते नमस्तेऽस्तु गङ्गाधराय ।। ४१ ।।
इति स्तुतः सुवर्णेशः कौशल्यानन्दनेन हि ।
तमग्रे दर्शयामास सुवर्णं लिङ्गमात्मनः ।। ४२ ।।
दृष्ट्वा दाशरथिः श्रीमान् रामः कमललोचनः ।
प्रणम्य परमं प्रीतस्तुष्टाव परमेश्वरम् ।। ४३ ।।

प्रभो महादेवो सदैव पूज्यः
समस्तदेवैरपि विष्णुतेजः ।
ब्रह्माण्डमध्ये विदितः स्वराज्य
महेश्वरः स्वास्थ्यसुखैकभाजः ।। ४४ ।।
प्रसीद मां शङ्कर चन्द्रमौले
कृशानुरेतो युतनेत्रभाले ।
वदामि नाथ प्रणतिं भवद्भ्यः
न विस्मरामि स्वमतैर्भवन्तम् ।। ४५ ।।
इति दशरथसूनुना त्रिनेत्रो
नुत उदित प्रियकृत्सुवर्णगात्रः ।
कृतनिखिलजलौघपापनाशं
प्रणययुतो जगदीश जानीहि त्वम् ।। ४६ ।।

श्रीशिव उवाच

जय जय राम जयासुरजिष्णो
जय जय माधव जय जय विष्णो ।
जय जय सहजसुगुणद कृष्ण
स्वयमिह जय जय निजसुखतृष्ण ।। ४७ ।।
श्रीराम त्वं महाविष्णुः कथं मां स्तौषि केशव ।
प्रसीद मां जगन्नाथ भक्तोऽहं ते सदा प्रभो ।। ४८ ।।
दर्शयन्मनुजां चेष्टां मां स्तौषि यदि हे प्रभो ।
ममानुग्रह एवैष त्वं वदेऽहं जयिष्यसि ।। ४९ ।।
स्वचेष्टां त्वं च जानासि यथेह त्वं करिष्यसि ।
तथा कुरु महाबाहो किमन्यत् प्रवदाम्यहम् ।। ५० ।।
उत्कटां विपदं कर्म करिष्यसि महाप्रभो ।
कीर्त्तिः स्थास्यति ते विश्वे कल्पितावधि सर्वदा ।। ५१

लीलां कर्त्तुं प्रवृत्तोऽस्मि कुरु सीतापते च ताम् ।
विडम्बयिष्यति भवान् प्रपन्नं देवतागणम् ।। ५२ ।।
शोकमोहादिकं नाथ दर्शयन्मानुषो यथा ।
दातुं वक्तुं च शक्नोमि किञ्चित्त्वां जानकीपते ।। ५३ ।।
ईश्वरस्त्वं च सर्वज्ञो यथेच्छसि तथा कुरु ।
श्रुत्वेदं जानकीनाथो रघुवंशाब्धिचन्द्रमाः ।। ५४ ।।
दिनानि कतिचित्तत्र तस्थावानन्दनिर्भरः ।
ततः प्रतस्थे कौशल्यानन्दनो नन्दवर्द्धनः ।। ५५ ।।
आगत्य स कुशस्थल्यां प्रविवेशेश्वरान्तिके ।
कुशस्थली कपोतेशः तपः सिद्धिकरा शुभा ।। ५६ ।।
तस्यां रामस्य संस्थानं श्रद्धाभूत् पृथिवीपते ।
उवास तस्मिन् श्रीरामो दिनानि कतिचिद् विभुः ।। ५७ ।।
पूजयन्मार्जतं लिङ्गं नित्यं तस्य व्रतं तु तत् ।
स कपोतेश्वरं दृष्ट्वा परमानन्दनिर्वृतः ।
तुष्टाव परया भक्त्या कृतकृत्योऽभवन्नृप ।। ५८ ।।

श्रीराम उवाच

कपोतरूपि जय चण्डिकेश
त्वं सर्वभक्तैककपोतरूपः ।
भवाब्धिदुग्धैककपोतरूपि
तवास्ति लोकेऽत्र कपोतभावः ।। ५९ ।।
त्वमत्र देशेश्वर सञ्चयैक
प्रकाशक श्यामल दिव्यलिङ्ग ।
अनेकरूपाणि तपोवलेन
करोषि पुण्यानि निजानि नाथः ।। ६० ।।

शिवा वल्लीनां बहुधोत्सवाः स्युः
नियोजय त्वं सुतपप्रभावः ।
प्रसीद नाथ स्वकृपाभरेण
त्वत्तः स्वनाथोऽस्मि नगापरेण ।। ६१ ।।
माता कपोतिर्भवति प्रिया मे
त्वया समं चात्र तपश्चकार ।
नमाम्यहं तां च नमामि तुभ्यं
भव प्रसन्नो भवतु प्रसन्ना ।। ६२ ।।

श्रीकपोतेश्वर उवाच

किमाश्चर्य्यमिदं राम स्तौषि मां त्वं स्वयं प्रभुः ।
स्तौम्यहं त्वां महाबाहो प्रसीद रघुनन्दन ।। ६३ ।।
जय त्वं जानकीनाथ जय त्वं भक्तवत्सल ।
जय दाशरथे नित्यं जय लक्ष्मणपूर्वज ।। ६४ ।।
जय स्वभक्तैकसमुद्रचन्द्र
जयोऽस्त्वघध्वान्तविनाशचन्द्र ।
जयोऽस्तु सीताब्जचकोरचन्द्र
जय प्रभो त्वं जय रामचन्द्र ।। ६५ ।।
एवं श्रुत्वा कपोतेश सस्वजे जानकीपतिम् ।
रामश्च तं परिष्वज्य तत्र स्थितो दिनानि सः ।। ६६ ।।
कृत्वा तन्निकटे लिङ्गं सुवर्णेशं स्मरन् प्रभुः ।
नित्यं सः पूजयामास श्रद्धया परया नृप ।। ६७ ।।
तत्पूर्वदिश्यां तल्लिङ्गं सौवर्णं देवमद्भुतम् ।
दिनानि कतिचिद् भूप गतान्येवं प्रकुर्वतः ।। ६८ ।।
एकदा पूजने तस्य प्रविष्टा कापि गोपिका ।
गृहीत्वा दधिभाण्डं सा दृष्ट्वा रामेण तत्र हि ।। ६९ ।।

आहूता क्रिणनार्थं सा दध्नो रामेण सादरम् ।
तस्यान्तिकं जगामाशु रामोऽपि क्रीतवान् दधि ।। ७० ।।
रामश्च सीतया सार्द्धं भार्य्यया लक्ष्मणेन च ।
कृत्यं समाप्य तत्स्थानात्सम्प्रतस्थे यदृच्छया ।। ७१ ।।
गते च रामचन्द्रे सा सीतया लक्ष्मणेन च ।
स्थित्वा लिङ्गं च सौवर्णं दृष्ट्वा लोभसमाकुला ।। ७२ ।।
दधिभाण्डेन तल्लिङ्गं समावृत्य तदर्थिना ।
जगाम त्वरया गेहं गदितुं च निजं पतिम् ।। ७३ ।।
कथयामास वृत्तान्तं तत्सर्वं कथितेन सा ।
पत्या सार्द्धं क्षणे तस्मिन् प्रविवेश च तत्र सा ।। ७४ ।।
भाण्डाल्लिङ्गं वहिष्कर्त्तुं न शशाकातियत्नतः ।
ततस्तस्याः पतिर्गोपो वहिष्कर्त्तुं ततः पुनः ।। ७५ ।।
न शशाकातिशक्तोऽपि यत्नं कृत्वा पुनः पुनः ।
ततः क्रुद्धोऽप्यसौ गोपो रज्वाकृष्य हतोद्यमः ।। ७६ ।।
ताडयामास दण्डेन भाण्डं नैव विभञ्जज तत् ।
रज्वा प्रहारचिह्नं च व्यक्तं तत्रापि वर्त्तते ।। ७७ ।।
निरस्तः स ततो गोपः प्रययौ भार्य्यया सह ।
तौ दम्पती गृहे स्थित्वा व्याकुलौ च बभुवतुः ।। ७८ ।।
ततः शिवोऽपि तां गोपीं स्वप्ने प्रत्यादिदेश ह ।

श्रीशिव उवाच

गोपालि तव भर्त्ता मे विना वृत्तं ररक्ष माम् ।
ततो ददर्श मल्लिङ्गं सौवर्णं पूर्वमेव सः ।। ७९ ।।
न दृष्ट्वा तत्र मां गोपी यतश्चिन्ताकुलाभवत् ।
ततो मदाज्ञयात्रैव निवासं चक्रतुर्युवाम् ।। ८० ।।

द्रष्टुं सुवर्णलिङ्गं मे विश्रुतं तन्मया त्वया ।
त्वया दृष्टं च मल्लिङ्गं गोप्येतन्मदनुग्रहात् ।। ८१ ।।
इदानीं प्राप्स्यथे मोक्षं मम भक्तौ युवामपि ।
दधिभाण्डेश्वरं नाम मल्लिङ्गं कथयिष्यथ ।। ८२ ।।
लोकालोके सदा लिङ्गं स्थास्यतीदं सुपुण्यदम् ।
भाण्डवृत्तमिदं यायान्मम लोकेषु चर्च्चितम् ।। ८३ ।।
न चास्ति सेवापेक्षा मे स्थानेऽस्मिन्नस्मि गोपिके ।
दधिभाण्डेश्वरः शम्भुरित्युक्त्वा गोपिकां च ताम् ।। ८४ ।।
तूष्णीं बभूव गोपी च निद्रां तत्याज तत्क्षणात् ।
ततः प्रभाते विमले साश्चर्य्यं गोपनायिका ।। ८५ ।।
कथयामास भर्त्तारमिदं वार्त्ता च मानवान् ।
आयुष्यान्ते ततस्तौ तु प्रापतुर्मोक्षमव्ययम् ।। ८६ ।।
य इदं शृणुयाल्लोकः स सुवर्णेश्वरस्य वै ।
दधिभाण्डेश्वरस्य तच्चरितं परमाद्भुतम् ।। ८७ ।।
सर्वपापविनिर्मुक्तो मोक्षं प्राप्स्यति शाश्वतम् ।। ८८ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे दधिभाण्डेश्वरोत्पत्तिर्नाम त्रयोविंशोऽध्यायः ।।

चतुर्विंशोऽध्यायः

वाराहीपीठकथनम्

इन्द्रद्युम्न उवाच

कथयस्व महाभाग कपोतेश्वरशूलिनः ।
माहात्म्यं कीदृशं तत्र श्रोतुमिच्छामि तत्त्वतः ।। १

नारद उवाच

कपोतेश्वरः पूर्वं च चकार परमं तपः ।
विष्णुतुल्यं स्वपूजार्थं तत्सीमायां च सर्वतः ।। २ ।।
सिद्धे तपसि तस्येदं नीलाद्रीशः स माधवः ।
स्वीचक्रे निजसीमायां स्वतुल्यार्च्चनमन्वसौ ।। ३ ।।
उवाच माधवस्तं च सुप्रसन्नः पुनः पुनः ।
कपोतेशावयोर्नास्ति भेदः पूजनकर्मणि ।। ४ ।।
पूजयिष्यन्ति ये त्वां वै पूजयिष्यन्ति तेऽपि माम् ।
माघमासे तु सम्प्राप्ते भविष्यति तवोत्सवः ।। ५ ।।
काश्यां विश्वेश्वरः शम्भुरायास्यति तवान्तिकम् ।
मद्दर्शनार्थं च पुनः स महान् भुवनेश्वरः ।। ६ ।।
शम्भवस्तत्र सर्वस्मादायास्यन्ति तवान्तिकम् ।
जनास्तत्रोत्सवं द्रष्टुमायास्यन्ति तवान्तिकम् ।। ७ ।।
ये पश्यन्ति जना माघे मासि त्वां चन्द्रशेखर ।
कपोतेश्वरनामानं न तेषां भवजं भयम् ।। ८ ।।
ममैवानुग्रहस्तेषु भविष्यति न संशयः ।
आयास्यन्ति च मां द्रष्टुं ये जनाः पुरुषोत्तमे ।। ९ ।।
त्वां दृष्ट्वा पथि तत्रैव नमस्कृत्य च सादरम् ।
नायास्यन्ति च ये तेषां विफलं मम दर्शनम् ।। १० ।।
आज्ञां देहि महाशम्भो श्रीकपोतेश्वर प्रभो ।
अविघ्नं सफलं मेऽस्तु नीलाद्रीशस्य दर्शनम् ।। ११ ।।
इति सम्प्रार्थ्य ये भक्त्या गमिष्यन्ति मदन्तिकम् ।
मद्दर्शनं च तेषां हि द्विगुणं सम्भविष्यति ।। १२ ।।
बहून्यपि च लिङ्गानि मत्सीमायां समन्ततः ।
भविष्यन्त्युत्सवास्तेषां बहवो मत्समास्त्विह ।। १३ ।।

मत्समानार्च्चनां प्राप्तुं तपस्तप्तं त्वयेश्वर ।
यतस्ततो भविष्यन्ति बहवस्ते विभूतयः ।। १४ ।।
पर्य्यन्तभूमिषु मम लिङ्गरूपैरनेकधा ।
मत्समानार्च्चनास्तेषां भविष्यन्ति न संशयः ।। १५ ।।
इति तस्मै वरं दत्वा नीलाद्रिं माधवे गते ।
कपोतेशस्तथा चक्रे लिङ्गानि सुबहून्यपि ।। १६ ।।
नीलशैलस्य सीमायां सर्वतः स्यात् शिवोत्सवः ।
नीलाद्रेः पश्चिमे भागे वालुकेश्वर नामधृक् ।। १७ ।।
जनानां कामनासिद्धिं कपोतेशः करोति वै ।
वरालये शुभे स्थाने वालुकेश्वरनामकः ।। १८ ।।
महामहिमसम्पन्नः प्रादुर्भवत्यहर्निशम् ।
जनानां कामदः शम्भुः प्रकटीभावमाययौ ।। १९ ।।
स्थानद्वये कपोतेशस्तस्मिन्नपि विशेषतः ।
पूजां गृह्णाति लोकेभ्यस्तेभ्यः कामं ददाति च ।। २० ।।
ये सन्ति शम्भवः सर्वे स्वसीमायां समन्ततः ।
पूजां गृह्णन्ति लोकेभ्यस्तेभ्यः कामं ददत्यपि ।। २१ ।।

इन्द्रद्युम्न उवाच

कथितं भो मुनिश्रेष्ठ कपोतेशस्य शूलिनः ।
माहात्म्यं पुनराचक्ष कपोतेशा च पार्वती ।। २२ ।।
तस्यान्तिके तपश्चक्रे तस्यास्तु परमोत्सवम् ।
याभ्यां तप्तं महाघोरं तपः परमदुष्करम् ।। २३ ।।
यतः शुष्कतमौ देवौ कपोतोभौ बभूवतुः ।
पीठस्तस्यास्तु सिद्धो यः सर्वकामफलप्रदः ।। २४ ।।

श्रीनारद उवाच

कपोतेशे वरं प्राप्ते कपोतेशा च पार्वती ।
माधवस्य पुरो गत्वा नमश्चक्रे कृताञ्जलिः ।। २५ ।।
तां दृष्ट्वा माधवस्तुष्ट उवाच मधुरं वचः ।
पत्या सार्द्धं महादेवी चकार परमं तपः ।। २६ ।।
तत्प्रसादात्त्वमेवात्र वरं प्राप्नुहि शाश्वतम् ।
भार्गवीया नदी देवि मत्क्षेत्रपथि वर्त्तते ।। २७ ।।
कुण्डं तत्र महानिम्नमापातालपुरं प्रति ।
वर्त्तते तत्पुरा वै यो हिरण्याक्षो महासुरः ।। २८ ।।
गृहीत्वा मेदिनीं तस्मिन् सवेदां प्रविवेश ह ।
तिरोभूत्वा जगामासौ पातालभुवनं प्रति ।। २९ ।।
ज्ञात्वा हि सत्यकर्मेतन्मनसैवातुरेण च ।
वाराहं रूपमाश्रित्य त्वरया तत्र चाविशम् ।। ३० ।।
अनुगत्वासुरं तं वै पाताले प्राविशमहम् ।
आच्छिद्य पृथिवीं तस्माद्धृत्वा दंष्ट्राग्र एव हि ।। ३१ ।।
निहत्य तं महादुष्टमुत्तस्थौ तत एव हि ।
शक्तिस्त्वं चैव मे देवि साम्प्रतं चकृषे तपः ।। ३२ ।।
दुश्चरं यत्ततो पूजां प्राप्स्यसि त्वं सुदुर्लभाम् ।
अत्र कुण्डे स्थलं कृत्वा भूत्वा वाराहरूपिणी ।। ३३ ।।
पातालं मार्गमारुध्य तिष्ठ त्वं परमेश्वरि ।
सिद्धपीठमिदं तेऽस्तु साधकानां च सिद्धिदम् ।। ३४ ।।
सपुरश्चरणं येऽत्र करिष्यन्ति जगज्जनाः ।
तर्पणं चैव होमं च तेषां पापं च छेत्स्यसि ।। ३५ ।।
महापूजां करिष्यन्ति लोकास्ते परमेश्वरि ।
मत्पार्श्वे स्थास्यसि सदा क्षेत्रे श्रीपुरुषोत्तमे ।। ३६ ।।

कपोतीशा च तत्रास्ति वाराही शक्तिरूपधृक् ।
नीलाद्रिनाथं च हरिं द्रष्टुमागच्छतां नृणाम् ।। ३७ ।।
नदी सा भार्गवी वृद्धा यदि स्यात् प्रतिवर्द्धनी ।
तस्याः सन्तारिणी देवि भविष्यसि नृणामपि ।। ३८ ।।
अभिलोकान्ननु तदा मां वराहस्वरूपिणम् ।
स्मरिष्यसि नौस्थानां मज्जनानां प्रसन्नानने ।। ३९ ।।
सा वाराही नृपश्रेष्ठ प्रसिद्धा चोत्कले शिवा ।
सापि कन्दर्पदा नाम कुमारी रूपधारिणी ।। ४० ।।
भार्गव्या नीलशैलस्य मध्ये तिष्ठति सर्वदा ।
घोटकारोहणक्रीडां क्षुद्रामस्फोटनां नृप ।। ४१ ।।
स्तोकानि वंशपात्राणि खेलनायाभिकाङ्क्षति ।
कन्दर्पतुल्यभर्त्तारं नारी च मनसेच्छति ।। ४२ ।।
तत्रोपविश्य सा नारी नमस्कृत्याशु गच्छति ।
यां यां कामयते यद्यदभीष्टं मानुषे भुवि ।। ४३ ।।
तस्याः प्रसादादाप्नोति कल्पयित्वा च घोटकम् ।
क्षुद्रसूर्पं तथा स्तोकवंशपत्रास्य चालिनीम् ।। ४४ ।।
याचितोऽसि किमेतस्या घोटकस्तस्य तुष्टदः ।
ऐशान्यां दिशि वाराह्याः पादमात्रे निजस्थलात् ।। ४५ ।।
कालिकारूपिणी साक्षाद् वाराही वर्त्तते सदा ।
वाराह्याः पश्चिमे देशे क्रोशमात्रेऽस्ति पाटला ।। ४६ ।।
ख्याता सिद्धिप्रदा देवी सर्वसिद्धिप्रदायिनी ।
कौवेर्य्यां चासि वाराह्याः स्वस्याः क्रोशे च सिद्धिदा ।। ४७ ।।
हरिचण्डीति नाम्नेयं चण्डेश्वरशिवप्रिया ।
वाराह्या उत्तरे भागे सार्द्धक्रोशेऽस्ति चण्डिका ।। ४८ ।।

तस्याः नाम महामाया महादुर्गतिनाशिनी ।
पुरा कालक्षये काले जगदेकार्णवीकृते ।। ४९ ।।
सुस्वाप शेषशय्यायां योगनिद्रायुतो हरिः ।
प्रलयान्तेऽजनि ब्रह्मा विष्णोर्नाभिसरोरुहात् ।। ५० ।।
तत्काले तस्य कर्णाभ्यां संजज्ञे चासुरद्वयम् ।
मधुकैटभ नामानौ ब्रह्माणमशितुं च तौ ।। ५१ ।।
बभुवतुर्धावमानौ महावलपराक्रमौ ।
ततो भयाकुलो ब्रह्मा विष्णुनिद्रास्वरूपिणी ।। ५२ ।।
तुष्टाव योगनिद्रां तां स्तुतिभिः परमेश्वरीम् ।। ५३ ।।

श्रीब्रह्मोवाच

नमो नमस्ते जगदेकधात्री
सदाशिवस्य प्रणयैकपात्री ।
समस्तरक्षो व्यवसायकर्त्री
विद्याप्रभा दारुणकालरात्रीः ।। ५४ ।।
स्वर्गापवर्गैकसुखप्रदात्री
ब्रह्माच्युतेशेन्द्रनुतैकपात्रीः ।
सृष्टिस्थितिसम्हरणं विधात्री
नमोऽस्तु ते दानवमोहरात्रीः ।। ५५ ।।
वरान्वये त्वं हि स्वरूपपात्री
हिमालये भूतपवित्रमूर्त्तिः ।
आर्त्तिभीनिर्वापनसम्विधात्री
दयार्द्रदृष्टिः क्षणपापहन्त्री ।। ५६ ।।
सिंहोपरि प्राक्रमकर्मशीले
दुष्टौघनाशाय रणैकलीले ।
शङ्खाद्यलङ्कारकरप्रवाले
नमोऽर्द्धचन्द्राङ्कितचारुभाले ।। ५७ ।।

महामाये नमस्तुभ्यं योगनिद्राहरोरसि ।
विष्णुदेहाद्विनिष्क्रम्य तेन त्वं मारयासुरान् ।। ५८ ।।
इति स्तुता महामाया ब्रह्मणा परमेश्वरी ।
त्वया विबोधितो क्षिप्रं समुत्तस्थौ जनार्द्दनः ।। ५९ ।।
दृष्ट्वा महासुरौ तौ च ब्रह्मग्रासे समुद्यतौ ।
युयुधे सह ताभ्यां च वर्षाणि स बहून्यपि ।।.६० ।।
यदा न शक्तासौ हन्तुं स्वीयशक्त्या तदुत्तमौ ।
छलेन मोहयामास विनयाद्योगमायया ।। ६१ ।।
उचतुरसुरौ तौ तं मारय वामिति प्रभो ।
जलेऽपि न स्थले विष्णोर्न वां मारय केवलम् ।। ६२ ।
तच्छ्रुत्वा उन्मुखाद् विष्णुर्न दृष्ट्वा तत्र स स्थलम् ।
मारयामास तौ मूढौ निजजङ्घोपरि क्षणात् ।। ६३ ।।
तत्स्थलं चास्ति तत्रैव महामायेति विश्रुता ।
उत्कले नृपशार्द्दूल सर्वलोकार्त्तिनाशिनी ।। ६४ ।।
तत्स्तवं तत्र ये तस्याः कुर्वन्ति मनुजा भुवि ।
वलिपुष्पादिना दुर्गां वाञ्छितं प्राप्नुवन्ति ते ।। ६५ ।।
राजा भवति यस्तत्र महापूजाविधानतः ।
पूजयित्वा हि तामेव न च दुःखं समेष्यति ।। ६६ ।।
भगिन्यः सप्त विख्यातास्तासां नामानि संशृणु ।
आद्या च मौलिनी ख्याता लालिनी पाठगञ्जिनी ।। ६७
जाग्रती त्रिजटी कुब्जा षष्ठी देवी च सप्तमी ।
अपरा च महामाया शृणु राजर्षिसत्तम ।। ६८ ।।
प्राचीनद्याः समीपेऽस्ति काकटी नाम मङ्गला ।
विख्याता सर्वदा देवी सर्वत्र क्षितिमण्डले ।। ६९ ।।

तस्या पीठं सदा सिद्धं साधकानां फलप्रदम् ।
क्रोशमात्रं तु तत् क्षेत्रं शरणाददतिपुण्यदम् ।। ७० ।।
तत्सर्वं तु महास्तोत्रं देव्या यदुचितं भवेत् ।
सर्वं तत्र भवेदेव किमन्यत् कथयामि ते ।।
मूलस्थानं तु देवीनां तद्भवत्येव निश्चितम् ।। ७१ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे वाराहीपीठकथनं नाम चतुर्विंशोऽध्यायः ।।

पञ्चविंशोऽध्यायः

सिद्धबलरामप्रसङ्गः

इन्द्रद्युम्न उवाच

पुनः कथय देवर्षे नीलाद्रौ माधवस्य तु ।
स्थानमेकं प्रसिद्धं तदस्ति पुण्यप्रदं किमु ।। १ ।।
दारुब्रह्मस्वरूपस्य नित्यनीलाचलस्थितः ।
सत्यं भवेत् किमन्यद् वा भवेद् यत्तद् वदस्व मे ।। २ ।।

नारद उवाच

शृणुस्व नृपतिश्रेष्ठ स्थानं यन्नीलपर्वतात् ।
अन्यद् यद् यद् भवेत्तत्र सर्वं प्रतियुगं त्विह ।। ३ ।।
दारुब्रह्मस्वरूपस्य हरेस्त्वं प्रथमं शृणु ।
श्रोतव्यं भवता पश्चान्माधवस्यान्यकं पदम् ।। ४ ।।
बलभद्र हरेर्भ्राता सङ्गेऽस्ति भगिनीयुता ।
श्रद्धा जाताल्पदूरेऽस्य स्थाने स्थातुं क्षणेऽन्यचित् ।। ५ ।

शृणु राजन्निजस्थानादन्यस्थानस्य कल्पना ।
सत्ययुगे च लोकानां पादः पतति यादृशे ।। ६ ।।
दूरे स्वगमने तादृक् दूरं च स्यात्कलौ युगे ।
नलिकाया विनिष्क्रम्य गुलिर्याति च यादृशम् ।। ७ ।।
तदष्टविंशति गुणं तावद्दूरं ततश्च यत् ।
परस्थानं तु तज्ज्ञेयमन्यस्थानं बुधैरिह ।। ८ ।।
यत्र स्थाने स्थितस्यैव स्फुटा भाषा न बुद्ध्यते ।
स्थानमद्भुतमेकं च प्रसङ्गान्तरसिद्धये ।। ९ ।।
ये प्रसङ्गान्तरं कर्त्तुमिच्छन्ति मनुजा भुवि ।
कुर्वन्ति तावद्धि स्थानं तपोनिष्ठं त्वचेष्टितम् ।। १० ।।
बलभद्रस्तु नीलाद्रौ जगन्नाथान्तिके स्थितः ।
स्थानान्तरे तन्निकटे प्रसङ्गं कर्त्तुमात्मनः ।। ११ ।।
मनश्चक्रे यतस्तस्मात् पश्चिमे नीलपर्वतात् ।
पादात्पादाभिपतनादष्टाविंशतिसङ्ख्यकात् ।। १२ ।।
परे स्थाने निजस्थानं कृत्वा तत्रापि तिष्ठति ।
पुरा कलियुगे विप्रो बलरामाभिधः स्थितः ।। १३ ।।
बलभद्रपदे तस्मिन् संपुटे सिद्ध उत्तमे ।
निवसन् वेश्म कृत्वाऽसौ ब्राह्मणो वैष्णवः शुचिः ।। १४ ।।
करोति दर्शनं नित्यं नीलाद्रौ दारुरूपिणम् ।
विष्णुं न पश्यति यस्मिन् दिने श्रीपुरुषोत्तमे ।। १५ ।।
नान्नं खादति तस्यैवं निश्चितं व्रतमेव हि ।
कदाचिच्छ्रावणे मासि वर्षाभिरतिदुर्द्दिने ।। १६ ।।
आगत्य भार्गवीतीरं दृष्ट्वा वृद्धां महत्तमाम् ।
तां तस्यास्तत्कूले स्थित्वा चिन्तया व्याकुलोऽभवत् ।। १७ ।।

अप्राप्तनौस्तदास्तोक नदीवेगेन विस्मितः ।
वर्षाभिर्वातवेगेन नदीवेगेन एव हि ।। १८ ।। ।
मग्नान्याकम्पता काचिद्भग्नोभून्न च विद्रुता ।
तादृशे दुर्दिने घोरे नहि तर्त्तुं क्षमो नदीम् ।। १९ ।।
बलरामाह्वयो विप्रस्तस्थौ तत्रैव दुःखितः ।
नायं विनिवृत्तो धीरो न दृष्ट्वा पुरुषोत्तमम् ।। २० ।।
एवं तत्र स्थिते तस्मिन् रात्रिरागतवत्यपि ।
अतिदुःखेन तस्यापि गतं च प्रहरं द्वयम् ।। २१ ।।
प्राणमात्रावशिष्टोऽसौ विप्रो मोहनमूर्च्छितः ।
क्षणे वार्द्धक्षणे वापि प्राणांस्त्यक्तुं तदाभवत् ।। २२ ।।
नीलाद्रीशं स्तुतिं कृत्वा सर्वज्ञः सदयो हरिः ।
क्षणमात्रेण तत्पार्श्वे प्रादुरासीन्महाप्रभुः ।। २३ ।।
तमाह विप्र! त्वद्भक्तिर्जाता मयि दृढेति च ।
तत्तिष्ठ पश्य मां वत्स त्वदग्रस्थितमच्युतम् ।। २४ ।।
तच्छ्रुत्वा तद्विजो भूपा! मोहं त्यक्त्वाऽपतत्क्षणात् ।
उत्थाय ददृशे चाग्रे नीलशैलेश्वरं हरिम् ।। २५ ।।
दृष्ट्वा च परमानन्दोऽभवत्तत्र स्थितश्च वै ।
महावृष्टिर्विनिवृत्तो महावातश्च तत्क्षणात् ।। २६ ।।
चन्द्रोदयोऽभवत्तस्मिन् क्षणे तत्रैव भूपते ।
स कृतार्थोऽभवद्विप्रोऽमृतं पीत्वेव पार्थिव ।। २७ ।।
प्रणिपत्य जगन्नाथं दण्डवत्स पुनः पुनः ।
तुष्टाव प्राञ्जलिर्भूत्वा परमानन्दनिर्भरः ।। २८ ।।

विप्र उवाच

नमोऽस्तुते नीलगिरीन्द्रवासिने
कृपाम्बुराशे नृमृगेन्द्रभासिने ।
परो मम प्रेमसुखैकराशये
प्रभो सतां मोक्षपदप्रकाशिने ।। २९ ।।

रमापतिर्दारुतनो मुरारे
असारसंसारमहान्धकारे ।
मार्गं च मे दर्शय केलिसारे
प्रवर्त्तय त्वद्भजनप्रकारे ।। ३० ।।
नमोऽस्तुते पापतमोघचन्द्र
नमोऽस्तुते साधुसमुद्रचन्द्र ।
पद्मालयादृष्टिचकोरचन्द्र
नमोऽस्तु तेऽत्योघसरोजचन्द्र ।। ३१ ।।
प्रसीद नाथार्त्तिजनैकबन्धो
दीनावलम्बिनन् करुणैकसिन्धो ।
कृतार्त्तिरक्षार्थकरप्रसार
मां रक्ष विष्णो भुवनैकसार ।। ३२ ।।
एवं स्तुतः स विप्रेण कमलाप्राणवल्लभः ।
हसन् कृपार्द्रनयनः प्रसन्नात्मा द्विजं प्रतिम् ।। ३३ ।।

श्रीभगवान् उवाच

दृष्ट्वा भक्तिं दृढां विप्र मयि ते दुर्लभा भुवि ।
अस्मिन् यद्दुर्द्दिने घोरे मां द्रष्टुं पुरुषोत्तमम् ।। ३४ ।।
गन्तुं प्रवृत्तो घोरेऽस्मिन् न निवृत्तो गृहं प्रति ।
अन्धकारे महाघोरे वातवर्षाभिराकुले ।। ३५ ।।
निरपेक्षात्मनः प्राणान् तिष्ठस्यत्रैव निर्भयः ।
प्रीतोऽहं च तवेदानीं भक्त्या दुर्लभया नृणाम् ।। ३६ ।।
भक्तस्त्वमेव लोकेषु त्रिषु वैकुण्ठ एव मे ।
स्थातुमिच्छा भवेद्यस्मिन् लोके वा मत्पदेऽपि वा ।। ३७ ।।
तत्र त्वं स्थास्यसि सदा मम भक्तपुरस्कृतः ।
न भयस्ते यमादस्ति कालादपि च दुर्ग्रहात् ।। ३८ ।।

मां द्रष्टुमागतोऽत्र त्वं बहुक्लेशसमन्वभूः ।
अत ऊर्ध्वं द्विजश्रेष्ठ क्लेशं नानुभविष्यसि ।। ३९ ।।
तव वाट्यां द्विजश्रेष्ठ नारीकेलद्रुमान्तिके ।
पदाक्रमणदूरेऽस्ति दृष्ट्वा विंशतिसङ्ख्यके ।। ४० ।।
वल्मीकस्तस्य पूर्वे यत्सुगुप्तं स्थानमुत्तमम् ।
तत्रास्ति बलरामो मे ज्येष्ठभ्रातातिदुर्ल्लभः ।। ४१ ।।
अहं तत्र गमिष्यामि भगिन्या सह भद्रया ।
द्रष्टव्याश्च वयं तत्र त्वया भक्ततमोत्तम ।। ४२ ।।
अस्माकं दर्शने क्लेशो दिनादस्माद् द्विजोत्तम ।
न भविष्यति ते विप्र वयमेते वशीकृताः ।। ४३ ।।
पदाक्रमणदूरे चाप्यष्टाविंशतिसङ्ख्यके ।
नीलाद्रेरुत्तरे स्थानं त्वद्भवेदपि निश्चितम् ।। ४४ ।।
बलरामो निजस्थानं कृत्वा तस्थौ तदुत्तमम् ।
भगिन्या सह तत्राहं स्थास्याम्यहमतः परम् ।। ४५ ।।
उपरोधे न भवति त्वय्यास्माकमनुग्रहः ।
अस्माकं त्रीणि लिङ्गानि तत्र द्रक्ष्यसि भो द्विज ।। ४६ ।।
एकं कैलाशधबलमेकं माणिक्यसन्निभम् ।
एकं नीलोत्पलश्यामं तेषां चिह्नानि संशृणु ।। ४७ ।।
एकोपरि फणासप्त सिन्दूरमपरोपरि ।
वनमालापरस्याङ्गे श्रीवत्सकौस्तुभस्तथा ।। ४८ ।।
त्वं परं द्रक्ष्यसि च तन्नान्यं सन्दर्शयिष्यति ।
सङ्गोप्य तानि लिङ्गानि मूर्त्तिभिस्त्रिमूर्त्तिस्त्वया ।। ४९ ।।
विख्यातापि द्विजश्रेष्ठस्तिस्रस्तेषां च मूर्त्तयः ।
इत्युक्त्वान्तर्दधे श्रीशस्तत्क्षणादेव तत्र हि ।। ५० ।।

रात्रिर्गता समाप्तिं च साश्चर्य्योऽभूद्द्विजोऽपि सः ।
आगत्य स्वगृहं राजन्-वाटिकां गतवान् द्रुतम् ।। ५१ ।।
दृष्टवान् तानि लिङ्गानि यथोक्तानि च विष्णुना ।
तथा दृष्ट्वा कृतार्थोऽभूत् परमानन्दनिर्वृतः ।। ५२ ।।
दृष्टप्रायाणि लिङ्गानि स्वकुटुम्बैर्यदा तदा ।
मूर्त्तिभिस्तिसृभिस्तानि स्थापयामास सोऽचिरम् ।। ५३ ।।
ततः सुशोभनं कृत्वा मण्डपं द्विजसत्तमः ।
नित्यं सम्पूजयामास सम्भवैः शक्तिसम्भवैः ।। ५४ ।।
तद्दिनावधि तत्रैव क्षेत्रे श्रीपुरुषोत्तमे ।
यथा पूजाविधिस्तत्र यात्रा चोत्सव एव च ।। ५५ ।।
तथा भवदिदं सर्वं नियुक्ताः सेवकास्तथा ।
चोत्कले त्वपरं तेषां गुण्डिचा तत्र नाभवत् ।। ५६ ।।
इदं ते कथितं सर्वं यत्पृष्टं नृपसत्तम ।
शृणु स्थानान्तरं यथाभून्माधवस्य सुव्रत ।। ५७ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे श्रीसिद्धबलरामप्रसङ्गो नाम पञ्चविंशोऽध्यायः ।।

षड्विंशोऽध्यायः

श्रीनीलमाधवमाहात्म्यम्

नारद उवाच

प्रसङ्गान्माधवस्यापि पुरावृत्तं शृणुष्व भो ।
पूर्वं त्वयापि यत्पृष्टं सर्वं तत्कथयाम्यहम् ।। १ ।।

अन्तर्हिते पुरा विष्णुर्माधवे भगवान् स्वयम् ।
स गुप्तो नीलशैलस्य चतुःक्रोशे तु पश्चिमे ।। २ ।।
स्वप्रेरितेन हृदयेऽलाल्यनाम्ना द्विजेन च ।
कृतो माधवरूपोऽसौ प्रकाशे च तदालये ।। ३ ।।
स द्वितीयपरार्द्धेऽपि लाल्यो हि न भवेज्जनैः ।
तदा लाल्योऽभवन्नाम्ना ब्राह्मणेन कृतोऽप्यभूत् ।। ४ ।।
चतुर्भुजः शङ्खचक्रगदापद्मकरो हरिः ।
किरीटकुण्डलो नाथः श्रीवत्सकौस्तुभस्तथा ।। ५ ।।
वनमाला किङ्किणी च कटीसूत्रं च नूपुरम् ।
किरीट्योपरि चूलेन राजमानोऽतिमञ्जुलः ।। ६ ।।
नीलोत्पलश्यामलाङ्गो नीलपद्मो ध्वजाङ्कितः ।
स्मितः प्रसन्नवदनो माधवः करुणानिधिः ।। ७ ।।
पूज्यमानो गृहे नित्यं ब्राह्मणेन भवत्यपि ।
पायसेनापि सन्तुष्टो नैवेद्येनाभवद्यदि ।। ८ ।।
एकदा स ज्वराधिक्यात् ब्राह्मणो पूजनेऽक्षमः ।
पायसं कारयित्वापि सुपक्कं निजभार्य्यया ।। ९ ।।
तदग्रे स्थापयामास भार्यां निष्कासयंस्ततः ।
स्वपुत्रमव्रतं विप्रं पञ्चवर्षं च वालकम् ।। १० ।।
उवाच गच्छ वत्स त्वं माधवस्यान्तिकं प्रभोः ।
कपाटेन चतुर्द्वारं च्छादयित्वा ततः स्वयम् ।। ११ ।।
प्रणम्य दण्डवद्वत्स माधवं तोषय प्रभुम् ।
इत्युक्तो माधवस्तेन तत्तथैव चकार सः ।। १२ ।।
तस्याग्रे माधवो भुङ्क्ते निजरूपं प्रदर्शयन् ।
फेटयित्वा कवाटं स प्रययौ पितुरन्तिकम् ।। १३ ।।

सुतं दृष्ट्वा पिता भार्य्यामुवाच श्लक्ष्मया गिरा ।
आनीयतां च निर्माल्यं विभज्यास्मै प्रदीयताम् ।। १४ ।।
विभज्य सर्वैर्भोक्तव्यं कुटुम्बैः पायसं तु तत् ।
इत्युक्त्वा तेन सा भार्या ययावानेतुमुत्सुका ।। १५ ।।
न ददर्श च सा भाण्डे किञ्चित्तत्रास्ति पायसम् ।
त्वरयागत्य साश्चर्यमुत्तरं प्रत्युवाच ह ।। १६ ।।
न भाण्डे पायसं स्वामिन् किञ्चिदस्तीक्षितं मया ।
तच्छ्रुत्वा स सुतं विप्र आजुहाव त्वरान्वितः ।। १७ ।।
पप्रच्छ तं सुतं नास्ति पायसं क्व गतं वद ।
इत्युक्तः स सुतः क्रुद्धं पितरं प्रत्युवाच ह ।। १८ ।।
माधवार्थं कृतं यत्तु तेन लुब्धोऽसि भोः कथम् ।
पितोवाच पुनस्तं तु माधवार्थं कृतं तु यत् ।। १९ ।।
निर्माल्यं क्व गतं कस्मात्कथय त्वं ममाग्रतः ।
उवाच पुत्रो निर्माल्यं त्वं कथं परिपृच्छसि ।। २० ।।
तत्रस्थं पायसं भुक्तं निःशेषं माधवेन हि ।
पिता साश्चर्य्यं दृष्ट्वा च सुतस्य जठरं मुखम् ।। २१ ।।
तस्य तद्भक्षणे शक्तिर्नैव सम्भावितं स्वयम् ।
पप्रच्छ तमरे वाल त्वया दृष्टः स माधवः ।। २२ ।।
एवमेतदशेषेण सत्यं पित्रे स चाब्रवीत् ।
हृदि कृत्य परीक्षार्थं दिनं तृष्णी निनाय सः ।। २३ ।।
परेऽह्नि च तथा पुत्रं योजयामास पूजने ।
पूजाकाले कपाटस्य रन्ध्रेणापि ददर्श सः ।। २४ ।।
तत्क्षणान्न च दृष्टोऽसौ माधवोऽन्तर्हितोऽपि सः ।
आहूय फेटयित्वा तत्कपाटं द्विजसत्तमः ।। २५ ।।

परमानन्दनिवृत्तः कृतार्थोऽभूच्च तत्क्षणात् ।
प्रणम्य वालकं पुण्यं प्रणिपत्य च माधवम् ।। २६ ।।
सानन्दाश्रुः सरोमश्च तुष्टाव परमेश्वरम् ।। २७ ।।

द्विज उवाच

नमोऽस्तु ते सुन्दरमाधवाय ब्रह्मेन्द्रदेवादिभिरर्च्चिताय ।
अनुग्रहो यत्तव वालके मे ग्राह्येकभक्तिर्न तु साधनानि ।। २८ ।।
संभारभारैर्निखिलैश्च यज्ञैः प्रभो निवेद्योसि समाधियोगैः ।
पञ्चाब्दबाले यदनुग्रहस्ते किं वर्ण्यते ते महिमा मुरारे ।। २९ ।।
नमोऽब्जनेत्राय किरीटिने ते सकुण्डलाय स्मितसुन्दराय ।
सशङ्खचक्राय करैश्चतुर्भिः कौमोदकीपद्मविराजिताय ।। ३० ।।
श्रीवत्सिने कौस्तुभिने नमस्ते सकङ्कणायापि सुमेखलाय ।
पीताम्बरायाम्बुधिजावराय कृपानिधे मञ्जुलनूपुराय ।। ३१ ।।
भाग्यानि मम वंशस्य किं वर्ण्यते महाप्रभो ।
मत्सम्बन्धिजनानां ते न सन्ति भाग्यराशयः ।। ३२ ।।
माधवाय नमस्तुभ्यं नमस्ते सुखदाय च ।
श्रीवासाय नमस्तुभ्यं नमस्ते माजिताय च ।। ३३ ।।
एवं स्तुतो द्विजेनैव माधवस्तमुवाच ह ।
तस्यामेव तनौ भूप मनुष्य वचनेन सः ।। ३४ ।।

माधव उवाच

भक्तोऽसि मम भो विप्र ब्राह्मणेषु त्वमेव हि ।
नास्ति तु पूजनं लोकैर्लोकेऽस्मिन् माधवस्य मे ।। ३५ ।।
लोकाख्ययात् तवाप्ताहं त्यक्त्वा नीलाचलं द्विज ।
त्वद्गृहेऽस्मिन् वसन् गुप्तः सुगुप्तः कुरु मां सदा ।। ३६ ।।
अनुग्रहः मया जतोयि ज्ञानतोऽपि त्वया द्विज ।
पञ्चाब्दो बालको सोऽभूत्त्वदीयत्वाच्च तत्र वै ।। ३७ ।।

प्रलये मम लोके त्वं स्थास्यसि द्विजसत्तम ।
सृष्टौ च स्थास्यसि तथा माधवस्य समान्तिके ।। ३८ ।।
अजरामर एव त्वं सपुत्रः सह भार्य्यया ।
परमानन्द निवृत्तो भविष्यसि न संशयः ।। ३९ ।।
अतः पञ्चदशक्रोशे प्राचीनद्यास्तटे द्विज ।
नेयाल नामके स्थाने तिष्ठामि द्विजसत्तम ।। ४० ।।
यथा नीलगिरौ यात्रा भवन्ति मम सर्वदा ।
तथा तत्रैव ताः सर्वाः भविष्यन्ति न संशयः ।। ४१ ।।
तत्स्थानं मम यादृक् च तादृक् च तव तद्भवेत् ।
तदीया ब्राह्मणा सर्वे तत्र ये निवसन्त्यपि ।। ४२ ।।
तेषां श्रद्धा भवत्येव सर्वदा मम पूजने ।
ततोऽष्टाविंशतिक्रोशे पश्चिमे द्विजसत्तम ।। ४३ ।।
दक्षिणस्यां महानद्यां मणिनागोत्तरे तथा ।
तत्र मध्ये वसाम्येव माधवोऽहं सदा द्विज ।। ४४ ।।
मदीयं माघमासेऽपि कारयामि महोत्सवम् ।
ये द्रक्ष्यन्ति जनास्तत्र मां शुक्लैकादशी दिने ।। ४५ ।।
माघे स्नात्वा महानद्यां ते यास्यन्ति मदन्तिकम् ।
तस्माद् गत्वा दारुरूपो स्थास्यामि नीलपर्वते ।। ४६ ।।

नारद उवाच

तत्र मे तन्मया राजन् चरितं माधवस्य तु ।
तच्छ्रुत्वा च कृतार्थाः स्युः सत्यलोकेऽखिला जनाः ।। ४७ ।।
माधवस्य तु तत्स्थानं सुपुण्यमतिमञ्जुलम् ।
गिरिब्रह्मगिरिर्नाम वनं घनमनुत्तमम् ।। ४८ ।।
रमणीयं तु तं दृष्ट्वा हनुमानस्ति तत्र वै ।
चिरञ्जीवी रामभक्तः कल्पान्तो मनु सर्वदा ।। ४९ ।।

शृणु राजन् पुरा वृत्तमयोध्यायां रघूत्तमः ।
यदा निजपदं गन्तुं मनश्चक्रे स्वयं प्रभुः ।। ५० ।।
तेन सार्द्धं तु तद्गन्तुं हनुमानुत्सुकोऽभवत् ।
निवर्त्तयामास तदा रामस्तं भक्तवत्सलः ।। ५१ ।।
ततः स दुःखितो भूत्वा हनुमान् तापसङ्कुलः ।
तुष्टाव तं नृप प्रेम्णा रामं विच्छेदकातरः ।। ५२ ।।

हनुमान् उवाच

नमोऽस्तु रामचन्द्राय रामभद्राय ते नमः ।
रामाय दाशरथये कौशल्यानन्दनाय च ।। ५३ ।।
सीतापते लक्ष्मणपूर्वजन्मन्
कोदण्डधारि करुणानिधान ।
प्रेमप्रहृष्य भरतैकबन्धो
सभ्रातृशत्रुघ्न कृपैकसिन्धो ।। ५४ ।।
पित्राज्ञया त्यक्तनृपाधिकार
स्वीकारि चारण्यनिवासभार ।
आज्ञाप्रवृत्तैकसमुद्रबन्ध
निवारयन्रावणवंशगन्ध ।। ५५ ।।
वाल्यन्धकारप्रशमैकचन्द्र
सुग्रीव वारांनिधिवृद्धिचन्द्र ।
सीतामनश्चारुचकोरचन्द्र
क्षमस्व पद्मेक्षण रामचन्द्र ।। ५६ ।।
मय्येकदासे करुणाम्बुराशे
त्वत्सङ्गविघ्नानुदितात्मदोषे ।
कृपोचितं ते कुरु सुप्रसादं
भक्तक्षेमाक्षापितसाधुवादम् ।। ५७ ।।

नारद उवाच

एवं स्तुतो रामचन्द्र प्रसन्नस्तमुवाच ह ।
तच्छ्रुत्वा चानुतद्वाक्यमनुरूपं यथा भवेत् ।। ५८ ।।

श्रीराम उवाच

भो कपीन्द्र भवेनैव त्वं भक्तऋणशोधने ।
मत्पदैकप्रदानं यत्तन्मात्रमुचितं खलु ।। ५९ ।।
मत्पादमार्जने सेवा मद्विपत्तिविनाशने ।
समुद्रलङ्घने चापि पर्वतोद्वहनेऽपि च ।। ६० ।।
लङ्कापुरप्रदहने राक्षसानां च मारणे ।
नित्यजागरणादौ च दृष्ट्वा सेवा मया तव ।। ६१ ।।
न कपिस्त्वं कपिचन्द्र त्वं ममांशो न संशयः ।
ब्रह्मणाहं कृत मर्त्त्यो ब्रह्मणा त्वं कृतः कपिः ।। ६२ ।।
आवद्धं रावणं कृत्वा देवैस्तैर्दानवादिभिः ।
मनुष्यैः कपिभिश्चैव वाध्यं तं कृतवान् विधिः ।। ६३ ।।
जीवरूपि मनुष्येण कपिना वापि रावणः ।
न वध्यो भवितुं योग्य इति चिन्ताकुलोऽभवत् ।। ६४ ।।
मां च याचितवान् विष्णुमीश्वरमजमव्ययम् ।
अजं च जनितं वाते मर्त्त्ये कपिमनुष्ययोः ।। ६५ ।।
विष्णुर्भागद्वयं भूत्वा निजांशेनाहमच्युतः ।
त्वमहं त्वभवं युग्मं मा वां जातौ घृणास्पदे ।। ६६ ।।
कपिवेशी त्वं मद्दारहरणे दुःखकारणे ।
पतिपवीश्वरौ भूत्वा जातौ लोकघृणोचितौ ।। ६७ ।।
निजवीर्येण चाकीर्त्तिस्तिरस्कृत्य प्रकाशिता ।
संस्थाप्य शाश्वतीं कीर्त्तिं यस्याश्च निजमास्पदम् ।। ६८ ।।

त्वं तिष्ठाजन्म मे देहे भूपेणैवा सुनाकपे ।
न प्राप्स्यसि पुनर्जन्म भ्रमदुःखं कदाचन ।। ६९ ।।
कल्पितं ब्रह्मणा स्थानं कल्पेऽप्यागामिनि ध्रुवम् ।
त्वं तत्र ब्रह्मणा योग्यमधिकारं करिष्यसि ।। ७० ।।
ब्रह्मणायं कृतश्चासौ क्षणमात्रं कपिः स्वयम् ।
ब्रह्मा भूत्वा त्वया सोऽपि तिरस्कारप्रतिक्रिया ।। ७१ ।।
भवत्वाकल्पमेवेदं मया पूर्वं विचारितम् ।
तस्मात्तिष्ठ महाबाहो वचनं कुरु मे प्रियम् ।। ७२ ।।
उदयेऽहं तदैवास्मिन् हृदि मे त्वं तु वर्त्तसे ।
कल्पितस्थानं मे वन्द्यं मया तु कदलीवनम् ।। ७३ ।।
गन्धमार्द्दन नाम्ना हि पुरुषोत्तमसन्निधौ ।
दक्षिणस्यां महानद्यां भार्गव्या उत्तरेऽनघ ।। ७४ ।।
या क्षितिः सा त्वदर्थे मे कल्पिता पूर्वमेव हि ।
प्रार्थये त्वामहं त्वेतत्कुरु मे वचनं ध्रुवम् ।। ७५ ।।
अन्यथा भवदुःखानि भविष्यन्ति न संशयः ।। ७६ ।।

मदक्षिपद्मप्रतिमासि सौम्य
मन्मानसाम्भोरुहकर्णिकासि ।
मद्धस्तकोदण्डमसि त्वमेव
त्वमेव मे पौरुषविक्रमस्य ।। ७७ ।।
त्वमेव दुःखाब्धितरी मदीया
कामादि सम्पत्सुखचन्द्रिका त्वम् ।
मत्तत्प्रसन्नो हसितांशुराका
त्वमेव मे जीवनजीविका हि ।। ७८ ।।
सुखाय मेऽङ्गीकृतसर्वदुःखं
मद्भक्तिसिद्ध्यै निरपेक्षमोक्षम् ।
क्षुधार्त्तिकाले निगृहीत भक्ष्यः
स्वभावतस्त्वं मम मूलपक्षः ।। ७९ ।।

मदङ्गरूपप्रतिरूपकस्त्वं
गमिष्यसि श्रेष्ठपदं मदीयम् ।
क्षणं प्रतीक्षस्व मम प्रसङ्गा-
त्ततः करिष्यावहे तिष्ठ राज्यम् ।। ८० ।।
एवं सुचाटुभिर्भूप हनुमान् बहुधा स्तुतः ।
स्थानेष्वेतेषु सर्वज्ञो रामचन्द्रेण रक्षितः ।। ८१ ।।
वर्षेऽस्मिन् भारते तस्य स्थानयुग्मं पुरोदितम् ।
मनोरमं रामवनं सुपुण्यं विद्यते सदा ।। ८२ ।।
यानि स्थानानि सिद्धानि सन्ति ख्यातानि चोत्कले ।
कृताश्चेद्देवतास्तेषु न लुप्तानि युगे युगे ।। ८३ ।।
यद्येवं नाम विख्यातं यत्स्थानान्तरमेव हि ।
वर्त्तते सर्वदा भूप कल्पावधि समं ततः ।। ८४ ।।
रामेश्वरगिरेः पूर्वेऽप्यस्ति क्रोशत्रये नृप ।
सिद्धस्य बलरामस्य विख्यातं स्थानमुत्तमम् ।। ८५ ।।
इदं तु कथितं सर्वं महासिद्धिप्रदं तु तत् ।
तस्मात् क्रोशद्वयेऽप्यस्ति सिद्धश्रीभुवनेश्वरः ।। ८६ ।।
यक्षस्थानं तु तद् ज्ञेयं तद्विख्यातं युगे युगे ।
इदं ते कथितं सर्वं यत्पृष्टमपरं ततः ।
किमस्ति नृपशार्दूल पृच्छ्यतां तदपि त्वया ।। ८७ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे नीलमाधवमाहात्म्यं नाम षड्विंशोऽध्यायः ।।

सप्तविंशोऽध्यायः

यक्षस्थाननिरूपणं भुवनेश्वरस्य च निर्णयः

इन्द्रद्युम्न उवाच

यक्षस्थानं किमेतद्धो कथितं च त्वयानघ ।
भुवनेश्वर नामास्ति शिवो यस्योपरि स्थितः ।
तत्सर्वं कथय श्रोतुं श्रद्धा मे जायते हृदि ।। १ ।।

नारद उवाच

यत्त्वया नृपतिश्रेष्ठ पृष्टं ज्ञातं तदुत्तमम् ।
पुरावृत्तं मयाप्येतत्कथ्यते श्रूयतामिदम् ।। २ ।।
चिल्लिकायां नदीयुग्मं पतत्युत्तरतो नृप ।
एकस्याः पश्चिमे क्रोशे वर्त्तते त्वपरा नदी ।। ३ ।।
तस्यास्तीरेऽस्ति यक्षांशं स्थानं श्रीभुवनेश्वरम् ।
पूर्वमेकः स्थितः साधुरपुत्रस्तत्र चैव हि ।। ४ ।।
सुवर्णकोटिभिर्युक्तं परे तोपास्तकालतः ।
ख्याते स्थिते सुवर्णाक्षो गुप्तस्तेनाऽपि मुद्रितः ।। ५ ।।
कालान्तरेऽपि तत्पार्श्वे ब्रह्मणा कृतवान् गृहम् ।
भुवनेश्वर नामासौ ब्राह्मणः शिवपूजकः ।। ६ ।।
एवं सन्ति सुवर्णौ द्वौ संज्ञेनापि न वीक्षितौ ।
यक्षः सर्पाकृतिर्भूत्वा प्रविवेश द्विजालये ।। ७ ।।
द्विजो दृष्ट्वा तु तं यक्षं दण्डं चिक्षेपत हतौ ।
ममार स सुवर्णौ द्वौ यक्षौ सद्यो बभूव ह ।। ८ ।।
तद्दृष्ट्वा स द्विजो ज्ञात्वा विपत्तेः कारणं निजम् ।
कल्पयामास तद्द्रव्यमनु श्रीभुवनेश्वरम् ।। ९ ।।

चकार तैः सुवर्णैस्त्वप्युत्सवान् भुवनेशितुः ।
तत्र काले तु सम्प्राते स जगाम शिवालयम् ।। १० ।।
ततः शिवस्तु तन्नाम्ना भुवनेशोऽभवद् विभुः ।
तस्मिन् स्थाने स्वयं द्रष्टुं वर्त्तते नित्यमेव सः ।। ११ ।।
पश्चिमाभिमुखो देवो बलरामं प्रतीश्वरः ।
स्थानं च शुभदं कुर्वन् नित्यं विजयते विभुः ।। १२ ।।
पुनर्विचारयामास पश्चान्मे नीलपर्वतः ।
तं सम्मुखं करिष्यामि ततः स्थानान्तरं गतः ।। १३ ।।
पूर्वे पादद्वये तस्य स्थाने प्रादुर्बभुव सः ।
ब्रह्मा विष्णुश्च तत्प्रेम्णा तत्रैव प्रतिजग्मतुः ।। १४ ।।
त्रयस्ते लिङ्गरूपेण तस्थुः प्रीतियुता मिथः ।
नीलाचलं प्रपश्यन्ति तत्र स्थित्वा दिने दिने ।। १५ ।।
यक्षस्थाने बभूवासौ यक्ष प्राक् भुवनेश्वरः ।
तदुत्तरे वसन् तस्मिन् तस्मान्नाम्नोत्तरेश्वरः ।। १६ ।।
ततो गच्छन् स एवासौ वनमेकाम्रकं प्रति ।
ददर्श चासौ तन्मध्ये स्थानेऽप्यतिसुपुण्यकम् ।। १७ ।।
दृष्ट्वा भगवतीं देवीं तत्रैव स्थितवान् स्वयम् ।
सत्याः पीठं महापुण्यं देव्याश्च सिद्धिदं मतम् ।। १८ ।।
कुरुक्षयनदीतीरे पूर्वे क्रोशद्वये नृप ।
विख्यातो निजनाम्नासौ सारामे च तदास्पदे ।। १९ ।।

इन्द्रद्युम्न उवाच

कुरुक्षयनदी नाम्नी बभूवेयं कथं मुने ।
कथयैतन्मनसि मे विस्मयो जायते महान् ।। २० ।।

नारद उवाच

शृणु राजन् पुरावृत्तं पूर्वात्पूर्वतरं च तत् ।
कथयामि त्वया पृष्टं कथनीयमिदं च तत् ।। २१ ।।
एकाम्रविपिनादस्ति दक्षिणे वारुणी गिरिः ।
तदुत्तरे स्थिता पूर्वं महती नगरी नृप ।। २२ ।।
कुरूणां राजधानी सा कौरवास्तत्र संस्थिताः ।
पूर्वकल्पे नृपश्रेष्ठ सदा तन्नाम विश्रुता ।। २३ ।।
तदुत्तरेऽस्ति विख्याता नगरी रथीनां नृप ।
सुवर्ण्णरचिता भूमिः स्थिता तस्यास्तु दक्षिणे ।। २४ ।।
कलिकाले बभूवासौ मृत्पाषाणमयी तु सा ।
नाम तस्याऽस्ति विख्यातं वर्त्तते भुवि सर्वदा ।। २५ ।।
तदुत्तरेऽस्ति पात्राणां कौरवाणां पुरी तु या ।
सा तु पात्रपदानाम्ना विखाता वर्त्तते सदा ।। २६ ।।
तत्पूर्वे तु गते पाण्डौ पालयति शिशौ सति ।
कुन्ती तत्र स्थिता तस्मात् शिशुपालेति सा श्रुता ।। २७ ।।
तत्र चक्रे पुरा राजा रायसूयं युधिष्ठिरः ।
शिशुपालबधं चापि तत्र चक्रे तदा हरिः ।। २८ ।।
तत्पूर्वे कुर्मनो योद्धा स्थितस्तत्र तु सा पुरी ।
कर्त्तिनीति प्रतिख्याता वर्त्तते सर्वदा नृप ।। २९ ।।
तत्पूर्वेऽस्ति प्रविख्याता सदा दध्युदका नदी ।
पितॄन् संतर्पुस्तस्यां तु रक्तनद्यां तु पाण्डवाः ।। ३० ।।
पश्चादुत्सवसम्भूतैर्दधिभिर्बहुभिश्च ते ।
निष्क्रम्य रक्तरूपं तज्जलं तस्यास्ति नाम च ।। ३१ ।।
चक्रुर्दधिमयं तत्तु नाम ख्यातुं प्रवर्त्तते ।
पार्श्वे रथिपुरादस्ति पश्चिमे कुण्डमुत्तमम् ।। ३२ ।।

यत्र सीता पुरा स्नाता नातुसीः तेन दुःखिता ।
द्रौपद्यास्तत् पुरा कुण्डं शीतर्त्तौ शीतदायकम् ।। ३३ ।।
तद्. दृष्ट्वा रुक्मिणीनाथो द्रौपदीं शितदुःखिताम् ।
उवाच वचनं त्वैतद् द्रौपद्याः प्रीतयेऽप्यभूत् ।। ३४ ।।
शीतकाले भवेदुष्णमुष्णकाले च शीतलम् ।
कुण्डमेतद् भवत्वेव सर्वदैव मदाज्ञया ।। ३५ ।।
घोटकोड्डीयनादन्यस्थानान्यपि च तत्र वै ।
वर्त्तन्ते योधकानां च नोक्ताः विस्तारतो भयात् ।। ३६ ।।
एकाम्रकविपिने क्षेत्रेऽस्तरङ्गेति विश्रुतम् ।
तद्बहिस्तत्समं क्षेत्रं सर्वनीलाचलावधि ।। ३७ ।।
एकाम्रकवनात् क्रोशत्रितये दक्षिणे शिवः ।
बहिरङ्गेश्वरो नाम दक्षिणाभिमुखोऽस्त्यपि ।। ३८ ।।
भुवनेशः समो युज्यन्महिमाश्चर्य्यकृन्मतः ।
सिद्धपीठं तु तत्स्थानं सर्वमन्त्रसुसिद्धिदम् ।। ३९ ।।
बहिरङ्गस्य तस्यैव शिवस्य परमेशितुः ।
अन्तिके वर्त्तते भूप महान् धवलपर्वतः ।। ४० ।।
अद्भुतः पुण्यरूपोऽपि विरलो वनराजितः ।
देवतासिद्धमुनिभिर्निविष्टं बहुकन्दरम् ।। ४१ ।।
तपस्वीजनसङ्कीर्णो गुहासन्दोहसङ्कुलः ।
देवखातैर्निर्झराभिस्तीर्थरूपैः समं ततः ।। ४२ ।।
सर्वे तत्र वसन्त्येव लोकानामप्यगोचराः ।
सर्वसिद्धिप्रदो नृणां प्रशस्तो गणनायकः ।। ४३ ।।
उत्कलेश इति श्रेष्ठो यतो धवलपर्वतः ।
बहिरङ्गेश्वरादस्ति दक्षिणे क्रोशयुग्मके ।। ४४ ।।

वैद्येश्वरो नम्यः शिवः सर्वव्याधिविनाशकः ।
तस्मात् क्रोशार्द्धके दक्षे वर्त्तते शङ्करः प्रभुः ।। ४५ ।।
नीलकण्ठेश्वरो नाम्ना बहुपुण्यफलप्रदः ।
तस्माद्दक्षे तथाप्यस्ति शिवो रामेश्वरो द्वयम् ।। ४६ ।।
रामेण पूजितः पूर्वं जनस्याखिलसिद्धिदः ।
दध्यङ्गाथर्वणस्तत्र पुरा चक्रे तपश्चिरम् ।। ४७ ।।
काम्यवनस्य भूमौ या स्थिता गङ्गाह्वया नदी ।
त्वया सम्मिश्रिता सापि सुपुण्या दधिका नदी ।। ४८ ।।
स्थानानि कानिचित्तत्र सन्ति ख्यातानि भूपते ।
गुप्तानि राजशार्द्दूल वक्ष्यन्ते तानि वा कियत् ।। ४९ ।।

राजोवाच

पूर्वजन्मकथाः सर्वा निर्वाण मुनिसत्तम ।
एतत्कल्पकथाश्चापि पुराणेष्वतिविश्रुताः ।। ५० ।।
पूर्वकल्पोक्तनामानि कथं तिष्ठन्ति सर्वदा ।
एतत्कथय देवर्षे संशयो मे महान् भवेत् ।। ५१ ।।

नारद उवाच

शृणु त्वं नृपतिश्रेष्ठ कथामेतां मयोदिताम् ।
श्रुत्वैतां संशयं त्यक्त्वा निश्चयं प्राप्नुहि स्वयम् ।। ५२ ।।
वार्त्ता न लुप्ता कुतोऽपि कल्पकल्पान्तरे भवेत् ।
यदृच्छया समुत्तिष्ठेन्नित्या श्रुतिरिवेह सा ।। ५३ ।।
यत्र देशे यदाचारो व्यवहारश्च नाम च ।
लोकेभ्यस्तत्र जातेभ्यः समुत्तिष्ठते पूर्ववत् ।। ५४ ।।
न तत्र विस्मयः कार्य्यस्त्वया नृपतिसत्तम ।। ५५ ।।

इन्द्रद्युम्न उवाच

कुरूणां राजधानी सा विख्याता हस्तीनापुरी ।
वारुणी च पुरी ख्याता तेषां च मुनिसत्तम ।।५६ ।।
त्वया सा कथिता पुत्र कः प्रत्येति कथामिमाम् ।
निश्चयं वद विप्रर्षे त्वमपूर्वं च भाषसे ।। ५७ ।।

नारद उवाच

किमर्थं संशयो भूप मनसा क्रियते त्वया ।
प्रत्यक्षं चिह्नानामानि तस्य चोक्तानि ते मया ।। ५८ ।।
विषयेऽस्मिन्न मिथ्यास्ति शृणु राजन्यसत्तम ।
सर्वमेतस्य वृत्तान्तं कथितव्यं मया तव ।। ५९ ।।
हस्तिना वारुणी चेति या स्थिता त्रिपुरद्वयी ।
तत्रैव घटिता राजन् गजराजपतिस्त्विह ।। ६० ।।
श्रेष्ठं समस्तक्षेत्राणां मध्ये श्रीपुरुषोत्तमम् ।
सर्वक्षेत्राणि सन्त्यस्मिन् गुप्तानि नृपसत्तम ।। ६१ ।।
देवप्रसिद्धमेतद्वै पुरावृत्तं प्रवर्त्तते ।
वृन्दावनं च मथुरा द्वारिका नगरी तथा ।। ६२ ।।
वर्तत्ते चोत्तरे पार्श्वे तत्र तत्रैव सोऽच्युतः ।
यत्रैव यादृशी लीला तादृशी दृश्यते भुवि ।। ६३ ।।
स्थानेषु तत्र तत्रैव तान्न जानाति कस्त्विह ।
अयोध्या नगरी तत्र वर्त्ततेऽन्यानि यानि च ।। ६४ ।।
तानि सन्ति नृपश्रेष्ठ क्षेत्रे श्रीपुरुषोत्तमे ।
वृन्दावने नृपश्रेष्ठ गोपीनाथाह्वयो हरिः ।। ६५ ।।
तथैव मथुरानाथो द्वारिकानाथ एव सः ।
अयोध्यायां स विख्यातो रघुनाथ इति प्रभुः ।। ६६ ।।

वाराणस्यां च सोऽप्यस्ति विश्वनाथाह्वयः शिवः ।
दक्षिणस्यां रथनाथः स एव जगतां प्रभुः ।। ६७ ।।
स्वर्गे सोऽपि शचीनाथो नाथश्चकास्ति यत्र वै ।
देवानां तत्र तत्रापि जगन्नाथो वसत्यपि ।। ६८ ।।
एतेषां यो गणनाथो येषु हि नृपसत्तम ।
एकीभूत्वा जगन्नाथो वर्त्तते पुरुषोत्तमे ।। ६९ ।।
सर्वेषामवताराणां या या शक्तिः पृथक् पृथक् ।
तास्ता सर्वा जगन्नाथे सन्ति भो नृपसत्तम ।। ७० ।।
तस्यान्तिके कुरूणां या नगरी वर्त्तते ध्रुवा ।
अन्यत्र रोपिता भूपा जानीहि त्वमिदं ध्रुवम् ।। ७१ ।।
पाण्डवाः पार्षदा विष्णोर्यादवाश्च तथा नृप ।
सम्बन्धिनोऽपि कृष्णस्य कृष्णो नीलाचलेश्वरः ।। ७२ ।।
ज्येष्ठभ्राता हि रामोऽपि नीलशैलेऽस्ति सङ्गमे ।
बलभद्रो बलाधिक्यात्तस्मिन् सप्तफणावृतः ।। ७३ ।।
सुभद्रा भगिनी चास्ते भार्य्याभूदर्जुनस्य या ।
जगन्नाथस्वरूपस्य कृष्णस्य परमात्मनः ।। ७४ ।।
सुदर्शनं चक्रमस्य सङ्गमे तस्य राजते ।
वारुणी नगरी तस्मात् सङ्गमेऽस्ति सदा विभो ।। ७५ ।।
वारुणी पर्वतस्यान्ते या च पर्य्याप्तभूः श्रुता ।
अस्ति सा हस्तिना पुरी महानद्युत्तरे तटे ।। ७६ ।।
गजानां सङ्कटा या भूः कं जलं क्षरते यतः ।
तस्माद्भूमौ प्रविख्याता सा पुरी कटकाह्वया ।। ७७ ।।
गजानां जन्मभूमिः स्यादयं देशो नृपोत्तम ।
तस्य राजा गजपतिरिति ख्यातः स वै सदा ।। ७८ ।।

या गङ्गानिकटे भूप वर्त्तते वारुणी पुरी ।
हस्तिना च पुरा चापि सा स्यादस्य पुरी स्मृता ।। ७९ ।।
तस्या राजा भवेद् यस्तु भवेदश्वपतिस्तु सः ।
द्वयोः कीर्त्तिश्च सम्पत्तिः साम्राज्यसदृशं महत् ।। ८० ।।
गजपत्यश्वपदयोर्न न्यूनताऽन्यमहीभृताम् ।
कलिकाले भवेल्लोपो द्वयोऽपि पुरयोर्नृप ।। ८१ ।।
तत्र देशे स्थिता लोका यथा स्युर्वैष्णवा मताः ।
वृन्दावनस्था ये लोका मथुरा द्वारिका स्थिताः ।। ८२ ।।
अयोध्यावासिनो येऽपि ते मता वैष्णवा विधाः ।
मध्वाचार्य्य द्वयोर्यस्मिन् स्थाने जातश्च माधवः ।। ८३ ।।
तत्स्थानं वैष्णवं ज्ञेयं सर्वे श्रीवैष्णवाः स्मृताः ।
सर्वत्र वैष्णवाः पूज्याः ये भजन्ति हरिं सदा ।। ८४ ।।
देवैर्ब्रह्मादिभिः पूज्याः वैष्णवा लोकपावनाः ।
सर्वोपकारकास्ते स्युः सर्वपुण्यफलप्रदाः ।। ८५ ।।
सुलभं दैवतं जन्म ब्रह्मण्यं च सुलभं जनुः ।
सुलभं राजजन्म स्याद् वैष्णवं जन्म दुर्लभम् ।। ८६ ।।
ब्रह्मादयः सुराः सर्वे येऽन्ये वा लोकपालकाः ।
भजन्ति ये नृपश्रेष्ठा सर्वे वैष्णववल्लभाः ।। ८७ ।।
ये स्वभावाद् भजन्त्येवं विष्णुं ते चतुरा जनाः ।
ब्रह्मादयः सुराश्चार्त्ता ये ते वै शरणं हरेः ।। ८८ ।।
दृष्टान्ते वैष्णवा मूर्द्धं भवेयुरनुतापिनः ।
तुलसीवृक्षरूपापि वैष्णवा पूजिता सुरैः ।। ८९ ।।
यस्या समा श्रीर्भवितुं कृष्णपादाम्बुजं भवेत् ।
तुलसीं ये भजन्त्विह वैष्णवास्तेऽपि पावनाः ।। ९० ।।

यस्याः काष्ठं हरेः साक्षाच्चन्दनादधिकं प्रियम् ।
यन्मूलमृत्तिका लोके कर्पूरादधिका मता ।। ९१ ।।
शङ्खचक्रगदापद्मचिह्नाङ्गःसुगमः शुभः ।
ये द्वे द्वे दृश्यते साऽपि पवित्रयति दर्शनात् ।। ९२ ।।
तुलसीमालिका यस्य कण्ठालङ्करणं भवेत् ।
स जनो निजवंशस्य सदालङ्करणं भवेत् ।। ९३ ।।
ऊर्ध्वपुण्ड्रं तु यद्भाले गोपीचन्दनसम्भवम् ।
दृश्यते स तु विज्ञेयो गोपीनाथप्रियः क्षितौ ।। ९४ ।।
दृष्ट्वा पादस्य चिह्नानि कृष्णपादाम्बुजद्वयम् ।
यस्याङ्गे चास्ति स साक्षात्कृष्णस्य प्रियवल्लभः ।। ९५ ।।
इति ते कथितं सर्वं यक्षस्थानं प्रसङ्गतः ।
किं प्रष्टव्यमतस्तेऽस्ति तत् पृच्छ नृपसत्तम ।। ९६ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे नारदइन्द्रद्युम्नसम्वादे यक्षस्थाननिरूपणं भुवनेश्वरस्य च निर्णयो नाम सप्तविंशोऽध्यायः ।।

अष्टाविंशोऽध्यायः

वारुणीगिरिनिरूपणम्

इन्द्रद्युम्न उवाच

भो नारद मुनिश्रेष्ठ त्वया यत् कथितं पुरा ।
वारुणीपर्वत इति नाम्नाऽसौ कीदृशः पुनः ।। १ ।।

देवता कास्ति तत्र वै महिमा वापि कीदृशः ।
भवुनेशोऽपि देवर्षे स्वर्णकूटे श्रुतं मया ।। २ ।।
प्रत्यक्षरस्तुतः स च नीलाद्रौ नीलमाधवः ।
न श्रुतं वारुणीशैले स्थिता या देवता मया ।
कथ्यतामिति वृत्तान्तं संशयो जायते मम ।। ३ ।।

नारद उवाच

इन्द्रद्युम्न नृपश्रेष्ठ शृणु त्वं कथितं मम ।
ब्रह्माविष्णुमहेशानां स्थानान्यत्र वसन्ति हि ।। ४ ।।
सानन्दं विष्णुशिवयोस्त्वया मत्तः श्रुतं पुरा ।
न श्रुतं ब्रह्मणः स्थानं तदिदानीं शृणुस्व भो ।। ५ ।।
वारुणीपर्वतो यस्तु ब्रह्मणः स्थानमेव तत् ।
नाम्नोऽपि कारणं तस्य कथितव्यं तदग्रतः ।। ६ ।।
शृणुष्व स्थितिवृत्तान्तं संशयस्ते गमिष्यति ।। ७ ।।

इन्द्रद्युम्न उवाच

कथ्यतां मुनिशार्द्दूल दृश्यते नीलपर्वते ।
माधवः स्वर्णकूटेऽपि भुवनेशस्तथैव च ।। ८ ।।
वारुणीपर्वते कस्मिन् देशे ब्रह्म न दृश्यते ।
कथ्यतां च ममाग्रे भो यातु संशय एव मे ।। ९ ।।

नारद उवाच

इन्द्रद्युम्न शृणु त्वं भो विष्णुश्च शिव एव तौ ।
ब्रह्मेन्द्रामर्त्त्यमर्त्त्यैश्च प्रार्थिता रक्षणे निजे ।। १० ।।
कृपया परया चैतौ रक्षणे पापनाशने ।
अवतीर्णौ स्थितौ चात्र सर्वदा क्षितिमण्डले ।। ११ ।।
ब्रह्मेन्द्राद्याः सुराः सर्वे सिद्धचारणपन्नगाः ।
गन्धर्वाः किन्नरा यक्षा रक्षो भूतगणास्तथा ।। १२ ।।

सिद्धा विद्याधरा ये ते सर्वे ताभ्यां सुरक्षिताः ।
आदित्या वसवाश्चैव रुद्रा ये देवयोनयः ।। १३ ।।
स्वे स्वे स्थानेऽपि ते सर्वे निवसन्ति यथासुखम् ।
रक्षिता विष्णुशम्भुभ्यां केवलं तौ महेश्वरौ ।। १४ ।।
योगेश्वरौ स्वतन्त्रौ च निजलीलापरौ विभू ।
स्वेच्छया यत्र कुत्रापि चरणे बलवत्तरौ ।। १५ ।।
तयोः कः प्रतिबन्धातुं यदिष्टं चेष्टितं तु यत् ।
सङ्गेन सङ्गदोषाऽस्ति न बन्धो बन्धनभ्रमः ।। १६ ।।
न जुगुप्सा मनुष्येषु न पापाद् भयमस्ति वै ।
एवं विष्णुः शिवो भूत्वा ब्रह्माद्या नैव तादृशाः ।। १७ ।।
मनुष्येषु घृणा तेषां सर्वे दुष्कृतभीरुषु ।
तेषां बन्धनभीत्यस्ति न दृश्यते ततो नीचैः ।। १८ ।।
ब्रह्मादीनां च देवानां स्थानान्यत्रैव सन्ति वै ।
तेषु ते संस्थितं नैव दृश्यन्तेऽन्तर्हिताः सुराः ।। १९ ।।
ब्रह्माप्यत्र स्वरूपेण वारुणीगिरिकन्दरे ।
वारुणीशक्तिरस्त्येव वरुणो ब्रह्मणः प्रियः ।। २० ।।
जनानामीश्वरः पापतीर्थान्यपि जलानि वै ।
प्रसन्ने वरुणे तानि शोधकानीह कर्मणाम् ।। २१ ।।
ता निवृत्ता बलान्येव शररूपाणि रक्षसाम् ।
मन्येऽहानि घ्नति शय्यां नित्यं सूर्य्यसमं ततः ।। २२ ।।
ततोऽपि वरुणः पूज्यो ब्राह्मणैः सर्वकर्मसु ।
जलाञ्जलिभिर्विप्राणां निवर्त्ततेऽहनि स्तुतौ ।। २३ ।।
वरुणस्य प्रसादेन जगत्यस्मिन् शरा इव ।
वरुणोऽस्ति निजे स्थाने शक्तिं संरक्ष्य तत्र सः ।। २४ ।।

वरुणाख्यानि यानि च सिद्धये सर्वकर्मणाम् ।
वारुण्यां पादयोः शक्तेर्जलं स्रवति नित्यशः ।। २५ ।।
ततो जलमयी सापि शुद्धभूता जलेश्वरी ।
तत्पादान्निःस्रुतं वारिकुण्डे तत्पार्श्वगे नृप ! ।। २६ ।।
निपत्य निम्ने कुहरे पृथिव्यामिह सर्वतः ।
वारुणीस्नानसमये सन्ध्याकाले द्विजन्मनाम् ।। २७ ।।
श्राद्धतर्पणकर्मादिष्वधिकं पावनं जलम् ।
कुर्वन्ति यान्ति तोयेऽपि तत्पादसलिले शुभे ।। २८ ।।
स्नानं कृत्वा जनाः सर्वे तीर्थेष्वन्येषु यत्फलम् ।
तत्फलं दुर्ल्लभं प्राप्य स्वर्गं गच्छन्त्यनामयम् ।। २९ ।।
तयोः पूजा ततः श्रेष्ठा वारुणी करुणाद्वयोः ।
जलं संशोध्य पाद्यं तत्परां संरक्षय स्वयम् ।। ३० ।।
नमो वारुणी तुभ्यं ते कुण्डे स्नामि शुचौ जले ।
मम पापानि नष्टानि ब्रह्मलोकाप्तिरस्तु मे ।। ३१ ।।
इमं मन्त्रं समुच्चार्य्य यः स्नाति च दिने दिने ।
स याति ब्रह्मणः स्थानं शाश्वतं दुर्लभं पुरम् ।। ३२ ।।
ततो वरुणस्तस्मिंश्च स्थापितो ब्रह्मणा पुरा ।
तेनास्ति वारुणी शक्तिः स्थापिता वरुणेन सा ।। ३३ ।।
रक्षणाय च लोकानां दुर्गा भगवती स्वयम् ।
ब्रह्मा विष्णुमहेशाभ्यां सह तत्रास्ति पर्वते ।। ३४ ।।
वैष्णवीं सृष्टिमास्रष्टुं शैवीशक्तिस्तथोत्कले ।
तस्मात्स वारुणीगिरि नाम्ना लोके प्रकाशते ।। ३५ ।।
सृष्टिर्यास्ति श्रियस्ता वै सम्पूर्णं सन्ति चोत्कले ।
विष्णुरुद्रभवानीनामुत्सवाः सन्ति सर्वतः ।। ३६ ।।

उत्सवार्थं च राजापि ब्राह्मणाश्च भवन्त्यपि ।
ततोऽत्र ब्राह्मणाः पार्श्वे स्थाप्या राजाद्विजाद्यपि ।। ३७ ।।
तस्मात्परिसरे ब्रह्मा श्वशैलस्य नृपालयम् ।
पूर्वं कल्पितवान् तत्र स्थापितानन्तशक्तयः ।। ३८ ।।
ताः सर्वा वारुणीशैले सुगुप्ता निवसन्त्यपि ।
ऐन्द्राग्नायी तथा याम्या नैर्ऋती वारुणी च सा ।। ३९ ।।
कौवेरी वायवी दुर्गा ब्रह्माणी नवशक्तयः ।
एता राजा तनौ तत्र प्रविष्टे चोत्कलेश्वरे ।। ४० ।।
विराजयति वीर्य्येशः सम्राट् च राजते क्षितौ ।
सर्वेषां भारते राज्ञां मणिर्मुकुटसंस्थितः ।। ४१ ।।
वैष्णवीमैश्वरीं दुर्गां प्रपूजयति नित्यशः ।
शक्त्या ब्रह्मा तु निजया सृष्टवान् ब्रह्मणामिह ।। ४२ ।।
ब्रह्मा तु ब्राह्मणाश्चात्र राजन्ते चोत्कले नृप ।
वेदान् द्विजाः पठन्त्यस्मिन् यथा ब्रह्मा तथैव ते ।। ४३ ।।
शास्त्राणि चाल्पकामाश्च तस्माज्ज्ञानन्ति कर्म ते ।
कथ्यन्ते चोत्कले तस्माद्ब्राह्मणाः सर्वतोऽधिकाः ।। ४४ ।।
नीतिको धर्मवित्प्राज्ञो वीरो वेदद्विजार्च्चनः ।
इन्द्रद्युम्नोऽभवत्तुल्यो वैष्णव उत्कलेश्वरः ।। ४५ ।।
चातुरी तस्य च स्वर्गे भवतीन्द्रसमा नृपः ।
नीलाद्रिनाथयात्रास्तु सेवते यत् स्वयं नृपः ।। ४६ ।।
हेमदण्डाग्रविलसदंशुकादिभिरुज्ज्वलम् ।
श्वेतं छत्रं तथा स्वर्णं वस्त्राग्रं मुनिराजितम् ।। ४७ ।।
कृष्णताराविधिं तारां चन्द्रार्धसुविराजितम् ।
मेघाडम्बरमेतादृक् स्वर्णदण्डोच्छतारुणम् ।। ४८ ।।

राज्ञां सुदुर्ल्लभं ह्येतत्सम्राट् चिह्नं च यद्धीदम् ।
धारयित्वा त्रयं सम्राट् उत्कलेशः हरेः पुरः ।। ४९ ।।
स्वर्णवेत्रं करे धृत्वा राजते रत्नमण्डितम् ।
स्वर्णसमार्ज्जनीं धृत्वा धारयित्वा च तत् त्रयम् ।। ५० ।।
संमार्जत्स्वकरेणैव रत्नकङ्कणशोभनः ।
चामरैश्चारुवसनैः पुष्पाञ्जलिभिरर्च्चयत् ।। ५१ ।।
जयतीन्द्रं तपैः सर्ववेष्टितं सुविराजितम् ।
डिण्डिमध्वनिना सार्द्धं राजते सवीरश्चिरम् ।। ५२ ।।
जयशब्दस्तावन्नृणामपकर्षेऽन्यभूभुजाम् ।
तत्र देवस्य राजत्वात् प्राप्यते सोऽतिधन्यताम् ।। ५३ ।।
सेवते योऽपि तं तत्र नृपितिं चोत्कलेश्वरम् ।
खण्डमण्डलसम्प्राप्ताः सम्प्रत्यन्येऽधमाः नृपाः ।। ५४ ।।
जनानां परमानन्दं प्रभूणां सुप्रसादतः ।
तस्मिन् विराजते सर्वं तस्मिन् काले नृपोत्तम ।। ५५ ।।
लभन्ते चातुरीं नैषां खण्डमण्डलानामपि ।
तत्र देशेऽन्यदेशीयाः समाजं पृथिवीश्वरः ।। ५६ ।।
किं खण्डमण्डले चास्य चोत्कलेश सदा पुनः ।
अत्रैव सन्ति प्रासादाः देवताः पुरुषाः स्त्रियः ।। ५७ ।।
ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः ये पुण्यजातयः ।
न चार्हन्ति कलामस्य येऽन्यदेशे स्थिता जनाः ।। ५८ ।।
शिक्षया चोत्कले तेभ्यः किञ्चित् किञ्चिदपि स्थितिः ।
विरलास्तेऽन्यदेशे तु किमन्यत्कथ्यतेऽधिकम् ।। ५९ ।।
वारुणीगिरिपर्य्यन्तं ये देवाः सन्ति तान् शृणु ।
धवलेशो नामा शिवो वर्त्तते तस्य पश्चिमे ।। ६० ।।

महामहिमसंयुक्तः सर्वकामफलप्रदः ।
समीपे सन्ति तस्यैव देव्यः सदा शुभप्रदाः ।। ६१ ।।
नाम्ना गतेश्वर इति सर्वशक्तिसमन्वितः ।
तत्रास्ते वरदा पुण्या देवी भगवती नृप ।। ६२ ।।
तदुत्तरं परस्थानं सुपुण्यं सर्वसिद्धिदम् ।
वीरभूमिः सदास्यापि सन्निधौ वारुणीगिरेः ।। ६३ ।।
बहवः शम्भवस्तत्र सर्वतः सन्ति सर्वदा ।
आरामाः बहवस्तत्र वृक्षाः नानाविधास्तथा ।। ६४ ।।
सन्ति कृष्णमृगास्तत्र हस्तिनश्च महावने ।
लताः सुकुसुमाश्चैव जलं चामृतशीतलम् ।। ६५ ।।

इन्द्रद्युम्न उवाच

भो नारद मुनिश्रेष्ठ ! साम्प्रतं कथयस्व माम् ।
करुणा राजधानीयं सा युगोत्तरसंश्रुता ।। ६६ ।।
अस्मिन् युगे तु सम्राजश्चोत्कले शशकापुरम् ।
कियद्वा गभीरं तस्य पुण्यं क्व कथयति माम् ।। ६७ ।।

नारद उवाच

उत्कलेशस्य सम्राजः पुरा राजन् शृणुस्व भो ।
गौणेयं या तु मुखास्य तां वदामि शृणुस्व तत् ।। ६८ ।।
नीलाद्रिविरजाक्षेत्रमध्ये चास्ति महानदी ।
तस्यास्तु चोत्तरे तीरे दक्षिणे क्वापि वारुणी ।। ६९ ।।
नीलाद्रेः विंशतिक्रोशे नगरं चोत्कलेशितुः ।
तत्स्थानं निर्मलञ्चासि प्रधानं नृपतेः स्थलम् ।। ७० ।।
विख्यातं सर्वदा भूप सर्वत्र क्षितिमण्डले ।
प्रधानकक्षामध्यस्थं बहुपत्तनसंयुतम् ।। ७१ ।।

बहुशः क्षितिसङ्कीर्णं बहुचत्वरसंयुतम् ।
विद्यायतनसंयुक्तं चैत्यमण्डलमण्डितम् ।। ७२ ।।
बहुहट्टं महाराज निनदत् पुण्यवीथयः ।
नृपसौधारण्यकीर्णं प्रसादबलिराजितम् ।। ७३ ।।
मयूरीशुकहंसादि विच्छन्दगृहमण्डितम् ।
नृप पात्रावली भूरी राजधर्माणि संयुतम् ।। ७४ ।।
पताकावलिसंयुक्तं बहुतोरणमञ्जुलम् ।
बहुप्राकारसंशोभिर्बहुवेश्मनि वेशनम् ।। ७५ ।।
प्रधानमेतन् नृपतेः स्थानमुत्तममुज्ज्वलम् ।
एतत्ते कथितं भूप त्वया पृष्टं तु यन्मम ।। ७६ ।।
अन्यत् किं कथयिष्यामि तद् ब्रूहि नृपत्तम ! ।। ७७ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे वारुणीगिरिनिरूपणं नामोऽष्टाविंशोऽध्यायः ।।

एकोनत्रिंशोऽध्यायः

मणिनागोपाख्यानम्

इन्द्रद्युम्न उवाच

देवर्षे कथितं सर्वं सर्वज्ञेन त्वया क्रमात् ।
देवता चोत्कले देशे याः यास्तास्ताः सुविस्तरम् ।। १ ।।
पृच्छामि साम्प्रतं त्वां भो कथाञ्च त्वं वदस्व मे ।
पूर्वस्यां पश्चिमायां च दक्षिणोत्तरयोरपि ।। २ ।।
नीलाद्रेर्यः परिसरस्तत्र सन्ति च या धरा ।
चतुर्दिक्षु महाबाहो क्ष्मा या तां सुविबोधय ।। ३ ।।

नारद उवाच

इन्द्रद्युम्न नृपश्रेष्ठ यन्मां त्वं पृष्टवानिदम् ।
तच्छृणुष्वैकमनसा तत्सर्वं कथयाम्यहम् ।। ४ ।।
पूर्वस्यां दिशि नीलाद्रेर्विष्णोः स्थानं नृपोत्तम ।
सुन्दरं सुमहत्पार्श्वे चोत्तरे वेगिनी नदी ।। ५ ।।
देशव्याप्तास्तु नद्यश्च नृप क्रोशं चतुष्टयम् ।
गतेश्वरो नाम्ना शिवश्चतुर्वर्गफलप्रदः ।। ६ ।।
निजोऽयं नीलशैलश्च चातः परिसरे नृप ।
तस्मात् पूर्वे पश्चिमे च तन्मध्यसीमनि तु ये ।। ७ ।।
नीलाचलस्य नृपते कथयेत् त्वां यथाविधि ।
मध्ये तु वेगिनी नद्याः प्राचीनद्यास्तया क्षितिः ।। ८ ।।
सा भावेन्नीलशैलस्य भूप परिसरो भवेत् ।। ९ ।।

इन्द्रद्युम्न उवाच

किं तन्नागवनं नाम कथयस्व महामुने ।
किं तत्पुण्यं च संस्थानं किं फलं किं सुखं च तत् ।। १० ।।

नारद उवाच

गुप्तं विष्णुस्थलं तत्तु मणिनागादिचिह्नितम् ।
नीलशैलस्य संसर्गात् गुप्तं तं पुरुषोत्तमम् ।। ११ ।।

इन्द्रद्युम्न उवाच

नीलशैलस्य संसर्गः कथं तत्रैव वर्त्तते ।
कथयैतन्महाभाग श्रोतुं कौतूहलं हि मे ।। १२ ।।

नारद उवाच

नीलाद्रिसिन्धुतीरेऽस्ति तस्मिन् श्रीपुरुषोत्तमे ।
तच्च गुप्तं नृपश्रेष्ठ विख्यातं स्वेच्छया हरेः ।। १३ ।।

तस्माद्याप्यतिगुप्तं तद्दिनतोत्तमसंज्ञितम् ।
वर्त्तते नृपशार्दूल क्षेत्रं नागवलं तु तत् ।। १४ ।।
अनन्तश्च नृपश्रेष्ठ तथासौ पुरुषोत्तमः ।
एतयोरपि संसर्गो विख्यातः सर्वदा नृप! ।। १५ ।।
अतिगुप्तं महाराज सुपुण्यं चोत्तमं महत् ।
नागदेहस्य शुक्लत्वान्नाम्नासौ धवलाचलः ।। १६ ।।
मणिनागोऽप्यनन्त स्यात्साक्षादत्र न संशयः ।
नीलाद्रिस्वर्णचूडौ द्वौ पूतौ सर्वत्र विश्रुतौ ।। १७ ।।
वारुणीमणिनागौ द्वौ क्षेत्रत्वेऽप्यतिगोपितौ ।
स्थितौ कृतयुगे पूर्वं रणबाणौ महासुरौ ।। १८ ।।
तयोरेकः समाश्रित्य मणिनागमुवाच ह ।
बाणासुरस्तदपरस्तत्रस्थो दक्षिणे ततः ।। १९ ।।
भ्रातरौ तौ नृपश्रेष्ठ रणबाणौ महासुरौ ।
रणेन निर्मिता या सा पुरी रणपूरेति सा ।। २० ।।
मणिनागस्य पार्श्वेऽस्ति ख्याता लोकेषु दुर्लभा ।
मणिनागस्य दूरेऽस्ति दक्षे वाणापुरी नृप ।। २१ ।।
नामान्येतानि नृपते! शृणु नागवनस्य वै ।
एकं नागवनं चास्ति धवलादिवनं ततः ।। २२ ।।
अनन्तमवनेरेतन् मैनाकवनमेव च ।
वनं कमलपूर्वं तत् झङ्कारणपुरं हि तत् ।। २३ ।।
एतान्यपि च नामानि कथितानि च तस्य वै ।। २४ ।।

इन्द्रद्युम्न उवाच

अनन्तस्यैव नागस्य गिरिरूपं कथं भवेत् ।
पुरिषोत्तमसंसर्गो यस्योक्तं भवता मुने ।। २५ ।।

मैनाकवनसम्पर्कः कथं नागवनस्य तु ।
एतत्कथय मे त्वं भो संशयो मम गच्छतु ।। २६ ।।

नारद उवाच

इन्द्रद्युम्न परावृत्तं सावधानं शृणुष्व भो ।
विष्णोर्नीलाचले स्थित्वा शबरस्याभवच्च यत् ।। २७ ।।
नीलाद्रेः पश्चिमे पार्श्वे यः सरो नाम दीपकम् ।
तस्मिन् विश्वावसुर्नामा वैष्णवः शवरः स्थितः ।। २८ ।।
तस्य भ्राता स्थितो नाम्ना कनिष्ठो विश्ववासवः ।
ज्येष्ठभ्राता तयोर्मध्ये पूजयेन्नीलमाधवम् ।। २९ ।।
गर्वीश्वरः कनिष्ठोऽस्य ययावृत्पथवृत्तिताम् ।
वदति स्वेच्छया क्वापि भ्रमति क्वापि दुर्मदः ।। ३० ।।
मृगान् विध्यति नित्यं स व्यवसायोऽपि नित्यशः ।
श्रुत्वा दुर्वृत्ततामस्य नीलाद्रौ नीलमाधवः ।। ३१ ।।
तं बहिष्कारयामास दृष्ट्वायोग्यं स्वसेवने ।
कथयामास तं विष्णुर्दूरे त्वं ब्रज दुर्मते ! ।। ३२ ।।
न स्थातव्यं मत्प्रदेशे मत्सेवां न कुरुष्व भो ! ।
निजगाम ततो दूरं निरस्तो विश्ववासवः ।। ३३ ।।
वने महानदीतीरे चकार निजमन्दिरम् ।
विश्वावसुस्ततो भूप भातृस्नेहपरिप्लुतः ।। ३४ ।।
तुष्टाव जगतां नाथं नीलाद्रौ नीलमाधवम् ।। ३५ ।।

विश्वावसुरुवाच

देव देव जगन्नाथ नमस्ते नीलमाधव! ।
क्षमस्व भ्रातुरन्यायं त्वं क्षीणं हेतुमार्त्तिदम् ।। ३६ ।।

कृपादृशी ते मयि योगलभ्या
त्वत्पूजनेऽहं शवरोऽपि योग्यः ।
ब्रह्मादयो नेन्द्रगणाः प्रवीणा-
स्त्वत्पादपूजाकरणे भवन्ति ।। ३७ ।।
त्वं माधवो निखिललोकमाता
तत्त्वं प्रजापालनतः पिता च ।
दोषं क्षमस्वास्य च दीनबन्धो
चराचरात्मन् करुणैकसिन्धो ।। ३८ ।।
श्रीनीलशैलस्थदरी हरिस्त्व-
मघौघध्वंसी करुणाविहारी ।
स्वसन् मृगाणामपि भो त्वमिन्द्रः
प्रेम्णा रमादृष्टिचकोरचन्द्रः ।। ३९ ।।
ब्रह्मा न जानाति त्वदीयमायां
जीवत्यनाथो भवतः कृपायाम् ।
त्वमिन्द्रियव्यापृतिसम्बिधाय
समस्तकर्मैकफलप्रदायी ।। ४० ।।

नारद उवाच

तच्छ्रुत्वा जगतां नाथो दयां तस्मै चकार सः ।
अवदत्तं महाराज वाक्यं शापप्रणोदनम् ।। ४१ ।।

माधव उवाच

नीलाद्रेः पश्चिमे भागे द्वादशक्रोशसंस्थिते ।। ४२ ।।
या भूमिरस्ति शालिनी शैलपर्य्याप्तभूः शृणु ।
सा स्यात्तव कनिष्ठस्य भ्रातुरेव मदाज्ञया ।। ४३ ।।
भविष्यति निवासोऽपि त्वय्यहं कृतवान् कृपाम् ।
मद्वचनाद्गतशापो स नागो हि गमिष्यति ।। ४४ ।।

तत्र स्थास्यति कार्य्यार्थं गिरिरूपेण वीर्य्यवान् ।
मैनाकपर्वतो यस्य तस्य पार्श्वं गमिष्यति ।
तत्र स्थास्यति कार्य्यार्थमेतत्सत्यं वचो मम ।। ४५ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे मणिनागोपाख्यानं नाम एकोनत्रिंशोऽध्यायः ।।

त्रिंशोऽध्यायः

मैनाकमणिनागसङ्गमकथनम्

विश्वावसुरुवाच

भगवन् श्रोतुमिच्छामि किं स्यात्कार्यं च नागतः ।
तस्मिन्निवसितास्यास्य किं वा मैनाकपर्वताद् ।।
कार्यं किं भवतः स्वामिन् तत्र तस्य निवासिनः ।। १ ।।

श्रीभगवानुवाच

शृणु विश्वावसो पूर्वं मदङ्गीकृतमीदृशम् ।
मदीया नाम मर्य्यादा न्यूनता वास्तु न क्वचित् ।। २ ।।
निवर्त्ततां कदाचित् भो मदीयानां कदर्थनम् ।
तद्धितायावतारो मे भवेत् प्राज्ञ युगे युगे ।। ३ ।।
तत् स्थानं मन्निवासाय योग्यं भवति सर्वदा ।
क्षेत्रं तन्मम संगुप्तं समन्ताद् दशयोजनम् ।। ४ ।।
विराजते चतुर्द्दिक्षु चतुः कोणेषु सत्तम ! ।
सीमा तस्य च सर्वत्र क्रोशाः पञ्च च तत्र वै ।। ५ ।।
चक्रं मे भ्रमते तत्र यथाऽस्मिन् पुरुषोत्तमे ।
तत्र स्थिते पदं सेतुर्न किं तन्मे गृहं भवेत् ।। ६ ।।

नगे स्थिते तु सा भूमिः शुद्धा भवतु रक्षिता ।
शुद्धायां रक्षितायां हि तस्य क्षेत्रं ममानघ ।। ७ ।।
विभेष्यति परो धर्मः सर्ववर्णेषु यो भवेत् ।
राजा तत्र प्रवर्त्तेत धर्मशीलो महाबलः ।। ८ ।।
धर्मे वृद्धेऽपि तत्क्षेत्रं नूनं व्यक्तं भविष्यति ।
धर्मेण नृपतेः श्रद्धा यद्यात्रायां भविष्यति ।। ९ ।।
यात्राकाले त्वहं तत्र गृहीत्वा निजसेवकान् ।
श्रियं शम्भुञ्च शक्तिञ्च यास्यामि परया मुदा ।। १० ।।
ब्राह्मणा निवसिष्यन्ति शूद्रा विश्वावसो तथा ।
अन्ये वर्णाश्च ये तेऽपि निवसिष्यन्ति तत्र वै ।। ११ ।।
तत्र विश्वावसो नित्यं भविष्यन्ति महोत्सवाः ।
यदैकाम्रवनं याति स्वक्षेत्रं भुवनेश्वरम् ।। १२ ।।
सर्वैर्भूतगणैः सार्द्धं पार्वत्या च स्वभार्य्यया ।
विघ्नेश्वरेण पुत्रेण कुमारेण च सज्जनाः ।। १३ ।।
द्रष्टुं बाणासुरं भक्तं श्रद्धया निजबल्लभम् ।
यत्र बाणासुरः कामं करोत्यपि महोत्सवम् ।। १४ ।।
स तस्मिन् परया भक्त्या महापूजां प्रवर्त्तयन् ।
तदा तं वीक्षितुं याति स्वक्षेत्राद्भुवनेश्वरम् ।। १५ ।।
नागस्य पुरतः पन्था पतेस्तस्य शिवस्य वै ।
तत्र स्थितस्य मे तेन सहसा मेलनं भवेत् ।। १६ ।।
मिष्टालापः प्रमोदश्च भवेत्तत्रोभयोरपि ।
मदीयैश्च तदीयैश्च सह सम्मेलनं गणैः ।। १७ ।।
भवेद् विश्वावसो तत्र परमानन्दवर्द्धनम् ।
एवं सञ्चरणं तत्र स्यान्मदीयतदीययोः ।। १८ ।।

मया संरक्षितस्तत्र नागः साक्षात् समो मम ।
यत्र द्वादशयात्रा मे भविष्यन्ति च तत्र वै ।। १९ ।।
मन्त्रस्नानं करिष्यामि गुण्डिचा देवदुर्ल्लभम् ।
शयनं चायनं चैव पार्श्वस्य परिवर्त्तनम् ।। २० ।।
उत्थानं च करिष्यामि तथा प्रावरणोत्सवम् ।
अभिषिक्तः पौर्णमास्यां पौष्यां च सहपद्मया ।। २१ ।।
भविष्यामि भ्रमिष्यामि बीजयिष्याम्यहं तनौ ।
जलक्रीडां करिष्यामि यथासंख्यादिनान्यपि ।। २२ ।।
चित्रकं च ग्रहीष्यामि बलभद्रमहोत्सवम् ।
जन्मयात्रां करिष्यामि यात्राणामुत्तमोत्तमाम् ।। २३ ।।
करिष्यामि तथा सप्तपुरीकाणां महोत्सवम् ।
इन्द्रयात्रां च तत्रैव शरत्कालोद्भवोत्सवम् ।। २४ ।।
कुमारोत्सवयात्रां च करिष्यामि सुखप्रदम् ।
तथा दीपावली यात्रा भविष्यति च तत्र मे ।। २५ ।।
प्रत्यब्दं प्रथमाष्टम्यां परिधास्ये नवाम्बरम् ।
धनुः संस्थे सवितरि करिष्यामि महोत्सवम् ।। २६ ।।
वकुलाख्याममावास्यां करिष्ये वकुलोत्सवम् ।
महादीपोत्थापनानि प्रत्येकादशीरात्रिषु ।। २७ ।।
यात्राङ्गानि च यानि स्युर्येऽन्ये सन्त्योत्सवादयः ।
सर्वे तथा भविष्यन्ति यथा श्रीपुरुषोत्तमे ।। २८ ।।
इदं मया निगदितं त्वं परं कथ्यते शृणु ।
तत्र स्थिते च मैनाके यत्कर्म सर्वदोत्तमम् ।। २९ ।।
इन्द्रेण च्छेदिताः पक्षाः पर्वतानां यथानघ ।
पलायितस्तदाम्भोधौ मैनाकोऽप्सु सुगोपितः ।। ३० ।।

तदा निमन्त्रितश्चाहं श्राद्धब्राह्मणकर्मणि ।
समुद्रन्तु गतस्तत्राप्युपतस्थे तदाप्यहम् ।।
मैनाकस्तु तदा चार्त्तः शक्रविश्वावसोः भयात् ।। ३१ ।।

मैनाक उवाच

रक्ष रक्ष जगन्नाथ प्रपन्नार्त्तिहर प्रभो ।
शरणं भव लक्ष्मीश्च रक्ष मामिन्द्रजाद्भयात् ।। ३२ ।।
तद्दर्शनं यत्र बभूव सोऽयं
सिन्धुर्ममासौ भवतीह बन्धुः ।
वृत्रारिणा नाथ महाभयालुं
यो मे निवासः प्रतिबन्धुमर्हः ।। ३३ ।।
पितेव साक्षाल्लवणोदधिर्मे
यो तज्जले स्वस्य च मांस्तु रक्ष ।
तदङ्गजा मे भगिनी च लक्ष्मी-
स्तस्या पतिस्त्वं तव शालकोऽहम् ।। ३४ ।।
ममैव रक्षाविधि नोचिता ते
कृपानिधे ! त्वां शरणं प्रयाचे ।
शक्नोमि वक्तुं त्वयि दुःखमात्रं
रक्षत्विमं चेत्करुणैकपात्रम् ।। ३५ ।।
उमा रमा मे भवतो भगिन्या-
वुमाधवो माधव एव भाति ।
न चेत्ततो मे द्विषतोऽपि रक्षा
सहायपक्षस्त्वं वृथैव रक्ष ।। ३६ ।।
एवं बहुविधैः स्तोत्रैः कृपा तस्मिन् ममाभवत् ।
प्रसन्नस्तमुवाचाहं रक्षामि त्वामिति ध्रुवम् ।। ३७ ।।

केन ते भविता रक्षा मैनाक त्वां वदाम्यहम् ।
तेनाहं प्रार्थ्यतः स्वस्य निवासाय स्थलेन यत् ।। ३८ ।।
दर्शनाय पितुर्मातुर्भगिन्याश्च महामते ।
मय्येवं प्रार्थिते तेन श्रुता दुराज्ञया मया ।। ३९ ।।
हिमालयस्य मेनायाः स्तुतिरूपा कृपोचिता ।
स्वपुत्रीं वीक्षितुं तं च स्थले संरक्षितं तयोः ।। ४० ।।
गिरः श्रुत्वा कर्त्तुं मतिर्याता ममानघ ।
मैनाकमब्रुवं चाहं स्थले त्वं न वसिष्यसि ।। ४१ ।।
तदीयौ पितरौ चापि द्रक्ष्यतस्त्वं च सर्वदा ।
गमिष्यसि गृहं पित्रोर्मैनाक भगिनीगृहम् ।। ४२ ।।
गच्छ त्वं भो नगभद्र मणिनागस्य सन्निधिम् ।
निर्भरं तिष्ठ तत्रैव न यत्र शक्रजं भयम् ।। ४३ ।।
तत्र स्थितस्त्वं नागस्य सहायो नागरक्षितः ।
न भेष्यसि त्वमिन्द्रस्य गिरिवज्रादपि ध्रुवम् ।। ४४ ।।
एवमुक्तः स मैनाकः स्थापिते नागसन्निधौ ।
एवं कृते मयि सुखं भुवनानां भविष्यति ।। ४५ ।।
नागान्तिके तु मैनाके स्थिते तत्र सदाशिवः ।
आगमिष्यति सस्नेहं गणेन सहसा तयोः ।। ४६ ।।
प्रदास्यति तदा ह्यस्मै मणिं च भुवनेश्वरः ।
नागाय मणिनागाख्यं तदा नागोऽपि यास्यति ।। ४७ ।।
हिमवान्मेनया सार्द्धमायास्यति सुतालयम् ।
जामातरं च तनयां सुतस्यानयितुं गृहम् ।। ४८ ।।
जामातृदुहितुश्चैव रोषं त्याजयितुं च भो ।
मैनाके स्थापिते तत्र कार्य्यमेतद्भविष्यति ।। ४९ ।।

विश्वावसुरुवाच

रोषः कस्मान्महाबाहो शिवस्य श्वशुरेऽभवत् ।
श्वश्रां वापि वदत्वं मे श्रोतुमिच्छामि त्वद्विभो ! ।। ५० ।।

श्रीभगवानुवाच

श्वशुरः स महाभागो गिरीशस्य हिमालयः ।
उवास गिरीशो नित्यं श्वशुरस्यापि मन्दिरे ।। ५१ ।।
दृढस्त्वनुग्रहस्तस्य यद्बभूव हिमालये ।
मुमुदे तद्गृहे राजन्पार्वत्या सह शङ्करः ।। ५२ ।।
तत्र स्थिते शङ्करे तु नित्यं गिरिजया सह ।
हिमालयस्य दासीनां सम्बृद्धिः समुपस्थिता ।। ५३ ।।
स्वसुखानां भवे नित्ये प्रभौ योगेश्वरे शिवे ।
सुखभोगप्रसक्तौ च लम्पटस्य सुरालये ।। ५४ ।।
ततस्तदा स्युर्लोकाश्च ये मूढा स्वच्छवुद्धयः ।
श्वशुरालयवासीति निनिन्दुः परमेश्वरम् ।। ५५ ।।
तच्छुत्वा पार्वतीनाथ पार्वती च महामते ।
मनसा रोषमाधाय तद् गृहादभिजग्मतुः ।। ५६ ।।
एतद्धि ज्ञातवानद्रिर्हिमवान् सह मेनया ।
परंब्रह्मणि गौरीशे सर्वदा स्नेहजर्जरः ।। ५७ ।।
ब्रह्मस्वरूपिणं रुद्रं जानन्नपि हिमालयः ।
मेना चादरमत्यन्तं करोति च दिने दिने ।। ५८ ।।
श्रुत्वा महेश्वरः सार्द्धं पार्वत्या निर्गतं गृहात् ।
अनुतापाग्निना नित्यं दह्यते तद्दिनावधि ।। ५९ ।।
शिवोऽपि तस्मादागत्य पुरीं वाराणसीं प्रति ।
उवास निलयं कृत्वा नित्यं स वृषभध्वजः ।। ६० ।।

ततोऽतिरमणीयं च योगसिद्धिकरं परम् ।
मम नीलाद्रिनाथस्य सीमारूपं सुदुर्ल्लभम् ।। ६१ ।।
एकाम्रकं वनं श्रुत्वा तस्मादागत्य सादरम् ।
एकाम्रकवने क्षेत्रे नाम्नासौ भुवनेश्वरः ।। ६२ ।।
एतन्निगदितं सर्वं श्रुतं विश्वावसो त्वया ।
अन्यत्किं कथितव्यं भो तद्वदास्मान्नरोत्तम ।। ६३ ।।

विश्वावसुरुवाच

अनन्तस्त्वं महाबाहो त्वत्समः कृत एव हि ।
नागाः सर्पेश्वराः सर्वे वदामि ते त्वदात्मिकाः ।। ६४ ।।

श्रीभगवानुवाच

विमुच्यते त्वयैतन्मे जानता शबरोत्तम ।
अनन्तं सगणमामित्यवधारय चेतसा ।। ६५ ।।
तद्रूपोऽहं सदा सौम्य धारयामि धरामिमाम् ।
धरया च सदाऽसौ यः शयनाश्रयरूपकः ।। ६६ ।।
यत्र तिष्ठत्यसौ नास्मि नाहं तिष्ठामि नित्यशः ।
बलभद्रो मम भ्राता स एवात्र न संशयः ।। ६७ ।।
अनन्तयोगमायाऽहं त्रय एवात्र वै शृणु ।
तिष्ठामः सर्वलीलासु सर्वसृष्टिषु सर्वदा ।। ६८ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे मैनाकमणिनागयोः सङ्गमकथनं नाम त्रिंशोऽध्यायः ।।

एकत्रिंशोऽध्यायः

शिवागमनम्

विश्वावसुरुवाच

त्वया यत्कथितं नाथ मैनाकोऽपीह तिष्ठति ।
मणिनागोऽपि तत्रैव चैकत्र हि स्थितिः कृत ।। १ ।।
मणिनागः कोऽपि तत्र मैनाकः को वद प्रभो ।
तस्मिंश्च ते निवासोऽपि रमेश कोऽत्र संशयः ।। २ ।।

श्रीभगवानुवाच

शृणु भो शवरेश त्वं सम्यक् प्रश्नः कृतः त्वया ।
कथयाम्यहमेवैतत्त्यजन् लोकस्य संशयम् ।। ३ ।।
द्वयोर्मध्यैकरूपत्वं दृश्यते बहिरुज्ज्वलम् ।
अन्तरस्त्वनयोरस्ति दृश्यते न जनैः स तु ।। ४ ।।
शिवालङ्काररूपोऽसौ मणिनागो महामना ।
शिवशालको मैनाकः सखा वां श्वशुरस्य तु ।। ५ ।।
अनयोः श्रेष्ठयोरस्ति सम्बन्धः प्रियता मिथः ।
विशेषतस्तु मैनाको दृष्ट्वा प्रोष्यागतं सखाम् ।। ६ ।।
आत्मकर्मविनिर्मुक्तो निमज्जन् स्थितश्चाम्बुधौ ।
संप्राप्य सहसोत्थाय प्रेम्णा परमया मुदा ।। ७ ।।
सश्रद्धं मणिनागस्तु गाढं परिग्रहन्निव ।
अन्योन्यं श्लेषणं जातं दर्शनक्षण एव हि ।। ८ ।।
गाढालिङ्गनासक्तौ द्वौ संलग्नौ हि बभूवतुः ।
एकरूपतया दृश्यो सर्वदा तत्रोभावपि ।। ९ ।।
स्थूलत्वे चैकरूपौ तौ सूक्ष्मते हि विरूपिणौ ।
यद्यप्येकं तथापि स्वप्रकारस्त्वनयोर्द्वयोः ।। १० ।।

उत्तरे मणिनागोऽस्ति मैनाको दक्षिणे तयोः ।
मध्येऽल्पसन्धिरस्त्येवं नास्ति कार्य्या विचारणा ।। ११ ।।
स्वस्त्यैकता तत्र पश्चाद् गत्वा मैनाकपर्वतः ।
ततो दक्षिणं गत्वा च वर्ततेऽप्यतिविस्तृतः ।। १२ ।।
मणिनागोऽपि पूर्वस्यां पश्चाद्देशं तु गच्छति ।
भित्त्वा बाणपुरी सीमागुल्मासारान्तिकं प्रति ।। १३ ।।
कलयित्वा तु ध्यानानि गौणीं न्यक्षिपत्तत्र वै ।
अन्तर्हितेऽतिगौणीति वाणी ख्यातास्ति सर्वदा ।। १४ ।।
गौणाद्रेः सन्निधावस्ति झंझावान्नाम पर्वतः ।
तयोर्मध्ये गुहा या सा पाण्डवानां गुहा मता ।। १५ ।।
पाण्डवाः पञ्च तत्रैव द्रौपद्या सह भार्य्यया ।
निवासं चक्रिरे पूर्वं पुण्यस्थानमिदं हीति ।। १६ ।।
उत्तरे मणिनागस्य गिरितोऽस्ति गुहा तु या ।
तत्र मेघाधिपो नाम सुररूपोऽस्ति वारिदः ।। १७ ।।
भवेद्यदा त्वनावृष्टिर्जनास्तं पूजयन्ति चेत् ।
सुवृष्टिर्जायते तस्मात् स्थानचित्रं तदुत्तमम् ।। १८ ।।
एवं विचार्य्य तत्स्थानं भ्रातुस्तेऽवरजस्य च ।
कृतं मयात्मीयं तत्तः शृणु विश्वावसो ध्रुवम् ।। १९ ।।
तव शिष्येति ते भ्राता बलवान् गुप्तनामतः ।
त्वद्वंशे प्रभुता तस्य विश्रुतो विश्ववासवः ।। २० ।।
मत्सम्बन्धतया तस्य क्षत्रियत्वं भविष्यति ।। २१ ।।

विश्वावसुरुवाच

त्वया यत्कथितं नाथ मैनाकस्य प्रसङ्गतः ।
भविष्यति शिवस्यापि गमनं तस्य मन्दिरे ।। २२ ।।

मेनया सह तत्रापि गमिष्यति हिमालयः ।
हिमालयालयं सोऽसौ मैनाकश्च गमिष्यति ।। २३ ।।
मणिर्यस्य तु नागाय तत्र स्थाप्य महेश्वरम् ।
एवमादि यथोक्तं ते कथां मां कथय प्रभो ।। २४ ।।

श्रीभगवानुवाच

यदाहं स्थापितवांस्तत्र मैनाकं नागसन्निधौ ।
तदा श्रुत्वोत्सुकोऽभवत् पुत्रं द्रष्टुं हिमालयः ।। २५ ।।
मेनाऽपि श्रद्धया तस्मादभूत्पुत्रेक्षणोत्सुका ।
जामातरं दुहितरं द्रष्टुं चैकाम्रके वने ।। २६ ।।
तयोः क्रोधप्रणाशाय गमिष्यावः सुतालयम् ।
कृत्वा मतिमिदं स्थानं सम्प्रतिस्थे हिमालयः ।। २७ ।।
गृहीत्वा बहुसामग्रीमुत्सुको मेनया सह ।
अन्तरानन्दकलितः सम्भारान् वाहयन् बहून् ।। २८ ।।
सन्तुष्टा मेनका तेनागच्छद् द्रष्टुं स्वसन्ततिम् ।
आगत्य पुरुषाकारः प्रविवेश सुतालये ।। २९ ।।
तं दृष्ट्वा त्वरया पुत्रो मैनाकः प्रणनाम यः ।
तमुत्थाप्य त्वरायुक्तः क्रोडं नीत्वा हिमालयः ।। ३० ।।
जग्राह मूर्ध्नि प्रेमार्द्रिं लेभे च परमं मुदम् ।
मेना नमस्कृता माता मैनाकेन सुतेन वै ।। ३१ ।।
आघ्राय मूर्ध्नि प्रेमाश्रुबिन्दूनक्ष्मोर्विमोच ह ।
लब्ध्वा नष्टं सुतं मेना परमानन्दनिर्वृत्ता ।। ३२ ।।
उत्सवेन जनान् सर्वान् पूजयामास सादरम् ।
ततो हिमालयो मेना चात्मजं श्रद्धयान्वितम् ।। ३३ ।।
हिमालयो हि सहसा प्रेक्षितुं मनसा दधौ ।
पर्वतान् सकलान् पातुं प्रेरयामास तं सुतम् ।। ३४ ।।

शिवं शान्तयितुं चापि क्रोधिनं भुवनेश्वरम् ।
प्रणम्याशु ततश्चाटुर्वचनैः पादपद्मयोः ।। ३५ ।।
भ्रमरोऽभूत्प्रसादाय मैनाकोऽपि ययौ मुदा ।
सम्भाराणि पित्रा सर्वाण्यानीतानि निजात्पुरात् ।। ३६ ।।
सुतेन सह सर्वाणि ददौ जामात्रे तानि सः ।
प्रविवेश समैनाकस्त्वरयैकाम्रके वने ।। ३७ ।।
भुवनेश्वरपादाब्जे दण्डवत् प्रणिपत्य सः ।
शिवः प्रसन्नमनसा तमुवाच पुनः पुनः ।। ३८ ।।
उत्तिष्ठोत्तिष्ठ वत्सेत्युपतिष्ठस्व मदाज्ञया ।
तुष्टावोत्थाय बहुशो मैनाको भुवनेश्वरम् ।। ३९ ।।
उवाच चाटुवचनान्यनेकानि भयान्वितः ।
प्रशसंस शिवस्तं च मुदा परमया युतः ।। ४० ।।
बहुकालमदृष्टं च शालकं प्रेम्ण आस्पदम् ।
मैनाकस्तु ततः सोऽपि प्रययौ भगिनीं प्रति ।। ४१ ।।
पार्वती तं समालोक्य ममज्जानन्दसागरे ।
मैनाकस्तां नमस्कृत्य विज्ञाय परमेश्वरीम् ।। ४२ ।।
तस्थौ तत्र स्थितः सोऽपि प्रेमाश्रूणि मुमोच ह ।
कृत्वा तौ प्रियसम्वादं चिरकालं मनोगतम् ।। ४३ ।।
दृष्ट्वा वार्त्तामुदित्वा च मुमुदाते पथि स तौ ।
ततस्तु भोजयामास पार्वती भ्रातरं निजम् ।। ४४ ।।
अनेकानेकपाकेन मुदामृतसमेन च ।
इत्थं कति दिनान्येव सोऽभवद्भगिनीगृहे ।। ४५ ।।
श्रद्धया भगिनी भीमो भवत्या बहुमानितः ।
तत्प्रसादान्मैनाकोऽपि यत्नेन भुवनेश्वरम् ।। ४६ ।।

भीमभगिनीभ्यां सार्द्धं गृहं गन्तुं मनो दधे ।
भुवनेश्वरः शर्वोऽपि निजश्यालनिवेदनम् ।। ४७ ।।
स्वीचकार तेन सार्द्धं गमनं श्वशुरं प्रति ।
ततः प्रतस्थिरे सर्वे भुवनेश उमापि च ।। ४८ ।।
मैनाकश्च गणैः सार्द्धं शिवसम्बन्धिभिः शुभम् ।
अथ प्रविविशु सर्वे हिमवत्पुत्र सीमनि ।। ४९ ।।
ज्ञात्वा हिमालयः स्नेहादागतं भुवनेश्वरम् ।
प्रत्युद्ययौ भयेनान्तो लज्जितो मुदितोऽपि च ।। ५० ।।
हिमालयान्तिके प्राप्ते दृष्ट्वा श्रीभुवनेश्वरम् ।
परमेश्वरबुद्ध्यापि नमस्कर्त्तुं मनो दधे ।। ५१ ।।
न्यवारयत्काले नैतद्युक्तकर्मेति शङ्करः ।
स्वयं नमश्चकारेमं श्वशुरं मान्यविद्धरः ।। ५२ ।।
पार्वती च निजं तातं नमश्चक्रे महेश्वरी ।
मैनाकस्य नमस्कारेऽधिकारे पितुरेव च ।। ५३ ।।
एवं सर्वेऽपि तेऽन्योऽन्यं समालिङ्ग्य पुरस्कृताः ।
आगत्यान्तिकसमृद्धे दिने च विविशुर्गृहे ।। ५४ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे शिवागमनं नामैकत्रिंशोऽध्यायः ।।

द्वात्रिंशोऽध्यायः

हिमालयसम्भवः

श्रीभगवानुवाच

अथ तत्र क्षणं स्थित्वा मैनाकनिलये शिवः ।
पार्वती च मनश्चक्रे स्वस्थानगमनं प्रति ।। १ ।।
तौ तत्र स्वसुखासक्तौ भवानीभुवनेश्वरौ ।

मेनाहिमालयौ भक्तिं पुण्यगृहवशीकृतौ ।। २ ।।
तद्दिनेषु तयोस्तत्र गन्तुमस्ति प्रयोजनम् ।
तद्गत्वा कातरो भूत्वा स्वरक्षां च हिमालयः ।। ३ ।।
गत्वा तुष्टाव तं भक्त्या प्रणतश्च कृताञ्जलिः ।। ४ ।।

हिमालय उवाच

देव देव महाशम्भो भक्तानुग्रहकराक ।
स्वतन्त्रं स्वसुखासक्तं जाने त्वां पार्वतीपते ।। ५ ।।
मद्गृहे संस्थितिर्नाथ मय्यनुग्रहकारणात् ।
नान्यत्प्रयोजनं किञ्चिदस्ति ते भक्तवत्सलः ।। ६ ।।
प्रसीद मे जगन्नाथ दीनोऽहं दीनबान्धव ।
त्वया सनाथे मैनाके कृपां कुरु जगन्मय ।। ७ ।।
नमस्तुभ्यं विरूपाक्ष विश्वरूपाय चात्मने ।
साकारस्त्वं निराकारः स्वेच्छया चन्द्रशेखरः ।। ८ ।।
गङ्गाधर नमस्तुभ्यं अष्टमूर्त्तिधर प्रभो ।
अष्टैश्वर्य्यप्रदाता त्वमष्टैश्वर्य्यात्मवीर्य्यवान् ।। ९ ।।
विरूपाक्षस्वरूपाय विश्वरूपाय तें नमः ।
नमस्ते शिवरूपाय शक्तिरूपाय ते नमः ।। १० ।।
देवतागणरूपाय सर्वदेवेश्वराय च ।
चन्द्रसूर्य्याग्निनेत्राय दिव्यरूपाय ते नमः ।। ११ ।।
ब्रह्मा हरिश्च सततं कुरुते यदाज्ञां
शक्रादयः सुरगणाः परिचारकास्ते ।
यस्य प्रसादलवमाप्तुमपि प्रयत्नं
कुर्वन्ति तं प्रतिनमामि च चन्द्रमौलिम् ।। १२ ।।

सुभूषणं यस्य बभूव कण्ठे
सर्पेश्वरो यो धरणीं बभार ।
विषेण तस्यापि नीलञ्च कण्ठं
चिरं वीरं हि प्रणमाम्यहं तम् ।। १३ ।।
यद्भालनेत्रे ज्वलदग्निज्वालं
ददाह कामं क्षणतः कृपालुम् ।
यत्रार्द्धचन्द्रोऽपि रराज कामं
तं वामदेवं प्रणमामि नित्यम् ।। १४ ।।
खट्वाङ्गमप्यायुधमेव यस्य
यः खण्डितं तत्परशुं च धत्ते ।
अभ्यर्च्चितं भष्म यदङ्गरागो
नमाम्यहं तं शिवमात्मभूतम् ।। १५ ।।
यत्कर्णयोः राजत एक मुद्रे
धूस्तुरपुष्पं च यदुत्तमाङ्गे ।
यन्मस्तके भाति जटाकलापो
गङ्गार्पिता तत्र नमामि शम्भुम् ।। १६ ।।
अद्भुतमङ्गार्द्धमुमाऽस्य पत्नी
नतश्च यस्य प्रणतः कुवेरः ।
आसीच्च यज्ञादिमशेषभूमिं
हरं तमानन्दनिधिं प्रपेदे ।। १७ ।।
एवं स्तुतो महादेवस्तमुवाच हिमालयम् ।
किमर्थं स्तुतियुक्तो भो गुरुस्त्वं श्वशुरो मम ।। १८ ।।
मान्योऽसि मे मुनिश्रेष्ठ नमस्कार्य्यस्त्वमेव हि ।
निवर्त्तस्व स्तुतेस्तस्मान्न युक्ता ते मम स्तुतिः ।। १९ ।।

हिमालय उवाच

एवं नहि जगन्नाथ गुरुस्त्वं जगतः प्रभुः ।
ब्रह्मविष्णुसुरेन्द्रादिदेवानां पूज्य एव च ।। २० ।।
पिता माता च जगतः स्रष्टा त्वं परिपालक ।
संहर्त्ता नाथ मे दोषं क्षमस्व विधुशेखर ।। २१ ।।
अपराधयुक्तो भवतामहं यतः स्यां प्रभो ।
तं क्षमस्व जगन्मूर्त्ते मय्येवानुग्रहं कुरु ।। २२ ।।
अज्ञैः जनैरवज्ञातं प्रभो जन्म मे वेश्मनि ।
तद्युक्तो कृपया त्वं मामात्मसात्कुरु शङ्कर ।। २३ ।।

महादेव उवाच

इत्यञ्चितो महादेवस्तमुवाच हसन्निव ।
रोषं धृत्वा ते भृत्येभ्यो नागतोऽस्मि हिमालय ।। २४ ।।
कृपया यद्गृहे तिष्ठन्महो मोह इवाभवम् ।
जनानां रक्षवचनं हितमेवं भजन्मम ।। २५ ।।
त्वं जानासीश्वरं जन्मां जानेऽहमपि तद्गिरे ।
इदं न जानासि पुनः शैलरूपो यतस्तव ।। २६ ।।
शृणु शैल! पुरावृत्तं प्रसङ्गात्कथ्यते मया ।
इन्द्रकर्मा नाम ऋषिः सृष्ट्वोपदिष्टवान् भवान् ।। २७ ।।
इन्द्रो भविष्यति गिरे! कृत्वा त्वं दुश्चरं तपः ।
व्यवसायं महेन्द्रस्ते ज्ञात्वा क्रुद्धोऽभवत्तदा ।। २८ ।।
ध्याननिष्ठस्य तेऽव्यर्थं देवर्षेः परिवारणम् ।
हिमसंयुक्तवात्याभिः प्रकम्पस्ते यथा भवेत् ।। २९ ।।
तथापि नाभवत्कम्पस्तत्र स्थाणुरिव स्थितः ।
उत्तरे भारते वर्षे वने जनर्विवर्जिते ।। ३० ।।

प्रदृष्ट्वा ते तपोभङ्गं त्वां शशाप शचीपतिः ।
प्रवृत्तो मत्पदं नेतुं यतस्त्वं दृष्टो भो द्विज ! ।। ३१ ।।
न वर्षणैश्चलितस्त्वं न वात्याभिः प्रकम्पितः ।
तस्मात्त्वं हिमसंयुक्तः पर्वतोऽपि भविष्यसि ।। ३२ ।।
इति श्रुत्वा तदेन्द्रोऽपि जगाम ब्रह्मणोऽन्तिकम् ।
कथयामास तत्सर्वं ब्रह्माणं क्रोधमूर्च्छितः ।। ३३ ।।
भो ब्रह्मन्निन्द्रकर्माख्यो मुनिरस्ति महीतले ।
स स्वयं मत्पदं नेतुं कुरुते दुश्चरं तपः ।। ३४ ।।
तच्छ्रुत्वा च जगामाहं मुनिरूपेण तत्र वै ।
निवर्त्तयामास भृशं न निवृत्तस्ततोऽभवत् ।। ३५ ।।
निजं च कथयामास ब्रह्मा त्वमिति ते पुरः ।
ज्ञात्वा ब्रह्मेत्यसौ शीघ्रमुक्तवान्नक्षिमिलनम् ।। ३६ ।।
ब्रह्माणं प्राह किमुत भो निवर्त्तयति मां प्रभो ।
निवर्त्तयन्ति किं धर्मात् त्वादृशा धर्मशीलकाः ।। ३७ ।।
उत्साहेत्याह स त्वां भो कुरु त्वं विप्रमेव च ।
नोचेद् भविष्यति महान् त्वत्तो जगदुपद्रवः ।। ३८ ।।
जगद्विध्वंसनं कर्त्तुमिन्द्रः क्रुद्धः प्रवर्त्तते ।
त्वां च चालयितुं घोरैर्हिमवात्याभिवर्षणैः ।।३९ ।।
प्रवृत्तोऽपि न शक्तो यत् ततस्त्वां च शशाप सः ।
अशक्तो मत्पदं नेतुं पर्वतस्त्वं भवेति च ।।४० ।।
तद्गत्वा कथयामास मां ततोऽहं तवान्तिकम् ।
आगत्य त्वां कथितवान् हितार्थं तव सत्तम ।।४१ ।।
ये चेत्तदा भविष्यन्ति गिरिरूपं तदेव हि ।।४१ ।।

श्रीभगवानुवाच

इन्द्रकर्मा च तत् श्रुत्वा भीतः शब्दरसत्तम ।
निवृत्तस्तपसो घोरात् प्रार्थयामास तं विधिः ।।४२ ।।

इन्द्रद्युम्न उवाच

निवृत्तोऽहं महाभाग परं तस्माद् विभेम्यहम् ।
वारुणीपर्वताद्दोषान्मोचय त्वं कृपां कुरु ।।४३ ।।
तमुवाच ततो ब्रह्मा पूर्वतत्त्वं हिताय ते ।
भविष्यसि यतस्त्वं हि गिरीन्द्रो हिमवानिति ।। ४४ ।।
भविष्यति सतां स्थानं पवित्रं पुण्यमुत्तमम् ।
मेना नाम्नी सुरस्त्री ते भार्य्यापीह भविष्यति ।। ४५ ।।
देव पर्वतरूपि त्वं भविष्यसि हिमालय ! ।
महामाया हि दुर्गा च भविष्यति सुता तव ।। ४६ ।।
महादेवोऽपि जामाता भविष्यति तवैव हि ।
तस्मात्ते पर्वताद् देहान्मोक्षोऽपि भविष्यति ।। ४७ ।।

श्रीशिव उवाच

एवं त्वां कथयित्वा च ब्रह्मणि स्वपुरं गते ।
तत्रापि तपसः स्थाने मुनिरूपस्य तस्य ते ।। ४८ ।।
बभूव तत्क्षणादेव हिमवद्रूपमीदृशम् ।। ४९ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे हिमालयसम्भवो नाम द्वात्रिंशोऽध्यायः ।।

त्रयस्त्रिंशोऽध्यायः

मणिलब्धमेनोपाख्यानम्

विश्वावसुरुवाच

कथितं भगवान् विष्णो ! महादेवं प्रतिस्तुतः ।
महादेवस्य वृत्तान्तं कथनं च हिमालये ।। १ ।।
इन्द्रकर्मा तपश्चापि तस्य पर्वत जन्म च ।
तदुत्तरं च किं जातं तद् वदस्व रमापते ।। २ ।।

श्रीभगवानुवाच

शृणु विश्वावसो त्वं च यदुक्तं पुनरीश्वरः ।
हिमालयं स्वजामातुः शिवस्य कथनानि च ।। ३ ।।

भुवनेश्वर उवाच

संश्रूयतां त्वया मत्तो गिरिराज हिमालय! ।
जामात्रा ते यतोऽहं भो त्वय्येवाभूदनुग्रह ।। ४ ।।
त्वद्गृहे चावसं यस्माच्छुशुस्वास्य हि कारणम् ।
पत्नीयाते मम श्वश्रू मेना नाम्नी पतिव्रता ।। ५ ।।
सार्च्चयन्ती महामायां भक्त्या दुहितृकामया ।
महालक्ष्मीः समाश्वास्य सा दानसम्प्रदायिनी ।। ६ ।।
त्रैलोक्यदुर्लभं रूपं सौन्दर्य्येणातिदुर्लभम् ।
यत्सकाशादीयं वां भो! दम्पत्योश्च भविष्यति ।। ७ ।।
ईदृशी दुहिता सौम्या निश्चयं मे भवेद्यदि ।
एवं सा कामनां कृत्वा मेना दुर्गामपूजयत् ।। ८ ।।
सम्पूजिता महामाया दुर्गाऽपि मम बल्लभा ।
दातुं दुहितरं तस्यै नवदुर्गेदृशीं स्त्रियम् ।। ९ ।।

मां विना त्रिषु लोकेषु वर्त्तते नेदृशी वधूः ।
अहमेवार्पितश्चास्मि विचचार सुतेति च ।। १० ।।
विचार्य्यैवं च सा दुर्गा दुहिताभूद्गिरीश्वरे ।
मेनायास्तव भार्य्यायाः मनश्चासीत्प्रचोदितम् ।। ११ ।।
मम प्रियतमा दुर्गा मम देहार्द्धभागिनी ।
मम भक्तिपरा चाभूद् वाल्यविधौ यदृच्छया ।। १२ ।।
श्रद्धया युवयोः पित्रोः श्रीश्वरे मयि सर्वदे ।
भक्तिर्भवति नित्येति भक्तिमयी चकार सा ।। १३ ।।
तस्मान्मम विवाहः स्याद्युवयोः स्वीकृतेऽनघ ।
स्नेहश्चैवादरश्चैव जातो वां च महान्मयि ।। १४ ।।
मह्यं प्रदत्तवांस्त्वञ्च पार्वतीं तनयां मुदा ।
ततः प्रसादः स्नेहश्च युवयोर्मयि तादृशः ।। १५ ।।
अभवत्त्वं यतस्तादृक् न्यवसं भवदालये ।
अधुना त्वत्प्रसादार्थमागतोऽस्मि तवालयम् ।। १६ ।।
यास्यामि प्रियया सार्द्धं पार्वत्यैकाम्रकं वनम् ।। १७ ।।

श्रीभगवानुवाच

श्रुत्वा हिमालयो वाक्यं महादेवस्य निश्चितम् ।
करुणो विक्लवो दीनः कातरो भयचञ्चलः ।। १८ ।।
आर्त्तस्तथैव मेना च मैनाकश्चैव पर्वतः ।
भुवनेश्वरपादाब्जे पार्वत्याश्च पतन्ति ते ।। १९ ।।
इति सर्वे च रुरुदुर्गदन्तो रोदनान्विताः ।
तान् दृष्ट्वा पार्वतीनाथः पार्वती च ससंभ्रमम् ।। २० ।।
श्वश्रूश्वशुरयोर्दुःखो जातं इति च मन्यते ।
एवं विचार्य्य स शिवः प्रोत्थाप्य श्वशुरं निजम् ।। २१ ।।

श्वश्रूञ्च तत्प्रमोदार्थमुवाच वचनं हितम् ।
अशोचतां महाभागौ दिनानि कतिचिद्गृहे ।। २२ ।।
तिष्ठामि परितोषार्थं युवयोः सह दुर्गया ।
मैनाकं शान्तयामास पार्वती भ्रातरं विभुः ।। २३ ।।
क्व स्थितौ वां त्यक्तवतौ पार्वतीपरमेश्वरौ ।
ततः कोटिनिधिं लेभे हिमवान् सह मेनया ।। २४ ।।
सखायौ तात मेनाकौ सानन्दौ पर्वतोत्तमौ ।
हिमालयो महपूजां चकारास्य दिने दिने ।। २५ ।।
शिवं प्रति कृपासिन्धुं सभार्य्यं भक्तवत्सलम् ।
श्रुत्वा बाणासुरः सर्वं स्वप्रभुं भुवनेश्वरम् ।। २६ ।।
तत्राजगाम सम्भारान् गृहीत्वानन्दसङ्कुलः ।
रणश्च पूजयामास तथैव भुवनेश्वरम् ।। २७ ।।
एवं दिनानि कतिचिद्युक्तान्यत्र महोत्सवैः ।
ततो विचार्य्य सर्वे ते नागो मैनाक एव च ।। २८ ।।
निपेतुः शिवपादाब्जे रणबाणासुरौ तथा ।
उचतुः वचनं शम्भुं सर्वे प्राञ्जलयश्च ते ।। २९ ।।
देव देव महादेव भक्त्या स्तवामहे वयम् ।
स्थातव्यमत्र भवता प्रार्थयामो वयं विभो ।। ३० ।।
तच्छ्रुत्वा प्राह तान् सर्वान् तिष्ठामो बहुशः स्थले ।
युष्मासु मम भक्तेषु यूयं हि पुरुषोत्तमाः ।। ३१ ।।
एतस्मिन्नेव समयेऽलङ्कारैर्बहुभिश्च ते ।
भूषयामासुरीशं तं भक्तिश्रद्धासमन्विताः ।। ३२ ।।
यदा समुद्रादागन्तुं मैनाको मन आदधे ।
समुद्रो मित्रविच्छेदात्कातरः प्रेमविह्वलः ।। ३३ ।।

मिलनाय सदा चित्ते मैनाकस्य निजस्य च ।
प्रददौ च मणिं तस्मै मित्राय स समादरम् ।। ३४ ।।
पितृवाक्याद् ग्रहीष्यामीत्येवं मैनाकपर्वतः ।
ररक्ष नालङ्कृतवान् मणिं पित्रनुरोधतः ।। ३५ ।।
पित्रे समर्पितं पूर्वं तेन पित्रार्पितं पुनः ।
महादेवाय जामात्रे प्रदत्तं पारितोषिकम् ।। ३६ ।।
महादेवोऽपि तान् सर्वान् आमन्त्र्य प्रहसन्नपि ।
ददौ मणिं तं नागाय दत्वा तांश्चाब्रवीदिदम् ।। ३७ ।।
शृणुध्वं भो महाभागा नागोऽयं मम मण्डनम् ।
विष्णोः प्रियं तदस्मै च प्रददौ मणिमुत्तमम् ।। ३८ ।।
प्रदाय मणिनागख्यमदधत्तं तदग्रतः ।
भविष्यति प्रधानं भो पर्वतानामिह स्थले ।। ३९ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे मणिलब्धमेनोपाख्यानं नाम त्रयस्त्रिंशोऽध्यायः ।।

चतुस्त्रिंशोऽध्यायः

शैवक्षेत्रनिरूपणम्

श्रीभगवानुवाच

शृणु विश्वावसो पूर्वं शम्भुना कथितं तु यत् ।
तिष्ठामि बहूक्षेत्रेषु तान् प्रति प्रणतान्निजान् ।। १ ।।
ततः पप्रच्छुस्ते सर्वे प्रभुं श्रीभुवनेश्वरम् ।
वद त्वं पार्वतीकान्त यत्र यत्रैव तिष्ठसि ।। २ ।।

श्रीशिव उवाच

पश्चिमे मणिनागस्य मौनाक दक्षिणस्थले ।
अहं तिष्ठामि तत्रैव नाम्ना श्रीकुहरेश्वर ।। ३ ।।
कुहरं मम तत्रापि गङ्गाजलपरिप्लुतम् ।
ततो वै निर्झरं वारि धारात्रयविभागतः ।। ४ ।।
कुहरेश्वरो कुण्डोऽभूद्धारैका व्यक्तरूपिणी ।
आगत्य मणिनागस्य कुहरान्तःपथेन तु ।। ५ ।।
ऐशान्यमनुगच्छन्ती दिशं पुण्यतमा नदी ।
मणिनागस्य सीम्ना तु सापि मन्दाकिनी स्मृता ।। ६ ।।
भवेद्धाराद्वयं तस्या नितरां श्रीघ्रगामिनीम् ।
निपतन्ती गिरेर्याधः पूर्वदक्षिणगामिनी ।। ७ ।।
तस्मान्मन्दाकिनी नाम्नी बभूवेयं नृपोत्तम ।
नदीस्वभावात्तद्धारा वृद्धा भवति वर्षणैः ।। ८ ।।
ग्रीष्मकाले विलीनास्ताः भवत्यन्तः क्वचित्पुनः ।
तस्याश्चापधारा नित्यं नितरां शिघ्रगामिनी ।। ९ ।।
पदान्तिकाद्धावमाना गङ्गा नाम ततोऽभवत् ।
झं झं गिरेः समुद्भूता वंशमूलविनिसृता ।। १० ।।
वंशा नाम भवेद्धारा न लीना पुण्यदा सदा ।
मन्दाकिन्यां तु यः स्नाति दानादि हि ददाति च ।। ११ ।।
सर्वं गङ्गासमं पुण्यं तर्पणं तु हि सत्तमैः ।
कन्यातुलामासयुगेऽमावास्यायुगलेऽपि च ।। १२ ।।
सङ्क्रान्त्यां कन्यतुलयोः पौर्णमासीद्वये तथा ।
स्नानं दानं तर्पणं च तस्यां कोटिगुणं भवेत् ।। १३ ।।
मन्दाकिनि! नमस्तुभ्यं गङ्गे पुण्यजलप्लुवे ।
कुहरेशसमुद्भूते सर्वपापं प्रमोचय ।। १४ ।।

इमं मन्त्रं समुचार्य्य स्नानं कुर्य्यात्तु तज्जले ।
गङ्गास्नानसमं पुण्यं नरः प्राप्नोत्यसंशयम् ।। १५ ।।
मणिनागात् क्रोशयुगे दक्षिणस्यां दिशि त्वहम् ।
लिङ्गरूपेण तत्रास्ति धवलेश्वरशङ्करः ।। १६ ।।
पश्चात्कमलया सोऽहं पूजितो भक्तियुक्तया ।
कमलेश्वर नामापि वर्त्तेऽहं तत्र तद्दिनात् ।। १७ ।।
ततो नागवलस्यापि एतद्युक्तं मतान्तरम् ।
तत्पीठं मम सर्वेषां साधकानां फलप्रदम् ।। १८ ।।
ते लभन्ते फलं सद्यस्तत्र मां पूजयन्ति ये ।
उपदेष्टा गुरुः प्रोक्तस्तद्गुरुः परमो गुरुः ।। १९ ।।
गुरूणां चैव सर्वेषां परात्परगुरुस्त्वहम् ।
तत्पश्चिममुखः सोऽहं गुरुत्वादुपदेशदः ।। २० ।।
यत्रान्तश्चोन्मुखो वर्त्ते तत्पीठं परमं मम ।
तत्रोपदेशं कुर्वन्ति गुरवश्चरणं जपम् ।। २१ ।।
तेषां कर्णेऽप्युपदिशाम्यहं साक्षादसंशयः ।
तत्राहं पश्चिममुखस्ततोऽहं पीठमुत्तमम् ।। २२ ।।
गोदोहनं ममैवात्र महारोगार्त्तिनाशनम् ।
ममाभिषेकोऽप्यत्रैव शत्रुभ्यस्तापनाशनम् ।। २३ ।।
तस्मादिशितुः पूर्वस्यां क्रोशं नागवनादपि ।
नीलकण्ठेश्वरो देवः सर्वकामफलप्रदः ।। २४ ।।
वर्त्तेऽहं शृणु तच्छ्रेष्ठः सर्वदा लिङ्गरूपधृक् ।
उत्तरस्यां नागवनाद्दिशि क्रोशचतुष्टये ।। २५ ।।
तिष्ठामि सर्वदा तत्र नाम्ना तारेश्वरस्त्विति ।
तारयामि जनान् सर्वान् महारोगातिविह्वलान् ।। २६ ।।

ततस्तन्नाम्नैव मे स्यात्कथितं भुवि सर्वतः ।
पश्चिमाभिमुखस्तत्र वर्त्तेऽहं सर्वसिद्धिदः ।। २७ ।।
दर्शनान्मे जपात्तत्र फलकोटिगुणं भवेत् ।
तारेश्वरस्य पूर्वेऽस्ति नाम्ना कालनदीति च ।। २८ ।।
सा पादान्मणिनागस्य निःसृता पापनाशिनी ।
उत्तराभिमुखी याति नदीं चित्रोत्पलां प्रति ।। २९ ।।
तत्र स्नात्वा नरो याति मम लोकमनामयम् ।
ऐशान्यं दिशि तस्यैव पञ्चक्रोशेऽस्मि सर्वदा ।। ३० ।।
हठनागररूपत्वान्नाम्नाहं हाटकेश्वरः ।
ममैकादशलिङ्गानि तत्र सन्त्यपि सत्तम ।। ३१ ।।
तत्र स्थल्यां मम क्षेत्रमेकाम्रवनसन्निभम् ।
हाटकेशस्य महिमा भुवि वक्तुं न शक्यते ।। ३२ ।।
हठेन ये प्रकुर्वन्ति तत्पुरस्थाने चोत्तमाः ।
नृत्यं गीतं तथा वाद्यं मुखवाद्यं यदृच्छया ।। ३३ ।।
तालाश्च सिद्धगीतानि तथा शिवजयध्वनीन् ।
शिवशम्भो महादेवेत्युच्चैः रावं भजन्ति ये ।। ३४ ।।
सर्वपापानि निष्क्रम्य तदङ्गाद्यान्ति तत्क्षणात् ।
काकीभूयः पलायन्ते तानि तान्येव सत्वरम् ।। ३५ ।।
तत्पूर्वदिशि यत्कुण्डं वर्त्तते तस्य सन्निधौ ।
प्रविश्य प्रतिगच्छन्ति पातालं नरकं तथा ।। ३६ ।।
काकीकुण्डं तु तन्नाम्ना वर्त्तते सर्वदा भुवि ।
एकदा ब्राह्मणः कश्चित्कुलाल्यो नाम वातुलः ।। ३७ ।।
मदेन ब्राह्मणाघातं गवां घातं करोति सः ।
दुराचारी सुरापायी सर्वपापं करोति च ।। ३८ ।।

हाटकेशस्थले तत्र प्रविवेश यदृच्छया ।
शिवभक्तैः सार्द्धं तत्र चकार नाटकादिकम् ।। ३९ ।।
वातुलत्वेन हर्षेण तालं स्वमुखवादिनम् ।
तत्क्षणादेव तस्माद्धि चैकीभूयाघसंहतिः ।। ४० ।।
दृश्यमाना तत्तैः शब्दैः बहिर्भूय पलायिता ।
लोष्ठैः संताड्यमानश्च जनैः सुदर्शिभिर्द्रुतम् ।। ४१ ।।
काकीकुण्डं समुद्दिश्य निममज्ज भयातुरः ।
दृष्टैतञ्चक्रिरे सर्वे नाट्यतालादिवादनम् ।। ४२ ।।
तेषां शब्दास्तथा तेषां पातालवर्त्मगामिनी ।
जग्मुः प्रतिश्रुतिर्वत्स तेषु तत्र ससंभ्रमम् ।। ४३ ।।
बहिर्बभूव पातालाज्जालवुद्वुदसंहतिः ।
त्राससङ्क्रमिणां तत्र निम्नपङ्केषु मज्जनात् ।। ४४ ।।
सर्वदा दृश्यते तत्र जलवुद्वुदसंहतिः ।
नृत्यादिलोष्ट्रक्षेपणं कुर्वद्भिस्तत्र मानुषैः ।। ४५ ।।
दृश्यते सर्वदा तत्र न सन्देहोऽस्ति कारणम् ।
सिद्धक्रोशे ततो वर्त्ते चाहं नाट्येश्वराख्यया ।। ४६ ।।
तिष्ठामि सर्वदा तत्र लिङ्गरूपी महेश्वरः ।
नीलकण्ठात्पूर्वभागे नाम्ना रामेश्वरोऽप्यहम् ।। ४७ ।।
पश्चिमाभिमुखो वर्त्ते सिद्धिदः सर्वकामिनाम् ।
उत्तरे भेकशैलस्य पार्श्वे तिष्ठाम्यहं सदा ।। ४८ ।।
फलदः सर्वलोकानामीशानेश्वर नामकः ।
सुनन्दा नामास्ति गिरिरेतत्सीमनि सर्वदा ।। ४९ ।।
सिद्धखड्गानि सन्त्यंत्र पश्चिमाभिमुखानि च ।
यदा सङ्क्रमते सूर्य्यो मेषराशिं तदा जनाः ।। ५० ।।

सम्भारैर्बहुभिस्तत्र प्रकुर्वन्ति महोत्सवम् ।
अन्यानि सन्ति लिङ्गानि बहुन्येवात्र सर्वदा ।। ५१ ।।
कियन्त्यन्यानि कथ्यन्ते कथितं सद्भिरेवहि ।
एतेऽत्र शम्भवः प्रोक्ताः शक्तिरेका प्रकीर्त्तिता ।। ५२ ।।
मणिनागेश्वरी नाम्ना दुर्गा चान्तर्हितास्त्यपि ।
मणिनागं प्रत्युवाच पुनः स भुवनेश्वरः ।। ५३ ।।
मणिनाग तवाग्रेऽस्मिन् वर्त्तते दृष्टिगोचरे ।
भेको भेकी च तौ दृष्ट्वा तव तृप्तिर्भविष्यति ।। ५४ ।।
दृष्ट्वा तौ न क्षुधाल्पोऽपि भविष्यति न संशयः ।
क्षुन्निवृत्तिस्तयोरेव दर्शनात्ते भविष्यति ।। ५५ ।।
नैवेद्यं दृष्टिपतितं देवानां तृप्तिकारणम् ।
न खादन्ति मुखेनैव नैवद्यं देवताः स्वयम् ।। ५६ ।।
देवत्वं तत्पथि नित्यं वर्त्तसे सृष्टिगोचरे ।
मैथुनं शैलयोरेतत्स्थास्यति क्ष्माधरात्मकम् ।। ५७ ।।

मणिनाग उवाच

पर्वतः स कथं भेको भेकी वा वद शङ्करः ! ।
सखायौ जायेते मेऽत्र श्रोतुमिच्छाम्यहं ततः ।। ५८ ।।

महादेव उवाच

पुरा तत्र स्थितः कश्चिन्महाकायोऽहितुण्डिकः ।
भार्य्या चा तादृशी तस्य कृत्वार्थानां च सङ्ग्रहम् ।। ५९ ।।
धृत्वा स बहुशो भेकान्सर्पान्खादयति स्वयम् ।
भेकहत्यां प्रकुर्वीत स्ववृत्या पापरूपया ।। ६० ।।
पापराशिरभूद्भेको गिरिरूपः श्रुतस्थले ।
भार्य्या च तादृशी भेकी बभूव गिरिरूपिणी ।। ६१ ।।

दैवेना निहतौ तौ हि भवतस्तृप्तयेऽधुना ।
भेकान् ददाति सर्पेभ्यो यतः स निजप्रेषणैः ।। ६२ ।।
भेकरूपेण सर्पस्य तृप्त्यर्थं तौ बभूवतुः ।
मणिनाग तवाग्रे यत् स्थानमेतस्य सन्निधौ ।। ६३ ।।
अन्तर्वेदीति तत्प्रोक्तं समता क्रोशमात्रतः ।
एतत्क्षेत्रोत्तमं पुण्यं सर्वपापप्रणाशनम् ।। ६४ ।।
धर्मवृद्धिकरं स्थानं प्रत्यक्षी भवतः स्वयम् ।
देवतात्मा गुरुस्त्वं हि शिवाः सन्ति समं ततः ।। ६५ ।।
धर्मोऽपि वर्द्धते यत्र तद्वै क्षेत्रस्य लक्षणम् ।
एतन्मम प्रियस्थानं तिष्ठाम्यत्र सदानघ ।। ६६ ।।
तस्मादेतन्महाक्षेत्रं जानीहि गिरिसत्तम ! ।। ६७ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे शैवक्षेत्रनिरूपणं नाम चतुस्त्रिंशोऽध्यायः ।।

पञ्चत्रिंशोऽध्यायः

दक्षेश्वरमाहात्म्यम्

विश्वावसुरुवाच

कथितं भगवन् सर्वं वृत्तान्तमपि विस्मयम् ।
त्वया नागवनीं शैवां कथयेदं मुने मम ।। १ ।।
त्वया च पूर्वं कथितं बाणासुरपुरीं प्रति ।
कथयामि महाबाहो प्रसङ्गं तस्य सम्प्रति ।। २ ।।

श्रीभगवानुवाच

शृणु विश्वावसो ! सम्यक् प्रश्नेन स्मारितोऽप्यहम् ।
कथां बाणापुरस्येमां पुण्यां सत्प्रीतिदायिनीम् ।। ३ ।।
यदा स कथयामास कथां नागवनस्य ताम् ।
तदा बाणासुरः शम्भुं नमस्कृत्येदमब्रवीत् ।। ४ ।।
कथितं भो महादेव ! त्वया नागवने यथा ।
वर्त्तन्ते तव लिङ्गानि शक्तयस्तीर्थेष्वेव च ।। ५ ।।
इदानीं मां कथय भो मत्पुरे यत्र यत्र वै ।
तिष्ठसि त्वं महादेव सम्यक् तत्तु शृणोम्यहम् ।। ६ ।।

श्रीभुवनेश्वर उवाच

शृणु बाणासुर त्वं मे भक्तः प्रियतमो ह्यसि ।
त्वत्पुरे यत्र यत्राऽस्मि स्वतस्त्वां कथयाम्यहम् ।। ७ ।
शक्त्याश्च कथयाम्येवं तीर्थान्यन्यानि यानि वै ।
त्वयाहं पूर्वतः सम्यगीश्वरस्ते यतः स्तुतः ।। ८ ।।
वाणेश्वर इति ख्यातो वर्तेऽहं ते पुरे सदा ।
त्वत्पूजितानि लिङ्गानि कोटिसंख्यानि यानि च ।। ९ ।।
तानि स्युर्बाणनामानि बाणोऽस्ति मम नाम च ।
दक्षेश्वरश्च नाम्नाहं वर्त्ते तव पुरेऽनघ ।। १० ।।
देवी भगवती नाम्ना वर्त्तते तत्र पार्वती ।। ११ ।।

बाण उवाच

कथं दक्षेश्वर नाम्ना भवसि त्वं पुरे मम ।
कथयैतन्महाशम्भो शृणोमि भवतोऽप्यहम् ।। १२ ।।

श्रीमहादेव उवाच

शृणु बाण पुरावृत्तप्रसङ्गं कथ्यते मया ।
अस्मिंकाले यदा यज्ञं चक्रे दक्षप्रजापतिः ।। १३ ।

तदा न गणयामास मां च स्वां तनयां जडः ।
यज्ञं द्रष्टुं मनश्चक्रे पितुः सा मे प्रिया सती ।। १४ ।।
जगाम यज्ञशालां च दृष्ट्वा दक्षः सुतां क्रुधि ।
तदग्रे मां च तामपि भर्त्सयामास निष्ठुरः ।। १५ ।।
दक्षः कर्मजडस्तेन क्रुद्धेन भर्त्सिता यतः ।
प्रविवेशोऽग्नि कुण्डेऽपि यज्ञस्येयं हि मे सती ।। १६ ।।
तच्छ्रुत्वाहं गतस्तत्र सर्वैर्भूतगणैः सह ।
अच्छिनं तच्छिरस्येनं चपेटेन क्रुधा ज्वलन् ।। १७ ।।
पुनः प्रसादितो देवैः कृतवान् तं सजीवितम् ।
पशोश्छागस्य शिरसासौ बभूव समस्तकम् ।। १८ ।।
चकार यज्ञं सम्पूर्णं सदक्षो मदनुग्रहात् ।
अर्पयामास च निजं सकुटुम्बं पुरं हि मे ।। १९ ।।
ततस्तदवधि कृत्वा ममाभूत्पुरमेव तत् ।
पूजितोऽहं तदा तेन प्रार्थितश्च पुनः पुनः ।। २० ।।
भगवत्या समं तत्र निवसन्नित्यमेव तु ।
दक्षेश्वर इति ख्यातः ख्याता भगवती शिवा ।। २१ ।।
कोटिवारं पुरातत्त्वं तत्रापि कृतवानहम् ।
भगवत्यास्तु भार्य्याया अधिकारप्रशान्तये ।। २२ ।।
ये पूजयन्ति तां देवीमुपहारैः सुविस्तरैः ।
विविधैर्वस्तुभिश्चैव गन्धपुष्पैः प्रदीपकैः ।। २३ ।।
चण्डिकास्तोत्रपठनैर्देवीसूक्तादिभिस्तथा ।
ते प्राप्नुवन्ति महतीं श्रियं कामांश्च पुष्कलान् ।। २४ ।।
भगवत्यास्तु माहात्म्यं शृण्वाना हि सुविस्तराम् ।
यदा प्रचण्डा सा दुर्गा रोषेणाप्रतिदारुणा ।। २५ ।।

पपौ तच्छोणितं तत्र स्वगणैः सह दुर्मदा ।
दक्षरोषोद्भवं शश्वद्भूमौ प्रवहदद्भुतम् ।। २६ ।।
निवारयितुमेषादि नासीच्छक्या यतस्ततः ।
राम रामेति रामेति तत्कर्णे कथितं मया ।। २७ ।।
तदा भगवती देवी जाता भगवती शुभा ।
त्यक्त्वा शोणितपानं सा दीक्षिताऽस्मिन् हरिव्रते ।। २८ ।।
माघमासस्तु तत्कालस्तस्मिन्वासरे चाभवत् ।
तदोक्तं तु मया तस्मै व्रतमेकादशीभवम् ।। २९ ।।
भीमरूपासि देवि त्वमेकादश्यां व्रतं कुरु ।
भीमरूपं परित्यज्य सौम्या भव सदाशिवे ।। ३० ।।
एकादश्यां तु शुक्लेऽस्मिन् माघमासे वृषध्वजः ।
पार्वतीं सौम्य सम्प्रार्थ्य महापुण्यां चकार सः ।। ३१ ।।
भीमया दुर्गया यत्तत्कृतमेकादशीव्रतम् ।
सा भ्यैम्यैकादशी प्रोक्ता विख्याता सार्वलौकिकी ।। ३२ ।।
ययाचे दर्शनं विष्णोर्भैमीयं मम दुर्लभा ।
कथितं मणिनागस्य मायाकृतस्वरूपताम् ।। ३३ ।।
मणिनागं महामायाप्रख्यं विष्णुस्वरूपिणम् ।
तत्र स्थित्वा सदा पश्य नीलशैले स्थितं हरिम् ।। ३४ ।।
एकादशी यदा माघे शुक्लपक्षे तु पुण्यदा ।
तदा तव समीपेऽपि करिष्यन्ति व्रतं जनाः ।। ३५ ।।
त्वया समन्तु ते सर्वे महाभागवतोत्तमाः ।
इदं मया तु कथितं सर्वं च भवतां पुरः ।। ३६ ।।
अर्थेन योजयन् लोकान् तत्रस्थान् बहुनापि यत् ।
तदर्थं योजनं नाम लभेत पुरमुत्तमम् ।। ३७ ।।

दक्षस्य शीर्षं संच्छिन्नं यदा मम चपेटया ।
शोणितोच्छलितं भूमौ क्लेदयत्तत्पपात ह ।। ३८ ।।
शोणिताक्तं पुरं यस्मात्तच्छोणितपुरं तु तत् ।
कूटवद्दृश्यते शीर्षं कूटशीर्षं तु नाम तत् ।। ३९ ।।
उमा बलवती तत्र ततस्तस्या ह्युमाबलम् ।
यदा भगवती रोषाद् दक्षयज्ञाग्निगामिनी ।। ४० ।।
अग्नेरुत्थाय सा तस्मिन् पुरीरोधं चकार ह ।
कूटवद्दुष्प्रवेश्यं च दुर्दिशं प्राणिनामपि ।। ४१ ।।
द्वाराणि च चतुर्दिक्षु कारिणी वह्निवल्लभा ।
द्वारे ररक्ष धनुषा समं परिजनान्निजान् ।। ४२ ।।
ततस्तन्नाम विख्यातं लोकेऽस्मिन् मार्गधेनुकम् ।
देवीकोटो बाणपुरं कोटिवर्षमुमाबलम् ।। ४३ ।।
स्याच्छोणिपुरं चार्थे योजनं मार्गधेनुकम् ।
एतानि सप्तनामानि शृणुते यः पुरस्तु ते ।। ४४ ।।
पुरस्य तव नामानि कथितानि मया व्रतम् ।
व्यक्तानि तत्र लिङ्गानि गुप्तानि सुबहून्यपि ।। ४५ ।।
वर्त्तते तत्पुरे बाणास्तत्पुरं तु समं स्थलम् ।
दक्षे गते वलिस्तत्र मां प्रसाद्य महासुरः ।। ४६ ।।
चकार च महायज्ञं दानं भूतेभ्यो हि महत् ।
कलौ गते त्वत्पितरि राजाभूत्तत्परे भवान् ।। ४७ ।।
तव भ्राता रणस्तस्मादुत्तरे कृतवान् पुरम् ।
केदारेश्वर नाम्नाहं सीमनि रणबाणयोः ।। ४८ ।।
मिश्रितायां च युवयोर्वर्त्तेऽग्रे कथितं तव ।
कुहरेश्वरकुण्डान्मे धारैका च बहिः स्फुटा ।। ४९ ।।

वहन्ती तत्पुरे बाणो गुप्ते कुण्डे च तत्र वै ।।
ब्रह्मशक्त्या युते तत्र निपत्य गलितात्ततः ।। ५० ।।
व्यक्ता व्यग्रा सशब्दा च याति पूर्वां दिशं स्फुटा ।
गत्वा पतति सा धारा चिल्लिकायां च सत्तम ।। ५१ ।।
तत्र स्नानं च कुर्वन्ति ये तेषां त्वं फलं शृणु ।
माघमासे प्रयागस्य स्नानतुल्यं फलं भवेत् ।। ५२ ।।
कुहरेश्वरसंपृक्तात्कुहराध्वनिनिःसृता ।
ब्रह्मकुण्डं च ददाति प्रयागस्नानजं फलम् ।। ५३ ।।
यथा त्रिमार्गगा गङ्गा तथात्र कुहराध्वगा ।
प्रणमामि सदाहं तद् ब्राह्मीकुण्डं नमोऽस्तु ते ।। ५४ ।।
चिल्लिकासङ्गमे यस्तु तत्र स्थानं करोति वै ।
तत्फलं द्विगुणं प्रोक्तं चिल्लिकायां महोदधौ ।। ५५ ।।

बाण उवाच

कुहरेश्वरकुण्डे यज्जलं तिष्ठति शङ्कर ।
तज्जलं कुत्र आयाति पर्वतस्य कथं भवेत् ।। ५६ ।।
कुहरेश्वरकुण्डस्थं जलं चेद्गुप्तमुत्तमम् ।
स्फुटं भवति कस्मात्तद् दिव्यं कथय मां प्रभो ।। ५७ ।।

श्रीशिव उवाच

कुहरेश्वरकुण्डे यज्जलं तिष्ठति बाण भो ! ।
स यन्त्रितं बहिर्गच्छेद्यदि मज्जेत्ततो जगत् ।। ५८ ।।
भित्त्वा ब्रह्माण्डभाण्डं तदुत्थं च कारणं जलम् ।
रन्ध्रमार्गेण कुण्डे तु तत्रैव भवति स्फुटम् ।। ५९ ।।
सन्ततं तत्र तत्रैव कुहरे निवसाम्यहम् ।
ततः संयन्त्रिता धारा नोत्तिष्ठेदसुरेश्वर ।। ६० ।।

कुशाग्रबिन्दुमात्रं तु तदुत्तिष्ठेन्मदिच्छया ।
मल्लिङ्गं प्लावयित्वा सैकधारा वहति स्फुटम् ।। ६१ ।।
पवित्रं कुरुते राष्ट्रं तवैवासुरकुञ्जर ।
एकधारा तु तस्यापि पतति पर्वतादधः ।। ६२ ।।
दक्षिणं याति मार्गेण कुहरे तावता स्फुटा ।
अस्ति कृष्णगिरेः पार्श्वे चोत्तरे लिङ्गमेव मे ।। ६३ ।।
नाम्ना धारेश्वरस्तं तु सा धारा प्लावयत्यपि ।
ततो गच्छति सा धारा सुपुण्या लवणार्णवम् ।। ६४ ।।

बाण उवाच

कोऽसौ कृष्णगिरिर्नाम वर्त्तते भुवनेश्वर ।
तदुत्तरे तु कस्मात्त्वं वर्त्तसे तद् वदस्व मे ।। ६५ ।।

श्रीशिव उवाच

यदा वात्याभिरुग्राभिर्निहतो नीलपर्वतः ।
स तत्र रोहति तदा नित्यनाम्नैव तेन वै ।। ६६ ।।
नीलपर्वतमेवैतदुपरि ध्यानगोऽप्यहम् ।
निवसामि चतुर्दिक्षु शृणु नामानि बाण मे ।। ६७ ।।
पूर्वे वारीश्वरो नामा माणिक्येशस्तु दक्षिणे ।
पश्चिमे पश्चिमेशोऽहं धारेशश्चोत्तरे पुनः ।। ६८ ।।
क्रोशे तु दशसङ्ख्येऽस्य मणिनागगिरेरपि ।
दक्षिणे चास्ति संसर्गो द्वयोः पर्वतयोस्ततः ।। ६९ ।।
धारैका वर्त्तते तत्र कुहरान्निर्गता सती ।
रविसङ्क्रमणे पुण्ये तत्र यः स्नाति मानवः ।। ७० ।।
गङ्गास्नानसमं पुण्यं फलं प्राप्नोत्यसंशयम् ।
धारा धारेशसंसर्गात्पवित्रा पापनाशिनी ।। ७१ ।।

त्वयि स्नानं करोम्यहं गङ्गास्नानसमं कुरु ।
इमं मन्त्रं समुच्चार्य्य स्नात्वा दानं ददाति यः ।। ७२ ।।
गङ्गायां स्नानदानेन यत्फलं तदवाप्नुयात् ।
वर्त्तेऽहं तस्य सीमनि बहुधा लिङ्गरूपधृक् ।। ७३ ।।
व्यक्तानि पञ्चलिङ्गानि तन्नामानि शृणुष्व भो ।
सिद्धेश्वरश्च माणिक्येश्वरश्चान्यो महेश्वरः ।। ७४ ।।
लाङ्गलेशस्तु ताराख्येश्वरश्चैव तु पञ्चम ।
बहूनि तत्र लिङ्गानि पुण्यानि निवसन्ति हि ।। ७५ ।।
जानीहि तानि बाण त्वं महापुण्यप्रदानि वै ।
कृष्णशैलात्समुद्भूता देवखातोऽस्ति तत्र वै ।। ७६ ।।
नाम्नासौ निर्मलझरः पुण्यदः पापनाशनः ।। ७७ ।।

बाण उवाच

कुहरेश्वरकुण्डस्य स्थानं कथय मां प्रभो ।
किं पुण्यं किं फलं तत्र ज्ञातुं श्रद्धास्ति मे विभो ।। ७८ ।।
शृणु बाण पुरावृत्तं रामो दशरथात्मजः ।
सार्द्धं लक्ष्मणसीताभ्यां गिरेरुपरि तस्य वै ।। ७९ ।।
उवास नित्यं सा तस्य क्रीडास्थाने मनोरमे ।
पूजयामास मां तत्र नाम्ना रामेश्वरस्त्वहम् ।। ८० ।।
निवसामि फलं तत्र रामक्षेत्रस्य निश्चितम् ।
कुहरेशाद् वहेद्धारा या कारुण्यजलोद्भवा ।। ८१ ।।
रामस्पर्शाद्भवेत् पुण्याधिका साप्यधिकोत्तमा ।
तस्यां यः स्नाति धारायां पुण्यायां पुरुषस्तु सः ।। ८२ ।।
पुण्यमाप्नोति नियतं गङ्गासरयूसम्भवम् ।
कारुण्याम्बुसमुद्भूते रामेशस्पर्शपावनि ।। ८३ ।।

स्नानेन मे फलं देहि गङ्गासरयूसम्भवम् ।
यस्तत्र मेषसङ्क्रान्तौ स्नानं दानं करोति च ।। ८४ ।।
गङ्गासरयूतीर्थोक्तं द्विगुणं फलमाप्नुयात् ।। ८५ ।।

बाण उवाच

पुरे रणस्य मम वा मृतानां पार्वतीपते !
का गतिः स्यात्कथय मां पृच्छाम्येतन्महाप्रभो ।। ८६ ।।

श्रीशिव उवाच

त्वत्पुरे हि मृतानां च रणस्य च पुरे तथा ।
गतिः स्यान्मम लोकेऽपि विष्णुलोकेऽपरस्य च ।। ८७ ।।
मृतानां सर्वजन्तूनां बाण नागवनेऽमले ।
गतिर्या योगयुक्तानां सा गतिः स्यान्न संशयः ।। ८८ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे दक्षेश्वरमाहात्म्यं नामो पञ्चत्रिंशोऽध्यायः ।।

षट्त्रिंशोऽध्यायः

हिमालयस्य निजस्थानप्रवेशः लड्डुकेश्वरोपाख्यानं च

बाण उवाच

उत्तरे मणिनागस्य सीमास्ति कियति भुवि ।
पश्चिमे वापि शम्भो मे कथय त्वं सुनिर्णयम् ।। १ ।।

श्रीसदाशिव उवाच

उत्तरे मणिनागस्य नाम्नाहं लड्डुकेश्वरः ।
तत् क्षेत्रमुत्तरे क्रोशाद्दशैतदश पश्चिमे ।। २ ।।

मणिनागस्य सीमास्ति तत्पर्य्यन्तोत्तरेऽसुर ।
नागक्षेत्रं तदेवेह भवेत्यपि न संशयः ।। ३ ।।
लोहनाम्नोऽसुरस्यैतत्पुरोऽप्यत्र भविष्यति ।
दुर्गस्त्वाचक्षते केचित्सर्वत्र क्षितिमण्डले ।। ४ ।।
तल्लडुकेश्वरं क्षेत्रं विख्यातं सर्वभूतले ।
ये पूजयन्ति मां तत्र पश्यन्त्यपि जपन्त्यपि ।। ५ ।।
महोत्सवं च कुर्वन्ति दानानि च ददत्यपि ।
मां लभन्ते नरास्ते तु मत्पुरे निवसन्त्यपि ।। ६ ।।
लडुकेशान्महत् क्षेत्रं पुण्यां प्रतिमहानदीम् ।
सा भूमिः सा सुपुण्यापि किमन्यत् कथ्यते मया ।। ७ ।।
वहवः शम्भवश्चात्र सन्ति नद्यश्च पुण्यदाः ।
कियद्वा कथ्यते तत्तु कथितं हि मयाऽखिलम् ।। ८ ।।

बाण उवाच

कथ्यतां लडुकेशस्य प्रादुर्भावं सदाशिव ।
श्रुत्वा तस्यैव माहात्म्यं कृतकृत्यो भवाम्यहम् ।। ९ ।।

श्रीशिव उवाच

पुरा लोहासुरो नाम स्थितः कश्चिद्दितेः सुतः ।
संपीडयामास जगदतिदुष्टस्तु दुर्मदः ।। १० ।।
उत्तरे मणिनागस्य दुर्गं कृत्वातिदुर्ज्जयम् ।
ततः स भगवान् विष्णुस्तं हन्तुमुपचक्रमे ।। ११ ।।
युयुधे तेन सार्द्धं स वर्षं न च ममारसः ।
लोहाङ्गत्वाद्बभूवाऽसौ भूमौ प्रविष्टुं स क्षमः ।। १२ ।।
ब्रह्माविष्णुहरास्तस्मादुपायं चक्रुस्तत्र ते ।
ततो नीत्वासुरं ब्रह्मास्थलं नीहायनामकम् ।। १३ ।।

मुच्यतेऽप्यभवं चाहं विश्वकर्मा स्वयं हरिः ।
निहायी ब्रह्मणो मूर्ध्नि मुद्गराकार एव च ।। १४ ।।
विश्वकर्मा हरिस्तं तु निजघान पराक्रमी ।
हरिर्ययौ नीलशैलं स्वलोकं च पितामहः ।। १५ ।।
स्थापयित्वा हरं तौ मां नाम्ना श्रीलडुकेश्वरम् ।
मुद्गरो लडुकाकारो मम नाम बभूव ह ।। १६ ।।
लडुकेशान्तिकेऽप्यस्ति नाम्ना नारायणी शिवा ।
उत्तराभिमुखी देवी सर्वकामवरप्रदा ।। १७ ।।
तत्रैव मणिनागस्य धराकुहरवर्त्तिनी ।
सा गत्वा पश्चिमां काष्ठां ततोऽगादुत्तरां दिशम् ।। १८ ।।
ततः पूर्वां प्रतिदिशं व्यक्ता सा च विनिर्गता ।
त्रिभूपा च नदीरूपा तस्मिन् प्रवहति स्फुटम् ।। १९ ।।
एका नागझरा नाम्नी द्वितीया नागमण्डली ।
सङ्गमोऽस्ति द्वयोरेतन्नाम विख्यातयोस्तयोः ।। २० ।।
तस्यास्तु नागमण्डल्याः सवेगो वेष्टितोऽद्भुतः ।
सा कस्मात्कथ्यते लोके नाम्नेति नागमण्डली ।। २१ ।।
एका तु कुसुमी नाम्नी धारा दक्षिणेऽस्त्यपि ।
तिस्रस्ता मिश्रिता सर्वा उत्तराशां प्रयान्त्यपि ।। २२ ।।
वेङ्गी नाम्नी नदी भूत्वा एकरूपातिपुण्यदा ।
गच्छति सा नदी व्यग्रमृषिकूल्यां नदीं प्रति ।। २३ ।।
मणिनागगिरेस्तस्य शिरः पूर्वेऽति वर्त्तते ।
गात्रन्तु दक्षिणे भावे पश्चिमे पुच्छमुत्तमम् ।। २४ ।।
उत्तरेऽस्ति नदी पुण्या मणिनागस्वरूपिणी ।
सा तु पुण्यतमा देशे सर्वकामसमृद्धिदा ।। २५ ।।

सा नदी कुसुमी पुण्या नदीं मन्दाकिनीं प्रति ।
सङ्गच्छति पुण्यतमा चैकरूपा स्तुता ततः ।। २६ ।।
रूपान्तरेण तत्रैव क्षेत्रे श्रीलडुकेश्वरः ।
मतङ्ग नाम्ना विख्यातो वर्त्तते बहुपुण्यदः ।। २७ ।।
लडुकेशादुत्तरेऽस्मिन् नाम्ना तारेश्वरोऽप्यहम् ।
ततस्तु पश्चिमे वर्त्ते नीलकण्ठेश्वराह्वयः ।। २८ ।।
उत्तरे नीलकण्ठेशाच्छिवः क्रोशत्रयेऽस्त्यपि ।
पण्डुकेश्वर नामाऽसौ पाण्डुवर्णः समुज्ज्वलः ।। २९ ।।
देवी तस्यान्तिके याऽस्ति नाम्ना सा पाण्डुकेश्वरी ।
तत्प्रदेशे जपन् स्तोत्रं पुरश्चरणमेव च ।। ३० ।।
दानानि चैव सर्वाणि स्युः कोटिगुणितान्यपि ।
पाण्डुकेशशिवस्यास्य स्थानात्स्वल्पादनन्तरम् ।। ३१ ।।
गौरेश्वर इति ख्यातः केचिदेवं वदन्ति वै ।
तस्यापि पश्चिमे भागे क्रोशमात्रे स्थले शुभे ।। ३२ ।।
सन्त्यष्टौ शम्भवस्तेषां व्यक्तं लिङ्गद्वयं शुभम् ।
एकः सोमेश्वरो नाम्ना लोकेशस्त्वपरः स्मृतः ।। ३३ ।।
षट् सन्ति भूतले तत्र सुगुप्ताः शम्भवः शुभाः ।
तयोः पार्श्वेऽस्ति कामाख्या देवी कामप्रदा शिवा ।। ३४ ।।
पीठं संसिद्धिदं तद् वै सर्वकामफलप्रदम् ।
गौरेश्वरादीशकोणे क्रोशमात्रेऽस्ति शङ्करः ।। ३५ ।।
धवलेश्वर नामासौ पर्वतोपरि सिद्धिदः ।
तत्पूर्वेऽस्ति शिवः साक्षान्महामहिमसंयुतः ।। ३६ ।।
सोमनाथ इति ख्यातः सर्वलोकेषु विश्रुतः ।
सोमेश्वरान्महादेवोऽप्यस्ति क्रोशे चतुष्टये ।। ३७ ।।

उत्तरे महिम्ना पूर्णो नाम्नासौ धवलेश्वरः ।
सोमेश्वरादीशकोणे देव्यास्ते केतकेश्वरी ।। ३८ ।।
तत्पार्श्वे केतकीकुण्डं चात्युष्णजलमुत्तमम् ।
गव्याज्यचन्दनप्रीता केतकी तु सुनासिका ।। ३९ ।।
सा चेच्छोष्यति सुखदं गव्यमाज्यं सचन्दनम् ।
कुण्डमुष्णजलं स्वीयं शितलीकुरुते क्षणात् ।। ४० ।।
तस्याः कौवेरकोणेऽस्ति सार्द्धक्रोशत्रिके स्थले ।
श्रीरामचन्द्रं सन्ध्यायन् हनुमानस्ति सर्वदा ।। ४१ ।।
रम्यं स्थलं तु तज्ज्ञेयं गोपनीयं सुदुर्ल्लभम् ।
इत्येतत्कथितं सर्वं क्षेत्रं श्रीलडुकेश्वरम् ।। ४२ ।।
अपरं श्रूयतां बाण गुल्मसारस्य देवताः ।
पश्चिमे मणिनागस्य पुच्छमस्ति सुपुण्यदम् ।। ४३ ।।
तत्र ये गिरयः सन्ति महान्तः क्षुद्रका अपि ।
सर्वे ते मणिनागस्य पादाः पुण्यप्रदास्ततः ।। ४४ ।।
वनं नागवनं तत्तु सुगुप्तमिति कथ्यते ।
नागस्यान्तर्गृहं तत्तु महारम्यं यतस्तु तत् ।। ४५ ।।
शम्भवः शक्तयस्तत्र चरन्ति विजने वने ।
पाषाणरूपिणी तत्र माहामायाऽस्ति पर्वते ।। ४६ ।।
व्याघ्री नाम्नी स्वभावा च मनुष्यपशुखादिनी ।
महापूजामनुसृत्य योग्या सा योगदायिनी ।। ४७ ।।
सहायरूपिणी तत्र नृपतेर्वरदायिनी ।
स्वल्पया पूजया देवी महासन्तोषधारिणी ।। ४८ ।।
सुप्रसन्ना तु सा देवी मत्प्रिया भक्तवत्सला ।
जगद्धात्री जगन्माता जगत्सन्तारिणी सदा ।। ४९ ।।

याप्यन्या मातरस्तत्र कात्यायनी च तत्र वै ।
सर्वास्तिष्ठन्ति तत्र वै व्याघ्र्यास्ताः परिचारिकाः ।। ५० ।।

बाण उवाच

व्याघ्री नाम कुतस्तस्य बभूव गिरीश प्रभो ।
कथय त्वमिदं चित्रं श्रद्धा मे महती यतः ।। ५१ ।।

श्रीशिव उवाच

शृणु बाण कथामेतां या बभूव मदिच्छया ।
कथयामि त्वदग्रेहं भक्तस्त्वं मम सुव्रतः ।। ५२ ।।
अरण्यानां पशूनां स्याद् व्याघ्रोऽपि बलवत्तरः ।
स्वच्छन्दं कुरुते लीलां तां दृष्ट्वा मे स्पृहाभवत् ।। ५३ ।।
व्याघ्र्या यथा स्वयं व्याघ्रः क्रीडते स्वेच्छया बली ।
तथाहं दुर्गया सार्द्धं चकार क्रीडितुं मनः ।। ५४ ।।
व्याघ्री भूत्वा मया सार्द्धं व्याघ्ररूपेण पार्वती ।
यतश्चिक्रीडिता तस्याः व्याघ्री नाम बभूव ह ।। ५५ ।।
देवीक्षेत्रं गुल्मसारं प्रोच्यते मुनिसत्तमैः ।
नागक्षेत्रं यथा ख्यातं पुरस्ताद्रणरक्षसः ।। ५६ ।।
कामदं गुल्मसारं च देवीक्षेत्रद्वयं क्षितौ ।
दानं नरपशूनां च विधिस्तस्मिन् द्वयोरपि ।। ५७ ।।
आज्ञया श्रीहरेर्नागो यथा स्याद् गिरिरूपभाक् ।
तथा ममाज्ञया दुर्गा बभूव गिरिरूपिणी ।। ५८ ।।
मया चाज्ञापिता दुर्गा मत्स्थानस्थितिवृद्धये ।
गुल्मसारं निजं क्षेत्रं कुरु देवीत्यहं प्रभुः ।। ५९ ।।
गुल्मसारं मम क्षेत्रं तव क्षेत्रं भवत्विति ।
क्षेत्रपालोऽस्मि तत्रैव भेदो नास्त्यावयोर्यतः ।। ६० ।।

वसत्यत्र महामाया महापर्वतरूपिणी ।
तस्मिन् स्थित्वा निजे क्षेत्रे नृभ्यः सिद्धिं प्रदास्यसि ।। ६१ ।।
सदा मङ्गलदा देवी सा व्याघ्री सर्वमङ्गला ।
यदा कदा गच्छत्येषा तत्र देशे त्वमङ्गलम् ।। ६२ ।।
पाषाणपिण्डरूपासौ पर्वताद्गच्छति स्वयम् ।
उपसर्गप्रदा नृणां वलिपूजाविवर्जनात् ।। ६३ ।।
शान्त्यर्थं तु ततस्तस्या मनुष्यं पशुमुत्तमम् ।
राजा कुर्य्यात्ततस्तस्मिन् तुष्ट्यर्थं नृपशोर्वधम् ।। ६४ ।।
हिंसते यो नरस्त्वस्यै पश्वर्थं तु नृपेण सः ।
जायतेऽसौ तु सर्वेषां नृपतीनां कुले शुभे ।। ६५ ।।
यस्मिन् दिने कल्पितः स्यात्पश्वर्थं नृपतेर्नरः ।
तद्दिनावधि तन्नाम नृपपुत्रात्मकं भवेत् ।। ६६ ।।
मनुष्यपशुमात्रेण सा व्याघ्री परितुष्यति ।
नोचेत्करोति नृपतेरङ्गाघातं मम प्रिया ।। ६७ ।।
शम्भवः सन्ति तत्रैव गुल्मसाराह्वये स्थले ।
मुक्तेश्वरः क्षेत्रपालः प्रधानः परिकीर्त्तितः ।। ६८ ।।
व्याघ्र्याः देव्याः उत्तरेऽस्ति क्रोशमात्रे स्थलेऽपि सः ।
शिवो मुक्तेश्वरो नाम मुक्तिदः सर्वदेहिनाम् ।। ६९ ।।
तस्मिन् स्थाने समावेशो विचित्रः स्यान्महानपि ।
सुरम्यं तत्स्थलं पुण्यं मम क्षेत्रं सुदुर्ल्लभम् ।। ७० ।।
ईशानोऽस्ति पुनस्तस्याः सुवर्णेश्वरसंज्ञकः ।
महिमा मम तत्रापि मुक्तेश्वर समो मतः ।। ७१ ।।
तस्या व्याघ्र्या दक्षिणेऽस्मिन् नाम्ना स्वप्नेश्वरोऽप्यहम् ।
शुभस्वप्नप्रदो नृणां तत् स्थलं मम पुण्यदम् ।। ७२ ।।

व्याघ्र्यास्तस्यास्तु पूर्वेऽहं वर्त्ते वैद्येश्वराह्वयः ।
रोगशान्तिकरो नृणां सदारोग्यकरस्त्वहम् ।। ७३ ।।
क्रोशत्रयं तु स्थानं व्याघ्र्याः शुभफलप्रदम् ।
नीलकण्ठेश्वरः पूर्वे तस्याः क्रोशचतुष्टये ।। ७४ ।।
वर्त्तेऽहं सर्वदा शम्भुः शङ्करः सर्वदा नृणाम् ।
तस्यास्तु पञ्चक्रोशेऽस्मि कपिलेश्वरसंज्ञकः ।। ७५ ।।
पश्चिमायां दिशि व्याघ्र्याः प्रियः प्रियकरो नृणाम् ।
पूर्वस्यां दिशि तस्यास्तु वर्त्ते क्रोशद्वये सदा ।। ७६ ।।
वरदः सर्वलोकानां नाम्ना हरिहरेश्वरः ।
पूर्वस्यां दिशि तस्याश्च क्रोशेषु नवसु त्वहम् ।। ७७ ।।
सन्निधौ कुहरेशस्य कुवरेश्वरसंज्ञकः ।
एवं बहुविधा सन्ति शम्भवस्तत्र तत्र वै ।। ७८ ।।
कियन्तः कथितव्यास्ते कथिताह्वयमेव हि ।
एतत्स्थाने सर्वदापि सर्वे देवा वसन्ति हि ।। ७९ ।।
विष्णुस्तत्राप्यस्ति नित्यं सर्वलक्ष्मीप्रदः प्रभुः ।
रम्ये स्थले सुरास्तत्र शक्रादयश्चरन्त्यपि ।। ८० ।।
वरं स्थलं तु तत्प्रोक्तं लोके गुप्तस्थली तु सा ।
महानदी समुद्भूता तत्रास्ति महती नदी ।। ८१ ।।
सर्वसम्पत्प्रदा याति ऋषिकूल्यां नदीं प्रति ।
किमन्यत्कथ्यते बाण सर्वं च कथितं मया ।। ८२ ।।
ततः प्राह स मैनाकं प्रहस्य भुवनेश्वरः ।
वत्स मैनाकदेशेऽस्मिन्निवस त्वं ममाज्ञया ।। ८३ ।।
विष्णुना स्थापितः शम्भुर्ब्रह्मणाङ्गीकृतस्तथा ।
तत्पार्श्वे मणिनागस्य स्थास्यति भगिनी तव ।। ८४ ।।

मणिनागेश्वरी दुर्गा महादुर्गतिनाशिनी ।
पूजामस्याः करिष्यन्ति भक्त्या च गुरुवासरे ।। ८५ ।।
विपदः नागमिष्यन्ति तत्प्रसादात् कदाचन ।
पूर्वं तु शारदां पूजामुपहारैः सुविस्तरैः ।। ८६ ।।
इत्युक्त्वा तान् पुनस्तेषां प्रोवाच शशिशेखरः ।
श्वो गमिष्यामि तत्रेति गमनाय मनो दधे ।। ८७ ।।
इत्थं गते दिने तस्मिन् प्रविवेश महा निशा ।
रात्र्याः सेवां तु ते सर्वे ययुः कर्त्तुं निजालयान् ।। ८८ ।।
सुषुप्तेषु यथास्थानं हिमवान् पार्वती शिवः ।
हिमालयस्य तु स्पप्ने दृष्टवांश्चित्रमीदृशम् ।। ८९ ।।
ब्रह्मा विष्णुः शिवस्तत्र शक्रादित्रिदशैः सह ।
निवसन्तः प्रकुर्वन्तः संलापं कौतुकान्विताः ।। ९० ।।
तेषां मध्ये समाहूय हिमाद्रिं चन्द्रशेखरः ।
गमिष्यामो वयं सर्वे श्वस्त्वन्तु संस्थितिं कुरु ।। ९१ ।।
तत्राहं तव संस्थाने कमलेष्वश्वर नामकः ।
इत्थं श्रुत्वा स शैलेन्द्रः स्वीचकार भवत्विति ।। ९२ ।।
ततो रात्रिर्गता तत्र नादृश्यत हिमालयः ।
शिवश्चासौ च दुर्गा च ये देवास्तत्र संस्थिताः ।। ९३ ।।
न दृष्ट्वा तमनुतापं चक्रुस्ते बहुविह्वलाः ।
स्वप्नं स्मृत्वा च शिवोऽयं ज्ञातवान् गमनान्यपि ।। ९४ ।।

श्रीभगवानुवाच

शृणु विश्वावसो शम्भो गते च भुवनेश्वरे ।
स गतो च गते वाणे हिमवाननुतापितः ।। ९५ ।।
स गन्तुं मेनया सार्द्धं मनश्चक्रे हिमालयः ।
सुतं गृहीत्वा मैनाकं मणिनागे गते प्रियम् ।। ९६ ।।

गृहीत्वा द्रष्टुमायातो नीलाद्रौ माधवं च माम् ।
दृष्ट्वा सामन्तैस्तु समां प्रणतमस्तकश्च सः ।। ९७ ।।
नीलमाधव भो नीलाचलकन्दरमन्दिर ।
त्वां दृष्ट्वा च कृतार्थोऽहं कृपया प्रसीद मयि ।। ९८ ।।
समुद्धृत्य च मैनाकं मणिनागान्तिकं विभो ।
सुतं रक्षितवान् त्वं मे रक्षितोऽहं त्वया विभो ।। ९९ ।।
इति गृहीत्वा गच्छामि मैनाकमणिनागकौ ।
दिनानि कानिचित्तत्र स्थापयित्वा मदालये ।। १०० ।।
प्रवेशयाम्यहं नाथ त्वत्स्थाने त्वेतयोर्गृहे ।
मया प्रसन्नमनसा स्वीकृतो हिमभूधरः ।। १०१ ।।
जगामैकाम्रकवनं द्रष्टुं जामातरं शिवम् ।
प्रविष्टास्तत्र तैः सार्द्धं ददर्श भुवनेश्वरम् ।। १०२ ।।
स्तुत्वा प्रसादयामास जगादैतद् वचोऽपि सः ।
देव देव महादेव स्वेच्छया मम मन्दिरात् ।। १०३ ।।
यत्त्वमागतवानत्र कः करोति तदन्यथा ।
प्रसीद मयि परं त्वं यद्भवानीश्वरेश्वर ।। १०४ ।।
सोऽहं गृहीत्वा गच्छामि मैनाकमणिनागकौ ।
प्रवेशयामि त्वत्पार्श्वे नाथ किञ्चिद्दिनान्तरम् ।। १०५ ।।
एवं दुहितरं दुर्गां नाथयित्वा प्रसाद्य सः ।
ताभ्यामनुगृहीतोऽसौ जगाम निजमन्दिरम् ।। १०६ ।।
प्रविश्य च निजे स्थाने तैः साकं हिमपर्वतः ।
मैनाकं मणिनागं च रक्षित्वाल्पदिनानि सः ।। १०७ ।।
ततः प्रवेशयामास निजस्थाने स तावुभौ ।
इत्येतत्कथितं सर्वं तवाग्रे च नरोत्तम ।। १०८ ।।

इदानीं याहि वेश्म स्वमाज्ञप्तः स जगाम च ।। १०९ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे हिमालयस्य निजस्थाने प्रवेशो लड्डुकेश्वरोपाख्यानं च नाम षट्त्रिंशोऽध्यायः ।।

सप्तत्रिंशोऽध्यायः

रामेश्वरादिविशेषप्रसङ्गकथनम्

नारद उवाच

सर्वं ते कथितं ह्येतदिन्द्रद्युम्न ! श्रुतं मया ।
अन्यत् किं कथयाम्येतत् पृच्छ त्वं नृपसत्तम ।। १ ।।

इन्द्रद्युम्न उवाच

कथय त्वं मुनिश्रेष्ठ के के चात्र महेश्वराः ।
श्रेष्ठाश्च पर्वता वापि नारद त्वं वदस्व मे ।। २ ।।

नारद उवाच

रामेश्वरो नाम गिरिः पूर्वं रामोऽत्र संस्थितः ।
श्रेष्ठस्तस्यापि पर्य्याप्तभूमौ चास्ते महेश्वरः ।। ३ ।।
रामेण पूजितः किञ्चिद्दिनानि च शिवोत्तमः ।
सोऽपि रामेश्वरो नाम्ना ददाति सुफलं बहु ।। ४ ।।
ये तु पश्यन्ती तल्लिङ्गं ते तु पुण्यतमा मताः ।
तदुत्तरे चासौ गङ्गा नाम्नी मन्दाकिनी नदी ।। ५ ।।
तत्र स्नात्वा तर्पयित्वा फलं कोटिगुणं भवेत् ।
अमावास्यायां सङ्क्रान्त्यां वैकस्यां पितृवासरे ।। ६ ।।
दर्शनं रामचन्द्रस्य स्नानं तीर्थस्य तस्य वै ।
दानं चानन्तफलदं मन्दाकिन्यां च तर्पणम् ।। ७ ।।

भवेत् श्राद्धदिने भूप! गयाश्राद्धसमं फलम् ।
रामेश्वरं वदन्तीह ग्रामेश्वर इति प्रजाः ।। ८ ।।
ग्रामे दृष्ट्वा तु तल्लिङ्गं कल्पयित्वा तदीश्वरम् ।
पञ्चभ्रातर एवैते ये वा रामेश्वरादयः ।। ९ ।।
शृणु नामानि तेषां भो स्थानानि च यथाक्रमम् ।
पश्चिमे कपिलेशस्य निकटे कपिलेश्वरः ।। १० ।।
तस्यापि निकटे पार्श्वे शिवोऽप्यस्त्यन्तरेश्वरः ।
तस्यापि निकटे चास्ति नीलकण्ठेश्वरः शिवः ।। ११ ।।
रामेण कपिलेशौ द्वौ पूर्वमुक्तौ यथाक्रमम् ।
एते स्युर्भ्रातरः पञ्चशिवा रामेश्वरादयः ।। १२ ।।
वर्त्तन्ते पाण्डवैस्ते तु पूजिताः पञ्च ये पुरा ।
रामेश्वरः पञ्चधाभूत्पूजार्थं भक्तवत्सलः ।। १३ ।।
पञ्चानां पाण्डवानां च श्रद्धयैव पृथक् पृथक् ।
युधिष्ठिरेश रामेशो भीमेशो कुसुमेश्वरः ।। १४ ।।
कपिलेशोऽर्जुनेनैव नकुलेनोत्तरेश्वरः ।
पूजितः सहदेवेन नीलकण्ठेश्वरो हरः ।। १५ ।।
स्वेच्छया पञ्च नामानि पञ्चानां वदनैः प्रभो ।
व्यक्तानि सर्वलोकेषु नामानि शङ्करस्य तु ।। १६ ।।
तान् दृष्ट्वा मुच्यते जन्तुः क्षिप्रं संसारबन्धनात् ।
ततस्तु पश्चिमे देशे चित्रकूटाह्वयो गिरिः ।। १७ ।।
पाण्डवास्तत्र पूर्वन्तु स्थिताः कृत्वालयं गुहाम् ।
ता गुहाः पाण्डवागुहा नाम्ना सर्वत्र विश्रुताः ।। १८ ।।
रामः सीता लक्ष्मणश्च स्थितास्तत्र दिनं बहु ।
तत्रापि पश्चिमे देशे स्थानमस्ति सुदुर्लभम् ।। १९ ।।

श्रीरामो मृगयां तत्र कृतवान् कौतुकान्वितः ।
धनुश्चिह्नं पादचिह्नं वर्त्तते तद्दिनाविधि ।। २० ।।
काकं विव्याध तत्रैव रामो दशरथात्मजः ।
अतिधृष्टं महाधूर्त्तं सीताङ्गाघातकारिणम् ।। २१ ।।
कुशाश्च समिधस्तत्र सुलभाः स्युर्द्विजन्मनाम् ।
यज्ञस्थानं तदेवेह सुलभं निर्मलं जलम् ।। २२ ।।
तदुत्तरेऽस्ति निकटे वाराही वरदायिनी ।
तस्यास्तु पश्चिमे देशे सुरेश्वरः शिवः प्रभुः ।। २३ ।।
पुरा तस्मिन् स्थितो राजा सुर नामातिविश्रुतः ।
पूजितो ब्रह्मविष्णुभ्यां सार्द्धं तेन स ईश्वरः ।। २४ ।।
ब्रह्माविष्णुःशिवस्तत्र त्रीणि लिङ्गानि सन्त्यपि ।
सन्ति देशेऽतिविमले पश्चिमाभिमुखाश्च ते ।। २५ ।।
तानि दृष्ट्वा मनुष्याश्च पापं नश्यन्ति तत्क्षणात् ।
सुरेण पूजितो राज्ञा महापूजाविधानतः ।। २६ ।।
शिवप्रसङ्गस्तत्रास्ति विष्णुना ब्रह्मणा समम् ।
ब्रह्मणानां तु तत्स्थानं यज्ञस्थानं सुदुर्लभम् ।। २७ ।।
बहवस्तत्र मुनयो निवसन्ति महीपते ।
सुरेश्वरात्पश्चिमेऽस्ति शिवो वक्रेश्वरो प्रभुः ।। २८ ।।
महामहिमसम्पन्नः सर्वसिद्धिप्रदायकः ।
एष गिरीणां मध्येऽर्घः शिवानां च नृपोत्तम ।। २९ ।।
सा भूमिस्तु महापुण्या तस्या माहात्म्यमुत्तमम् ।
तस्या रम्यं वनं पुण्यं सर्वदा फलपुष्पदम् ।। ३० ।।
तस्यां सर्वोत्तमा रामा वृक्षाश्चैवोत्तमोत्तमाः ।
उत्तमानि च शस्यानि सुबहूनि भवन्त्यपि ।। ३१ ।।

कृष्णा मृगाश्च तस्यां स्युः पुण्या भूमिस्तु सा स्मृता ।
एतत्ते कथितं भूप किमन्यत् कथयामि ते ।। ३२ ।।
कथ्यतां तत्पुनश्चापि कथयामि तवाग्रतः ।। ३३ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे
रामेश्वरादिविशेषप्रसङ्गकथनं नाम सप्तत्रिंशोऽध्यायः ।।

अष्टात्रिंशोऽध्यायः

महानदीतीरस्थितदेवताकथनम्

इन्द्रद्युम्न उवाच

यद्वनानि मुनिश्रेष्ठ ! ख्यातानि सन्ति तानि च ।
तेषु कानि च श्रेष्ठानि वनानि तद्वदस्व मे ।। १ ।।

नारद उवाच

अवनाभूर्यदि श्रेष्ठा न शुद्धा सवना समा ।
जीर्णावना जनपदैः पुण्यपत्तनसंयुता ।। २ ।।
ततः श्रेष्ठावना भूप सवना शुद्धतां शृणु ।
सवना सर्वदा विष्णोः प्रिया भवति नित्यशः ।। ३ ।।
विष्णुस्तिष्ठति तत्रापि तिष्ठन्ति मुनिसत्तमाः ।
त्यक्त्वा राजर्षयो भूप दुस्त्यज्यां राजसम्पदम् ।। ४ ।।
वनं गच्छन्ति निर्द्वन्दं तपः कर्त्तुं वयोधिकाः ।
तेषां शरीरनिर्बाधो वनेऽस्त्यपि यदृच्छया ।। ५ ।।
वल्कलं परिधानार्थं भक्षणार्थं फलान्यपि ।
स्नानार्थं सरितो नद्यः स्थित्यर्थं गिरिकन्दराः ।। ६ ।।

समित् कुशं च कर्मार्थं यज्ञार्थं यज्ञीया द्रुमाः ।
तत्रापि सर्वौषधयः स्नानार्थं देवता नृणाम् ।। ७ ।।
औषधयश्च तत्रापि वसन्ति व्याधिनाशकाः ।
वने कृष्णमृगाः सन्ति गवाश्च हविरर्पकाः ।। ८ ।।
वराहमृत्तिका शुद्धौ रम्यं स्थानं वनं महत् ।
गजस्थानं महाशुद्धमरण्ये वर्त्तते नृप ।। ९ ।।
पक्षिणां च पशूनां च रक्षितानां वनं गृहम् ।
ख़ड्गीनां च वनं स्थानं शुद्धपात्रप्रदायिनम् ।। १० ।।
तर्पणार्थं पितॄणां च पात्रं गण्डः प्रजायते ।
वनं रक्षति सर्वत्र सिंहो बहुपराक्रमः ।। ११ ।।
वनेषु पर्वताः श्रेष्ठाः ये धरन्ति च क्ष्मामिमाम् ।
यानाश्रित्याभिवर्षन्ति सर्वे मेघाः स्थलं प्रति ।। १२ ।।
भवन्त्यन्नेन भूतास्तु पर्ज्जन्येभ्योऽन्नसम्भवः ।
पर्ज्जन्याद् यज्ञसम्भूता यज्ञः कर्मसमुद्भवः ।। १३ ।।
ब्रह्मोद्भवं कर्म चापि ब्रह्म चाक्षरसम्भवः ।
अक्षरं चामृतं तस्माद् ब्रह्म सङ्क्रमते यतः ।। १४ ।।
ब्रह्मणः कर्म चैतत्तद्यज्ञं प्रति तु कर्मणः ।
यज्ञो भूजलरूपेण पर्जन्यो वर्षतेऽमृतम् ।। १५ ।।
पर्जन्या जलरूपाणि प्रवर्षन्त्यमृतान्यपि ।
गिरीनाश्रित्य ते पुण्याः पवित्रा नृपसत्तम ! ।। १६ ।।
पर्वतान्निःसृतं तोयं तीर्थं भवति पावनम् ।
तैस्तोयैः संप्लुता नद्यः सर्वाः पुण्यतमा मताः ।। १७ ।।
आद्या गोदावरी गङ्गा द्वितीया च पुनः पुनः ।
तृतीया कथिता रेवा चतुर्थी जाह्नवी स्मृता ।। १८ ।।

कावेरी गोमती कृष्णा ब्राह्मी वैतरणी तथा ।
विष्णुपादाग्रसम्भूताः सर्वाश्चाश्रित्य पर्वतान् ।। १९ ।।
प्रवहन्ति स्थलेष्वेताः समुद्रं प्रति पूर्वगाः ।
तासां सम्बन्धिनो राजन् ये ते देशाः सुपावनाः ।। २० ।।
गङ्गा हिमवतो जाता समुद्रं प्रतिगच्छति ।
महानद्याः समुद्भूति नृपकोशलपर्वतात् ।। २१ ।।
समुद्रं गच्छति श्रेष्ठा बहुधारा नृपोत्तम ।
तन्नदीमातृकादेशाः श्रेष्ठा नो देवमातृकाः ।। २२ ।।
महानदीमातृका ये देशाः सन्ति नृपोत्कले ।
महानदी च मध्यस्था भैरवी च तदुत्तरे ।। २३ ।।
चित्रोत्पला दक्षिणे स्याद्धारास्तिस्रोऽतिविश्रुताः ।
ओढ्रदेशस्य सीमा तु महानद्यास्तटे नृप ! ।। २४ ।।
ये देवा याश्च देव्यः स्युस्तास्ताश्च शृणु सत्तम ! ।
बौद्धाख्यदेवसीमायां तस्यास्तीरेऽस्ति दक्षिणे ।। २५ ।।
रामेश्वर इति ख्यातः शिवो रामेण पूजितः ।। २६ ।।

इन्द्रद्युम्न उवाच

वौद्धाख्यः स कथं देशः कथ्यतां मुनिसत्तम ।
ओढ्रदेशस्य सीमा किं तद् बहिर्वा भवत्यपि ।। २७ ।।

नारद उवाच

दक्षिणेऽस्याः महानद्यास्तीरे देशः सुविश्रुतः ।
सीमा चोत्कलदेशस्य पश्चिमायां दिशि नृप ! ।। २८ ।।
तत्र स्थितः पुरा राजा बुद्धो नामातिविश्रुतः ।
बौद्धधर्मेषु घोरेषु प्रवृत्तो वेदनिन्दकः ।। २९ ।।
मण्डलीकरणे सोऽपि स्वीये कर्मणि तत्परः ।
गोशृङ्गे मदिरां धृत्वा पिबति प्रत्यहं जडः ।। ३० ।।

कर्मणा तेन तत्रैव मृतः काले समागते ।
गोशृङ्ग नामा शबरो जातस्तत्रासुरः स्वयम् ।। ३१ ।।
गोचर्मप्रावृतः पापी गोघ्नो गोमांसभक्षकः ।
विचरत्येष तत्रैव सदैव तु दिवा निशि ।। ३२ ।।
गोरोमवृष्टिस्तत्रैव देहचर्मसमुद्भवः ।
तदीयत्वात्स देशोऽपि बौद्धनामाभवन् नृप ।। ३३ ।।
तस्मिन् देशे स्थितः शम्भुः शिवो बुद्धेश्वराह्वयः ।
तल्लिङ्गं च महाज्योतिः साक्षात्स्पर्शमणिस्तथा ।। ३४ ।।
तत्र लौहवणिक् कश्चिदेकदा प्रविवेश ह ।
लौहभारं च स्वस्यापि लिङ्गपार्श्वे ररक्ष सः ।। ३५ ।।
अन्धकारे तदा रात्रौ लौहभारो महान् गुरुः ।
वणिजानीयमानोऽपि लिङ्गोपरि पपात ह ।। ३६ ।।
मणिस्पर्शेण तत्रस्थो लौहराशिस्तु तत्क्षणात् ।
स्वर्णराशिरभूद् दृष्ट्वा साश्चर्य्यो ह्यभवद् वणिक् ।। ३७ ।।
कथमेवमभूदेष इति चिन्ताकुलो वणिक् ।
न निवेद निमित्तं तद्यतोऽभूत्तस्य संभ्रमः ।। ३८ ।।
ततो बुद्धेश्वरः शम्भुः प्रत्यक्षोऽभूत्तदग्रतः ।
तमुवाच निमित्तं तल्लौहानां स्वर्णता तथा ।। ३९ ।।
शृणु लौहवणिक् त्वं भो! लिङ्गं स्पर्शमणिर्मम ।
लिङ्गस्योपरि लौहानि निपत्य स्वर्णतां ययुः ।। ४० ।।
शृणु त्वं वणिजां श्रेष्ठ गोशृङ्गासुरत इयम् ।
गोरोमवृष्टिरत्रैव नित्यं भवति यत्ततः ।। ४१ ।।
न स्थास्ये चात्र गन्तव्यं महानद्युत्तरे तटे ।
त्वं तत्रैव मम स्थातुं मण्डपं घटयिष्यसि ।। ४२ ।।

निवसिष्याम्यहं तत्र सुवर्णेश्वर नामकः ।
तत्सुवर्ण्णपुरो नाम मत्पुरी तद्भविष्यति ।। ४३ ।।
इदं त्वया न कार्य्यञ्चेत्तत्सुवर्णमिदं पुनः ।
लौहत्वं यास्यति तव मत्स्पर्शमणिसम्भवम् ।। ४४ ।।
इत्युक्त्वा बुद्धनाथस्तु तत्रैवान्तरधीयत् ।
तच्छ्रुत्वा स वणिक् शीघ्रमौत्कलः श्रद्धयान्वितः ।। ४५।।
महानद्युत्तरे तीरे कारयामास मण्डपम् ।
व्यक्तं स्पर्शमणेर्लिङ्गं न भवत्यपि मण्ड़पे ।। ४६ ।।
हिरण्यगर्भरूपेण तत्रोवास महेश्वरः ।
ततः सुवर्ण्णमादाय जगाम वणिगौत्कलम् ।। ४७ ।।
पूर्णो कामो मुदा युक्तो निष्पापो निजमन्दिरम् ।
रामेश्वरपूर्वभागे महानद्युत्तरे तटे ।। ४८ ।।
उमा देव्यस्ति विख्याता महामाया शिवप्रिया ।
तत्सन्निधौ पर्वतोऽस्ति मणिभद्रेति विश्रुतः ।। ४९ ।।
तुङ्गभद्रानदीपार्श्वे सुमहान् तुलसीद्रुमः ।
अर्जुनस्याश्रमे सोऽस्ति तेनैवारोपितः पुरा ।। ५० ।।
कदलीदलतुल्यानि तस्य पत्राणि भूमिप ।
महावटसमाप्तस्य शाखाः सन्ति सुविस्तृताः ।। ५१ ।।
तस्योत्तरे नृपश्रेष्ठ अर्जुनेन सुपूजितः ।
अर्जुनेश्वर नामास्ति शिवः सर्वेश्वरः प्रभुः ।। ५२ ।।
किरातार्जुनयुद्धं च तत्रैवासीन् नृपोत्तम ! ।
अर्जुनस्य तपस्सिद्धं शिवसम्मेलनं ततः ।। ५३ ।।
स चार्जुनाश्रमो नाम स्थानं ख्यातं महीतले ।
तुङ्ग नामा ऋषिस्तस्यास्तीरे च कृतवान् तपः ।। ५४ ।।

भद्रा सिद्धिं यतो लेभे तुङ्गभद्रेति सा स्मृता ।
दक्षिणे तुङ्गभद्राया आवृत्तो ह्यस्ति शङ्करः ।। ५५ ।।
सिद्धेश्वर इति ख्यातः सर्वसिद्धिकरो नृणाम् ।
सिद्धेश्वरस्य यल्लिङ्गं तत्तु मारकतं स्फुटम् ।। ५६ ।।
दृश्यते नृपशार्दूल ! दुर्लभं सुमहोज्ज्वलम् ।
सिद्धेश्वराद्यो जनेऽस्ति माधवो विष्णुरव्ययः ।। ५७ ।।
पूर्वभागे नदीतोये पर्वतो वर्त्तते तु यः ।। ५८ ।।
तस्मिन्नस्ति महादेवः पुटकेश्वर नामकः ।
सर्पजा नाम नद्यस्ति चोत्तरे पुटकेश्वरात् ।। ५९ ।।
महावारुणीयोगस्तु गङ्गायां निपतेद् यदा ।
दृश्यमाने पुरे त्वस्याः सर्पं जनयति स्फुटम् ।। ६० ।।
दृश्या भवति सा स्नानात् प्रददाति च तत्फलम् ।
महानद्याश्च तस्याश्च सङ्गमे स्नाति यो नरः ।। ६१ ।।
वाजपेयफलं तस्य भवत्येव न संशयः ।
तस्याः पूर्वेऽस्ति भूतेशो नाम्ना शृङ्गेश्वरः शिवः ।। ६२ ।।
फलानां शृङ्गवच्छ्रेष्ठं फलं मोक्षं ददाति सः ।
तस्यास्तु दक्षिणे तीरे नाम्ना पद्मावती भुवि ।। ६३ ।।
तस्यामस्ति महादेवो नाम्ना तारेश्वरः शिवः ।
काली नाम्नी नदी तत्र निर्वहति स्थले नृप ! ।। ६४ ।।
गत्वाप्नोति महानद्याः सङ्गमं पुण्यदायकम् ।
तस्या पूर्वे योजनेऽस्ति शिवो नाम्ना जलेश्वरः ।। ६५ ।।
तत्पूर्वे रेणुका नाम्नी नदी वहति पुण्यदा ।
महानद्यां सङ्गमोऽपि तस्या भवति सर्वदा ।। ६६ ।।
महानद्यास्तटे देवी चर्च्चिका परमेश्वरी ।
वर्त्तते नृपशार्दूल महामहिमसंयुता ।। ६७ ।।

तस्या दक्षिणतोऽप्यस्ति वक्रकूटो महीधरः ।
तत्पर्य्यन्तं नृपश्रेष्ठ ! चर्च्चिकाक्षेत्रमुच्यते ।। ६८ ।।
सर्वसिद्धिप्रदं शीघ्रं चर्च्चिकापीठमुच्यते ।
तस्याः प्रसादो यद्राष्ट्रे न विपत्तिर्न वा भयम् ।। ६९ ।।
चर्च्चिकायास्तत्र क्रोशे शिवः शृङ्गेश्वराह्वयः ।
तत्रैकादशलिङ्गानि निवसन्त्यपि शूलिनः ।। ७० ।।
तत्र पूर्वेऽस्ति सर्वेशो योजनत्रितये शिवः ।
सिद्धेश्वर इति ख्यातो बाहयन् भार्गवी नदी ।। ७१ ।।
महापुण्या नदी भूता भार्गवी वहते ततः ।
दशाश्वमेधयज्ञानां ददाति फलमुत्तमम् ।। ७२ ।।
उत्तरे तु महानद्या मध्येऽस्ति धवलेश्वरः ।
तत्पीठं सिद्धपीठं स्यात् प्रवदन्ति मनीषिणः ।। ७३ ।।
दक्षिणे तु महानद्यास्तीरे विश्वेश्वरः शिवः ।
कथ्यते तस्य महिमा सुमहान् सर्वसिद्धिदः ।। ७४ ।।
तस्या पूर्वे च सर्वेशो शिवोऽहं ईश्वराह्वयः ।
परमात्मा स्वयं शम्भुः परमो हंस ईश्वरः ।। ७५ ।।
समस्तफलदः सोऽपि विशेषात् ज्ञानसम्प्रदः ।
तस्यास्ति दक्षिणे पार्श्वे योजनान्ते महेश्वरः ।। ७६ ।।
वक्रेश्वर इति ख्यातो महामहिमसंयुतः ।
विश्वेश्वराख्यः पूर्वेऽस्ति शङ्करो योजनद्वये ।। ७७ ।।
भाण्डेश्वर इति ख्यातो ब्रह्माण्डे सर्वसिद्धिदः ।
महानद्युत्तरे चास्ति शिवः क्रोशत्रये नृप ! ।। ७८ ।।
छत्रेश्वर इति ख्यातो भैरवाद्दक्षिणे तथा ।
छात्राणां पाठशालायां च्छत्ररूपधरः शिवः ।। ७९ ।।

स पाठे कौतुकाविष्टः कठिन्या विलिखन् स्वयम् ।
ज्ञातः सोऽधिकः इत्येतद्विधौ तत्र न वीक्षितः ।। ८० ।।
प्रत्यादिदेश स पुनः पाठकं स्वप्रदीक्षितम् ।
पाठयितुं स्थितश्चाहं कौतुकात्कृपया त्वयि ।। ८१ ।।
तिष्ठामि लिङ्गरूपेण शालायां तव पाठक ।
छत्रेश्वर इति ख्यातः परमो गुरुरप्यहम् ।। ८२ ।।
इत्युक्त्वा वर्त्तते तत्र स शिवो नरपुङ्गव ! ।
तत्र वामनरूपेणावततार हरेः पुरा ।। ८३ ।।
बलियज्ञे क्षिपन्नूर्द्ध्वं पादं सोऽद्यापि वर्त्तते ।
महानद्याः सङ्गमेऽस्ति भगवान् चन्द्रशेखरः ।। ८४ ।।
पराशरेश्वर इति स्वनाम्ना विदितः प्रभुः ।
तत्रैवास्ते लोकनाथश्चक्रहस्त इति श्रुतः ।। ८५ ।।
महानद्यास्तु धारैका नाम्ना चित्रोत्पला नदी ।
तज्जलेऽस्ति महाशम्भुर्वटेश्वर इति श्रुतः ।। ८६ ।।
लिङ्गरूपी महादेवो दृश्यते करुणानिधिः ।
देवी भगवती तस्य समीपे वर्त्तते नृप ।। ८७ ।।
महामाया तु सा दुर्गा महामहिमसंयुता ।
भैरवी च नदीश्रेष्ठा ब्राह्मी वैतरणी तथा ।। ८८ ।।
आसां तु सङ्गमो यत्र न्यविशत्तत्र सा नदी ।
तत्र स्नाने भवत्येव त्रिवेणीस्नानजं फलम् ।। ८९ ।।
पतत्यपि त्रिवेणी सा समुद्रे नृपसत्तम ।
इन्द्रपुर इति ग्रामस्तत्रास्ते लोकविश्रुतः ।। ९० ।।

इत्येतत्कथितं भूप ! महानद्यास्तटेषु ये ।
देवदेव्यश्च नद्यश्च सन्ति मत्तः श्रुतं त्वया ।। ९१ ।।
प्रवदस्व महाभाग ! किमन्यत् कथयाम्यहम् ।। ९२ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे
महानदीतीरस्थितदेवताकथनं नाम अष्टात्रिंशोऽध्यायः ।।

एकोनचत्वारिंशोऽध्यायः

पुण्यक्षेत्रसमावेशकथनम्

इन्द्रद्युम्न उवाच

क्षेत्राणि कानि देवर्षे देशाः क्षेत्रसमास्तु के ।
श्रोष्याम्येतानि श्रद्धा मे कथयस्व ममाग्रतः ।। १ ।।

नारद उवाच

विष्णुर्वापि च शम्भुर्वा देवी वान्यसुरोऽपि वा ।
यत्र स्वयं प्रभवति क्षेत्रं भवति तत्पदम् ।। २ ।।
यत्रास्ति पर्वतः पुण्यो नदी पुण्योत्तमापि वा ।
देवस्थानानि दृश्यन्ते मुनिस्थानानि वा तथा ।। ३ ।।
यदृच्छया धर्मवुद्धिर्देवानामुत्सवो महान् ।
वैष्णवानां निवासोऽस्ति तुलसीनां वनं तथा ।। ४ ।।
पद्मानां च वनं यत्र दृश्यन्ते बहुपर्वताः ।
ब्राह्मणानां च यज्ञानां धर्मे श्रद्धा नृणामपि ।। ५ ।।
क्षेत्रतुल्यः स देशस्तु जानीहि नृपसत्तम ! ।
समुद्रस्यान्तिके यस्तु क्षेत्रस्यान्तिके एव हि ।। ६ ।।

गङ्गायाश्च महानद्याः पुण्यानां सरितामपि ।
नदीनां पुष्करादीनामस्ति क्षेत्रं यदत्र भूः ।। ७ ।।
वर्त्तते येषु देशेषु ते वै क्षेत्रसमागताः ।
यस्य देशस्य कोणेषु दिक्षु वा क्षेत्रमण्डली ।। ८ ।।
स देशो नृपश्रेष्ठस्तु क्षेत्रतुल्यो मतो मम ।
ये देशाः क्षेत्रयोर्मध्ये वर्त्तन्ते नृपसत्तम ।। ९ ।।
ते तु क्षत्रसमाः प्रोक्ता इति वेदविदो विदुः ।
समन्ताद्यत्र वर्त्तन्ते देशे सज्ञातयो नृप ।। १० ।।
क्षेत्रतुल्यस्तु देशोऽसौ जानीहि नृपसत्तम ।
आरामाणां नृपश्रेष्ठ ! या भूः सा क्षेत्रमेव हि ।। ११ ।।
सञ्चारो विष्णुभक्तानां शैवानामपि यत्र वा ।
सन्यासिनां ब्राह्मणानां वर्णिनाञ्च तपस्विनाम् ।। १२ ।।
यो देशश्च नृपश्रेष्ठ क्षेत्रतुल्यो भवेदयम् ।
यत्र देशे दया शान्तिः क्षान्तिश्च दम संयमः ।। १३ ।।
शौचमास्तिक्यविज्ञानं ज्ञानानि च तपांसि च ।
साधूनां दर्शने हर्षस्तेषां श्रद्धा समागमे ।। १४ ।।
वैष्णवेष्वपि शैवेषु संहृष्टेष्वतिथिष्वपि ।
आनन्दो जायते सम्यक् स देशः क्षेत्रसाम्यभाक् ।
शौर्यं तेजो धृतिर्दाक्षं युद्धे चाप्यपलायनम् ।। १५ ।।
दानमीश्वरभावश्च क्षत्रियस्यापि यत्र हि ।
एतान्यपि तु कर्माणि वर्त्तन्ते नृपसत्तम ।। १६ ।।
स तु क्षेत्रतमो देशो लोकेषु परिकीर्त्तितः ।
गोरक्षा च कृषिश्चैव वाणिज्यानि च धर्मतः ।। १७ ।।
दृश्यन्ते च नृपश्रेष्ठ स क्षेत्र सम उच्यते ।
शुभाश्च यत्र सेवन्ते द्विजानतिक्रमन्त्यपि ।। १८ ।।

अन्योऽन्यमनुकूल्याश्च स देशः क्षेत्रमुच्यते ।
गावश्च यत्र वर्त्तन्ते पालिता नृपसत्तम ।। १९ ।।
कुशाः काशा यवा दूर्वा गोधूमा वाल्कजास्तथा ।
बहवो यत्र सन्तीह देशः पुण्यतमस्तु सः ।। २० ।।
सुन्दरा मनुजा यत्र सुभगाः शुचयस्तथा ।
स्थूलाश्च कान्तियुक्तश्च वचनैरतिमञ्जुलाः ।। २१ ।।
यत्र देशे प्रवर्त्तन्ते स देशः पुण्यदो मतः ।
नार्य्यः पतिव्रता यत्र शुद्धरूपाः सुवृत्तयः ।। २२ ।।
तत्राण्येव प्रकुर्वन्ति स देशः पुण्यदो मतः ।
यत्र देशे च पुष्पाणि सुगन्धानि बहून्यपि ।। २३ ।।
उत्पन्नानि विशुद्धानि स देशः पुण्यदो मतः ।
वाम्फीकूपतडागानि प्रासादाः प्रथिता भुविं ।। २५ ।।
यत्र देशे च दृश्यन्ते स देशः पुण्यदो मतः ।
धनिनः श्रोत्रियो राजा नदी वैद्योऽपि यत्र वै ।। २६ ।।
वर्त्तन्तेऽप्युपयोगाय देशश्लाघ्यतमस्तु सः ।
व्यवहारा यथार्थाश्च क्रयो विक्रय एव च ।। २७ ।।
प्रशंस्यो दृश्यते यत्र स देशः पुण्यदो मतः ।
इति क्षेत्राणि देशाश्च ये ये पुण्यतमा मताः ।। २८ ।।
कथिताश्च नृपश्रेष्ठ भवदिच्छाक्रमान्मया ।
अपरं किं नृपश्रेष्ठ पृच्छसि यदि मन्यसे ।। २८ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे पुण्यक्षेत्रसमावेशकथनं नाम एकोनचत्वारिंशोऽध्यायः ।।

चत्वारिंशोऽध्यायः

द्वीपसमुद्रकथनम्

इन्द्रद्युम्न उवाच

समुद्रस्य मुनिश्रेष्ठ लहरी प्लवते तु या ।
सापि क्षिप्रं तटं प्राप्य स्वयं मग्ना निवर्त्तते ।। १ ।।
चिल्लिका तत्सरोरूपा कथं सागरवद्भवेत् ।
अन्यानि च जलानि वा न भवन्ति समुद्रवत् ।। २ ।।
भूम्यां उच्चैस्तरो भूप समुद्रः शतयोजनम् ।
वद पृच्छामि देवर्षे तादृशः स कथं भवेत् ।। ३ ।।

नारद उवाच

समुद्रोऽनर्गलो भूप! तटस्तु प्लवते स्वयम् ।
प्रतिबध्नाति तं कोऽत्र जगद्रक्षति वारिधिः ।। ४ ।।
शक्तिमान् सागरः साक्षादशक्तोऽप्यन्यदम्वु यत् ।
चिल्लिका वा नदी वापि कथं सागरवद्भवेत् ।। ५ ।।
क्षणमात्रेण भूमिं स निमज्जयितुमर्हति ।
गभीरं तस्य विज्ञेयं पातालकुहरावधि ।। ६ ।।
यदृच्छया चेत्पातालादुत्तिष्ठेत्सागरः स्वयम् ।
यास्यति ब्रह्मलोकं स तिरस्कृत्य जगत्क्षणात् ।। ७ ।।
अत्युच्चोऽतिगभीरोऽसौ सागरोऽत्र महाशयः ।
मर्य्यादया तटं स्वीयं न लङ्घयति केवलम् ।। ८ ।।
सजीवत्वाच्च तत्त्वाच्च तटं धावति वारिधिः ।
स्वल्पापि लहरी किञ्चिल्लोकधर्षणहेतवे ।। ९ ।।
तटं धावति यद्गर्जन् तरङ्गस्तस्य वारिधेः ।
कथयत्येव लोकान् यद्ग्रस्याम्यहमिदं जगत् ।। १० ।।

निर्बन्धस्तस्य जलधेरयमेव ध्रुवो नृप ! ।
निवृत्त्य प्रथमं याति यावन्मात्रं निजान्तरम् ।। ११ ।।
तदब्धिगुणमात्रं तु स्थलं संप्लवते ध्रुवम् ।
अतिमात्रं कदाचित्स्थलं संप्लवते यदि ।। १२ ।।
तावत्संप्लवते राजन् यावद् विरजमण्डलम् ।
न यात्यसावतिक्रम्योत्तरं विरजमण्डलात् ।। १३ ।।
प्रलये प्लवते शीघ्रं बर्धमानो जगत्त्रयम् ।
जम्बुदीपस्य विस्तारे यावद्भवति मानतः ।। १४ ।।
ततो द्विगुण एवास्य विस्तरो लवणाम्वुधेः ।
मध्येऽस्य तु मीनानां ये सञ्चरन्ति महाण्डजाः ।। १५ ।।
विस्तारोऽस्य शतान्येषां योजनानां नृपोत्तम ! ।
शरीराणां सुमहतां महागर्भेऽभिचारिणाम् ।। १६ ।।
अदृश्या मकरास्तत्र चरन्ति ध्वजरूपिणः ।
ग्राहाः सन्ति महाकाया वारिधौ नृपसत्तम ।। १७ ।।
तादृशाः कर्कटा भेकाः सर्पाश्चान्ये महाण्डजाः ।
न बहिर्जीवितुं शक्ताः स्वल्पनिम्ने लजेऽपि ते ।। १८ ।।
ते चेद्बहिर्गमिष्यन्ति ग्रसिष्यन्ति स्थले जगत् ।
महाघोरतमाः सन्ति तत्रावर्त्ता यदृच्छया ।। १९ ।।
पतन्ति चेद्बहिस्त्रास्ते तेषु मज्जन्ति तत्क्षणात् ।
समुद्रे ये च दृश्यन्ते ते च ग्राह्यास्तटान्तिके ।
उत्पातो जायते राष्ट्रे लोकसंहारकारकः ।। २० ।।

इन्द्रद्युम्न उवाच

देवर्षे! कथय त्वं भो! समुद्राणां च सप्तधा ।
भेदोऽपि रसभेदोऽपि ह्यस्ति तेषां पृथक् पृथक् ।। २१ ।।

नारद उवाच

राजा प्रियव्रतो नामा स्थितः सत्ययुगे पुरा ।
साटोपं भ्रमतो दृष्ट्वा सूर्य्यस्य वैरितां तथा ।। २२ ।।
लोकालोकगुरुः सोऽयं चत्वरे भूतले स्वयम् ।
रथेन सप्तचक्रेण भ्रमतोऽस्य पुना रवेः ।। २३ ।।
मार्गाः सप्तैव चक्राणां जाताः सप्तार्णवा इमे ।
द्वीपा बभूवुस्ते सप्त य एषां मध्यभूमयः ।। २४ ।।
सागरः कृतवान् तेषां द्वीपानामल्पतामपि ।
निखन्य च सहस्राख्यं विस्तारं च चकार सः ।। २५ ।।
प्रतिद्वीपं द्विगुणिताः समुद्राः सन्ति भूपते ।
प्रतिद्वीपं च संवेष्ट्य सन्ति मण्डलरूपिणः ।। २६ ।।
जम्बुद्वीपस्तु तन्मध्ये तत्र ये सन्ति मानवाः ।
सर्वे ते कटुतिक्ताम्लकषायमधुरप्रियाः ।। २७ ।।
विशेषाल्लवणाहारमामिषाशिन एव ते ।
कटुतिक्तकषायाम्लरसरूपाश्च यद्यपि ।। २८ ।।
पुष्पकाष्ठपत्रफलमूलान्याश्रित्य सत्यपि ।
नैराश्याद्वा भवन्त्येते न ते स्युर्जलरूपिणः ।। २९ ।।
लवणत्वं समाश्रित्य भूमिः प्रभवति स्वयम् ।
जलरूपः समुद्रोऽसौ जम्बुद्वीपान्तिके त्वपि ।। ३० ।।
जम्बुद्वीपजनास्तस्माल्लवणामिषभोजिनः ।
सुमधुरेक्षुशाकादिफलमूलजलाश्रयाः ।। ३१ ।।
तृणधान्यादिशस्याम्वुगव्यान्याश्रित्य सन्ति ते ।
रोचन्ते मानुषेभ्यस्ते रसाः षट् सर्व एव हि ।। ३२ ।।
हविष्याः केऽपि भक्ष्यास्ते केऽप्यभक्ष्याः भवन्ति वै ।
रोचन्ते ब्राह्मणेभ्यस्ते हिविष्याः साधुसम्मताः ।। ३३ ।।

क्षत्रियेभ्योऽपि वैश्येभ्यः शुद्रादिभ्योऽप्यभक्षकाः ।
सात्त्विका राजसाश्चैव तामसास्त्रिविधास्तु ते ।। ३४ ।।
शुद्धाः प्रतीता ये तेषु स्वादुस्निग्धसुकोमलाः ।
प्रतीताश्चोत्तमादृष्टैर्भक्षिताः पापशोधकाः ।। ३५ ।।
सर्पिषा गुडदुग्धेभ्यो मधुराः सात्त्विकास्तु ते ।
ते पुनः स्वादवो भक्ष्याश्चाल्पस्निग्धाश्च कोमलाः ।। ३६ ।।
प्रतीता मध्यमा येषु सामिषैः साकमुत्तमाः ।
राजोवृद्धिकराश्चैव राजसाश्च सदा मताः ।। ३७ ।।
राजसेभ्यो मनुष्येभ्यस्ते रोचन्ते यथा पुनः ।
घृतानि गुडदुग्धानि रोचन्ते तेभ्य एव च ।। ३८ ।।
अत्यन्तस्वादवो ये स्युरस्निग्धो नोज्वला मताः ।
नित्यं प्रतीतास्ते राजन्नस्निग्धा मलिनाश्च ये ।। ३९ ।।
न सर्पिषा गुडेनापि मता योजयितुं च ये ।
पर्य्युषितैर्मिश्रिता ये मत्स्याद्यैः पूतिगन्धिभिः ।। ४० ।।
भवन्त्यत्युत्तमा येषां तामसास्ते जना मताः ।
जम्बुद्वीपस्य पार्श्वे तज्ञातोऽयं लवणम्वुधिः ।। ४१ ।।
यत्तेभ्यो रोचते सम्यगधिको लवणो रसः ।
आमिषं रोचते तेभ्यः सर्वस्वादाधिकं महत् ।। ४२ ।।
मत्स्याद्याः सम्भवन्त्येव जम्बुद्वीपजलेषु ते ।
न चान्येषु समुद्रेषु तु ते सन्ति नृपोत्तम ।। ४३ ।।
फलामिषाशिनः सर्वे जम्बुद्वीपे वसन्ति हि ।
लवणाम्वुनिधेः पारेऽपरः स मधुरो रसः ।। ४४ ।।
तत्रस्था मनुजाः सन्ति सर्वे मधुरभोजिनः ।
जनोपयोगी मधुरो रसश्च भवति स्फुटम् ।। ४५ ।।

ततस्तत्सन्निधौ जातं पयो मधुरवारिभिः ।
मधुराम्वुनिधेः पारेऽपरो स मदिरारसः ।। ४६ ।।
तत्र स्थिता जनाः सर्वे सुरापेया भवन्ति हि ।
ततस्तत्सन्निधौ जातः सुरावारांनिधिः महान् ।। ४७ ।।
सुरावारांनिधेः पारे रसाः स्युः सर्पिराशयः ।
सर्पः समुद्भवत्यत्र तत्सर्पिरशनाञ्जनाः ।। ४८ ।।
ते सर्वे देवताप्राया नराः स्युर्दीर्घजीविनः ।
ततस्तत्सन्निधौ जातो सुपेयो घृतवारिधिः ।। ४९ ।।
घृतोदधेः परे पारे रसाः स्युर्दधिसम्भवाः ।
तत्र दध्यशिनः सर्वे नराः स्युर्दीर्घजीविनः ।। ५० ।।
ततस्तत्सन्निधौ जातो विशुद्धो दधिवारिधिः ।
दध्यब्धेश्च परे पारे रसाः स्युर्दग्धसम्भवाः ।। ५१ ।।
तत्र दुग्धाशिनः सर्वे नराश्चामरसन्निभाः ।
ततस्तत्सन्निधौ जातः शुद्धो दुग्धजलाम्वुधेः ।। ५२ ।।
पारे पारे क्षिरनिधेः रसाः स्युर्जलसन्निभाः ।
जलाशिनो नरास्तत्र भवन्ति नृपसत्तम ! ।। ५३ ।।
तस्माञ्जलसमुद्रोऽपि तत्पार्श्वे निवसन्तीह ।
येऽपि यद्यद्रसास्वादिनो भवन्त्यपि रोचनात् ।। ५४ ।।
तत्तत्सन्निधिषु स्थाप्यास्तेऽभू रसजसिद्धयः ।
द्वीपेषुं सप्तसु यन्त्र्य चास्ति शुद्धजलोदधिः ।। ५५ ।।
क्रियार्थं देवपूजार्थं स्नानार्थं नित्यवृत्तये ।
शौचार्थं सर्वपापानां जीवनार्थं च भूरुहाम् ।। ५६ ।।
शस्यानां सम्भवार्थं च विशुद्धं जलमेव हि ।
सर्वेषां च समुद्राणां जलानि पृथिवीपते ।। ५७ ।।

प्रविश्यन्त्यपि मेघेषु स्युर्विशुद्धजलान्यपि ।
इदं ते कथितं सर्वं भवता पृष्ट मे तु यत् ।। ५८ ।।
अन्यत्किं कथयिष्यामि वदत्वं नृपसत्तम ।। ५९ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे द्वीपसमुद्रकथनं नाम चत्वारिंशोऽध्यायः ।।

एकचत्वारिंशोऽध्यायः

गुणत्रयप्रसङ्गे ज्ञानयोगकथनम्

इन्द्रद्युम्न उवाच

मुने यत्कथितं पूर्वं राजसाः क्षत्रिया अपि ।
ब्राह्मणाः सात्त्विकं कर्म के वा कुर्वन्ति कुत्र वै ।। १ ।।

नारद उवाच

कलौ तु राजसं कर्म प्रकुर्वन्ति द्विजा वहु ।
ततोऽप्यधिकमेवेह तामसं कर्म वै द्विजाः ।। २ ।।
प्रकुर्वन्ति परे केचिन्नाममात्रं च ब्राह्मणाः ।
न केचित्तु प्रकुर्वन्ति कर्ममात्रं कलौ द्विजाः ।। ३ ।।
चिह्नमात्रेण रक्षितुं ब्राह्मणत्वं प्रवृत्तयः ।
विलुप्ताः क्षत्रियाः सर्वे ते नश्यन्ति कलौ युगे ।। ४ ।।
निःसत्त्वा मलिना वैश्या निजाचारबहिष्कृताः ।
दरिद्रा दुर्भगा विप्रास्त्रयस्ते द्विजजातयः ।। ५ ।।
शुद्राश्चान्ये च ये वर्णाः कुत्सिता बहवश्च ते ।
ते सर्वे कुत्सिताचाराः निजाचाराद्बहिष्कृताः ।। ६ ।।

इन्द्रद्युम्न उवाच

लुप्तं तु वैदिकं कर्म वेदाः निवार्यतां गताः ।
कलौ वान्ययुगे वापि कर्म कुर्वन्ति राजसम् ।। ७ ।।
ये विप्राः का गतिस्तेषां कथयैतन्मुनीश्वर !
कर्ममात्रं प्रकुर्वन्ति ये दम्भेन स्ववृत्तये ।। ८ ।।
गणयन्ति प्रमादान्न पशुहत्यां सुदारुणाम् ।
मन्त्रपाठस्य पठनमन्यथा कल्पयन्त्यपि ।। ९ ।।
न पठन्ति न जानन्ति वेदान् कर्मक्रमं यथा ।
न ददत्यन्नमात्रं ते न पश्यन्ति च याचकान् ।। १० ।।
तेषां गतिं कथय भो कलौ वान्ययुगेऽपि वा ।
राज्ञां च चौरवृत्तीनां प्रजाद्रव्यापहारिणाम् ।। ११ ।।
वैश्यादीनां तथा चौरप्रायाणां वणिजामपि ।
शूद्राणामतिदुष्टानामन्येषां कुत्सितात्मनाम् ।। १२ ।।
पण्यजीविद्विजानां च वाणिज्याज्जीवीनां तथा ।
सेवावृत्तिकराणां च कृषिवृत्तिपरात्मनाम् ।। १३ ।।
पापाचाराः कलौ सर्वे सर्वेषां का गतिः प्रभो ।
यवना बहवश्चैव सम्भवन्ति कलौ युगे ।। १४ ।।
कथं तेषां गतिः का वा कथयैतन्मुनीश्वर !
प्रवर्त्तयन्ति ये देवाः सात्त्विकं कर्म राजसम् ।। १५ ।।
यत्कर्म तामसं चैव तेषां भेदो भवेत्कुतः ।
कल्पते परिणामोऽपि यथा तेषां भवत्यपि ।। १६ ।।
पुराणेभ्यः स्मृतिभ्यश्च सर्वं कर्णेषु श्रावय ।
भव्या भवन्त्यो भूताश्च ब्राह्मणानां मुखाश्रिताः ।। १७ ।।

परिणामे गतिः का स्यात्तेषां चमत्कृता हि वै ।
तद्वदस्व महाभाग निर्विकल्पं यथाक्रमम् ।। १८ ।।

नारद उवाच

शृणु त्वं नृपतिश्रेष्ठ कथयामि सुनिश्चयम् ।
भेदो यतोऽस्ति वेदानां कारणं तन्निबोध वै ।। १९ ।।
प्रथमं सात्त्विकी वेदसंहिता विष्णुना स्वयम् ।
ब्रह्मणे कथितं कर्म सात्त्विकं यत् कृते युगे ।। २० ।।
तत्सृष्टौ साधनं नाभूद्यतस्तद् ब्रह्मणा पुनः ।
चोदितेन सुहृदये विष्णुना निजमायया ।। २१ ।।
सत्त्वयुक्तेन रजसा विसृष्ट्य वेदसंहिताम् ।
राजसं कर्म सृष्टिश्च विहिता विधिना पुरा ।। २२ ।।
तत्सृष्टिसाधनं कर्म प्रादुरासीन्नृपोत्तम ! ।
तत्सत्त्वराजसा सम्यक् वेदेन प्रतिपादितम् ।। २३ ।।
तत्कालावधि लोकेऽस्मिन् सात्त्विका राजसा द्विजाः ।
निवृत्तिकर्मणा मुक्ताः सात्त्विकास्तद्दिनावधि ।। २४ ।।
प्रवृत्तिकर्मणि तावत् प्रवृत्ता राजसा द्विजाः ।
यतः स्याद्राजसं कर्म साधनं सृष्टिवृद्धये ।। २५ ।।
गति तेनैवं विविधं हृदयेनैव विष्णुना ।
विसृष्टं राजसं कर्म किञ्चित्सात्त्विकसंयुतम् ।। २६ ।।
सृष्ट्वा तु राजसं कर्म किञ्चित्सत्त्वान्वितं महत् ।
मनुना हि निजं पुत्रं मनुः प्राह पुनस्तु तत् ।। २७ ।।
भृगुप्रधानान्सप्तर्षीन् ते प्रोचुस्तु पितृन् पुनः ।
ततो देवाः सगन्धर्वाश्चारणाः यक्षराक्षसाः ।। २८ ।।

सिद्धाः किंपुरुषाः नागाः देवाश्च किन्नरादयः ।
मनुष्यान्तास्तथा सर्वे कर्म कुर्वन्ति राजसम् ।। २९ ।।
सुसम्पद्वृद्धये स्वानां सुखभोगादिषु मुहुः ।
राजसं कर्म लोकेऽस्मिन् सर्वत्रैव प्रवर्तते ।। ३० ।।
राजसं विरलं कर्म तामसं सर्वतो बहु ।
सात्त्विकं कर्म कुत्रापि किञ्चिन्न स्यात् क्षितिस्थले ।। ३१ ।।
कथयामि शृणु त्वं भो ! सावधानः क्षितीश्वर !
कलौ कुर्वन्ति ये विप्राः सात्त्विकं कर्म जन्मतः ।। ३२ ।।
तन्निर्वहन्ति ये तेषां तत्फलं शृणु भूमिप !
सन्ध्याकर्मणि येऽवश्यं प्रकुर्वन्ति यथाविधि ।। ३३ ।।
यथाकाले तर्पणादिपञ्चयज्ञादिकान्यपि ।
गायत्र्यादिजपे श्रद्धा कोटिगायत्रीजापिनः ।। ३४ ।।
सदर्भमालास्तिलकाः सूर्यलोकं व्रजन्ति ते ।
वेदोपदेशं कृत्वा च जन्मतो व्रतचारिणः ।। ३५ ।।
कुर्वन्ति वेदाध्ययनं जनलोकं व्रजन्ति ते ।
सन्न्यस्य सर्वकर्माणि प्रणवं ये जपन्ति वै ।। ३६ ।।
ब्रह्मलोकं व्रजन्त्येते मोदन्ते ब्रह्मणा सह ।
कृत्स्नं चान्द्रायणादिकं तपसि नियताश्रयाः ।। ३७ ।।
ये कुर्वन्ति द्विजाः सिद्धास्तपलोकं व्रजन्ति ते ।
नित्यं नैमित्तिकं काम्यं कर्म कुर्वन्ति ये द्विजाः ।। ३८ ।।
विधानैश्च यथाकालं पितृलोकं व्रजन्ति ते ।
अग्निष्टोमादिचयनं वाजपेयादिकान्मखान् ।। ३९ ।।
ये कुर्वन्ति द्विजन्मानो महलोकं व्रजन्ति ते ।
अग्निष्टोमं च विधिवद्ये कुर्वन्ति नृपोत्तम ! ।। ४० ।।

इन्द्रलोकं ब्रजन्त्येते मोदन्ते शक्रसङ्गमात् ।
एवमादीनि कर्माणि राजसानि बहुन्यपि ।। ४१ ।।
अपि सात्त्विकयुक्तानि वर्तन्ते क्षितिमण्डले ।
यदि सिद्ध्यन्ति यत्नेन निर्विघ्नं च यथाविधि ।। ४२ ।।
फलं ददति तान्येव न फलानि न चेत्तथा ।
विधिहीनानि शाठ्येन क्रमहीनानि तानि चेत् ।। ४३ ।।
प्रत्यवायविनिष्टानि नयन्ति नरकं च तान् ।
रजोभिर्मलिनं ज्ञानं चक्षुषां कर्म कुर्वताम् ।। ४४ ।।
मार्गं दर्शयति स्वल्पं सत्त्वं स्थूलप्रदीपवत् ।
ये यत्नैरिन्द्रियग्रामं नियम्य च नृपोत्तम ! ।। ४५ ।।
बुद्ध्यात्मयोगमालम्ब्य कर्म कुर्वन्ति ये द्विजाः ।
फलं ब्रह्मार्पणं कृत्वा निरुध्य निखिलेन्द्रियम् ।। ४६ ।।
आत्मानमधिपश्यन्ति विरक्तज्ञानचक्षुषः ।
जलधौतरजश्चक्षुर्लोका इव सुनिर्मलाः ।। ४७ ।।
ते स्युः सात्त्विककर्माणो विषयेष्वन्धवद्द्विजाः ।
विषयेष्वपि ये लोकाः स्थित्वा कृष्णं भजन्त्यपि ।। ४८ ।।
धौतानि स्युः रजांस्येषां भक्तिजैः सत्त्ववारिभिः ।
विष्णुभक्तिर्महायोगो माया च दशनृत्यजैः ।। ४९ ।।
दिव्यगन्धाद्वहिर्देहात्पलायन्ते रजांस्यपि ।
कृष्णपादाम्बुजद्वन्द्वमकरन्दादिवृष्टिभिः ।। ५० ।।
धौतानि तरलान्येव पलायन्ते रजांस्यपि ।
राजसैः कर्मभिर्नित्यं रजोवृद्धिर्भवत्यपि ।। ५१ ।।
शुद्धे रजसि तं देहं सत्त्वं त्यजति तत्क्षणात् ।
सत्त्वे त्यक्त्वागते शश्वद्रजः संवर्द्धते क्षणात् ।। ५२ ।।

रजः प्रवृद्धिर्भवति तमोरूपं विसर्जयेत् ।
रजोगुणः पूर्वभागे परभागे तमोगुणः ।। ५३ ।।
करोति नाम सत्कर्म राजसंज्ञानचोदितम् ।
तमः प्रवेशाज्जनकैः कलिः प्रविशति स्वयम् ।। ५४ ।।
सत्यत्रेताद्वापरेषु चेष्टते स प्रवर्तितुम् ।
यदा तु स च तत्रस्थैः सात्त्विकैर्मुनिभिर्नृपैः ।। ५५ ।।
हरिणा वावतीर्णेन स दूरं क्रियते क्षणात् ।
आद्ये तु सात्त्विकः सर्गः मध्ये राजस ईरितः ।। ५६ ।।
प्रान्ते तु तामसः सर्गस्तत्प्रान्ते स्यात् कलिः स्वयम् ।। ५७ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे गुणत्रयप्रसङ्गे ज्ञानयोगकथनं नाम एकचत्वारिंशोऽध्यायः ।

द्विचत्वारिंशोऽध्यायः

जीवतत्त्वकथनम्

नारद उवाच

कलौ तमोगुणः सर्वव्यापारेषु प्रवर्तते ।
रजोगुणो विवेकस्य प्रवर्तेत निवृत्तये ।। १ ।।
किञ्चित्सत्त्वगुणस्तत्र दुर्वलोऽप्यतिदुःखितः ।
प्रवर्तते स तु क्वचित् चौरप्रियो विडम्बितः ।। २ ।।
तामसं कर्म तत्रापि मनस्तामस एव हि ।
तामसानीन्द्रियाण्येव बुद्धिः सा न तु राजसि ।। ३ ।।
सर्वेऽपि व्यवहाराश्च तामसात्तु प्रवर्त्तिताः ।
विवेको राजसस्तत्र परिहासाय सात्त्विकः ।। ४ ।।

ज्ञानं च तामसं तत्र व्यवसायाय राजते ।
बुद्धिः स्यात् सात्त्विकं ज्ञानं निन्दन्ति ज्ञानवर्जिताः ।। ५ ।।
प्रवृत्तं तामसं कर्म निवृत्तं राजसं मतम् ।
नष्टं तु सात्त्विकं कर्म यत्किञ्चिदत्र वर्तते ।। ६ ।।
फलं तु तामसं तत्र तामसश्चैव कर्मणः ।
राजसं सुखमेवास्ति संप्रीतिश्चापि राजसि ।। ७ ।।
राजसं कर्म यद्यत्तु प्रयत्नेनैव सिद्ध्यति ।
यदा तदा ददात्येतत् सुखं दैवं च सम्पदम् ।। ८ ।।
सात्त्विकं कर्मण्यप्यस्मिन्न सिद्ध्यति कदाचन ।
यदि सिद्ध्यति कस्यैतद्यत्नेन कृपया हरेः ।। ९ ।।
सत्ये युगे सात्त्विकं यत्फलं कर्म ददात्यपि ।
ततश्चतुर्गुणं पुण्यं ददात्यपि फलं महत् ।। १० ।।
कलौ सर्वेऽपि धर्माः स्युः विष्णुभक्तेः प्रगल्भतः ।
सम्पूर्णो जातिलोकानां प्रत्यवायविनिष्टये ।। ११ ।।

इन्द्रद्युम्न उवाच

कलौ तु यज्ञ कर्माणि फलं ददति किं मुने ! ।
कर्माण्यन्यानि वा कानि वद त्वं मुनिसत्तम ! ।। १२ ।।

नारद उवाच

यज्ञकर्मसु भो ! राजन् ! फलं यत्तत्कथं कलौ ।
यदि स्यात्तेषु दानानि सम्यक्कर्म च सिद्ध्यति ।। १३ ।
यज्ञकर्माणि नैवात्र सिद्ध्यन्ति नृपसत्तम !
देवताः नैव तुष्यन्ति कर्मदोषगुणात्कलौ ।। १४ ।।
ब्राह्मणाश्चार्थिनो लोकाः व्रते तु विमुखाः कलौ ।
छिन्नभिन्नाः कलौ वेदाः निज वीर्याणि न क्वचित् ।। १५ ।।

प्रकाशयन्ति विमुखाः भवन्त्युच्चारितानि यत् ।
दानेन यत्फलं तत्र तदेव स्यात् कलौ युगे ।। १६ ।।
दोषास्तु कर्मवैगुण्याज्जायन्ते पशुहिंसया ।
प्रपञ्चा न प्रशान्ताः स्युः प्रमत्ताः दाम्भिकाः यतः ।। १७ ।।
व्यवस्थामिषमद्यानां वार्त्तिकाः ये नयन्त्यपि ।
कुटुम्बपोषणार्थाय कुर्वन्ति क्रतुकर्म ते ।। १८ ।।
ततस्ते नरके घोरे पतन्त्यपि न संशयः ।
यदि स्युस्तत्र कर्माणि विशुद्धानि प्रयत्नतः ।। १९ ।।
दानानि च फलानि स्युर्यानि यानि कृते युगे ।
ततः सत्त्वगुणिनश्च कलौ सिद्ध्यन्ति कर्मसु ।। २० ।।
कर्माणि स्वसुखेनैव सत्यादिषु युगेष्वपि ।
सिद्ध्यन्ति चेत् कलौ दुःखैः नृणां तदधिकं फलम् ।। २१ ।।
सन्ध्यादिसर्वकर्माणि दानं ध्यानं जपस्तपः ।
स्तोत्रादिवेदाध्ययनं कुच्छ्रचान्द्रायणादिकम् ।। २२ ।।
योगज्ञानादिकं सर्वं सिद्ध्येद्यदि कलौ युगे ।
अधिकं स्यात् फलं तस्मात्सत्यादिषु च यत्फलम् ।। २३ ।।
किं तु कर्माणि नैवास्मिन् सिद्ध्यन्ति तु कलौ युगे ।
भाग्येन कृष्णकृपया कदाचित् कस्यचित्तु वा ।। २४ ।।
सिद्ध्यन्ति कर्माणि कलौ तेभ्यः स्यादधिकं फलम् ।
विनिवृत्तेन्द्रियग्रामः स्वशक्त्या ये भजन्त्यपि ।। २५ ।।
ये विश्वव्यवहारञ्च त्यजन्ति निजशक्तिभिः ।
अन्धो यथा तमोभिः स्वैर्भवन्ति प्राप्तचक्षुषः ।। २६ ।।
रात्रौ यै चैव कुर्वन्ति दिवसे वा तपस्विनः ।
साधयन्ति कलौ तद्वद् ब्रह्मज्ञानं तपस्विनः ।। २७ ।।

किं तु सिद्ध्यत्यनायासाद् विष्णुभक्तिः कलौ युगे ।
ये कुर्वन्ति जनास्ते ते प्राप्नुवन्ति महासुखम् ।। २८ ।।
कल्किरूपां कालरात्रिं विष्णुभक्तिः क्षणादपि ।
दूरीकरोति रविस्तारेऽत्र समुदितः स्वयम् ।। २९ ।।
प्रकाशयन्ति वेदाश्च न वीर्याणि कलौ युगे ।
कर्मण्यपि न सिद्ध्यन्ति वेदाश्च विमुखास्ततः ।। ३० ।।
ततोऽपि सर्वलोकानां योगक्षेमौ न सिद्ध्यति ।
ततः प्रविवृताः सर्वे भवन्त्यपि कलौ युगे ।। ३१ ।।
विप्राः कर्मणः सिद्धेषु स्वयोगक्षेमहेतुषु ।
नानादुर्वृत्तिं कुर्वन्ति कृषिं वाणिज्यमेव च ।। ३२ ।।
सेवाञ्च ग्रामयाचित्वं देहल्यां तु सुनिन्दितम् ।
कुर्वन्ति सूपकारत्वं दुष्प्रतिग्रहमेव च ।। ३३ ।।
पुण्यविक्रयतां मुष्टिभिक्षां च याचनादिकम् ।
तथापि न भवेत्तेषां निर्वाहो निजपोषणे ।। ३४ ।।
एवं च क्षत्रियाः वैश्याः शूद्राश्चान्याश्च जातयः ।
जीवितुं नैव शक्ताः स्युर्नानादुःखैः कुवृत्तिभिः ।। ३५ ।।
यतस्तेषां न दोषः स्यात्सदोषः स्यात्कलेरपि ।
ततः कृष्णकृपा तेषु भवत्येव न संशयः ।। ३६ ।।
ये कृपाहीनाः सर्वे ते निमग्नाः दुःखसागरे ।
सन्तरन्त्यतिघोरेभ्यो महादुःखेभ्यः एव हि ।। ३७ ।।
कलिस्तु वृषलाकारो यवनाकारको व्रजन् ।
अतिप्रबलो भवति स्वयं पीडयति जनान् ।। ३८ ।।
दुर्वलाश्च जनाश्चान्यास्ततो घोरतमेषु हि ।
नरकेषु पतन्त्येव सत्यादिषु युगादिषु ।। ३९ ।।

सुकालोऽत्र ततः प्रादुर्भवत्येव न संशयः ।

इन्द्रद्युम्न उवाच

कलिदोषात्तरन्त्येते श्रीकृष्णकृपया जनाः ।। ४० ।।
निजदोषैस्तु पापेभ्यस्तेषां निस्तारो वा कथम् ।
कथयैतन्महाभाग ! संशयो भवति महान् ।। ४१ ।।

नारद उवाच

यदि धर्मं न शृण्वन्ति शिक्षां कुर्वन्ति नैव ते ।
आत्मसंमोहिनीं मायां ज्ञात्वापि निजदुःखदाम् ।। ४२ ।।
संनिवर्त्तयितुं नैवोपायं कुर्वन्ति शिक्षिताः ।
पाषाण्डधर्मं कुर्वन्ति दोषभाजस्तु ते नराः ।। ४३ ।।
स्वदोषैर्यमदण्डानि प्राप्नुवन्त्यैव ते नराः ।
ये कुर्वन्ति हरिद्रोहं न भजन्ति हरिं तु ये ।। ४४ ।।
ते प्राप्य यमदण्डानि प्राप्नुवन्ति न निष्कृतिम् ।
पापं कृत्वा न कुर्वन्ति प्रायश्चित्तं तु ये नराः ।। ४५ ।।
निजदोषेण ते यान्ति नरकान्येव निश्चयम् ।

इन्द्रद्युम्न उवाच

प्रवर्तते कथं सृष्टिरधर्मश्चेत् प्रवर्तते ।। ४६ ।।
निवर्तते कथं नैषा स्वधर्मं प्राप्य तत्क्षणात् ।
धर्मिभ्यो जायते यस्मात् कथं लोकोऽप्यधर्मकृत् ।। ४७ ।।
अधर्मिभ्योऽपि वा कस्माज्जायते धर्मकृज्जनः ।
अधर्मवासना धर्मादधर्माद् धर्मवासना ।। ४८ ।।
कथं भवति देवर्षे ! कथयैतत्सुनिश्चितम् ।

नारद उवाच

सृष्टिः प्रवर्तते शश्वन्मायया चेश्वरेच्छया ।। ४९ ।।
संनिवर्तयितुं शक्नोत्यधर्मस्तां कथं स्वयम् ।
संनिवर्तयितुं साक्षादीश्वरो धावति स्वयम् ।। ५० ।।
अधर्मे धर्ममेवासौ प्रवर्तयति नित्यशः ।
सर्वेषामेव लोकानां मनः संसारकारणम् ।। ५१ ।।
इन्द्रियाणि च तत्कर्म कारणानि नृपोत्तम !
मनः करोति यत्कर्म पुण्यं वा पापमेव वा ।। ५२ ।।
अनुगच्छेत्तदात्मानं जीवो जीवितमाप्नुयात् ।
बुद्धिः करोति पुण्यं तु पापं कर्म मनस्तु हि ।। ५३ ।।
प्राप्नोति जननं तत्तदात्मा चेदनुगच्छति ।
महत्तत्त्वमहङ्कारस्वरूपो जीव एव सः ।। ५४ ।।
चित्तं बुद्धिर्मनःशान्तिकरणान्यतराणि च ।
आत्मनश्चेतसा बुद्धिर्यद्यकर्म करोति वै ।। ५५ ।।
प्राज्ञः करोति चात्मानं ततो मोक्षमवाप्नुयात् ।
मनसा सह चेद्बुद्धिः कर्म कर्त्तुं प्रवर्त्तते ।। ५६ ।।
मनोबुद्धिमतिक्रम्य कुरुते बन्धुमात्मनः ।
अहङ्कारस्तु संसारं मनोयुक्तं प्रधावति ।। ५७ ।।
जीवः स्वशक्त्यैव ततो नाना भवति जन्मसु ।
वह्निराशीर्यथा स्वस्मात् करोत्यग्निकणानपि ।। ५८ ।।
तथैव नैको भवति संसारो वर्द्धते यतः ।
यद्देहे तिष्ठति मनो जीवं तद्देहवर्त्तिनम् ।। ५९ ।।
कारयित्वा स्ववशिनं पुण्यं वा पापमेव वा ।
अन्यदेहं ब्रजत्येष त्यक्त्वा पूर्वां तनुं स्वयम् ।। ६० ।।

पूर्वदेहे स्थितो जीवः कृतवान् मनसा स्वयम् ।
पापं वा यदि वा पुण्यं तद्भुञ्जेत सुनिश्चयम् ।। ६१ ।।
मनो यद्देहमाप्नोति पूर्वदेहात्परं पुनः ।
जीवरूपी स जीवात्मा स्वांशेनानुब्रजत्ययम् ।। ६२ ।।

इति श्रीकपिलसंहितायामुत्कलखण्डे जीवतत्त्वकथनं नाम द्विचत्वारिंशोऽध्यायः ।

ओं शान्तिः शान्तिः शान्तिः

नीलाद्रिमहोदयः


JAGANNATH TEMPLE AT PURI

नीलाद्रिमहोदयः

प्रथमोऽध्यायः

एकदा नैमिषारण्ये पुण्ये सर्वसुखप्रदे ।
नानातीर्थसमायुक्ते नानागुल्ममनोरमे ।। १ ।।
फलपुष्पाढ्यवृक्षाणां निकरैः परिमञ्जुले ।
मन्दानिलसमायुक्ते विविक्ते मृगरञ्जिते ।। २ ।।
तापसाश्रमसङ्कीर्णे ख्याते परमपावने ।
तादृशेऽपि वने रम्ये शौनकाद्याः मुनीश्वराः ।। ३ ।।
रुण्डीभूय समस्तास्ते गोष्ठीं चक्रुर्मनोरमाम् ।
समस्ततीर्थतत्त्वानां ज्ञानाय जगतीतले ।। ४ ।।
क्षेत्राणां शिवदानां च जिज्ञासायै त्वरान्विताः ।
सभायां जायमानायां तत्क्षणे च मुनीश्वरः ।। ५ ।।
जटामण्डलधारी च धृतकौपीनसुन्दरः ।
कृष्णाजिनोत्तरीयेण विराजितवपुर्मुनिः ।। ६ ।।
सूतस्तथाऽपि सम्प्राप्तस्तत्र शिष्यगणैर्युतः ।
तं दृष्ट्वा परमप्रीताः शौनकाद्यास्तपस्विनः ।। ७ ।।
उत्थाय च नमश्चक्रुः सोऽपि तान् दण्डवद्भुवि ।
प्रणामं कृतवान् तत्राप्युवास स तदा मुनिः ।। ८ ।।
समासीनं ततो दृष्ट्वा ऋषयस्ते मुनीश्वराः ।
ऊचुः प्राञ्जलयः सर्वे सर्वलोकहिताय वै ।। ९ ।।

ऋषय ऊचुः

भगवान् सर्वधर्मज्ञ सर्वतीर्थादितत्त्ववित् ।
अतो ब्रूहि समस्तानां तीर्थानां शिवसंभृताम् ।। १० ।

क्षेत्राणां च फलं तावत् सूत नः कथय प्रभो ।
तेषां मध्ये वरः को वा क्षेत्राणां च मुनीश्वर ।। ११ ।।
तीर्थानां च तथा ब्रूहि यतस्त्वं व्यासशसितम् ।
समस्तफलयुक्तानां पावनानां च तत्त्वतः ।। १२ ।।
इत्येवं ब्रूवतां तेषां ऋषीणामग्रतः पुरा ।
समारभेत तद्वक्तुं गुह्यं तैः पृष्टमुत्तमः ।। १३ ।।

सूत उवाच

शृणुध्वं मुनयः सर्वे संयतात्मान एव हि ।
तीर्थानां क्षेत्रराशीनां मध्ये श्रीपुरुषोत्तमः ।। १४ ।।
गुह्यः सर्वतमोध्वंसी सर्वपुण्यफलप्रदः ।
अस्ति शर्मप्रदश्चैव नीलभूधरभूषितः ।। १५ ।।
ऋषिकुल्यां समासाद्य यावद्वैतरणी नदी ।
तावत् क्षेत्रस्य माहात्म्यं वर्तते मुनिपुङ्गवाः ।। १६ ।।
समुद्रस्योत्तरं तीरं महानद्यास्तु दक्षिणम् ।
तटमारभ्य तत्क्षेत्रं राजमानं सुपावनम् ।। १७ ।।
वर्तते तत्समारभ्य समन्ताद्दशयोजनम् ।
पदे पदे श्रेष्ठतमं तत्क्षेत्रं वर्ततेऽनघाः ।। १८ ।।
तन्नीलाचलपर्यन्तं भुक्तिमुक्तिफलप्रदम् ।
तत्र गन्तुं समर्थास्ते ये वै विगतकल्मषाः ।। १९ ।।
ये वै वैतरणीतीरे स्नात्वा भक्तिसुसंयताः ।
गदाक्षेत्रेऽपि तां देवीं विरंजां तटवासिनीम् ।। २० ।।
दृष्ट्वा ते मनुजा योग्याश्चैकाम्रवनलोकने ।
तत्र चैकाम्रविपिने नीलकण्ठं मुनीश्वराः ।। २१ ।।

स्नात्वा विन्दुह्रदे रम्ये दृष्ट्वा च शिवमुत्तमम् ।
ते च मर्त्त्यास्तथा योग्याः कोणार्कपरिलोकने ।। २२ ।।
अर्कक्षेत्रे पवित्रेऽस्मिन् चन्द्रभागानदीजले ।
स्नात्वा ये सूर्यमत्युग्रं पश्यन्ति मुनिपुङ्गवाः ।। २३ ।।
क्षीणपापाश्च ते मर्त्त्याः क्षेत्रं श्रीपुरुषोत्तमम् ।
द्रष्टुं समर्थाः शिवदं पावनं धरणीसुराः ।। २४ ।।
पञ्चक्रोशायतियुतं शङ्खाकारं मनोहरम् ।
नीलाचलसमुल्लासं पापराशिविनाशनम् ।। २५ ।।
समुद्रोदकसंगुप्तश्रीमच्छङ्खोदरं शुभम् ।
क्रोशत्रितयसंस्पृष्टं पश्यतां पापमोचनम् ।। २६ ।।
नानातीर्थसमायुक्तं कोटिब्रह्माण्डदुर्ल्लभम् ।
गन्तुं समर्थास्ते सर्वे ये वै भक्ता जनार्द्दने ।। २७ ।।
यत् क्षेत्रस्पर्शतो विप्राः समुद्रस्तीर्थराट् स्मृतः ।
क्रोशत्रयोन्नतियुते क्षेत्रे श्रीपुरुषोत्तमे ।। २८ ।।
शङ्खाकारोऽपि तन्मध्ये राजते नीलभूधरः ।
तत्र नीलाचले कुण्डे रोहिण्यां नाम्नि भूसुराः ।। २९ ।।
कारुण्योदकसम्पूर्णं स्पृशतां पापनाशनम् ।
येन कुण्डजलेनैव ब्रह्मणः प्रलयो भवेत् ।। ३० ।।
उत्तरे कल्पवृक्षोऽस्ति साक्षाद्विष्णुस्वरूपभाक् ।
स्पृशतां पश्यतां वाऽपि च्छायातलनिवासिनाम् ।। ३१ ।।
ब्रह्महत्यादिपापघ्नो वर्तते कल्पपादपः ।
तन्मूले मञ्जुले रत्नकुट्टिमेऽतिमनोरमे ।। ३२ ।।
रत्नसिंहासने दिव्ये वर्तते नीलमाधवः ।
उभयोः पार्श्वयोस्तस्य धरा लक्ष्मीश्च संस्थिते ।। ३३ ।।

शतहस्तप्रमाणेन वृक्षस्यानिलकोणतः ।
तस्यास्ते माधवो देवो तद्दक्षे नरकेशरी ।। ३४ ।।
साक्षाद् ब्रह्मस्वरूपोऽस्ति हिरण्यकशिपो रिपुः ।
एतस्य पुरतो विप्राः कल्पाख्यतरुमूलतः ।। ३५ ।।
यत् किञ्चित् कुरुते कर्म कोटिकोटिगुणं भवेत् ।
किञ्चिदुत्तरतस्तस्य नृसिंहस्य परात्मनः ।। ३६ ।।
कामाख्यः क्षेत्रपालोऽस्ति सर्वकामफलप्रदः ।
द्वितीयावर्त्तगा देवी विमला वर्ततेऽमला ।। ३७ ।।
शक्तिराद्या समस्तानां भुक्तिमुक्तिप्रदायिनी ।
तृतीयावर्त्ततः श्रीमान् तीर्थोऽस्ति मणिकर्णिका ।। ३८ ।।
कपालमोचनो नाम तत्समीपे महेश्वरः ।
पश्यतां जगतां वापि ब्रह्महत्यादिपापहा ।। ३९ ।।
समुद्रस्य तटे रम्ये यमेश्वर इतीरितः ।
नारायणात्मकः श्रीमान् यमदण्डविनाशकः ।। ४० ।।
पश्यतामर्च्चकानां यः कोटिलिङ्गफलप्रदः ।
तस्य शम्भोरग्निकोणे कण्डुस्तिष्ठति सन्मुनिः ।। ४१ ।।
यमेश्वरस्य वेढायां मध्येऽस्ति चण्डरूपिणी ।
पश्यतां जपतां वापि भुक्तिमुक्तिप्रदायिनी ।। ४२ ।।
चामुण्डायाः पुरोभागे कालिका तापनाशिका ।
वर्तते वल्लभा विष्णोर्दक्षिणस्यां दिशि प्रभोः ।। ४३ ।।
विष्णोः कल्पतरोश्चैव समुद्रतटमात्रतः ।
चण्डरूपाकालिकयोः पुरपृष्ठस्थलाश्रयः ।। ४४ ।।
दक्षिणः पार्श्व एव स्यादनन्तफलदायकः ।
एतद्दक्षिणपार्श्वेऽपि सा गङ्गा लोकपावनी ।। ४५ ।।

वर्तते मनसा ध्यात्वा हरिं तस्याश्च दक्षिणे ।
जनार्द्दनो मत्स्यरूपः श्वेतरूपधरः शिवः ।। ४६ ।।
तस्य विष्णोर्हरस्यास्य मध्यं परमपावनम् ।
मुक्तिप्रदस्थलं तावद्वदन्ति कृतिनः सदा ।। ४७ ।।
तद्गङ्गाजलतः स्नात्वा मत्स्यश्वेतविलोकनात् ।
सर्वपापविनिर्मुक्तो वाजपेयफलं लभेत् ।। ४८ ।।
महाप्रसादेष्वज्ञानामपराधो भवेत्पदे ।
तज्जले प्लवनात्तावन्मत्स्यश्वेताङ्गलोकानात् ।। ४९ ।।
नश्येत्तत्क्षणमेवायमपराधो महीसुराः ।
वटमूले वटेशोऽस्ति पश्यतां सर्वकामदः ।। ५० ।।
तदग्रे मङ्गला भाति द्वितीया शक्तिरुत्तमा ।
वटस्य दक्षिणे भागे गणेशो दक्षिणाननः ।। ५१ ।।
सर्वविघ्नविनाशाय लोकानां वर्तते द्विजाः ।
तद्विलोकनमात्रेण सर्वकामफलं भवेत् ।। ५२ ।।
नीलभूधरपूर्वेऽपि शक्तिरस्ति मरीचिका ।
सर्वेषां निजदासानां मनोरथविधायिनी ।। ५३ ।।
ऐशान्यां दिशि रुद्रोऽस्ति माधवस्य जगद्गुरोः ।
जनानामर्च्चकानां यः सर्वकामफलप्रदः ।। ५४ ।।
अर्द्धाशनी तथा लम्बा कौवेरदिशि संस्थिता ।
कपालमोचनो यावद्यावदर्द्धाशनी द्विजाः ।। ५५ ।।
मध्यं शङ्खस्य हरिणा गुप्तं मुक्तिप्रदायकः ।
नीलकण्ठस्तु शङ्खाग्रे वर्तते सर्वमङ्गला ।। ५६ ।।
पृष्ठभागे स्थिता देवी तत्क्षेत्रपरिरक्षणे ।
प्रमाणमेव शङ्खस्य कथितं भवदग्रतः ।। ५७ ।।

वटस्य वायुकोणेऽपि मार्कण्डेयो महातपाः ।
लिङ्गरूपी स्वयं भूत्वा वर्तते पुरुषोत्तमे ।। ५८ ।।
मार्कण्डेयह्रदो विप्राः पावनस्तेन निर्मितः ।
तत्र स्नात्वा शिवं दृष्ट्वा विधिनार्च्चितमुत्तमम् ।। ५९ ।।
ये च भक्त्या नराः क्षिप्रं वाजपेयफलं लभेत् ।
एतादृशं महाक्षेत्रं नानातीर्थसमन्वितम् ।। ६० ।।
नानावृक्षलतागुल्ममनोज्ञं देवदुर्लभम् ।
सर्वसौख्यप्रदं रम्यं पुण्यं पापविनाशनम् ।। ६१ ।।
वर्तते भारते वर्षे यत्र श्रीनीलमाधवः ।
स्वर्गागतैः सुरैः सर्वैरर्च्चितो दिव्यवस्तुभिः ।। ६२ ।।
प्रत्यहं कमलाकान्तो गन्धपुष्पादिभिर्ध्रुवम् ।
तत्र विप्रा मनुष्याणां सञ्चारो नास्ति भूतले ।। ६३ ।।
माधवस्यार्च्चने शक्ता देवाः केवलमुत्तमाः ।
क्षेत्रस्य पश्चिमे देशे वर्तते शबरालयः ।। ६४ ।।
तत्रस्थः शबरः कश्चिच्छबराणां नरोत्तमः ।
विश्वावसुर्नाम तदा तन्निर्माल्यं समाहरेत् ।। ६५ ।।
नीलमाधवमूर्त्तेस्तु विष्णोरायतनस्थलम् ।
मार्जयेत्केवलं विप्राः पूजितस्य सुरैः प्रभोः ।। ६६ ।।
एवं गुप्ततमं क्षेत्रं वर्तते धरणीसुराः ।
चतुर्द्दशसु लोकेषु गोपनीयस्थलं तु तत् ।। ६७ ।।
कदाचित्तत्र नीलाद्रौ तृषार्त्तः काक आगतः ।
अयत्नान्माधवं दृष्ट्वा रोहिणीकुण्डसम्भवम् ।। ६८ ।।
जलं पीत्वा विमुक्तात्मा शङ्खचक्रगदाब्जधृक् ।
सम्प्राप्य हरिसारोप्यं वैकुण्ठं प्रति निर्ययौ ।। ६९ ।।

ज्ञात्वैवं भास्करिस्तत्र सहसागत्य शङ्कितः ।
अधिकारक्षयं दृष्ट्वा माधवं स्तुतवान् यमः ।। ७० ।।
माधवस्तस्य भो विप्रास्तवमाकर्ण्य दुर्ल्लभम् ।
ईषद्धासमुखः श्रीमान् लक्ष्मीमैक्षत स प्रभुः ।। ७१ ।।
लक्ष्मीस्तदा यमं प्राह स्वाधिकारक्षयात्पुनः ।
भीतं माधवनेत्रान्तप्रेरिता भक्तवत्सला ।। ७२ ।।

लक्ष्मीरुवाच

यमाकर्णय भो क्षेत्रं पावनं पुरुषोत्तमम् ।
अत्र त्यागाच्छरीरिणां मुक्तिरेव न संशयः ।। ७३ ।।
तवाधिकारः सर्वत्र ह्यास्ते पुत्र पुनः प्रभो ।
पञ्चक्रोशे महाक्षेत्रे नास्ति तेऽधिकृतिः क्षितौ ।। ७४ ।।
कीटानां च पतङ्गानां मनुष्याणां च देहिनाम् ।
अत्र चैव तनुत्यागान्मुक्तिः स्याद्दुर्ल्लभा यम ।। ७५ ।।
अन्तरीक्षे जले वापि क्षितौ वा यत्र कुत्रचित् ।
मुक्तिर्मृतौ च जन्तूनां क्षेत्रे श्रीपुरुषोत्तमे ।। ७६ ।।
तेषु तेष्वधिकारस्ते नास्ति नास्ति यम स्फुटम् ।
अन्यत्र ह्यधिकारस्ते तं वै क्षेत्रोत्तमं विना ।। ७७ ।।
अन्यदेशादागतानां क्षेत्रं श्रीपुरुषोत्तमम् ।
समुद्दिश्य शतं पादान् गत्वा चेन्मरणे सति ।। ७८ ।।
नास्ति तेष्वधिकारस्ते सत्यं सत्यं वदाम्यहम् ।
सूर्यजात्र महाक्षेत्रे सकृत्स्नात्वा महोदधौ ।। ७९ ।।
विष्णुं पश्यन्ति ये भक्त्या तेषु तेऽधिकृतिर्न वै ।
देशान्तरे मृता मुक्तास्ते ये विष्णुं निरीक्षिताः ।। ८० ।।

अतो विष्णोः शरीरं हि क्षेत्रं श्रीपुरुषोत्तमम् ।
स्वस्य नाम्ना च विख्यातं विद्धि सूर्यात्मजस्फुटम् ।। ८१ ।।
एतत्क्षेत्रसमं क्षेत्रं नास्ति ब्रह्माण्डमण्डले ।
यत्र गत्वा पुनर्जन्म नास्ति जन्मभृतां यमः ।। ८२ ।।
तस्मिन् क्षेत्रे निवासं वै करिष्यामीति यो वदेत् ।
सोऽपि मुक्तो न सन्देहो भवबन्धविनाशने ।। ८३ ।।
निवासिनां पुनस्तेषां फलं किं वा वदाम्यहम् ।
इति लक्ष्म्या वचः श्रुत्वा भास्करिर्हृष्टमानसः ।। ८४ ।।
क्षेत्रोत्तमस्य माहात्म्यं श्रुण्वन्निजपुरं गतः ।
पूर्वापरार्द्धपर्य्यन्तं माधवोऽत्र वसेद् द्विजाः ।। ८५ ।।
दारुब्रह्मस्वरूपेण ह्यपरार्द्धेऽपरे पुनः ।
मानुषैः सह वै तत्र क्षेत्रे क्रीडति केशवः ।। ८६ ।।
क्षेत्रं तच्च महाविष्णोर्धाम प्रीतिकरं महत् ।
शक्तः को वाऽस्य माहात्म्यं वक्तुं सम्यङ् महीसुराः ।। ८७ ।।
काको यत्र चतुर्भुजोऽजनि पुनः सूर्य्यात्मजः श्रीवचः
श्रुत्वा तस्य महामहत्त्वमतुलं ज्ञात्वा तदा सोऽगमत् ।
लब्ध्वा चापि निजालयं निजजनान् सम्भाष्य चैवं पुनः
क्षेत्रेऽस्मिन् पुरुषोत्तमे ह्यधिकृतो संवारयन् मानसम् ।। ८८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये
श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये प्रथमोऽध्यायः ।।

द्वितीयोध्यायः

ऋषय ऊचुः

पूर्वं सूत महाप्राज्ञ कथितं भवता परम् ।
तत्क्षेत्रं सुमहद्गोप्यं पावनं परमाद्भुतम् ।। १ ।।
नीलमाधवरूपस्य विष्णोस्तस्य महात्मनः ।
देवैश्च क्रियते पूजा नान्यैरेव कदाचन ।। २ ।।
पुनश्चोक्तं हरेश्चैव दारुब्रह्मस्वरूपिणः ।
मानवैरेव क्रियते कथं तद्वक्तुमर्हसि ।। ३ ।।
ब्रह्मरूपधरश्चैव भुक्तिमुक्तिप्रदायकः ।
माधवः क्व गतो धामन् केन वात्र प्रकाशितः ।। ४ ।।
केन दारुस्वरूपं वा विष्णोर्निर्मितमुत्तमम् ।
एतत्सर्वं यथान्यायं सूत नः कथयाधुना ।। ५ ।।

सूत उवाच

साधु साधु मुनिश्रेष्ठ दृष्टं यच्च पुरातनम् ।
यस्य श्रवणमात्रेण दूरीभूतं महत्तमः ।। ६ ।।
भुक्तिमुक्तिशुभानि स्युर्यत् प्रश्नादपि भूसुराः ।
यच्चरित्रं पवित्रं वः कथयामि समासतः ।। ७ ।।
शृणुध्वं मुनिशार्द्दूला रहस्यं शुभवर्द्धनम् ।
जातः कृतयुगे विप्राः सूर्य्यवंशसमुद्भवः ।। ८ ।।
सत्यवादी नृपश्रेष्ठः सदाचाररतः शुचिः ।
धर्मज्ञो न्यायशीलश्च विधेः पञ्चमपुरुषः ।। ९ ।।
समस्तविद्यानिलयो बृहस्पतिसमो गुणैः ।
शूरो वैरिविनाशी च धर्मकर्मपरायणः ।। १० ।।

षडैश्वर्य्यसमाकीर्णः कुवेरेन्द्रसमो बली ।
षष्टिदण्डात्मकतया विष्णुध्यानपरायणः ।। ११ ।।
वैष्णवो विप्रसेवी च पितृभक्तिपरायणः ।
प्रजापालनधर्मज्ञः सदातिथिजनार्च्चकः ।। १२ ।।
एवं समस्तगुणवान्निन्द्रद्युम्नो महीपतिः ।
मालवाख्ये महादेशे ह्यवन्तीनामतः पुरी ।। १३ ।।
नानारत्नयुता भूमौ साक्षाद्या ह्यमरावती ।
तत्र वासं चकारासौ नृपतिर्धर्ममन्दिरः ।। १४ ।।
एकदा स नृपश्रेष्ठः कृतवान् पूजनं हरेः ।
देवार्च्चनगृहे रम्ये स विप्रः सपुरोहितः ।। १५ ।।
एतत्समयमालम्ब्य भगवान् जटिलाकृतिः ।
प्रविवेश द्विजश्रेष्ठस्तद्भक्ति वशगो विभुः ।। १६ ।।
तं दृष्ट्वा सहसा राजा नमस्कृत्य सभान्तरे ।
सर्वैः सम्मानीतायास्मै ददौ चासनमुत्तमम् ।। १७ ।।
क्व स्थितं भवता पूर्वं व्यासतुल्यो भवान् प्रभो ।
एवं मम प्रतीतिः स्यात्किमर्थं भवतागतम् ।। १८ ।।
अनुग्रहः कृतो मेऽद्य किं करिष्यामहे तव ।
नृपस्येदं वचः श्रुत्वा जटिलः स सभातले ।। १९ ।।
उक्तवान् सहसाश्चर्य्यं रोमाञ्चितवपुर्द्धरः ।
आकर्णय नृपश्रेष्ठ क्षेत्रे श्रीपुरुषोत्तमे ।। २० ।।
नीलाचलेऽस्ति परमस्तत्र नीलवपुर्द्धरः ।
माधवोऽस्ति धरानाथ प्रत्यहं देवतार्च्चितः ।। २१ ।।

जटिल उवाच

तत्रैवाहं स्थितः सम्यग् वर्षमात्रं नृपोत्तमः ।

माधवं दृष्टवान्नित्यं भुक्तिमुक्तिप्रदायकम् ।
स्वर्गादागत्य परमैः सुरैस्तस्य दिने दने ।। २३ ।।
पूजा विधीयते राजन्निजं च दृष्टवानहम् ।
इत्युक्त्वा जटिलस्तस्मै राज्ञे मालां ददौ पुनः ।। २४ ।।
माधवस्य महाविष्णोर्भुक्तिमुक्तिप्रदायिकाम् ।
कृतकृत्यतया राजा तां मालां परमाद्भुताम् ।। २५ ।।
सम्प्राप्य च पुनः प्राह जटिलं सूर्य्यवर्च्चसम् ।
कस्मिन् देशेऽस्ति तत् क्षेत्रं कियद्दूरं च कीदृशम् ।। २६ ।।

इन्द्रद्युम्न उवाच

कस्यां दिशि महाप्राज्ञ कृपया तद् वदस्व मे ।
इत्थं नृपवचः श्रुत्वा पुनः प्राह जटाधरः ।। २७ ।।

जटिल उवाच

लवणाम्भोनिधेस्तीरे चोत्तरेऽतिमनोहरे ।
ओड्रदेशोऽस्ति विख्यातो नानातीर्थविभूषितः ।। २८ ।।
तस्मिन्नास्ते महाक्षेत्रं पवित्रं पुरुषोत्तमम् ।
तत्र नीलाचले रम्ये माधवो नीलसुन्दरः ।। २९ ।।
देवैः समर्च्चितश्चास्ते तत्समीपे महावटः ।
क्रोशायतियुतः श्रीमान् कल्पपादपसंज्ञकः ।। ३० ।।
तस्य पश्चिमभागेऽपि नाम्ना शबरद्वीपकः ।
आश्रमः परमश्चास्ते शबराणां निवासभृत् ।। ३१ ।।
तस्मान्नीलाचलं यावन्मार्गस्त्वेकपदी प्रभो ।
तं वै ये च पथा गत्वा माधवस्यावलोकनम् ।। ३२ ।।
तन्निरीक्षणमात्रेण मुक्तिः स्यात्परमा नृप ।
यत्र मुक्तो महापापी काकस्तदवलोकनात् ।। ३३ ।।

बहुनात्र किमुक्तेन क्षेत्रे श्रीपुरुषोत्तमे ।
निवासं कुरु भो राजन् ! यतस्त्वं वैष्णवाग्रणीः ।। ३४ ।।
प्रार्थयामि भवन्तं नो रत्नं वा भुवमेव वा ।
ग्रामं वा वसनादिं वा द्रव्यमन्यन्नृपोत्तम. ।। ३५ ।।
वैष्णवं त्वमिति ज्ञात्वा ज्ञातं च कथितं मया ।
प्रकाशितं च तत्क्षेत्रं पवित्रं परमाद्भुतम् ।। ३६ ।।
इत्युक्त्वा जटिलः सोऽभूत्पश्यतां च सभातले ।
अन्तर्हिते हि तं चोक्त्वा सर्वेषां प्राणिनां पुरः ।। ३७ ।।
अन्तर्हिते च पुरुषे जटामण्डलमण्डिते ।
विस्मितोऽभून्नृपश्रेष्ठो व्याकुलो द्विजसत्तमाः ।। ३८ ।।
ततः पुरोधसं प्राह तन्निमित्तं स सत्वरः ।
भो भो पुरेहित क्षिप्रं तवानुग्रहतो मया ।। ३९ ।।

इन्द्रद्युम्न उवाच

सम्पादिता मखाः सर्वे ज्ञानं च परमं तथा ।
चतुर्वर्गश्च मे जातो मङ्गलं परमं मम ।। ४० ।।
इदानीं जटिलेनोक्तं तत्क्षेत्रं परिशीलय ।
तव प्रसादान्मे मुक्तिर्भविता तद् विलोकनात् ।। ४१ ।।
नृपस्य वचनं श्रुत्वा सादरः स पुरोहितः ।
उवाच नृपशार्दूलमिन्द्रद्युम्नं द्विजोत्तमाः ।। ४२ ।।

पुरोहित उवाच

भ्राता विद्यापतिर्नाम कनिष्ठो वर्तते मम ।
देशभ्रमणविज्ञस्तच्छीलनं भो करोतु सः ।। ४३ ।।
तत्र गत्वा वयं सर्वे वत्स्यामः क्षेत्रसत्तमे ।
वाजपेयमखान् कृत्वा द्रक्ष्यामो माधवं प्रभुम् ।। ४४ ।।

इति निश्चित्य सहसा दैवज्ञवचनात्तदा ।
तं विद्यापतिनामानं राजा प्रस्थापयद् द्विजाः ।। ४५ ।। ।
प्राञ्जलिं स विधायाशु बहुमानपुरःसरः ।
गच्छ गच्छ द्विजश्रेष्ठ तल्लक्ष्यं कुरु वेगतः ।। ४६ ।।
इत्युक्त्वा स नृपस्तावन्नमश्चक्रे पुनः पुनः ।
ततो विद्यापतिर्विप्रः कृतकृत्योऽभवत्तदा ।। ४७ ।।
स्यन्दने चोपविश्याथ हृदा चिन्तितमाधवः ।
चर्मचक्षुर्द्वयेनाहं द्रक्ष्यामि परमेश्वरम् ।। ४८ ।।
इत्युक्त्वा सहसा विप्रः समुत्तीर्य महानदीम् ।
शनैश्शनैर्विवेशाथ शबरद्विपकानने ।। ४९ ।।
तं दृष्ट्वा शबरश्रेष्ठो विश्वावसुरनुत्तमः ।
नमस्कृत्यार्चयद्विप्रं फलमूलादिभिर्द्विजाः ।। ५० ।।
प्राञ्जलिं च विधायाशु बहुभाग्यमिदं वचः ।
साक्षाद्विष्णुस्वरूपस्त्वं ब्राह्मणोऽद्य निरीक्षितः ।। ५१ ।।
इत्युक्त्वा स नमश्चक्रे वनमेतच्च गह्वरम् ।
कथं त्वयागतं विप्र केन वा प्रेषितो भवान् ।। ५२ ।।
कस्त्वं तव च किं नाम कथयस्व द्विजोत्तम ।
कैतवं मा वदध्वं भो यथार्थं कथयस्व मे ।। ५३ ।।
विश्वावसोर्वचः श्रुत्वा स च विद्यापतिर्द्विजः ।
वक्तुं वचनमारेभे यथार्थं द्विजसत्तमाः ।। ५४ ।।

विद्यापति उवाच

मालवाख्यस्य देशस्य चेन्द्रद्युम्नस्य भूपतेः ।
पुरोधसः कनिष्ठोऽहं भ्राता विद्यापतिः स्मृतः ।। ५५ ।।
इन्द्रद्युम्नेन महता प्रेरितो भूभृता ह्यहम् ।
मार्गस्य कलनार्थं वै माधवस्य प्रभोः परम् ।। ५६ ।।

दर्शनार्थमहं वीर प्रेरितश्चेति निश्चयः ।
करिष्यति निवासं वै राजात्र माधवं प्रभुम् ।। ५७ ।।
दिदृक्षते महाप्राज्ञ प्रेरितोऽहं न संशयः ।
इत्युक्त्वा विरते विप्रे तद्विद्यापतिनामके ।। ५८ ।।
विश्वावसुः पुनः प्राह नीरसं वचनं द्विजाः ।
विद्यापते द्विजश्रेष्ठ मार्गोऽस्ति भयसङ्कुलः ।। ५९ ।।

विश्वावसुरुवाच

सिंहव्याघ्रादिभिर्नूनं देवानामप्यगोचरः ।
माधवस्तु पुरैः पूज्यो गोप्यो नीलमहीधरे ।। ६० ।।
कथं त्वयात्र गन्तव्यं द्रष्टव्यं वा कथं प्रभुः ।
विश्वावसोर्द्विजवरो नीरसाद्वचनात्ततः ।। ६१ ।।
विद्यापतेर्नेत्रयुगात्पपाताश्रुजलं बहु ।
अथ विश्वावसुश्चित्ते चिन्तयामास भो दिजाः ।। ६२ ।।
नेत्रे निमील्य सहसा पूर्ववृत्तान्तमुत्तमम् ।
इन्द्रद्युम्नो नाम नृपो भविता भूतलेऽखिले ।। ६३ ।।
शक्रवद्विक्रमी तस्य पुरोधास्तस्य चात्मनः ।
विद्यापतिर्नाम यदा तेनैव प्रेरितो भ्रमन् ।। ६४ ।।
माधवस्यावलोकनं च करिष्यति पुनः पुनः ।
गमिष्यति यदा तावन्माधवोऽसौ भविष्यति ।। ६५ ।।
अन्तर्हितोऽथ तद्दिव्यं नीलभूधरमुत्तमम् ।
सुवर्णबालुकाकीर्णं पुरेति श्रुतवानहम् ।। ६६ ।।
अत्र वासं च भूपस्तु करिष्यति न संशयः ।
प्रासादं च महीनाथो रचयिष्यति भूतले ।। ६७ ।।
वाजिमेधमखान् कृत्वा दारुणा ब्रह्मरूपिणा ।
सप्तधा मूर्त्तिसंयुक्तं स्थापयिष्यति तं प्रभुम् ।। ६८ ।।

ब्रह्मलोकं स गत्वा च ब्रह्माणमपि भूतलम् ।
आनयिष्यति धर्मात्मा तेन सर्वं प्रतिष्ठितम् ।। ६९ ।।
भविष्यतीति सञ्चिन्त्य विश्वावसुरसौ द्विजाः ।
सञ्चिन्त्य मनसा तूर्णं पुनः प्राह सुकोमलम् ।। ७० ।।
विद्यापते नीलतनुं माधवं देवदुर्ल्लभम् ।
द्रक्ष्यसि च परं देवं श्वः प्रभाते निरञ्जनम् ।। ७१ ।।
फलमूलादिकं चाद्य स्वादयात्र निशां नय ।
विश्वावसोरिमां वाचं पूर्णानन्दरसप्रदाम् ।। ७२ ।।
श्रुत्वा रोमाञ्चिततनुः स विप्रः परमार्थवित् ।
तं पुनः प्राह स नूनं देवस्य दर्शनं विना ।। ७३ ।।
जलमात्रं न गृह्णामि मां तत्र नय सत्वरम् ।
विश्वावसुस्तदयं तद्वचनं दृढमादरात् ।। ७४ ।।
श्रुत्वा तस्य करं धृत्वा मार्गे चैकपदे ययौ ।
यत्र नीलतनुश्चास्ते माधवोऽम्बुजलोचनः ।। ७५ ।।
तत्र नीत्वाथ तं विप्रा रोहिणीकुण्डवारिणि ।
स्नापयित्वा वटच्छायां सेवयित्वा पुनर्द्विजम् ।। ७६ ।।
नीलजीमूतसङ्काशं विकचाम्बुजलोचनम् ।
शरत्पूर्णेन्दुवदनं नानालङ्कारशोभनम् ।। ७७ ।।
श्रीधरापार्श्वसंश्लिष्टं हसन्तं मधुरं हरिम् ।
पीताम्बरधरं चारुहारकेयूरनूपुरम् ।। ७८ ।।
रत्नसिंहासनस्थं तं देववृन्दसमर्च्चितम् ।
शङ्खचक्रगदापद्मधारिणं च चतुर्भुजम् ।। ७९ ।।
नीलजीमूतसङ्काशं विकचाम्बुजलोचनम् ।
समस्तलक्षणैर्युक्तं वनमालाविभूषितम् ।। ८० ।।

तादृशं माधवं तत्र दर्शयामास तं द्विजम् ।
विद्यापतिस्ततो दृष्ट्वा प्रणम्य दण्डवद्भुवि ।। ८१ ।।
हर्षगद्गदया वाचा तुष्टाव परमेश्वरम् ।

विद्यापतिरुवाच

नमस्ते देवदेवेश नमस्ते परमेश्वर ।। ८२ ।।
कृतार्थोऽहं कृतार्थोऽहं त्वां दृष्ट्वाद्य न संशयः ।
इन्द्रादिभिः सुरैर्यस्तु नारदाद्यैर्मुनीश्वरैः ।। ८३ ।।
अगोचरः स्मृतौ वेदे तं देवं दृष्टवानहम् ।
ब्रह्मा वा देवदेवो वा ह्यन्ये देवाः कथञ्चन ।। ८४ ।।
द्रष्टुं न शक्ता यं देवं पश्यामि तमहं विभुम् ।
कृतकृत्योऽहमेवाद्य हर्षाश्रुपरिपूरितः ।। ८५ ।।
पुनः प्रणामं कृतवान् तुष्टाव च मुहुर्मुहुः ।
विलुठन् भुवि संहर्षात् स विप्रः संयतेन्द्रियः ।। ८६ ।।
पुनः स्थित्वा तदग्रेऽसौ सहस्रं प्रणवेन वै ।
परयाऽचलया भक्त्या कृतकृत्योऽजनि द्विजः ।। ८७ ।।
गन्तव्यमार्गो गहनो दूरतश्च निजालयः ।
आगन्तव्यमिति क्षिप्रं ब्रूवन्तं शबरं पुनः ।। ८८ ।।
विद्यापतिस्तदा प्राह स्थास्येऽहं देवसन्निधौ ।
गच्छ त्वं स्थापयित्वा मां रात्रौ चाद्य यथासुखम् ।। ८९ ।।

विश्वावसुरुवाच

सिंहव्याघ्रादयो विप्र खादयिष्यन्ति चात्र वै ।
इत्युक्त्वा च करं धृत्वा निजालयमवाप्तवान् ।। ९० ।।
सम्प्राप्य मन्दिरं विप्रा दत्त्वा तस्मै वरात्मकम् ।
दिव्यं विष्णोश्च निर्माल्यं भोजनाय ददौ पुनः ।। ९१ ।।

निर्माल्यं तच्च सम्प्राप्य स विद्यापतिरुत्तमः ।
सख्यं स विश्वावसुना साकं चक्रेऽतिहृष्टवान् ।। ९२ ।।
एतद्द्रव्यमहो भ्रातर्दुर्लभं दृश्यतेऽधुना ।
काननेऽपि कुतः प्राप्तं राज्ञामपि सुदुर्लभम् ।। ९३ ।।
इति विद्यापतेर्वाक्यं श्रुत्वा सोऽप्यब्रवीत् वचः ।
सायमागत्य तैर्देवैर्माधवाय समर्पितम् ।। ९४ ।।
दिव्यं नानाविधं द्रव्यं विष्णुभक्तिं च तद्द्विज ।
प्रातरुत्थाय निर्माल्यमानयामि दिने दिने ।। ९५ ।।
बन्धुभिर्ज्ञातिभिः सार्द्धं जीवाम्येतेन सर्वदा ।
इति विश्वावसोर्वाणीं श्रुत्वा स धरणीसुरः ।। ९६ ।।
तमालिङ्गितवान् गाढं विष्णुबुद्ध्या महीसुरः ।
मित्रतां तेन वै सार्द्धं सम्पाद्य स च भूसुरः ।। ९७ ।।
कृतकृत्यतयात्मानं मेने निर्माल्यसेवनात् ।
क्षेत्रस्य देवराजस्य माधवस्य परात्मनः ।। ९८ ।।
महिमोत्कर्षमाकर्ण्य तस्य निर्माल्यकस्य च ।
जातो हृष्टतरो भूयः द्विजेन्द्र इदमब्रवीत् ।। ९९ ।।

विद्यापतिरुवाच

त्वया समं सखे चात्र विधेया वसतिर्मया ।
त्वया सह सुरेशं तं पश्यामि च मुहुर्मुहुः ।। १०० ।।
किं सेवया मे नृपतेः किं वा कार्यं कुटुम्बतः ।
यन्माधवं च नेत्राभ्यां पश्यामि च मुहुर्मुहुः ।। १०१ ।।
इति ब्रूवन्तं तं विप्रं विश्वावसुरिदं वचः ।
उवाच सहसा विप्राः पूर्ववृत्तमनुस्मरन् ।। १०२ ।।

विश्वावसुरुवाच

मैवं विचारय क्षौण्यामिन्द्रद्युम्नो नृपः सखे ।
भविता क्षेत्रवर्येऽस्मिन् निवासं स करिष्यति ।। १०३ ।।

दारुब्रह्मप्रकाशं च करिष्यति मखैः परम् ।
क्षेत्रोत्तमस्य महिमा भृशं तस्माद् भविष्यति ।। १०४ ।।
कथा पुरातनी चेति श्रुतास्ति विद्धि भो सखे
अतस्त्वयापि गन्तव्यं राजानं च समानय ।। १०५ ।।
इत्युक्त्वा शबरश्रेष्ठः सुष्वाप निजमन्दिरे ।
विद्यापतिस्तु संभेजे निद्राशर्म तथा द्विजाः ।। १०६ ।।
अथ रात्रौ जगत्स्वामी माधवो भक्तवत्सलः ।
स्वप्ने तं दर्शनं दत्वा द्विजसत्तममुक्तवान् ।। १०७ ।।

श्रीमाधव उवाच

विद्यापते मनस्येवं विचारं मा कुरु द्विज ।
इन्द्रद्युम्नं च राजानं शीघ्रमत्र समानय ।। १०८ ।।
करिष्यति निवासं च राजा श्रीपुरुषोत्तमे ।
त्वं चात्र सर्वदा विप्र मत्सेवां वै करिष्यसि ।। १०९ ।।
इत्युक्त्वा भगवान् कण्ठान्मालामानीय मञ्जुलाम् ।
तस्मै दत्वा त्वन्तर्हितः स्वप्नेऽपि भक्तबान्धवः ।। ११० ।।
निद्राभङ्गे जायमाने कृतकृत्योऽभवद्द्विजः ।
नीलाचलेशं सम्प्रेक्ष्य प्रणामं दण्डवद्भुवि ।। १११ ।।
विश्वावसुं च तन्मित्रं समालिङ्ग्य मुहुर्मुहुः ।
जगाम सहसा विप्रा निजदेशं यथागतम् ।। ११२ ।।
आयान्तं तं द्विजश्रेष्ठमिन्द्रद्युम्नो महीपतिः ।
आसनात्सहसोत्थाय नमस्कृत्य च तं पुनः ।। ११३ ।।
सूर्य्यवर्च्चसमत्युग्रं राजा दृष्ट्वा च हृष्टवान् ।
पप्रच्छ परया भक्त्या दृष्टवान् माधवं भवान् ।। ११४ ।।

इन्द्रद्युम्न उवाच

धर्मज्ञ श्रुतवान् शान्त देवभक्तिपरायण ।
विद्यापते महाप्राज्ञ जटिलोक्तिप्रमाणतः ।। ११५ ।।
दर्शनं माधवस्यैव प्राप्तं किं कथयस्व माम् ।
किं किं तत्र महीदेशे दृष्टं तद् वद मां प्रति ।। ११६ ।।

विद्यापतिरुवाच

इन्द्रद्युम्न नरश्रेष्ठ यदुक्तं जटिलेन वै ।
विश्वावसोश्चानुकूल्याद्यथा दृष्टं यथा श्रुतम् ।। ११७ ।।
तत्र नीलाचले श्रीमान् शङ्खचक्रगदाब्जधृक् ।
इन्द्रनीलमणिश्यामो माधवो मुक्तिदायकः ।। ११८ ।।
सुवर्णाम्बुजसंस्थोऽसौ देववृन्दैः समर्च्चितः ।
नानाभूषणसम्पन्नः श्रीधराश्लिष्टपार्श्वकः ।। ११९ ।।
चतुरधिकाशीतियवप्रमाणोन्नतिमान् विभुः ।
तदग्रे वर्तते राजन् कल्पपादप एव सः ।। १२० ।।
रोहिणीकुण्ड एवास्ते जगत्पावनजीवनः ।
प्रत्यहं देवतावृन्दः पूजयत्यवनीपते ।। १२१ ।।
नानोपचारैः सद्भोगैर्दिव्यैर्द्रव्यैश्च सादरम् ।
एतद् दृष्टं मया सर्वं रात्रौ तद्दर्शनं पुनः ।। १२२ ।।
लब्ध्वा त्वां प्रति तस्याज्ञामाला प्राप्ता च भूपतेः ।
तेष्वेवानुग्रहस्तस्य वर्तते भूपते भृशम् ।। १२३ ।।
इत्युक्त्वा भूपतेर्मालां ददौ विद्यापतिर्द्विजः ।
ततो राजा कृतार्थोऽभूत्तन्माल्यवरधारणात् ।। १२४ ।।
अत्रान्तरे महातेजा नारदो मुनिपुङ्गवः ।
प्रविवेश सभामध्ये स्मरन्नारायणं विभुम् ।। १२५ ।।

दृष्ट्वा स नृपतिश्रेष्ठः प्रणम्य दण्डवद्भुवि ।
वरासनं ददौ तस्मै कृतार्थोऽहमिति ब्रुवन् ।। १२६ ।।

इन्द्रद्युम्न उवाच

अद्य मे सफला यज्ञा सफलं मे महत्तपः ।
दृष्टो महाहरिः साक्षाद्ब्रह्मा च स सदाशिवः ।। १२७ ।।
तव सन्दर्शनादेव स्वयममरतो मुने ।
इति स्तुत्वा मुनिश्रेष्ठं पप्रच्छ ज्ञानमुत्तमम् ।। १२८ ।।
ज्ञानवैराग्ययोर्योगं भक्तियोगस्य कारणम् ।
चतुर्विधसमं योगं दृष्टवानवनीश्वरः ।। १२९ ।।
इति पृष्टवतो राज्ञो नारदः श्रुतवान् वचः ।
कथयामास तान् योगान् यज्ज्ञानान्निर्वृत्तिर्भवेत् ।। १२० ।।

नारद उवाच

ततो महामुनिस्तं हि राजानं योगलालसम् ।
विधिना कथितं यद् वै तत्सर्वमुक्तवांश्च सः ।। १३१ ।।
दुष्करं योगिभिः सर्वैस्तत्कर्त्तुं च त्वयाधुना ।
न शक्यं धरणीनाथ वर्षाणां च शतैरपि ।। १३२ ।।
शृणु राजन् महाप्राज्ञ योगिनामपि यद्वरम् ।
वर्तते तत्परिज्ञानात्तवाभिलषितं भवेत् ।। १३३ ।।
समुद्रस्योत्तरे तीरे वर्तते नीलभूधरः ।
तत्रास्ते भगवान् देवो मुक्तिः स्याद्यन्निरीक्षणात् ।। १३४ ।।

सूत उवाच

नारदस्योपदेशेन जटिलस्य तथा द्विजाः ।
विद्यापतेश्च वचसा राजा स त्वरितोऽभवत् ।। १३५ ।।
समाहूय निजामात्यं तदा वाचमुवाच सः ।
नीलाचलनिवासार्थं देशस्थानपरानपि ।। १३६ ।।

सर्वांश्च मामकांश्चैव कथयाशु मुहुर्मुहुः ।
सर्वत्र डिण्डिमध्वानं रचय क्षितिमण्डले ।। १३७ ।।
इत्युक्त्वा मन्त्रिणो राजा शुद्धान्तःकरणो द्रुतम् ।
हरिं सम्पूज्य मनसा स्तुत्वा च परमेश्वरम् ।। १३८ ।।
स्मृत्वा भगवतीं दुर्गां नारदं मुनिपुङ्गवम् ।
नमस्कृत्य पुरश्चक्रे स्वयं च रथसत्तमम् ।। १३९ ।।
आरुरोह द्विजश्रेष्ठश्चतुरङ्गबलान्वितः ।
पुत्रपौत्रादिभिः सार्द्धं सर्वैर्जानपदैः समम् ।। १४० ।।
अवन्तीनगरस्थैश्च चचार नीलभूधरम् ।
उत्तरं तीरमासाद्य महानद्या मनोरमम् ।। १४१ ।।
विश्रम्य भोजनादींश्च चक्रुः सर्वे यथासुखम् ।
निशां च प्रापयामासु श्रेष्ठं सर्वे मुदान्विताः ।। १४२ ।।
ततः प्रभाते विमले पप्रच्छ नारदं नृपः ।
केयं तरङ्गिणी नाम केन वा निर्मिता मुने ।। १४३ ।।
कस्माद्देशागतासौ च कुत्र विश्रान्तिमाप सा ।
एतत्सर्वं गुरो ब्रूहि तत्र मे कौतुकं महत् ।। १४४ ।।

नारद उवाच

पश्चिमस्यां दिशि श्रेष्ठो बिन्ध्यो नाम गिरिर्नृप ।
वर्तते चात्र वै ब्रह्मा विष्णुपादद्वयं पुरः ।। १४५ ।।
स्थापयित्वाऽर्च्चयत्तस्मात्पर्वतान्निर्गताप्यसौ ।
महानदीति विख्याता पूर्वसागरगामिनी ।। १४६ ।।
वर्तते पृथिवीनाथ गङ्गेव मुक्तिदायिनी ।
एतस्यास्तटभूदेशे स्थलद्वयमनुत्तमम् ।। १४७ ।।
पुण्यं सर्वतमोध्वंसि स्पष्टमस्ति महीतले ।
एकत्र तु सुवर्णाख्यः शिवोऽप्यस्ति क्षितौ महान् ।। १४८ ।।

तथास्ते माधवः श्रीमान् भक्तानुग्रहकारकः ।
इत्थं स्थलद्वयं दिव्यं भुक्तिमुक्तिप्रदायकम् ।। १४९ ।।
तस्मात्पुण्यतमा भूप नदी चित्रोत्पलाभिधा ।
स्नानं ये कुर्वते मर्त्त्या भक्त्यास्या निर्मले जले ।। १५० ।।
सप्तजन्मार्जितं पापं नश्येत्तेषां न संशयः ।
गोसहस्रप्रदानेन यत्फलं जायते नृप ।। १५१ ।।
तत्फलं च भवेत्तेषामस्याः पयसि मज्जनात् ।
इदानीं नृपशार्द्दूल सन्तीर्य तरसा नदीम् ।। १५२ ।।
स्नानमात्रं विधायाशु समाप्य निजकर्म तत् ।
चर्च्चिकां तां महाविष्णोः शक्तिं च परिलोकय ।। १५३ ।।
सैन्यमेतत् क्षितिपते नदीं लङ्घयितुं द्रुतम् ।
इत्युक्तं तं पुनः प्राह ब्रह्मपुत्रो महामुनिः ।। १५४ ।।
शक्त्या गिरितले यास्ते ह्रस्वा पश्य तरङ्गिणी ।
क्षेत्रोत्तमे समुद्रं सा प्राप्नोति नृपसत्तम ।। १५५ ।।
एतत् सङ्गमदेशे च चक्रतीर्थं सुपावनम् ।
स्नात्वा नाम त्रिलोकानां संसारे न हि जायते ।। १५६ ।।

सूत उवाच

इति धर्मऋषेर्वाचा स राजा धर्मतत्परः ।
तत्तथाचरणं कृत्वा प्रविवेश शिवालये ।। १५७ ।।
एकाम्रविपिने विप्राः सर्वपापविमोचने ।
यत्रास्ते कोटिलिङ्गेशः शेषशायी तथाऽच्युतः ।। १५८ ।।

सूत उवाच

दिव्यं देवशिरोमणेर्निजसुताधीशस्य वीक्ष्य स्थलं
नानाशर्म्मकरं वनं सुपवनं पुण्यं तदानीं द्विजाः ।

दृष्ट्वा हृष्टमतिः क्षितीश्वरवरो देदीप्यमाना कृतिः
साधूनां परितोषणे पटुतरो धीरो जितारिव्रजः ।। १५९ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पुरुषोत्तमक्षेत्रमाहात्म्ये द्वितीयोऽध्यायः ।।

तृतीयोऽध्यायः

एकाम्रवनसंवेशान् मुने स तु नृपोत्तमः ।
किं चकार वद क्षिप्रं श्रोतुं नस्तच्च सादरात् ।। १ ।।

सूत उवाच

एकाम्रविपिने तत्र घण्टादिमधुरस्वरम् ।
श्रुत्वा पप्रच्छ ऋषयः स नृपो नारदं पुनः ।। २ ।।

इन्द्रद्युम्न उवाच

अयं क्षेत्रोत्तमः श्रीमान् किं ब्रह्मतनयाधुना ।
यत्र श्रीमाधवो देवस्तं मां दर्शय सत्वरम् ।। ३ ।।

नारद उवाच

एकाम्रविपिनं नाम क्षेत्रं परमपावनम् ।
चक्रेण निर्मितं राजन् विष्णुना दैत्यजिष्णुना ।। ४ ।।
अनन्तशायी भगवानत्रैवास्ते परन्तप ।
पुरुषोत्तमसीमान्ते वर्तते स सदाशिवः ।। ५ ।।
यत्र काशीं जनाकीर्णां सन्त्यज्य नृपतेऽधुना ।
तीर्थो विन्दुह्रदो नाम निर्मितस्तेन शम्भुना ।। ६ ।।
लिङ्गरूपी स्वयं भूत्वा वर्तते गिरिजाधवः ।
तीर्थविन्दुह्रदे स्नात्वा त्वनन्तपुरुषोत्तमम् ।। ७ ।।

लिङ्गं काशीपतेः शीघ्रं पश्य भूपशिरोमणे ।
ततो नीलाचलं सर्वे गमिष्यामोऽविलम्बतः ।। ८ ।।

सूत उवाच

नारदस्य वचः श्रुत्वा चैकाम्रवनवासिनम् ।
कोटिलिङ्गेश्वरं शम्भुमपश्यत्सर्वकामदम् ।। ९ ।।
विष्णुं च सहसा तावदनन्तपुरुषोत्तमम् ।
स्नात्वा विन्दुह्रदे तीर्थे दृष्ट्वा सम्पूज्य सद्द्विजाः ।। १० ।।
तत्र स्नानानि कर्माणि विष्णुप्रीणनहेतवे ।
कृतवानवनीनाथो धर्मसंचारसत्वरः ।। ११ ।।
प्रभाते नित्यकर्माणि समाप्य पुनरागमत् ।
नीलाचलसमीपं च यत्रास्ते भार्गवी नदी ।। १२ ।।
कपोतेशान्तिके विप्रः संविवेश महीपते ।
विल्वेश्वरस्य पर्यन्तं कपोतेश्वरतस्तथा ।। १३ ।।
स्थलीं मनोरमां चारुबालुकास्तेन भूभृता ।
दृष्ट्वा तत्रैव निलयं चक्रुः सर्वेऽपि सैनिकाः ।। १४ ।।
तत्रैव सर्वैः विनीतैः भक्तिभावसमन्वितैः ।
नारदस्योक्तितस्तत्र यथायोग्यं तथा कृतम् ।। १५ ।।
चक्रुर्निवासं परमं नीलाचलसमीपतः ।
राजा तत्रैव सन्तस्थौ शिवयोर्मध्यभूतले ।। १६ ।।

सूत उवाच

ततो विल्वेश्वरस्यास्य कपोतेशस्य च द्विजाः ।
महिमानमुवाचाशु भूपं ब्रह्मसुतस्तदा ।। १७ ।।

नारद उवाच

वसुदेवगृहे पूर्वं देवकीनन्दनो विभुः ।
बभूव यदुवंशेऽसौ भूभारहरणोद्यतः ।। १८ ।।

एकदा पाण्डवैः सार्द्धं यादवैश्च यदुत्तमः ।
कृष्णः स्वयं समागत्य तीर्थराजजले पुनः ।। १९ ।।
स्नात्वा दुरान्नमस्कृत्य नीलाचलपतिं विभुम् ।
माधवं दण्डवद्भूमौ प्रणिपत्य च तैः समम् ।। २० ।।
पुनरागत्य तीरेऽस्मिन् विवरं दृष्टवानयम् ।
घोरं राक्षससंघानां मार्गं दृष्ट्वा नराधिपः ।। २१ ।।
मर्त्योपद्रवहेतूनां राक्षसामत्र चान्तकृत् ।
विल्वं फलं समानीय तत्रावाह्य सदाशिवम् ।। २२ ।।
पूजयित्वा स भगवान् कृष्णः स्तुत्वा महेश्वरम् ।
निवारणाय दुष्टानां स्थापयामास तं शिवम् ।। २३ ।।
तस्मादमुं शिवं पश्य सर्वकामप्रदायिनम् ।
अपरं कौतुकं राजन् शृणु देव सदाशिव ।। २४ ।।
वाराणस्यां पुरा पूर्वमागतो दर्शनेच्छया ।
नीलाचलपतेर्विष्णोर्दर्शनं तस्य नाप्तवान् ।। २५ ।।
ततो महत्तपः कृत्वा तपसा स कपोतवत् ।
बभूवाथ चिराद्विष्णुं माधवं दृष्टवान् शिवः ।। २६ ।।
तस्मादयं महादेवः कपोतेश्वर ईरितः ।
सम्प्रत्येनं महाराज शिवं तं शिववर्द्धनम् ।। २७ ।।
पश्य भूप समस्तानां कामनानां फलप्रदम् ।
नारदोक्त्या तथा राजा कृतवान् भूसुरोत्तमाः ।। २८ ।।

सूत उवाच

किं विदध्यात्समागत्य क्षेत्रेऽथ पुरुषोत्तमे ।
प्रविश्य नीलकण्ठं तं शङ्खाग्रे दर्शयन् मुनिः ।। २९ ।।
क्षेत्रमारभतस्तस्य मार्गे जातं विशङ्कुनम् ।
वामचक्षुर्भुजस्पन्दो जातो राज्ञो मुहुर्मुहुः ।। ३० ।।

तद्दृष्टा सहसा राजा विषण्णो नारदं पुनः ।
किमेतन्मे मुने ब्रूहि दुर्निमित्तं कथं मुहुः ।। ३१ ।।
धर्मार्थं त्यजतः सर्वं राज्यं गुरुतरं मम ।
किमकार्य्यं भवेत् ब्रूहि सर्वज्ञस्त्वं यतो महान् ।। ३२ ।।

नारद उवाच

नृपश्रेष्ठ महीपृष्ठे कुशलं ते भविष्यति ।
किन्तु ते माधवस्यास्य दर्शनं न भविष्यति ।। ३३ ।।
यद्दिने नृपतिश्रेष्ठ विद्यापतिरसौ द्विजः ।
अपश्यद्देवदेवेशं सुरवृन्दसमर्च्चितम् ।। ३४ ।।
तद्दिने सायमेवायं नवीनाम्बुदसुन्दरः ।
अन्तर्हितो माधवोऽभूद्भूतानां वर भूतले ।। ३५ ।।
ततः सुवर्णवर्णाभिः बालुकाभिः समन्ततः ।
नीलाचलः समाच्छन्नो भूदेव धरणीपते ।। ३६ ।।

सूत उवाच

इत्येवं वदतस्तस्माद्घोरं वचनमुत्तमम् ।
आकर्ण्य सहसा राजा वज्रपात इवापतत् ।। ३७ ।।
हाहाकारो महानासीज्जनास्तत्र समागताः ।
पुरोधसा समं तस्य सान्त्वनां चक्रिरे द्विजाः ।। ३८ ।।
ततः स नृपितिश्रेष्ठो लब्धसंज्ञोऽति यत्नतः ।
उत्थाय तरसा भूयः पपात मुनिपादयोः ।। ३९ ।।
विलपन् भृशमाभाष्य मन्दभाग्योऽप्यहं ध्रुवम् ।
किं मुने दुष्कृतं घोरं मया जन्मनि जन्मनि ।। ४० ।।
यत्कर्मपरिपाकेन माधवोऽदृश्यतां गतः ।।
इदानीं यान्तु ते सर्वे राज्यं मम सुतान्विताः ।। ४१ ।।

राजसिंहासने मम प्रजापालनहेतवे ।
अभिषेकं च कुर्वन्तु तत्र पुत्रस्य मे ऽधुना ।। ४२ ।।
त्यक्षाम्यत्र शरीरं भो पुण्यक्षेत्रेऽपि नारद
योगेनैव मुने शीघ्रं किं कार्य्यं जीवितेन मे ।। ४३ ।।

सूत उवाच

इति ब्रूवन्तं तं भूपं विलपन्तं मुहुर्मुहुः ।
उवाच नारदो धीमान् विप्राः कोमलया गिरा ।। ४४ ।।

नारद उवाच

विषादं मा कुरु क्षिप्रं धैर्य्यं भज नृपोत्तमः ।
पण्डितानां वरस्त्वं हि वैष्णवश्रेष्ठ एव हि ।। ४५ ।।
धैर्य्यसिन्धुस्त्वमेवासि क्षितौ साक्षात्पुरन्दरः ।
ज्ञानवैराग्यनिलयस्त्वं विधेः पञ्चमः पुमान् ।। ४६ ।।
कथमेतद्विलपनं कुरुषे दीनवन्नृप ।
तवान्तिकं प्रेषितोऽहं ब्रह्मणा ब्रह्मवादिना ।। ४७ ।।
यदुक्तं तदहं वच्मि त्यज शोकं मुदं कुरु ।
इति शान्तिप्रदां वाणीं कथयित्वा पुनर्मुनिः ।। ४८ ।।

सूत उवाच

उवाच परया प्रीत्या नन्दयन्नृपमुत्तमम् ।
श्वेतद्वीपे मनोरम्ये माधवो दारुरूपभाक् ।। ४९ ।।

नारद उवाच

अस्ति स भगवान् देवो त्वां चैवानुग्रहीष्यति ।
वाजिमेधसहस्रेण द्रक्ष्यसि च पुनर्विभुम् ।। ५० ।।
क्षेत्रोत्तमे पवित्रेऽस्मिन् स्थापयिष्यसि त्वं नृप ।
दारुब्रह्म तव द्वारा प्रकाशं च गमिष्यति ।। ५१ ।।

इत्युक्त्वा ब्रह्मणैवाहं प्रेषितस्तव सन्निधिम् ।
यावदन्तर्हिते देवे माधवे भक्तबान्धवे ।। ५२ ।।
तावदेव महीनाथ प्राप्तोऽहं तव सन्निधिम् ।
जायमानेषु यज्ञेषु स्वेच्छया दारुरूपभाक् ।। ५३ ।।
मिलितो भविता देवो विष्णुर्भक्तिवशस्तव ।
स्वयं स्वरूपं सम्पाद्य विश्वकर्मावतारतः ।। ५४ ।।
प्रकाशो भविता रूपसुन्दरे नीलभूधरे ।
तस्मिन् प्रकाशे सहसा स राजा मम सन्निधिम् ।। ५५ ।।
तं प्राप्य भूतलं मां च नेष्यति प्रतिमाकृते ।
ततो मया प्रतिष्ठासीद्विधेया विधिना क्षितौ ।। ५६ ।।
इत्याज्ञाप्य मुनिश्रेष्ठ ब्रह्मणा प्रेरितोऽप्यहम् ।
कुरु विश्वासमत्रैव क्षितीशोत्तम साम्प्रतम् ।। ५७ ।।
इदानीं सैन्यमत्रैव तिष्ठन्त्यात्मजनैः सह ।
नीलाचलं समागच्छ पादचारी सुमञ्जुलम् ।। ५८ ।।
शिलाकण्टकसङ्घैश्च विषमे वाहने पथि ।
यानैर्गन्तुं न शक्तस्त्वमतः पद्भ्यां समाचल ।। ५९ ।।

सूत उवाच

ततोऽथ नृपतिर्विप्राः पुरस्कृत्य विधेः सुतम् ।
आरुरोह गिरेरग्रं सानुगः सपुरोहितः ।। ६० ।।
ततः कृष्णागुरुतरोर्मूले ते विविशुर्मुदा ।
यत्रास्ते भयसंहर्त्ता नृसिंहो भगवान् विभुः ।। ६१ ।।
ततः सर्वे नृसिंहं तं कोटिसूर्य्यसमप्रभम् ।
हिरण्यकशिपुं दैत्यं दारयन्तं भयावहम् ।। ६२ ।।
शङ्खचक्रधरं देवं चतर्बाहुं किरीटिनम् ।
अट्टाट्टहासविसरद्व्यात्ताननसरोरुहम् ।। ६३ ।।

शङ्खकुन्देन्दुधवलं दुर्निरीक्षं सुरासुरैः ।
तादृशं ददृशुस्ते वै नारदस्य प्रभावतः ।। ६४ ।।
ततोऽतिदीनं भूपं हि नारदः सोऽप्युवाच तम् ।
पश्य पश्य नृपश्रेष्ठ नरसिंहं सुरेश्वरम् ।। ६५ ।।

नारद उवाच

यत्संदर्शनमात्रेण भस्मीभूतं महत्तमः ।
अद्यारभ्य त्वमत्राशु पूजय क्षितिपोत्तम ।। ६६ ।।
दारुब्रह्म स्वरूपस्य विष्णोर्यावच्च दर्शनम् ।
न्यग्रोधस्तरुरेषोऽयं साक्षाद्ब्रह्मस्वरूपभाक् ।। ६७ ।।
योजनायातिमान् भूप क्षितौ भाति स सर्वदा ।
योजनद्वयमौन्नत्यं दधत् कल्पान्तसंस्थितः ।। ६८ ।।
यच्छायाक्रमणान्मर्त्यास्तथा यस्यावलोकनात् ।
सर्वपापविनिर्मुक्तास्ते वै वैकुण्ठवासिनः ।। ६९ ।।
तन्नमस्कुरु राजेन्द्र विष्णुबुद्ध्या च पादपम् ।
प्रतीच्यामस्य वृक्षस्य नृसिंहस्योत्तरे तथा ।। ७० ।।
अत्र नीलतनुर्देवो माधवः संस्थितो विभुः ।
तादृशो यः प्रभुर्देवस्त्वामत्रानुग्रहीष्यति ।। ७१ ।।
सप्तधामूर्त्तिसम्पन्नो भविष्यत्यत्र भूपते ।
श्वेतद्वीपः प्रियो विष्णोर्जम्बुद्वीपस्तथा प्रियः ।। ७२ ।।
तयोर्मध्ये महाविष्णोराविर्भावो भविष्यति ।
यतो नानाविधं भोग्यं भुक्तवान् भूतभावनः ।। ७३ ।।
तस्मात्स भगवान् विष्णुस्तवद्वास७ महीपते ।
प्रकाशो भविता नूनं मा कुरुष्वात्र संशयम् ।। ७४ ।।

सूत उवाच

नारदस्य वचः श्रुत्वा सोऽयं नृपशिरोमणिः ।
तं नृसिंहं च सम्पूज्य स्तुतवान् विजितेन्द्रियः ।। ७५ ।।

अत्रान्तरेऽन्तरीक्षे च वाणी जाता शरीरिणी ।
इन्द्रद्युम्न महीनाथ ब्रह्मणा प्रेरितो मुनिः ।। ७६ ।।
तेनैवं कथितं यज्ञैस्तद्विद्धि विधिभाषितम् ।
विष्णुप्रीतिकरान् यज्ञान् कुरु शीघ्रं यथाक्रमम् ।। ७७ ।।
प्रकाशो भविता विष्णुस्तव द्वारा न संशयः ।
यथा विष्णुस्तथा ब्रह्मा तथैव च सदाशिवः ।। ७८ ।।
एतेषां नास्ति वै भेदस्तस्मात्तत्कुरु भूपते ।
इत्याकाशवचः श्रुत्वा स राजा भक्तितत्परः ।। ७९ ।।
अतिहृष्टो बभूवाशु तदैव विजितेन्द्रियः ।
नारदोक्तिर्यथा जाता तथैवाकाशवागपि ।। ८० ।।
कृतकृत्येन भूपेन तदेवाकाशभाषितम् ।
अतो विष्णोरसावाज्ञा राज्ञेत्येवं विचिन्तितम् ।। ८१ ।।
नारदस्तं पुनः प्राह क्षितिपानां वरं द्विजम् ।
नीलकण्ठः स यत्रास्ते व्रज तत्र नृपाधुना ।। ८२ ।।
दक्षिणे नीलकण्ठस्य ब्रह्मणा निर्मितं पुरा ।
नरसिंहस्य तत्क्षेत्रं तवाश्वमेधनिर्मितम् ।। ८३ ।।
तत्क्षेत्रपुरतो राजन् प्रासादं रचयाधुना ।
प्रत्यङ्मुखं मनोरम्यं प्राकारबलयान्वितम् ।। ८४ ।।
सर्वापद्विघ्नसंहारं राक्षसानां विनाशनम् ।
नृसिंहं स्थापयत्वत्र दीपाद् दीपान्तरं यथा ।। ८५ ।।
चन्दनद्रुममूलाद्वै तत्क्षेत्रं नृपसत्तम ।
शतधेन्वन्तरं विद्धि ब्रह्मणा निर्मितं पुरम् ।। ८६ ।।
शीघ्रं गच्छ नृपश्रेष्ठ स्थास्येऽत्र पञ्चवासरान् ।
कार्य्यसिद्ध्यर्थमेवाहं त्वं हि गच्छ नराधिप ।। ८७ ।।

इत्याज्ञया नारदस्य स नृपः सहसागमत् ।
यत्रास्ते सैन्यमात्मीयं नीलकण्ठान्तिके द्विजाः ।। ८८ ।।
ततो गत्वा नृपश्रेष्ठ कारयामास शोभनम् ।
प्रासादं सहसा तत्र विश्वकर्मात्मजेन वै ।। ८९ ।।
प्रतिष्ठार्थं च सम्भारान् चक्रे क्षितिपुरन्दरः ।
अतो गत्वा मुनिश्रेष्ठो ज्ञानामृतमहोदधिः ।। ९० ।।
कृत्वा प्रतिष्ठां प्रासादे स्थापयामास तं व्रतम् ।
नृसिंहं दैत्यराजस्य महोरःस्थलदारिणम् ।। ९१ ।।
दीपाद्दीपान्तरमिव महोत्सवतया तदा ।
स्थापयित्वा च तं देवं सम्पूज्य स्तुतवान् मुनिः ।। ९२ ।।
इन्द्रद्युम्नश्च भूपालः समर्च्य स्तुतवांस्तथा ।
तं भूपं पुनरेवाह नारदो मुनिसत्तमः ।। ९३ ।।

नारद उवाच

शालां कुरु दृढां दिव्यां विशालां च विशांपते ।
वाजिमेधसहस्रस्य यत्र कर्म भवेदथ ।। । ९४ ।।
सहस्रवर्षपर्य्यन्तं यथा तिष्टेत्तथा कुरु ।
मखार्थमथ संभारान्नारदोक्तिप्रमाणतः ।। ९५ ।।

सूत उवाच

लोकोत्तरांश्च सम्पाद्य सम्राट् स पृथिवीश्वरः ।
निमन्त्रयामास तदा त्रैलोक्यतलवासिनः ।। ९६ ।।
सर्वान् जनान् सर्वतश्च बहुमानपुरःसरान् ।
आनयित्वा यथान्यायं पूजयामास भूपतिः ।। ९७ ।।
नारदः सोऽपि यज्ञेऽस्मिन् भूत्वाचार्य्यो मुनीश्वरः ।
सर्वैस्तैर्मुनिभिः सार्द्धं याजयामास तं नृपम् ।। ९८ ।।

एवं वर्षसहस्त्रेऽपि वाजिमेधमखाद् द्विजाः ।
जाता महीतले तावदत्यद्भुततया तदा ।। ९९ ।।
नृसिंहस्य पुरोभागे क्षेत्रे श्रीपुरुषोत्तमे ।
इन्द्रद्युम्नेन महता तेन यज्ञाः कृताश्च ये ।। १०० ।।
तत्समाना मखा जाता भविष्यन्ति च नो द्विजाः ।
यज्ञान्ते बहुदानानि तेन दत्तानि कोटिशः ।। १०१ ।।
अन्नैश्च बहुभिर्वस्त्रैः सुवर्णैश्च पुनः पुनः ।
ददौ द्विजेभ्यो भूपोऽयं दानानि मुनिसत्तमाः ।। १०२ ।।
अलङ्कृताश्च दिव्याश्च याश्च गाः कोटिकोटिशः ।
अश्वमेधावसानेऽपि द्विजेभ्यः स ददौ तदा ।। १०३ ।।
तासां खुरैर्निर्मितोऽभूद्वानाम्बुपरिपूरितः ।
इन्द्रद्युम्न इति ख्यातः ख्यातः परमपावनः ।। १०४ ।।
तत्र तीर्थे नरः स्नात्वा सन्तर्प्य पितृदेवताः ।
अश्वमेधसहस्रस्य फलं प्राप्नोति निश्चयम् ।। १०५ ।।
श्राद्धं तत्रैव चेत्कुर्य्यादेकविंशतिसंख्यकम् ।
कुलमुद्धृत्य सहसा गच्छेत्सुरपुरं नरः ।। १०६ ।।
मखे मखे जायमाने विष्णुप्रीतिकरे द्विजाः ।
विष्णुतेजोनृपस्यास्य शरीरेऽजनि दुर्द्धरम् ।। १०७ ।।
शुद्धान्तःकरणो राजा सूर्य्यवत्प्रस्फुटद्वपुः ।
शुद्धसत्त्वतया रेजे मुनयो नयविन्नृपः ।। १०८ ।।
सूत्यायास्त्वेकदा विप्राः सप्तवासरपूर्वतः ।
तृतीयप्रहरान्तेऽसौ नक्तं विष्णुं ददर्श सः ।। १०९ ।।
फलपुष्पादिसंयुक्तं सर्वलक्षणलक्षितम् ।
क्षीराम्भोनिधिमध्यस्थं शङ्खचक्रादिचिह्नितम् ।। ११० ।।

मञ्जिष्ठावर्णललितं दिव्यगन्धोत्करस्फुटम् ।
एतादृशं कल्पतरुं पृष्टवान् धरणीपतिः ।। ११२ ।।
तन्मूले मणिभिर्दिव्यैः रचिते हेममण्डपे ।
तत्र सिंहासने दिव्ये लसन्तं विष्णुमव्ययम् ।। ११२ ।।
नीलजीमूतसङ्काशं वनमालाविभूषितम् ।
नानामण्डलसंयुक्तं दक्षपार्श्वे श्रियान्वितम् ।। ११३ ।।
तद्दक्षिणे बलं नीलचेलमञ्जुलमव्ययम् ।
हलं च मुषलं चैव शङ्खं चक्रं तथा द्विजाः ।। ११४ ।।
दधानं कोटिचन्द्राभं छत्रीकृतफणीश्वरम् ।
चक्रं च वामभागेऽपि सर्वज्ञानमयं द्विजाः ।। ११५ ।।
दिव्यर्षिभिः स्तूयमानं सुरवृन्दैर्निसेवितम् ।
एवं विधं हरिं स्वप्ने दृष्टवान् धरणीधवः ।। ११६ ।।
अदृष्टरूपं तं दृष्ट्वा स नृपः श्रद्धयान्वितः ।
स्वप्ने बहुविधैः स्तोत्रैः स्तुतवान् परमेश्वरम् ।। ११७ ।।
ततो निद्रावसानेऽसौ कृतकृत्योऽभवत्तदा ।
यज्ञा मे सफला जाता यतो विष्णुर्मयेक्षितः ।। ११८ ।।
इति सञ्चिन्त्य मनसा तन्मूर्त्तिं ध्यातवान्नृपः ।
ततः स नृपशार्द्दूलो नारदाग्रे पुनः पुनः ।। ११९ ।।
स्वप्ने दृष्टं च यद्विप्राः प्राह गम्भीरया गिरा ।
तच्छ्रुत्वा नारदः श्रीमान् पुनः प्राह महीपतिम् ।। १२० ।।

नारद उवाच

भूपसत्तम ते यज्ञाः सफला स्तन्निरीक्षणात् ।
विगतास्ते मनस्तापाः सफलाः दुःखहेतवः ।। १२१ ।।
शोकस्ते विगतो धीमन् प्रसन्नः सोऽच्युतस्त्वयि ।
तथारुणोदये काले दारुरूपं जगत्पतिम् ।। १२२ ।।

द्रक्ष्यसि च परं देवं भूपसत्तम साम्प्रतम् ।
दृष्ट्वा कृतार्थो भूलोके भविष्यसि न संशयः ।। १२३ ।।

सूत उवाच

अथ प्रभाते यज्ञान्ते विधिना स्नानमुद्यतः ।
महोदधिं गतः श्रीमान् द्विजाः सनृपकुञ्जरः ।। १२४ ।।
नारदेन समं तत्र देवद्रुममलोकयत् ।
यथा स्वप्नेऽपि भो विप्राः श्वेतद्वीपे मनोरमे ।। १२५ ।।
तथा स दृष्टवान् चिह्नैस्तारुण्यैरेव लक्षितम् ।
तं दृष्ट्वा नारदं राजा ददर्श हर्षतो नृपः ।। १२६ ।।
ततो देवर्षिः सायं च विहस्य नृपसत्तमम् ।
बभाषे नृपतिश्रेष्ठ त्वद्भाग्यं दृश्यतेऽधुना ।। १२७ ।।
श्वेतद्वीपो महाविष्णुर्यस्त्वया दृष्ट एव हि ।
सोऽयं तरुस्वरूपेण त्वद्भक्तिवशगो विभुः ।। १२८ ।।
उपस्थितो भवत्येव चर्मनेत्रद्वयेन तम् ।
यत्पश्यामि महीनाथ त्वद्भाग्यमेवमद्भुतम् ।। १२९ ।।
ततोऽध्वरावशिष्टं यत्तत्कर्म कृतवान् नृपः ।
सहसा तं समभ्यर्च्य मुनिना सहितो द्विजाः ।। १३० ।।
दारु तत्तीरमानीय महोत्सवतया द्विजैः ।
यज्ञानां च महावेद्यां यज्ञेशं स्थापयेद्विभुम् ।। १३१ ।।
स्थापयित्वा पुनः शीघ्रं सहस्रैरुपचारकैः ।
वचसा नारदस्यास्य पूजयामास स द्विजः ।। १३२ ।।
ततः पूजावसानेऽसौ नारदं नृपसत्तमः ।
मुनेऽस्य प्रतिमा विष्णोः कीदृशी भविता भुवि ।। १३३ ।।
केन वा सा विधेया त्वं तन्मां कथय नारद ।
इत्येवं गदतो विप्रा नृपस्य वचनं मुनिः ।। १३४ ।।

श्रुत्वा बभाषे हृदये स्मृत्वा विष्णुं पुनस्तदा ।
अनन्तमूर्त्तिर्भगवान् चेष्टास्वेवाप्यगोचराः ।। १३५ ।।
कस्याः श्रुतेर्मतेनास्यास्तन्मे वक्तुं न शक्यते ।
एतत्समयमालम्ब्य दिव्या वाणी तदाजनि ।। १३६ ।।
अशरीरी द्विजवराः श्रुण्वतां विस्मयप्रदा ।
शृणु राजन् महाप्राज्ञ नारदेन समं द्रुतम् ।। १३७ ।।
इदं सुगुप्तं कर्त्तव्यं महावेद्यां समन्ततः ।
शून्यायां जगतामीशः स्वेच्छयावतरिष्यति ।। १३८ ।।
यावत्पञ्चदशैव स्युर्दिनानि च जनाधिप ।
तावत्कालं समाच्छद्या बहिरुत्सवमाचरेः ।। १३९ ।।
उपस्थितो बृद्धतमो बर्द्धकिर्यो नराधिप ।
शस्त्रपाणिं तं मन्त्रज्ञं शिल्पकर्मणि योजय ।। १४० ।।
बद्ध्वा दृढतरं द्वारं तावत्कालं नृपोत्तम ।
यावत्पञ्चशेत्येवंन्येव दिनानि स्युर्नराधिप ।। १४१ ।।
नानावाद्यरवः कार्य्यो यावत्तद्घटनावधि ।
श्रुते च घटनाशब्दे व्याधिश्च विपदां चयः ।। १४२ ।।
निरये नियतं वासः तथा सन्ताननाशनम् ।
पश्यतां शृण्वतां वापि भविष्यति न संशयः ।। १४३ ।।
तथा राजा च सम्मुखे द्रव्यं च नृपसत्तम ।
अतः प्रयत्नतः कार्य्यस्तन्निर्माणे महाध्वनिः ।। १४४ ।।
घण्टामृदङ्गतालानां वाद्यानां च महीपते ।
निरन्तरं ध्वनिं कुर्य्यात्काहालादेः सुमङ्गलम् ।। १४५ ।।
इत्युक्त्वा विरता सेयं दिव्या वाणी द्विजोत्तमाः ।
अथातो वर्द्धकिः कश्चिद्बृद्धः शस्त्रधरस्तदा ।। १४६ ।।

पुरतस्तत्र सम्प्राप्तः प्रकाशाय विभोस्तनुम् ।
लोकानां वञ्चनार्थाय नररूपधरो हरिः ।। १४७ ।।
ततस्तं वर्द्धकिं राजा नियोज्य तत्र कर्मणि ।
तस्थौ द्वारे देवदासो यथादिव्यं वचः श्रुतम् ।। १४८ ।।
अथ नृपतिवरोऽसौ वर्द्धकिं वृद्धदेहं
कपटमनुजरूपं विष्णुमामन्त्र्य चित्ते ।
कृततममखवेद्यां तत्र कर्मण्यपि द्राक्
विगतहृदयतापः संनियोज्यातिहृष्टः ।। १४९ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये तृतीयोऽध्यायः ।।

चतुर्थोऽध्यायः

सूत उवाच

यदाह दिव्या सा वाणी द्विजास्तत्कृतवान्नृपः ।
दिने दिने तदा तत्र दिव्यगन्धोऽभ्यजायत ।। १ ।।
पारिजातादिपुष्पाणां वृष्टिश्चैव बभूव ह ।
स्वर्गङ्गाम्बुलवास्तत्र पतिताः सूक्ष्मरूपिणः ।। २ ।।
गीतनृत्यादिसंशब्दो दिव्योऽजनि यदा द्विजाः ।
मखार्थमागता सर्वे सर्वलोकनिवासिनः ।। ३ ।।
आविर्भावं हरेस्तस्य दारुरूपधरस्य ते ।
दृष्ट्वा हृष्टतरो राजा भूतले भूसुरोत्तमाः ।। ४ ।।
माधवे यादृशी बुद्धिस्तादृशी देवसद्द्रुमे ।
उपासनां तथैवात्र ते सर्वे चक्रुरुत्तमाः ।। ५ ।।

दिने पञ्चदशे जाते तदा विप्राः स्वयं विभुः ।
रत्नसिंहासने दिव्ये तावदाविर्बभूव ह ।। ६ ।।
बलेन भद्रया युक्तः सोऽयं सह सुदर्शनः ।
विश्वधात्र्या च लक्ष्म्या च माधवेन समं तदा ।। ७ ।।
सप्तधाविर्भवो देवः स्वयं तत्र जनार्द्दनः ।
जगदानन्दकोऽभूच्च समुत्तोल्य भुजद्वयम् ।। ८ ।।
पद्मासनतया विप्रा गुप्तपात्पाणिपङ्कजः ।
दारुब्रह्मस्वरूपेण प्रकाशोऽजनि भूतले ।। ९ ।।
नीलजीमूतसङ्काशः पद्मपत्रायतेक्षणः ।
शोणाधरधरः श्रीमान् भक्तानामभयङ्करः ।। १० ।।
बलभद्रस्तथा सप्तफणाविकटमस्तकः ।
कुन्देन्दुशङ्खधवलः प्रकाशोऽम्बुजलोचनः ।। ११ ।।
गुप्तपादकराम्भोजः समुत्तोलितसद्भुजः ।
भक्तानामवनायैव तथा भद्रापि भद्रदा ।। १२ ।।
अधोलम्बितहस्ताब्जा कुङ्कुमाभा शुभानना ।
सुदर्शनः स्तम्भरूपी बभूव विजितेन्द्रियः ।। १३ ।।
प्रभोः स्वरूपमभजन्माधवो ह्रस्वरूपकः ।
लक्ष्मीश्चतुर्भुजा विप्रा वराभयधरा तदा ।। १४ ।।
तथैव साब्जयुगलं धारयन्ती स्मितानना ।
चतुर्गजकरोत्क्षिप्तसुवर्णकलशाकृतैः ।। १५ ।।
कृताभिषेका कमला कमलासनसंस्थिता ।
पद्मासनगता देवी विश्वधात्री तथा द्विजाः ।। १६ ।।
ज्ञानमुद्रां करे दक्षे वामे च चारुपङ्कजम् ।
धारयन्ती धरा देवी प्रकाशा धवलाकृतिः ।। १७ ।।

ततः पञ्चदिनस्यास्य दिनस्यान्तेऽपि भूभृताम् ।
तेन नारदवाण्या तत्कपाटोत्फेटने कृते ।। १८ ।।
एवं सप्तविधा विष्णोर्दारुरूपधरस्य वै ।
मूर्त्तिः प्रकाशास्तद्वेद्यां वर्द्धकिश्च न विद्यते ।। १९ ।।
स्वयं प्रकाशमानं तं जगन्नाथं जनाधिपः ।
प्रणम्य नारदश्चापि तुष्टाव च मुहुर्मुहुः ।। २० ।।
दिव्यमाल्याम्बरधराः दिव्याभरणभूषणाः ।
त्रैलोक्यादागतास्ते ते वासवप्रमुखाः सुराः ।। २१ ।।
यक्षगन्धर्वऋषयोऽप्यन्ये ये देवयोनयः ।
ते सर्वे दण्डवद्भूयः प्रणिपत्य मुहुर्मुहुः ।। २२ ।।

सूत उवाच

ततो विप्रा नारदोक्त्या भक्त्या परमया नृपः ।
प्रचुरैरुपचारैश्च दिव्यैर्भोगैरनेकधैः ।। २३ ।।
पूजयामास विधिना तं दारुब्रह्मरूपिणम् ।
पूजयित्वाथ सोऽस्तौषीन्मन्त्रैर्वेदैश्च सत्तमः ।। २४ ।।
गीतैः स्तोत्रैः कवित्वैश्च पुराणं परमेश्वरम् ।
नारदेन समं तावदन्यैर्मुनिवरैर्द्विजाः ।। २५ ।।
दृष्ट्वा तं पूजयित्वा च स्तुत्वा च हृष्टवान्नृपः ।
कृतार्थोऽभूद्द्विजवरास्तद्दारुब्रह्मलोकनात् ।। २६ ।।
ततो देवऋषिर्विप्राः क्षितिपं तमुवाच सः ।
एष (एक) विण्णुस्त्वदर्थं हि प्रकाशोऽजनि भूतले ।। २७ ।।
तव प्रसादाल्लोकानां सद्गतिः स्यान्महीतले ।
अथ नीलाचले रम्ये न्यग्रोधशतहस्ततः ।। २८ ।।
मरुत्कोणस्थले रम्ये प्रासादं सुदृढं शुभम् ।
महोन्नतं कुरु श्रेष्ठं निवासाय हरेर्नृप ।। २९ ।।

आदौ गणेशं सम्पूज्य स्वस्तिवाचनपूर्वकम् ।
कारयेत्तु ततः कर्म पृथिवीं च समर्च्चय ।। ३० ।।
वास्तुदेवार्च्चना कार्य्या विश्वकर्माणमादरात् ।
सम्पूजयस्व नृपते प्रासादस्य विनिर्मितौ ।। ३१ ।।

सूत उवाच

ततो नारदवाचासौ धर्मात्मा धरणीपतिः ।
तत्तथैवाचरत्क्षिप्रं भूदेवा हृष्टमानसाः ।। ३२ ।।
पाषाणदारकेभ्योऽथ कोटिशो वित्तमुत्तमम् ।
ददौ राजा तदा शीघ्रं प्रासादघटनेच्छया ।। ३३ ।।
हस्तानां च सहस्रेण कुरुतोच्चं सुशिल्पकाः ।
मनोहरतरं तावत् प्राकारद्वयवेष्टितम् ।। । ३४ ।।
तोरणाऽलंकृतं दिव्यं प्रासादं शुभलक्षणम् ।
रचयित्वा तदग्रेऽपि निरोधनगृहं पुनः ।। ३५ ।।
तदग्रे विस्तृतं वेश्म सुपर्णस्थितिहेतवे ।
तस्याग्रे मण्डपः कार्य्यो भोगस्थापनहेतवे ।। ३६ ।।
प्राकारस्य चतुर्दिक्षु चतुर्द्वारविभूषितम् ।
पीनं महोन्नतं दिव्यं लोकोत्तरमतःपरम् ।। ३७ ।।
शिल्पिकाः कुरुत क्षिप्रं त्रैलोक्यजनपावनम् ।
नृपस्येमां तदाज्ञां ते गृहीत्वा तत्र सत्वराः ।। ३८ ।।
तथैव चक्रुरत्युग्रं मनोहरतरं द्विजाः ।
उपमारहितं दिव्यं विश्वकर्मात्र निर्ममे ।। ३९ ।।
प्रासादं शिल्पिकारैस्तैर्देशान्तरसमागतैः ।
निधानं देवदेवस्य त्रैलेक्यपतेरद्भुतम् ।। ४० ।।

सूत उवाच

प्रासादे निर्मिते तत्र मन्त्रिणं च निजात्मजम् ।
नियोज्याथ ब्रह्मपदं गन्तुमिच्छुर्महीपतिः ।। ४१ ।।
तत्प्रतिष्ठां समाकर्त्तुं त्वरयामास भूपति. ।
ब्रह्माणं च समानेतुं भूतलं प्रति सत्तमाः ।। ४२ ।।
आनयित्वाथ तं शीघ्रं विश्वावसुमकल्मषम् ।
पुरा माधवसेवाज्ञं तं च विद्यापतिं द्विजन् ।। ४३ ।।
दारुब्रह्मार्च्चने तत्र तौ नियोज्य नृपोत्तमः ।
वचसा नारदस्यास्य ततः पुष्पमये रथे ।। ४४ ।।
नारदस्मरणात्प्राप्ते ब्रह्मलोकमनुत्तमे ।
रामं कृष्णं सुभद्रां च स्तुत्वा सम्पूज्य यत्नतः ।। ४५ ।।
तत्रोषित्वा मुनिश्रेष्ठ नारदेन समं ययौ ।
लोके लोके समस्तैस्तैः संस्तुतः सह नारदः ।। ४६ ।।
सत्कारं प्राप्य च ज्ञातो धन्यो धन्य इति श्रुतः ।
मानुषं देहमाश्रित्य ब्रह्मलोकं प्रति व्रजन् ।। ४७ ।।
प्रतिलोकं स्तुतः सर्वैः प्राप्तवान् ब्रह्मणः पदम् ।
क्षुट्तृष्णामरणव्याधिरहितं सुरसेवितम् ।। ४८ ।।
यत्रैव च कलाकाष्ठायुगपर्य्यायदायिनी ।
यातना नास्ति लेशोऽपि सत्यमत्यन्तमस्ति च ।। ४९ ।।
अस्मात्सत्यमिति प्राहुरव्ययं ब्रह्मणः पदम् ।
जरादिदोषरहितं तापसानामभीप्सितम् ।। ५० ।।
एतादृशं सत्यलोकं प्राप्तवान् स नृपोत्तमः ।
वचसा नारदस्यास्य ततः पुष्पमये रथे ।। ५१ ।।
ब्रह्मद्वारे तपोगम्ये सन्ति यत्र महर्षयः ।
इन्द्रादयः सुराः सर्वे नानाभूषणभूषिता ।। ५२ ।।

मणिकोदरनाम्ना ते द्वारपालेन वारिताः ।
संस्थिताः सहसा विप्रा नारदं मुनिपुङ्गवम् ।। ५३ ।।
दृष्ट्वा प्रणेमुस्ते दूरान्मन्दहासाञ्चिताननाः ।
इन्द्रद्युम्नं गृहीत्वासौ सङ्गेऽन्तःपुरमासरन् ।। ५४ ।।
अथ तं भूपतिं विप्रा द्वारपालो न्यवारयत् ।

नारद उवाच

द्वारपाल ब्रज क्षिप्रमिन्द्रद्युम्नं महीपतिम् ।। ५५ ।।
गृहीत्वा नारदः प्राप्तो ब्रह्माणमिति भो वद ।
इत्युक्तो नारदेनाऽसौ द्वारपाल उवाच सः ।। ५६ ।।
पुनर्बभाषे तं विप्राः स दौवारिकसत्तमः ।

मणिकोदर उवाच

समयो न भवत्येव प्रभो सम्प्रति नारद ।। ५७ ।।
सामवेदेन तं विष्णुं स्तुवंस्तद्गतमानसः ।
त्वमेव गच्छ पुरतो यतः पुत्रोऽसि वै प्रभो ।। ५८ ।।
विज्ञाप्य समयं ज्ञात्वा नेयोऽयं नृपतीश्वरः ।
प्रत्याख्यातुमशक्यं भो मुने त्वं याहि सत्वरम् ।। ५९ ।।
अयं तिष्ठतु भूपालो मर्त्यलोकात्समागतः ।
कथं यास्यत्ययं शीघ्रं विनाज्ञां ब्रह्मणः पुरीम् ।। ६० ।।

सूत उवाच

द्वारपालवचः श्रुत्वा नारदो भूपतिं ततः ।
ततः संरक्ष्य वेगेन गतवान् ब्रह्मसन्निधिम् ।। ६१ ।।
दूरात्तं प्रणिपत्याथ पद्मयोनिं कृताञ्जलिः ।
निवेदयामास तदा भूपत्यागमनं द्विजाः ।। ६२ ।।

नारद उवाच

भवदाज्ञा यथा जाता तथैव कृतवानहम् ।।
इन्द्रद्युम्नं च राजानमानय तव सन्निधिम् ।। ६३ ।।

नारदस्य वचः श्रुत्वा प्रजापतिरयं द्विजाः ।
भ्रूक्षेपं कृतवान् क्षिप्रं भूपस्यागमनं प्रति ।। ६४ ।।
इङ्गितज्ञोऽयमानन्दान्मुनिस्तं नृपसत्तमम् ।
निनायाम्बुजयोनेस्तं समीपं सुरदुर्ल्लभम् ।। ६५ ।।
इन्द्रद्युम्नो नृपश्रेष्ठो दृष्ट्वा ब्रह्माणमादरात् ।
सावित्रीशारदाभ्यां च सेव्यमानं मुहुर्मुहुः ।। ६६ ।।
सामगानं प्रकुर्वन्तं स्फुरन्तं ब्रह्मवर्चसा ।
सर्वलोकेश्वरं दूराद्दण्डवत्प्रणिपत्य सः ।। । ६७ ।।
कृताञ्जलिपुटो भूत्वा स्थित्वा तत्पुरतो द्विजाः ।
तुष्टाव हृष्टमनसा कृतकृत्यो बभूव च ।। ६८ ।।
अथ गानावसानेऽसौ ब्रह्म तं नृपसत्तमम् ।
उक्तवान् परमप्रीत्या परमेश्वरसेवनम् ।। ६९ ।।

ब्रह्मोवाच

साधु साधु प्रजानाथ त्वमेव भगवत्प्रियः ।
यतस्त्वं मत्पदं दिव्यं वाञ्छनीयं महर्षिभिः ।। ७० ।।
योगिभिः सिद्धगन्धर्वैर्भक्तिभावसमन्वितैः ।
इन्द्रादिभिः सुरैः सेव्यं प्राप्तस्त्वं भाग्यवानसि ।। ७१ ।।
कथमागच्छसि ब्रूहि किं ते मनसि वर्तते ।
दर्शनं मे यतो भूप सर्वकामफलप्रदम् ।। ७२ ।।

इन्द्रद्युम्न उवाच

नमस्ते भगवन् देव पितामह नमोऽस्तु ते ।
अन्तर्य्यामी त्वमेवासि ज्ञातं सर्वं त्वया विभो ।। ७३ ।।
तथापि प्रश्नसंयोगात् कथयामि सुरोत्तम ।
तवाज्ञया नारदोक्त्या सर्वांस्तान् यज्ञसत्तमान् ।। ७४ ।।

तवानुग्रहतः कृत्वा ततो दारुस्वरूपिणः ।
विष्णोश्च निर्मिता मूर्त्तिः प्रासादश्च बभूव ह ।। ७५ ।।
प्रतिष्ठार्थं च यद्द्रव्यं शाला च यादृशी भवेत् ।
तत्सर्वं सर्वदेवेश निष्पन्नं भवदाज्ञया ।। ७६ ।।
इदानीं भूतले ब्रह्मन् गत्वा शीघ्रं प्रजापते ।
प्रतिष्ठाप्य महाविष्णोः स्थापनं च समाचर ।। ७७ ।।

सूत उवाच

इति विज्ञापने जाते ब्रह्मणः पुरतो द्विजाः ।
दुर्वासाः सहसागत्य प्रणिपत्य मुहुर्मुहुः ।। ७८ ।।
प्रजापते ते ऋषयो देवाश्च पितरस्तथा ।
गन्धर्वाश्च तथा चान्ये खेचराः कमलासन ।। ७९ ।।
श्रुत्वा तदाह सहसा तं च गम्भीरया गिरा ।

ब्रह्मोवाच

इन्द्रद्युम्नेन ते देवाः कथं स्पर्द्धां भजन्ति च ।। ८० ।।
अयं हि तपसा सिद्धं पञ्चमः पुरुषो मम ।
वैष्णवो विष्णुभक्तिज्ञो धर्मतत्परमानसः ।। ८१ ।।
जीवन्मुक्तो महाविष्णोस्तथा प्रियतरो महान् ।
एतत्समानास्ते देवा यतोऽहंकृतिधारिणः ।। ८२ ।।
आयान्तु ते मुने शीघ्रं कुर्वन्तु मम दर्शनम् ।

सूत उवाच

ब्रह्माज्ञया ततो देवा वासवाद्याः सुरोत्तमाः ।। ८३ ।।
दुर्वाससा समानीता दृष्ट्वा दूरान्नमस्कृतम् ।
कृत्वा च दण्डवद्भूयः प्रणिपत्य मुहुर्मुहुः ।। ८४ ।।
तस्थुस्ते दूरतो विप्रास्तदा स नृपसत्तमः ।
कृताञ्जलिपुटो ब्रह्मन्कटाक्षं त्रिदशानपि ।। ८५ ।।

कुरुतेति वचः प्राह पश्यतां मरुतां पुरः ।
इन्द्रद्युम्नवचः श्रुत्वा ततो ब्रह्मा सुरांश्च तान् ।। ८६ ।।
कटाक्षं कृतवान् भूयो भूपालं प्रत्युवाच ह ।

ब्रह्मोवाच

गच्छ भूप त्वमधुना सम्भारान् कुरु सत्वरम् ।। ८७ ।।
गच्छामि च ततो मर्त्यलोकं त्वत्कार्यहेतवे ।
इत्थं ब्रह्मोक्तिमाकर्ण्य सहसा स नृपोत्तमः ।। ८८ ।।
पुनर्बभाषे ऋषयो ब्रह्माणं ब्रह्मवादिनम् ।

इन्द्रद्युम्न उवाच

प्रजापते महावाहो सर्वं सम्भारसंभृताम् ।। ८९ ।।
शालां प्रासादमत्युग्रं प्रतिमाश्च हरेस्तथा ।
सम्पाद्य तरसा प्राप्तस्त्वत्समीपं सुरोत्तम ।। ९० ।।

ब्रह्मोवाच

सर्वं नष्टं द्विजश्रेष्ठ त्वद्वंशसंभृताश्च ये ।
तथा सैन्याश्च बहुशः मन्वन्तरमजायत ।। ९१ ।।
एकसप्ततिसंख्याता युगा जाता महीपते ।
कोटिशश्च नृपा जातास्तत्र भूमितले नृप ।। ९२ ।।
केवलं प्रतिमा विष्णोः प्रासादस्तिष्ठति ध्रुवम् ।
विश्वावसोश्च वंशस्तु तथा विद्यापतेर्नृप ।। ९३ ।।
केवलं वर्तते चेदं कथयित्वा पुनर्द्विजाः ।
शङ्खनिधिं तथा पद्मं नारदं च मुनीश्वरम् ।। ९४ ।।
सङ्गे कृत्वा नारदोक्त्या सम्भारान् कुरु भो नृप ।
आदौ गच्छ प्रयास्यामि तवानुपदतस्ततः ।। ९५ ।।
इत्युक्त्वा विरते देवे पद्मयोनौ द्विजोत्तमाः ।
देवाः सर्वे तदाकर्ण्य पप्रच्छुस्तं प्रजापतिम् ।। ९६ ।।

देवा ऊचुः

नीलाचले नीलतनुर्माधवो यः प्रजापते ।
अस्माभिः प्रत्यहं देव पूजितः सादरं विभुः ।। ९७ ।।
सोऽयमन्तर्हितः श्रीमान् श्वेतद्विपे व्यवस्थितः ।
ततो दारुस्वरूपं च धृत्वा स नृपतेः प्रभुः ।। ९८ ।।
यज्ञान्ते लवणाम्भोधेस्तटे तत्र प्रकाशितः
यज्ञवेद्यां ततो ब्रह्मन् सप्तधा सोऽवतारवान् ।। ९९ ।।
कथमेतच्चरितं भो कृतं तेन च विष्णुना ।
कथयाशु प्रजानाथ शुश्रूषा नः पुनः पुनः ।। १०० ।।

ब्रह्मोवाच

देवास्तु शृणुतक्षिप्रं गोपनीयं मया सदा ।
पुत्राश्च मामकाः सर्वे यन्न जानन्ति भो गुरो ।। १०१ ।।
कथयामि रहस्यं च यतो मत्पादसेविनः ।
नीलमाधवरूपेण नीलाचल गुहापतेः ।। १०२ ।।
भगवान् भूतभृद्दिव्ये क्षेत्रे श्रीपुरुषोत्तमे ।
पूर्वं परार्द्धमपरंमामकं सुरसत्तमाः ।। १०३ ।।
इदानीमपरे प्राप्ते द्वितीयेऽपि परार्द्धके ।
दारुब्रह्मस्वरूपेण प्रकाशो भवति प्रभोः ।। १०४ ।।
इन्द्रद्युम्ननृपद्वारा चतुर्वर्गप्रदायकः ।
ममैवायुःप्रमाणं वै कलयिष्यत निर्जराः ।। १०५ ।।
एवं मदीयममराः प्रमाणं चायुषोऽधुना ।
कथितं भवतामग्रे श्रुण्वतां प्रीतिवर्द्धनम् ।। १०६ ।।
अष्टोत्तरशतायुर्मे कलितं तेन विष्णुना ।
नीलमाधवरूपेण दारुब्रह्मस्वरूपतः ।। १०७ ।।

सततं नीलगोत्रेऽस्मिन् पवित्रे पुरुषोत्तमे ।
नानावतारलीलानां शर्म भुङ्क्ते जगत्पतिः ।। १०८ ।।
अपरं चेष्टितं तस्य क्षीरसागरशायिनः ।
श्वेतद्विपनिवासस्य विष्णोः शृणुत निर्जराः ।। १०९ ।।
जम्बुद्वीपे रङ्गभूमिस्तत्र शेते जनार्द्दनः ।
मत्सभायां प्रभातेऽसौ जाग्रद्देवो रमापतिः ।। ११० ।।
ऋषिगोत्रे क्षणमसौ तिष्ठेद् वै प्रभुरच्युतः ।
तत्र प्रयागे विमले स्नाति देवाः स माधवः ।। १११ ।।
नित्यकर्म करोत्येष ख्याते वदरिकाश्रमे ।
पुण्ये नीलाचले रम्ये क्षेत्रे श्रीपुरुषोत्तमे ।। ११२ ।।
लवणाम्भोनिधेस्तीरे न्यग्रोधतरुसन्निधौ ।
सर्वदा भगवान् देवो जगन्नाथो महाप्रभुः ।। ११३ ।।
भुङ्क्ते स्वयं त्रिकालं वा षट्कालं वा सुरोत्तमाः ।
प्रत्यहं कमलाकान्तो देवाः स्वेन विनिर्मिते ।। ११४ ।।
मदीये प्रलये जाते नष्टे स्थावरजङ्गमे ।
जगत्यस्मिन् जगन्नाथस्तत्र शङ्खाकृतौ स्थले ।। ११५ ।।
कामरूपे स्वयं विष्णुः सर्वदास्ते सुरोत्तमाः ।
अतस्तत्क्षेत्रमत्युग्रं पावनं पापनाशनम् ।। ११६ ।।
विष्णोः प्रीतिकरं दिव्यं भोजनस्थानमेव तत् ।
भोजनान्ते हरिः सोऽयमयोध्यायां क्षणं वसन् ।। ११७ ।।
ततो वृन्दावने पुण्ये रमणीयतरे सुराः ।
गोपैः समं गोपिकाभिः किंचित् कालं विहार्य्य च ।। ११८ ।।
रम्यप्रासादयुक्तायां स्थितायां सागरे ततो ।
क्रीडासक्तो द्वारकायां रुक्मिण्यादियुतो हरिः ।। ११९ ।।

सूत उवाच

एवं निगदतो देवा नारदाद्या महर्षयः ।
वचोऽमृतं विधेः पीत्वा कर्ण्णाभ्यां हर्षितास्तदा ।। १२० ।।
इन्द्रद्युम्नोऽपि संहृष्टो जातः सज्जनपालकः ।
ततो ब्रह्माज्ञया देवा वासवाद्या द्विजोत्तमाः ।। १२१ ।।
नारदाद्या मुनिश्रेष्ठास्तं प्रणम्य मुहुर्मुहुः ।
जग्मुः क्षेत्रवरं विप्रा यत्रास्ते जगतां पतिः ।। १२२ ।।
इन्द्राद्याः सुरनिकराः प्रणम्य तं ते
ब्रह्माणं स च धरणीधवोऽपि विप्राः ।
तावत्ते मुनिकराश्च ते नारदाद्या
गत्वाथासितगिरिसन्निधौ प्रविष्टाः ।। १२३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये चतुर्थोऽध्यायः ।।

पञ्चमोऽध्यायः

इन्द्राद्या ऋषयः सर्वे नारदाद्याः महर्षयः ।
ब्रह्माज्ञया समायाता दारुब्रह्मस्वरूपिणम् ।। १ ।।
विष्णुं विलोक्य किं चक्रुरिन्द्रद्युम्ननृपस्तथा ।
किं वा चकार तत्त्वं नः कथयाशु मुनेऽधुना ।। २ ।।

सूत उवाच

ब्रह्मलोकात् समागत्य ते सर्वे वासवादयः ।
गुप्तं दारुस्वरूपं तं दृष्ट्वा सम्पूज्य सत्तमाः ।। ३ ।।

स्तुत्वाथ विविधैर्वाक्यैर्विष्णुं केषामगोचरः ।
ततः प्रासादनिकटं ते सर्वे जग्मुरुत्तमः ।। ४ ।।
अत्युच्यं पृथुलं दिव्यं प्राकारद्वयवेष्टितम् ।
मनोहरं सुधालिप्तं प्रासादं विगतोपमम् ।। ५ ।।
तादृशं ददृशुः सर्वे सर्वलोकसुखावहम् ।
तत्रास्ते माधवो विप्रा गालवेन प्रतिष्ठितः ।। ६ ।।
तं दृष्ट्वाथ बहिष्कृत्य पश्चिमस्यां दिशि द्विंजाः ।
प्रासादस्य ततः शीघ्रं स्थापयामासुरुत्तमाः ।। ७ ।।
तत्सेवकजनास्ते च क्षिप्रं गत्वा तमूचिरे ।
विरजामण्डले क्षेत्रे तिष्ठन्तं गालवं नृपम् ।। ८ ।।
तच्छ्रुत्वा गालवः सोऽयं चतुरङ्गबलान्वितः ।
क्रोधात्समागतः क्षिप्रं क्षेत्रं श्रीपुरुषोत्तमम् ।। ९ ।।
दृष्ट्वा तत्र द्विजश्रेष्ठो नारदमृषिसत्तमम् ।
इन्द्रद्युम्नं च राजानं दिक्पालान् देवसत्तमान् ।। १० ।।
अन्यान् बहुमुनीन् दृष्ट्वा तथान्यान् खेचरानपि ।
दृष्ट्वा पप्रच्छ विनयान् गालवो नारदं पुनः ।। ११ ।।

गालव उवाच

भो भो देवऋषे सर्वे नारदाद्या सुरोत्तमाः ।
इन्द्रद्युम्नोऽपि भूपोऽयं तथाऽन्ये चैव खेचराः ।। १२ ।।
आगत्य सर्वैर्युष्माभिः प्रासादान्मे मयाधुना ।
बहिष्कृतो माधवोऽसौ ब्रूहि मां हेतुरत्र कः ।। १३ ।।
गालवस्य वचः श्रुत्वा नारदो मुनिसत्तमः ।
कथयामास तं भूपं कथां तत्र पुरातनीम् ।। १४ ।।

नारद उवाच

शृणु गालव मद्वाचं पूर्ववृत्तान्तसंयुताम् ।
इन्द्रद्युम्नोऽयमागत्य नीलाचलतलं पुरा ।। १५ ।।

छेदयित्वा महारण्यं कृत्वात्र वसतिं पराम् ।
वाजिमेधसहस्रं च कृतवान् नृपसत्तमः ।। १६ ।।
सहस्राब्दमभिव्याप्य यज्ञान्ते भूरिदक्षिणाम् ।
दत्त्वा च बहुदानानि ददौ गाश्च स कोटिशः ।। १७ ।।
दारुब्रह्मस्वरूपस्य विष्णोश्च दर्शनं पुनः ।
सम्प्राप्तः स्वेच्छया वेद्यामवतीर्णं च सप्तधा ।। १८ ।।
तं दृष्ट्वा तन्निवासार्थं प्रासादः कारितो महान् ।
प्रतिष्ठार्थं च सम्भारान् सम्पाद्य स महीपतिः ।। १९ ।।
सम्भारे जायमानेऽसौ ब्रह्मलोकं मुनिर्ययौ ।
ब्रह्माणं च समानेतुं मया सह विशांपतिः ।। २० ।।
तत्प्रतिष्ठार्थमेवेदं ब्रह्मणे च निवेदितम् ।
तत्र स्थिते महीपाले मन्वन्तरमजायत ।। २१ ।।
एक सप्ततिसंख्याता युगा जाता महीतले ।
कोटिशोऽत्र क्षितौ भूपा गता गालव सम्प्रति ।। २२ ।।

सूत उवाच

इत्युक्त्वा नारदस्तुष्णीं तस्थौ विप्राः स गालव ।
मन्त्रिभिः सह संचिन्त्यतं भूपंशरणं ययौ ।। २३ ।।
इन्द्रद्युम्नं च भूपालं दण्डवत् प्रणिपत्य सः ।
तत्पृष्ठस्थलमालम्ब्य तस्थौ गालव भूपतिः ।। २४ ।।
नारदं परिपृच्छ्याथ द्विजाः स नृपकुञ्जरः ।
प्रतिष्ठायोग्यसम्भारं पात्रं प्राप्य ततो ऋषे ।। २५ ।।
श्रुत्वा तच्च ददौ शीघ्रं निधियुग्माय भो द्विजाः ।
निधिः शङ्खश्च पद्मश्च पत्रस्यास्य प्रमाणतः ।। २६ ।।
प्रासादस्य च वारुण्यां दिशि चारुतरां पराम् ।
शालां स्वर्णमयीं दिव्यां चकार द्विजसत्तमाः ।। २७ ।।

तावद्दूरां मनोरम्यां यावदास्ते सदाशिवः ।
लोकनाथप्रभुर्देवो जगदानन्दबर्द्धनः ।। २८ ।।
सम्भारान् रुचिरान् कृत्वा रथत्रयमतः परम् ।
नानालङ्कारसंयुक्तं दिव्याम्बरसुमण्डितम् ।। २९ ।।
निर्ममे नारदोक्त्या तच्चक्रैः संयुक्तमायसैः ।
नानारत्नसमुल्लासं हैमं चारुतरं द्विजाः ।। ३० ।।
नानावतारलीलायां द्योतनप्रतिमाद्वयम् ।
ततः स्वर्णमयैरश्वैः सूतेन च समन्वितम् ।। ३१ ।।
देदीप्यमानं सहसा पश्यतां दर्पवर्द्धनम् ।
एवं विनिर्मितं तेन निधिद्वन्द्वेन भो द्विजाः ।। ३२ ।।
स्यन्दनत्रयमाश्चर्य्यं त्रैलोक्यसुखवर्द्धनम् ।
वासुदेवरथो दिव्यो गरुडेन च चिह्नितः ।। ३३ ।।
पद्मध्वजः सुभद्रायास्तथा स्वर्णमयो रथः ।
बलस्यापि रथो विप्रास्तालध्वजः सुपण्डितः ।। ३४ ।।
नानालङ्कारसंयुक्तो मनोरमतरो द्विजाः ।
नानापताकाविलसत्तोरणध्वजशोभितम् ।। ३५ ।।
सद्गुणावलिसन्नधं नवीनाम्बुदसन्निभम् ।
एवं विधं महत्सज्जं लोचनानन्दवर्द्धकम् ।। ३६ ।।
रथत्रयं ततो दृष्ट्वा प्रतिष्ठाकर्म तत्कृतम् ।
नारदेन समं तैस्तर्मुनिभिः कर्मकोविदैः ।। ३७ ।।
दारुब्रह्मागमार्थञ्च तदा जातो महोत्सवः ।
तस्मिन् समागताः सर्वे भक्तिभावसमन्विताः ।। ३८ ।।

ऋषय ऊचुः

रथानां निर्मितानां च केन वा विधिना ततः ।
प्रतिष्ठाकर्म किं जातं ब्रूहि सूत महामते ।। ३९ ।।

सूत उवाच

पूर्वं यथा नारदेन प्रतिष्ठाकर्म वै कृतम् ।
तच्छृणुध्वं मुनिवराः मत्तः कथयतोऽधुना ।। ४० ।।
ऐशान्यां कोणदेशेऽपि शाला कार्य्या द्विजोत्तमाः ।
रथस्य चतुरस्रासौ चतुर्द्वारविभूषिता ।। ४१ ।।
चतुर्हस्तप्रमाणं स्यात्समन्तादतिशोभना ।
हस्तोच्छ्रिता सुधालिप्ता नानाभूषासुसज्जिता ।। ४२ ।।
हस्तप्रमाणा तन्मध्ये वेदिका शोभनाकृतिः ।
कार्य्या विधिज्ञैस्तत्रापि शोभनं मण्डलं पुनः ।। ४३ ।।
चतुर्द्वारसमायुक्तं शोभया चोपशोभया ।
युक्तं कोणान्वितं तत्तु मण्डलं द्विपदे पुनः ।। ४४ ।।
फलपुष्पलतातद्वद्वीथिकावृत्तमुत्तमम् ।
ततश्चैकपदे विप्राः पीठेन कलितं पुनः ।। ४५ ।।
षट्त्रिंशद्भिः प्रकोष्ठैश्च मध्ये पदं समालिखेत् ।
एवं कृत्वा ततो धीमान् वरुणं प्रथमं यजेत् ।। ४६ ।।
ततः संकल्प्य विधिवत्स्वस्तिवाचनमाचरेत् ।
आचार्यब्राह्मणस्तावद्वरणं तदनन्तरम् ।। ४७ ।।
पूर्वं दिनत्रयस्य स्यादङ्कुरार्पणमुत्तमम् ।
एकस्य दिवसस्यापि विधिज्ञैरिति भाषितम् ।। ४८ ।।
आचार्य्यः प्राङ्मुखो भूत्वा ततः कर्मकलापवित् ।
तादृशं कलशं दिव्यं स्थापयेन्मण्डलोपरि ।। ४९ ।।
नवीनाम्बरसन्नद्धं कण्ठदेशे सुशोभनम् ।
नानातीर्थोदकैः पूर्णं तन्मध्ये पातयेत्पुनः ।। ५० ।।
सर्वगन्धांश्च रत्नानि पञ्चात्र सप्त मृत्तिकाः ।
सर्वौषधीश्च संक्षिप्य पञ्चगव्यं महर्षयः ।। ५१ ।।

चूतपल्लवसंयुक्तं नारिकेलसमन्वितम् ।
कलशं स्थापयित्वाथ तत्पार्श्वे ध्वजमुत्तमम् ।। ५२ ।।
संस्थाप्य कलशे विप्रास्तत्र देवं समर्च्चयेत् ।
नरसिंहं महावीर्य्यं मन्त्रराजेन मन्त्रवित् ।। ५३ ।।
पञ्चोपचारतो भक्त्या चतुर्वर्गफलप्रदम् ।
संप्रार्थ्य तं ततो भक्त्या दद्यात्पुष्पाञ्जलित्रयम् ।। ५४ ।।
वायव्यां दिशि कुम्भस्य यजेदग्निं द्विजोत्तमाः ।
चर्व्वाज्यसमिधस्तावन्मन्त्रराजेन पावके ।। ५५ ।।
अष्टोत्तरसहस्रं वै जुहुयान्मन्त्रविद् द्विजः ।
पूर्णाहुतिं ततः कुर्याद्वेदमन्त्रेण भो द्विजाः ।। ५६ ।।
पुण्याहवाचनं कृत्वा ध्वजं चैव समर्च्चयेत् ।
रक्तचन्दनमाल्यैस्तैरुपहारैर्मनोरमैः ।। ५७ ।।
सम्पूज्याथ ध्वजं विप्राः संप्रार्थ्य प्रणमेत्पुनः ।
इमं मन्त्रं समुच्चार्य प्रार्थयेत्तदनन्तरम् ।। ५८ ।।
हेतुर्यो जगतां हितस्य च हरेर्देहोऽपि यो ज्ञानभृ-
त्केतुं परिवीक्ष्य जिह्मगयं वधूवृन्दोरुचाभिश्च्युतिः ।
चञ्चद्गर्वितसर्वपन्नगकुलव्यग्रातिसंचर्वणं
स्यन्दच्छोणितजर्जरास्यमनघं तं नौमि तार्क्ष्यं सदा ।। ५९ ।।
इमं मन्त्रं समुच्चार्य्य प्रार्थयेत्तदनन्तरम् ।
इति स्तुत्वा ध्वजं कुम्भं गृहीत्वाथ द्विजोत्तमाः ।। ६० ।।
रथान्तिकं समागत्य सूक्तं तार्क्ष्यस्य वै पठेत् ।
रथोपरि च संस्थाप्य ध्वजं तं परिपूजितम् ।। ६१ ।।
ततः कलशमुद्धृत्य सेचयन्मन्त्रराजतः ।
आनुष्टुभेन मन्त्रेण जगन्नाथरथं पुनः ।। ६२ ।।

दत्त्वा सन्तोषयेद्विप्रं कर्मकर्त्तारमुत्तमम् ।
तथैकाक्षरमन्त्रेण भद्रायाः रथमुत्तमम् ।। ६३ ।।
एतेनोक्तेन विधिना प्रतिष्ठां कृतवान्मुनिः ।
स्व स्व ध्वजस्थापनं तु कृतं च विधिवद् द्विजाः ।। ६४ ।।
एवं रथत्रयं विप्राः प्रतिष्ठाप्य यथाविधि ।
ततो दद्याद्दक्षिणां तामाचार्य्याय स्वशक्तितः ।। ६५ ।।
सुवर्णं रजतं रत्नं वस्त्रं धान्यं च गां पुनः ।
दत्त्वा सन्तोषयेद्विप्रं कर्मकर्त्तारमुत्तमम् ।। ६६ ।।
भोजयेद् ब्राह्मणान् दिव्यं पायसं मधुसर्पिषा ।
अन्नं भूपादिकं तावत् प्रतिष्ठान्ते ततो द्विजाः ।। ६७ ।।
एवं प्रकारतः कृत्वा प्रतिष्ठा कर्म नारदः ।
सर्वैश्च मुनिभिः सार्द्धं गतवान् पुरतो हरेः ।। ६८ ।।
इन्द्रद्युम्नेन तेनैव पुष्पाञ्जलिमदापयत् ।
त्रिवारं च ततः क्षिप्रं पट्टसूत्रं कटिस्थले ।। ६९ ।।
अर्पयित्वा हरेर्विप्रा विश्वावसुकुलोद्भवैः ।
विद्यापतेश्च विप्रस्य गोत्रजैर्मनुजैस्तथा ।। ७० ।।
बहुभिस्तैः समानीय रथेषु ब्रह्म तद्द्विजाः ।
स्थापयित्वा शनैर्भक्त्या महोत्सवतया तदा ।। ७१ ।।
रथे दृढं वासयित्वा दत्तं पुष्पाञ्जलित्रयम् ।
इन्द्रद्युम्नेन कर्पूरारात्रिकं च कृतं महत् ।। ७२ ।।
ततोऽसौ नृपतिश्रेष्ठो रथोपरि समन्ततः ।
मार्जयामास मार्जन्या हैमया चारुशोभया ।। ७३ ।।
ततश्चन्दननीरैश्च संसिच्य तद्रजः क्षिपेत् ।
रथाङ्गान्माल्यममलं दिव्यं वस्त्रं हरेः पुनः ।। ७४ ।।

सम्प्राप्य मूर्ध्नि विदधौ विरराज विशांपतिः ।
पुनः प्रणम्य धरणौ दण्डवद्धरणीपतिः ।। ७५ ।।
कृतकृत्यतया विष्णोरग्रे तस्थौ सुदीनवत् ।
ततो देव ऋषिः सोऽपि द्विजाग्र्यास्तद्रथोपरि ।। ७६ ।।
बलिं सुरेभ्यस्तेभ्योऽदात्पायसं तदभावतः ।
क्षीरतण्डुलकान् वापि तासु दिक्षु महर्षयः ।। ७७ ।।
पूर्वस्यां दिशि सूर्य्येभ्यो द्वादशेभ्यो ददौ मुनिः ।
अग्निकोणे मरुद्भ्योऽथ वसुभ्यश्चाश्विनौ तथा ।। ७८ ।।
दक्षिणस्यां सुपर्ण्णांश्च रुद्रांश्च पन्नगांस्तथा ।
नवग्रहेभ्यो नैऋत्यां वारुण्यां दिशि राक्षसान् ।। ७९ ।।
यातुधानांश्च सन्तोष्य वायव्यां च मुनीश्वरः ।
सुरस्था देवतास्तत्र दिक्पालानुत्तरेऽर्च्चयेत् ।। ८० ।।
ऐशान्ये क्षेत्रपालं च विघ्नराजं सुरोत्तमम् ।
रथानां चालने त्वं हि सावधानो भवत्विति ।। ८१ ।।

सूत उवाच

यतो रथानां चलने विकृतिर्यदि जायते ।
ततोत्पातं भवेत्तच्च शृणुध्वं मुनिसत्तमाः ।। ८२ ।।

सूत उवाच

द्विजानां क्षय एव स्यादीषभङ्गान्महर्षयः ।
अक्षभङ्गात् क्षत्रियाणां क्षयोऽपि स्यात् क्षितौ तथा ।। ८३ ।।
तुलाभङ्गाद्वैश्यहानिः शम्बा शूद्राविनाशिनी ।
धुराभङ्गाद्वृष्ट्यभावः पीठभङ्गात्प्रजाक्षयः ।। ८४ ।।
चक्रनाशेऽवनीशस्य परचक्राद्भयं भवेत् ।
ध्वजपाते नृपो राज्याद्भ्रष्टः स्यान्नात्र संशयः ।। ८५ ।।

प्रतिमाभङ्गतो नूनं नृपस्य मरणं भवेत् ।
इत्युत्पाते जायमाने रथस्य प्राग् दिशि द्विजाः ।। ८६ ।।
उत्तरे वाऽथ संस्थाप्य हुताशनमनिन्दितम् ।
पूजयेद् विधिवत्सम्यग् धूपदीपादिभिस्तथा ।। ८७ ।।
स्वस्तिवाचनमाचर्य्य पूर्वं कर्म समाचरेत् ।
पलाशसमिधः कार्याश्चाद्यतो घृतसंयुताः ।। ८८ ।।
अष्टोत्तरसहस्रं च जुहुयान्मन्त्रराजतः ।
सोमश्चाग्निः प्रजाश्चेति प्रजापतिरपि द्विजाः ।। ८९ ।।
ग्रहाश्चैव तथा ब्रह्मा दिक्पालाश्च तथा क्रमात् ।
ततश्चरुं घृतैर्युक्तं कृत्वा विप्रो यथाक्रमम् ।। ९० ।।
अष्टोत्तरसहस्रं तु जुहुयान्मन्त्रराजतः ।
होमान्ते च द्विजैः सार्द्धं स्वस्तिकर्म समाचरेत् ।। ९१ ।।
तोषयेद् बहुभिर्भोगैः विष्णुं पूजामनोरमैः ।
स्तुत्वा तं परया भक्त्या प्रणमेद्दण्डवद्भुवि ।। ९२ ।।
उत्पाते च तदा जाते कुर्य्यादेवं द्विजोत्तमाः ।
प्रसङ्गात्कथितं चेदं रथत्रयविनिर्गमे ।। ९३ ।।
ततः सर्वे नारदाद्या मुनयो निर्जरास्तथा ।
इन्द्रद्युम्नश्च भूपश्च गालवश्च तथा द्विजाः ।। ९४ ।।
अन्ये ते बहवो मर्त्त्या रथरज्जुकुलं भृशम् ।
समाकृष्य महाभक्त्या प्रासादान्तिकमुत्तमम् ।। ९५ ।।
आनयामासुरत्युग्रं क्षणमात्रं रथत्रयम् ।
महोत्सवतया सर्वे हर्षनिर्भरमानसाः ।। ९६ ।।
रथोत्सवसमासक्तो बभूवुर्द्विजसत्तमाः ।
अत्रान्तरे ब्रह्मलोकाच्छतहंससमन्वितम् ।। ९७ ।।

दिव्यं विमानं सौवर्ण्णं समारुह्य चतुर्मुखः ।
उभयोः पार्श्वयोस्तस्य सावित्री च सरस्वती ।। ९८ ।।
ताभ्यां च सहितो देवः सर्वदेवैः सुसेवितः ।
सर्वैश्च मुनिभिस्तावत् स्तूयमानो मुहुर्मुहुः ।। ९९ ।।
विमानखचितोल्लासिरत्नवृन्दप्रभाभरैः ।
समन्ताल्लक्षिततरः प्राप्तः श्रीनीलभूधरम् ।। १०० ।।
ततः सर्वे च ते देवा नारदाद्याः महर्षयः ।
इन्द्रद्युम्नश्च सहसा प्रणेमुर्दण्डवद्भुवि ।। १०१ ।।
ततो दुर्वाससं क्षिप्रं नारदेन स्वयं विधिः ।
दत्त्वा करद्वयं तस्माद्विमानादवरुह्य सः ।। १०२ ।।
प्रविवेश हृष्टमनातत्रैव सुमनोरमे ।
शालायामथ सम्भारे प्रासादे देवसत्तमः ।। १०३ ।।
दत्तावधानस्तु वदत्साधु साधु तदेति सः ।
ततः सार्द्धं समस्तैस्तैर्नारदप्रमुखैर्विधिः ।। १०४ ।।
नारायणरथे दिव्ये प्रविश्य दारुरूपिणम् ।
विष्णुं दृष्ट्वा स हृष्टात्मा रोमाञ्चितवपुर्द्धरः ।। १०५ ।।
आनन्दाश्रुलसद्गात्रः प्रणिपत्य मुहुर्मुहुः ।
साम़वेदेन तुष्टाव स्तौत्रैरन्यैरनेकधा ।। १०६ ।।
तथैव बलदेवं च नमस्कृत्य पितामहः ।
ऋग्वेदेनाथ तुष्टाव ततो भद्रां प्रजापतिः ।। १०७ ।।
यजुर्वेदेन सन्तोष्य ततश्चक्रं सुदर्शनम् ।
माधवं च धरां लक्ष्मीमथर्वणरुचा स्तुवन् ।। १०८ ।।
इति स्तुत्वा ततो ब्रह्मा देवदेवं जगत्पतिम् ।
प्रासादस्य प्रतिष्ठायां भरद्वाजं महामुनिम् ।। १०९ ।।

आचार्यं कृतवान् विप्रास्तथागस्त्यमहामुनिम् ।
ब्रह्माणं कृतवान् ब्रह्मा दुर्वासाश्च स नारदः ।। ११० ।।
पित्राज्ञया वसिष्ठश्च प्रतिष्ठायां प्रचारकः ।
अन्ये ते ऋषयो युक्ता स्वस्तिवाचनकर्मणि ।। १११ ।।
प्रासादस्य मनोज्ञस्य प्रतिष्ठाकर्मतत्कृतम् ।
तैस्तैर्मुनिगणैः सार्द्धं विधिना विधिना ततः ।। ११२ ।।
शान्तिकं पौष्टिकं कर्म कृतं तेन बहुद्विजाः ।
ततः कर्मावसानेऽपि दारुब्रह्मस्वरूपिणम् ।। ११३ ।।
कृष्णं रामं सुभद्रां च चक्रं चैव सुदर्शनम् ।
नीत्वा शनैः शनैर्ब्रह्मा रत्नसिंहासने तदा ।। ११४ ।।
स्थापयामास विधिवन्महोत्सवमकारयत् ।
नानारत्नसमुल्लासिप्रभाचारुतरे परे ।। ११५ ।।
रत्नसिंहासने दिव्ये बलं च प्रथमं ततः ।
तस्योत्तरे सुभद्रां च तस्याश्चोत्तरतः प्रभुम् ।। ११६ ।।
तदुत्तरे च तच्चक्रं तयोर्मध्ये च माधवम् ।
जगन्नाथसहायां तां पार्श्वे च पृथिवीं रमाम् ।। ११७ ।।
एवं संस्थाप्य विधिवत्ततो ब्रह्मा हरेः पुनः ।
महाभिषेकं कृतवान् तत्तद्दर्पणमण्डले ।। ११८ ।।
बलं पुरुषसूक्तेन श्रीसूक्तेन हरिं तथा ।
देवीसूक्तेन तां भद्रां सहस्राक्षेण तानपि ।। ११९ ।।
एवं संस्थाप्य विधिवत्ततो ब्रह्मा हरेः पुनः ।
भक्तियुक्तेन मनसा ततः पूजां समाचरेत् ।। १२० ।।
भैरवं प्रार्थयित्वादौ प्रदक्षिणमथो हरेः ।
आवाहयाम्यहं देवं त्रिपुरान्ताग्निसंदिशम् ।। १२१ ।।

भीमकान्ततनुधरं पलाशकुसुमोपमम् ।
रक्ताभं तुरगारूढं खड्गं शिरसि धारिणम् ।। १२२ ।।
ऊर्ध्वकेशं करालाक्षं भीषणं कालरूपिणम् ।
आवाहयाम्यहं देवं वृद्धं दक्षिणसंस्थितम् ।। १२३ ।।
आवायहाम्यहं देवं संसारपरमेश्वम्
उत्तरस्थं प्रपूज्यं तं शुक्लाभं तु दिगम्बरभ् ।। १२४ ।।
ततो वस्त्रासने शुद्धे चोपाविश्य प्रजापतिः ।
घण्टावादनकं कृत्वा पृथ्वीं संप्रार्थ्य मन्त्रवित् ।। १२५ ।।
आसनादिं समाचर्य्य मनसा तानथार्च्चयत् ।
पृथ्वीमनन्तं कूर्मं च ततो हस्ताभिशोधनम् ।। १२६ ।।
ततस्तालत्रयं कृत्वा दिग्बन्धनमतः परम् ।
ऋष्यादिध्यानसहितां भूतशुद्धिं चकार सः ।। १२७ ।।
प्राणप्रतिष्ठामकरोदथान्तर्मातृकामपि ।
ऋष्यादिध्यानसंयुक्तां दशधा मातृकां तथा ।। १२८ ।।
तत्त्वन्यासमतः कृत्वा भावनां च चतुर्विधाम् ।
व्यापकत्रयमाचर्य्य मन्त्रन्यासमतः परम् ।। १२९ ।।
मन्त्रराजस्य ऋष्यादिकराङ्गन्यासमातनोत् ।
नारसिंहं मनुं देहे प्रणवेन समन्वितम् ।। १३० ।।
त्रयं त्रयं च वर्णानां तस्मान्मात्रा प्रजापतिः ।
प्रथमं हृदये न्यस्य शिरस्येव शिखान्तरे ।। १३१ ।।
कवचाभ्यां तथा नेत्रे तावद्धस्तेऽथपार्श्वयोः ।
पृष्ठे नाभौ ककुद्देशे चैकाङ्गन्यासमाचरेत् ।। १३२ ।।
तस्मान्मन्त्रान् समुच्चार्य्य वर्णानां च त्रयं त्रयम् ।
दक्षाङ्गुष्ठक्रमेणैव वामाङ्गुष्ठावसानतः ।। १३३ ।।

प्रतिपर्वपरं न्यस्य प्रान्तं वर्णद्वयं पुनः ।
हस्तद्वन्द्वतले न्यासं कृतवान् स प्रजापतिः ।। १३४ ।।
सृष्टिन्यासममुं कृत्वा चित्तस्थितिमसौ चरन् ।
दक्षाङ्गुष्ठात्कनिष्ठान्तं तथा वामकरे न्यसन् ।। १३५ ।।
ततोऽसौ विधिना विप्रा वामाङ्गुष्ठादिकं क्रमात् ।
दक्षाङ्गुष्ठान्तमेवास्मिन्मन्त्रवर्णद्वयं पुनः ।। १३६ ।।
संहारन्यासमेवाहुस्त्वमुं स कृतवान् विधिः ।
ततो मन्त्रं द्विजश्रेष्ठः पुटितं श्रवणद्वये ।। १३७ ।।
कृत्वा तदायं विदधे विधिना व्यापकत्रयम् ।
पुटितं मातृकावर्णं तेनैव मनुना पृथक् ।। १३८ ।।
मातृकास्थानतो न्यासं कृतवान् कमलासनः ।
कृतस्तन्मनुना विप्रा व्यापकत्रयमाचरन् ।। १३९ ।।
तन्मन्त्रतोऽक्षरयुगं समुच्चार्य्य पितामहः ।
सृष्ट्यादिक्रमतो न्यासं कृतवाननुलोमतः ।। १४० ।।
पादयोर्जानुनोर्गुह्ये लिङ्गे नाभौ तथोदरे ।
हृदि स्तने बाहुमूले कण्ठे वक्त्रे तथा द्विजाः ।। १४१ ।।
घ्राणे नेत्रे तथा श्रोत्रे ललाटे च शिखान्तरे
प्रणवाद्यं नमोऽन्तं च न्यसन् वर्णद्वयं विधिः ।। १४२ ।।
सृष्टिमेवं विधायाथ स्थितिमेव ततः परम् ।
हृदादिपादपर्य्यन्तं बाहुमूलाच्छिखान्तिकम् ।। १४३ ।।
तथैव कर्णयुगलं तत्तत्स्थानेषु च न्यसेत् ।
शिरःप्रभृतिपादान्तं तथैव न्यासमाचरन् ।। १४४ ।।
संहारं विदधे विप्रा ऋतुन्यासं तथाचरन् ।
मनोरर्द्धे विलोमेन तथैवाप्यनुलोमतः ।। १४५ ।।

आदौ प्रणवमुच्चार्य्य नमः प्रान्ते तथा द्विजाः ।
वर्णान् पञ्च ततो मन्त्रान् मध्ये कृत्वा स्वयभुवा ।। १४६ ।।
पादयोश्च तथा लिङ्गे नाभौ हृदि गले पुनः ।
आस्ये शिखायां विन्यस्य पृथग् भूसुरसत्तमाः ।। १४७ ।।
अवशिष्टाक्षरद्वन्दः सर्वाङ्गे व्यापकः कृतः ।
एवं क्रमेण विधिवन्न्यासं सम्पादयेद्बुधः ।। १४८ ।।
कृतं यथा महाविष्णोः पञ्जरं न्यासकर्म यत् ।
तद् वदामि द्विजश्रेष्ठाः श्रृणुतादरतोऽधुना ।। १४९ ।।
प्रणवादिनमोऽन्तं च तन्मन्त्रवरतो द्विजाः ।
एकैकं वर्णमुच्चार्यमूर्द्धादिक्रमतो न्यसेत् ।। १५० ।।
पूर्वं शिरसि विन्यस्य ललाटे तदनन्तरम् ।
दक्षे कपोले शिरसः पश्चिमे वामके तथा ।। १५१ ।।
कपोले नेत्रयोश्चैव कर्णयोर्नासिकापुटे ।
मुखे गले बाहुमूले हृदि स्तनयुगे तथा ।। १५२ ।।
नाभावुदरदेशे च लिङ्गे गुह्ये च जानुनि ।
पदे दक्षकराङ्गुष्ठाप्रभृत्यङ्गुलिमण्डले ।। १५३ ।।
वामाङ्गुष्ठ्यान्तमेवापि क्रमेण दश संन्यसन् ।
वर्णद्वयं पाणितले कृतवान् न्यासमब्जजः ।। १५४ ।।
पञ्जरं न्यासमेवं वै कृत्वा स न्यासपञ्जरम् ।
पुनश्चक्रे यथा विप्राः शृणुताशु समादरात् ।। १५५ ।।
वाग्भवां च श्रियं न्यायं मायां कामबीजं तथा ।
तन्मन्त्राग्रे नियोज्याथ तस्मान्मन्त्री त्रयं त्रयम् ।। १५६ ।।
द्वादशे च पदन्यासं कृतवान्स प्रजापतिः ।
शिरस्यास्येऽपि कर्णे च हृदि नाभौ तथा द्विजाः ।। १५७ ।।

पार्श्वयोरुभयोश्चैव स्कन्धयोः पृष्ठदेशके ।
ककुद्देशे शिखाग्रे च द्वादशस्थानतो न्यसेत् ।। १५८ ।।
मूर्त्तिपञ्जरनामानं न्यासं चक्रे ततो विधिः ।
षडङ्गमन्त्रराजस्य तस्यैव कृतवान् द्विजाः ।। १५९ ।।
ततो दिग्बन्धनं कृत्वा तया नाराचमुद्रया
व्यापकत्रयमाचर्य्य ततः षोडशसंख्यया ।। १६० ।।
मुद्राः प्रदर्शिता विप्रास्ततोऽन्तर्यजनं चरन् ।
विलोमार्धपरिप्लुता यथाविधि विधिः पुनः ।। १६१ ।।
उपचारान् परिप्लुत्य ततो मूर्ध्नि जलैः पुनः ।
देवतां स्वं च नैवेद्यं प्रोक्षयामास तत्क्रमात् ।। १६२ ।।
आत्मानमात्मना पूज्य तिलकं चन्दनेन सः ।
कृतवान् पञ्चपुष्पाणि देहे स्वेऽपातयत्प्रभुः ।। १६३ ।।
मुद्राचतुष्टयं तावद्दर्शयित्वा ततः परम् ।
एतन्मन्त्रस्य गायत्री त्रिशतं स जजाप ह ।। १६४ ।।
एतन्मन्त्रं सहस्रं तु पुनर्जप्त्वा ततो हृदि ।
योनिमुद्रां प्रगृह्याथ जजापाष्टौ च तन्मनुम् ।। १६५ ।।
प्राणायामं ततः कृत्वा ततो जपसमर्पणम् ।
प्रोक्षणीजलतो विप्राः पुष्पपत्रपरिष्कृतम् ।। १६६ ।।
विधाय विधिवद्भक्त्या गृहीत्वा पुष्पचन्दनम् ।
समर्प्य विष्णोर्हृदये करं दत्वा प्रजापतिः ।। १६७ ।।
जजाप मन्त्रराजेन सहस्रं श्रद्धयान्वितः ।
ततस्तज्जपतो विप्राः सर्वेषां पश्यतां सदा ।। १६८ ।।
साक्षान्नृसिंहो भगवान् पद्मासनमतः प्रभुः ।
चतुर्भुजोऽरविन्दाक्षः कोटिसूर्योपमाकृतिः ।। १६९ ।।

बलस्तदा शेषरूपं समास्थाय प्रभोः शिरः ।
समाच्छाद्य फणानां वै सहस्रेण लसत्त्विषा ।। १७० ।।
लक्ष्मीस्तदीया सहसा तस्थौ चारुतरानना ।
सुदर्शनं तदा चक्रे दक्षे करतले स्थितम् ।। १७१ ।।
शङ्खरूपं समालम्ब्य माधवस्तु करे स्थितः ।
भद्राकश्चैव सहसा हस्ते पद्मं बभुव ह ।। १७२ ।।
विश्वधात्री च सहसा तत्करे सा गदा भवेत् ।
एवं सप्तविधा मूर्त्तिर्ब्रह्मणः करयोगतः ।। १७३ ।।
एकमूर्त्तिस्तथैवासीद् भगवान् मरुतां पुरः ।
तादृशं कमलाकान्तं दृष्ट्वा सर्वे महर्षयः ।। १७४ ।।
देवाश्च यक्षगन्धर्वा नागाश्चाप्सरसस्तथा ।
इन्द्रद्युम्नपुरोगास्ते मर्त्त्याश्च द्विजसत्तमाः ।। १७५ ।।
दुर्निरीक्ष्यं हरिं दृष्ट्वा त्रासं हर्षं च भेजिरे ।
ब्रह्मा च हृदयाद्धस्तं बहिष्कृत्य पुरः प्रभोः ।। १७६ ।।
योगपीठं प्रकल्प्याथ गन्धैः पुष्पैश्च पङ्कजम् ।
विलिख्य पीठपूजां च कृत्वा तद्भक्तिमानसः ।। १७७ ।।
आवाहनादिकां मुद्रां ममर्प्य दश तं विधिः ।
ततः प्रभोः शरीरेऽसौ मातृकादि यथाविधि ।। १७८ ।।
न्यासं तदैव कृतवान् ऋष्यादिपरिवर्जितम् ।
पूर्ववद्दर्शयामास मुद्रा षोडश तं विभुः ।। १७९ ।।
आदौ पुष्पोपचारं च मुद्रां ब्रह्मा ततः क्रमात् ।
प्रददौ जलधारां च मुखवाससमन्विताम् ।। १८० ।।
आसनं प्रथमं दत्त्वा स्वागतं विष्णवे ततः ।
पाद्यं पादप्रोञ्छनाय वस्त्रं शास्त्रविदां वराः ।। १८१ ।।

ततश्चाचमनं दत्त्वा हरये दारुरूपिणे ।
अर्घ्यं पुनश्चाचमनं मधुपर्कं ततः परम् ।। १८२ ।।
पुनराचमनं दत्त्वा विष्णवे दैत्यजिष्णवे ।
मुखप्रोच्छनवस्त्रं च रत्नपीठं तथा विधिः ।। १८३ ।।
पादपीठद्वयं तावद्ददौ विप्रा मनोरमम् ।
दर्पणं जलधारां च दत्त्वाथ कमलासनः ।। १८४ ।।
पयो दधि घृतं चैव दिव्यं मधु सुशर्करम् ।
सर्वौषधिजलं विप्राः सर्वगन्धोदकं तथा ।। १८५ ।।
पुष्पादिकं मनोहारि तथा तीर्थोदकं पुनः ।
कर्पूरोदकमाचम्य तेन तेन पृथग्विधि ।। १८६ ।।
प्रतिविम्बोऽपि संस्नाप्य तथा विधिः प्रजापतिः ।
ततः प्रोञ्छनवस्त्रं हि समर्प्य जगतां पतिम् ।। १८७ ।।
पुनराचमनं तावत् पीतवस्त्रद्वयं ततः ।
ततः समर्प्य शिरसि शुद्धसूक्ष्माम्बरं हरेः ।। १८८ ।।
नानारत्नसमुल्लासं चोत्तरीयं मनोरमम् ।
तुलस्या केशरचनां तस्य विष्णोर्महर्षयः ।। १८९ ।।
ततः कनकसूत्रणे तत्केशपरिबन्धनम् ।
ततः किरीटं सौवर्ण्णं सर्वरत्नोत्करं स्फुटम् ।। १९० ।।
ददौ मुरारये विप्रा भक्त्या चैव चतुर्मुखः ।
कर्णयोः कुण्डलद्वन्दं नासिकान्ते च मौक्तिकम् ।। १९१ ।।
नानारत्नमयीं मालां कण्ठलग्नां ददौ पुनः ।
मुक्ताकलापं पदकं हृदये केशवस्य च ।। १९२ ।।
मेखलां कटिदेशे च कटिसूत्रं पुरो ददौ ।
पुनर्दत्त्वा ततो ब्रह्मा किङ्किणीसूत्रमुत्तमम् ।। १९३ ।।

करे कङ्कणयुग्मं हि तथा नूपुरमुत्तमम् ।
दत्त्वा चतुः समैर्लेपं कृत्वा च सुमनश्चयम् ।। १९४ ।।
हरेः शरीरे सहसा दत्त्वा शोभामकल्पयत् ।
ततो दत्त्वोपचारांश्च ब्रह्मासौ सहसा हरेः ।। १९५ ।।
पादाम्बुजतले तस्य षडङ्गं च मनोर्यजन् ।
षडङ्गस्य च बाह्येऽपि रुक्मिणीं द्विजसत्तमाः ।। १९६ ।।
सत्यामग्निजितं तावत्सुनन्दां च ततो विधिः ।
मित्रविन्दामर्च्चयित्वा तुरीयाङ्गं सुलक्षणाम् ।। १९७ ।।
तथा जाम्बवतीं चैव सुशीलां हरिवल्लभाम् ।
क्रमात्ताः पूजयित्वाथ तद् बाह्येऽम्भोजसम्भवः ।। १९८ ।।
केशवं वासुदेवं च नारायणमतः परम् ।
संकर्षणं च प्रद्युम्नमनिरुद्धं तथा द्विजाः ।। १९९ ।।
वार्ष्णेयमसुराक्रान्तभारहारिणमर्चयत् ।
तद्बाह्येऽप्यथ दातारमर्यमाणमतः परम् ।। २०० ।।
मित्रं च वरुणं तावत्तथैव विधिरर्च्चयत् ।
विवस्वन्तं च पूषाणं पर्ज्यन्यं क्रमतोऽर्चयत् ।। २०१ ।।
तद्बाह्ये तस्य मन्त्रस्य प्रत्येकं वर्णमर्चयेत् ।
इन्द्रादिदशदिक्पालान् तद्बाह्येऽप्यर्चयेद्विधिः ।। २०२ ।।
आयुधानि तदा तेषां पूजयामास सत्त्वरम् ।
ततो घण्टां परिष्कृत्य ततस्ताक्ष्यार्चनं चरन् ।। २०३ ।।
घण्टानिनादं कृतवांस्ततो धूपं समर्पयेत् ।
धूपानन्तरतो दीपं पुष्पाञ्जलित्रयं ददौ ।। २०४ ।।
पुनः पाद्यं च सहसा पुनराचमनं तथा ।
परिष्कृत्य च नैवेद्यं निवेद्य द्विजसत्तमाः ।। २०५ ।।
पुनराचमनं दत्त्वा मुखनीराजनं ततः ।
अपोशानं ततो विप्रा दन्तशोधनकाष्ठिकाम् ।। २०६ ।।

रविसङ्ख्यायुतं तस्मै ददौ गण्डूषमुत्तमाः ।
जलधारां समर्प्याथ करप्रोञ्छनवस्त्रकम् ।। २०७ ।।
ततस्ताम्बूलदानं च पुनराचमनं तथा ।
पुनर्गन्धं च पुष्पं च धूपं दीपं प्रजापतिः ।। २०८ ।।
श्वेतदूर्वाक्षतान् दत्त्वा विलोमार्घ्यं समर्प्ययेत् ।
कर्पूरारात्रिकं तावत्सप्तावर्त्ति तथाकरोत् ।। २०९ ।।
पिष्टकावर्त्तिभिर्देवो नीराजनमथाकरोत् ।
महानीराजनं कृत्वा पुनः श्वेतं च छत्रकम् ।। २१० ।।
मेघाडम्बरनिक्षेपं चारुचामरसञ्चयम् ।
कृतवान् परमप्रीत्या तथा व्यजनवीजनम् ।। २११ ।।
घण्टानां मर्द्दलानां च वीणायाश्च मृदुध्वनिम् ।
पिनाकिध्वनिमारभ्य तथैव मुरलीध्वनिम् ।। २१२ ।।
रम्यं काहालनिनदं तथा शङ्खध्वनिं परम् ।
स्वरं मधुरिकाणां च ढक्कागोमुखनिःस्वनम् ।। २१३ ।।
पटहोत्तमनिःस्वानं गीतं नृत्यं हरेः पुरः ।
विमानं शिविकां चापि गजमश्वरथं तथा ।। २१४ ।।
विधिना पूजयित्वा च दारुरूपधरं हरिम् ।
तुष्टाव परया भक्त्या दण्डवत् प्रणिपत्य च ।। २१५ ।
दारुब्रह्मकलेवरं सुरवरं पूर्णेन्दुरम्याननम् ।
चञ्चत्पद्मपलाशमञ्जुनयनं दिव्योपचारैश्च तैः ।। २१६ ।।
सर्वेषां मरुतां पुरः परमया भक्त्यार्चयत्पद्मजो ।
भूदेवा नरसिंहरूपिणममुं सूर्य्यप्रभं दुर्द्धरम् ।। २१७ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये पञ्चमोऽध्यायः ।।

षष्ठोऽध्यायः

सूत उवाच

ततः पूजावसानेऽसौ ब्रह्मदेवं सुरेश्वरम् ।
शतोपचारतो विप्राः सम्पूज्याथ स्तुतिं पठन् ।। १ ।।

ब्रह्मोवाच

परं ब्रह्म परं धाम पवित्रं च परात्परम् ।
पूर्णानन्दमयं पुण्यं निर्गुणं सच्चिदात्मकम् ।। २ ।।
वेदान्तवेद्यं परमं सर्वतोमुखमव्ययम् ।
निरीहं शाश्वतं शान्तं शिवं तत्त्वविदान्वितम् ।। ३ ।।
अजं निरञ्जनं तावदवाङ्मनसगोचरम् ।
नमः परतरं तद्वै ब्रह्मनिर्वाणकारणम् ।। ४ ।।
अनुग्रहाय लोकानां नानारूपधरं प्रभुम् ।
वन्देऽहं कमलाकान्तं स्फुटिताम्बुजलोचनम् ।। ५ ।।
मीनरूपं समास्थाय हत्वा शङ्खमहासुरम् ।
यत्त्वया स्थापिता वेदास्तस्मै मत्स्यात्मने नमः ।। ६ ।।
नमस्ते देवदेवेश नमः कच्छपरूपिणे ।
वराहरूपिणे तुभ्यं नमस्ते धरणीप्रिय ।। ७ ।।
नमो नृसिंहरूपाय दैत्योरःस्थलदारिणे ।
कोटिसूर्यप्रभायास्मै दुर्निरीक्षाय ते नमः ।।८ ।।
अस्मदाद्यनुकम्पार्थं सम्प्रत्येव त्वया प्रभो ।
मूर्त्तिं सप्तविधां हित्वा धृत्वा रूपं सुपावनम् ।। ९ ।।
नारसिंहं महाज्वालं शेषाच्छादितमस्तकम् ।
आविर्भूताय सहसा नमस्तुभ्यं नमो नमः ।। १० ।।

बलस्तु शेषरूपेण यच्छिरः स्थलतः स्थितः ।
तस्मै नृसिंहरूपाय नमस्तेऽव्यक्तरूपिणे ।। ११ ।।
यत्कराब्जेऽपि सा भद्रा पद्मरूपे व्यवस्थिता ।
नमस्तस्मै नृसिंहाय दिव्यज्ञानप्रदायिने ।। १२ ।।
सुदर्शनं महाचक्रं कोटिसूर्य्यसमप्रभम् ।
भेजे कराम्बुजे यस्य तन्नृसिंहाय ते नमः ।। १३ ।।
माधवः शङ्खतां प्राप्य यत्करे भाति सुन्दरे ।
नृसिंहरूपिणे तस्मै नीलाचलनिवासिने ।। १४ ।।
धराधरधरा यस्य सेयं तत्र गदाभवत् ।
नमस्तस्मै नृसिंहाय दैत्यसंघच्छिदे नमः ।। १५ ।।
त्रैलोक्यालोकजननी पद्मासौ पद्मलोचना ।
यद्वक्षसि स्थिता भाति तं नृसिंहं नमाम्यहम् ।। १६ ।।
उद्भटाभिः सटाभिर्या व्याप्ताकाशतलः प्रभुः ।
सोऽयं नृसिंहस्तरसा प्रसीदतु पुनः पुनः ।। १७ ।।
नमो वामनरूपाय बलिध्वंसविनोदिने ।
त्रिविक्रमाय ते नित्यं नमस्तस्मै नमो नमः ।। १८ ।।
क्षत्रियाणां सवंशानां येनैव विहितो लयः ।
विप्रेभ्यो वसुधां योऽदाज्जामदग्न्याय ते नमः ।। १९ ।।
पित्राज्ञया वनं प्राप्य कृत्वा सागरवन्दनम् ।
निहतो रावणो येन तस्मै रामाय ते नमः ।। २० ।।
प्रलम्बो निहितो येन हलेन मुषलेन वै ।
नमस्तस्मै बलायैव रोहिण्यानन्दवर्द्धने ।। २१ ।।
अद्वितीयपरार्द्धस्य प्रमापूरणकारिणे ।
दारुब्रह्मस्वरूपाय तस्मै बुद्धात्मने नमः ।। २२ ।।

घोरे कलियुगे भूयो नानाकल्मषसङ्कुले ।
म्लेच्छान्तको यो भविता नमस्तस्मै च कल्किने ।। २३ ।।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ।
शरणं त्वां प्रपन्नोऽस्मि जगन्नाथ नमोऽस्तु ते ।। २४ ।।
यन्मायया जगत्सर्वं मोहितं सचराचरम् ।
तं त्वां देव प्रपन्नोऽस्मि वासुदेव नमोऽस्तु ते ।। २५ ।।
वासुदेव महाबाहो लोकानुग्रहकम्पया ।
दुष्टानां च विनाशार्थमवतीर्णः स्वयं प्रभो ।। २६ ।।
ततो गत्वा ब्रजं यस्त्वं श्रीवृन्दावनकौतुकाम् ।
गोपिकाभिः समं तावत् क्रीडां कृत्वा मुहुर्मुहुः ।। २७ ।।
नानालीलावकाशं च हत्वा तत्रासुरानपि ।
कंसान्तकं भजे तं त्वां वासुदेव नमोऽस्तु ते ।। २८ ।।
करुणाम्भोनिधे देव भक्तानुग्रहकारक ।
त्राहि नः शरणं प्राप्तान् मोहितस्तव मायया ।। २९ ।।
वेदान्ते प्रतिपाद्यं यत् पण्डितैर्ज्ञानमण्डितैः ।
नीलाचलेऽस्मिन् विमले प्रत्यक्षं तद्भजामहे ।। ३० ।।

सूत उवाच

इति स्तुत्वा जगन्नाथं देवदेवं वृषाकपिम् ।
ननाम दण्डवद्भूमौ भक्त्या ब्रह्मा द्विजोत्तमाः ।। ३१ ।।
वासवादिसुराः सर्वे नारदादिमुनीश्वराः ।
इन्द्रद्युम्नादयो मर्त्याः स्तुत्वा नेमुश्च भक्तितः ।। ३२ ।।
ब्रह्मत्यास्तु नरो यस्तु विष्णुं नीलाचले द्विजाः ।
स्तोतुमिच्छति चेन्मुक्तो न जाने स्तुवतः फलम् ।। ३३ ।।
त्रिसन्ध्यं मानवा ये वै तया स्तुत्या जनार्द्दनम् ।
स्तुवन्ति भक्त्या ते लब्ध्वा वाजिमेधफलं परम् ।। ३४ ।।

सर्वशर्म विभुज्याथ पुत्रपौत्रसमन्विताः ।
शेषे विष्णुपदं रम्यं गच्छन्ति सुरदुर्ल्लभम् ।। ३५ ।।
स्तुत्वाथ परया भक्त्या पुनर्विष्णुं सुरेश्वरम् ।
उवाच जगतां स्रष्टा पूजान्ते द्विजसत्तमाः ।। ३६ ।।

ब्रह्मोवाच

आधारस्त्वं च सर्वस्य जगतो भक्तवत्सल ।
प्रतिष्ठितस्त्वं सर्वत्र त्वयि सर्वं प्रतिष्ठितम् ।। ३७ ।।
तव प्रतिष्ठां कः कुर्य्याद् वयं त्वत्तः प्रतिष्ठिताः ।
प्रासादे सर्वदात्रैव स्थिरो भव भयापह ।। ३८ ।।
वैशाखे मासि मुनयः शुक्लपक्षे गुरोर्दिने ।
पुष्यर्क्ष्येण युतेऽष्टम्यां प्रासादस्य महोन्नतः ।। ३९ ।।
प्रतिष्ठाकर्म तत्कृत्वा नरसिंहासने विधुम् ।
समर्च्य विधिवद्भक्त्या ब्रह्मा त्रैलोक्यपालकम् ।। ४० ।।
इन्द्रद्युम्नाय भूपाय मन्त्रराजं ददौ तदा ।
तेजः सोढुमशक्ताय विष्णोस्तस्य महात्मनः ।। ४१ ।।
नृसिंहरूपिणो विप्रास्तस्मै विप्राय तद्ददौ ।
हर्षत्राससमायुक्तं तं भूपं नारदो मुनिः ।। ४२ ।।
दृष्ट्वाथ पितरं भूयः पप्रच्छ जगतां हितम् ।
अर्च्चं सप्तविधां मूर्त्तिं विधाय भगवान् प्रभुः ।। ४३ ।।
अवतीर्णः स्वयं ब्रह्मन् यज्ञवेद्यां चतुर्मुख ।
तं पुनस्त्वं विभुं देवं नरसिंहस्वरूपिणम् ।। ४४ ।।
कथं भो कृतवान् ब्रह्मन् कोटिसूर्य्यसमप्रभम् ।
अस्माकं च महान् त्रासो जायते यन्निरीक्षणात् ।। ४५ ।।
तस्यार्च्चनं वा मनुजैः करणीयं कथं विभो ।
त्वं साक्षाद्ब्रह्मरूपोऽसि पूजायां तत्र भो विधे ।। ४६ ।।

कृपया कथय ब्रह्मन् सर्वमेतत्सविस्तरम् ।
भूतशुद्ध्यादिकं तावन्न्यासकर्म कथं कृतम् ।। ४७ ।।
प्रत्यक्षं ब्रह्मणि ब्रह्मन् स्थिते त्वावाहनं कृतम् ।
संशयस्तु महान् जातोऽस्माकं तं छिन्धि पद्मज ।। ४८ ।।

सूत उवाच

नारदस्य वचः श्रुत्वा विप्रास्तस्य सुतस्य वा ।
किंचिद् विचिन्त्य सहसा तमाह स पितामहः ।। ४९ ।।

ब्रह्मोवाच

भगवत्युच्चते पुत्र त्रैलोक्यानन्दवर्द्धने ।
जाते दारुस्वरूपेण साम्प्रतं जगतां पतौ ।। ५० ।।
मर्त्यानां ज्ञानशून्यानामविश्वासो महान् भवेत् ।
तन्निरासार्थमत्यन्तं मन्त्रराजेन भो मया ।। ५१ ।।
आविष्कृतं हरेः रूपं पश्यतां सर्वकामदम् ।
मूर्त्ति सप्तविधां कृत्वा सोऽयमेकोऽजनि क्षणम् ।। ५२ ।।
अद्वितीयं परंब्रह्म यः सर्वं व्याप्य तिष्ठति ।
तद्ब्रह्म सप्तधा मूर्त्या स्वयं नीलाचले मुने ।। ५३ ।।
नानावतारलीलानां रचनार्थं सुरेश्वरः ।
सोऽयं सप्तविधो भूत्वा लोकानुग्रहकाम्यया ।। ५४ ।।
अद्वितीयपरार्द्धस्य प्रमाणार्थं महेश्वरः ।
लोकानां बन्धनं छेत्तुमवतीर्णः स्वयं हरिः ।। ५५ ।।
अथाकर्णय देवर्षे भूतशुद्ध्यादिकर्म यत् ।
कृतं यदर्थमधुना विष्णोः पूजनकर्मणि ।। ५६ ।।
हरेश्च मा मनोभेदः सत्यमेतन्न संशयः ।
किन्तु विष्णुं महीपृष्ठे पूजयिष्यन्ति मानवाः ।। ५७ ।।

मम वर्त्मानुगच्छन्तो भविष्यन्ति न संशयः ।
भूतशुद्ध्यादिकं न्यासकर्मत्यागाच्च ते नराः ।। ५८ ।।
शुद्धान्तःकरणा न स्युस्तेऽप्यशक्तास्तदर्च्चने ।
तैरन्यविहिता पूजा विफला स्यान्मुनीश्वर ।। ५९ ।।
देवत्वं च यदा न स्यात् पूजायोग्योऽपि नो भवेत् ।
अतः शिक्षार्थमेतेषां कृतं तत्कर्म नारद ।। ६० ।।
शृणुताशु मुने भूयः श्रीविष्णोः परमात्मनः ।
साक्षाद्भगवतस्तस्य त्वमावाहनसंशयः ।। ६१ ।।
दारुब्रह्मनिराकारं निर्गुणं निर्विकारकम् ।
निश्चेष्टं सर्वतो व्याप्तं भावाभावविवर्जितम् ।। ६२ ।।
उपचारांश्च तान् सर्वान् दातुं च तरसा मुने ।
सगुणं ब्रह्मणोरूपं भावयित्वात्मजोत्तम ।। ६३ ।।
येन मन्त्रेण पूजा स्याद्दारुब्रह्मस्वरूपिणः ।
तेन तत्र च तद्रूपमावाह्य पूजयेद् विभुम् ।। ६४ ।।
यथा सुवर्णाद् विविधं नानालङ्करणं मुने ।
जायते च तथा तस्माद्दारुब्रह्मस्वरूपतः ।। ६५ ।।
सर्वं प्रवर्त्तते विद्धि तत्रावाह्य प्रपूजयेत् ।
अतो दारुस्वरूपेऽस्मिन् मन्त्रराजेन पूजिते ।। ६६ ।।
प्रत्यक्षं पश्य भो पुत्र नारसिंहतनुं पराम् ।
आवाहनमतः कुर्याद्दारुब्रह्मणि तत्त्ववित् ।। ६७ ।।
दारुब्रह्मस्वरूपोऽयं भगवान् भक्तवत्सलः ।
भक्त्यार्च्चितो यदा विप्रैः कामनापूर्वतो मुने ।। ६८ ।।
प्रसन्नः सहसा तेषां दत्तवान् तन्मनोरथम् ।
दुर्ल्लभं तं निजस्थानं दद्यात्तेभ्यो न संशयः ।। ६९ ।।

वाञ्छाकल्पतरुः साक्षान्नीलाचलगुहाश्रये ।
भजतां पश्यतां वाऽपि ध्यायतां स्मरणं तथा ।। ७० ।।
अर्च्चकानां च भूलोके चतुर्वर्गप्रदो भवेत् ।
किं तीर्थैः किं मखैर्दानैः किं तपोभिश्च दुष्करैः ।। ७१ ।।
व्रतैश्च विविधैः किं वा चोपवासैश्च संयमैः ।
योगैरष्टाङ्गसहितैः किं वा तेषां च नारदः ।। ७२ ।।
पुराणश्रवणैर्वापि जपैर्नानाविधैस्तथा ।
उपादानैश्च देवानां दीक्षाभिश्चागमैर्नु किम् ।। ७३ ।।
येषां भक्तिपरतरे दारुब्रह्मस्वरूपिणि ।
जगन्नाथे सुराधीशे ते कृतार्था न संशयः ।। ७४ ।।
दारुब्रह्मस्वरूपं तं ये च भक्त्या निरञ्जनम् ।
पश्यन्ति तस्य निर्माल्यं जप्त्वा हृष्यन्ति भूतले ।। ७५ ।।
सत्यं सत्यं पुनः सत्यं तेषां जन्म न विद्यते ।
सर्वतीर्थेषु ते स्नाताः सर्वयज्ञेषु दीक्षिताः ।। ७६ ।।
आराधिताः सुराः सर्वे तैरेव पठिता श्रुतिः ।
पुराणानि च सर्वाणि जप्तानि मुनिसत्तम ।। ७७ ।।
दानं दत्तं तपस्तप्तं पितरस्तर्पितास्तथा ।
याचकानां च सन्तुष्टिः कृता तैरेव नारद ।। ७८ ।।
भक्त्या परमया ये वै पश्यन्ति जगतां पतिम् ।
पूर्णेन्दुचारुवदनं नीलजीमूतसुन्दरम् ।। ७९ ।।
फुल्लारविन्दनयनं दृष्ट्वा मुक्ता न संशयः ।
यूयं सर्वे महात्मानः सर्वशास्त्रविशारदाः ।। ८० ।।
ततः पूर्णतमं ब्रह्म न्यग्रोधतरुमूलतः ।
सिन्धुजले च नीलाद्रौ वर्ततेऽमृतदायकम् ।। ८१ ।।

भक्त्या विशुद्धया सर्वं विधानमनुसृत्य च ।
उपासनां च कुरुत कृतार्था भवता स्फुटम् ।। ८२ ।।

सूत उवाच

इत्येवं कथयित्वासौ नारदं पद्मसम्भवः ।
पुनः प्रभुं ततो विप्रा वाचमूचे मनोरमाम् ।। ८३ ।।

ब्रह्मोवाच

जय विष्णो हृषीकेश जय कृष्ण जगत्पते ।
जय दाशरथे श्रीमन् जय वामनशोभन ।। ८४ ।।
जय लक्ष्मीपते देव नरसिंह नमोऽस्तु ते ।
नीलगोत्रे पवित्रेऽस्मिन् क्षेत्रे श्रीपुरुषोत्तमे ।। ८५ ।।
भोगेच्छा यादृशी विष्णो भवदीया च वर्तते ।
तस्यैवाज्ञां महाबाहो कुरु देवशिरोमणे ।। ८६ ।।
इन्द्रद्युम्नं च भूपालं तव भक्तं स्वधार्मिकम् ।
पिपासुं त्वन्मुखाम्भोजच्युतमाज्ञामृतं प्रभो ।। ८७ ।।
आज्ञापय महाविष्णो नमस्ते भक्तवत्सल ।

सूत उवाच

एवमुक्तो रमाकान्तस्तेन पङ्कजयोनिना ।। ८८ ।।
दारुरूपधरः श्रीमान् प्राह गम्भीरया गिरा ।
किञ्चिद् विहस्य भूदेवः सर्वेषां पश्या तां पुरः ।। ८९ ।।

प्रतिमोवाच

इन्द्रद्युम्न नृपश्रेष्ठ मद्भक्तोऽसि यतोऽधुना ।
प्रसन्नस्त्वामहं वच्मि तव निष्कामकर्मतः ।। ९० ।।
मत्प्रीतये त्वया यद् वै कोटिवित्तप्रदानतः ।
दिव्यमायतनं सौम्यं सम्पादितमनिन्दितम् ।। ९१ ।।

मयि तेऽस्तु दृढा भक्तिः वदामि वरमुत्तमम् ।
अपरं च वरं दास्ये शृणु राजर्षिसत्तम ।। ९२ ।।
मदर्थं बहवो यज्ञाः कृता ये च सुदुस्तराः ।
कुट्टिमादिसमायुक्तः प्रासादश्च कृतो महान् ।। ९३ ।।
मञ्जुले नीलशैलेऽस्मिन् क्षेत्रे श्रीपुरुषोत्तमे ।
प्रासादप्रतिमाभङ्गे सदा तिष्ठामि सुव्रत ।। ९४ ।।
कालान्तरेऽथ यः कश्चित्प्रासादं रचयिष्यति ।
तत्र तिष्ठामि नृपते त्वत्कीर्त्तिपरिपालकः ।। ९५ ।।
सत्यं सत्यं पुनः सत्यं वदामि नृपसत्तम ।
तिष्ठाम्यत्र सदैवाहं प्रासादप्रतिमाक्षये ।। ९६ ।।
ब्रह्मणोऽस्य परार्द्धस्य द्वितीयस्य च भूपते ।
आसमाप्ति प्रसन्नोऽहं स्थास्ये दारुस्वरूपभाक् ।। ९७ ।।
इदानीं शृणु राजेन्द्र द्वितीये ब्रह्मणः परम् ।
परार्द्धे तु तृतीयेऽस्मिन् युगे तस्य मनोः किल ।। ९८ ।।
स्वायम्भुवः कृते तत्र दर्शे तव मखाञ्चिते ।
अवतीर्णः स्वयं ज्येष्ठ्यां तत्र जन्मदिनं मम ।। ९९ ।।
तत्पौर्णमीदिने भूप स्नानं मे कार्य्यमादरात् ।
महास्नानविधौ भक्त्या यथाविधि महोत्सवैः ।। १०० ।।
न्यग्रोधोत्तरतः कूपं निर्माय धरणीपते ।
नानातीर्थान्वितं विद्धि तद्दिनेऽहं प्रकाशितः ।। १०१ ।।
अतस्तस्य च कूपस्य नीरैरेवामृतोपमैः ।
संस्नाप्य तत्र पौर्णम्यां ततो मे धरणीपते ।। १०२ ।।
विरूपं वा सुरूपं वा नो पश्येत्कोऽपि यत्नतः ।
दशपञ्चदिनं प्राप्य पश्यंश्चेन्नारकी भवेत् ।। १०३ ।।

आषाढस्य च मासस्य सिते पक्षे गुरोर्दिने ।
पुष्यर्क्षे च द्वितीयायां तत्र कुर्य्याद्रथोत्सवम् ।। १०४ ।।
ऋक्षाभावे तिथौ कार्य्यं सर्वभावेन भूपते ।
गुण्डिचाख्योत्सवं कुर्य्यादतः प्रीतिकरं मम ।। १०५ ।।
समारोप्य रथे दिव्ये मां नीत्वापि महोत्सवैः ।
यज्ञवेदीं प्रति ख्यातां तत्र संस्थाप्य भूपते ।। १०६ ।।
सप्तवासरमालम्ब्य विधिवत्तत्र पूजयेत् ।
ततस्तस्मिन् रथे दिव्ये तदैवाशु समानय ।। १०७ ।।
तत्र संस्थाप्य मां भूप महोत्सवतया पुनः ।
पुण्या सा यज्ञवेदी च मम जन्मप्रदायिनी ।। १०८ ।।
प्रतिवर्षं च मां तत्र यथोक्तविधिना नृप ।
एवं महोत्सवः कार्य्यो गुण्डिचाख्यो महामते ।। १०९ ।।
आषाढस्य च मासस्य शुक्लपक्षे तथा नृप ।
एकादश्यां तिथौ तत्र कर्त्तव्यं शयनं मम ।। ११० ।।
कर्कटस्य च सङ्क्रान्त्यामयनेऽस्मिन् दिने मम ।
कुर्य्यान्महोत्सवं वीर सर्वलोकसुखप्रदम् ।। १११ ।।
मासि भाद्रपदे पक्षे सिते चैकादशीदिने ।
मदीयस्य च पार्श्वस्य परिवर्त्तनमाचरेः ।। ११२ ।।
कार्त्तिकस्यामले पक्षे मासस्याथ शुभप्रदे ।
एकादश्यां तिथौ तत्र मदुत्थापनकर्मकृत् ।। ११३ ।।
कर्त्तव्यं परया भक्त्या जगदानन्दवर्द्धनम् ।
मासानां प्रवरे राजन्मार्गशीर्षेऽति हर्षदे ।। ११४ ।।
सितायां च तिथौ षष्ठ्यां दिव्यनव्याम्बरैर्मम ।
प्रावृत्तिं रचय क्षिप्रं तदैव निवृतिप्रदा ।। ११५ ।।

पौषे मासि च पौर्णम्यां पुष्यर्क्षे च नृपोत्तम ।
तत्र पुष्याभिषेकं मे महोत्सवतया कुरु ।। ११६ ।।
तथोत्तरायणे मासि सङ्क्रान्त्यां मकरे नृप ।
महोत्सवं प्रकुर्य्यान्मे यथाविधि धरातले ।। ११७ ।।
फाल्गुने मासि राजर्षे पौर्णम्यां हर्षतो नृप ।
दोलाकेलिश्च कर्त्तव्या भक्त्या परमया सदा ।। ११८ ।।
चैत्रे मासि चतुर्द्दश्यां सिते पक्षे महीपते ।
यथाविधि मदीयाङ्गे कुर्य्याद्दमनकार्पणम् ।। ११९ ।।
वैशाखस्य च मासस्य सिते पक्षेऽतिपावने ।
तृतीयायां तिथौ तत्र मद्गात्रे चारुचन्दनम् ।। १२० ।।
विलिप्य श्रद्धया भूप महोत्सवतया ततः ।
जलभ्रमणकं चैव मदीयं तद्विधीयताम् ।। १२१ ।।
इत्थं द्वादशयात्रा मे पवित्राः सर्वकामदाः ।
पश्यन्ति ये च जल्पन्ति भक्त्या संदर्शयन्ति वा ।। १२२ ।।
ते नराः सर्वकामांश्च प्राप्य भूमितले नृप ।
सुखमत्युग्रमैश्वर्यं भूक्त्वान्ते मोक्षभागिनः ।। १२३ ।।
सफलं जायते जन्म मानवानां च भूमिप ।
अस्यां द्वादशयात्रायां गुह्यानां तव भक्तितः ।। १२४ ।।
प्रकाशितानां भूपाल तथान्यासां च यं विधिम् ।
कथयिष्यति स ब्रह्मा तं तथैव समाचर ।। १२५ ।।

सूत उवाच

इत्युक्त्वा भगवान् विष्णुः दारुब्रह्मस्वरूपभाक् ।
तूर्ष्णी भूपोऽभवद्विप्राः कृतार्थोऽजनि भूपतिः ।। १२६ ।।
तदानीं स महीपालः स्रष्टारं प्रणिपत्य च ।
स्तुत्वा बभाषे यद्विप्रास्तदाकर्णयत स्फुटम् ।। १२७ ।।

इन्द्रद्युम्नो उवाच

ब्रह्मन् पुरा स्वयं विष्णुः सप्तधा चावतारभाक् ।
तं तथा रचय क्षिप्रमिदानीं दुःसहः प्रभुः ।। १२८ ।।
कोटिसूर्य्यप्रभो देवो मानवैर्दुर्द्धरोऽभवत् ।
कथं तमर्च्चयिष्यन्ति ब्रह्मन्नेतादृशं नराः ।। १२९ ।।
इत्युक्त्वा सहसा ब्रह्मा तेन भूपेन भो द्विजाः ।
स्पृष्ट्वा तदा करे विष्णुं वासुदेवमनुं जपन् ।। १३० ।।
पश्यतां सर्वदेवानां महर्षिणां द्विजोत्तमाः ।
मर्त्त्यानां च पुरा विष्णुः स्वयं सप्तविधोऽभवत् ।। १३१ ।।
बलभद्रं तथा भद्रां जगन्नाथं सुदर्शनम् ।
माधवं च धरां लक्ष्मीं पूर्ववत्ते द्विजोत्तमा ।। १३२ ।।
दृष्ट्वा हृष्टतरा लोका जयशब्दं च चक्रिरे ।
इन्द्रद्युम्नः स भूपालस्तदा तं तादृशं द्विजाः ।। १३३ ।।
दृष्ट्वा पुनः समस्तौषीद् विष्णुं दारुस्वरूपिणम् ।

इन्द्रद्युम्न उवाच

नमस्ते देव देवेश परमानन्दवर्धन ।। १३४ ।।
जगन्नाथः नमस्तेऽस्तु त्राहि मां शरणागतम् ।
ब्रह्मादिभिः सुरैर्योऽयमदृश्यो जगतां पतिः ।। १३५ ।।
तं साक्षात्परमानन्दं पश्यामि वरभाग्यतः ।
कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहं न संशयः ।। १३६ ।।
साक्षाल्लक्ष्मीपते नाथ तव पादाब्जदर्शनात् ।
यदाज्ञया रविर्नित्यं चन्द्रश्च भ्रमति ग्रहः ।। १३७ ।।
वाति वातः सदा तस्मै नमस्तुभ्यं नमो नमः ।
सृजत्ययं जगत्सर्वं ब्रह्मरूपेण यः प्रभुः ।। १३८ ।।

पाति विष्णुस्वरूपेण रुद्ररूपेण तत्पुनः ।
कल्पान्ते संहरत्येवं तस्मै तुभ्यं नमो नमः ।। १३९ ।।
सर्वेशं सर्वभूपं त्वां सर्वकामप्रदायिनम् ।
सर्वदुःखान्तकं वेद्यं सर्वदा त्वां नमाम्यहम् ।। १४० ।।
इति स्तुत्वा नृपश्रेष्ठस्तूष्णीं भूपोऽभवद्द्विजाः ।
तदा ब्रह्महरेरीशादाचार्य्यान् गृहधर्मिणः ।। १४१ ।।
सृष्ट्वा तान् विष्णुधर्माख्यान् तत्पूजासु नियुक्तवान् ।
अथो निजांशतः सृष्ट्वा द्विधा विप्रद्वयं पुनः ।। १४२ ।।
ब्रह्मकर्मणि युक्त्वैवमेकं च जलकार्य्यतः ।
अतो ब्रह्मा सुरान् सर्वानुवाच विजितेन्द्रियः ।। १४३ ।।
निजांशतोऽवतीर्य्याथ मनुजत्वेन भक्तितः ।
नीलाचलेशं लक्ष्मीशं यूयं सेवत तत्पराः ।। १४४ ।।
मद् द्वितीयपरार्द्धस्यासमाप्तिः क्षितिमण्डले ।
ते देवा ब्रह्मणो वाचं मानुषीं तनुमाश्रिताः ।। १४५ ।।
निजांशेनावतीर्य्याथ सेवन्ते च मुहुर्मुहुः ।
तस्मात्तेषु मनुष्येषु देवताबुद्धिमादरात् ।। १४६ ।।
कुरुध्वं द्विजशार्द्दूला नरबुद्धिं रमां क्वचित् ।
इत्युक्त्वा तान् सुरान् ब्रह्मा श्रीनीलाचलनायकम् ।। १४७ ।।
विष्णुं दारुस्वरूपं तं प्रणिपत्य मुहुर्मुहुः ।
तदग्रादागतः सर्वैर्नारदाद्यैः समं द्विजाः ।। १४८ ।।
आगत्योवास सहसा नृसिंहस्योत्तरे विधिः ।
प्रभोश्च दक्षिणे पार्श्वे महत्पुण्यविवर्द्धने ।। १४९ ।।
उषित्वा तस्य भूपस्य मुखे दृष्टिमपातयत् ।
इन्द्रद्युम्नस्ततो विप्रा ब्रह्माणं प्रणिपत्य सः ।। १५० ।।

प्राञ्जलिर्विनयात्प्राह गन्तुमिच्छुर्विधेः पदम् ।
नमस्तेऽस्तु विधे भूयो नमस्ते पद्मयोनये ।। १५१ ।।
गन्तुं त्वया समं ब्रह्मंस्तवलोकं समुत्सहे ।
इति ब्रुवन्तं तं भूपं ब्रह्मा स द्विजसत्तमाः ।। १५२ ।।
उवाच वचनं रामं शृण्वतां प्रीतिवर्द्धनम् ।
इन्द्रद्युम्नमहीपालं हरिभक्तिपरायणम् ।। १५३ ।।

ब्रह्मोवाच

हरेर्भक्तस्त्वमेवासि त्वं हि धर्मविदां वर ।
विष्णोराज्ञां समागृह्य यात्रास्ताश्च यथाक्रमम् ।। १५४ ।।
कुरुष्व नीलशैलेऽस्मिन् क्षेत्रे श्रीपुरुषोत्तमे ।
तथोपयात्रास्ता सर्वा वर्षमात्रं नृपोत्तम ।। १५५ ।।
रचयित्वा पुनस्त्वं हि गमिष्यसि हरेः पदम् ।

इन्द्रद्युम्न उवाच

चतुर्मुख नमस्तुभ्यं ब्रूहि सम्प्रति मां विभो ।। १५६ ।।
विष्णोर्द्वादशयात्राणां विधिः को वा स्मृतः प्रभो ।
तथोपयात्राः केनैव विधेया विधिनाऽब्जज ।। १५७ ।।
प्रत्यहं कीदृशी नीतिः कर्त्तव्या जगतां पतेः ।
विरलं तद् वद ब्रह्मन् यदि ते मय्यनुग्रहः ।। १५८ ।।

ब्रह्मोवाच

साधु साधु नृपश्रेष्ठ मतिस्ते विमलाजनि ।
ततो गुह्यकथामेतां श्रोतुमिच्छसि साम्प्रतम् ।। १५९ ।।
नीलाचलपतेः सौम्य प्रत्यहं यद्भविष्यति ।
तदहं त्वां ब्रवीम्याशु श्रूयतां नृपसत्तम ।। १६० ।।
प्रथमं प्रत्यहं नीतिः प्रातरारभ्य यादृशी ।
श्रूयतां तद्विधानं वै सावधानतया त्वया ।। १६१ ।।

क्षपायाः पश्चिमे यामे यथोक्तविधिना द्विजः ।
स्नातः सोऽपि जगन्नाथनिद्राभङ्गं प्रकल्पयेत् ।। १६२ ।।
स्थिते दण्डत्रये रात्र्याः शङ्खस्य निःस्वनैस्तदा ।
पुरोद्वारं द्विधा कार्य्यं ताडयित्वा शनैः शनैः ।। १६३ ।।
प्रार्थयेत् कमलाकान्तं शयानं धरणीपते ।
निद्रां मुञ्च सुरश्रेष्ठ नीलाचलपते प्रभो ।। १६४ ।।
प्रभातं साम्प्रतं जातं सप्तधा रूपभाग् भव ।
निद्राभङ्गान्महाबाहो ह्यपराधं क्षमस्व मे ।। १६५ ।।
प्रार्थयित्वेति दीपानां ज्वलनं च समाचरेत् ।
शीघ्रं पर्यङ्कहरणं न कुर्य्याच्च विलम्बतः ।। १६६ ।।
विष्णोरङ्गान् माल्यवतो बहिष्कुर्य्याच्छनैः शनैः ।
सुधौतसूक्ष्मवस्त्राभ्यां परिधानोत्तरीयके ।। १६७ ।।
रचयेज्जगदीशस्य ततो गन्धजलैर्नृप ।
क्षालयेद्देवताग्रे च ततः पीठे स पूजकः ।। १६८ ।।
उपविश्यासनं कृत्वा भूतशुद्धिमतः परम् ।
प्रणवं मातृकाद्वन्द्वं कुर्य्याच्च विधिनार्च्चकः ।। १६९ ।।
बलिपात्रस्य संस्कारं कृत्वा ह्यावाहनादिकम् ।
कुर्य्याद् विधिवदाचार्य्यस्ततः कर्पूरवारिणा ।। १७० ।।
मनसा देवदेवस्य मुखं नेत्रे च मार्जयेत् ।
मूलमन्त्रेण भो राजंस्ततः शुद्धजलैः पुनः ।। १७१ ।।
वौषडित्येव मनुना गण्डूषान् रविसंख्यकान् ।
दद्याद्देवमुखं पश्चादाचार्य्यो भक्तितत्परः ।। १७२ ।।
दन्तकाष्ठस्य संस्कारं प्रणवेन विधाय सः ।
कवचेनाथ धृत्वा तत्स्वाहेति दन्तघर्षणम् ।। १७३ ।।

ततो गड्डूषनिचयं दत्त्वाथ नृपसत्तमः ।
हेम्ना वा रजतेनापि जिह्वोल्लेखनकर्म तत् ।। १७४ ।।
कृत्वा तथैव गण्डुषान् दद्यादाचार्य्य एव सः ।
घृतैर्मधुशिताभ्यां च पयसा च सुमन्थिते ।। १७५ ।।
युते दध्नि परिष्कृत्य वीक्षणादिककर्मणा ।
ततस्तैर्वैदिकैर्मन्त्रैर्दधिक्रावणसंज्ञकैः ।। १७६ ।।
प्रतिविम्बे जगद्भर्त्तुः स्नानं कुर्य्याद्विचक्षणः ।
पुनः कर्पूरगन्धाद्यैः पुष्पैरेव सुवासितैः ।। १७७ ।।
अन्यैः सुभासितद्रव्यैर्युतैर्नीरैस्तथा हरेः ।
वस्त्रपूतैस्तथा भूप विधिवत्संस्कृतैः पुनः ।। १७८ ।।
प्रतिविम्बे तदा दत्त्वा किंचिदामलकद्रवम् ।
समुद्रज्येष्ठामन्त्रेण स्नानं कुर्य्यात्प्रयत्नतः ।। १७९ ।।
मूलमन्त्रमुच्चार्यस्वं धात्वा रूपं हरेः परम् ।
शुद्धसूक्ष्माम्बरं धृत्वा मार्जयेत्तत्र भूपते ।। १८० ।।
वाजपेयाश्वमेधादिक्रतूनां यत्फलं स्मृतम् ।
तत्फलं नृपते तत्स्याद् विधिनानेन साम्प्रतम् ।। १८१ ।।
भक्तियुक्ताश्च ये मर्त्त्याः जगन्नाथस्य भूपते ।
प्रातः स्नानं च पश्यन्ति गमिष्यन्ति पदं हरेः ।। १८२ ।।
पदे पदेऽश्वमेधानां फलं तेषां सुदुर्ल्लभम् ।
गच्छन्ति भक्त्या ये मर्त्त्या हरेः स्नानावलोकने ।। १८३ ।।
तेषां नास्ति महीपाल गर्भवासः कदाचन ।
संसारबन्धनान्मुक्तिर्जायते नात्र संशयः ।। १८४ ।।
सूर्य्योदये यदा विष्णोरङ्गे माल्याम्बरादि यत् ।
तत्सर्वं कण्टकप्रायं शल्यप्रायं च मन्यते ।। १८५ ।।

महाक्रोधो यदा विष्णुस्तदा भवति तेन वै ।
क्रोधे विष्णोः समुत्पन्ने राजादुःखी गतासुकः ।। १८६ ।।
वंशास्तदीया नश्यन्ति न चैवान्तः प्रतिष्ठिताः ।
ततोऽतिभक्तिसंयुक्तः कदा प्रीतोऽपि नो भवेत् ।। १८७ ।।
ततः प्रतिदिनं त्वं हि राजन् देवार्च्चने सदा ।
सावधानो भव तावद् यावन्नीतिः समाप्यते ।। १८८ ।।
तस्य श्रीकमलासनस्य वचनं नानाघसंमोचनं ।
साधूनां हृदयाभितोषरचनं चञ्चज्जगत्पावनम् ।
विष्णोः स्नानविधानकर्म तरसा संसारसारं नृपः
श्रुत्वा पङ्कजसम्भवं पुनरसौ पप्रच्छ पूजाविधिम् ।। १८९ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये षष्ठोऽध्यायः ।।

सप्तमोऽध्यायः

सूत उवाच

इन्द्रद्युम्नवचः श्रुत्वा तादृशं स प्रजापतिः ।
प्रातः पूजाविधिं विष्णोरुवाच द्विजसत्तमाः ।। १ ।।

ब्रह्मोवाच

विष्णोस्त्रिकालपूजायाः विधिं शृणु नृपोत्तम ।
गुह्याद्गुह्यतरं विष्णोरतिप्रीतिकरं सदा ।। २ ।।
मन्त्रराजेन चेत्पूजा तदा स्याच्छतसंख्यकैः ।
उपचारैर्यथा कुर्यात्कतमः कथयामि तत् ।। ३ ।।

स्नानानन्तरतः कुर्यादर्च्चनं कमलापतेः ।
आदौ तण्डुलमुद्गानां नारिकेलफलैर्यवैः ।। ४ ।।
शर्कराभिश्च रम्भाणां फलैः कन्दैरनुत्तमैः ।
नारिकेलैश्च जीरैश्च मरिचैर्जातिकाफलैः ।। ५ ।।
लवङ्गैः सहितानां च पक्वानां शतपिण्डकान् ।
कृत्वा शर्करसंसिक्तान्नारीकेलघृतैर्नृप ।। ६ ।।
पुनर्जर्जरितान् कृत्वा शतपिण्डान् हरेः पुरः ।
स्थापयेदथ देवानां पञ्चानां शतपञ्चकम् ।। ७ ।।
लक्ष्म्यर्थं दशकं तावत्क्रमात्संस्थापयेन्नृपः ।
मन्त्रराजेन द्वात्रिंशदक्षरेण च देशिकः ।। ८ ।।
बलभद्रं च संपूज्य शतसंख्योपचारकैः ।
द्वात्रिशदक्षरेणाथ मन्त्रराजेन तं हरिम् ।। ९ ।।
पूजयेदुपचारैस्तैस्तन्नैवेद्यं समर्पयेत् ।
भूवनेश्वरीमन्त्रेण द्वादशाक्षरसंभृता ।। १० ।।
भद्रां भद्रपदं भक्त्या पूजयेदवनीश्वर ।
त्रयोदशाक्षरेणाथ मन्त्रेण च सुदर्शनम् ।। ११ ।।
सुदर्शनाभिधेनाशु पूजयेच्च यथाविधि ।
लक्ष्मीमन्त्रेण राजेन्द्र चतुरक्षरसंभृता ।। १२ ।।
श्रियं समर्चयेन्नित्यं भक्तिभावसमन्वितः ।
एतैर्मन्त्रैश्चरेत्पूजां शतसंख्योपचारतः ।। १३ ।।
कर्त्तव्यमेवं नैवेद्यं त्रिषु कालेषु सत्तमा ।
ततो व्यतिक्रमः स्याच्चेदपराधो भवेन्नृप ।। १४ ।।
जगन्नाथस्य सन्तोषो न भवेद्विधिहीनतः ।
पूजा च विफला जाता क्षीणायुर्नृपतिर्भवेत् ।। १५ ।।

अकाले च यदा पूजा तदैवं जायते ध्रुवम् ।
यथाकालेऽर्चितो विष्णुः प्रीतो भवति तत्क्षणम् ।। १६ ।।
नृसिंहमन्त्रराजेन जगन्नाथं यथा नृप ।
न पूजयेदशक्तस्तु तदा गोपालमन्त्रतः ।। १७ ।।
दशाक्षरेण मन्त्रेणाभावे चाष्टादशाक्षरे ।
बलभद्रं वासुदेवं द्वादशाक्षरमन्त्रतः ।। १८ ।।
सुभद्रां नृपतिश्रेष्ठ भुवनेश्वरीमन्त्रतः ।
एकाक्षरेण विधिवत्पूजयेच्छुद्धमानसः ।। १९ ।।
सुदर्शनस्य मनुना सप्ताण्र्णेन सुदर्शनम् ।
लक्ष्म्येकाक्षरमन्त्रेण श्रियं च पूजयेन्नृप ।। २० ।।
माधवस्य च देवस्य जगन्नाथस्य सांप्रतम् ।
विश्वधात्र्या महालक्ष्म्या भेदो नास्ति कदाचन ।। २१ ।।
तस्मान्माधवदेवस्य विश्वधात्र्याः क्षितीश्वर ।
न पूजनं पृथक्कार्य्यमतो धैर्य्यवतां वर ।। २२ ।।
अन्येषूत्सवकार्य्येषु तयोः कुर्य्यात्समर्च्चनम् ।
अथ विष्णोः पाकशालानीतिं शृणु नृपोत्तम ।। २३ ।।
यत्रान्नपाचिका लक्ष्मीः भुंक्ते यत्र जगत्पतिः ।
तत्रैवं यो विधिः कार्य्यस्तमाकर्णय भूपते ।। २४ ।।
नित्यक्रियां समाचर्य गत्वाचार्यः सुसंयतः ।
पाकशालां समागत्य धौतपादकरः शुचिः ।। २५ ।।
वैष्णवाचमनं कृत्वा सुधौते पाकमन्दिरे ।
प्रविशेत् पाकशालायां सूपकारजनैः सह ।। २६ ।।
सम्यक् धौतमिति ज्ञात्वाचार्य्यस्तत्र विधानतः ।
होमं कृत्वा प्रयत्नेन ततो पाकं समाचरेत् ।। २७ ।।

एवं च प्रत्यहं कार्य्यमाचार्य्येण विशांपते ।
यदि किञ्चित्पूर्वपाकस्यान्नादिककणं क्वचित् ।। २८ ।।
प्रमादात्तत्र चेत्पाको विष्णुर्ग्राह्यो भवेन्नहि ।
तत्राधिकारिणः सर्वे पूजकोऽपि नृपोऽपि च ।। २९ ।।
पच्यन्ते नरके घोरे सदा क्रोधाग्निना हरेः ।
तस्मात्पाकगृहं तावत्क्षालयेद् यत्नतो नृप ।। ३० ।।
अज्ञाते यदि पाकः स्यात्पाकान्ते पूर्वपाकतः ।
अवशिष्टे पुनर्ज्ञाते तत्सर्वं च बहिः क्षिपेत् ।। ३१ ।।
कदाचिद्विष्णवे दद्यान्न लोभान्नृपसत्तम ।
पुनर्धौत्वा तथा हुत्वा नवपाकं समाचरेत् ।। ३२ ।।
एवं प्रतिदिनं कृत्वा विष्णोः पाकमरिन्दम ।
गोधूमचूर्णकैर्हस्तप्रमाणं स्थण्डिलं ततः ।। ३३ ।।
अभावे तण्डुलैस्तावत्कुर्य्यादाचार्य्य एव सः ।
विधिना वैष्णवाग्नौ च होमं कृत्वा प्रयत्नतः ।। ३४ ।।
चरुभिर्वैश्वदेवं च कुर्य्यादेवं दिने दिने ।
चरुहोमं वदेत्पाकः कर्त्तव्यश्चेति पावकम् ।। ३५ ।।
आचार्य्यस्तं पुनर्ब्रूयात्सम्यक्पाकं कुरु द्विजः ।
आचार्य्यस्य वचः श्रुत्वा चरुहोता सुसंयतः ।। ३६ ।।
कुर्य्यात्पाकं मनोरम्यं जगद्भर्त्तुर्मुदे तदा ।
आदौ प्रणवमुच्चार्य्य ततः पात्राणि धौतयेत् ।। ३७ ।।
स्मृत्वा मन्मथबीजं तु पात्रेषु जलपूरणम् ।
दशाक्षरेण मन्त्रेण क्षिपेच्च तण्डुलादिकम् ।। ३८ ।।
लक्ष्मीबीजमथ स्मृत्वा कुर्य्यात्पात्रावरोहणम् ।
विष्णोर्नामानि संकीर्त्त्य पूपादीन् पाचयेद् द्विजः ।। ३८ ।।

नित्यस्नानान्तरं विष्णोराचार्य्यः पाकमन्दिरे ।
एवं विधिं विधायासौ प्रत्यहं नृपसत्तम ।। ४० ।।
चरुहोतारमित्युक्त्वा पाककर्मणि योजयेत् ।
अन्यथा चेद् वृथा पाकः पूजां तां हरिरेव सः ।। ४१ ।।
न गृह्णाति नृपश्रेष्ठ दैत्यग्राह्या च सा भवेत् ।
राजा राष्ट्रं च संनश्येत् पूजा च विफला भवेत् ।। ४२ ।।
विष्णुद्रोही च नृपतिर्निरये प्रतिपद्यते ।
इत्थं न पाकनिष्पत्तिं कुर्य्यादार्य्यवर प्रभोः ।। ४३ ।।
तस्मात्त्वं सावधानोऽत्र भवितासि नृपोत्तम ।
होमाभावे यदा पाको जायते दैवयोगतः ।। ४४ ।।
तत्सर्वं दीर्घखातेषु पातनीयं प्रयत्नतः ।
पुनः पाकगृहं धौतं कर्त्तव्यमतियत्नतः ।। ४५ ।।
विधिना विहिते होमे पाकं कुर्य्याद् यथाविधि ।
उत्सवेषु च तद्विष्णोः स्नानात् प्राग् विजितेन्द्रियः ।। ४६ ।।
पाकालये कृते होमे पाकः स्यादतिनिर्मलः ।
यदा स्वयं तदा विष्णुः प्रीतः स्यादवनीधव ।। ४७ ।।
इत्थं च पाकनिष्पत्तिं कुर्य्यादार्य्यवर प्रभो ।
उत्सवव्यतिरेकेण विष्णोः स्नानात्पुरा नृप ।। ४८ ।।
न कारयेत्पाकगृहे होमं पाकं कदाचन ।
बलात्कारेण चेत्पाको न प्रीतो जगतांपति ।। ४९ ।।
इति पाकालयस्यास्य निर्ण्णयं कथितं नृप ।
प्रासादस्याग्निकोणेऽपि कर्त्तव्या सुदृढा हरेः ।। ५० ।।
पाकशाला मनोज्ञा च पिञ्जरीव महायतिः ।
लसत्समीपकूपा सा बद्धा जालकुलैर्दृढम् ।। ५१ ।।

उत्तरे पाकशालायाः कुर्य्यात्पाकमहोदयम् ।
न विशेयुर्यथा शूद्रास्ततो यत्नं महत् कुरु ।। ५२ ।।
पाककर्मणि यो मर्त्योऽधिकारी तं जनं विना ।
न लङ्घयेत् कोऽपि विष्णोः पाकमन्दिरदेहलीम् ।। ५३ ।।
यतिनो ब्राह्मणाश्चैव संन्यासी ब्रह्मचारिणः ।
वानप्रस्थाश्च शूद्राश्च ये केचिच्च तथान्त्यजाः ।। ५४ ।।
न केऽपि पाकशालां वै गच्छेयुश्च नरेश्वर ।
सावधानो भवान् भूत्वा पालयेत्पाकमन्दिरम् ।। ५५ ।।
यदा दैवात्पाकशालां यत्याद्याश्च विशन्ति वै ।
तदा तद्द्रव्यनिकरं दीर्घखातेषु पातयेत् ।। ५६ ।।
विष्णोश्च पाकशालायां विकृतिश्चैकदेशतः ।
जायते यदि तद्द्रव्यनिचयं निक्षिपेन्नृप ।। ५७ ।।
पुनः शालाप्रतिष्ठां च कृत्वा होमं च कारयेत् ।
ततः पाको भवेत्तत्र सावधानो भवान् भवेत् ।। ५८ ।।
यत्पात्रे नखराः केशाः कृमयः कीटयोनयः ।
विद्यन्ते च तदा तत्तु पातयेन्नृपसत्तम ।। ५९ ।।
शम्बुकाश्च कपर्दाश्च यदा पात्रे स्थिताः क्वचित् ।
द्रव्याण्यपि च सर्वाणि विष्णवयोग्यानि पातयेत् ।। ६० ।।
दीर्घखाते ततो राजन् कुर्य्याच्छालापरिष्कृतिम् ।
यत्र स्थाने च यद्द्रव्ये वैगुण्यं यदि जायते ।। ६१ ।।
तद्विष्णवे न देयं स्याद्दद्याच्चेन्निष्फलं भवेत् ।
च्छेदनं पेषणं चैव चूर्ण्णनं भञ्जनं तथा ।। ६२ ।।
मीलनं जलसंयोगे कुट्टनं यद्विधीयते ।
द्रव्याणां विविधानां च तत्कुर्य्यात्पाकमन्दिरे ।। ६३ ।।

अन्यत्र तु न कर्त्तव्यं न कर्त्तव्यं कदाचन ।
तत्सर्वं नृपतिश्रेष्ठ न देयं विष्णवे कदा ।। ६४ ।।
अन्यत्र च्छेदनादींश्च न नयेत्पाकमन्दिरम् ।
नियमेन भवेद्दोषः सावधानो भवेदतः ।। ६५ ।।
कृष्णवर्ण्णानि पात्राणि न नयेत्पाकमन्दिरम् ।
सकण्टकानि वज्राणि क्षीरयुक्तानि वा नृप ।। ६६ ।।
न कर्त्तव्यानि पाकार्थमिन्धनानि जगत्पतेः ।
दृढानि शुष्कसत्वानि श्लक्ष्णानि कारयेद्बुधः ।। ६७ ।।
हरिणोच्चतया चुल्ली कर्त्तव्या तद्विचक्षणैः ।
एवं च पाकनिष्पत्तिः कर्त्तव्या कमलापतेः ।। ६८ ।।
प्रातःकाले ततः प्राज्ञः पूजां च द्विविधां चरेत् ।
पुनः पञ्चोपचारैश्च देवेशं पूजयेत्सुधीः ।। ६९ ।।
पयोविकारं नैवेद्यं तथा लाजाविकारजम् ।
शितानां नारिकेलानां विकारमयमुत्तमम् ।। ७० ।।
नव्यगव्यघृतैः सिक्तं दद्यान्नीलाचलेश्वरम् ।
प्रातः पूजनसङ्गे वा पूजयेद्वा पृथङ्नृप ।। ७१ ।।
प्रातश्चतुर्विंशतिभिरुपचारैर्मनोहरैः ।
पूजा स्याज्जगदीशस्य यैस्तान् शृणु महीपते ।। ७२ ।।
आसनं प्रथमं दद्यात्ततः स्वागतमुत्तमम् ।
पाद्यमर्घ्यं च भूपाल तथैवाचमनं पुनः ।। ७३ ।।
मधुपर्कं ततो दद्यात्पुनराचमनं शुभम् ।
स्नानं च वसनं स्फीतं तथा यज्ञोपवीतकम् ।। ७४ ।।
उत्तरीयं ततो भूषां गन्धपुष्पे ततः क्रमात् ।
तथा धूपं च दीपं च दद्यात्तस्मै मुरारये ।। ७५ ।।

पुनः पाद्याचमौ दद्यात्ततो नैवेद्यमादरात् ।
आपोशानं ततो भूप मुखे नीराजनार्पणम् ।। ७६ ।।
ततः स्तुतिं समाचर्य्य पुनः कर्पूरवर्त्तिभिः ।
नीराजनं ततः कुर्य्यात्सप्तावृत्त्या च देशिकः ।। ७७ ।।
ततस्ताम्बूलदानं स्यात्प्रसन्नार्च्चां ततश्चरेत् ।
चन्दनादिप्रदीपान्तैस्ततो दूर्वाक्षतार्पणम् ।। ७८ ।।
एवं यजेद्देवदेवं त्रिषु कालेषु सत्तमः ।
अथ पूजास्थानशुद्धिं श्रृणु भूप समाहितः ।। ७९ ।।
सुवासितैः शुद्धजलैः क्षालयेद्देवतापुरः ।
चारुतण्डुलचूर्ण्णेन मेखलात्रितयं लिखेत् ।। ८० ।।
हस्तत्रयप्रमाणेन शोभनं देवताग्रतः ।
आचार्यः सहसा कुर्य्याद्द्विहस्तां मेखलां पुनः ।। ८१ ।।
अग्रे सुदर्शनार्थं च ततो लक्ष्म्यर्थमाचरेत् ।
जगन्नाथस्य पङ्क्त्यन्ते हस्तमात्रं च मेखलाम् ।। ८२ ।।
एवं पञ्चविधं स्थानं कर्त्तव्यं भो नरेश्वर ।
तत्र तत्र पदे रम्यं पृथग्रम्भादलं क्षिपेत् ।। ८३ ।।
पात्राणामुपरि क्षिप्तं पृथक् चीनांशुकं क्षिपेत् ।
सौवर्ण्णं राजतं वापि पित्तलस्य च वा पुनः ।। ८४ ।।
पात्रं तत्रापि संस्थाप्य दीपान् प्रज्वालयेत्पुरः ।
उच्चैः स्थाने च रचयेद्भूप गव्यघृतान्वितान् ।। ८५ ।।
आचार्य्यः कथयेत्तत्र प्रतिहारांस्ततः परम् ।
आनयध्वं च नैवेद्यं पाकमन्दिरदेशतः ।। ८६ ।।
आचार्य्यादेशतस्तावत् प्रतिहाराश्च सत्त्वराः ।
पाकशालां समागत्य वदेयुः पाककारकान् ।। ८७ ।।

प्रातः पूजोचितं तावन्नैवेद्यं च समानय ।
इत्येवं ते वदेयुस्तान् जगदीशकृते नृप ।। ८८ ।।
प्रतिहारवचः श्रुत्वा चरुहोता जवान्मुखम् ।
वस्त्रेणाच्छाद्य हस्तौ च पादौ प्रक्षाल्य यत्नतः ।। ८९ ।।
सम्यगाचम्य तद्विष्णोः स्मरणं कृतवान् पुनः ।
वस्त्रावृत्तं दिव्यभोगं गृहीत्वा देवसन्निधिम् ।। ९० ।।
नातिवेगेन मन्देन सधीरं स समानयेत् ।
पार्श्वयोरुभयोरेतैः प्रतिहारैश्च गर्जितैः ।। ९१ ।।
नीत्वा भोगं पङ्क्तिमध्ये स्थापयेच्च पृथक्पृथक् ।
लक्ष्मीपतेः सुखार्थं च श्रद्धां भक्तिं वहन्हृदि ।। ९२ ।।
माषसम्बन्धिकं पूपं खेचरान्नं मनोरमम् ।
घृतजर्जरितं भूप शर्करान्नं तथैव च ।। ९३ ।।
माषाणां तण्डुलानां च पृथक् पूपं महोदयम् ।
उभयोः परिसंयोगाच्चान्यत्पूपं नृपोत्तम ।। ९४ ।।
हिङ्गुजीरकसज्जातिफलार्द्रकलवङ्गकैः ।
नारिकेलफलैस्तावल्लवणेन च रञ्जितम् ।। ९५ ।।
नव्यगव्यघृतैः पक्वं पूपं नानाविधं बहु ।
मनोहरं प्रकुर्य्याद्वै सुवासितजलं पुनः ।। ९६ ।।
एवं बहुविधं भोगं स्थापयेत्तत्र तत्र सः ।
अथेरितं पात्रहोता धौतपादकरः शुचिः ।। ९७ ।।
आचार्य्यो वैष्णवागम्यो धौतशुक्लोत्तरीयकः ।
परिधाप्यांशुकं शुद्धं शुक्लं पूजार्थमाचरेत् ।। ९८ ।।
कुण्डलीमुद्रिकायुक्तः कृतोर्ध्वपुण्ड्रकस्तथा ।
शङ्खचक्राङ्कितः श्रीमान् पूजागारे विशेदसौ ।। ९९ ।।

भैरवं प्रार्थयेत्पूर्वमेकवारं नमेद्धरिम् ।
ततः प्रदक्षिणं कृत्वा प्रार्थयेत्परमेश्वरम् ।। १०० ।।
संप्रार्थ्य कमलाकान्तं चेलासनवरे वसन् ।
सिंहासनोपरि श्रेष्ठे स्वस्तिकासनतां दधत् ।। १०१ ।।
उत्तराभिमुखः प्राज्ञो वारिणा च सुगन्धिना ।
सिंहासनं प्रथमतो धौतं कृत्वा स पूजकः ।। १०२ ।।
स्वस्थचित्तो भवेत्तस्मै पात्रहोता ददौ पुनः ।
पूजापात्राणि धौतानि ततः पूजकदक्षिणे ।। १०३ ।।
जलपात्रं करे धृत्वा ब्रह्मासौ सत्कमण्डलुम् ।
चिन्तयित्वा तदुदकमाचार्य्याय निवेदयेत् ।। १०४ ।।
पूजावसानपर्य्यन्तं तिष्ठेत् पूजकसन्निधौ ।
ब्रह्माप्याचार्य्यवचनं कुर्य्यादार्य्यजनोचितम् ।। १०५ ।।
ततोऽर्चकः सावधानो विधिवत्पूजयेद्विभुम् ।
नैवेद्यद्रव्यनिचयं स्थापयेन्मण्डलेषु च ।। १०६ ।।
न बाह्ये मण्डलानां च स्थापनीयं कदाचन ।
यदा बाह्ये स्थितं दैवं नैवेद्यं मण्डलस्य च ।। १०७ ।।
बहिष्कुर्य्यादन्यथा चेद्भोज्यं तद्रक्षसादिभिः ।
भोगस्थापनकालेऽपि मुखं लपति चेत्पुनः ।। १०८ ।।
पादेन लेपनं वापि नैवेद्योपरिभाषणम् ।
यवनीयकथा जाता नैवेद्यनिकटे तदा ।। १०९ ।।
तन्नैवेद्यं बहिष्कृत्य दीर्घखाते निपातयेत् ।
पङ्क्ति पङ्क्ति न लग्नं च स्थापयेच्च पृथक्पृथक् ।। ११० ।।
नैवेद्योपरि नैवेद्यं स्थापनीयं न वै नृप ।
पूजाकर्मणि यद्द्रव्यमपेक्ष्यं स्यादतन्द्रितः ।। १११ ।।
पात्रहोता च तद्दद्यात्सावधानतया स्थितः
आचार्य्येण यदुक्तं स्यात्तत्कर्त्तव्यं च सादरम् ।। ११२ ।।

चरुहोत्रा ब्रह्मणा च पात्रहोताऽन्यसेवकैः ।
तत्राधिकारिभिः सर्वैः कर्त्तव्यं पूजनेरितम् ।। ११३ ।।
पञ्चरात्रविधानेन पूजयेदर्चकः शुचिः ।
अभावे वैदिकैर्मन्त्रैः स्तोत्रैः संपूजयेद्धरिम् ।। ११४ ।।
परमेशस्य पुरतश्छत्रं चामरसञ्चयम् ।
घृत्वा च व्यजनं त्रासं धारयेद्भक्तिभावतः ।। ११५ ।।
शङ्खानां निःस्वनं तावन्मधुरीनिःस्वनं तथा ।
काहालवीणानिलयं कारयेत्तालनिःस्वनम् ।। ११६ ।।
घण्टामर्द्दलयोः रावः पूजायां प्रत्यहं नृप ।
पूजावसानपर्य्यन्तमेवं स्यान्नृत्यगीतके ।। ११७ ।।
एवं महोत्सवं कुर्य्यात्पूजायां च रमापते ।
विधिमेतादृशं कर्त्तुं नो शक्यं चेद्यथा नृप ।। ११८ ।।
तदा प्रतिनिधिं कुर्य्याद्विप्रं किञ्चित्सुधार्मिकम् ।
तव प्रतिनिधिः सोऽयं सर्वशास्त्रार्थतत्त्ववित् ।। ११९ ।।
स्वर्ण्णदण्डधरः श्रीमान् कारयेत्पूजनं हरेः ।
जगदीशाग्रतः स्थित्वा परं तद्भक्तितत्परः ।। १२० ।।
अन्वेषणं च पूजायाः कुर्य्याद्भक्त्या नृपोत्तम ।
आचार्य्येण यदुक्तं स्यात्कुर्य्यात् प्रतिनिधिः स्वयम् ।। १२१ ।।
त्वं साक्षाज्जगदीशोऽयमिति मत्वा च पूजनम् ।
तद्भाषणे सावधानस्तव प्रतिनिधिः पुमान् ।। १२२ ।।
जगन्नाथे सुरश्रेष्ठे भक्तिं ज्ञात्वा सदादरात् ।
पूजावसानपर्य्यन्तमग्रे तिष्ठेज्जनैः सह ।। १२३ ।।
एवं प्रतिदिनं पूजां त्रिकालं कारयेद्धरेः ।
अधिकारं विना कश्चिन्न विशेत्पूजनालयम् ।। १२४ ।।
पूजालयस्य पुरतस्त्वेकमालयमादरात् ।
निरोधयेत्पुरं धीमान् पूजाकाले श्रियः पतेः ।। १२५ ।।

द्वारपालैस्तदा सम्यग्जागरुकतया स्थितः ।
पूजायाः समये यावद् यतिश्च ब्राह्मणोऽपि वा ।। १२६ ।।
अन्ये केचिद्विशेयुश्चेत्तद्भोगंतु बहिः क्षिपेत् ।
पुनः स्नानं समाचर्य्य पूजकस्तत्परः शुचिः ।। १२७ ।।
तदालयं जलैर्धौतं स्थापयेत्परमेश्वरम् ।
नानाविधैश्च नैवेद्यैस्तोषयेत्कमलापतिम् ।। १२८ ।।
यदा लोभाच्च सा पूजा कार्य्याचार्य्येण भो नृप ।
नैवेद्यं तत्र तत्सर्वं दैत्यभोग्यं न संशयः ।। १२९ ।।
आचार्य्यः सोऽपि दैत्यः स्याद्दिव्यं वर्षशतं भ्रमन् ।
तन्नैवेद्यं जगन्नाथं प्रति दत्तं यदा नृप ।। १३० ।।
राज्ञा तद्दोषतो विष्णोर्द्रोहकर्मसमर्जितम् ।
पुत्रदारैर्विहीनस्तु स राजा दुःखितो भवेत् ।। १३१ ।।
नरकं प्रतिपद्येत परत्र परिदुस्तरम् ।
अतोऽपराधिनां दण्डं कुर्य्याच्छास्त्रोक्ततो नृप ।। १३२ ।।
प्रातः पूजा जगद्बन्धोरेवं च नृपसत्तम ।
यदुक्तं विधिना तत्तत् कार्य्यं तु सुसमाहितम् ।। १३३ ।।

सूत उवाच

ये मर्त्याः प्रतिवासरं भगवतो लक्ष्मीपतेः सादरं
प्रातः पूजनकर्म तद् विधियुतं शर्मप्रदं भो द्विजाः ।
वीक्ष्यन्ते क्षितिमण्डले भृशतरं शृण्वन्ति जल्पन्ति वा
ते नूनं भवसागरं द्रुततरं संतीर्य्य विष्णोः प्रियाः ।। १३४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये सप्तमोऽध्यायः ।।

अष्टमोऽध्यायः

इन्द्रद्युम्नस्तदा भूपो यथाविधि विधेर्मुखात् ।
प्रातःपूजां समाकर्ण्य कृतार्थोऽभूद्द्विजोत्तमाः ।। १ ।।
ततो मध्याह्नपूजाया विधिं पप्रच्छ सद्विधिम् ।
भक्तानां प्रवरो यस्मात्सोऽयं नृपशिरोमणिः ।। २ ।।

इन्द्रद्युम्न उवाच

तव प्रसादाद्भो ब्रह्मन् प्रातः पूजा मया श्रुता ।
मध्यमार्च्चा यथा विष्णोस्तथा त्वं वद तत्त्वतः ।। ३ ।।
नीलाचलपतेः सम्यक् मध्याह्नपूजनं हरेः ।
कीदृशं तद्विधिः को वा कथयाशु महामते ।। ४ ।।
इति तस्य वचः श्रुत्वा प्रजापतिरसौ द्विजाः ।
ज्ञात्वा भक्तिं दृढां विष्णौ तदा तद् वक्तुमारभेत् ।। ५ ।।

ब्रह्मोवाच

अथ मध्याह्नपूजायाः विधिं शृणु नृपोत्तम ।
समासतः प्रवक्ष्यामि नीलाचलपतेः हरेः ।। ६ ।।
ततो मध्याह्नसमये माल्यवस्त्रादिकं शनैः ।
विष्णोरङ्गाद्बहिष्कृत्य पूर्ववद्भूषयेत्पुनः ।। ७ ।।
पूर्ववत् स्नानसंस्कारः यथाविधि विधाय च ।
प्रतिहारेरितो होता चरूणां पूर्ववच्चरन् ।। ८ ।।
मध्याह्नयोगं नैवेद्यं पूर्ववत् स्थापयेत् पुनः ।
प्रथमं दिव्यमन्नं च घृतैर्जर्जरमुत्तमम् ।। ९ ।।
लवणेन युतं स्फीतं मुद्गव्यञ्जनसंयुतम् ।
शाल्यन्नं च नृपश्रेष्ठ नानाव्यञ्जनसंयुतम् ।। १० ।।
नानाविधं मनोरम्यं घृतपाचितमुत्तमम् ।
पूपोत्करं तथा दुग्धं कर्पूरद्रवसंयुतम् ।। ११ ।।

पयोविकारं नृपते शर्कराक्षोदजर्ज्जरम् ।
एतादृशं हृषीकेशं नैवेद्यं च समर्पयेत् ।। १२ ।।
उपचारैस्तथा शङ्खैः पूर्ववत्पूजयेद्हरिम् ।
महोत्सवं तथा कुर्य्यात्पूर्ववत्पुरतो हरेः ।। १३ ।।
पूजासमयदत्तानि माल्यवस्त्राणि भूपते ।
पूजान्ते च बहिष्कुर्य्यान्मन्दं मन्दं हरेस्तनोः ।। १४ ।।
पुनर्गात्राणि तद्विष्णोर्माल्यवस्त्रैश्च भूषयेत् ।
ततः स्तुत्वा जगन्नाथं चतुर्वर्गप्रदायकम् ।। १५ ।।
दिव्यपर्य्यङ्कतल्पेषु पृथक्सुस्वापयेद्बुधः ।
आरात्रिकवर्त्तिकाभिः पिष्टस्य च समाचरेत् ।। १६ ।।
जगन्नाथस्य सुस्वापं ततः कुर्य्याद् विचक्षणः ।
दीपस्य निर्वाणं कृत्वा कपाटादानमाचरेत् ।। १७ ।।
एवं हरेः स्वापनं च कर्त्तव्यं प्रत्यहं मुदा ।
संध्यायाः पूर्वतो दण्डे स्थिते तद्द्वारमोचनम् ।। १८ ।।
पर्य्यङ्कतल्पाहरणं दीपानां ज्वलनं तथा ।
तत्राधिकारिभिः सर्वैः सेवकैः कार्य्यमादरात् ।। १९ ।।
ततः सांध्यादिकं कर्म कृत्वाचार्य्यः सुसंयतः ।
सन्ध्यायां पूजयेद्भक्त्या पुर्ववन्नृपसत्तम ।। २० ।।
संध्यार्चने क्षालितान्नं सदध्यार्द्रकजीरकम् ।
लवणेन युतं शीतं दद्याद्दैत्यारये मुदा ।। २१ ।।
शाकं घृतादिभिर्युक्तं मञ्जुलाम्लरसं तथा ।
अन्नं नानाविधं पूपं घृतपक्वमनुत्तमम् ।। २२ ।।
चूर्णीभूतसितायुक्तं केशवाय प्रयच्छयेत् ।
रात्रौ क्षालितमन्नं च शाकाम्लव्यञ्जनाञ्चितम् ।। २३ ।।

नानावर्ण्णं च पूपं च देयं कृष्णाय नोष्म तत् ।
तप्तान्नदाने सन्ध्यायां न प्रीतोऽपि कदा प्रभुः ।। २४ ।।
तस्मान्न देयं तप्तान्नं नक्तं वै विष्णवे नृप ।
एवं त्रिकालपूजां च कुर्य्याद्विष्णोः परात्मनः ।। २५ ।।
यत्र यत्र च पूजायां यादृशी भावना भवेत् ।
यद्वक्तव्यं नृपश्रेष्ठ मत्तः शृणु समाहितः ।। २६ ।।
प्रातः काले प्रथमतः श्रीवृन्दावनभावनाम् ।
तत्रस्थं केशवं ध्यायेद् बालरूपिणमव्ययम् ।। २७ ।।
मध्याह्नपूजने विष्णुं तं कैशोरदशान्वितम् ।
श्रीवृन्दावनगं ध्यायेत्कोटिकन्दर्पसुन्दरम् ।। २८ ।।
सायाह्ने द्वारवत्यां च स्थितं वै मुरवैरिणम् ।
रुक्मिणीसत्यभामादि प्रेमोल्लासकरं हरिम् ।। २९ ।।
ध्यायेत्तथा पूजकोऽसौ त्रिषु कालेषु सत्तम ।
पूजनानन्तरं श्रीशं प्रतिदद्यादनुत्तमम् ।। ३० ।।
ताम्बूलं चान्यथा देवः प्रीतोऽयं न भवेत्प्रभुः ।
प्रातर्मध्याह्नयोर्भूप कर्पूरोल्लासिवर्त्तिभिः ।। ३१ ।।
नीराजनं च कर्त्तव्यं सप्तवर्त्त्या तथा त्रिषु ।
सायाह्नेऽपि तथा कुर्य्यादाचार्य्यः कार्य्यकोविदः ।। ३२ ।।
अधिकं पिष्टकवर्त्त्या नीराजनमथाचरेत् ।
महानीराजनं राजन् रुक्मपात्रे तथा चरेत् ।। ३३ ।।
एवं चतुर्विधं विष्णोर्नीराजनमकल्मषम् ।
एवं त्रिकालपूजां यो भक्तिश्रद्धान्वितो नृपः ।। ३४ ।।
कारयेद्वै सदा विष्णोर्ब्राह्मणैर्ब्रह्मवादिभिः ।
फलं तस्य प्रवक्ष्यामि शृणु मत्तो जनेश्वर ।। ३५ ।।

वाजिमेधसहस्रस्य लक्षगोदानकस्य च ।
रथदानायतस्यास्य लक्षदानस्य यत्फलम् ।। ३६ ।।
तत्फलं समवाप्नोति जगदीशार्चनान्नृप ।
कोटिकल्पनिवासं च प्राप्नुयाद्विष्णुमन्दिरे ।। ३७ ।।
जगन्नाथस्य यः पूजां त्रिषु कालेषु तद्विधाम् ।
भक्तिश्रद्धान्वितः पश्येत्स याति परमं पदम् ।। ३८ ।।
त्रिकालपूजने यत्तु तुलसीदलमर्पयेत् ।
तद्द्यात् प्राप्तिमात्रेण महापापात् प्रमुच्यते ।। ३९ ।।
विष्णुः प्रीतमना भूत्वा तस्मै दद्यात्स्वकं पदम् ।
कुष्ठव्याधियुतो मर्त्यो भक्षणं कुरुते यदि ।। ४० ।।
तस्माद्विमुक्तो मासेन कामवत्सुन्दरो भवेत् ।
यत्र यत्र च नैवेद्यं कथितं यज्जनेश्वर ।। ४१ ।।
तस्य व्यतिक्रमे पूजा विफला जायते ध्रुवम् ।
जगन्नाथोऽपि देवेशो न प्रीतस्तद्व्यतिक्रमे ।। ४२ ।।
अतो यथोक्तनैवेद्यं कर्त्तव्यं तत्तु यत्नतः ।
यथाकालं भगवतः पूजनं विधिवद्धरेः ।। ४३ ।।
कालव्यतिक्रमे पूजां न गृह्णाति कदाचन ।
सावधानतया तिष्ठ त्वं चैवात्र प्रपूजने ।। ४४ ।।
कालव्यतिकृतां तावज्जनानां दण्डकृद्भव ।
दण्डाभावे यतः सर्वं निष्फलं जायते नृप ।। ४५ ।।
पूजानन्तरतो रात्रौ देवाङ्गान्माल्यमम्बरम् ।
बहिष्कृत्य पुनर्देयं सूक्ष्ममन्यद्वराम्बरम् ।। ४६ ।।
माल्यान्यन्यानि दिव्यानि भूषणानि तदा नृप ।
कस्तुरीपङ्ककलितैर्गन्धव्याप्तदिगन्तरैः ।। ४७ ।।

सर्वाङ्गं लेपयेद्भक्त्या कर्पूरान्वितचन्दनैः ।
नानाप्रसूनरचितैः सुवृत्तिः कृतदिङ्न्मुखैः ।। ४८ ।।
माल्यैरतुल्यरचनैर्वेशं कुर्य्यान्मनोहरम् ।
गीते नृत्ये च पुरतो जायमाने मुहुर्मुहुः ।। ४९ ।।
आकल्परचनां कुर्य्यात्पश्यतां पापनाशिनीम् ।
कर्पूररजसा सिक्तं कुर्य्यात्सर्वाङ्गमुत्तमम् ।। ५० ।।
ततश्चतुर्थपूजां च कुर्य्यात् पञ्चोपचारतः ।
नक्तं तु सप्तघटीकाभ्यन्तरे पूजनं हरेः ।। ५१ ।।
दिव्यपायसनैवेद्यं काले तस्मिन् घृतान्वितम् ।
शर्कराक्षोदसम्पूर्ण्णं कर्पूरद्रववासितम् ।। ५२ ।।
घृतपाचितमत्युग्रं नानावर्ण्णं मनोहरम् ।
पूपोत्करं तथा दिव्यं दद्याच्छ्रीपतये नृप ।। ५३ ।।
चतुर्थकालपूजायां भावयेन्मुरवैरिणम् ।
रासमण्डलमध्यस्थं गोपीवृन्दनिषेवितम् ।। ५४ ।।
नीलजीमूतसंकाशं पूर्ण्णेन्दुप्रतिमाननम् ।
शोणाधरलसद्वेणुं विकचाम्बुजलोचनम् ।। ५५ ।।
मयूरचन्द्रिकोल्लासि चूडान्तः स्फुरिताकृतिम् ।
नानाभूषणसन्नद्धं दिव्यपीताम्बरं हरिम् ।। ५६ ।।
एवं तं पूजयित्वा तु द्विवारं पूजयेत्ततः ।
पूजयेदेकवारं वा भूपसत्तम सर्वदा ।। ५७ ।।
रात्रौ वा सप्तघटिकाभ्यन्तरे पूजनं हरेः ।
न जायते यदा प्रीतो जगदीशस्तथा न हि ।। ५८ ।।
निरूपितविधानानां पूजार्थं पालनं कुरु ।
यथा व्यतिक्रमो न स्यात्सावधानः क्षितौ भव ।। ५९ ।।

असम्भवो यदा भूप द्रव्याणां जायते ध्रुवम् ।
तदा यामद्वये कुर्य्यात्सपर्य्यां कमलापतेः ।। ६० ।।
तदूर्ध्वं च भवेद्देवो न गृह्णाति कदाचन ।
सा सपर्य्या राक्षसानामुपभोग्या भवेद्भृशम् ।। ६१ ।।
विष्णुः क्रोधयुतोऽपि स्यात्पूजा सा विफला भवेत् ।
राजा राज्यं च मन्त्री च तथा प्रतिनिधिः पुमान् ।। ६२ ।।
पूजकः पाककर्त्ता च ते नश्यन्ति नराधिप ।
परत्र नरके घोरे ते पतिष्यन्ति नान्यथा ।। ६३ ।।
भव त्वं संयतो यावन्न स्यात्कालव्यतिक्रमः ।
देवाग्रं पालयित्वा तु वारिणाथ सुगन्धिना ।। ६४ ।।
तत्प्रोञ्छनं च कर्त्तव्यं सुपुष्पाणि समन्ततः ।
पातयेत् पद्मपत्राक्षप्रीतये चन्दनादिकम् ।। ६५ ।।
स्थापयेत्तत्र पर्य्यङ्कं तत्र तल्पं मनोरमम् ।
लक्ष्मीविष्णुप्रतिकृतिं जगदीशपुरस्ततः ।। ६६ ।।
स्थापेयदतिभक्त्याथ पयःपेटीसमर्पणम् ।
ततस्ताम्बूलदानं च ततः कर्पूरवर्त्तिभिः ।। ६७ ।।
ततः पिष्टकवर्त्त्या च प्रभुं नीराजयेन्नृप ।
एतन्नीराजनयुगं स्वापकाले जनार्द्दनम् ।। ६८ ।।
भक्त्या संदर्शयेद्देवो यतः प्रीतो महीपते ।
ततस्तां प्रतिमां विष्णोः स्थापयेद्गरुडाग्रतः ।। ६९ ।।
पयःपेटीं समर्प्याथ ताम्बूलार्पणमाचरेत् ।
नीराजनं तथा कुर्य्यात्ततः कर्पूरवर्त्तिभिः ।। ७० ।।
पिष्टकावर्त्तिभिस्तावत्कुर्य्यादारात्रिकं पुनः ।
स्वर्गागतामराणां च तावत्काले विसर्जनम् ।। ७१ ।।

ततस्तां प्रतिमां दिव्यां वस्त्राच्छादितवर्त्मनि ।
गृहीत्वा तत्र पर्य्यङ्के स्थापयित्वा क्षणं नृप ।। ७२ ।।
ततस्तां स्वपदे रक्षेत्ततश्च प्रार्थयेद्धरिम् ।
भगवन्तं ततस्तल्पे शायमानं विचिन्तयेत् ।। ७३ ।।
परत्रया श्रिया पुष्टं ततो बद्ध्वा कपाटकम् ।
ततः प्राकारमध्येऽपि निःशङ्कं च प्रचारयेत् ।। ७४ ।।
एतादृशं विधिं नित्यं भूप सम्यक् चरेद्भुवि ।
सावधानेन कर्त्तव्यं पालनीयं त्वया पुनः ।। ७५ ।।

सूत उवाच

इत्येवं गदितस्तस्माद् ब्रह्मणस्तत्त्ववादिनः ।
पूजानिर्ण्ययमाकर्ण्य कृतार्थः सोऽभवद्द्विजाः ।। ७६ ।।
दिनान्तव्यापिनीं नीतिं विष्णोस्तस्य परात्मनः ।
श्रुत्वा हृष्टमना जातः क्षितिपश्च पुनः पुनः ।। ७७ ।।
पुनः पप्रच्छ धर्मज्ञो नीलाचलपतेर्हरेः ।
विशेषामपरां नीतिं तदासौ धरणीसुराः ।। ७८ ।।
नीलाद्रौ च महत्पुण्ये रम्ये परमपावने ।
भो भो द्विजा जगन्नाथे क्षेत्रे श्रीपुरुषोत्तमे ।। ७९ ।।
भक्तिं विधानं ये मर्त्या विष्णोस्त्रैकाल्यमर्चनम् ।
सकृत्पश्यन्ति तेष्वेवं मुक्ताः स्युर्भवबन्धनात् ।। ८० ।।
योऽध्यायमेवं परमादरेण
शृण्वन्ति जल्पन्ति जनाश्च भक्त्या ।
ते सौख्यमत्यन्तमिहैव भुक्त्वा
शेषे गमिष्यन्ति पदं मुरारेः ।। ८१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये
श्रीपुरुषोत्तमक्षेत्रमाहात्म्येऽष्टमो ध्यायः ।।

नवमोऽध्यायः

इन्द्रद्युम्न उवाच

आचार्यः कीदृशो ब्रह्मन् पात्रहोता च कीदृशः ।
कीदृक् परीक्षकः श्रीमान् तथाऽन्येपि च सेवकाः ।। १ ।।
तेषां च लक्षणं ब्रूहि मां तत्रादरिणं विधे ।
का च सेवा कृता ब्रह्मन् सेवकैस्तत्र नित्यशः ।। २ ।।

ब्रह्मोवाच

शृणु राजन् महाप्राज्ञ जगदीशस्य मापतेः ।
आचार्य्यप्रमुखाणां च लक्षणं कथयाम्यहम् ।। ३ ।।
सर्वेषां सेवकानां च श्रेष्ठः स पूजको मतः ।
वेदवेदाङ्गविच्छुद्धः पञ्चरात्रविशारदः ।। ४ ।।
स्मृत्यागमपुराणज्ञः शान्तश्च सत्कुलोद्भवः ।
वेदिकांस्तान्त्रिकान्मन्त्रान् जानन्नाचारावान् गुणी ।। ५ ।।
अङ्गहीनः पत्नीहीनो न भवेद्रोगसंयुतः ।
विनयेन युतः श्रीमान् तपस्वी स च सुव्रतः ।। ६ ।।
कामादिदोषरहितः सदाचारप्रतिष्ठितः ।
आचार्य्यस्तादृशः श्रीमान् भवेत्तस्य परात्मनः ।। ७ ।।
कलहं च विवादं च हास्यं गोष्ठीं तथा नृप ।
गान्धर्वविद्यां माल्यादीन् त्यक्त्वा शुद्धतरो भवेत् ।। ८ ।।
मत्स्यमांसादिरहितो न वै पर्य्युषिताशनः ।
परस्त्रीगमनं तावन्नाचरेत्स तु पूजकः ।। ९ ।।
ऋतुकालाभिगमनं निजपत्न्यां समाचरेत् ।
रक्तं पीतं तथा श्यामं कृष्णवस्त्रं न धारयेत् ।। १० ।।

शुद्धशुक्लाम्बरधरस्तथा शुक्लोत्तरीयकः ।
उद्ध्र्वपुण्ड्रधरः श्रीमान् शङ्खचक्रादिचिह्नितः ।। ११ ।।
हविष्याशी जितक्रोधः सत्यवाक् धर्मतत्परः ।
कृष्णमन्त्रे वासुदेवमन्त्रे चैकाक्षरे तथा ।। १२ ।।
श्रियो मन्त्रे तथा भूप भुवनेश्वरसंज्ञके ।
मनौ सुदर्शनस्यापि मन्त्रेषु विविधेषु च ।। १३ ।।
पुरश्चरणशीलोऽसौ मन्त्रसिद्धियुतस्तथा ।
पूजायां तत्परः ख्यातः सर्वशास्त्रार्थपारगः ।। १४ ।।
पूजायोग्यवसूनां च परिशीलनतत्परः ।
बह्वाशी न भवेन्नित्यं शूद्रालापं च वर्जयेत् ।। १५ ।।
जपशीलः सदा शान्तः प्रतिग्रहविवर्जितः ।
न स्खलत्स्वसदाचारविचारपरिवर्जितः ।। १६ ।।
परोपकारिधर्मज्ञस्त्रिसन्ध्याविधितत्परः ।
यजुर्वेदी मन्त्रविज्ञः श्रद्धाभक्तिसमन्वितः ।। १७ ।।
पराशर-भरद्वाज-वत्ससानां च गोत्रजः ।
काश्यपाङ्गिरसोर्गोत्रे जातोऽपि नृपसत्तम ।। १८ ।।
आचार्य्यः स भवेदेवं योग्यः षोडशवर्षतः ।
आषष्टिवर्षपर्य्यन्तं राजर्षे स द्विजोत्तमः ।। १९ ।।
शान्तः धीरः शुद्धचित्तः नित्यकर्मपरायणः ।
ऊर्द्धं स कमलाभर्त्तुः पूजने न भवेत् क्षमः ।। २० ।।
एतादृशगुणाविष्टं विशिष्टं धरणीसुरम् ।
आचार्य्यं नृपतिः कुर्य्यात्कुण्डलादिविभूषितम् ।। २१ ।।
नियोजयेज्जगद्भर्त्तुः पूजने शोभनाकृतेः ।
रत्नैर्वस्त्रैश्च द्रव्यैश्च भूमिभिर्धरणीपते ।। २२ ।।

सन्तोषयेत्तथा तस्य यथापेक्षा न च क्वचित् ।
आचार्य्यपरितोषत्वं वारय त्वं प्रतिग्रहात् ।। २३ ।।
आचार्य्यस्य च सन्तोषे सन्तोषो जगतां पतेः ।
तस्मिंस्तुष्टे हरिस्तुष्टो जगदेतच्चराचरम् ।। २४ ।।
आचार्य्यस्तु कदाप्यत्र न च कुर्य्यात्प्रतिग्रहम् ।
प्रतिग्रहान्मन्त्रसिद्धिर्नभवेद्धरणीधव ।। २५ ।।
तस्मिन् विष्णोश्च सान्निध्यं न स्याद्भावप्रतिग्रहात् ।
अतस्तत्र क्षितिपते सावाधानो भवेद्ध्रुवम् ।। २६ ।।
निर्माल्यानां जगद्भर्त्तुर्दशांशेन महीपते ।
अथवा षोडशांशेन तोषयेत्पूजकं तदा ।। ।। २७ ।।
आचार्य्याय प्रयत्नेन दद्यात् वै नृपसत्तम ।
अन्यथा चेन्न स तुष्टो देवदेवो जगत्पतिः ।। २८ ।।
ततोऽसौ पूजकः श्रीमान् विष्णोरंशेन निर्मितः ।
सन्तुष्टो यदि सन्तुष्टस्तदा भवति केशवः ।। २९ ।।
आचार्यं परया भक्त्या नृपतिर्यदि पूजयेत् ।
तदा तस्यैव वर्द्धन्ते सम्पदोऽत्र धरातले ।। ३० ।।
भुक्त्वात्र परमैश्वर्य्यमन्ते मोक्षमवाप्नुयात् ।
यस्य हस्ते परंब्रह्म भुङ्क्ते यस्य करार्पणात् ।। ३१ ।।
पाकः पवित्रो यस्माद् वै विश्वदेवः प्रवर्त्तते ।
यो भावनाबलेनैव स्वयं विष्णुर्भवेन्नृप ।। ३२ ।।
विष्णुं यः पूजयेद्भक्त्या साक्षाद् विष्णुस्वरूपभाक् ।
तस्माद्भेदो न कर्त्तव्यस्तस्य विष्णोः परात्मनः ।। ३३ ।।
भेदेऽपराधोऽपि भवेद्विष्णुद्रोही न संशयः ।
पूजोपकरणं द्रव्यं पाकद्रव्ये तथा नृप ।। ३४ ।।

अर्पणे फलमूलानां तेनापि यदुदीरितम् ।
भक्तिश्रद्धान्वितो धीमान् कुर्य्यात् क्षिप्रं न संशसयः ।। ३५ ।।
आचार्य्येण निषिद्धं यन्न च कुर्य्यात्कदाचन ।
देवाग्रे पाकशालायां प्रासादे यत्र कुत्रचित् ।। ३६ ।।
वैगुण्यं यदि जायेत त्वाचार्य्यं सन्निवेदयेत् ।
आचार्य्येण यदुक्तं वै तत्कुर्यादति भक्तितः ।। ३७ ।।
अतोऽन्यथा चेन्नृपते पूजा व्यर्था न संशयः ।
आचार्य्यस्तु स्वयं विष्णोरंशोऽन्येऽपि च सेवकाः ।। ३८ ।।
देवतांशाः क्षितिपते तस्माच्छ्रेष्ठोऽर्चकः सदा ।
माननीयः महीपाल सर्वैः निजहितेप्सुभिः ।। ३९ ।।

सूत उवाच

ब्रह्मणा कथिता नीतिर्यादृशी द्विजसत्तमाः ।
जगदीशं तया नीत्वा पूजयेत्तादृशोऽर्चकः ।। ४० ।।
अन्ये ये सेवका विष्णोः सेवायां पूजकं पुनः ।
संपृच्छ्य सेवां कुर्य्याच्च यस्माच्छ्रेष्ठोऽर्चकः सदा ।। ४१ ।।
पूजकस्याप्यभावेन न किंचिद्भवने हरेः ।
न कुर्य्यादार्यमतयः कुर्याच्चेन्निष्फलं भवेत् ।। ४२ ।।
ब्रह्मा च पात्रहोता च चरुहोता तथा द्विजाः ।
शुद्धशुक्लाम्बरधराः सदाचारे प्रतिष्ठिताः ।। ४३ ।।
पूजकानुगताः पूता हविष्याशिन एव ते ।
आचार्याचारकलिता दान्ताः शान्तास्तपस्विनः ।। ४४ ।।
ऊर्ध्वपुण्ड्रधरा सर्वे शङ्खचक्राङ्कितास्तथा ।
आचार्य्यभाषणे सक्ताः श्रद्धाभक्तिसमन्विताः ।। ४५ ।।
आचार्य्यापेक्षितं दत्त्वा तिष्ठेयुस्तेषु संयताः ।
पूजावसानपर्यन्तं कुर्यासुः पूजकेरितम् ।। ४६ ।।

इन्द्रद्युम्नस्तदा विप्राः पूजकादिकलक्षणम् ।
श्रुत्वा तदानीं ब्रह्माणं लक्ष्म प्रतिनिधेः पुनः ।। ४७ ।।
पप्रच्छ विनयाविष्टो हृष्टात्मा स च भूपतिः ।
तव प्रसादाद्भो ब्रह्मन् पूजाविधिरसौ श्रुतः ।। ४८ ।।
श्रीजगन्नाथदेवस्य पूजाकर्मणि वै पुनः ।
आचार्यप्रमुखानां च सेवकानां च लक्षणम् ।। ४९ ।।
श्रुतं मया तथेदानीं ब्रूहि प्रतिनिधेः परम् ।
लक्षणं पद्मयोने त्वं यदि ते मय्यनुग्रहः ।। ५० ।।

ब्रह्मोवाच

इदानीं प्रतिनिधिर्यः स्याल्लक्षणं कथयामि ते ।
शृणु भूपतिशार्दूल संक्षेपात्तस्य धीमते ।। ५१ ।।
परीक्षितस्तु शान्तात्मा सर्वशास्त्रार्थतत्त्ववित् ।
विष्णुभक्तियुतः श्रीमान् विष्णुपूजासु तत्परः ।। ५२ ।।
शुद्धशुक्लाम्बरधरः कुण्डली मुद्रिकोज्ज्वलः ।
ऊर्ध्वपुण्ड्रधरो धीरः पूजाविधिविधानकृत् ।। ५३ ।।
मत्स्यमांसादिरहितो हविष्याशी जितेन्द्रियः ।
पूजावसानपर्यन्तं स्वर्णवेत्रधरः शुचिः ।। ५४ ।।
देवताग्रे च संतिष्ठेत्पूजाशीलनतत्परः ।
पूजायां पाकशालायां विष्णुद्रव्येषु वा पुनः ।। ५५ ।।
अपराधकृतां तावद्दण्डदः स्वर्णदण्डभृत् ।
चक्रस्य पुरतो राजन् संपृच्छ्याचार्य्यमादरात् ।। ५६ ।।
दद्याद्दण्डं प्रतिनिधिर्नृपस्य हितकारणात् ।
पूजकेन यथोक्तं वै शास्त्रोक्तविधिना नृप ।। ५७ ।।
तेनैव दण्डं सहसा दद्यात्प्रतिनिधिः सदा ।
दण्डाभावेन सहसा सा पूजा निष्फलायते ।। ५८ ।।

लोभाद्वा भ्रमतो वापि दद्याद्दण्डमनुत्तमम् ।
विष्णुद्रोही स एव स्याद्वंशनाशोऽप्रतिष्ठितः ।। ५९ ।।
परीक्षकस्य दोषं वै राजा श्रुत्वा यदा द्रुतम् ।
दण्डं च नाचरेत्तस्य सर्वं च निष्फलं भवेत् ।। ६० ।।
अतः परं प्रवक्ष्यामि ह्यग्निशर्मण एव हि ।
लक्षणं शृणु तत् क्षिप्रं सदाचाररतोत्तमम् ।। ६१ ।।
मासद्वयाधिके सप्तवर्षे जाते नृपोत्तम ।
तदोपनयनं कुर्याज्ज्येष्ठपुत्रस्य धीमते ।। ६२ ।।
ब्रह्मचर्य्यं समाचर्य वेदाध्ययनमुत्तमम् ।
कृत्वा परान्नसंत्यागी न पर्युषितमश्नीयात् ।। ६३ ।।
स्त्रीशूद्रालापरहितस्तत्सम्पर्कविवर्जितः ।
ताम्बूलमाल्यकाव्यादिग्रहणं च न कारयेत् ।। ६४ ।।
हविष्यभुग् वेदमन्त्राभ्यासशीलः सदा नृप ।
सदाचाररतः शान्तः प्रतिग्रहविवर्जितः ।। ६५ ।।
वस्त्राच्छादितशीर्षश्च सोऽयं प्रतिनिधिस्तव ।
उत्सवेषु च सर्वेषु सीरपाणिं सुरेश्वरम् ।। ६६ ।।
वन्दापयेच्च सर्वाङ्गलेपनं चन्दनादिना ।
कुर्यात्स नृपशार्द्दूल तव कल्याणहेतवे ।। ६७ ।।
द्वादशाब्दं प्रकुर्वीत ह्यग्निशर्मा नृपोत्तम ।
पूर्णे भास्करसंख्याब्दे न स्पृशेद् विष्णुमव्ययम् ।। ६८ ।।
मुहूर्त्तं वा मुहूर्त्तं वा स्पृशेच्चेद्देवता व्रजेत् ।
ततः परं ह्यग्निशर्मा शवतुल्यो महीपते ।। ६९ ।।
न स्पृशेत्सर्वदेवेशं भ्रमतो यदि संस्पृशेत् ।
तदा महास्नानविधौ संस्नाप्य जगतां पतिम् ।। ७० ।।

सन्तोषयद्बहुविधैर्भोगैर्भक्त्या प्रकल्पितैः ।
तस्मात्तमग्निशर्माणं क्षेत्रतोऽन्यत्र वेशयेत् ।। ७१ ।।
तस्याग्निशर्मणो राजा न च पश्येन्मुखं तदा ।
पश्येद्यदा सुवर्णानि दद्याद् विप्राय धीमते ।। ७२ ।।
तस्य गोत्रे यदा पुत्रो ज्येष्ठो न स्याच्च दैवतः ।
द्वितीयतनयं कुर्यादग्निशर्माणमादरात् ।। ७३ ।।
दद्यात् क्षितिपते तस्य वंशे पुत्राः न सन्ति चेत् ।
तदाचार्यः स शान्तात्मा सर्वं कर्म समाचरेत् ।। ७४ ।।
सर्वकर्म क्षितौ तावदाचार्याय समर्पयेत् ।
आचार्यस्याप्यभावेऽपि तस्य विष्णोः परात्मनः ।। ७५ ।।
पूजाकर्माखिलं तावन्न कुर्यात्कोऽपि भो नृप ।
सर्वेषां च यदाभावे आचार्यः कर्म संचरेत् ।। ७६ ।।
तस्याभावेन कोऽप्यत्र कर्म कुर्यान्महीश्वर ।
ततो ब्रह्मा तथा शान्तः सदाचारे प्रतिष्ठितः ।। ७७ ।।
हविष्याशी वशी वेदाभ्यासशीलः सदैव हि ।
एतैः सल्लक्षणैर्युक्तो ब्रह्मा स्यान्नृपसत्तम ।। ७८ ।।
उत्सवेषु च भद्रायाः सोऽयं वन्दापनां चरेत् ।
सर्वकर्मसु तं कुर्याद् ब्रह्माणं नृपतीश्वर ।। ७९ ।।
स्नानगुण्डिचयोः सोऽपि विष्णुं भद्रां बलं पुनः ।
नीराजयेत्स शान्तात्मा श्रद्धाभक्तिपरः शुचिः ।। ८० ।।
अन्ये ये सेवका विष्णोरङ्गे दिव्याम्बराणि च ।
माल्यालङ्करणान्येव दद्युस्तानि तदा नृप ।। ८१ ।।
ते सर्वे शुद्धसत्त्वाः स्युः पूजकाचारसंयुताः ।
पूजकानुगताः सर्वे सर्वदा भक्तितत्पराः ।। ८२ ।।

सूत उवाच

आचार्यप्रमुखाणां च सेवकानां च लक्षणम् ।
श्रुत्वा स च महीनाथः पृष्टवांस्तं पुनर्द्विजाः ।। ८३ ।।
इत्युक्त्वा नृपतिं प्रति स्फुटतराम्भोजेक्षणे ब्रह्मणि ।
श्रीमद्दारुतनोः प्रभोः परिजनाचारक्रियावादिनि ।। ८४ ।।
तूष्णीमेव गते जितेन्द्रियतमो भूपः पुनः पृष्टवान् ।
पूजायामुपचारतत्त्वमनघो विष्णुस्तदानीं मुदा ।। ८५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये आचार्य्यादिलक्षणकथनं नाम नवमोऽध्यायः ।।

दशमोऽध्यायः

इन्द्रद्युम्न उवाच

चतुर्मुख सुरश्रेष्ठ विष्णोः सेवकलक्षणम् ।
त्वत्प्रसादाच्छ्रुतं सर्वमिदानीं श्रोतुमिष्यते ।। १ ।।
पूजायामुपचाराणां द्रव्याणां निर्ण्णयं तथा ।
पात्राणां च तथा विष्णोर्नैवेद्यस्य च लक्षणम् ।। २ ।।
सर्वमेतद्विधानं कर्त्तव्याकर्त्तव्यमेव च ।
यदि तेऽनुग्रहो ब्रूहि मयि संप्रति वर्तते ।। ३ ।।

ब्रह्मोवाच

साधु साधु नृपश्रेष्ठ कथयामि समासतः ।
पृष्टं यच्च त्वया सर्वं तत्सर्वं शृणु सादरम् ।। ४ ।।
प्रथमं पात्रहोता च तुलसीदलसञ्चयम् ।
सुवासितानि पुष्पाणि दद्याद्दर्भाननुत्तमान् ।। ५ ।।

आसनार्थं ततो दद्यात्पद्मद्वयमनुत्तमम् ।
करवीरं च तगरं कुन्दं च पञ्चपुष्पकम् ।। ६ ।।
स्वागते जातिकां मल्लीं चम्पकं वकुलं तथा ।
केतकीं नीलकमलं दद्याच्च षट् सुवासितम् ।। ७ ।।
एतान्यपि च पुष्पाणि रुद्रसङ्ख्यानि भो नृप ।
आसने स्वागते वापि प्रशस्तानि तदर्च्चने ।। ८ ।।
तदभावे गन्धपुष्पे दद्यान्नृपवरोत्तम ।
पाद्यार्थं वितरेद्धीमान् श्यामकं कुसुमं तथा ।। ९ ।।
सर्षपं श्वेतवर्णं च शुक्लपद्ममुशीरकम् ।
दद्याच्छुष्कतरां भूप विष्णुक्रान्तां च विष्णवे ।। १० ।।
दूर्वां च चन्दनं चैव प्रत्येकं चैव चिह्नकम् ।
चतु:पलजले सर्वं क्षिप्त्वा पाद्यं प्रकल्पयेत् ।। ११ ।।
अर्घ्यार्थं रचयेत्पात्रे जलं द्विपलसम्मितम् ।
यवं तिलांस्तुषहीनान् सर्षपं श्वेतवर्णकम् ।। १२ ।।
कुशाग्रं च तथा गन्धं पुष्पं दद्यान्नृपोत्तम ।
प्रत्येकमेकचिह्नं स्यात्ततोऽर्घ्यं च प्रकल्पयेत् ।। १३ ।।
ततः परं प्रवक्ष्यामि विष्णोराचमनीयकम् ।
विधिं शृणु महाप्राज्ञ जलं द्विपलसम्मितम् ।। १४ ।।
जातिफलं लवङ्गं च तथैलाफलमुत्तमम् ।
मूरं कक्कोलकं चैवोशीरं च हिमबालुकाम् ।। १५ ।।
प्रत्येकं चिह्नकं कुर्याद्दद्यादाचमनीयकम् ।
मधुपर्कार्थमेकत्र मधुगन्धघृतं दधि ।। १६ ।।
खण्डं च प्रक्षिपेत्तत्र पलमात्रं प्रकल्पयेत् ।
पुनराचमनीयार्थं जलं च द्विपलं स्मृतम् ।। १७ ।।

चिह्निकांघ्रियुतं भूप कर्पूरं चन्दनं तथा ।
ततः स्नानार्थमाकुर्य्याज्जलं शतपलान्वितम् ।। १८ ।।
तदभावे तदर्द्धं स्यात्तस्याभावे तदर्द्धकम् ।
चिह्निकार्द्धककर्पूरं गन्धमेकपलं तथा ।। १९ ।।
दद्यात्स्नानोपचारेऽपि हरये धरणीधव ।
एकहस्तमितं पूतं शुक्लवस्त्रं मनोरमम् ।। २० ।। ।
प्रोञ्छनाय प्रकुर्य्याद् वै सर्वथा नान्यथा चरेत् ।
परिधानोत्तरीयार्थं पीतवस्त्रद्वयं ततः ।। २१ ।।
हस्तमात्रं च तद्दद्याद्वैष्णवे दैत्यजिष्णवे ।
यज्ञोपवीतं वितरेत् षड्गुणं गुणसागर ।। २२ ।।
हेमरत्नावलीमुक्ताखचितं पदकं ततः ।
दद्याद्भक्तियुतः प्रीत्या हरये हृदये नृप ।। २३ ।।
कर्पूरमिश्रितं गन्धं पलमात्रं समर्पयेत् ।
दिव्यं हस्तत्रयं माल्यं तथा देयं मुरारये ।। २४ ।।
ततः प्रवक्ष्यामि भूप धूपदानस्य निर्ण्णयम् ।
गोपनीयतरं तत्तु शृणु यत्नान्महीपते ।। २५ ।।
गुग्गुलं चन्दनं चैव कुण्टुरं विल्वचन्दनम् ।
उशीरमगुरुं तावन्मुस्तकं हीरवेरकम् ।। २६ ।।
तत्सर्वं चूर्ण्णकं कुर्य्यान्मधुसर्पिसमन्वितम् ।
कर्षमात्रं नियोज्याग्नौ धूपं कुर्य्यान्मनोरमम् ।। २७ ।।
योगनिद्राक्षयार्थं वै विष्णोर्नासान्तिकेऽर्पयेत् ।
तदा वरुणपूजान्ते धूपं दीपं च विष्णवे ।। २८ ।।
दद्यात्सभक्तियुक्तोऽपि सत्त्वरं नृपसत्तम ।
यतोऽर्चने धूपदानं प्रधानं श्रुतिभाषितम् ।। २९ ।।

सद्यस्तुष्टिकरो विष्णोर्योगनिद्राक्षयप्रदः ।
सान्निध्यं जायते धूपात्तथा दीपात् प्रधानतः ।। ३० ।।
सचेतना देवता स्यान्नेवेद्यं च विलोकयेत् ।
सन्तोषो जायते धूपे देवतायाः पुनः पुनः ।। ३१ ।।
तस्मात्सर्वोपचारेषु श्रेष्ठं धूपार्पणं नृप ।
तथा दीपप्रदानं च प्रधानं पूजने हरेः ।। ३२ ।।
तत्रापि धूपं सहसा विष्णोः प्रीतिकरो महान् ।
तस्मात्सर्वोपचारेषु धूपः श्रेष्ठो हि भूपते ।। ३३ ।।
विलम्बेन न कर्त्तव्यो विष्णुः प्रीतो यतो नृप ।
धूपस्य समयो जातस्तथा धूपो भविष्यति ।। ३४ ।।
दृष्टं मया गम्येतेऽत्र त्वमागच्छेति वक्ति यः ।
कीर्त्तयेद्वा महद्भक्त्या सोऽपि युक्तो न संशयः ।। ३५ ।।
श्रेष्ठं सर्वोपचाराणां धूपं दद्यात्त्वरान्वितः ।
न दद्याच्चेन्महाक्रोधो जायते जगतां पतेः ।। ३६ ।।
तस्मात्सर्वोपश्चारांश्च दद्याच्चैव शनैः शनैः ।
त्वरयाभिर्युतो धूपं दद्याद्दीपं च यत्नतः ।। ३७ ।।
दिव्यशुक्लांशुकेनैव वर्त्तिर्वेदाङ्गुला भवेत् ।
कर्पूरपूरिता तद्वच्चतुर्द्दलसमन्विता ।। ३८ ।।
तया दीपं सदा भक्त्या दद्यान्मधुभिदे मुदा ।
गन्धकर्पूरमिश्रेण पयसा पूर्वमानतः ।। ३९ ।।
पाद्याचमौ पुनर्दद्यान्नैवेद्यं च ततः परम् ।
आचार्य्यापेक्षितस्तावत्पात्रं होता सुसंयतः ।। ४० ।।
ब्रह्मा च जलधारां वै दद्यादालस्यवर्जितः ।
अथानन्तरतो भूप नैवेद्यस्य च लक्षणम् ।। ४१ ।।

सावधानतया मत्तः शृणु संप्रति सादरम् ।
प्रातः पूजोचितं कुर्य्यान्मुद्गान्नं धरणीपते ।। ४२ ।।
तण्डुलांश्च जलं चैव नव्ये मृण्मयभाजने ।
गतसारं यथा न स्यान्नैव दग्धं पचेत्तथा ।। ४३ ।।
गतसारं च नैवेद्यं प्रसादं नैव कारयेत् ।
एवमन्नं प्रकुर्वीत मुद्गांस्तावत्तथा पचेत् ।। ४४ ।।
पाषाणभूते पात्रेऽपि ह्येकत्रमर्द्दितं चरेत् ।
मुद्गान्नयोः स्निग्धसमं दिव्यं गव्यघृतं क्षिपेत् ।। ४५ ।।
आर्द्रकं जीरकं तत्र हिङ्गुलवणमेव च ।
पातयेदनुमानेन कुर्य्यात्तत्सपरिष्कृतम् ।। ४६ ।।
ततः स्वर्णमये पात्रे रौप्ये वा पित्तलेऽपि वा ।
भोज्यं तत्रैव संयोज्य देयं श्रीपतये मुदा ।। ४७ ।।
शर्करान्नं ततः कुर्य्यादर्द्धेकभागमुत्तमम् ।
अन्नं द्विभागं संयोज्य शर्कराभागसंयुतम् ।। ४८ ।।
सुपक्वकदलीयुक्तं घृतयुक्तं मनोरमम् ।
शर्करान्नमिदं शस्तं प्रातः पूजनकर्मणि ।। ४९ ।।
मुद्गान्नशर्करान्नानामभावे नृपतीश्वर ।
प्रातः पूजा न कर्त्तव्या कुर्य्याच्चेन्निष्फलं भवेत् ।। ५० ।।
एतदन्नद्वयं भूप प्रातः पूजोचितं हरेः ।
चतुर्विधं च पाकं च घृतपाचितमुत्तमम् ।। ५१ ।।
कर्त्तव्यं तत्र वै भूप विष्णुप्रीणनहेतवे ।
ततो मध्याह्नपूजायां नैवेद्यं च यथा भवेत् ।। ५२ ।।
तदाकर्ण्यय भो राजन् गदतो मे यथाविधि ।
जलतण्डुलयोर्मानं मुद्गमानं चरेद्बुधः ।। ५३ ।।

गोधूमं नातिपक्वं च न भवेद्गतसारकम् ।
घृतैर्जर्जरितं भूप लवणेन युतं तथा ।। ५४ ।।
सूर्य्यवर्च्चससङ्काशं सूर्य्यादन्नमनुत्तमम् ।
स्वर्ण्णवर्ण्णांश्च मुद्गांश्च चूर्णितान् दलवर्जितान् ।। ५५ ।।
जले द्विभागे संपच्य लाङ्गलीशकलान् क्षिपेत् ।
किञ्चिच्छितारजश्चैव लवणं हिङ्गुमेव च ।। ५६ ।।
आर्द्रकं जीरकं तत्र नव्यगव्यघृतं क्षिपेत् ।
रामठं लवणं तत्र यथायोग्यं नियोजयेत् ।। ५७ ।।
पुनः पाकावसाने च घृतं च जीरकं न्यसेत् ।
द्वितीयं व्यञ्जनं चैव कुर्य्यान्मध्याह्नपूजने ।। ५८ ।।
अपरं व्यञ्जनं कुर्य्यात्तत्कन्दफलसञ्चयैः ।
सिताद्रवे दिशां भागे ऋतुभागे घृतं तथा ।। ५९ ।।
संपच्य तत्र दत्त्वा च मरीचक्षोदमुत्तमम् ।
लवणं पाययेत्तत्र परिपाकेऽथ जीरकम् ।। ६० ।।
घृतं च तत्र निक्षिप्य रचयेच्चारु भूपते ।
महुरं व्यञ्जनं प्रोक्तं तद्देयं हरये सदा ।। ६१ ।।
अखण्डं च त्वचाहीनं कदलीखण्डमुत्तमम् ।
सितातण्डुलचूर्णाढ्यं रचयेद्घृतपाचितम् ।। ६२ ।।
एवं बहुविधं दिव्यं व्यञ्जनं रचयेन्नृप ।
द्विभागे गव्यपयसि चारुतण्डुलचूर्णकम् ।। ६३ ।।
भागमेकं प्रकल्प्याथ शर्कराचयसंयुतम् ।
पाचयेत्तत्र निक्षिप्य पच्यं च कदलीफलम् ।। ६४ ।।
माषाणां वटिकाभिश्च घृतपक्वाभिरञ्जितम् ।
मरीचक्षोदसंयुक्तं कर्पूरेणाभिवासितम् ।। ६५ ।।

एतादृशं च नैवेद्यं मध्याह्नसमये नृप ।
कुर्य्यादार्य्यजनश्रेष्ठ विष्णुप्रीणनहेतवे ।। ६६ ।।
चतुर्भागावशिष्टे च दुग्धे पक्वे मनोरमे ।
शर्करां पातयेत्तत्र कर्पूरं च मरीचकम् ।। ६७ ।।
एवं दद्याद्भगवते मध्याह्नार्च्चनकर्मणि ।
नानावर्णानि पूपानि घृतपक्वानि भूपते ।। ६८ ।।
रविसंख्याशतान्यत्र दद्याद्दैत्यारये तदा ।
एवं मध्याह्नसमये कुर्य्यान्नैवेद्यमुत्तमम् ।। ६९ ।।
सायाह्ने यच्च नैवेद्यं तन्निशामय भूपते ।
दिव्ये धौततरे चान्ने त्रिभागे दधि योजयेत् ।। ७० ।।
एकभागार्द्रकं चैव लवणं च यथाक्रमम् ।
भर्जितं जीरकं चैव कुर्य्याद्दध्यन्नमुत्तमम् ।। ७१ ।।
कुष्माण्डं सकलं दिव्यं चिञ्चारससमन्वितम् ।
सितायुतं च संपच्य नारिकेलार्द्रकैर्युतम् ।। ७२ ।।
लवणं च यथायोग्यं मरीचक्षोदमिश्रितम् ।
आमिक्षावटिकास्तत्र घृतपक्वाश्च निक्षिपेत् ।। ७३ ।।
भर्जितं जीरकं तावद्घृतं तत्र नियोजयेत् ।
एतादृशं शर्कराख्यं व्यञ्जनं नृपसत्तम ।। ७४ ।।
सायाह्ने विष्णवे दद्यात्तथा शाकं सुदुर्लभम् ।
कोशलाख्यं महीपाल सायाह्ने शस्तमुत्तमम् ।। ७५ ।।
नारिकेलार्द्रकैर्युक्तं जीरकैश्च समन्वितम् ।
रामठं द्रव्यसंयुक्तं लवणेन युतं तथा ।। ७६ ।।
घृते संपच्यमानं तत्सायाह्ने नृपसत्तम ।
कथयामि समासेन विष्णोः प्रीतिकरं महत् ।। ७७ ।।

त्रिभागे पयसि स्निग्धे तण्डुलाः शर्करास्तथा ।
एकभागेन संयोज्याः कुर्य्यात्पायसमुत्तमम् ।। ७८ ।।
तत्र कर्पूरचूर्णानि सेचयेत् घृतसंयुते ।
अनेन प्रस्तुतं मिष्टं पायसं रुचिवर्द्धकम् ।। ७९ ।।
तच्च चन्द्रसमतुल्यं तद्दद्याद् विष्णवे मुदा ।
तत्रार्चनेऽपि पूपानि षड्विधानि नृपोत्तम ।। ८० ।।
घृतपक्वानि दिव्यानि दद्याच्छ्रीपतये सदा ।
ततः पञ्चमपूजायां नैवैद्यं यत्स्मृतं बहु ।। ८१ ।।
तद्वदामि महीनाथ शृणु मत्तः समाहितः ।
धौते चारुतमे चान्ने त्रिभागे चन्द्रसन्निभे ।। ८२ ।।
मातुलुङ्गं जलं भागं योजयेदेवमुत्तमम् ।
लवणं तत्र निक्षिप्य क्षालितान्नं प्रकल्पयेत् ।। ८३ ।।
अपरं दुग्धसारं च कर्पूरक्षोदसंयुतम् ।
शितारजः परियुतं दद्यान्मुरभिदे तदा ।। ८४ ।।
चिञ्चारसद्विभागेऽथ दध्यम्भोभागयुग्मकम् ।
संयोज्य लवणं योज्यं माषाणां वटिकास्तथा ।। ८५ ।।
घृतपक्वाश्च तत्रैव निक्षिप्य क्षितिपोत्तम ।
भर्जितं जीरकं तत्र संयोज्य काञ्जिकाह्वयम् ।। ८६ ।।
कुर्य्याद्व्यञ्जनमाश्चर्यं विष्णुप्रीणनहेतवे ।
माषाणां पेषितानां च त्रिभागे योजयेन्नृप ।। ८७ ।।
दुग्धसारं त्वेकभागं तत्र पक्वतरं पुनः ।
दिव्यामृतकपानीयं रम्भाफलं कुलोद्भवम् ।। ८८ ।।
निक्षिप्य जीरकं तावन्मरीचं चार्द्रकं पुनः ।
रामठं लवणं तत्र यथायोग्यं नियोजयेत् ।। ८९ ।।

एतत्सर्वं घृते गव्ये परिपक्वं यथा भवेत् ।
कृत्वा दिव्यतरं पूपं पातयेच्चूर्णिताः सिताः ।। ९० ।।
तत्रैव च घृतं पूर्णं पातयेदतियत्नतः ।
एतादृशं तत्र पूपं रचयेत्पञ्चमार्च्चने ।। ९१ ।।
अपरं स्याद्यथा पूपं तद्वदामि नृपोत्तम ।
दिव्यामृतकपानीयं कदलीफलमुत्तमम् ।। ९२ ।।
आमिक्षां रामठं चैव जीरकं चार्द्रकं तथा ।
मरीचं तत्र निक्षिप्य सर्वमेकत्र भाजने ।। ९३ ।।
ततो गव्यघृते दिव्ये तत्सर्वं चारुपेषितम् ।
संपच्य रचयेत् पूपं शर्करापाकयोगतः ।। ९४ ।।
कर्पूरशर्कराक्षोदैः पुनर्जर्जरितं भवेत् ।
तादृशं पूपमाश्चर्य्यं दद्याच्छ्रीपतये मुदा ।। ९५ ।।
वस्त्रपूते जले दिव्ये जातिफललवङ्गयोः ।
घर्षणात् सैरभे तत्र कर्पूरक्षोदमुत्तमम् ।। ९६ ।।
पातयित्वाथ तद्देयं प्रतिपूजनकर्मणि ।
एतन्नैवेद्ययुक्तासौ पूजा च पञ्चमी न चेत् ।। ९७ ।।
अशक्त्या च तुरीयायां पूजायां तत्तु दापयेत् ।
एवं पञ्चविधा प्रोक्ता पूजायां जगतां पतेः ।। ९८ ।।
यादृशं तत्र नैवेद्यं तवाग्रे कथितं नृप ।
ये च ये च द्विजाः पाककर्त्तारः स्युः पृथक् पृथक् ।। ९९ ।।
तासु तासु च पूजासु पक्तुं तान् योजयेद् भवान् ।
यातयामं गतरसं नैवेद्यं न भवेद् यथा ।। १०० ।।
तथापि भवता कार्य्या सूपकारैर्नृपोत्तम ।
पाकार्थं सूपकारैश्च ह्याज्यं गव्यैर्जलं नृप ।। १०१ ।।

पाकयोग्यानि पात्राणि रक्तवर्णानि कारयेत् ।
कृष्णवर्णानि पात्राणि न कुर्य्याच्च कदाचन ।। १०२ ।।
गीतं नृत्यं तथा भूप ताम्बूलाशनमेव च ।
माल्यानां धारणं तावन्मस्तकेऽपि महीपते ।। १०३ ।।
कलहं च विवादं च हास्यं शोकं तथैव च ।
असद्भाषाप्रकथनं न कुर्य्यात्पाकमन्दिरे ।। १०४ ।।
तत्रैव विषये राजन् सावधानो भवान् भवेत् ।
अन्यथा चेत्तदा विष्णुर्न प्रीतोऽपि कदाचन ।। १०५ ।।
यदा भवान् महाविष्णुं प्रतीच्छेदन्नमुत्तमम् ।
पूर्ण्णव्यञ्जनसंयुक्तं पूपवृन्दसमन्वितम् ।। १०६ ।।
पायसोत्करसंयुक्तं खेचरान्नं कुलान्वितम् ।
तादृशं यच्च नैवेद्यं भूरि चारुतरं भवेत् ।। १०७ ।।
तन्नो मण्डलबाह्येऽपि स्थापनीयं कदाचन ।
मध्याह्नसमयेऽन्नस्य योग्यः पाकोऽयमुत्तमः ।। १०८ ।।
अन्नं पूर्ण्णतमं यस्मात् पूपव्यञ्जनसंयुतम् ।
श्रद्धया परया दद्याद्विष्णवे दैत्यजिष्णवे ।। १०९ ।।
नैवेद्यं च बहुतरं भक्त्या संपाद्यते यदा ।
तदास्य वैनतेयस्य पुरपृष्ठे निवेदयेत् ।। ११० ।।
प्रचुरं चारुनैवेद्यं स्थापनीयं नृपोत्तम ।
लसद्रम्भादले तत्र त्रिधा पङ्क्तिकमुत्तमम् ।। १११ ।।
आवाह्य देवतास्तत्र मूलमन्त्रेण भो नृप ।
गन्धाद्यैरुपचारैश्च तन्नैवेद्यं निवेदयेत् ।। ११२ ।।
त्रिकालपूजनान्नेषु या बुद्धिर्जायते नृप ।
तदन्नेषु तथा बुद्धिः कार्य्या च नात्र संशयः ।। ११३ ।।

अत्र शङ्का न कर्त्तव्या न कर्त्तव्या कदाचन ।
यस्यात्र जायते शङ्का रौरवे पच्यते ध्रुवम् ।। ११४ ।।
ब्रह्महत्यादिपापघ्नं निर्माल्यं जगतां पतेः ।
भुञ्जतां नृपतिश्रेष्ठ मुक्तिस्तेषां न दुर्ल्लभा ।। ११५ ।।
जगन्नाथस्य नैवेद्यं महापातकनाशनम् ।
भक्षणात् फलमाप्नोति कपिलाकोटिदानजम् ।। ११६ ।।
चण्डालादिजनस्पृष्टं तदन्नं च नृपोत्तम ।
भोक्तव्यं सहसा विप्रैः पावनं सुरदुर्ल्लभम् ।। ११७ ।।
प्रतिजन्मनि यो भक्तस्तस्य विष्णोः परात्मनः ।
तस्यैव स्यान्नृपश्रेष्ठ तदन्ने विमलापतिः ।। ११८ ।।
यज्ञस्तपांसि राजेन्द्र व्रतानि विविधानि च ।
तीर्थाटनानि तन्नैव कृत्यानि सुकृतानि च ।। ११९ ।।
पितरस्तर्पितास्तेन तथा देवः महर्षयः ।
दत्तानि तेन दानानि सकलानि महीपते ।। १२० ।।
जगन्नाथान्नमेतद्वै येन भुक्तं सुपावनम् ।
बहुनात्र किमुक्तेन नृपसत्तम सांप्रतम् ।। १२१ ।।
तदन्नस्पर्शतो नूनं महापापैः प्रमुच्यते ।
खादन्ति भक्त्या ये केचित् स्पृशन्ति क्षितिमण्डले ।। १२२ ।।
पश्यन्ति ये च मनुजास्ते कृतार्था न संशयः ।
गवां कोटिप्रदानाच्च वाजपेयशताच्च यत् ।। १२३ ।।
अश्वमेधसहस्राद्वै राजसूयशताच्च यत् ।
तपोपवासतो भूप यत् फलं जायते भुवि ।। १२४ ।।
तत्तत् फलमवाप्नोति जगन्नाथान्नभक्षणात् ।
किमुक्तेनात्र बहुना चण्डालस्पृष्टमेव हि ।। १२५ ।।

कुक्कुरस्य मुखाद् भ्रष्टं तद्ग्राह्यं दैवतैरपि ।
तस्मात्तदन्नं सहसा प्राप्तमात्रेण भक्षयेत् ।। १२६ ।।
विचारणा न कर्त्तव्या न कर्त्तव्या कदाचन ।
साक्षाद्ब्रह्मस्वरूपोऽयं जगन्नाथो न संशयः ।। १२७ ।।
तस्यावलोकनान्मुक्तिस्तदन्नाशनतो नृप ।
महाप्रसादमित्युक्तं भुक्तिमुक्तिप्रदायकम् ।। १२८ ।।

सूत उवाच

चतुर्मुखमुखाद्विप्राः श्रुत्वा स नृपसत्तमः ।
माहात्म्यं जगदीशस्य तदन्नस्य च सत्तमाः ।। १२९ ।।
कृतकृत्यो बभूवासौ सोऽयं कथयतो विधेः ।
जगन्नाथान्नमेतद्वै शुष्कं कृत्वा सुभक्तितः ।। १३० ।।
देशान्तरे जनो यस्तु भक्षेत् प्रतिदिनं द्विजाः ।
सर्वपापविनिर्मुक्तः स गच्छेत् परमं पदम् ।। १३१ ।।
यस्तु नित्यं महाविष्णोरष्टकालार्च्चालोकनम् ।
करोति परया भक्त्या भक्षत्यन्नं सुपावनम् ।। । १३२ ।।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।
जगन्नाथस्य भो विप्रा देशान्तरमुपागते ।। १३३ ।।
अन्ने सुपावने तावद्भक्तिं ये कुर्वते नराः ।
प्राप्तमात्रेण खादन्ति हृष्यन्ति च मुहुर्मुहुः ।। १३४ ।।
तेऽपि नीलाचलस्थस्य हरेर्दर्शनतः फलम् ।
प्राप्य मुक्ता भवक्लेशात्सत्यं सत्यं वदाम्यहम् ।। १३५ ।।
यस्यापि पाचिका लक्ष्मीर्यस्य भोक्ता जगत्पतिः ।
तस्यान्नस्य च माहात्म्यं केन वक्तुं हि शक्यते ।। १३६ ।।

ब्रह्मादि देवनिचयैः प्रतिसेव्यमाने
नानामनोरथकरे दुरितापहारे ।
ख्याते जितेन्द्रियतमे विमले तदन्ने
येषां च भक्तिरतुला भुवि ते कृतार्थाः ।। १३७ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पुरुषोत्तमक्षेत्रमाहात्म्ये दशमोऽध्यायः ।।

एकादशोऽध्यायः

ब्रह्मन् कानि फलान्येव कानि मूलानि वा पुनः ।
कीदृक् प्रपानकं देयं दधि कीदृक् तथार्द्रकम् ।। १ ।।
किमन्यद्द्रव्यमाश्चर्य्यं किं वा देयं मुरारये ।
केन रूपेण वा विष्णुः प्रीतः स्याद्धि वदाशु माम् ।। २ ।।

ब्रह्मोवाच

विष्णुयोग्यं च यद्द्रव्यं यन्मूलं यत्फलं नृप ।
तद्वदामि महीनाथ निशामय समाहितः ।। ३ ।।
रम्भाफलानि दिव्यानि परिपक्वानि विष्णवे ।
अपक्वं च सदा भक्त्या दद्याच्च नारिकेलकम् ।। ४ ।।
फलमाम्रं तथा दद्यात्पक्वं वाऽपक्वमेव वा ।
पनसादिफलञ्चैव तथा तालफलं पुनः ।। ५ ।।
दाडिम्बफलमादेयं नागरङ्गफलं तथा ।
बादरीफलकं चैव कर्कटीफलकं तथा ।। ६ ।।
दद्याद् भक्तियुतो राजन् जलजं शृङ्गिकाफलम् ।
गुवाकफलमादेयं पयःपेटीचयं पुनः ।। ७ ।।

द्राक्षाफलानि रम्याणि दद्यादिक्षुचयं नृप ।
कन्दमूलानि रम्याणि कमलाफलमुत्तमम् ।। ८ ।।
लाजानां नारिकेलानां दुग्धशर्करयोस्तथा ।
शर्करांश्च तथा दद्याद्दिव्यांश्च नृपसत्तम ।। ९ ।।
भर्जितं शर्करापक्वं चणकं चारुसोह्लकम् ।
नारिकेलाद्रिकयुतं सिताचूर्णसमन्वितम् ।। १० ।।
धौतमुद्गं च तद्दद्याद्दामोदरमुदे नृप ।
दद्यान्मुरारये भक्त्या तिलमोदकमुत्तमम् ।। ११ ।।
एतानि फलमूलानि संस्कृत्य वीक्षणादिना ।
निवेदयामि मन्त्रेण पूजकोऽपि समर्पयेत् ।। १२ ।।
पञ्चामृतं न कुर्य्याद् वै केवलं च समर्पणम् ।
आर्द्रकस्य च दध्नश्च मातुलुङ्गफलस्य च ।। १३ ।।
लवणस्य जलस्यापि न च कुर्य्यात्समर्पणम् ।
लोभाद्वा पूजकेनापि समर्प्य चेन्नृपोत्तम ।। १४ ।।
तत्सर्वं राक्षसैर्ग्राह्यं नो गृह्णाति च तद्धरिः ।
तद्दोषतः पूजकोऽसौ राक्षसः स्यादसंशयः ।। १५ ।।
ततो भक्त्या केशवाय पंक्तिमध्ये नृपोत्तम ।
अन्नसंयोगि तद्दद्यात्परत्र हितकाम्यया ।। १६ ।।
जलं द्विभागं विमलमेकभागं सितां पुनः ।
आमिक्षां दुग्धसारं च पक्वरम्भाफलानि च ।। १७ ।।
एतत्सर्वं त्वेकभागं सर्वमेकत्र भाजने ।
सम्यक् तन्मेलनं कृत्वा तत्र कर्पूरचूर्णकम् ।। १८ ।।
मरीचक्षोदनिचयं निक्षिप्य क्षितिपोत्तम ।
दद्यादमृतकुण्डं च पाककारविनिर्मितम् ।। १९ ।।

पङ्क्तिमध्येऽपि दातव्यं नान्यत्रापि कदाचन ।
पक्वाम्रफलजालानां रसं तावत्परिष्कृतम् ।। २० ।।
पनसानां तथा दिव्यं रसं दुग्धसमन्वितम् ।
तथैव पाककारोऽसौ पङ्क्तिमध्ये हि योजयेत् ।। २१ ।।
नान्यत्र नृपतिः कुर्य्याद्विष्णवे च कदाचन ।
पाकशालां विना कोऽपि किञ्चिदन्यत्र सत्तम ।। २२ ।।
न कुर्य्याद्विष्णुनैवेद्यं घृताग्निपरियोगतः ।
तथा जलाग्निसंयोगो न दद्यात्तच्च विष्णवे ।। २३ ।।
अथोपचारपात्राणां दिव्यस्था यादृशी भवेत् ।
तन्निशामय तत् क्षिप्रं वदतो मे नृपोत्तम ।। २४ ।।
आसनाद्युपचाराणां प्रत्येकं रविसंख्यकम् ।
फलं तस्याप्यभावेऽपि तदर्द्धं स्यात्तदर्द्धकम् ।। २५ ।।
तदभावे पलमात्रं ततो न्यूनं न च क्वचित् ।
स्नानोपचारपात्रं स्याद्दशद्वयपलं नृप ।। २६ ।।
तदभावे तदर्द्धं स्यात्तस्याभावे तदर्द्धकम् ।
धूपदीपनयोः पात्रं कलापलसमन्वितम् ।। २७ ।।
तदभावे चाष्टपलं तदभावे चतुःपलम् ।
वर्त्तुलं धूपपात्रं स्यान्मृणालग्रन्थिसंयुतम् ।। २८ ।।
पद्माकारं च दीपस्य पात्रं स्याद्धरणीपते ।
कर्णिकाजलसंयुक्तमष्टपत्रं मनोहरम् ।। २९ ।।
अथवा सप्तपत्राढ्यं पञ्चपत्रमथापि वा ।
मृणालग्रन्थिसंयुक्तं यतस्तुष्टो भवेद्भुवि ।। ३० ।।
वर्त्तुलाकारपादं स्यात्कलाङ्गुलसमायितम् ।
एवं धूपस्य दीपस्य पात्रं स्याद्धरणीपते ।। ३१ ।।

जलपात्रं भवेत्तावत्कलापलविनिर्मितम् ।
नाधिकं चैव न्यूनमन्यथा निष्फलं भवेत् ।। ३२ ।।
जलनिर्गमनार्थं वै ह्युदरे नालसंयुतम् ।
तन्नालोपरि चक्रं च कुर्य्यात्पङ्कजमेव वा ।। ३३ ।।
इत्येवं जलपात्रं च प्रत्येकं भक्तिभावतः ।
प्रसूनभाजनं चैव कर्त्तव्यं नृपसत्तम ।। ३४ ।।
दशद्वयपलैः क्लृप्तमेकाङ्गुलसमुच्छ्रितम् ।
अष्टादशाङ्गुलैस्तावत् समन्ताद्विस्तृतिः स्फुटम् ।। ३५ ।।
नैवेद्यभाजनं कुर्य्यात्सहस्रपलसम्मितम् ।
मनोज्ञं वर्त्तुलाकारं सचक्रोपरिराजितम् ।। ३६ ।।
महायतियुतं राजन् रविमण्डलभास्वरम् ।
एवं विधं महीनाथ भोजनार्थं च भाजनम् ।। ३७ ।।
कर्त्तव्यं कमलाभर्त्तुः प्रीतिवर्द्धनकारकम् ।
शङ्खाकारं तथा कुर्य्यात् त्रिपादपरिशोभितम् ।। ३८ ।।
वेदाङ्गुलोन्नतियुतं सप्तधातुविनिर्मितम् ।
चतुरङ्गुलमानेन समन्ताद् वर्त्तुलायितम् ।। ३९ ।।
पलद्वयप्रमाणेऽस्मिन् वह्निमण्डलमर्च्चयेत् ।
ततः शङ्खं नृपश्रेष्ठ स्थापयेच्च यथाविधि ।। ४० ।।
घण्टां कुर्य्यान्महाराज देवदेवार्च्चने तदा ।
द्वात्रिंशत् पलसम्भूतात् तत्पिण्डं चतुरङ्गुलम् ।। ४१ ।।
कुर्य्यात्तथेव तद्दैर्घ्यं तज्जिह्वां चतुरङ्गुलाम् ।
कुर्य्याद्देवाङ्गुलं दण्डं कण्ठः स्यादङ्गुलार्द्धकः ।। ४२ ।।
तद्दण्डोपरि सत्पीठं कुर्य्यात्कुण्डप्रमाणतः ।
तत्रैव स्थापयेद्रूपं गारुडं तदभावतः ।। ४३ ।।

चक्रं च हरिपूजायामेवं घण्टां नियोजयेत् ।
अथ पूजावसानेऽपि नानारत्नविनिर्मिते ।। ४४ ।।
पात्रे पवित्रे ताम्बूलं मञ्जुलं क्रमुकान्वितम् ।
लवङ्गजातिकायाश्च फलयुक्तं तथा नृप ।। ४५ ।।
एलाफलसमायुक्तं कर्पूरक्षोदमिश्रितम् ।
दद्यात् प्रीतियुतः श्रीमान् कमलापतये तदा ।। ४६ ।।
पाकद्रव्येषु ताम्बूलं न क्षिपेच्च कदाचन ।
पाकशालान्तरे राजंस्तन्नामानि न धारयेत् ।। ४७ ।।
यतो वै भोजनस्यान्ते ताम्बूलानां समर्पणम् ।
भोजनात् प्राक् तस्य नामधारणे रोषभाग् विभुः ।। ४८ ।।
तत्पात्राणां यदा भूप च्छिद्रं च स्फोटकं तथा ।
अयोग्यं विष्णुपूजायां नूतनं तत्तु कारयेत् ।। ४९ ।।
नैवेद्ये पाकभवनान्नीयमानेऽतिशोभने ।
न पतेत् कस्यचिद्दृष्टिस्तत्र तावच्चरेन्नृप ।। ५० ।।
रविचन्द्रमसौ पाकान्न स्पृशेतां च तत्र वै ।
तदाच्छादनकं कृत्वा विष्णुप्रीतिं च वर्द्धयेत् ।। ५१ ।।
इत्थं प्रकारतो भूप विष्णोस्तस्य परात्मनः ।
नीतिर्भवेच्च नीलाद्रौ त्वत् प्रीत्यर्थं प्रकाशितम् ।। ५२ ।।
विष्णुपूजासु राजर्षे यदुक्तं च मयाधुना ।
कर्त्तव्यं भवता तद् वै प्रत्यहं भक्तिभावतः ।। ५३ ।।
कर्त्तव्यं च तदा विष्णुर्न प्रीतोऽपि कदाचन ।
दैवात् प्रमादात् पुरतो देवदेवस्य भूपते ।। ५४ ।।
विकृतौ जायमानायां यद्भवेत्तद्वदाम्यहम् ।
देवाग्रतो द्वारपालद्वयपर्य्यन्तमन्तरा ।। ५५ ।।

उत्सर्गो वा वमिर्वापि कस्य मूढमतेर्यदि ।
जायते नृपते तावद्वाससाच्छादयेद्धरिम् ।। ५६ ।।
ततः शीघ्रं शोधयित्वा गोमयोदकसेचनम् ।
पाषाणच्छेदनं कुर्य्यात्सुधारसविलेपनम् ।। ५७ ।।
भूयो भूयो गन्धजलैर्धौतव्यं धूपयेत्ततः ।
सुगन्धवस्तुना शीघ्रं पूर्ववत्स्नापयेद्धरिम् ।। ५८ ।।
हर्य्यर्थं गन्धपुष्पाणि संस्थितानि च यानि वै ।
विष्णोरयोग्यभूतानि सर्वाणि प्रक्षिपेद्बहिः ।। ५९ ।।
द्वारपालद्वयस्याग्रे कुत्रचिद् विकृतिर्भवेत् ।
तच्छौधयेद्द्रुतं भूप गोमयोदकसेचनम् ।। ६० ।।
सुधारसैश्च संलिप्य संस्कारैश्च प्रकल्पयेत् ।
अज्ञातविकृतौ मार्गे नयेच्चेद्देवसन्निधिम् ।। ६१ ।।
नैवेद्यं तत्र संन्यस्य ज्ञायते विकृतिः पुनः ।
तन्नैवेद्यं बहिः कुर्य्यान्महास्नानं समाचरेत् ।। ६२ ।।
स्वयं स्नात्वा शुद्धतमे मार्गे नैवेद्यमानयेत् ।
जाते भूप यदा भूयो गमने विकृतिं पुनः ।। ६३ ।।
जातं पाकगृहे यच्च तत्सर्वं च बहिः क्षिपेत् ।
स्नात्वा पुनः शुचिर्भूत्वा नूतनं पाकमुत्तमम् ।। ६४ ।।
कृत्वा नैवेद्यमानेयमन्यथा रौरवं व्रजेत् ।
वैनतेयस्य पृष्ठेऽपि नैवेद्ये भोगमण्डपे ।। ६५ ।।
स्थिते यथा दैवतोऽपि जायते विकृतिर्नृप ।
तन्न देयं च नैवेद्यं विष्णवेऽपि कदाचन ।। ६६ ।।
देवनैवेद्ययोर्मध्ये विकृतिर्यदि जायते ।
अयोग्यं तच्च नैवेद्यं केशवाय न दापयेत् ।। ६७ ।। ।

लोभासक्तः पूजकोऽपि यदा तस्य समर्पणम् ।
कुर्य्यात्तद्राक्षसैर्ग्राह्यं देवो रुष्टो न संशयः ।। ६८ ।।
स पूजको राक्षसः स्यान्नरकं प्रतिपद्यते ।
तत्राधिकारिणः सर्वे पच्यन्ते रौरवे ध्रुवम् ।। ६९ ।।
एतच्छ्रुत्वा प्रतिनिधिर्य एव नृपसत्तम ।
ततः प्रदापयेत्तत्तु हरये विकृते सति ।। ७० ।।
तदा प्रतिनिधिर्भूप पूजकश्च नरोत्तम ।
निरये पच्यमानास्ते यावदाचन्द्रतारकम् ।। ७१ ।।
तस्मात् संयतचित्तास्ते भजेयुः पूजनं हरेः ।
राजा तत्र मनो दत्त्वा सावधानो भवेत्सदा ।। ७२ ।।
ततः प्रतिनिधिस्तावद्राज्ञः कल्याणहेतवे ।
सर्वदा सावधानः स्याद् विष्णुपूजासु तत्परः ।। ७३ ।।

सूत उवाच

इत्येवं चरितं विष्णोर्नैवेद्यस्य च निर्णीतम् ।
इन्द्रद्युम्नस्य भूपते पुरतः पद्मयोनिना ।। ७४ ।।
पूर्वं जैमिनिना पृष्टं व्यासेनोक्तं मुनीश्वरः ।
इदानीं कथितं विप्रा युष्माकं पुरतो हरेः ।। ७५ ।।
श्रीजगन्नाथदेवस्य चतुर्द्धा रूपधारिणः ।
चरितं परमं पूतं नीलाचलपतेः प्रभोः ।। ७६ ।।
इन्द्रद्युम्नेन तेनैव यत्पृष्टं च पुनर्द्विजाः ।
ब्रह्मणा कथितं यच्च तद्वदामि च साम्प्रतम् ।। ७७ ।।

ब्रह्मोवाच

स्पृशेत् कोऽपि द्विजो राजन् विना स्पर्शाधिकारिभिः ।
विष्णुं महाभिषेकेण स्नापयेदतिभक्तितः ।। ७८ ।।

क्षत्रियश्च यदा वैश्यः शूद्रश्च दैवतः स्पृशेत् ।
तदाचरेन्महास्नानं द्विगुणं क्रमशो हरेः ।। ७९ ।।
देवे क्षत्रियसंस्पृष्टे महास्नानद्वयं भवेत् ।
वैश्यैर्वारत्रयं शूद्रैश्चतुर्वारं तदाचरेत् ।। ८० ।।
पूजायां जलपात्रं वै ब्राह्मणं च विना नृप ।
न स्पृशेत् कोऽपि तत्पात्रं तत्र यत्नं महत्कुरु ।। ८१ ।।
न च सोऽपि स्पृशेद्राजन् चेत् प्रसादकरस्तथा ।
स्पृशेत् यदा च तत् पात्रमग्नौ दग्ध्वाथ मार्जयेत् ।। ८२ ।।
पूजायां जगदीशस्य त्वन्यथा स्यात् सुदुष्कृतम् ।
पाककारं विना विप्राः पाकद्रव्यनिवेदनात् ।। ८३ ।।
पात्रहोत्रादयः पूर्वं न स्पृशेयुः कदाचन ।
स्पृष्टं तव भवेत्तावदयोग्यं जायते ध्रुवम् ।। ८४ ।।
आचार्य्येण तु संस्पृष्टे नैवेद्ये विष्णुसौख्यदे ।
दोषादोषौ न विद्येते तद्देयं विष्णवे मुदा ।। ८५ ।।
विश्वावसोरन्वयजैर्मनुजैर्जगतां पतौ ।
स्पृष्टे सामान्यविधिना स्नापयेद्विष्णुमव्ययम् ।। ८६ ।।
स्पृष्टे हरौ नृपश्रेष्ठ विद्यापतिकुलोद्भवैः ।
तत्र दोषो न कश्चिद् यत्त्वनिष्टात्पूजकस्य ते ।। ८७ ।।
सावधानोऽत्र विषये राजा स्यादतिभक्तितः ।
सुखमारोग्यमैश्वर्य्यं भुङ्क्ते नरपतिः स्वयम् ।। ८८ ।।
इत्येवं भवतामग्रे नीलाचलनिवासिनः ।
हरेः प्रसङ्गाच्चरितं वर्णितं तद्द्विजोत्तमाः ।। ८९ ।।
व्यासजैमिनयोः पूर्वं संवादे च मया श्रुतम् ।
इन्द्रद्युम्नं च राजानं विधिना प्रतिभाषितम् ।। ९० ।।

तत्सर्वं विधिवत् प्रोक्तं यथा ज्ञातं मया पुनः ।
कथितं वः पुरस्ताद्वै किमन्यत् श्रोतुमिच्छथ ।। ९१ ।।

सूत उवाच

तुर्यास्याननपङ्कजाद्विगलितं रम्यं वचः सादरं
श्रुत्वा हृष्टतरोऽथ भूपतिवरो जातः कृतार्थस्तदा ।
वाचा विस्फुरदुत्सवस्य परया शुश्रूषया तं पुनः
ब्रह्माणं प्रणिपत्य नम्रशिरसा पप्रच्छ भूयो द्विजाः ।। ९२ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये
एकादशोऽध्यायः ।।

द्वादशोऽध्यायः

इन्द्रद्युम्न उवाच

ब्रह्मन् सप्तसु वारेषु तिथिष्वपि प्रजापते ।
नक्षत्रेषु च तद् विष्णोः कुत्र किं वा ध्रुवं भवेत् ।। १ ।।
तद्वदाशु सुरश्रेष्ठ सर्वज्ञस्त्वं यतोऽधुना ।
जनानां तु हितार्थाय मम कल्याणहेतवे ।। २ ।।

ब्रह्मोवाच

साधु साधु नृपश्रेष्ठ त्वमेव वैष्णवोत्तमः ।
यतो नीलाद्रिनाथस्य चरितं श्रवणोद्यतः ।। ३ ।।
कथयामि रहस्यं ते विष्णोः पण्डितवासरे ।
शृणु तावद् यथालेख्यं कर्म स्याज्जगतां पतेः ।। ४ ।।
तस्मिन् मध्याह्नपूजान्ते यत्र यत्र स्थले पुनः ।
स्व स्ववर्णं मनोहारिचित्रं कुर्य्याच्च चित्रवित् ।। ५ ।।

कोऽपि नालोकयेदस्मिन् काले कालस्वरूपिणम् ।
विष्णुं वा बलभद्रं वा भद्रां वाथ शुभप्रदाम् ।। ६ ।।
चित्रं ते च ततो विप्रास्त्वाचार्यो विधिवत्पुनः ।
पञ्चामृतेन तेनैव स्नापयेद्विष्णुमव्ययम् ।। ७ ।।
दध्नो दशपलेनैव कुर्य्यात्पञ्चपलं पयः ।
चतु:पलं मधु राजन् घृतं त्रिपलमेव च ।। ८ ।।
शर्करैकपला दिव्या सर्वमेकत्र भाजने ।
कृत्वा तेनैव संप्राप्य प्रतिविम्बे हरेस्तथा ।। ९ ।।
पण्डितानुदिने विष्णोर्भोगलालसचेतसः ।
चेष्टेयं जायते राजन् विष्णोश्च प्रीतिवर्द्धिनी ।। १० ।।
ततो गुरोर्दिने प्रातः पूजान्ते कमलां तथा ।
विश्वधात्रीं च प्रत्यर्च्चां धाता च वारिणा पृथक् ।। ११ ।।
संस्नाप्य तामलंकृत्य गन्धमाल्याम्बरैः पृथक् ।
पञ्चोपचारतः पूजां पूजयेच्च यथाविधि ।। १२ ।।
ततो वन्दापनां कृत्वा स्वपदे च न्यसेत् पुनः ।
ततः सायाह्नपूजान्ते प्रत्यर्च्चां च हरेः पुरः ।। १३ ।।
आनीय दद्याल्लक्ष्मीं च ह्याज्ञामाल्यं पृथक् तदा ।
आज्ञां देहि जगन्नाथ देव देव जनार्द्दन ।। १४ ।।
एकान्तक्रीडनार्थाय प्रत्यर्च्चां च रमां प्रभो ।
इति संप्रार्थ्य देवेशं तदाचार्य्यो हरेस्तनोः ।। १५ ।।
दक्षिणाद् वामतो मालामर्पयेत्कृष्णमिन्दिराम् ।
लक्ष्मीं च पुरतः कृत्वा प्रत्यर्च्चां च ततः परम् ।। १६ ।।
आनीय दिव्ययानेऽपि संस्थाप्य भ्रामयेच्छनैः ।
श्वेतच्छत्रादिकं राजन् धारयेच्च ततः पुरः ।। १७ ।।

घण्टामधुरिकादीनां वाद्यानां नदतां स्वरैः ।
महोत्सवं कारयित्वा जयनिःस्वनसंयुतम् ।। १८ ।।
प्रासादं परमं विष्णोर्भ्रामयित्वा पुनः शुभे ।
स्थाने कुत्रापि संस्थाप्य निर्जने क्षणमात्रतः ।। १९ ।।
पञ्चोपचारविधिना पूजयेच्च पृथक् पृथक् ।
पूजासमयमारभ्य गीतं नृत्यं भवेत्तदा ।। २० ।।
वन्दापनाविधिं कृत्वा स्थापयेत् स्वपदे पुनः ।
बृहस्पतिदिनेष्वेवं विष्णोस्तस्योत्सवं महत् ।। २१ ।।
केवलं न भवेदेवमेकादश्यां गुरोर्दिने ।
जन्मकल्पनमारभ्य राक्षसानां वधावधि ।। २२ ।।
तथैव न भवेन्नक्तं गुरुवासरपूजनम् ।
तथैव नृपते स्नानाद् गुण्डिचामवधि प्रभोः ।। २३ ।।
दिवानक्तं न कुर्याद्वै गुरुवासरपूजनम् ।
तेनैव कुर्यादित्येतत्कथितं ब्रह्मणा पुरा ।। २४ ।।
इन्द्रद्युम्नं प्रति नृपं प्रवृत्तोऽयं विधिस्ततः ।
इत्येवं श्रीभगवतो वारे पूजननिर्णयम् ।। २५ ।।
कथयित्वा तिथिष्वेव यद् भवेत्तद्वदाम्यहम् ।
अथेदानीं नृपश्रेष्ठ पावने च हरेर्दिने ।। २६ ।।
सायाह्ने जगदीशं तु लेपयेच्च चतुःसमैः ।
आसनादि समाचर्य्याचार्य्योऽङ्गे भक्तिभावतः ।। २७ ।।
अग्निशर्मा बलं तावद् भद्रां ब्रह्मापि लेपयेत् ।
ततस्तु पूजकः श्रीमान् प्रार्थयेज्जगदीश्वरम् ।। २८ ।।
नमस्तुभ्यं जगन्नाथ भक्तानुग्रहकारकः ।
आज्ञां देहि महावाहो बहिरुत्सवहेतवे ।। २९ ।।

इत्युच्चार्य्य नमस्कृत्य भक्तिभावसमन्वितः ।
आचार्य्यो जगदीशस्य माल्यं दक्षिणभागतः ।। ३० ।।
आनीय दद्यात् प्रत्यर्च्चां प्रति भूपतिसत्तम ।
सिंहासनात् पुनस्तं च ह्याज्ञां माल्यविभूषितम् ।। ३१ ।।
शिविकोपरि संस्थाप्य भूषयेच्छत्रचामरैः ।
घण्टामर्द्दलशङ्खानां काहालस्य च निःस्वनैः ।। ३२ ।।
सेवकैरखिलैस्तावद् वेष्टितं सज्जनैस्तथा ।
भ्रामयेदेकवारं च प्रासादं जगतां पतेः ।। ३३ ।।
गीते नृत्ये गायमाने द्वारपालान्तिके पुनः ।
संस्थाप्य पूजयेद्भक्त्याचार्य्यः पञ्चोपचारतः ।। ३४ ।।
कर्पूरवर्त्तिभिः कुर्य्यान्नीराजनमनुत्तमम् ।
ततो दूर्वाक्षतान् दत्त्वा सप्तवर्त्त्या नृपोत्तम ।। ३५ ।।
नीराजयेत्ततस्तं वै स्वपदेऽपि निवेशयेत् ।
सायं पूजावसानेऽथ महानीराजनात्परम् ।। ३६ ।।
पुनर्नीराजनं कृत्वा नीलशैलपतेः प्रभोः ।
स्वर्णपात्रे पवित्रे च सर्पिषा परिपूरिते ।। ३७ ।।
रम्भापत्रेन्धने तत्र सूक्ष्मवस्त्राञ्चिते पुनः ।
नीराजनं च कर्त्तव्यमेवं कुर्याद् विचक्षणः ।। ३८ ।।
एतन्नीराजनं कृत्वा धृत्वाचार्यो बहिर्गतः ।
प्रासादभ्रमणं कृत्वा चक्रं चैवानुदर्शयेत् ।। ३९ ।।
तेनाग्निना ततो दीपं प्रासादोपरि सर्वतः ।
दर्शयेच्चन्द्रदीपं च सर्वस्मिंश्च हरेर्दिने ।। ४० ।।
तन्नीराजनजं तेजः पश्यतां पापनाशनम् ।
तस्मान्नृपतिशार्दूल पश्येद्वैकुण्ठलब्धये ।। ४१ ।।

एकादश्यां तिथौ तावद् भूषणैर्भूषयेद् यदि ।
तदा तृतीयपूजान्ते भगवन्तं जनार्द्दनम् ।। ४२ ।।
पञ्चामृतेन संस्नाप्य सर्वाङ्गे लेपयेत्ततः ।
दिव्यगन्धादिकं तावद् भूषयेन्माल्यभूषणैः ।। ४३ ।।
ततश्चतुर्थपूजान्ते कुर्य्यात् सदुपचारकैः ।
लक्ष्मीं तदग्रे संस्थाप्य नानालङ्कारभूषिताम् ।। ४४ ।।
धारयेद्धवलं छत्रं शोभनं केशवान्तिके ।
अग्निशर्मा तदा काले चन्दनं चारुशोभनम् ।। ४५ ।।
दिव्यं दामनकं माल्यं तथा पीताम्बरद्वयम् ।
दद्यात्पङ्कजनाभाय भक्तियुक्तो नृपोत्तम ।। ४६ ।।
ततः कर्पूरवर्त्त्या च नीराजनमनुत्तमम् ।
कृत्वा दूर्वाक्षतं दत्त्वा सप्तवर्त्त्या मनोज्ञया ।। ४७ ।।
ततो वन्दापनं कुर्यात्पिष्टकावर्त्तिभिर्बलम् ।
नीराजयेत्तदाचार्य्यो भद्रां ब्रह्मा नृपोत्तम ।। ४८ ।।
तथैव विधिवद् भक्त्या तयोर्वन्दापनं चरेत् ।
ततो वन्दापनान्ते च राजा पुष्पाञ्जलित्रयम् ।। ४९ ।।
प्रक्षिपेदतिभक्त्या च ततः कर्पूरवर्त्तिभिः ।
नीराजयेच्चामराणां व्यजनस्य च चालनम् ।। ५० ।।
कृत्वा नव्यांशुकयुगं धृत्वा भुवि नमेन्नृप ।
ततो लक्ष्म्या निजस्थाने स्थापयेन्नृपसत्तम ।। ५१ ।।
श्वेतच्छत्रं बहिः कुर्य्यात्ततो देववराग्रतः ।
तच्चारुचन्दनं रम्यं माल्यं वस्त्रं नृपः स्वयम् ।। ५२ ।।
पूर्णया भक्तियुक्तोऽपि कृतार्थोऽहमिति ब्रूवन् ।
तदभावेऽप्यग्निशर्मा तस्याभावेऽपि पूजकः ।। ५३ ।।

गुरुवासरसंयोगो यदा राजान् हरेर्दिने ।
एवं विधिः स्यान्नृपते नीलाद्रौ चक्रपाणिनः ।। ५४ ।।
चन्द्रवासरसंयोगे यदा जाते हरेर्दिने ।
लोकनाथेन देवेन तथा कृष्णं समर्च्चयेत् ।। ५५ ।।
अमावास्यादिने विष्णोः प्रातः पूजावसानतः ।
नारायणप्रतिकृतिं देवाग्रे स्थापयेद्बुधः ।। ५६ ।।
ततः सम्प्रार्थयेद्देवं भगवन्तं जनार्द्दनम् ।
आज्ञापय महाबाहो तीर्थराजान्तिकं पुनः ।। ५७ ।।
समागमाय शब्दस्य प्रत्यर्च्चां प्रति सम्प्रति ।
इत्युच्चार्य देवमालां देवाङ्गानां समर्पयेत् ।। ५८ ।।
आदेशमालां संगृह्य दत्त्वा चानीयतां पुनः ।
महेभरदनोद्भूते याने दिव्ये निवेशयेत् ।। ५९ ।।
छत्रचामरवाद्यादि स्फुरदुत्सवसंयुतम् ।
पताकाकुलसंयुक्तं तीर्थराजतटं पुनः ।। ६० ।।
स्वर्णवेत्रधरः श्रीमान् पुरो गच्छन् महोत्सवम् ।
तदा प्रतिनिधिः कुर्याद्गीतनृत्यादिभिर्हरेः ।। ६१ ।।
तीर्थराजोदकैस्तत्र नारायणमतः परम् ।
कुशैरष्टाक्षरेणैव चार्च्चयेद् वै त्रिवारतः ।। ६२ ।।
ततो यमेश्वरस्यापि शिवस्य निलयान्तिकम् ।
नीत्वा तत्रैव संस्थाप्य पूजयेत्स्नानपूर्वकम् ।। ६३ ।।
पञ्चोपचारविधिना पूजान्ते नृपसत्तम ।
वन्दापनां ततः कुर्यात् प्रासादं प्रति तं नयेत् ।। ६४ ।।
अमावास्यासु सर्वासु कुर्यादेवं विचक्षणः ।
नेत्रोत्सवे तु नो कुर्यादमावास्याविधिं नृप ।। ६५ ।।

अमावास्यादिने तावज्जाते सूर्यग्रहे यदि ।
तद्दिनेऽपि हरेस्तस्य नित्यस्नानादिकर्म तत् ।। ६६ ।।
कृत्वा पाकोद्भवैरन्नैर्विना कुर्य्यात् प्रपूजकः ।
नारिकेलस्य दुग्धस्य शितायाश्च विकारजैः ।। ६७ ।।
नैवेद्यैर्नृपशार्द्दूल प्रातः पूजां समाचरेत् ।
पूजान्तेऽपि ततः कुर्य्यादमावास्याविधिस्तदा ।। ६८ ।।
आमुक्तिकालमेतस्य विष्णोस्तस्य परात्मनः ।
प्रातः पूजां विना किञ्चिन्न कुर्य्याच्च कदाचन ।। ६९ ।।
राहुणा मुच्यमानेऽपि भास्करे नृपसत्तम ।
महास्नानविधिं कृत्वा पूर्ववत् पाकसम्भवैः ।। ७० ।।
नैवेद्यैस्तोषयेद् विष्णुं विधिना भक्तिभावतः ।
अथ नक्षत्रसंयोगे जगदीशस्य यादृशी ।। ७१ ।।
पूजा स्यात्तां प्रवक्ष्यामि शृणु भूपतिसत्तम ।
श्रवणा रोहिणी ज्येष्ठा यदा स्याज्जगतां पतेः ।। ७२ ।।
तदा पूजाधिका कार्या राज्ञः पुष्टिविवर्द्धिनी ।
प्रातः पूजावसानेऽपि पुनः पूजार्थमादरात् ।। ७३ ।।
शितद्रव्यैश्च नैवेद्यं कृत्वा देवाग्रतो न्यसेत् ।
सन्निधिं प्रति प्रत्यर्च्चां विष्णोस्तस्य समानयेत् ।। ७४ ।।
पञ्चोपचारतो विष्णुं पूजयेद्भक्तिभावतः ।
पूजान्ते तु तदा कार्यो रोहिणीनन्दनं बलम् ।। ७५ ।।
नीराजयेत्तदा भद्रां ब्रह्मा भद्रप्रदायिनीम् ।
अग्निशर्मा जगन्नाथं कर्पूरावर्त्तिभिर्नृप ।। ७६ ।।
तथा दूर्वाक्षतान् क्षिप्त्वा सप्तवर्त्त्या मनोज्ञया ।
नीराजयेत्तदा प्राज्ञः पिष्टकावर्त्तिभिः पृथक् ।। ७७ ।।

श्रवणायां सप्तवर्त्त्या बलं पिष्टकवर्त्तिभिः ।
रोहिण्यां च जगन्नाथं ज्येष्ठायां भद्रदायिनीम् ।। ७८ ।।
नीराजयेच्च देवांस्तान् प्रार्थयेदर्च्चकः पुनः ।
नीलाचलपते विष्णो जगन्नाथ नमोऽस्तु ते ।। ७९ ।।
प्रासादभ्रमलीलायै आज्ञापय सुरेश्वर ।
इति संप्रार्थ्य देवेशं पूजकः सर्वतत्त्ववित् ।। ८० ।।
विष्णोर्दक्षिणतो माल्ये प्रत्यर्च्चोपरि संन्यसेत् ।
ततो वन्दापनां कृत्वा याने दिव्ये पुनर्बहिः ।। ८१ ।।
संस्थाप्योत्सवसंयुक्तं प्रासादभ्रमणं नृप ।
कारयित्वा पुनर्विष्णोरग्रे चानीयतां पुनः ।। ८२ ।।
तदेव तेजः परमं सन्निधाय रमापतौ ।
पुनस्तां स्वपदे रम्ये स्थापयेत्परमादरात् ।। ८३ ।।
यो भूपः कारयेद् विष्णोर्दारुब्रह्मस्वरूपिणः ।
वारेषु च तिथिष्वेषु नक्षत्रेषूत्सवं परम् ।। ८४ ।।
मासि मासि द्विजश्रेष्ठा नित्यं चैवानुवत्सरम् ।
सर्वयज्ञफलं प्राप्य तथा सर्वमनोरथम् ।। ८५ ।।
सुखं भुक्त्वा क्षितौ चान्ते विष्णुलोकं व्रजेत्पुनः ।
कोटिकल्पावधिः श्रीमद् विष्णोः सारूप्यमुक्तिभाक् ।। ८६ ।
ये पश्यन्ति तथा भक्त्या देवदेवं तदानघ ।
मुक्तास्ते तु नमस्तेषां गर्भवासो न विद्यते ।। ८७ ।।

सूत उवाच

इत्येवं गदितो व्यग्रा जैमिनिं प्रति भो द्विजाः ।
श्रुतं पुरा पुराणस्य पुरुषस्य जगत्पतेः ।। ८८ ।।
नीलाचलनिवासस्य चरितं परमाद्भुतम् ।
पावनं सर्वलोकानां नानाभीष्टफलप्रदम् ।। ८९ ।।

कथितं भो द्विजश्रेष्ठा गुह्यं माङ्गल्यवर्द्धनम् ।
इन्द्रद्युम्नस्य भूपस्य पृच्छतः पुरतो विधिम् ।। ९० ।।
यदुक्तवांश्च तत्सर्वं पुण्यं पापविमोचनम् ।
प्रकाशितं मया तद्वै युस्माकं पुरतोऽधुना ।। ९१ ।।
एतत् श्रोतुं जनो यस्तु वर्तते भक्तितत्परः ।
महापापयुतो वाऽपि मुक्तिः सोऽपि लभेद्ध्रुवम् ।। ९२ ।।
श्रावयेदतिभक्त्या यश्चरितं जगतां पतेः ।
सोऽपि पापविनिर्मुक्तो विष्णुलोके महीयते ।। ९३ ।।
श्रीनीलाचलनाथचारुचरितं पुण्यं पुराणं च ये
जल्पन्ति क्षितिमण्डले भृशतरं शृण्वन्ति भक्त्या थवा ।
लब्ध्वा शर्म परं मनोरथतमं पुत्रप्रपौत्रान्विताः
सर्वे तद्धरिवेश्मकल्मषहरं शेषे गमिष्यन्ति ते ।। ९४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये वारतिथिनक्षत्रपूजा-प्रकाशनं नाम द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः

जगन्नाथस्य निलये प्रासादे यवनादयः ।
प्रविशन्ति यदा किं स्यात्तद्वै कथय पद्मज ।। १ ।।
मरिष्यन्ति यदा केचिद् भवने शोभने हरेः ।
तदेव किं स्याद् भो ब्रह्मन् तत्र तत्कथयाधुना ।। २ ।।

ब्रह्मोवाच

यदा प्रमादाद् भवने पावने च हरेः क्वचित् ।
प्राकारदेहलीं नीचो यवनो यदि लङ्घयेत् ।। ३ ।।

तदा भवेन्महादोषः क्षीणायुर्नृपतिर्भवेत् ।
चित्तभ्रमोऽपि नृपतेर्देशभङ्गो भवेत्तदा ।। ४ ।।
प्रवेशं यवनानां च श्रुत्वा राजा ससत्वरः ।
दण्ड्यानां दण्डदो भूयात्सावधानो भवेत्तदा ।। ५ ।।
नैवेद्यार्थं च यद् द्रव्यं पाकशालान्तरे स्थितम् ।
तत्सर्वं जलसंयोगं दीर्घखाते निपातयेत् ।। ६ ।।
गन्धपुष्पादिकं तावद् द्रव्यं वै पातयेत्ततः ।
गोमयोदकजलेन प्रासादं क्षालयेत्ततः ।। ७ ।।
सुधालेपनसंस्कारं कारयित्वा पुनर्जलैः ।
धौतव्यं सर्वथा विष्णोः प्रासादश्च समन्ततः ।। ८ ।।
पञ्चामृतेन तेनैव महास्नानं पुनर्नृप ।
कारयित्वा यथान्यायं सावधानो भवेत्ततः ।। ९ ।।

इद्रद्युम्न उवाच

महास्नानविधिं विष्णोश्चतुर्मुख वदस्व मे ।
तत्र कौतूहलं चित्ते वर्तते मम साम्प्रतम् ।। १० ।।

ब्रह्मोवाच

साधु पृष्टं महाराज महास्नानविधिं हरेः ।
कथयामि रहस्यं ते सावधानतया शृणु ।। ११ ।।
द्विशतं पलमेव स्यात् पयसश्च तथा दधि ।
शतषष्टिपलं सर्पिश्चत्वारिंशत्पलं मधु ।। १२ ।।
शर्करा पञ्चविंशत्यधिकपलशतान्विता ।
गोधूमचूर्णं विदितं त्रयोदशपलं तथा ।। १३ ।।
पुष्पोदकं शतं षण्णां चतुःशतकुशोदकम् ।
द्वासप्तत्रिशतं तावद्गन्धोदकमनुत्तमम् ।। १४ ।।

द्रव्याणां नवकानां च सहस्रद्वयसंख्यकान् ।
पलांस्त्रिभागं कृत्वाथ स्थापयेत्पुरतो हरेः ।। १५ ।।
विष्णोराचमनार्थं च पयःपेटीत्रयं त्रयम् ।
पञ्च वा स्थापयेद् भक्त्या त्रयं सूक्ष्मांशुकस्य च ।। १६ ।।
आचार्यश्च ततः पीठे चोपविश्यासनादिकम् ।
दिग्बन्धनं भूतशुद्धिं प्रणवं मातृकां तथा ।। १७ ।।
कृत्वाथ विधिवत् पात्रं वारिणश्च परिष्कृतम् ।
तथा विधायाशु पुनरर्घ्यपात्रं परिष्कृतम् ।। १८ ।।
दत्त्वा तदुदकैः क्षिप्रं मार्जयेद्देवताशिरः ।
स्वमस्तकं देशिकेन्द्रः कुशैस्तदुदकं क्षिपेत् ।। १९ ।।
महास्नानीयवस्तूनां प्रोक्षणं मूलमन्त्रतः ।
पीठस्य भावनां कृत्वा तत्राष्टदलपङ्कजम् ।। २० ।।
विलिख्य पद्ममुद्रां तु दर्शयेन्नृपसत्तम ।
नवशक्त्यर्च्चनं कृत्वा कुर्यादावाहनादिकम् ।। २१ ।।
मातृकान्यासमाकुर्य्याद्देवताङ्गे यथाक्रमम् ।
गन्धं पुष्पं च धूपं च दीपं च सुपरिष्कृतम् ।। २२ ।।
मूलमन्त्रेण विप्रेन्द्रो दद्यात् श्रीपतये मुदा ।
वीक्षणादिकसंस्कारं कुर्य्यात्स्नानीयवस्तुनः ।। २३ ।।
प्रतिविम्बे जगन्नाथमर्घ्यपात्रोदकैः परम् ।
स्नापयेदथ मन्त्रैस्तैस्तत्तद् द्रव्यैश्च देशिकः ।। २४ ।।
पयः पृथिव्येति मनुस्तेनैव पयसा विभुम् ।
दधिक्रावणमन्त्रेण दध्ना च स्नापयेद् विभुम् ।। २५ ।।
तेजोऽसीतीति मन्त्रेण घृतेन स्नापयेत्सुधी ।
मधुना मधुवातेति स्नापयेद्भक्तिभावतः ।। २६ ।।

एष वः कुरवो राजा मन्त्रेणानेन भो नृप ।
शिताभिः स्नापयेद्देवं तदा मन्त्रविदांवरः ।। २७ ।।
याः फलान्येव मन्त्रेण पयः पेटीजलैर्नृप ।
देवायाचमनं दद्यादाकृष्णेनेति मन्त्रतः ।। २८ ।।
गोधूमचूर्णकैस्तावद् घर्षणं प्रतिविम्बके ।
आधारे कुत्रचिद् द्रव्यं संस्थाप्य प्रतिविम्बकम् ।। २९ ।।
बहिष्कृत्य पुनर्धौत्वा प्रत्येकं स्नापयेच्च तैः ।
प्रत्येकं च पृथक् दद्याज्जलधारां तदार्च्चकः ।। ३० ।।
पुष्पाणां च कुशानां च गन्धानां यजनं परम् ।
समुद्रज्येष्ठामन्त्रेण स्नापयेत्तज्जलैः पृथक् ।। ३१ ।।
मूलमन्त्रं समुच्चार्य्य स्नापयेद्भक्तिभावतः ।
सूक्ष्मनव्याम्बरैस्तावद् प्रोञ्छयेदतियत्नतः ।। ३२ ।।
महास्नानविधिं कृत्वा विष्णोस्तस्य यथाविधि ।
पूर्ववत्पाकशालायां वैष्णवाग्नौ च संहुनेत् ।। ३३ ।।
एतद्विधेरन्यथा चेद्राजा द्रोही हरेस्तदा ।
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।। ३४ ।।
तृतीयावरणे यावज्जनो मृत्युमवाप्नुयात् ।
पूर्वोक्तक्रमतो भक्त्या महास्नानादिकर्म यत् ।। ३५ ।।
यथाविधि विधिं तावत्कुर्य्यान्नृपतिसत्तम ।
क्रियते ब्राह्मणो यावत् प्रासादे नैव योगतः ।। ३६ ।।
जुहुयान्मन्त्रराजेन लक्षाहुतिमरिन्दम ।
सुवर्ण्णैश्च तदाचार्य्यं तोषयेद्दक्षिणार्पणात् ।। ३७ ।।
एवं महास्नानविधिर्विधिज्ञैर्देवसत्तमैः ।
कथितः सर्वशास्त्रेषु नीलाचलपतेः प्रभोः ।। ३८ ।।

विषये कमलाभर्त्तुर्वैगुण्यं यदि जायते ।
पृष्ट्वाचार्य्यं तदाचार्य्यात्तत्सर्वं नृपतिस्तदा ।। ३९ ।।
न कुर्याच्चेन्महान् दोषः सा पूजा निष्फला भवेत् ।
ज्ञात्वा यदाचरणीयं तत्सर्वं कर्त्तुमर्हसि ।। ४० ।।
तदभावे तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ।
नानाविधैश्च नैवेद्यैस्तोषयेत्परमेश्वरम् ।। ४१ ।।

सूत उवाच

ब्रह्मणा कथ्यमानं यदिन्द्रद्युम्नो महीपतिः ।
तच्छ्रुत्वा परमानन्दं भेजे भूसुरसत्तमाः ।। ४२ ।।
श्रुतिस्मृतिपुराणेषु गुप्तं यच्चरितं महत् ।
नीलाचलपतेस्तद् वै ब्रह्मणा च प्रकाशितम् ।। ४३ ।।
व्यासेनैतन्मुनिवरा जैमिनिप्रतिभाषितम् ।
सम्प्रत्येतन्मया तावद् वर्णितं भवतां पुरः ।। ४४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये त्रयोदशोऽध्यायः ।।

चतुर्दशोऽध्यायः

नमस्तेऽस्तु सुरश्रेष्ठ चतुर्मुख नमोऽस्तु ते ।
त्वत् प्रसादात् श्रुतं सर्वं नित्यपूजादिकं प्रभो ।। १ ।।
यदाह भगवान् साक्षाद् दारवं वपुरास्थितः ।
तासां विधिः कीदृशो वा यात्रास्ताः कीदृशास्तदा ।। २ ।।
उपयात्रास्तथा ब्रह्मन् ब्रूहि सर्वं महामते ।
तत्सर्वं श्रोतुमिच्छामि जनकल्याणहेतवे ।। ३ ।।

ब्रह्मोवाचः

साधु साधु नृपश्रेष्ठ धन्योऽसि त्वं महीपते ।
यतो नीलाद्रिसिंहस्य कथां श्रोतुं समादरः ।। ४ ।।
ज्येष्ठी स्नानोत्सवं चादौ कथयामि समासतः ।
तमाकर्णय राजर्षे शृण्वत्वां पापनाशनम् ।। ५ ।।
ज्येष्ठे मासि सिते पक्षे चतुर्द्दश्यां नृपोत्तम ।
मध्याह्नसमयं प्राप्य त्रिकालार्च्चासमापनम् ।। ६ ।।
विष्णोर्निगमनार्थं च काष्ठसोपानकल्पनाम्
कृत्वा मुखाम्भोजाद् वस्त्रं बहिष्कुर्य्यात्ततः परम् ।। ७ ।।
कृत्वा विष्णुमुखाम्भोजं वस्त्रैराच्छाद्य यत्नतः
पञ्चामृतेन संस्नाप्य वस्त्रगन्धादिभिर्हरिम् ।। ८ ।।
भूषयेद्दिव्यमाल्यैश्च चतुर्थार्च्चां ततश्चरेत् ।
तत्रोचितं च नैवेद्यं दद्याद् भक्त्या समन्वितः ।। ९ ।।
ततश्चतुर्थपूजान्ते शयनं रचयेद्धरेः ।
उत्सवेषु च सर्वेषु न कालनियमो भवेत् ।। १० ।।
कालव्यतिक्रमो दोषो नास्त्यत्र नृपसत्तम ।
मार्कण्डेयं प्रति श्रीमान् भगवान् भूतभावनः ।। ११ ।।
प्रसङ्गादुक्तवानेवं तस्माद्दोषो न विद्यते ।
ततस्तस्मिन् दिने भूप गते यामत्रये सति ।। १२ ।।
कूपस्य संस्कृतिं कुर्य्यादधिवासकृते तदा ।
वटस्योत्तरदेशेऽपि कूपोऽस्ति भुवि निर्मितिः ।। १३ ।।
स्नानार्थं जगदीशस्य नानातीर्थसमन्वितः ।
ततः कूपादग्निशर्मा ह्युद्धरेज्जलमुत्तमम् ।। १४ ।।
आचार्य्योऽथ शुचिर्भूत्वा कूपस्य परितस्ततः ।
दिग्देवेभ्यः बलिं दत्त्वा क्षेत्रपालं गणेश्वरम् ।। १५ ।।

तदार्च्चकस्य वचसो विप्रैर्नीत्वा जलं ततः ।
ब्रह्मणे तत् समर्प्याथ सावधानतया स्थितः ।। १६ ।।
ब्रह्मापि तज्जलं दिव्यं स्वर्णकुम्भेषु पूरयेत् ।
रौप्येष्वथ च ताम्रेषु त्वष्टोत्तरशतेषु च ।। १७ ।।
यथा शतपलाम्भुभिः पूर्णकुम्भस्तथा चरेत् ।
जलपात्राणि दिव्यानि वस्त्रावृतमुखानि वै ।। १८ ।।
अधिवासगृहे तस्मिन् प्रासादस्य च पूर्वतः ।
देदीप्यमाने भवने चतुर्द्वारविभूषिते ।। १९ ।।
वितानमण्डिते तत्र सुधारससमुज्वले ।
तादृशे मन्दिरे ब्रह्मा रक्षेत्कुम्भचयं तदा ।। २० ।।
चतुःपङ्क्तितया भूप स्नानार्थं कमलापतेः ।
गन्धद्वारेति मन्त्रेण स्नानाम्भसि स पूजकः ।। २१ ।।
सकर्पूरं क्षिपेद्गन्धं रक्षेत्तच्चक्रमुद्रया ।
पावमानीति सूक्तेन स्पृशेत्तानि पृथक् पृथक् ।। २२ ।।
वस्त्रेणाच्छाद्य सहसा माल्यं तस्योपरि न्यसेत् ।
एतच्चतुर्द्दशीरात्रावधिवासं प्रचोदयात् ।। २३ ।।
स्नानोदकस्य नृपते भावांस्तद्भक्तिलालसः ।
तद्दिनेऽपि निशायाश्च यामानन्तरतो नृप ।। २४ ।।
कुर्य्यात्तु जगदीशस्य निद्राभङ्गं यथाविधि ।
ततो विद्यापतेर्विश्वावसोश्च कुलसम्भवैः ।। २५ ।।
मानवैस्तैर्हरेः पृष्ठे बाह्वोश्च दृढसूक्ष्मकम् ।
काष्ठसम्बन्धशकलं रक्ताम्बरसमन्वितम् ।। २६ ।।
दत्त्वा सर्वाङ्गनिचयं श्वेतरक्तांशुकैः पुनः ।
समासाद्य नृपश्रेष्ठ विचित्रं सुदृढं तदा ।। २७ ।।

बलभद्रस्य भद्रायाः कुर्य्यासुर्मानवाश्च ते ।
अथाचार्यस्तु विधिना मङ्गलारोपणं हरेः ।। २८ ।।
अग्निशर्मा बलस्यापि ब्रह्मा देव्याः समाचरेत् ।
ततो भवान् देवतानां तिसृणां पुरतः स्थितः ।। २९ ।।
पृथक् पुष्पाञ्जलिं दत्त्वा भक्त्या परमया नमेत् ।
तदभावेऽप्यग्निशर्मा कुसुमाञ्जलिमर्पयेत् ।। ३० ।।
ततः कटीप्रदेशे च मनोज्ञे कमलापतेः ।
पट्टसूत्राणि संयोज्य बध्नीयान्नृपसत्तम ।। ३१ ।।
ततस्तत्सूत्रमादाय त्वग्निशर्मा च पूजकाः ।
अन्ये ते सेवकाः सर्वे चालयेयुः शनैः शनैः ।। ३२ ।।
विश्वावसोरन्वया ये तदा विद्यापतेश्च ते ।
हरेः सर्वाङ्गमालम्ब्य चालयेयुस्ततः परम् ।। ३३ ।।
आदौ सुदर्शनं कृत्वा सीरपाणिं ततः परम् ।
ततो भद्रां भगवतीं भगवन्तं हरिं ततः ।। ३४ ।।
एवं क्रमेण यत्नेन मन्दं मन्दं नृपोत्तमः ।
श्वेतच्छत्रं तथा कृष्णं धारयेत्पुरतो हरेः ।। ३५ ।।
चारुचामरवृन्दानां व्यजनानां समन्ततः ।
चालनं रचयेत्तत्र पथि सर्वसुखप्रदे ।। ३६ ।।
चन्द्रसूर्यान्वितं त्रासं कृष्णवर्णं च धारयेत् ।
शङ्खानां निःस्वनः कार्य्यः घण्टानां मर्द्दलस्य च ।। ३७ ।।
मधुरं मधुरिरावं कारयेद् भक्तितत्परः ।
तन्त्रीकाहालयोस्तावन्निःस्वनं रचयेत्पथि ।। ३८ ।।
चन्द्रातपसमाकीर्णे तूलकाच्छादिते पथि ।
राजमानेऽपि देवेशं भवान् प्रस्थापयेच्छनैः ।। ३९ ।।

सहचन्द्रप्रदीपानां प्रदीपानां समन्ततः ।
ज्वलनं रचयेन्नक्तं ज्येष्ठस्नानोत्सवे परे ।। ४० ।।
पूर्वाभिमुखतां कृत्वा प्रथमं कमलापतेः ।
ततोऽप्युत्तरदेशं च मुखं कृत्वा नयेच्छनैः ।। ४१ ।।
पुनः पूर्वप्रदेशं च मुखं कुर्य्याज्जगत्पतेः ।
उदङ्मुखं पुनः कृत्वा ततो मञ्चास्थलं नयेत् ।। ४२ ।।
मुरवैरिण एतस्य जगदीशस्य भूपतेः ।
भद्रायाश्च बलस्यापि प्रमादात् पतनं यदि ।। ४३ ।।
महाभयं नृपस्यापि राज्यस्यापि भवेद्ध्रुवम् ।
दुर्भिक्षं मरणं चैव जायते च पुनः पुनः ।। ४४ ।।
श्रीपतेः पतने यावन्नश्येत्सा महिषी नृप ।
अतः शान्तिं तदा कुर्य्याद् विष्णुप्रीणनहेतवे ।। ४५ ।।
विप्रद्वारा मूलमन्त्रं लक्षमात्रं च जापयेत् ।
होमस्तन्मन्त्रतः कार्य्यस्तद्दशांशेन तर्पणम् ।। ४६ ।।
तथैव मार्जनं भूप तद्दशांशेन भोजनम् ।
विप्रेभ्यश्च सुवर्णानि दत्त्वा शान्तिं चरेद् भवान् ।। ४७ ।।
अतस्त्वं सावधानोऽत्र भविष्यसि नृपोत्तम ।
प्रयाणे जगदीशस्य महोत्सवपरो भवेत् ।। ४८ ।।
बलवन्तश्च ये केचित्सेवका मुरवैरिणः ।
उभयोः पार्श्वयोस्तस्य नियोज्यास्ते प्रयत्नतः ।। ४९ ।।
ऐशान्यकोणदेशेऽपि प्रासादस्य महोन्नते ।
षोडशस्तम्भविभ्राजद् दिव्यचन्द्रातपोज्ज्वलम् ।। ५० ।।
आकाशमण्डलोल्लासि शोभाभरसमन्वितम् ।
सुधारससमुल्लासि मञ्चचारं महोन्नतम् ।। ५१ ।।

कुर्य्यान्महायतं स्पष्टं तत्रैव स्थापयेद् विभुम् ।
नित्यस्नानविधिं कृत्वा वस्त्रमाल्ये समर्पयेत् ।। ५२ ।।
अग्रे प्रक्षाल्य वस्त्राणां चतुःखण्डं प्रपातयेत् ।
तत्र धौतप्रदेशे च देवानामग्रतो नृप ।। ५३ ।।
प्रतिहारस्ततो गत्वा ह्यधिवासगृहं पुनः ।
स्नानार्थं जगदीशस्य ब्रह्मन्नीरं समानयेत् ।। ५४ ।।
ततो ब्रह्मा नृपश्रेष्ठ जलपात्राणि तद्गृहात् ।
वस्त्रेणाच्छादितमुखो मञ्चकोपरि संन्यसेत् ।। ५५ ।।
काहालच्छत्रघण्टादिस्फुरदग्रतलं शुचिः ।
ब्रह्मा तज्जलपात्राणि चतुःपङ्क्त्या न्यसेत्तदा ।। ५६ ।।
जगदीशपुरः पङ्क्त्या पञ्चत्रिंशद्घटान्न्यसेत् ।
त्रयस्त्रिंशद्घटांश्चैव रक्षेन्नीलाम्बराग्रतः ।। ५७ ।।
द्वात्रिंशतिघटान् भूप भद्रायाः स्नानहेतवे ।
ब्रह्मणा रक्षणीयास्ते नान्यैरेव कदाचन ।। ५८ ।।
सुदर्शनाभिषेकार्थमष्टादशघटान्न्यसेत् ।
एवं चतुः पङ्क्तितया जलपात्राणि सादरम् ।। ५९ ।।
सावधानतया ब्रह्मा तत्रैव मण्डपे न्यसेत् ।
पात्रहोता ततस्तत्र पूजां कुरु महामते ।। ६० ।।
इच्युच्चार्य्य वदेद् भूप स्नानकर्मणि तत्परः ।
ततस्ते पूजकवराः पूर्ववन्न्यासकर्म तत् ।। ६१ ।।
कृत्वा चासनतो भक्त्या दीपान्तं कर्मणि स्थिताः ।
नारिकेलफलान्येव बहिष्कृत्य घटोत्करात् ।। ६२ ।।
वीक्षणादिकसंस्कारं रचयेत् प्रार्थयेद्धरिम् ।
बलदेव नमस्तेऽस्तु रेवतीप्राणवल्लभ ।। ६३ ।।

आविर्भावदिनान्तेऽद्य स्नापयाम्यहमम्भसा ।
सुवासितेन दिव्येन तथैव चन्दनद्रवैः ।। ६४ ।।
दत्त्वाज्ञया स्नापयामि जगदानन्ददायक ।
दीनबन्धो दयासिन्धो नीलाचलपते हरे ।। ६५ ।।
अद्य जन्मदिनं नाथ पावनं जायते तव ।
तस्मात्त्वं तीर्थपानीयैः कौपैः पुण्याविवर्द्धनैः ।। ६६ ।।
सुवासितकरैः सारैस्त्वदाज्ञां परिपालयन् ।
चन्दनद्रवजालेन स्नापयामि मुहुर्मुहुः ।। ६७ ।।
जगदीश नमस्तेऽस्तु ह्यपराधं क्षमस्व मे ।
इति सम्प्रार्थ्य राजेन्द्र देवराजं ततः परम् ।। ६८ ।।
सुदर्शनं सुभद्रां च प्रार्थयेद्देशिकोत्तमः ।
भद्रे देवी नमस्तुभ्यं सर्वानन्दप्रदायिनि ।। ६९ ।।
स्नापयामि जलैः पुण्यैः जगन्माङ्गल्यहेतवे ।
सुदर्शन नमस्तेऽस्तु विष्णुहस्ताम्बुजस्थित ।। ७० ।।
स्नापयामि भवन्तं च नमस्ते ज्ञानदायक ।
प्रार्थयित्वा च देवांस्तान् दत्त्वा पुष्पाञ्जलिं पृथक् ।। ७१ ।।
समुद्रज्येष्ठा मन्त्रेण स्नापयेयुश्च तेऽर्च्चकाः ।
बलभद्रं जगन्नाथं सुभद्रां च सुदर्शनम् ।। ७२ ।।
स्नापयेत् प्रथमं भूप तज्जलैः सपरिष्कृतैः ।
उपचारैः पूजकोऽयं भक्तिश्रद्धासमन्वितः ।। ७३ ।।
स्नापयित्वा यथान्यायं देवदेवं जगत्पतिम् ।
बलभद्रं सुभद्रां च सुदर्शनमसौ नृप ।। ७४ ।।
दशभागे जले दिव्ये चन्दनं ऋतुभागतः ।
संयोज्याथ त्रिभिः कुम्भैः पृथक् संस्नापयेत् पुनः ।। ७५ ।।

चन्दनाम्भः शिरे चार्द्धं दत्त्वा च वदने पुनः ।
सर्वाङ्गेष्वपरं चार्द्धं सेचयेदतिभक्तितः ।। ७६ ।।
स्नानोत्सवस्य तस्यान्ते त्वग्निशर्मा च शोभनम् ।
माल्यं दामनकं दिव्यं गन्धं रक्तांशुकद्वयम् ।। ७७ ।।
समर्पयेन्मुरारातिं भक्त्या शीघ्रं तदा नृप ।
श्रद्धाभक्तियुतस्त्वं च दत्त्वा पुष्पाञ्जलित्रयम् ।। ७८ ।।
कर्पूरवर्त्या रचयेन्नीराजनमनुत्तमम् ।
चालयेच्चामरं चारु बीजयेद् व्यजनेन च ।। ७९ ।।
तन्मञ्चमण्डपस्याथ कुर्य्यान्मार्जनमादरात् ।
सेचयेच्चन्दनाम्भश्च परितस्तद्रजः क्षिपेत् ।। ८० ।।
एवं कृत्वा भवान् भूप तिष्ठेद्देवपुरस्तदा ।
अग्निशर्माथ देवेशमर्पयेन्माल्यमुत्तमम् ।। ८१ ।।
पीतवस्त्रद्वयं तावदानीय च समर्पयेत् ।
ततो भक्त्या नृपश्रेष्ठ तदानीं त्वां तदंशुकम् ।। ८२ ।।
शिरस्येव प्रगृह्याथ कृतकृत्यो भवेत्तदा ।
अग्निशर्मासम्भवेऽपि तवैतत्पूजकश्चरेत् ।। ८३ ।।
अथ देवाङ्गतः शीघ्रं वस्त्रमाल्यानि तानि वै ।
बहिष्कृत्य पुनर्दिव्यं नव्यं सूक्ष्मांशुकोत्करम् ।। ८४ ।।
हरौ समर्प्य माल्यैश्च नाना पुष्पकुलोद्भवैः
करिश्रेष्ठाकृतितया वेशं च कारयेत्तदा ।। ८५ ।।
एतादृशं बलस्यापि वेशं कुर्य्यान्नृपोत्तम ।
कुमारीवेशरचनां भद्रायाश्च प्रकल्पयेत् ।। ८६ ।।
देवतानां पुरस्ताद् वै जलैः प्रक्षालयेत्तदा ।
पूर्ववन्मण्डलं कृत्वा चतुःपङ्क्तितया तदा ।। ८७ ।।

काहालच्छत्रघण्टादिस्फुरदग्रतया नृप ।
पाकालयाच्च नैवेद्यं दिव्यं बहुशमानयेत् ।। ८८ ।।
भक्ष्यं भोज्यं च चर्व्यं च लेह्यं पेयं च चोष्यकम् ।
इत्थं च षड्रसैर्युक्तं दिव्यमन्नं चतुर्विधम् ।। ८९ ।।
नानापूपसमूहाढ्यं नानाव्यञ्जनसंयुतम् ।
लोकत्रयाश्चर्य्यकरं वस्त्रैराच्छाद्य तत्पुनः ।। ९० ।।
तादृशं दिव्यनैवेद्यं स्थापयेन्मण्डलेषु च ।
बाह्ये कदाचिन्नो रक्षेत्पूर्ववत् पूजकोऽर्च्चयेत् ।। ९१ ।।
हरिं परमया भक्त्या ह्युपचारैरनुत्तमैः ।
स्नानोत्सवं महाविष्णोरीदृशं च नृपोत्तम ।। ९२ ।।
नैवेद्यं तादृशं पूजां कुर्य्याच्चैवेदृशीं तथा ।
कारयिष्यसि भूपाल सावधानतया तदा ।। ९३ ।।
अशक्तस्त्वं यदा भूप भवेः प्रतिनिधिस्तव ।
स्वर्णदण्डधरः श्रीमान् पूजाशीलनतत्परः ।। ९४ ।।
देवतानां पुरः स्थित्वा सावधानो भवेत्तदा ।
पूजासमाप्तिपर्य्यन्तं तिष्ठेदग्रे नृपोत्तम ।। ९५ ।।
पूजासमाप्तेश्च ततो देवताङ्गात्पुनर्नृप ।
माल्यवस्त्रादिकं तावत् बहिष्कुर्य्याच्छनैः शनैः ।। ९६ ।।
पुरः प्रक्षाल्य यत्नेन तूलीमापत्य यत्नतः ।
भक्तिश्रद्धान्वितो भूत्वा प्रसूनाञ्जलिमाक्षिपेः ।। ९७ ।।
सुदर्शनं पुरः स्थित्वा पूर्ववद्देवतात्रयम् ।
प्रस्थापयेच्छनैस्तस्मात्पुनर्दक्षिणदिङ्मुखम् ।। ९८ ।।
स्थापयित्वा ततो ब्रह्मा भक्त्या कर्पूरचन्दनम् ।
दत्त्वा दामनकं माल्यं पीतवस्त्रद्वयं पुनः ।। ९९ ।।

कर्पूरनीराजनया कुर्य्याद्दूर्वाक्षतान् क्षिपेत् ।
नीराजयेत्सप्तवर्त्त्याऽप्यष्टवर्त्त्या ततो नृप ।। १०० ।।
सुवासितजलं तत्र पक्वताम्बूलमर्पयेत् ।
ततस्तत्समये पुष्पवृष्ट्या चैव समर्पयेत् ।। १०१ ।।
ततो ब्रह्मा च निर्माल्यं चन्दनं चारुमाल्यकम् ।
दूर्वाक्षतान् पीतवस्त्रं जलं ताम्बूलमुत्तमम् ।। १०२ ।।
एतत् सर्वं गृहीत्वा च तत्र तुभ्यं प्रदापयेत् ।

सूत उवाच

ब्रह्मणः परमां वाचं श्रुत्वा स नृपसत्तमः ।। १०३ ।।
महोत्सवतया विष्णोः कृतवान् स्नानकर्म तत् ।
दक्षिणाभिमुखे विष्णौ तस्मिन् काले नृपोत्तम ।। १०४ ।।
विष्णोर्नीराजनविधिं ये पश्यन्ति च भक्तितः ।
पदे पदेऽश्वमेधानां फलं तेषां भवेद्ध्रुवम् ।। १०५ ।।
मनोरथस्य संसिद्धिस्तेषां भवति तत्क्षणात् ।
अन्ते वैकुण्ठभवनं ते च गच्छन्ति मानवाः ।। १०६ ।।
दक्षिणाभिमुखस्यास्य विष्णोश्च दर्शनं तथा ।
यन्नीराजनमाश्चर्य्यं दिवि देवा मुदान्विताः ।। १०७ ।।
पश्यन्ति सादरं ये वै ते कृतार्था न संशयः ।
मन्दं मन्दं ततो भक्त्या तूलीतल्पेऽतिकोमले ।। १०८ ।।
महोत्सवतया विष्णुं चालयेत्पूर्ववज्जनः ।
नीत्वा किञ्चित् पृथ्वीवरे स्थापयित्वा पुनर्विभुम् ।। १०९ ।।
शीतलद्रव्यनैवेद्यं पूजकस्तं समर्पयेत् ।
किञ्चिद्दूरं ततो नीत्वा द्वितीयावरणान्तिके ।। ११० ।।
दक्षिणाभिमुखं श्रीशं पूर्ववत् परमादरैः ।
नीराजयेत्ततो राजन् जायमाने महोत्सवे ।। १११ ।।

ततः प्रस्थापयेन्मार्गे शोभमाने मनोरमे ।
लसद्वितानजालेऽस्मिन् वैनतेयान्तिकं नयेत् ।। ११२ ।।
पुनः कृत्वा रमाकान्तं कान्तं वा दक्षिणामुखम् ।
तथा नीराजयेद्ब्रह्मा भक्तिश्रद्धासमन्वितः ।। ११३ ।।
मन्दं मन्दं पुनर्नीत्वा जगदीशं सुरेश्वरम् ।
निरोधयालये तावत्तत्रैव स्थापयेद् विभुम् ।। ११४ ।।
वंशैर्विनिर्मिततरं दृढमावरणं पुनः ।
बद्ध्वा यथा जनः कश्चिन्न पश्येच्च तथाचरेत् ।। ११५ ।।
एवं विधाय तत्रैव निरोधनगृहे विभुम् ।
स्नानादिपञ्चदशकान् स्थापयेद् वासरानभि ।। ११६ ।।
विना सेवनमेतस्य विष्णोर्दर्शनमेव हि ।
न कुर्य्यान्मनसा वाचा तत्रापि च न चिन्तयेत् ।। ११७ ।।
एतस्मिन्समये राजन् विष्णोर्दर्शनकांक्षया
द्रक्ष्यामीति वदेद्यस्तु पितृभिः सह मज्जति ।। ११८ ।।
विरूपं वा सुरूपं वा तस्मिन् काले नृपोत्तम ।
ये पश्यन्ति च ते सर्वे पच्यन्ते निरये ध्रुवम् ।। ११९ ।।
पितृभिः सहितास्ते तु सहस्रयुगसङ्ख्यया ।
निरयं प्रतिपद्यन्ते नोचितं तत्र वीक्षणम् ।। १२० ।।
जगत्पतेस्तस्य महोत्सवप्रदे
सदा त्रिलोकीजनचेतसां च ये ।
कुर्वन्ति भक्तिं परमां भवार्णवात्
स्नानोत्सवे ते तरसा विमुक्तकाः ।। १२१ ।।

इति श्रीसूतसहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये स्नानोत्सववर्णनं नाम चतुर्दशोऽध्यायः ।।

पञ्चदशोऽध्यायः

स्नानोत्सवस्य तस्यान्ते निरोधनगृहे विभुम् ।
स्थापयेत्केवलं ब्रह्मन्नित्येवं कथितं त्वया ।। १ ।।
दशपञ्चदिनान्येवं वंशावरणवेष्टितम् ।
कर्त्तव्यं तत्र किं कर्म वक्तव्यं कमलासन ।। २ ।।
वंशावरणयुक्तस्य विष्णोस्तस्य परात्मनः ।
षट्कालार्चनजं कर्म कथं स्यात्पद्मसम्भव ।। ३ ।।
दशपञ्चदिनेष्वेषु न पश्येद्विष्णुमव्ययम् ।
कथं पूजा च भविता तद्वदाशु सुरेश्वर ।। ४ ।।

ब्रह्मोवाच

शृणु राजन् महाप्राज्ञ स्नानोत्सवसमापने ।
तद्वंशावरणे भूप विचित्रं वसनं बहु ।। ५ ।।
सूक्ष्मेतरेऽम्बरे हस्तत्रयमानेऽतिशोभने ।
सार्द्धहस्तायतियुते तत्रैव प्रतिमां न्यसेत् ।। ६ ।।
बद्ध्वा चारुतरं कृत्वा पर्य्यङ्कं तत्पुरो न्यसेत् ।
तत्रैव निर्मितं रामं धवलं च चतुर्भुजम् ।। ७ ।।
शङ्खं चक्रं हलं तावद्दधानं मुषलं परम् ।
तत्र संलिख्य परमैर्भूषणैरभिशोभितम् ।। ८ ।।
कुर्य्यात्पटत्रयं रम्यमित्थं तावत् प्रमाणकम् ।
सुभद्रां पीतवर्णाभां पद्मासनगतां शुभाम् ।। ९ ।।
चतुर्भुजां करद्वन्द्वे धृतपद्मद्वयं परम् ।
वराभयकरां चैव नानाभरणभूषिताम् ।। १० ।।
पटं च तादृशं तत्र विलिख्य श्रद्धयार्च्चयेत् ।
नीलजीमूतसंकाशं पद्मासनविराजितम् ।। ११ ।।

शङ्खचक्रगदापद्मविलसत्करपङ्कजम् ।
चतुर्भुजं चारुभूषं पद्मपत्रायतेक्षणम् ।। १२ ।।
श्रीवत्सकौस्तुभोरस्कं वनमालाविभूषितम् ।
तादृशे पटमध्येऽपि चित्रे संलिख्य तं हरिम् ।। १३ ।।
देवानामुभये पार्श्वे माममुं चैव नारदम् ।
चित्रपटमये पीठे विलिखेन्मञ्जुले नृप ।। १४ ।।
पूजयेद्विधिवद् भक्त्या पूजकः परमादरात् ।
छत्रचामरघण्टादिस्फुरदग्रतया तदा ।। १५ ।।
तत्पटत्रयमानीय पूर्वद्वारप्रदेशतः ।
प्रासादं भावयित्वाथ तद्वंशावरणे न्यसेत् ।। १६ ।।
ततस्तत्रैव पर्य्यङ्के तूलीमापातयेत् पराम् ।
रामं नृसिंहं कृष्णं च प्रतिमारूपधारिणम् ।। १७ ।।
स्थापयेद् बलदेवाग्रे तादृशं प्रतिमात्रयम् ।
भद्रायाः पुरतो भूप विश्वधात्रीं रमां न्यसेत् ।। १८ ।।
सुदर्शनं चक्ररूपं जगदीशकरे स्थितम् ।
पूजयेत्तं तथा भक्त्या पट्टे मूर्त्तिं च कल्पयेत् ।। १९ ।।
एवं संस्थाप्य विधिवद् प्रतिविम्बे ततः परम् ।
पञ्चामृतैर्महास्नानं कुर्य्यादाचार्य्य एव हि ।। २० ।।
ततो मध्याह्नपूजां च पूजकः पूर्ववच्छुचिः ।
तत्पूजासमये कोऽपि विशेन्नाभ्यन्तरे विभो ।। २१ ।।
वंशावरणमध्येऽपि वंशाः विश्वावसोरपि ।
विद्यापतेश्च ये वंशाः प्रविशेयुर्न कर्हिचित् ।। २२ ।।
यतो दारुतनुर्देवः पट्टे निर्विशते स्वयम् ।
तस्मात्पट्टस्य पूजायां कोऽपि तत्र न संविशेत् ।। २३ ।।

अङ्गसेवात्यन्तिकी चेत्कार्य्या सा पूजनात्परम् ।
न हि भोजनकाले तु सेवनीयो जगत्पतिः ।। २४ ।।
कुर्य्यात्तद्दिनमारभ्य दश पञ्च च वासरान् ।
अभिलक्ष्य चरेत् पूजां पूर्ववन्नृपसत्तम ।। २५ ।।
दारुरूपी जगत्स्वामी पट्टे विश्रम्य च प्रभुः ।
तिष्ठत्यत्र न सन्देहो नास्ति नास्ति नृपोत्तम ।। २६ ।।
तथा चतुर्थकालार्च्चाः न कुर्यादाचार्यवर्यकैः ।
तन्निर्माल्येऽप्यविश्वासं न कुर्य्याच्च कदाचन ।। २७ ।।
कुर्य्याच्चेन्नरके घोरे पच्यते मूढधीर्नरः ।
एवं पञ्चदशाहस्सु पट्टब्रह्मार्च्चनं चरेत् ।। २८ ।।
अङ्गालस्ये जायमाने ब्राह्मणः पृथिवीपते ।
देववेश्मनि कालेऽस्मिन् सर्वानपि च कारयेत् ।। २९ ।।

इन्द्रद्युम्न उवाच

दारुब्रह्मस्वरूपस्य विष्णोः स्नानोत्सवे सति ।
निरोधनगृहे तस्य स्नानं च वर्णितं त्वया ।। ३० ।।
को विधिस्तत्र जायेत चतुर्णां दारुरूपिणाम् ।
तद्वदाशु सुरश्रेष्ठ यदि चेन्मय्यनुग्रहः ।। ३१ ।।

ब्रह्मोवाच

इदं गोप्यतरं विष्णोः कथयामि समासतः ।
यतो नीलाद्रिसिंहस्य भक्तोऽसि नृपसत्तम ।। ३२ ।।
विद्यापतेरन्वयजो दशपञ्चदिनेष्वपि ।
शिताप्रपानकैर्विष्णुं सकर्पूरैश्च पूजयेत् ।। ३३ ।।
कालद्वयेऽपि नृपते निर्माल्यं न बहिर्नयेत् ।
श्रद्धाभक्तियुतश्चेत्त्वं वंशावरणबाह्यतः ।। ३४ ।।

शिताप्रपानके क्षिप्त्वा दुग्धसारं मनोहरम् ।
चिन्तयित्वा परं ब्रह्म तदा तच्च समर्पयेत् ।। ३५ ।।
विश्वावसोरन्वयजाः वंशाः विद्यापतेस्तथा ।
तदा दारुस्वरूपस्य विष्णोरङ्गात्पुनः पुनः ।। ३६ ।।
दत्तलेपनकादींश्च बहिष्कुर्य्याच्छनैः शनैः ।
षड्वासरानभिव्याप्य ततश्च सप्तमेऽहनि ।। ३७ ।।
सुवासितं च तत्तैलं मर्दयेयुस्तिलोद्भवम् ।
अष्टमेऽहनि सूत्राणि पट्टस्य रुचिराणि च ।। ३८ ।।
बद्ध्वा चित्रतरं विष्णोः सर्वाङ्गे नातिकल्पनम् ।
ततः सर्जतरोः क्षीरं शुष्कं संचूर्ण्य यत्नतः ।। ३९ ।।
सुवासितैस्तिलोद्भूतैस्तैलैर्युक्तं च मर्द्दितम् ।
तत्तु पूर्णं हरेर्गात्रे लिपेन्मज्जाप्रकल्पने ।। ४० ।।
नवमेऽहनि राजेन्द्र सूक्ष्मार्द्रांशुकपातनात् ।
गोपयेत्तादृशं लेपं देवाङ्गेषु च सर्वतः ।। ४१ ।।
दशमे दिवसे प्राप्ते नेत्रपट्टांशुकैर्पुनः ।
विष्णोः सर्वाङ्गमाच्छाद्य ततः शोणितकल्पना ।। ४२ ।।
चन्दनानि च कस्तुरीं कुङ्कुमं हिमबालुकाम् ।
तथा चन्दनसारं च सर्वमेकत्र पेषयेत् ।। ४३ ।।
एकादश्यां तथा विष्णोः सायं पूजावसानतः ।
ततो काहालघण्टादिध्वनौ जाते मनोरमे ।। ४४ ।।
तच्चन्दनादिकं विष्णोः सर्वाङ्गेषु विलेपयेत् ।
तद् विलेप्य ततो मांसकल्पना स्यान्नृपोत्तम ।। ४५ ।।
द्वादशेऽहनि शुक्लानि दृढानि वसनानि च ।
दत्त्वा यत्नेन परमं लेपं दत्त्वा पुनर्दृढम् ।। ४६ ।।

चर्मकल्पनमाकुर्य्यात्तस्माल्लेपविलेपनात् ।
ततो भूप नवैः शुक्लैस्तथा दृढतरांशुकैः ।। ४७ ।।
श्रीहरेः पादरचनां कुर्य्यात् सुप्ते दृढां तदा ।
द्वादशेऽहनि जातेऽपि सार्द्धयामे नृपोत्तम ।। ४८ ।।
घण्टामर्द्दलशङ्खानां निःस्वने च पुनः पुनः ।
तत्पादरचनाशब्दो न केन श्रूयते यथा ।। ४९ ।।
तद्विधेयं नृपश्रेष्ठ तस्मिन् काले पुनः पुनः ।
तस्याकर्ण्णनतः कर्णौ जायते वधिरो यथा ।। ५० ।।
अतस्तच्छ्रवणं कार्य्यं नोचितं नृपसत्तम ।
अत्रैव तत्परो राजन् तव प्रतिनिधिर्नरः ।। ५१ ।।
कर्पूरकठिनं लेपं सर्वाङ्गेषु पुनश्चरेत् ।
चित्रविच्च तदा कुर्य्यात्तेषां लोमप्रकल्पने ।। ५२ ।।
त्रयोदश्यामिमं कर्म वर्णैरेव विचक्षणः ।
यथारूपं प्रकुर्य्याच्च तदालेख्यं च सौख्यदम् ।। ५३ ।।
यथाविधि नृपश्रेष्ठ चित्रवैचित्र्यकर्मणा ।
चतुर्द्दशदिने चापि तथा पञ्चदशे दिने ।। ५४ ।।
दिनद्वयेऽपि तत्कर्म चित्रं चारुतरं चरेत् ।
जगदीशाङ्गसम्पर्कं लेपयेच्चन्दनादिकम् ।। ५५ ।।
निरोधनालयात्तस्माद् बहिष्कुर्यान्नृपोत्तम ।
द्वादश्यामेव तद्दद्यात्तुभ्यं निर्माल्यमादरात् ।। ५६ ।।
तद्देहलेपनात्किंचिच्चन्दनं पापमोचनम् ।
भक्त्या ये मनुजाः शीघ्रं सेवन्तेऽत्र महीतले ।। ५७ ।।
कुष्ठादिरोगतो मुक्तास्तथा निष्पापिनश्च ते ।
सुखमत्यन्तमाभुज्य चान्ते वैकुण्ठवासिनः ।। ५८ ।।

तस्माद् यत्नेन तल्लेपं नराः सर्वे महीतले ।
द्वादश्यामेव गृह्णन्तु परत्र हितकाम्यया ।। ५९ ।।
अथ पञ्चदशीघस्रे रात्रौ यामत्रये गते ।
स्नात्वाचार्य्यस्तदा शीघ्रं पट्टदेवस्य पूर्ववत् ।। ६० ।।
स्नानमात्रं विधायाथ कुर्यात्तस्य विसर्जनम् ।
प्रत्यर्च्चानां तथा कुर्याद् विसर्जनमतः पर ।। ६१ ।।
पर्य्यङ्कहरणं कृत्वा त्वन्तरावरणं चरेत् ।
अथ प्रक्षालयेदग्रं देवदेवस्य भूपते ।। ६२ ।।
पुनश्छत्रद्वयं धृत्वा घण्टादिध्वनिमाचरेत् ।
गीतं नृत्यं तथा वाद्यं कारयेद्देवतापुरः ।। ६३ ।।
एवं महोत्सवे जाते नानावाद्यस्फुरद्ध्वनौ ।
तत्र कालेऽपि संप्राप्य पूजको देवसन्निधिम् ।। ६४ ।।
तच्चक्षुरिति मन्त्रेण दद्यान्नेत्रद्वयं तदा ।
दिव्ये नेत्रद्वये जाते विष्णोर्नेत्राम्बुजेऽनघ ।। ६५ ।।
नेत्रोत्सवेऽपि भूपस्त्वं तिष्ठेद्देवपुरः स्वयम् ।
तवाभावे प्रतिनिधिस्तत्र तत्परमानसः ।। ६६ ।।
इत्थं नेत्रोत्सवे जाते विद्यापतिकुलोद्भवाः ।
चतुःसमं हरेर्गात्रे लेपयेयुः समन्ततः ।। ६७ ।।
संलिप्य देवतानां च चतसृणां मुहुस्तनौ ।
वन्दापनां च कुर्य्यात्तुर्भक्तिलालसमानसः ।। ६८ ।।
ततो वन्दापनान्ते च देवतानामुरस्तदा ।
पृथक् पद्मं विलिख्याशु वर्ण्णैः पञ्चविधैस्तदा ।। ६९ ।।
पूजकस्तत्र पद्मेषु नवीनं कलशं न्यसेत् ।
पृथक् तदन्तिके पूर्ण्णपात्रं च स्थापयेत्ततः ।। ७० ।।

द्विसहस्रपलेनैव विधिना स्नानकर्मणः ।
पृथक् द्रव्याणि संरक्ष्य ततस्सूर्य्योपचारतः ।। ७१ ।।
मन्त्रैश्च विधिवद् भूप प्रतिविम्बे हरेस्तदा ।
स्नापयेत्पूजकः श्रेष्ठः सर्वकर्मविदांवरः ।। ७२ ।।
ततो मनसि संचिन्त्य भगवन्तं जनार्द्दनम् ।
नवीनोत्तमवस्त्रेण प्रोञ्छनं च समाचरेत् ।। ७३ ।।
ते ते च पूजकश्रेष्ठाः धृत्वा तान् कलशान् पृथक् ।
आपो हिष्ठेति मन्त्रेण त्रिवारं सेचयेत्कुशैः ।। ७४ ।।
देवान् पुनः समुद्धृत्यापः पठित्वा मूलमन्त्रतः ।
त्रिवारं च पृथक् तांश्च सेचयेयुः सुसंयताः ।। ७५ ।।
सहस्राक्षेति मन्त्रेण मन्त्रवित् पूजकोत्तमाः ।
देवतानाञ्च सर्वाङ्गे सेचयेयुः पुनः पुनः ।। ७६ ।।
अथाचार्यस्त्वग्निशर्मा ब्रह्मा च चन्दनैः पुनः ।
क्रमेण लेपयेद्देवान् भक्तिभावसमन्वितः ।। ७७ ।।
दिव्यैर्नव्याम्बरैर्माल्यैरलङ्कारैर्मनोहरैः ।
सुवेशरचनां कुर्य्याद्देवतानां महीपते ।। ७८ ।।
ततो देवाग्रतः क्षिप्रं पूर्ववन्मण्डलं न्यसेत् ।
चतुःपङ्क्तितया तस्मात्पाकशालाप्रदेशतः ।। ७९ ।।
घण्टाकाहालयोर्जाते ध्वनौ धृत्वा च छत्रकम् ।
चक्रं पुरःप्रदेशे च धृत्वा नैवेद्यमानयेत् ।। ८० ।।
आनीय पङ्क्तिमध्ये हि स्थापयेत्तत्र यत्नतः ।
अग्निशर्मा ततो भूप चन्दनं माल्यमुत्तमम् ।। ८१ ।।
पीतवस्त्रद्वयं दद्यात् विष्णवे मुरजिष्णवे ।
आचार्य्यस्तु ततो भक्त्या प्रातः पूजनमाचरेत् ।। ८२ ।।

पूर्ववद् विधिना प्रोक्तैस्तैस्तैरेवोपचारकैः ।
ततः पूजावसानेऽपि पूर्ववत् परमेश्वरम् ।। ८३ ।।
वन्दापयेयुस्ते सर्वे कर्पूरवर्त्तिभिः पुनः ।
क्षिप्त्वा दूर्वाक्षतान् सप्तवर्त्तिभिः पिष्टवर्त्तिभिः ।। ८४ ।।
इत्थं नेत्रोत्सवं कुर्यात् षोडशेऽह्नि श्रियः पतेः ।
क्षयेऽथ वाथ वृद्ध्यां वा दशपञ्चदिनस्य च ।। ८५ ।।
प्रान्ते नेत्रोत्सवं प्रातः विदधीत नृपोत्तम ।
दैवयोगान्नृपश्रेष्ठ त्रयोदशदिनात्मके ।। ८६ ।।
कृष्णपक्षे जायमाने तदैव श्रीजगत्पतेः ।
अङ्गालस्यं प्रकुर्वीत दशपञ्चदिनावधि ।। ८७ ।।
द्वितीयायां तिथौ भूप कृत्वा नेत्रोत्सवादिकम् ।
प्रातः पूजां प्रकुर्य्याद् वै ततो वन्दापनां चरेत् ।। ८८ ।।
घोषयात्रा च कर्त्तव्या जगत्त्रयसुपाविनी ।
नेत्रोत्सवदिने दैवाज्जाते वीर रविग्रहे ।। ८९ ।।
नेत्रोत्सवादिस्नानान्तं विधिं कुर्य्यात्प्रयत्नतः ।
ततो दुग्धविकारोत्थं नारिकेलविकारजम् ।। ९० ।।
नैवेद्यं तत्र सम्पाद्य पूजयेच्च यथाविधि ।
प्रातः पूजा विधातव्या विना पक्वान्नमुत्तमम् ।। ९१ ।।
वन्दापनां ततः कुर्य्यादाज्ञामाल्यं रथान् प्रति ।
दत्त्वा रथान् समानीय तत् प्रतिष्ठां समाचरेत् ।। ९२ ।।
मुक्त्यनन्तरतो भूप महास्नानविधिं ततः ।
कृत्वा ततोऽर्च्चयेद्विद्वान् पूर्ववत्पाकसम्भवैः ।। ९३ ।।
नानाविधैः पाकद्रव्यैः सुमिष्टैः पूपपायसैः ।
नैवेद्यैस्तोषयेद्देवं माधवं देवकीसुतम् ।। ९४ ।।

एवं नेत्रोत्सवे जाते देवदेवस्य चक्रिणः ।
यथैव घोषयात्रासौ कर्त्तव्या तां वदामि ते ।। ९५ ।।

सूत उवाच

ये पश्यन्ति नवीननीरदचयश्यामाभिरामाकृते
विष्णोस्तस्य परात्मनः परमया भक्त्याऽपि नेत्रोत्सवम् ।
ते नूनं भवसागरस्य सहसा संतीर्य्य लोकोत्तमाः
सत्कारं सुरदुर्लभं पदमहो तद् वै हरेर्भो द्विजाः ।। ९६ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये नेत्रोत्सववर्णनं नाम पञ्चदशोऽध्यायः ।।

षोडशोऽध्यायः

इन्द्रद्युम्न उवाच

नेत्रोत्सवान्ते भो ब्रह्मन् घोषयात्रा यथा भवेत् ।
तथा कथय लोकेश चतुर्मुख नमोऽस्तु ते ।। १ ।।

ब्रह्मोवाच

इन्द्रद्युम्न जगत्यस्मिन् विष्णोः प्रीतिकरां पराम् ।
तादृशीं महतीं यात्रां को वक्तुं भुवि च क्षमः ।। २ ।।
अहं वा वासवो वापि शिवो वा ऋषिसत्तमाः ।
सम्यग्वक्तुं न शक्तास्ते न कोऽपि श्रीपतिं विना ।। ३ ।।
अतो वक्ष्ये समासेन तव भूपवराग्रतः ।
आषाढस्य च मासस्य सिते पक्षेऽतिपावने ।। ४ ।।
द्वितीयायां तिथौ तावद् घोषयात्रा विधीयते ।
सार्द्धयामद्वयेऽतीते क्षपायाः क्षितिपोत्तम ।। ५ ।।

द्वितीयाप्राग्दिने कुर्य्यान्निद्राभङ्गं हरेः प्रभोः ।
निद्राभङ्गे जायमाने विश्वावसुकुलोद्भवाः ।। ६ ।।
तथा विद्यापतेः वंशाः पूर्ववज्जगतां पतिम् ।
सर्वाङ्गं चालयेयुस्ते वस्त्रादिभिरतिदृढम् ।। ७ ।।
नित्यस्नानं ततः कुर्य्यात् प्रातः पूजां तथाचरेत् ।
पूजान्ते तत्र तत्कुर्य्यान्मङ्गलारोपणं नृप ।। ८ ।।
पूर्ववत्ते नृपश्रेष्ठ पूजकास्तत्त्ववेदिनः ।
कुर्य्यासुः पूजनं विष्णोर्यथाविधि तथा फलम् ।। ९ ।।
ततस्तावत् प्रसूनानामञ्जलिं च क्षिपेद्भवान् ।
भक्त्या परमया चेत्थं देवानां पुरतो वदेत् ।। १० ।।
लक्ष्मीपते! जगन्नाथ ! भक्तानुग्रहकारक! ।
घोषयात्रोत्सवार्थं भो गमनं लीलया कुरु ।। ११ ।।
घोषयात्रा च कर्त्तव्या प्रतिवर्षं समादरात् ।
इत्याज्ञां हृदये दत्त्वा भवतः कमलापतेः ।। १२ ।।
इत्युक्त्वा तं विभुं भूयो भवान् त्रै प्रणमेत्तदा ।
ततस्तूलीप्रसारणं कृत्वा मार्गे मनोरमे ।। १३ ।।
काहालयन्त्रवीणादिस्फुरद्घण्टावलिध्वनौ ।
मृदङ्गकांस्यतालानां शङ्खानां च महत्स्वनम् ।। १४ ।।
कारयेदतियत्नेन चारुचामरचालनम् ।
चन्द्रमण्डलसंकाशं छत्रं च श्यामलं तथा ।। १५ ।।
सूर्य्यचन्द्रान्वितं त्रासं मेघाडम्बरमुत्तमम् ।
एतत्सर्वं पुरो विष्णोर्द्धारयेन्नृपसत्तम ।। १६ ।।
भक्तानां जयशब्दैश्च करतालोत्तमस्वनैः ।
गीतैर्नृत्यैश्च वाद्यैश्च विप्राणां स्तुतिनिःस्वनैः ।। १७ ।।

काले तस्मिन् जगन्नाथं चालयेयुः शनैः शनैः ।
सुदर्शनं पुरस्कृत्य बलभद्रं ततः परम् ।। १८ ।।
सुभद्रां च ततो नीत्वा जगदीशं सुरेश्वरम् ।
नानालङ्कारसंयुक्तं त्रैलोक्यसुखदायकम् ।। १९ ।।
रथप्रदक्षिणं कृत्वा स्थापयेदरुणोदये ।
रथमध्येऽपि संस्थाप्य महोत्सवतया तदा ।। २० ।।
सुभद्राया रथे चक्रं स्थापयेन्नृपसत्तम ।
रामकृष्णौ सीरपाणेः स्थापयेद्रथसत्तमे ।। २१ ।।
शोभने स्यन्दने दिव्ये जगदीशस्य मापतेः ।
श्रीकृष्णं स्थापयेत्तत्र नानालङ्कारसंकुले ।। २२ ।।
अथ पुष्पाञ्जलिं दत्त्वा चन्द्रारात्रिकमाचरेत् ।
ततो राजन् भवान् भक्त्या रथानां मार्जनं चरेत् ।। २३ ।।
चन्दनाम्भश्च सर्वत्र तद्रजश्च क्षिपेन्नृप ।
संस्थाप्य माल्यं वसनं भक्तिश्रद्धासमन्वितः ।। २४ ।।
रथोपरि नृपश्रेष्ठ क्षीरतण्डुलकेन च ।
चतुर्दिक्षु बलिं दद्यादाचार्य्यस्तु तदानघ ।। २५ ।।
पूर्ववन्नारदस्येव बलिकर्म समाचरेत् ।
चालयेन्नृपतिश्रेष्ठ श्रद्धया च तदा रथान् ।। २६ ।।
प्रासादाद्यज्ञवेद्यन्तं यावन्मार्गो हि वर्तते ।
तच्छोभां रचयेद्राजन् भक्तिश्रद्धान्वितो भवान् ।। २७ ।।
शोभमानैर्वितानैश्च माल्यैर्वस्त्रैर्मनोहरैः ।
निवारितातपे मार्गे निर्मले परिमञ्जुले ।। २८ ।।
चलच्चामरवृन्दानां वायूनां शीतले पथि ।
नानापताकावलिभिः शोभमाने मनोरमे ।। २९ ।।

घण्टामृदङ्गमधु रीढक्कादिध्वनिपूरिते ।
एवं विधे पथवरे चालयेद्रथसत्तमान् ।। ३० ।।
सर्वत्र धूपयेद्द्रव्यैश्चञ्चद्गन्धैर्मनोहरैः ।
चित्रविच्च जनः कश्चिच्चित्रकर्म समाचरेत् ।। ३१ ।।
यथायोग्यं चरेद् भूप तत्तद्वर्ण्णानुमानतः ।
ततः पञ्चामृतैस्तैस्तु संस्नाप्य जगतां पतिम् ।। ३२ ।।
वस्त्रैर्माल्यैश्च भूषाभिर्भूषयेत्तान् सुरान्नृप ।
रथोत्संवाङ्गपूजां च पूर्ववत्परिकल्पयेत् ।। ३३ ।।
एतत्पूजावसाने च कुर्य्यान्नृप पुनः प्रभोः ।
महास्नानविधिं तावद् यथाविधि स पूजकः ।। ३४ ।।
सर्वाङ्गे लेपनं कृत्वा वस्त्रमाल्ये ततोऽर्पयेत् ।
भूषयित्वा च मध्याह्नपूजां कुर्य्यात्सुभक्तितः ।। ३५ ।।
दुग्धानां नारिकेलानां लाजाशर्करयोस्तथा ।
विकारांश्च परं कुर्य्याद्रथे मध्याह्नपूजने ।। ३६ ।।
गोधूमचूर्ण्णैः क्षीरेणामिक्षया नृपसत्तम ।
घृताग्नियोगतः पूपान्नानावर्ण्णान् प्रकल्पयेत् ।। ३७ ।।
दद्यान्मुरारये भक्त्या रथे पथि चरेन्नृप ।
पयःपेटीसमूहं च तथा दिव्यप्रपानकम् ।। ३८ ।।
पक्वरम्भाफलान्येव चाम्राणि पनसानि च ।
स्वादूनि विष्णुयोग्यानि कन्दान्दलानि तानि वै ।। ३९ ।।
नारिकेलान् द्रवयुतान् मुद्गाङ्कुरचयानपि ।
धौतमुद्गानि तान्येव तथान्यच्च मनोरमम् ।। ४० ।।
तादृशं वरनैवेद्यं मध्याह्नपूजनेऽर्पयेत् ।
मार्गे तस्मिन् मनोरम्ये तण्डुलान्नं विनानध ।। ४१ ।।

मुद्गाङ्कुरादि यत्सर्वं केशवाय समर्पितम् ।
रथे तदन्नवद्ग्राह्यं त्रिदशैरपि सत्तम ।। ४२ ।।
अत्र शङ्का न कर्त्तव्या न कर्त्तव्या कदाचन ।
ततो मध्याह्नसमये मार्गमध्ये रथान्न्यसेत् ।। ४३ ।।
स्थापयित्वा रथांस्तत्र शितद्रव्यैश्च पूजयेत् ।
चामरैस्तालवृन्तैश्च वीजयेच्च जनार्द्दनम् ।। ४४ ।।
मार्गविश्रान्तिमाचर्य्य याममात्रं सपादकम् ।
चालयेद्रथवर्य्यांश्च रात्रिश्चेत्स्यान्नृपोत्तम ।। ४५ ।।
ज्वालासहस्त्ररचनां कुर्य्याद्दीपांश्च भक्तितः ।
तथा चन्द्रप्रदीपानां ज्वलनं रचयेत्ततः ।। ४६ ।।
मार्गशेषं नयेद्भूप रथोपरि पुनः प्रभोः ।
सायाह्नपूजनं कुर्य्यात्पूर्ववद्विधिना द्विजः ।। ४७ ।।
सायं पूजावसानेऽपि भवान् भूपतिभक्तितः ।
पुष्पाञ्जलिं प्रगृह्याशु ततो विज्ञापयेद्धरिम् ।। ४८ ।।
यज्ञवेदिरियं विष्णोर्जन्मभूमिस्तव प्रभो ।
पूर्वं त्वया भगवता सप्ताहं मण्डपोत्तमे ।। ४९ ।।
तिष्ठेयुरित्याज्ञा दत्ता ततो याहि जगत्पते ।
इति संप्रार्थ्य देवेशं नयेच्छीघ्रं यथाक्रमम् ।। ५० ।।
रथप्रान्ते नृपश्रेष्ठ देवान् संरक्ष्य पूर्ववत् ।
ब्रह्मा वन्दापनां कुर्य्यात्ततः शीघ्रं नयेत् सुरान् ।। ५१ ।।
महावेदीं ततो नीत्वा स्थापयेदतियत्नतः ।
महावेदीस्थले विष्णुं दारुब्रह्मस्वरूपिणम् ।। ५२ ।।
संरक्ष्य विधिना तत्र विद्यापतिकुलोद्भवाः ।
वन्दापयेयुर्देवाङ्गात्ततो वस्त्रादिकं शनैः ।। ५३ ।।

बहिष्कुर्य्याद्देवतानामग्रं प्रक्षालयेन्नरः ।
प्रासादान्तः समन्ताद् वै धूपं दद्यात्सुगन्धिभिः ।। ५४ ।।
महास्नानं हरेः कार्य्यं पूर्ववद्विधिनार्चकैः ।
चतुःसमैर्विलिप्याथ दिव्यनव्याम्बरैस्ततः ।। ५५ ।।
माल्यैरतुल्यरचनैरलङ्कारैर्मनोहरैः ।
भूषयेज्जगदीशं तं बलभद्रं तथा नृप ।। ५६ ।।
महावेद्यां पाकशालां धौतयेच्च त्रिवारतः ।
गोमयोदकजालेन सुधारसजलैस्तथा ।। ५७ ।।
परिष्कृत्य ततस्तत्र सामान्यविधिना नृपः ।
प्रतिष्ठां च समाचर्य्य वैष्णवाग्नौ च संहुनेत् ।। ५८ ।।
अग्नौ सहस्रं जुहुयान्मूलमन्त्रेण तत्परः ।
पूर्णाहुतिं ततो दत्त्वा पाककारान् वदेत्तदा ।। ५९ ।।
चतुर्थकालपूजायां यद्योग्यं तद्द्रुतं कुरु ।
इत्युक्त्वा पूजकस्तत्र गच्छेत्स देवतान्तिकम् ।। ६० ।।
पाककर्त्ता ततः कुर्य्याद् यथायोग्यं च रन्धनम् ।
ततः प्रतिनिधिस्तत्र प्रतिशीलनमाचरेत् ।। ६१ ।।
महावेद्यास्त्वग्निकोणे मन्दिरे च मनोहरे ।
प्रत्यर्च्चां तत्र संस्थाप्य सामान्यविधिनार्च्चयेत् ।। ६२ ।।
गीतनृत्यादिकं तत्र कारयेच्च मनोरमम् ।
तत्समाप्य ततो विष्णोर्जगन्नाथस्य भूपते ।। ६३ ।।
ततश्चतुर्थकालाग्निं विदधीत यथाविधि ।
स्वापयेद्विधिवद्भक्त्या महावेदिस्थले नृप ।। ६४ ।।
प्रातः पूजावसानेऽथ महास्नानं समाचरेत् ।
ततोऽर्चकस्त्वग्निशर्मा ब्रह्मा च चारुचन्दनैः ।। ६५ ।।

चतुःसमं च संलिप्य नव्यचीनाम्बरैर्हरिम् ।
अलङ्कारैश्च माल्यैश्च भूषयेत्परमेश्वरम् ।। ६६ ।।
दिव्यभोगैः समं भोगं पूर्ण्णं चारुतरं तथा ।
कुर्य्यात् प्रतिदिनं तत्र ह्येवमासप्तवासरम् ।। ६७ ।।
तालध्वजरथे दिव्ये लाङ्गलं ध्वजमुत्तमम् ।
नन्दिघोषरथस्यास्य ध्वजं तार्क्ष्यं तथा नृप ।। ६८ ।।
सुभद्राया रथे पद्मध्वजं च पूजयेत्तथा ।
पञ्चोपचारतो नित्यं त्रिकालार्च्चाप्रसादतः ।। ६९ ।।
तत् सप्तदिनमारभ्य ध्वजपूजा विधीयते ।
रथेषु कुत्सिता जीवा न विशेयुर्यथा नृप ।। ७० ।।
तदा तथा च कर्त्तव्यं त्वया च परमादरैः ।
तेषां प्रवेशे यावद् वै महादोषो भवेद्ध्रुवम् ।। ७१ ।।
रथप्रतिष्ठां च पुनः कुर्य्यादार्य्यजनोत्तमः ।
अनेन विधिना राजन् महावेद्युत्सवं हरेः ।। ७२ ।।
प्रत्यब्दं रचयेद्राजन् भक्तिश्रद्धान्वितो भवान् ।
महावेद्यां नरो यस्तु कृष्णं भद्रां बलं तथा ।। ७३ ।।
पश्येद्भावोत्सवा भक्त्या शुद्धसत्वमना मुदा ।
वाजपेयसहस्रस्य फलं प्राप्नोत्यसंशयम् ।। ७४ ।।
महावेद्यामहं द्रक्ष्ये मनसा चिन्तयेत्तु यः ।
सोऽश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ।। ७५ ।।
शेषे गच्छेत्पुरं स्थानं पश्यतां किं वदाम्यहम् ।
इन्द्रद्युम्नसरस्तीरे विधाय मुण्डनं नृपः ।। ७६ ।।
स्नात्वा तत्र यथान्यायं कृत्वा च तर्पणादिकम् ।
यज्ञवेद्यां जगन्नाथं बलं भद्रां सुदर्शनम् ।। ७७ ।।

सकृद्दृष्ट्वा विमुक्तः स्यात्किमन्यैर्बहुभाषणैः ।
नीलाद्रौ दशवर्षाणि त्रिकालार्चां सुसंयतः ।। ७८ ।।
विष्णोर्दर्शनतो यच्च फलं भवति भूपते ।
तत्फलं समवाप्नोति महावेद्यां निरीक्षणात् ।। ७९ ।।
एकाहमपि चेद्रात्रौ विष्णोस्तस्य निरीक्षणात् ।
तस्माद्दशगुणं प्रोक्तं प्राप्नुयात्फलमुत्तमम् ।। ८० ।।
दिवा रात्रौ च संध्यायां ये पश्यन्ति नरोत्तमाः ।
वैकुण्ठवासिनस्ते स्युः कल्पकोटिषु भूपते ।। ८१ ।।
पूर्वमण्डपमुत्सृज्य परमण्डपवासिनम् ।
रामं कृष्णं सुभद्रां च पश्यतां नास्ति दुर्गतिः ।। ८२ ।।
सप्तवासरमालम्ब्य गृहमुत्सृज्य तत्र वै ।
भक्त्या परमया स्थित्वा मुहुः पश्यन्ति तान् यदा ।। ८३ ।।
तेषां पुण्यफलं भूप संख्यातुं कः क्षमो भवेत् ।
ये नराः भक्तिभावेन भगवन्तं सुरोत्तमम् ।। ८४ ।।
समर्प्य बहुलं भोगं भोजयन्ति ततो द्विजान् ।
तेषां कोटिफलानि स्युस्तेषु प्रीतो जगत्पतिः ।। ८५ ।।
इत्थं तदा महावेद्यामुत्सवो जायते क्षितौ ।
तत्पश्यतां नराणां च मुक्तिः स्यान्नात्र संशयः ।। ८६ ।।
रथोत्सवस्य तस्यैव पञ्चमेऽह्नि नृपोत्तम ।
मध्याह्नपूजनप्रान्ते विष्णोर्हस्ताङ्घ्रिकल्पनाम् ।। ८७ ।।
कुर्य्यादार्य्यस्ततो दिव्यैर्नानालङ्काररराशिभिः ।
वस्त्रमाल्यादिभिस्तावद् वेशं कुर्य्यान्मनोहरम् ।। ८८ ।।
एवं वेशे जायमाने ततः सन्ध्यार्च्चनं चरेत् ।
अथ नीलाचलाल्लक्ष्मीं नानाभूषणभूषिताम् ।। ८९ ।।

नानारत्नमये याने नयेत्तत्र नृपोत्तम ।
काहालछत्रघण्टादि दिव्यवासः स्फुरत्पुरः ।। ९० ।।
उभयोर्पार्श्वयोस्तावत्सङ्गे शिवगणैर्युताम् ।
महोत्सवतया लक्ष्मीं नीत्वा रथवरान्तिकम् ।। ९१ ।।
स्थापयित्वा तु तत्रैव ततो वन्दापयेच्च माम् ।
दीपोपचारसमये सन्ध्यायां च रमापतेः ।। ९२ ।।
काले तस्मिन् महालक्ष्मीं स्थापयेदग्रतः प्रभोः ।
उत्तार्य्य देवताङ्गात्तन्माल्यं पात्रेषु रक्षितम् ।। ९३ ।।
पूजायाः पूर्वतस्तस्याः श्रियः सन्तोषणेऽर्चकः ।
विद्यापतिकुलोद्भूतः करे तन्माल्यमादरात् ।। ९४ ।।
मालामानीय सहसा तस्याश्चैवोपरि न्यसेत् ।
दिनत्रये जगन्नाथो गमिष्यति पुनर्गृहम् ।। ९५ ।।
नीलाचलं त्वमद्यैव गच्छ लक्ष्मी द्रुतं शुभे ।
इत्युक्त्वा स च विप्रस्तु तूष्णीं तिष्ठेन्नृपोत्तम ।। ९६ ।।
यत्रास्ते माधवः श्रीमान् विश्वधात्र्या समं तदा ।
तत्रैव स्थापयेल्लक्ष्मीमानीय च तपोधन ।। ९७ ।।
गुण्डिचासौ महायात्रा ख्याता नवदिनात्मिका ।
तस्यामत्र रमां पृथ्वीं माधवं पूजयेत्तदा ।। ९८ ।।
नीलाचलं च नो कुर्य्यात् शून्यं विष्णोर्निदेशतः ।
ततो नीलाचले रक्षेद्धरां पद्मां च माधवम् ।। ९९ ।।
नियोजयेन्निजस्थाने तांश्च पद्मानुगान् शिवान् ।
ततः षष्ठीदिने प्राप्ते प्रातःपूजावसानतः ।। १०० ।।
आचार्य्याद्देवदेवाङ्गान्माल्यं संगृह्य यत्नतः ।
दक्षिणाभिमुखं कर्त्तुं रथत्रयमनिन्दितम् ।। १०१ ।।

आज्ञां देहि जगन्नाथ गन्तुं नीलाचलं प्रभो ।
इत्युक्त्वा तूर्ण्णमागत्य रथान्तिकतले स्थिताः ।। १०२ ।।
पातयामासुरतुलां मालां ते स्यन्दनोपरि ।
एवं विधिं प्रकृत्याथ ततो दक्षिणदिङ्मुखम् ।। १०३ ।।
रथत्रयं च संचक्रे जनः कश्चिन्नृपोत्तम ।
अष्टमस्य दिनस्यापि पूर्वं रात्रौ नृपोत्तम ।। १०४ ।।
गते यामे सपादे च निद्राभङ्गं हरेश्चरेत् ।
कृत्वा पूर्ववदाश्चर्य्यं काषांशुकनिबन्धनम् ।। १०५ ।।
रचयित्वा तदा क्षिप्रं नित्यस्नानं चरेद्विभोः ।
वस्त्रालङ्कारदानेन भूषयित्वा पुनर्विभुम् ।। १०६ ।।
प्रातः पूजनमाचर्य्य मङ्गलारोपणं पुनः ।
कुर्य्याद्राजन् भवान् भूयः पुष्पाञ्जलिसमर्पणम् ।। १०७ ।।
कृत्वा प्रस्थापयेन्नीलगिरिं प्रति सुरेश्वरम् ।
दक्षिणद्वारमासाद्य पूर्ववन्नृपसत्तम ।। १०८ ।।
दक्षिणाभिमुखे देवे तद्वन्दापनमाचरेत् ।
महोत्सवतया तत्र रम्ये काञ्चनमण्डिते ।। १०९ ।।
नानालङ्कारसंयुक्ते मेरुशृङ्गसमन्विते ।
लसच्चक्रसमूहेऽस्मिन् पश्यज्जनसुखप्रदे ।। ११० ।।
नव्यनीरदघोषेऽस्मिन् नन्दिघोषे मनोरमे ।
नानादिव्याम्बराच्छन्ने राजमानेऽतिपावने ।। १११ ।।
घण्टाचामरवृन्दाढ्ये नानारत्नसमुज्ज्वले ।
तादृशे च रथे दिव्ये स्थापयेत्परमेश्वरम् ।। ११२ ।।
अरुणोदयवेलायां प्रदक्षिणतया पुनः ।
रथे निवेश्य देवेशं चालयेद्रथसत्तमान् ।। ११३ ।।

पूर्ववद्रथवर्य्येषु सेवां कृत्वा जगत्पतेः ।
चालयित्वा रथान् शीघ्रं पूर्ववन्मार्गमध्यतः ।। ११४ ।।
विश्रामयेद्बहुतरं तत्र नैवेद्यमुत्तमम् ।
शीतलद्रव्यनिचयं महोत्सवतयार्पयेत् ।। ११५ ।।
उत्तराभिमुखे जाते तथा दक्षिणदिङ्मुखे ।
रथत्रये जनो यस्तु भक्तिश्रद्धन्वितः परम् ।। ११६ ।।
रामं कृष्णं सुभद्रां च पश्येन्मार्गे रथे स्थितम् ।
पदे पदेऽश्वमेधानां फलं प्राप्य महीतले ।। ११७ ।।
मनोरथफलान्येवं लब्ध्वान्ते मोक्षमाप्नुयात् ।
रथघोषं समाकर्ण्य ये हृष्यन्ति नरोत्तमाः ।। ११८ ।।
रथच्छायां समालम्ब्य भक्तिश्रद्धान्विता यदा ।
ब्रह्महत्यादिपापेभ्यो मुक्ताः स्युर्भवबन्धनात् ।। ११९ ।।
रथानुगमनं ये वै कुर्वन्ति द्विजसत्तमाः ।
तेषां च वन्दनं भूयः करिष्यन्ति सुरा दिवि ।। १२० ।।
रथानुगमनं तत्तु भजते परमं पदम् ।
बहुनात्र विमुक्तेन रथोत्सवविलोकनात् ।। १२१ ।।
मुक्तिर्भवति वै पुंसां सन्देहोऽत्र न विद्यते ।
घोषयात्रोत्सवे जाते जगत् त्रयजनाकुले ।। १२२ ।।
स्पृष्टास्पृष्टभवो दोषो नास्ति तत्र तपोधनः ।
रथोपरि स्थिते दिव्ये कालोलूकौ च गृध्रकः ।। १२३ ।।
चित्रकश्च यदा दैवात्संविशेत्पथि भूसुराः ।
नैवेद्यसमये यावत्तदा तत्तु बहिःक्षिपेत् ।। १२४ ।।
बृहद्विधिविधानेन महास्नानं चरेद्धरेः ।
चतुःसमेन लेपेन लेपयेद्देवताङ्गकम् ।। १२५ ।।

नवांशुकैश्च भूषाभिर्भूषयेन्माल्यजालकैः ।
षण्णां रसानां तैर्दिव्यैर्नैवेद्यैस्तोषयेद्धरिम् ।। १२६ ।।
कुर्य्यात्तु दोषशान्तिं च मूलेन मनुना हुनेत् ।
लक्षमात्रं गवामाज्यैर्होमादिपूजकस्तदा ।। १२७ ।।
आदौ संकल्प्य विधिवत् कृत्वा वरुणपूजनम् ।
आचार्य्यब्रह्मवरणं स्वस्तिवाचनपूर्वकम् ।। १२८ ।।
वैष्णवाग्निविधानेन कृत्वाग्निं पूजयेद् द्विजः ।
गन्धादिविधिना तत्र मूलेन मनुना ततः ।। १२९ ।।
तन्मनोश्चैव गायत्र्या लक्षमात्रं हुनेत्सुधीः ।
अभावे च तदर्द्धं स्यात्तदभावे तदर्द्धकम् ।। १३० ।।
पूर्णाहुतिं ततः कृत्वा हेमभूम्यादिदक्षिणाम् ।
दत्त्वा बहुविधं दिव्यैः रत्नैर्विप्रांश्च तोषयेत् ।। १३१ ।।
शान्तिरेषा प्रकर्त्तव्या गदिता मुनिपुङ्गवैः ।
शान्तिं विना महान् दोषो दोषाद्राजा विनश्यति ।। १३२ ।।
राज्ये दुर्भिक्षमरणं क्लेशः स्यान्नात्र संशयः ।
एतच्छान्त्या देवतायाः सन्तोषो भवति द्विजाः ।। १३३ ।।
अतः सन्तोषतो भद्रं राज्यस्य च नृपस्य च ।
देवतायाः विभ्रमणे पूजने स्यन्दनेऽथवा ।। १३४ ।।
काकादीनां यदावेशे शान्तिरेषा विधीयते ।
अथो महोत्सवतया रथानानीय चान्तिकम् ।। १३५ ।।
देव्या मरीचिकायाश्च ततो नीलाचलाद्रमाम् ।
नानालङ्कारसंयुक्तां दिव्यमाल्याम्बरान्विताम् ।। १३६ ।।
वासयित्वा दिव्ययाने नानारत्नसुशोभने ।
छत्रचामरघण्टादि काहालाद्युत्सवे कृते ।। १३७ ।।

रथान्तिकं समानीय जगदीशपुरःस्थले ।
हस्ते धृत्वा तु तां लक्ष्मीं परस्परविलोकनम् ।। १३८ ।।
भ्रामयित्वा हरेरङ्गान्मालामानीय मञ्जुलाम् ।
दद्याल्लक्ष्मै तदा शीघ्रं भ्रामयित्वा रथं नृप ।। १३९ ।।
महोत्सवतया लक्ष्मीं प्रासादं तु ततो नयेत् ।
प्रासादस्य पुरो द्वारि रथवर्य्यान्निवेशयेत् ।। १४० ।।
सायं पूजा रथेष्वेव कर्त्तव्या सावधानतः ।
तदन्ते नृपतिश्रेष्ठ दत्त्वा पुष्पाञ्जलित्रयम् ।। १४१ ।।
दत्त्वा रथाग्रतो रक्षेत्तं तदा कमलेक्षणम् ।
ततो लक्ष्मीं समानीय तृतीयावरणान्तिके ।। १४२ ।।
महोन्नते मण्डपेऽस्मिन् पश्यतां विष्णुसम्मुखे ।
ततो विद्यापतेर्वंश्यः पूर्ववत्सुरपुङ्गवान् ।। १४३ ।।
नीराजयेत्तदा क्षिप्रं क्षितिनिर्जरसत्तमाः ।
ये च मर्त्त्याः प्रपश्यन्ति तद्वन्दापनमुत्तमम् ।। १४४ ।।
पश्यन्तो वाजिमेधानां लभन्ते फलमुत्तमम् ।
मनोरथस्य संसिद्धिः प्रीतो विष्णुस्तदा भवेत् ।। १४५ ।।
शेषे यान्ति हरेर्धाम दुःखक्लेशविवर्जितम् ।
नीलाम्बरस्य भद्रायास्त्वादौ वन्दापनां चरेत् ।। १४६ ।।
पश्चाद्रमायास्तद्विष्णोः कुर्य्यान्नीराजनं परम् ।
सुदर्शनं पुरस्कृत्य पूर्ववद्देवतात्रयम् ।। १४७ ।।
नयेन्महोत्सवैस्सर्वैर्मोदयन् भुवनत्रयम् ।
शनैः शनैश्च नीत्वाथ वैनतेयाग्रतः स्थितम् ।। १४८ ।।
दक्षिणाभिमुखं कृत्वा पूर्ववद्विजितेन्द्रियाः ।
वन्दापनां समाचर्य्य रामं भद्रां सुदर्शनम् ।। १४९ ।।

रत्नसिंहासने दिव्ये नानाशर्मप्रदे शुभे ।
लसद्वितानजालेऽस्मिन् पूर्ववत् स्थापयेत्सुरान् ।। १५० ।।
दक्षिणाभिमुखे विष्णौ वैनतेयपुरःस्थिते ।
तद्वन्दापनमालोक्य पद्मा गत्वा जवात्ततः ।। १५१ ।।
कौतुकाद्द्वारमावृत्य तिष्ठेत्तत्क्षणमुत्तमाः ।
वैनतेयाग्रतस्तस्मान्मन्दं मन्दं नयेत्पुनः ।। १५२ ।।
जगन्नाथं सुरश्रेष्ठं तद्द्वारं प्रति सत्तमाः ।
तदा घण्टादिवाद्यानां कारयेद्ध्वनिमुत्तमम् ।। १५३ ।।
विद्यापतेः कुलश्रेष्ठो द्वारोपान्ते स्थितः स्वयम् ।
उत्फेटनं कवाटस्य कर्त्तुं लक्ष्मीं तु पार्षदाः ।। १५४ ।।
ततो लक्ष्मीपरिजनो विहाय नीलभूधरम् ।
गुण्डिचामण्डपं तावद्गतमत्र किमस्ति भो ।। १५५ ।।
इत्येवमुक्त्वा द्वारस्य मोचनं कृतवांस्तदा ।
प्रासादान्तस्ततः किञ्चिन्नीत्वाथ कमलापतिम् ।। १५६ ।।
उत्तराभिमुखं कृत्वा रमां दक्षिणदिङ्मुखीम् ।
रचयित्वा च यो राजन् परस्परनिरीक्षणम् ।। १५७ ।।
मिथः शरीरवसनग्रन्थियोजनमाचरेत् ।
विवाहसप्तदिवसे मङ्गलाचरणं हृदा ।। १५८ ।।
संचिन्त्य युगपद्भक्त्या तयोर्वन्दापनां चरेत् ।
ततो वन्दापनान्ते च सुवासितजलं पुनः ।। १५९ ।।
पक्वताम्बूलनिचयं ताभ्यां दद्याच्च भक्तितः ।
तद्वस्त्रग्रन्थिश्लथनं कुर्य्यात्तावन्नृपोत्तम ।। १६० ।।
ततो नीलाचले रम्ये स्वपदे स्थापयेद् विभुम् ।
इत्थं श्रीजगदीशस्य गुण्डिचा नामधारिणी ।। १६१ ।।

यात्रा पवित्रा जगतां त्रिविधावयवान्विता ।
गुण्डिचा गुण्डिचेत्येवं ये जल्पन्ति नरोत्तमाः ।। १६२ ।।
ते सर्वे सर्वयज्ञानां प्राप्नुवन्ति फलं महत् ।
भवबन्धाद् विमुक्तास्ते गुण्डिचानामकीर्त्तनात् ।। १६३ ।।
पश्यतां भक्तिभावेन न जाने किं फलं नृप ।।
अथ तस्मिन् जगन्नाथे नीलाचलपतौ प्रभो ।। १६४ ।।
नीलाद्र्युत्सवमाचर्य्य विष्णोर्वन्दापनं चरेत् ।
देवताङ्गात्तु वस्त्राणि माल्यालङ्कारसंचयम् ।। १६५ ।।
बहिष्कृत्य ततः शीघ्रं देवानां परिधौतयेत् ।
महास्नानं ततः कुर्य्याद् यथाविधि नृपोत्तम ।। १६६ ।।
सर्वाङ्गलेपनं कृत्वा नवीनाम्बरमर्पयेत् ।
दिव्यमाल्यानि देयानि भक्तिश्रद्धान्वितः शुचिः ।। १६७ ।।
चतुर्थकालपूजां च कृत्वा विधिवदर्च्चकः ।
ततो नक्तं विसृज्याशु सर्वांस्तांश्च दिवौकसः ।। १६८ ।।
पूर्ववत्स्नापयेद्देवान् दिव्ये पर्य्यङ्कतल्पके ।
भक्तिभावान्वितो भूप पूजको पूतमानसः ।। १६९ ।।

सूत उवाच

इत्थं श्रीकरुणासिन्धोर्दीनबन्धोर्जगत्पतेः ।
गुण्डिचोत्सवनीतिः स्यात्सर्वलोकहितप्रदा ।। १७० ।।
पतितोद्धारणार्थं वै दीनानां हितकारणात् ।
कुर्य्यात् प्रत्यब्दमतुलं गुण्डिचाख्यं महोत्सवम् ।। १७१ ।।
ब्रह्मणा कथ्यमानं तं गुण्डिचोत्सवमादरात् ।
श्रुत्वा तदा स नृपतिर्भजे मुदमनुत्तमाम् ।। १७२ ।।

चञ्चन्नीलमहीधरालयवतो लक्ष्मीपतेर्भूपते
यात्रामत्र वरां तदा कथयतः श्रीगुण्डिचाख्यां शुभाम् ।
सूताज् ज्ञानवतः क्षितौ मुनिवराः श्रोत्रद्वयाह्लादिनीं
श्रुत्वा वाचममी तपस्विनिचया जाताश्च रोमाञ्चिताः ।। १७३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये गुण्डिचोत्सवकथनं नाम षोडशोऽध्यायः ।।

सप्तदशोऽध्यायः

ब्रह्मन्ननुग्रहात्ते वै घोषयात्राश्च ता हरेः ।
इदानीं शायिनी यात्रा भवेत्केन वदस्व मे ।। १ ।।

ब्रह्मोवाच

राजन् गुह्यतरं ब्रूहि हरेः शयनकर्म तत् ।
यच्च स्मरणमात्रेण सर्वपापं व्यपोहति ।। २ ।।
क्षणं तद्वीक्षणादेव सर्वान् कामानवाप्नुयात् ।
सावधानतया भूप शृणु यात्रां च शायिनीम् ।। ३ ।।
आषाढस्य सिते पक्षे पुण्ये तत्र हरेर्दिने ।
चतुर्थार्च्चावसानेऽपि वस्त्रमाल्यादिकं पुनः ।। ४ ।।
उत्तार्य्य देवतादेहात् प्रत्यर्च्चा मूर्त्तिकत्रयम् ।
समानीय सुराग्रेऽपि स्थापयेन्नृपसत्तम ।। ५ ।।
भद्रासने बलस्याथ शङ्खं चक्रं हलं तथा ।
मुषलं धारयन्तीं तां प्रत्यर्च्चां च शुभोदयाम् ।। ६ ।।
तिष्ठन्तीं सर्वभूषाभिर्भूषितां सुमनोहराम् ।
तथा चक्रायुधस्यापि शङ्खचक्रगदाब्जधृक् ।। ७ ।।

नानालङ्कारसंयुक्तां प्रत्यर्च्चां सुमनोहराम् ।
तादृशां देवताग्रेऽपि स्थापयेत्तादृशासने ।। ८ ।।
तथैव भद्रां प्रत्यर्च्चां सर्वलक्षणलक्षिताम् ।
पदद्वयवराभीतिभ्राजमानकराम्बुजाम् ।। ९ ।।
पदद्वयेन तिष्ठन्तीं स्थापयेन्नृपसत्तम ।
प्रत्येकं च सुवर्ण्णस्य पञ्चविंशतिसंख्यकैः ।। १० ।।
पलैर्विनिर्मिता रम्याः प्रत्यर्च्चाश्च पृथक् पृथक् ।
पूर्वोक्तविधिना पञ्चामृतैः संस्नाप्य पूजकाः ।। ११ ।।
बीजपूरद्रवेणैव स्नापयित्वा कुशोदकैः ।
चारुचेलनं संप्रोच्छ्य दिव्यनव्याम्बरद्वयम् ।। १२ ।।
वासयित्वा पृथक् ताश्च गन्धमाल्यसुभूषणैः ।
भूषयित्वा ततः स्वे स्वे देवपार्श्वे निवेशयेत् ।। १३ ।।
बलादिदेवतानां च चतुःसमविलेपनम् ।
नवीनवस्त्रालङ्कारगन्धपुष्पैश्च भूषयेत् ।। १४ ।।
छत्रकाहालघण्टादिमर्द्दलध्वनिसंयुतम् ।
चरुहोता तदा भूप पाकशालान्तराद् बहु ।। १५ ।।
नैवेद्यं च समानीय पूर्ववत् पञ्चपंक्तितः ।
स्थापयित्वा ततो भूप चतुर्विंशतिभिः परैः ।। १६ ।।
उपचारैः समभ्यर्च्य पूजान्ते पूजकस्तदा ।
पूर्वस्यां परमेशस्य दिशि मण्डपसत्तमे ।। १७ ।।
चतुर्द्वारसमायुक्ते सुधालेपनलेपिते ।
वितानमण्डिते रम्ये तादृशे तत्र मण्डपे ।। १८ ।।
दन्तिदन्तसमुद्भूतां नानारत्नसमन्विताम् ।
दोलां संयोज्य परमां पेटीं तां तत्र मञ्जुलाम् ।। १९ ।।

तूलीं लीलोपधानं च ततः कर्पूररेणुभिः ।
महासुवासितं कृत्वा ततस्ताः प्रतिमाः शुभाः ।। २० ।।
पूर्वदिङ्मस्तकत्वेन स्नापयेयुस्तदाऽनघ ।
अग्निशर्मा ततस्तूर्ण्णं दिव्यं दामनकं तथा ।। २१ ।।
पीतवस्त्रद्वयं तावद् बहिष्कृत्य शनैः शनैः ।
तुभ्यं दास्यति तद्भूप कृतकृत्यतया ततः ।। २२ ।।
गृहीत्वा तन्महाभक्त्या स्वस्थचित्तो भवेत्तदा ।
बलभद्र नमस्तेऽस्तु रोहिणीनन्दन प्रभो ।। २३ ।।
रेवतीवल्लभ श्रीमन् सुखेन शयनं कुरु ।
जगदीश ! जगन्नाथ ! जगदानन्दकारक! ।। २४ ।।
जगद्धाम जगद्रूप नमस्ते जगतां पते ।
दुष्टानां नाशनार्थाय शिष्टानां प्राणहेतवे ।। २५ ।।
लक्ष्मीकलत्रकल्पेऽस्मिन् सुखेन शयनं कुरु ।
भद्रे देवी नमस्तुभ्यं सर्वभद्रप्रदायिनि ।। २६ ।।
भद्राय जगतामत्र नमस्ते शयनं कुरु ।
निगद्य प्रार्थानास्त्वेताः सत्पुष्पाञ्जलिकत्रयम् ।। २७ ।।
दत्त्वा तत्पेटिकां तावद्बध्नीयाद्दृढमादरात् ।
मण्डपद्वारसंस्थस्य कपाटस्य च बन्धनम् ।। २८ ।।
दृढं कार्य्यं प्रयत्नेन तदा नृपशिरोमणे ।
स्वापयात्रामिमां विष्णोर्ये पश्यन्ति मुदान्विताः ।। २९ ।।
सुखमत्र परं भुक्त्वा पुत्रपौत्रसमन्विताः ।
गन्तारस्ते परं धाम शेषेऽपि सुरदुर्ल्लभम् ।। ३० ।।
कदाचिद्यदि भूपाल स्वापयात्रा पतेद्रथे ।
तदा तृतीयकालार्च्चा प्रान्ते विधिममुं चरेत् ।। ३१ ।।

चातुर्मास्यान्तरे राजन् मासवृद्धिर्यथा भवेत् ।
तदा श्रावणमासस्य शुक्लेऽपि हरिवासरे ।। ३२ ।।
हरेः शयनयात्रायाः विधिः कार्य्यो न संशयः ।
पञ्चमासानभिव्याप्य भ्रमाद् यदि हरेश्च तत् ।। ३३ ।।
स्वापकर्म यदा भूयात्तदा लोके महद्भयम् ।
देशोच्छेदनमत्युग्रं राजा नश्येत्तदा ध्रुवम् ।। ३४ ।।
नानाविधं महोत्पातं जायते नात्र संशयः ।
नरकं च पतेद्घोरं तस्मात्तत्तु न कारयेत् ।। ३५ ।।

सूत उवाच

शृणुध्वं मुनिशार्द्दूल ! ब्रह्मणा कथितं परम् ।
राजानं प्रति तद्विष्णोः शयनं कर्म तच्छ्रुतम् ।। ३६ ।।
कथयामि रहस्यं वो ऋषयो गरुडस्य च ।
शायनं कर्म तत्सर्वं शृण्वतां पापनाशनम् ।। ३७ ।।
द्वादश्यां च तिथौ विप्रा गारुडं शयनं भवेत् ।
त्रिकालपूजाप्रान्ते च गरुन्मन्तं शुभोदयम् ।। ३८ ।।
पञ्चामृतेन संस्नाप्य मण्डयेन्नववाससी ।
गन्धपुष्पैरलङ्कृत्य विराजमयमुत्तमम् ।। ३९ ।।
नैवेद्यं च प्रकुर्वीत पूजां पञ्चोपचारतः ।
ततो वन्दापनां कुर्य्याद्दद्यात् पुष्पाञ्जलिं द्विजाः ।। ४० ।।
पल्यङ्कस्य तले रम्ये प्रभोस्तस्य परात्मनः ।
तार्क्ष्यं सौख्येन शयनं कुरुष्व भक्तिसत्तमाः ।। ४१ ।।
इति संप्रार्थ्य गरुडं चिन्तयेत्कमलापतेः ।
पल्यङ्कतलसंसुप्तं हरेः प्रियचिकीर्षया ।। ४२ ।।
इत्थं शयनयात्रायाः विधिं कथयतो विधेः ।
इन्द्रद्युम्नो महीपालः श्रुत्वा हृष्टतरोऽभवत् ।। ४३ ।।

पुनर्ब्राह्मणमनघं ऋषयः स च भूपतिः ।
पप्रच्छ स्वच्छकीर्त्तिर्यत्सांप्रतं तद्वदामि वः ।। ४४ ।।
श्रीनीलाचलकन्दरेऽतिमधुरे सारे स्थितस्य श्रियः
कान्तस्यास्य जनस्य येऽघनिचयक्लेशघ्नमेतं दृढम् ।
अध्यायं परमादरेण ऋषयः शृण्वन्ति भूमितले
ते नूनं सुखमाविभुज्य सहसा गच्छन्ति लोकं हरेः ।। ४५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शायिनीयात्राविधिकथनं नाम सप्तदशोऽध्यायः ।।

अष्टादशोऽध्यायः

इन्द्रद्युम्न उवाच

ब्रह्मन् शयनयात्राया यो विधिः कथितस्त्वया ।
सांप्रतं स श्रुतो देव यत् पृच्छामि च तद्वद ।। १ ।।
दक्षिणायनयात्रापि केन वा विधिना विधे ।
कर्त्तव्या कथय त्वं भो सर्वज्ञो यन्महेश्वर ।। २ ।।

ब्रह्मोवाच

दक्षिणायनयात्रायाः विधिं शृणु महीपते ।
यदा भवति संक्रान्तिः कर्कटी वा जगत्पतेः ।। ३ ।।
प्रातः पूजावसानेऽथ तद्दिनेऽपि यथाविधि ।
महास्नानं प्रकुर्वीत पूजकः शुद्धमानसः ।। ४ ।।
देवताङ्गे ततः कार्यः चतुःसमविलेपनम् ।
पूर्ववच्च ततो दिव्यवस्त्राणि वीक्षणादिभिः ।। ५ ।।

संस्कृत्य परिधास्येति मन्त्रमुक्त्वा स मन्त्रवित् ।
अभिमन्त्र्य च देवाङ्गे देवतानां समर्पयेत् ।। ६ ।।
अलङ्करणमसीत्युक्त्वालङ्कारार्पणमाचरेत् ।
श्रीश्च ते मनुमित्येवमुच्चार्य्य सुमनोऽर्पणम् ।। ७ ।।
ततः काहालघण्टादिछत्रचामरसंयुतम् ।
नैवेद्यं दुर्लभं तावच्चरुहोता समानयेत् ।। ८ ।।
पूर्ववत्पङ्क्तिमध्ये हि स्थापयेत्तदनन्तरम् ।
अग्निशर्मा बलेर्दिव्यं दामदामनकं न्यसेत् ।। ९ ।।
तथैव जगतामीशं चारुदामनकं स्रजम् ।
पीतवस्त्रद्वयं तावद्दद्याच्चन्दनमुत्तमम् ।। १० ।।
सुभद्रायै ततो दद्यान्माल्यं दामनकं तथा ।
एतदन्तेऽर्च्चकास्तेऽपि पूर्ववन्मध्यमार्च्चनम् ।। ११ ।।
कुर्य्यासुर्नित्यनैवेद्यादधिकं च चतुर्विधम् ।
कृत्वा नैवेद्यमाचार्य्यमर्पयेत् पृथिवीपते ।। । १२ ।।
मुखे नीराजनं कृत्वा जगन्नाथार्चकस्तदा ।
सिंहासनाद् बहिर्भूयो गच्छेद्द्वारसमीपतः ।। १३ ।।
घण्टादीन्युपचाराणि पात्रहोता करे तदा ।
धृत्वा तदन्तिकं गच्छेत्तथा ब्रह्मा कमण्डलुम् ।। १४ ।।
चरुहोता जगन्नाथपङ्क्तितः किञ्चिदुत्तमम् ।
पायसान्नं करे धृत्वा गच्छेयुः पूजकादयः ।। १५ ।।
जयश्च विजयो यत्र द्वारपालौ च तिष्ठतः ।
सामान्यविधिना तत्र पूजकोऽसौ समर्चयेत् ।। १६ ।।
तदन्नं सहसा कृत्वा कालभागसमन्वितम् ।
ततो जयं च विजयं क्षेत्रपालं गणेश्वरम् ।। १७ ।।

देहलीस्थां कालरात्रिं दिक्पालांश्च दिशं क्रमात् ।
प्रत्येकं पूजयेत्सर्वा देवताश्चन्दनादिना ।। १८ ।।
छत्रचामरघण्टादिकाहालमर्द्दलादि यत् ।
आचार्य्योऽपि बलिं दद्यादष्टशासु यथाक्रमम् ।। १९ ।।
कुमुदं कुमुदाक्षं च पुण्डरीकं च वामनम् ।
शङ्कुकर्ण्णं सर्वनेत्रं सुमुखं सुप्रतिष्ठितम् ।। २० ।।
प्रत्येकं पूजयेन्मत्री चन्दनादिभिरुत्तमम् ।
एतस्यापि विधेरन्ते पुनः सिंहासने वसन् ।। २१ ।।
गण्डूषादिकमाचार्य्यो दद्यात्तस्मै मुरारये ।
अथासौ पूजको ब्रह्मा त्वग्निशर्मा च पूर्ववत् ।। २२ ।।
वन्दापनां प्रकुर्य्यासुः श्रद्धाभक्तिसमन्विताः ।
इमामयनयात्रां ये पवित्रां सर्वकामदाम् ।। २३ ।।
पश्यन्ति भक्त्या ते सर्वे मुक्ताः स्युः पापजालतः ।
अन्ते विष्णुपुरं यान्ति देवानामपि दुर्लभम् ।। २४ ।।
संक्रान्तिः कर्कटीयाश्चेद्रथे कालवशात्पतेत् ।
विधिरेष च कर्त्तव्यो भक्त्या भूपतिसत्तम ।। २५ ।।

सूत उवाच

नीलाद्रौ दुरितौघनाशकुशले तीर्थोज्ज्वले मञ्जुले ।
नानाशर्मनिकेतने त्रिभुवने ख्याते जगत्पावने ।
तां यात्रां परमामिमां मुररिपोः श्रुत्वाब्जयोनिस्तदा
हृष्टा नष्टविकल्मषाश्च ऋषयो जाताश्च तत्रोत्सुकाः ।। २६ ।।

इति श्रीनीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये अयनयात्राकथनं नामाष्टादशोऽध्यायः ।।

ऊनविंशोऽध्यायः

इन्द्रद्युम्न उवाच

चतुर्मुख नमस्तेऽस्तु लोकानुग्रहकारक ।
पद्मयोने नमस्तुभ्यं पितामह नमोऽस्तु ते ।। १ ।।
नीलाचलपतेर्विष्णोः श्रावणे मासि यद् भवेत् ।
तत्सर्वं च विशेषेण वद संप्रति तत्त्वतः ।। २ ।।
साधु साधु नृपश्रेष्ठ त्वं विष्णोर्भक्तसत्तमः ।
कथयामि समासेन तत्तथैवाचर द्रुतम् ।। ३ ।।
श्रावणस्य च मासस्य त्वमावास्यादिने नृप ।
अरुणोदयवेलायां प्रातः पूजां समाचरेत् ।। ४ ।।
अस्यामपि च पूजायां नैवेद्यमधिकं भवेत् ।
नानापूजासमायुक्तं नानाव्यञ्जनसंयुतम् ।। ५ ।।
पायसं खेचरान्नं च चतुर्विधमनुत्तमम् ।
तदा देयं नृपश्रेष्ठ विष्णवे मुरजिष्णवे ।। ६ ।।
निर्मितं स्वर्ण्णरत्नेन विश्वावसुकुलोद्भवः ।
तथा विद्यापतेर्वंश्योऽलिकेऽलंकृतमर्पयेत् ।। ७ ।।
पञ्चामृतैस्ततो मन्त्री महास्नानं समाचरेत् ।
ततो मध्याह्नपूजां च कुर्य्यान्नृपतिसत्तम ।। ८ ।।
वन्दापनां ततः कुर्य्यात्पूर्ववज्जगतीपतेः ।
ततः श्रावणपौर्ण्णम्यां प्रातः पूजावसानतः ।। ९ ।।
पूर्ववत् प्रचरेन्मन्त्री महास्नानं यथाविधि ।
चतुःसमविलेपं च कृत्वा वेशं मनोहरम् ।। १० ।।
नानालङ्कारमाल्यादि नवीनाम्बरदानतः ।
बलभद्राग्रतो राजन् स्थापयेत्कलशं नवम् ।। ११ ।।

भद्रासनं च तत्रैव पिष्टकैर्घटयेत्तदा ।
षष्ठीदेव्याः प्रतिकृतिं मृकण्डुतनयस्य च ।। १२ ।।
तथैव रचयेद्धीमान् सप्तानां चिरजीविनाम् ।
ततोऽर्चकोऽग्निशर्माणं संकल्पयति कर्मवित् ।। १३ ।।
कुर्य्यादाचार्य्यवरणमग्निशर्माऽर्चकस्य च ।
ब्रह्मावरणमाकुर्य्यात्तथैवायं महीपते ।। १४ ।।
आचार्य्यस्तु ततः पीठे वसन् कुम्भे गणेश्वरम् ।
वरुणं च तथादित्यप्रमुखांश्च नवग्रहान् ।। १५ ।।
इन्द्रादिदशदिक्पालान् तथैव क्षेत्रदेवताः ।
मृत्युञ्जयं तथा सर्वलोकाधिपतिमुत्तमम् ।। १६ ।।
ब्रह्माणं मां तथा सर्वव्यापिनं विष्णुमेव च ।
सर्वविद्याधिपतिं च तथेशानं च पूजयेत् ।। १७ ।।
प्रतिपत्प्रमुखाणां च तिथीनां परिपूजनम् ।
सप्तविंशतिनक्षत्राण्यश्विन्यादीनि पूजयेत् ।। १८ ।।
तथा द्वादशराशीनां मेषादीनां समर्चनम् ।
स्वनक्षत्रं स्वराशिं च क्षेत्रपालात्मदेवते ।। १९ ।।
कुलदेवान् पूजयित्वा तथा च मृत्युदेवताः ।
धीषणा बुद्धिमाता च गौरी च कटपूतना ।। २० ।।
एताश्च देवताः सर्वा कुम्भे पञ्चोपचारतः ।
पूजयेद्विधिवत्पाकं ततो भद्रासने नृप ।। २१ ।।
षष्ठीदेवीं पूजयित्वा मार्कण्डेयं च पूजयेत् ।
हनुमन्तं ततो धीमान् विभीषणमुदारधीम् ।। २२ ।।
अश्वत्थामानमेवात्र बलिं व्यासं च पूजयेत् ।
कृपं परशुरामं च पूजयेदतिभक्तितः ।। २३ ।।

पञ्चोपचारविधिना चतुर्थ्यन्तं स्वनामतः ।
ततो मध्याह्नपूजां च यथाविधि समाचरेत् ।। २४ ।।
बलभद्रस्याग्निशर्मा मङ्गलारोपणं चरेत् ।
वन्दापनां ततः कुर्य्याद् विधिना स नृपोत्तम ।। २५ ।।
आचार्य्यो जगदीशस्य कुर्य्याद् वन्दापनां तदा ।
ब्रह्मा कृत्वा सुभद्रायाः कर्पूरवर्त्तिकं शुभम् ।। २६ ।।
दूर्वाक्षतान्यर्पयेद् वै ततो विद्यापतेर्नृप ।
सन्तानस्तत्र चाग्रेऽपि विष्णोस्तं च सुदर्शनम् ।। २७ ।।
स्थापयेदथ तं विष्णुमर्च्चकः प्रार्थयेत्तदा ।
दीनबन्धो जगन्नाथ जगन्मङ्गलकारक ।। २८ ।।
आज्ञां देहि रमाकान्त स्तम्भरूपं सुदर्शनम् ।
बलजन्मोत्सवार्थं च तथा देवर्षिपूजने ।। २९ ।।
अङ्गिराश्रमपूजायै तद्वटस्य प्रदक्षिणे ।
कण्ड्वाश्रमार्चनार्थं च क्षेत्रभ्रमणहेतवे ।। ३० ।।
एतदर्थं महाबाहो ह्याज्ञापय सुदर्शनम् ।
इत्येवं प्रार्थनामुक्त्वाचार्य्यः कार्य्यविदां वरम् ।। ३१ ।।
जगदीशाङ्गतश्चाज्ञामालामानीय तच्छिरे ।
विश्वावसोश्च वंश्यास्ते तथा विद्यापतेर्नृप ।। ३२ ।।
बहिः प्रस्थापयामासुः सुदर्शनमनामयम् ।
नानालङ्कारसंयुक्तं पुष्पमाल्यविभूषितम् ।। ३३ ।।
रत्नदोलान्तरस्थं तं प्रासादं भ्रामयेत्पुनः ।
मार्कण्डेयान्तिकं नीत्वा महोत्सवतया तदा ।। ३४ ।।
अग्निशर्माणमाचार्य्यस्ततः संकल्पयेत् पुरः ।
अग्निशर्मा तथाचार्य्यब्रह्मावरणमाचरेत् ।। ३५ ।।

वस्त्रयज्ञोपवीताद्यैरलङ्कारैश्च चन्दनैः ।
पुष्पैश्च वरणं कृत्वा तत्र भद्रासने न्यसेत् ।। ३६ ।।
नवीनं वसनं तत्र न्यसेत्सप्त च विष्टरान् ।
कुशैर्विनिर्मितान् तावत्कुर्य्यात्पूर्वमुखांश्च तान् ।। ३७ ।।
ध्यायेत्सप्तर्षिभावेन तानेव सप्तविष्टरान् ।
गौतमं च भरद्वाजं विश्वामित्रं तथा मुनिम् ।। ३८ ।।
जमदग्निं वसिष्ठं च कश्यपं त्वत्रिमेव च ।
एतानत्र च संचिन्त्य ततः सप्तर्षिमन्त्रतः ।। ३९ ।।
मन्त्रयेन्मन्त्रवित्प्राज्ञः क्रमादवनिपालक ।
इदं विष्णुरिति व्यक्तं मन्त्रमुक्त्वा ततो द्विजाः ।। ४० ।।
स्नापयेच्च ततः सप्त ये ते मन्त्रमुदीरयेत् ।
अथायात्तत्रपीठे च वसन्नाचार्य्यसत्तमः ।। ४१ ।।
आसनाद्यर्घ्यसंस्कारपर्य्यन्तं कर्म संचरेत् ।
सप्ततेति च मन्त्रेण ह्यावाहनमथाचरेत् ।। ४२ ।।
सप्तहोत्रेति मन्त्रेण स्थानं च कार्य्यमुत्तमम् ।
वितानस्वेति मनुना वस्त्रं दद्याच्च नूतनम् ।। ४३ ।।
यज्ञोपवीतमित्युक्त्वा देयं यज्ञोपवीतकम् ।
तद्विष्णोरिति मन्त्रेण ह्युत्तरीयमथार्पयेत् ।। ४४ ।।
गन्धद्वारेति गन्धं वै दद्याद्देशिकसत्तमः ।
सप्तमीति च मन्त्रेण पुष्पं दद्यान्मनोरमम् ।। ४५ ।।
धूपं धूरसि मन्त्रेण दद्यान्नैवेद्यमुत्तमम् ।
जपं कुर्य्यादनेनैव दद्यात्पुष्पाञ्जलिं ततः ।। ४६ ।।
सव्याहृतिं च गायत्रीं पठित्वा तद्विसर्जनम् ।
तस्मादाचार्य्य एवासौ सन्ध्याकर्म समाचरेत् ।। ४७ ।।

तत्र कुशत्रये पूते ब्रह्माणं मां ऋषीनपि ।
आवाह्य तर्पयेत्तद्वत्ततोऽष्टवसुतर्पणम् ।। ४८ ।।
धृत्वा धूरौ च सोमं च तथैवापालनं पुनः ।
धनिनं प्रत्युषं चैव प्रभासं देशिकोत्तमः ।। ४९ ।।
एकपादाहिर्बुध्न्यौ च विरूपाक्षमतः परम् ।
रैवतं च हरं चैव वह्निरूपं च त्र्यम्बकम् ।। ५० ।।
सुरेश्वरं च सावित्रीं जयन्तं च पिनाकिनम् ।
तथा भूतेश्वरं तावदपराजितमुत्तमम् ।। ५१ ।।
इन्द्रं धातारमुग्रं च पूषाणं मित्रमेव च ।
वरुणं चाप्यर्यमणं तथैवांशुं च तर्पयेत् ।। ५२ ।।
विवस्वान् सविता त्वष्टा विष्णुरुद्रश्च पद्मजः ।
क्रतुर्दक्षो वसुः सत्यः कालः कामोधुरी तथा ।। ५३ ।।
रोचनश्च पुरुरवा माद्रवश्चेति ते दश ।
तर्पयेत्क्रमतोऽप्येतांस्तथैवोङ्कारमेव च ।। ५४ ।।
गायत्रीं तर्पयेद्धीमान् तथैवोष्णीगनुष्टुभौ ।
बृहतीपङ्क्तिमेवात्र सत्रिष्टुब्जगतीं तथा ।। ५५ ।।
ऋग्वेदं च यजुर्वेदं सामवेदमतः परम् ।
अथर्ववेदमत्युग्रं तर्पयेदवनीश्वर ।। ५६ ।।
आपद्बोधायनं चैव बृहस्पतिमनामयम् ।
इन्द्राणीं मित्रावरुणं दाक्षायणीमकल्मषाम् ।। ५७ ।।
यमं च धर्मराजं च तर्पयेत् पूजकोत्तमः ।
मृत्युं तथान्तकं राजन् वैवस्वतमतः परम् ।। ५८ ।।
कालं च तर्पयेत् प्राज्ञः सर्वभूतक्षयं तथा ।
औदुम्बरं च दध्नं च रौद्रं चित्रमतः परम् ।। ५९ ।।

चित्रगुप्तं च यमुनां क्रमेण परितर्पयेत् ।
विधिवत्पूजयेद्धीमान् सर्वकामाप्तसिद्धये ।। ६० ।।
इन्द्रद्युम्नमहीपते स च सदा मन्त्री च सन्तर्पये-
त्तानेव स्फुटमत्र नीलवसनो भूयां तिथौ सादरम् ।
येनास्य प्रतिमा भवेत्तदनु च क्षिप्रं यथार्च्चा भवे-
त्तत्त्वां संप्रति भो वदामि नृपते स्पष्टं समाकर्ण्णय ।। ६१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये बलभद्रजन्मनि तर्पणकथनं नामोनविंशोऽध्यायः ।।

विंशोऽध्यायः

ब्रह्मोवाच

सव्याहृतिं सप्रणवां गायत्रीं वेदमातरम् ।
भावयित्वा जपं कुर्य्यात्ततो मृत्तिकया नृप ।। १ ।।
हस्तप्रमाणतः कार्य्या प्रतिमा रेवतीपतेः ।
फणामुकुटसन्नद्धा हलं मुषलमेव च ।। २ ।।
धारयन्ती च सा रम्या बलस्य प्रतिमा भवेत् ।
पञ्चामृतेन दिव्येन दधिक्रावणमन्त्रतः ।। ३ ।।
आचार्य्यः स्नापयित्वाथ पुरुषसूक्तेन वारिणा ।
नव्यांशुकेन संप्रोच्छ्य परिधास्येति मन्त्रतः ।। ४ ।।
वस्त्रं दद्यात्ततो मन्त्री धौतं च सुपरिष्कृतम् ।
यज्ञोपवीतमन्त्रेण यज्ञसूत्रं समर्पयेत् ।। ५ ।।
यशसेति मनुश्चोक्त्वाप्युत्तरीयं तदार्पयेत् ।
गन्धद्वारेति गन्धं वै श्रीश्च तेऽनेन पुष्पकम् ।। ६ ।।

उपचारैः षोडशभिः रुद्राध्यायेन पूजयेत् ।
अभावेन तथा पञ्चोपचारैः परिपूजयेत् ।। ७ ।।
कर्पूरवर्त्तिं परमां कृत्वा तस्य विसर्जनम् ।
कुर्य्यात्पञ्चोपचारैश्च सुदर्शनमथाचरेत् ।। ८ ।।
ततो वन्दापनां कुर्य्यादथ प्रासादपूर्वतः ।
आस्ते काम्यवटः श्रीमान् साक्षान्नारायणस्तरुः ।। ९ ।।
ये च मर्त्त्याः प्रकुर्वन्ति दर्शनं च प्रदक्षिणम् ।
छायानिवासमेवात्र ते सर्वे मनुजोत्तमाः ।। १० ।।
ब्रह्महत्यादिपापेभ्यो मुक्ता वैकुण्ठवासिनः ।
एतद्वृक्षस्य मूले हि ऋषेरङ्गिरसः पुरः ।। ११ ।।
आश्रमोऽस्ति महीनाथ नयेत्तत्र सुदर्शनम् ।
गन्धादिना पूजयेत्तं तथा वन्दापनां चरेत् ।। १२ ।।
वटवृक्षं प्रति सप्त भ्रामयेच्च सुदर्शनम् ।
प्रदक्षिणं च प्रथमं ये पश्यन्ति नरोत्तमां ।। १३ ।।
ब्रह्महत्यादिपापेभ्यो मुक्तास्ते स्युर्न संशयः ।
स्वर्ण्णस्तेयाद्विमुक्ताः स्युर्द्वितीयभ्रमणेक्षणात् ।। १४ ।।
सुरापानजपापेभ्यस्तृतीयभ्रमणेक्षणात् ।
चतुर्थभ्रमणं दृष्ट्वा मुक्ताः स्युर्गुरुतल्पगात् ।। १५ ।।
पञ्चमं भ्रमणं चास्य भ्रमणे यदि पश्यति ।
तत्संसर्गजपापेभ्यो मुक्तो भवति वै जनः ।। १६ ।।
षट्प्रदक्षिणमालोक्य सर्वयज्ञफलं लभेत् ।
सप्तभ्रमणसल्लोकाल्लोको विष्णुपुरं ब्रजेत् ।। १७ ।।
तत्र वैकुण्ठभवने ज्ञानं प्राप्य विमुक्तिभाक् ।
ये च मर्त्त्या महाभक्त्या वृक्षस्यास्य प्रदक्षिणम् ।। १८ ।।

कुर्वन्ति तेऽश्वमेधस्य लभन्ते फलमुत्तमम् ।
एतत्काम्यवटाद्राजन्नाकल्पवटपादपम् ।। १९ ।।
एतन्मध्यस्थलं दिव्यं महत्पुण्यकरं सदा ।
अत्र वासभृतां भूप भुक्तिमुक्तिप्रदायकम् ।। २० ।।
स्थलमेतन्महापुण्यं दृष्ट्वा नारायणीं शुभाम् ।
त्रिशूलडमरुवराभयहस्तां शुभप्रदाम् ।। २१ ।।
आस्ते निखिललोकानां मनोरथफलप्रदा ।
तस्याः दर्शनमात्रेण सर्वपापं व्यपोहति ।। २२ ।।
भ्रमणानन्तरं राजन् कालिकायाश्च दक्षिणे ।
उग्रसेनोऽस्ति तत्रैनं सुदर्शनमथो नयेत् ।। २३ ।।
नीत्वार्च्चयेत्तथा कुर्य्याद्वन्दापनमनुत्तमम् ।
तस्मान्नयेत्ततः कण्ड्वाश्रमस्य निकटं प्रति ।। २४ ।।
सुदर्शनं च संपूज्य तत्र वन्दापनां चरेत् ।
महोत्सवं तदा क्षेत्रे कुर्य्यान्नृपतिसत्तम ।। २५ ।।
मार्गे शोभां च सर्वत्र कुर्य्याद्भक्त्या तदुत्सवे ।
द्वारि द्वारि जनास्तावच्चरेयुश्च महोत्सवम् ।। २६ ।।
पताका सविता नालजृम्भणं च तदा चरेत् ।
घण्टामर्द्दलशङ्खादि ध्वनिं च रचयेत्दा ।। २७ ।।
लाजानां शर्कराणां च दुग्धानां च तदा नृप ।
गोधूमानां विकारोत्थं नैवेद्यं सुपरिष्कृतम् ।। २८ ।।
सुदर्शनाय तद्दद्याच्चारुभूरितरं तदा ।
तन्निर्माल्यनिचये स्पर्शदोषो न विद्यते ।। २९ ।।
शङ्कामत्रैव नो कुर्य्याज्जनेश्वर कदा बुधः ।
स्तम्भरूपस्य चक्रस्य जगन्नाथस्य च प्रभोः ।। ३० ।।

निर्माल्ये च कदा भेदं न कुर्य्यादवनीश्वर ।
कुर्य्याच्चेन्नरके घोरे पच्यन्ते नात्र संशयः ।। ३१ ।।
ततः प्रासादरत्नस्य तृतीयावरणस्य च ।
पूर्वद्वारं समासाद्य तद् वन्दापनमाचरेत् ।। ३२ ।।
पञ्चामृतैश्च विधिवत्ततो विद्यापतेर्नृप ।
वंश्योऽपि वासयेद्दिव्ये सिंहासनपदे निजे ।। ३३ ।।
ततः कुर्य्यात्प्रयत्नेन सायंकालसमर्च्चनम् ।
पृथक् समर्चयेच्चक्रमुपचारैर्यथाविधि ।। ३४ ।।
अग्निशर्मा ततः कुर्य्याद्वन्दापनाविधिं मुदा ।
अनेन विधिना राजन् पौर्ण्णम्यां श्रावणस्य च ।। ३५ ।।
महोत्सवं प्रकुर्य्यात्स्वं निजकल्याणहेतवे ।
एवमुत्सवमानन्दान् मानवा ये जनाधिप ।। ३६ ।।
पश्यन्ति सततं तेषां दुरितं भस्मसाद् भवेत् ।
अन्ते विष्णुपुरं यान्ति पुनरावृत्तिवर्जितम् ।। ३७ ।।

सूत उवाच

श्रावणे मासि तद्विष्णोर्विधिना भाषितं विधिम् ।
श्रुत्वा स नृपतिश्रेष्ठः कृतकृत्यो भवेत्तदा ।। ३८ ।।
ब्रह्माणं स पुनर्विप्राः पृष्टवान् यन्नृपोत्तम ।
तद्वदामि शृणुध्वं वै शृण्वतां पापकर्षणम् ।। ३९ ।।
विष्णोर्भाद्रपदे मासि या यात्रा गदिता शुभा ।
अवधारय भो विप्रा तां च पुण्यविवर्द्धिनीम् ।। ४० ।।
सकलागमतत्त्वज्ञ शान्तिचित्त जितेन्द्रिय ।
सूत प्राज्ञ द्विजश्रेष्ठ नीलाचलपतेर्हरेः ।। ४१ ।।
ताश्चचारुतरास्तास्ताः श्रुतास्त्वत्तोऽतिहर्षदाः ।
राज्ञा पृष्टं च यत्तद्वै ब्रूहि व्याससुभाषितम् ।। ४२ ।।

सूत उवाच

अध्यायमेतत्परमादरेण शृण्वन्ति जल्पन्ति च ये मनुष्याः ।
ते पुत्रपौत्रैः सह शर्म भुक्त्वा गच्छन्ति लोकं परमं मुरारेः ।। ४३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादि मुनिसूतसंवादे विंशोऽध्यायः ।।

एकविंशोऽध्यायः

कथयाम्यधुना भूप भाद्रवे मासि यद्भवेत् ।
विष्णोर्नीलाचलस्थस्य तच्छृणु त्वं श्रियः पतेः ।। १ ।।
भाद्रवे मासि कृष्णायां पञ्चम्यामरुणोदये ।
प्रातः पूजा च कर्त्तव्या तदन्ते ते नरोत्तमाः ।। २ ।।
विद्यापतेश्च कुलजा तथा विश्वावसोर्नृप ।
आगत्य बलभद्रस्य जगन्नाथस्य च प्रभोः ।। ३ ।।
भद्रायाश्च मुखानां च ह्युर्ध्वदेशे च पार्श्वयोः ।
मनोरमां स्वर्णरेखामङ्गुलित्रितयान्विताम् ।। ४ ।।
दत्त्वा च भूषयेयुस्तं यथाशोभं नृपोत्तम ।
पञ्चामृतैः स्नानमथो कारयेदर्च्चकः पुनः ।। ५ ।।
कुर्य्यान्मध्याह्नपूजां च पूर्ववद्देवतात्रयम् ।
वन्दापयेत्तदन्ते च श्रद्धाभक्तिसमन्वितः ।। ६ ।।
कृष्णायामथ सप्तम्यां सायं पूजाविधानतः ।
देवकीसान्त्वनार्थाय जगदीशं पूनर्यजेत् ।। ७ ।।
नानाव्यञ्जनसंयुक्तं नानापूपसमन्वितम् ।
क्षालितान्नं च नैवेद्यं तदा दद्यान्महीपते ।। ८ ।।

ततोऽष्टमीदिने सायंकाले नद्यां सुसंयतः ।
स्नात्वाचार्य्यो देवगृहे प्रविशेत्सुमनोरमे ॥ ९ ॥
वैष्णवाचमनं कृत्वा निरोधनगृहाग्रतः ।
सूतिकागृहनिर्माणं वस्त्रेण परिकल्पयेत् ॥ १० ॥
पट्टनेत्रांशुकचयैः समन्तात्समलङ्कृतम् ।
चन्दनानि च मालाश्च रक्षामणिसमन्वितम् ॥ ११ ॥
स्थापयेत्तत्र मतिमान् शोभने सूतिकागृहे ।
वारिपुष्पं तथाभूतं सर्षपं वह्निमेव च ॥ १२ ॥
स्थापयेत्तत्र भूपाल सूतिकाभवने तदा ।
द्वारद्वये द्वारपाला मुषलायुधपाणयः ॥ १३ ॥
तिष्ठेयुस्ते तदा भूप सूतिकामन्दिरस्य च ।
कोष्ठे विनिर्मिता षष्ठीदेवी तत्र स्थिता भवेत् ॥ १४ ॥
शृङ्खलाद्वयमेव च स्थापयेत्तत्र मन्दिरे ।
नानाभूषणसंयुक्तं कुर्य्यात्तत्सूतिकागृहम् ॥ १५ ॥
आचार्य्यः सप्तविंशत्यङ्गुलिमानसमन्वितम् ।
मण्डलं चतुरस्रं च रचयेत्तत्र भूपते ॥ १६ ॥
सूत्रेण प्रथमं कुर्य्याच्चतुरस्रमनिन्दितम् ।
तिर्य्यगूर्ध्वं च तन्मध्यं कुर्य्याद्देशिकसत्तमः ॥ १७ ॥
दशपञ्च च रेखाभिः पुनस्ताद्दशसङ्ख्यकैः ।
शतद्वयं च कोष्ठानां षट्पञ्चाशत्समन्वितम् ॥ १८ ॥
षट्त्रिंशकोष्ठिकाभिश्च मध्ये पद्मं लिखेच्छुभम् ।
आद्ये च कर्ण्णिकां कुर्य्याद्द्वितीये केशराणि च ॥ १९ ॥
तृतीये पत्ररचनां दलाग्राणि चतुर्थके ।
तद्बाह्ये वर्तुलां रेखां रचयेत्पूजकोत्तमः ॥ २० ॥

एकां पंक्तिं समारभ्य रचयेत्पीठमुत्तमम् ।
तथा द्विपङ्क्तिमालम्ब्य विलं कुर्य्यादनातुरः ।। २१ ।।
द्वारशोभां ततः कुर्य्यात्तथा पङ्क्तिद्वये शुभे ।
उपशोभां च षट्कोणं ततोऽर्द्धाङ्गुलिमानतः ।। २२ ।।
सत्त्वं रजस्तम इति रेखया रचयेत्क्रमात् ।
तद्बाह्ये पूर्वतः कार्य्यं द्वारं चारुतरं बुधैः ।। २३ ।।
तत्पश्चाद्धेमकलशं चक्रध्वजसमन्वितम् ।
रचयेन्मञ्जुलं भूप पश्यतां विस्मयप्रदम् ।। २४ ।।
मण्डलस्योत्तरे देशे तथा दक्षिणदेशतः ।
पञ्चवर्ण्णैश्च चूर्ण्णैश्च रचयेत् षट्कोणं बुधः ।। २५ ।।
ततः शुक्लाकृतितया चतुष्कोणेषु भूपते ।
शोभां च रक्षयेद्धीमान् तादृशैश्चारुचूर्ण्णकैः ।। २६ ।।
पद्मस्य कर्णिका पीता करणीया मनोरमा ।
तस्य प्रतिदलं रक्तरेखाद्वयसमन्वितम् ।। २७ ।।
केशरं रचयेत्पीतं विन्दुं दद्यात्तदन्ततः ।
तत्पीतविन्दुमध्येषु रक्तविन्दून् समालिखेत् ।। २८ ।।
पत्राणि शुक्लवर्ण्णानि कृत्वाष्टासु च दिक्षु च ।
रक्तरेखा च दातव्या दलानां व्यक्तिहेतवे ।। २९ ।।
दलेऽर्द्धचन्द्रकारेण कुर्य्याद्रक्तं तदग्रकम् ।
वृत्तिरेखाश्च शुक्लाः स्यादभिसन्धिश्च श्यामला ।। ३० ।।
वृत्तिबाह्ये च राजेद्र शुक्ला स्याच्चतुरस्तदा ।
एतयोर्मध्यदेशं च कृष्णवर्ण्णं समाचरेत् ।। ३१ ।।
ततोऽष्टाविंशतिपदैस्तद्बाह्ये पीठमालिखेत् ।
तत्पीठत्रिपदैः कोणे रक्तान् पादान् समालिखेत् ।। ३२ ।।

चतुश्चतुष्पदेष्वेषु पीठमात्रं ततो द्विजः ।
शुक्लं कुर्य्याच्च तद्बाह्येऽप्येकाशीतिपदेषु च ।। ३३ ।।
वीथिं च परितः कुर्य्याच्छुक्लवर्ण्णां मनोरमाम् ।
तद्वीथ्यां फलपुष्पैश्च सहिताश्च लता न्यसेत् ।। ३४ ।।
नानावर्ण्णैर्विचित्रास्ता रचयेद्देशिकोत्तमः ।
तद्बाह्ये मध्यतो भूयः षट्पदे शुक्लवर्ण्णतः ।। ३५ ।।
द्वारं च रचयेद्धीमान् तद्द्वारोभयपार्श्वतः ।
चतुश्चतुःपदेनैव शोभां च रक्तवर्णकैः ।। ३६ ।।
तस्याश्चोभयपार्श्वेऽपि चतुश्चतुःपदे पुनः ।
पीतवर्ण्णां मनोरमामुपशोभां समाचरेत् ।। ३७ ।।
चतुर्दिक्षु द्विजश्रेष्ठ एवं कुर्य्यात् प्रयत्नतः ।
चतुष्कोणेषु षट्षड्भिः पदैः कृष्णैर्मनोहरम् ।। ३८ ।।
सर्वतो भद्रनामेदं मण्डलं सर्वसिद्धिदम् ।
सर्वमङ्गलसन्नद्धं सर्वैश्वर्य्यकरं महत् ।। ३९ ।।
एतस्मिन्मण्डले दिव्ये कृष्णजन्मार्च्चनं यदा ।
कर्त्तव्यं नृपशार्द्दूल प्रीतः कृष्णो न संशयः ।। ४० ।।

सूत उवाच

पूजायां तत्र यात्रायां फलं कोटिगुणं भवेत् ।
विनेदं मण्डलं विप्रा जन्मपूजा यदा भवेत् ।। ४१ ।।
तदा सा निष्फला ज्ञेया राज्ञः कीर्त्तिविनाशिनी ।
सर्वतोभद्रमेतद्वै मण्डलं कृष्णजन्मनि ।। ४२ ।।
पूजायां च प्रकर्त्तव्यं कर्त्तव्यं च द्विजर्षभः ।
मण्डलस्य विधानं तत्कथयित्वा चतुर्मुखः ।। ४३ ।।
पुनस्तत्रैव पूजां स वक्तुमुत्सहते स्म तम् ।
यथाविधानं कर्त्तव्यं सर्वमङ्गलहेतवे ।। ४४ ।।

दारुब्रह्मकलेवरस्य ऋषयो लक्ष्मीपतेः सादरं
नानाकर्मनिकेतनस्य करुणासिन्धोश्च नीलाचले ।
इन्द्रद्युम्नमहीपतिं प्रति तदा यात्राश्च जल्पन्नसौ
ब्रह्मा कृष्णसमुद्भवोत्सवमिदं वक्तुं समिच्छन्मुनिः ।। ४५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसंवादे एकविंशोऽध्यायः ।।

द्वाविंशोऽध्यायः

ब्रह्मोवाच

बलं भद्रां ततो विष्णुं नानालङ्काराशिभिः ।
भूषयित्वा नृपश्रेष्ठ मनोरमतया तदा ।। १ ।।
सायंकालार्च्चनं कुर्य्यात्तदन्ते पूजकोत्तमः ।
जन्मार्च्चारम्भसमये प्रथमं वरुणार्च्चनम् ।। २ ।।
संकल्पं च ततः कुर्य्यात्तद्वदामि शृणुष्व मे ।
धनधान्यसुपुत्राणां पौत्राणां यशसां तथा ।। ३ ।।
आयुषो महदैश्वर्य्यसिद्धेश्च रिपुनाशने ।
सर्वत्र जयसाम्राज्याभिषेकाणां तथा द्विजाः ।। ४ ।।
धर्मार्थकाममोक्षाणां प्राप्त्यर्थमिति चादरात् ।
भक्त्यां श्रीकृष्णचन्द्रस्य जन्मार्च्चाकर्म सांप्रतम् ।। ५ ।।
विप्रद्वाराहमेतत्तु करिष्ये च तदाप्यसौ ।
अग्निशर्मा च संकल्पमिति कुर्य्यात्सुसंयतः ।। ६ ।।
संकल्पानन्तरं भूयो वस्त्रद्वयसमन्वितम् ।
यज्ञोपवीतसहितं स्वर्ण्णकुण्डलसंयुतम् ।। ७ ।।

मुद्रिकासहितं गन्धपुष्पयुक्तं दधन्मुदा ।
श्रीकृष्णजन्मपूजायां कर्म कर्त्तुमहं वृणे ॥ ८ ॥
इत्युच्चार्य स वरयेदाचार्य्यं च ततः परम ।
कृताकृतावेक्षकत्वेनेत्युचार्य्य विशांपते ॥ ९ ॥
ब्रह्माणं त्वामहं तावद्वृणे स धरणीश्वरः ।
ब्रह्मावरणमाकुर्य्याद्भक्तिश्रद्धान्वितो हि सः ॥ १० ॥
ततस्तु सर्वतोभद्रमण्डलस्याग्रतस्तदा ।
भद्रपीठासनं लिख्येदष्टाङ्गुलसमन्वितम ॥ ११ ॥
सार्द्धहस्तद्वयेनापि दैर्घ्येण परिसंयुतम ।
सार्द्धहस्तायतियुतं श्रीपर्ण्णीकाष्ठसंयुतम ॥ १२ ॥
अभावे सालकाष्ठेन त्वर्जुनेन्धनतोऽपि वा ।
मनोहरतया राजन् कुर्य्याद्भद्रासनं परम ॥ १३ ॥
चित्रपटं च तत्रैव न्यसेत्तच्चतुरस्त्रकम ।
सार्द्धहस्तप्रमाणं तु मनोरमतरं तदा ॥ १४ ॥
तत्राष्टदलमम्भोजं शोभनं स्यात्प्रयत्नतः ।
तत्कर्णिकायाः परमे मध्ये पर्य्यङ्कमालिखेत ॥ १५ ॥
तत्र तूलीं न्यसेत्तावदुपधानं मनोरमम ।
तादृशे दिव्यपर्य्यङ्के त्वर्द्धसुप्ता च देवकी ॥ १६ ॥
वामहस्तोपरि शिरा दक्षजानुस्फुरोत्करा ।
आदौ मीलितनेत्रा सा सर्वाभरणसंयुता ॥ १७ ॥
चित्रांशुकपरीधाना राजमाना नृपोत्तम ।
दिव्योरुदेशे कृष्णस्तु तस्याश्चैव मनोहरः ॥ १८ ॥
चारुवेणीधरः श्रीमान् सर्वाभरणभूषितः ।
अतसीकुसुमश्यामो मन्दहास्याञ्चितताननः ॥ १९ ॥

कौस्तुभोल्लासिहृदयो दिगम्बरतया स्फुरन् ।
जानुद्वयेन हस्तेन वामेन मधुसूदनः ।। २० ।।
तिष्ठन् दक्षकरे मातुः स्तनं शिशुतया स्पृशन् ।
कर्ण्णिकाया मध्यदेशे लिखेदेवं जनाधिप ।। २१ ।।
स्थितोत्तरे दले लक्ष्मीः स्वर्ण्णवर्ण्णा मनोरमा ।
विचित्राम्बरभूषाढ्या चारुगन्धविलेपना ।। २२ ।।
कुर्वती निजहस्ताभ्यां देवकीपादघर्षणम् ।
पश्चिमे दलके भूयो वसुदेवः सुभूषितः ।। २३ ।।
अनन्तरूपिणा विप्राश्छाद्यमानशिरःस्थलम् ।
गौराङ्गोऽविदधत्कृष्णं हृद्देशे चकितेक्षणः ।। २४ ।।
यशोदा स्वर्ण्णवर्ण्णाढ्या नीलवस्त्रान्विता सती ।
नानालङ्कारसम्पन्ना दक्षिणेऽपि दले स्थिता ।। २५ ।।
जानुद्वयोपरिलसन्निजहस्ताद्वयाम्बुजा ।
जनयन्ती योगमायां तथा पूर्वदले मुनिः ।। २६ ।।
गर्गः स्फटिकवर्ण्णाभः कषायवसनो जटी ।
अक्षमाला दण्डधरश्चण्डांशुरिव भास्करः ।। २७ ।।
वायव्यकोणदलके ह्युग्रसेनो महीपतिः ।
गौरः किरीटी वलयी नानाभूषणभूषितः ।। २८ ।।
रक्तवस्त्रपरिधानः खड्गचर्मधरो बलि ।
वह्निकोणदले तावद्रोहिणी चारुलक्षणा ।। २९ ।।
केतकीवर्ण्णरुचिरा नीलवस्त्रा सुभूषणा ।
पुटितं हस्तयुगलं कुर्वन्ति सुस्मिताधरा ।। ३० ।।
अग्रेऽर्द्धचन्द्रो राजेन्द्र तथा नैऋतकाणेगतः ।
दले तत्र च नन्दः स्यात्पीतवर्ण्णो महायशा ।। ३१ ।।

निवद्धचूलरुचिरश्चारुचेलाञ्चिताङ्गकः ।
नानालङ्कारसंपन्नः परमं लगुडं दधत् ।। ३२ ।।
विलम्बमानश्मश्रुश्च स्फुरिताननपङ्कजः ।
ऐशान्यस्य च कोणस्य दले मुषलधारिणः ।। ३३ ।।
प्रतिमा नीलवस्त्राढ्या शरच्चन्द्रनिभाकृतिः ।
फणाविकटशीर्षे यं हलं च मुषलं परम् ।। ३४ ।।
धारयन्ती लसद्भूषा वन्द्या वृन्दारकादिभिः ।
एवं च प्रतिमा राजन् पञ्चवर्णैर्विचित्रिताः ।। ३५ ।।
पट्टे तत्र विराजेयुः कृष्णजन्मोत्सवे नृप ।
पट्टस्य प्रतिमाविम्बं रचयेद्भक्तिभावतः ।। ३६ ।।
रजतस्य पलेनैव मण्डलाकारमुत्तमम् ।
तस्याभावे तदर्द्धेन तदभावे तदर्द्धतः ।। ३७ ।।
तस्मादूनं न कर्त्तव्यं कर्त्तव्ये तच्च निष्फलम् ।
एवं रूपेण मतिमान् पद्मं वसुदलान्वितम् ।। ३८ ।।
वसुदेवादिसहितं कुर्य्यान्मञ्जुतरं नृप ।
आचार्य्यस्तु ततः शुद्धो भूत्वा संयतमानसः ।। ३९ ।।
आसनादर्घ्यसंस्कारपर्य्यन्तं कर्म संचरेत् ।
आद्ये प्रणवमुचार्य्य द्वितीये देवनामधृक् ।। ४० ।।
तृतीये च नमः शब्दमुच्चार्य च चतुर्थके ।
आवाहयेत्पञ्चमे च तत्रागच्छेति संवदेत् ।। ४१ ।।
अर्घ्यं गन्धं च पुष्पं च धूपदीपौ क्रमात्तथा ।
दत्त्वा स्नानार्थमुद्युक्तो भवेदाचार्य्यसत्तमः ।। ४२ ।। ।
षट्पलं दधि दुग्धं च चतुःपलं घृतं मधु ।
त्रिपलं द्विपलं खण्डमेकत्र भाजने न्यसेत् ।। ४३ ।।

पञ्चामृतेन तेनैव स्नापयेद्देवताश्च ताः ।
पट्टेऽपि राजते तत्र ततः संप्रोच्छयेत्पुनः ।। ४४ ।।
पट्टं मञ्चे स्नापयित्वा ततः पूजां समाचरेत् ।
शर्करादुग्धलाजानां नारिकेलफलस्य च ।। ४५ ।।
विकारसम्भवं दिव्यं नैवेद्यं वितरेत्तदा ।
देवकी वसुदेवश्च यशोदा नन्द एव च ।। ४६ ।।
श्रीबलोऽप्युग्रसेनश्च रोहिणी गर्ग एव च ।
एतेषां देवतानां च स्वे स्वे नाम्नि प्रपूजनम् ।। ४७ ।।
प्रणवादिनमोऽन्तेन पूजयेच्चन्दनादिना ।
गन्धादिनापि विधिना पूजयेत्पूजकोत्तमः ।। ४८ ।।
ताम्बूलं च समर्प्याथ दद्यादाचमनं ततः ।
क्रमेण प्रार्थयित्वा तु दद्यात्पुष्पाञ्जलिं पृथक् ।। ४९ ।।
सवासवादिदेवेश गृहाण मम पूजनम् ।
इमां पुष्पाञ्जलिं मातः स्वीकुरु स्मेरधारिणि ।। ५० ।।
त्राहि मां भवसंतप्तं जगन्मङ्गलदायिनि ।
वसुदेव यदुश्रेष्ठ वासुदेवपतिः प्रभो ।। ५१ ।।
पुष्पाञ्जलिमिमां तुभ्यं दास्यामि च नमोऽस्तु ते ।
यशोदे देवतारूपे कृष्णानन्दविवर्द्धिनि ।। ५२ ।।
नमस्तुभ्यं जगन्मातस्त्राहि मां भवसागरात् ।
जगदानन्दचित्तस्यानन्दसन्दोहकारक ।। ५३ ।।
आनन्दं देहि मे नित्यं नन्द तुभ्यं नमो नमः ।
सिन्धुजे कमले लक्ष्मी रमे विष्णुप्रिये शुभे ।। ५४ ।।
नमस्तेऽस्तु जगन्मातः सौख्यं देहि सदानघे ।
प्रलम्बारे नमस्तुभ्यं बलभद्र नमोऽस्तु ते ।। ५५ ।।

बलं भद्रं यशः सौख्यं देहि मे रेवतीपते ।
उग्रसेनलसत्कीर्त्ते श्रीकृष्णाङ्घ्रिप्रपूजक ।। ५६ ।।
पूजयामि महाबाहो सुखं मे देहि सर्वदा ।
नमस्ते रोहिणि देवि श्रीकृष्णाग्रजपालिके ।। ५७ ।।
सुखमारोग्यमैश्वर्य्यं देहि मे कृपया सदा ।
गर्गाखिलतपःशील ज्ञानवैराग्यमन्दिर ।। ५८ ।।
त्वामहं शरणं प्राप्तस्त्राहि मां भवसागरात् ।
प्रत्येकमेवं संप्रार्थ्य दद्यात्पुष्पाञ्जलिं द्विजः ।। ५९ ।।
ततो विसर्जनं कुर्य्याज्जपेच्च शान्तिकं ततः ।
कृष्णं दिगम्बरं नीत्वा प्रार्थयेज्जगदीश्वरम् ।। ६० ।।
जगन्नाथ नमस्तेऽस्तु जगतां पतये नमः ।
नारायण जगद्धाम श्यामसुन्दर मापते ।। ६१ ।।
दीनबन्धो कृपासिन्धो धर्मपालनतत्पर ।
दानवानां विनाशाय रक्षणाय सतां पुनः ।। ६२ ।।
त्वत्तो भवन्ति मत्स्याद्या अवतारास्तवाज्ञया ।
इदानीं कृष्णचन्द्रस्य जन्मने पद्मलोचन ।। ६३ ।।
आज्ञां कुरु महाबाहो दारुब्रह्म नमोऽस्तु ते ।
इत्युक्त्वा जगदीशाङ्गान्मालामानीय सादरम् ।। ६४ ।।
न्यसेत्कृष्णगले तावन्मालां तामतिमञ्जुलाम् ।
तमानीय स्थापयेच्च मण्डले पूर्वदिङ्मुखम् ।। ६५ ।।
देवकीगर्भसंस्थं तं चिन्तयित्वा प्रपूजयेत् ।
लाजादीनां विकारोत्थं नैवेद्यं वितरेत्तदा ।। ६६ ।।
यजेत्कालोपचारैस्तु बालकृष्णाख्यमन्त्रतः ।
भक्त्या विशुद्धया युक्तः कृताञ्जलिपुटान्वितः ।। ६७ ।।

सूत उवाच

नीलाद्रिसंस्थस्य रमापतेः प्रभो-
नार्नावतारेषु च तेषु तेषु ।
नृपाग्रतस्तेन च पद्मयोनिना
समीरितास्तान्निगदामि चोत्सवाः ।। ६८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसूतसम्वादे द्वाविंशोऽध्यायः ।।

त्रयोविंशोऽध्यायः

ब्रह्मोवाच

पूजान्ते राजते पात्रे हरिद्राम्भः परं दधत् ।
एजतु दशमास्यो वै मन्त्रमुच्चार्य्य यत्नतः ।। १ ।।
देवकीगर्भतो जातो कृष्णोऽभूदिति भावयन् ।
कृष्णपादाम्बुजतले तन्नीरं परिपातयेत् ।। २ ।।
कोमलाङ्गं घनश्याममतिरक्तकङ्घ्रिकम् ।
स्मेराननं चारुभूषं किरीटमुकुटोज्वलम् ।। ३ ।।
गले कौस्तुभरत्नाढ्यं चारुचन्दनचर्च्चितम् ।
बन्धूकादरमाकन्दकन्दरूपं मनोहरम् ।। ४ ।।
नाडीसंविलसन्नाभिं तदेवं भावयेन्नृप ।
जीरकद्वयसंयुक्तं वटुकत्रयसंयुतम् ।। ५ ।।
जातिलवङ्गसहितमेलाफलमनुत्तमम् ।
तेजःपत्रं तदैवैकं पलांघ्रिं पलितं नृप ।। ६ ।।

एतच्चूर्णार्द्धसंख्यातः शर्करा च भवेत्ततः ।
सर्वेषां मेलनं कृत्वा गोघृतैर्वटिकां तदा ।। ७ ।।
अष्टोत्तरशतं कुर्य्याज्जलदोषप्रशान्तये ।
ताश्चैव वटिकाः सर्वा नवनीतं तथा द्विजः ।। ८ ।।
भक्तिश्रद्धान्वितस्तावत् श्रीकृष्णाय समर्पयेत् ।
ततोऽग्निशर्मा सहसा माल्यं दामनकं शुभम् ।। ९ ।।
चन्दनं पीतवस्त्रं च हरिद्रां च समर्पयेत् ।
अग्निशर्मार्च्चकौ तावत्कर्पूरावर्त्तिमुत्तमाम् ।। १० ।।
कुर्य्यास्तां नृपशार्द्दूल जगन्मङ्गलहेतवे ।
यमुनाकल्पनं कुर्य्यात्पश्चिमायां दिशि द्विजः ।। ११ ।।
कृष्णं सप्तफणाच्छन्नं लङ्घयेद्यमुनां ततः ।
उत्तरे मण्डपे रम्ये चतुर्द्वारविभूषिते ।। १२ ।।
तोरणाशोभिते लिप्ते सुधामयरसैः परैः ।
वितानजालसंदीप्ते चारुचामरशोभिते ।। १३ ।।
न्यसेत् कृष्णं च रामं च भद्रासनपदे पुनः ।
वसोर्द्धाराविधानं च कुर्य्यान्माङ्गल्यवृद्धये ।। १४ ।।
एवं विष्टरमायोज्य कृष्णनाभौ समादरात् ।
वाममद्येति मन्त्रेण नाडीछेदनमाचरेत् ।। १५ ।।
स्वर्ण्णक्षुरेण च ततः षष्ठीदेवीं समर्च्चयेत् ।
गौर्य्याः पुत्रो यथा स्कन्द इत्युक्त्वा प्रार्थनां चरेत् ।। १६ ।।
षष्ठीदेव्याः प्रार्थनां स कुर्य्यादाचार्य्यसत्तमः ।
ततः पञ्चामृतेनाशु श्रीकृष्णं स्नापयेत्सुधीः ।। १७ ।।
कृष्णोऽसीति मनुं जप्त्वा तन्नामकरणं ततः ।
तच्चक्षुरिति मन्त्रेण बहिर्निष्क्रमणं ततः ।। १८ ।।

अन्नात् परिसृतमनुमुक्त्वा च पूजकोत्तमः ।
कर्ण्णवेधस्तदा कार्य्यः परिधास्येति वस्त्रकम् ।। १९ ।।
दद्याद्यज्ञोपवीतं तु तन्मन्त्रेण समर्पयेत् ।
जातः कंसवधार्थायेत्युक्त्वार्घ्यं च समर्पयेत् ।। २० ।।
अवतारसहस्राणीत्युक्त्वा पुष्पाञ्जलिं न्यसेत् ।
यथा कृष्णस्य नृपते विधिर्जातो जगद्धितः ।। २१ ।।
रामस्य च तथा कार्य्यः कीर्त्त्यायुःसुखवृद्धये ।
क्षीरोदार्ण्णवसंभूत इति चन्द्रार्घ्यमाचरेत् ।। २२ ।।
वन्दापयेद्रामकृष्णौ त्वग्निशर्मा विधानतः ।
काहालस्य च घण्टानां मर्द्दलानां विशेषतः ।। २३ ।।
अन्येषां विविधानां च वाद्यानां परितः स्वने ।
जाते चामरवृन्दानां चालने परिशोभने ।। २४ ।।
श्वेतछत्रधृते तावत् त्रासोल्लासनसंयुते ।
मेघाडम्बरशोभाढ्ये जयशब्दैः प्रजृम्भिते ।। २५ ।।
करतालध्वनौ जाते कृष्णजन्ममहोत्सवः ।
प्रवर्त्तते तदा राजन् त्रैलोक्यसुखवर्द्धनः ।। २६ ।।
महोत्सवे जायमाने दिव्यपर्य्यङ्कशायिनौ ।
रामकृष्णौ ततो नीत्वा वैनतेयाग्रतः स्थले ।। २७ ।।
दिव्यपर्य्यङ्कमध्ये तौ वासयित्वा शनैः शनैः ।
तिलानां नारिकेलानां मोदकैः परितोषयेत् ।। २८ ।।
कालोपचारतः पूजां कुर्य्याद्वन्दापनां ततः ।
चारुदोलान्तरे राजन् रामकृष्णौ च तौ पुनः ।। २९ ।।
स्नापयेत्परया भक्त्या संसारार्ण्णवतारकौ ।
आचार्य्याय ततो राजन् स्वर्ण्णमेकं प्रयत्नतः ।। ३० ।।

दक्षिणां श्रद्धया दद्यान्निजमाङ्गल्यहेतवे ।
दिव्यवस्त्रं च गां चैव दत्त्वा सन्तोषयेद्द्विजम् ।। ३१ ।।
सुवर्ण्णस्याप्यभावे च तदर्द्धं वितरेद्बुधः ।
दक्षिणाया अभावेन तत्सर्वं निष्फलं भवेत् ।। ३२ ।।
ततश्चतुर्थकालार्च्चां विष्णोस्तस्य परात्मनः ।
कुर्य्याद्वै विधिवद्भक्त्या पूर्ववत्सुसमाहितः ।। ३३ ।।
सप्तम्यास्त्वर्द्धरात्रे चेदष्टमी स्याद्भवेत्तदा ।
जन्मपूजा च कर्त्तव्या सैवोपोष्या तदा भवेत् ।। ३४ ।।
अष्टम्यामर्द्धरात्रे तु नवमी च यदा भवेत् ।
तदा पूजा च नो कार्य्या कर्त्तव्या पूर्ववासरे ।। ३५ ।।
अष्टम्यां च तिथौ तावद्वारौ च बुधसोमयोः ।
रोहिणीनामकं तावन्नक्षत्रं च यदा भवेत् ।। ३६ ।।
तदा जयन्ती परमा सा भवेद्बहुपुण्यदा ।
योगेऽस्मिन्नुपवासं चार्च्चनं जागरणं तु ये ।। ३७ ।।
कुर्वन्ति मनुजश्रेष्ठाः कोटिगोदानजं फलम् ।
वाजपेयाश्वमेधानां तुलापुरुषदानजम् ।। ३८ ।।
संवत्सराध्वरभवं स्वर्ण्णकोट्यर्पणोद्भवम् ।
यत्पुण्यं स्यान्महीनाथ तल्लभन्ते न संशयः ।। ३९ ।।
अयं योगस्त्वर्द्धरात्रे स चेत्स्यादष्टमी यदि ।
कर्त्तव्यमुपवासादि श्रीमता वरभक्तितः ।। ४० ।।
न स्याच्चेदष्टमी तावन्न कर्त्तव्यं कदाचन ।
उपवासश्च पूजा च तिथौ कर्त्तव्यमादरात् ।। ४१ ।।
अर्द्धरात्रे व्रतमिदं नृपेन्द्र नीलभूधरे ।
तिथिमूलं च कर्त्तव्यं तद्व्रतं नात्र संशयः ।। ४२ ।।

कृष्णावतारलीला च करणीया प्रयत्नतः ।
नवम्यां च तिथौ राजन् प्रातः पूजावसानतः ।। ४३ ।।
बलस्य जगदीशस्य भद्रायाश्च यथाविधि ।
महास्नानं प्रकुर्य्याद्वै सर्वाङ्गे चन्दनं न्यसेत् ।। ४४ ।।
ततो नव्यांशुकं दद्याद्भूषयेद्भूषणोत्करैः ।
वर्षवृद्ध्यर्च्चनं कुर्य्यादाचार्य्यः पूर्ववत्ततः ।। ४५ ।।
जगदीशस्य भद्रायास्ततो मध्याह्नपूजनम् ।
पूजान्ते नृपशार्द्दूल त्वग्निशर्मा स पूजकः ।। ४६ ।।
ब्रह्मा सोऽपि च ते सर्वे सिंहासनागतास्तदा ।
अग्निशर्मा जगन्नाथ मङ्गलारोपणं चरेत् ।। ४७ ।।
मङ्गलारोपणप्रान्ते एकदैव त्रिदेवताः ।
कर्पूरारात्रिकं दद्याद्दूर्वाक्षतचयं पुनः ।। ४८ ।।
तदन्तेऽप्यग्निशर्मासौ जगदीशपुरः स्थितः ।
सप्तवर्त्तिस्तदा कुर्य्यात्पिष्टवर्त्तिमनुत्तमाम् ।। ४९ ।।
सोऽपि कुर्य्यात्ततो भद्रा मङ्गलारोपणं पुनः ।
ततः पूजकयुग्मेन बलस्य जगतां पतेः ।। ५० ।।
कर्पूरारात्रिकं कार्य्यं तदा दूर्वाक्षतार्पणम् ।
भद्रायास्त्वग्निशर्मापि तद् वत्कुर्य्यादनातुरः ।। ५१ ।।
अथाग्निशर्मा भद्रायाः प्रीत्यर्थं नृपसत्तम ।
सप्तवर्त्तीः पिष्टवर्त्ति कुर्य्याद् भक्तिसमन्वितः ।। ५२ ।।
नीत्वाथ दुर्गां भद्रायाः समीपं नृपसत्तम ।
संप्रार्थयेत्सुभद्रां तां सर्वमङ्गलदायिनीम् ।। ५३ ।।
भद्रे देवी नमस्तुभ्यं सर्वभद्रप्रदे शुभे ।
आज्ञापयतु दुर्गाया जन्मार्थं परमेश्वरी ।। ५४ ।।

एवं संप्रार्थ्य भद्रायाः मालामानीय संन्यसेत् ।
दुर्गां प्रति ततस्तां तु कृष्णदोलाग्रतो न्यसेत् ।। ५५ ।।

सूत उवाच

तदन्ते पूजकस्तावद् दोलान्तरगतां तु ताम् ।
पञ्चामृतैः स्नापयेद्वै भक्त्यासौ नृपसत्तम ।। ५६ ।।
स्नापयित्वा नन्दगेहे यशोदागर्भतः पुनः ।
संभूतां तामिति तदा भावयेद् द्विजपुङ्गवः ।। ५७ ।।
भक्तिभावान्वितः शुद्धः हृदि विष्णुं विभावयन् ।
उपचारैः समभ्यर्च्च्य ततो वन्दापनां चरेत् ।। ५८ ।।
विधिमेतं च यः पश्येत्कुर्य्याद्वा सुसमाहितः ।
सर्वकामफलं प्राप्य विष्णुलोके महीयते ।। ५९ ।।
ऋषयो देवदेवस्य जगदीशस्य च प्रभोः ।
ब्रह्मणा गदितं तावदन्यत्शृणुत मेऽधुना ।। ६० ।।
ज्ञानानन्दपयोनिधौ मतिमतां श्रेष्ठे तपस्यालये
सूतेऽस्मिन्निति संवदत्यतिशयं श्रीशौनकाद्यास्तदा ।
श्रीनीलाचलनाथचित्रचरितं श्रुत्वा च हृष्टाः परं
जातास्ते ऋषयो जयोचितलसद्धर्मातुरा भास्वराः ।। ६१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसंवादे त्रयोविंशोऽध्यायः ।।

चतुर्विंशोऽध्यायः

ब्रह्मोवाच

त्रयोदश्यां तिथौ राजन्नाचार्य्यो जगतां पतेः ।
तृतीयकालपूजां च कुर्य्यात्परमभक्तितः ।। १ ।।
तदन्ते जगदीशाङ्गादाज्ञामालां सुमञ्जुलाम् ।
घण्टानां मर्द्दलानां च काहालकांस्यतालयोः ।। २ ।।
निःस्वने जायमानेऽथ छत्रचामरजृम्भणे ।
महोत्सवतया तां तु गृहीत्वा कालिकान्तिकम् ।। ३ ।।
गच्छेत्तत्र तदा कालीं प्रार्थयेन्नृपसत्तम ।
कालरात्रि नमस्तुभ्यं सर्वविघ्नविनाशिनि ।। ४ ।।
त्वं विष्णुवल्लभा नित्यमाज्ञां कुरु जगत्पतेः ।
पाकशालां समागच्छ शीघ्रमेव शुभेऽधुना ।। ५ ।।
अमावास्यादिनं प्राप्य नैवेद्ये विघ्ननाशिनि ।
तत्परा भव हे मात ! नमस्तुभ्यं सुरेश्वरी ।। ६ ।।
इत्युच्चार्य्य च तां मालां कालरात्रिं समर्पयेत् ।
तस्या मालां समानीय पाकशालान्तरे पुनः ।। ७ ।।
क्वचित् प्रदेशे संस्थाप्य त्वमावास्यादिने नृप ।
सप्त पूरसमेतानि पिष्टकानि च कारयेत् ।। ८ ।।
गोधूमचूर्ण्णं परमं तण्डुलानां तथा नृप ।
चूर्ण्णं च शर्करां दुग्धं मिश्रितं परिपाचयेत् ।। ९ ।।
पाकान्ते मर्द्दयेद्धीमान् घृतेषु परमेषु तत् ।
पद्मपत्राकृतितया तदा पूपानि कारयेत् ।। १० ।।
तिलानां नारिकेलानां चणकानां तथैव च ।
आमिक्षाणां च निचयमेकत्र परिपातयेत् ।। ११ ।।

मरीचार्द्रकयोस्तावज्जीरकाणां च संचयम् ।
पाचयित्वा यथायोग्यं कुर्य्यात्पूपमनुत्तमम् ।। १२ ।।
वंशनिर्मितपात्रेषु चतुरस्रेषु चारुषु ।
हस्तत्रयप्रमाणेषु रम्भादलयुतेषु च ।। १३ ।।
सप्तपूरकसंराजन् मध्यानि विपुलानि वै ।
तानि पूपानि दिव्यानि बहूनि नृपसत्तम ।। १४ ।।
समर्पयेन्महाभक्त्या यथाविधितया हरिम् ।
अरुणोदयवेलायां प्रातः पूजा विधीयते ।। १५ ।।
ततो वन्दापनां कुर्य्याद्भक्तिभावसमन्वितः ।
तत् प्रसादं तदा दत्त्वा द्विजेभ्यो नृपतीश्वर ।। १६ ।।
ततः स्वयं च भुञ्जीत कृतकृत्यो भवेन्नरः ।
सर्वकामफलावाप्तः स्वर्गलोके महीयते ।। १७ ।।
अमावास्यादिने विप्रा य एनं विधिमाचरेत् ।
सर्वकामफलं लब्ध्वा विष्णुलोकं व्रजेदध्रुवम् ।। १८ ।।
अमावास्यादिने तत्र ये पश्यन्ति जनार्द्दनम् ।
तत् प्रसादं परं भुक्त्वा मुक्तास्ते स्युर्द्विजोत्तमाः ।। १९ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सप्तपूरिकामावास्यानिर्ण्णयो नाम चतुर्विंशोऽध्यायः ।।

पञ्चविंशोऽध्यायः

ब्रह्मोवाच

शुक्लायामथ पञ्चम्यां प्रातः पूजावसानतः ।
मार्कण्डेयेश्वरस्यापि निकटं संनयेद्रमाम् ।। १ ।।

तत्र पूजां समाचर्य्य तथा वन्दापनां चरेत् ।
महोत्सवतया तां तु लक्ष्मीं स्वपदमानयेत् ।। २ ।।
शुक्लाष्टमीदिने प्रातः पूजानन्तरतो नृप ।
लक्ष्मीं प्रति जगन्नाथान्माल्यमाज्ञास्वरूपकम् ।। ३ ।।
समर्प्य पश्चिमाशायां स्वस्थानं तां समानयेत् ।
ततः पर्य्यङ्कतल्पेऽपि स्थापयित्वा हरेः प्रियाम् ।। ४ ।।
वस्त्रालङ्कारमाल्यैश्च भूषयेत्परमेश्वरीम् ।
पूर्ण्णपात्राणि पञ्चैव तदग्रे स्थापयेत्ततः ।। ५ ।।
नारिकेलफलं दिव्यं कुष्माण्डबीजपूरकम् ।
नागरङ्गं च रम्भायाः फलं च दाडिमं फलम् ।। ६ ।।
जातीफलं तिन्दुकं च तथैलाफलमुत्तमम् ।
द्राक्षाफलं गुवाकं च वकुलस्य फलं तथा ।। ७ ।।
जम्भीरं कर्कटीफलं तथैव वदरीफलम् ।
तथा जम्बुफलं राजन् तथा संस्थापयेत्पुरः ।। ८ ।।
सनारिकेलाम्रदलं सजलं घटमेव च ।
वेष्टितं नववस्त्रेण दूर्वाः षोडशसंख्यकाः ।। ९ ।।
साक्षताः स्थापयेत्तस्याः कथां संश्रावयेद्रमाम् ।
कथान्ते तत्फलान्येव समर्प्य पूजयेत्ततः ।। १० ।।
उपचारैः षोडशभिरथवा पञ्चभिर्द्विजः ।
आमिक्षायास्त्रयो भागा भागं गोधूमचूर्ण्णकम् ।। ११ ।।
संमथ्य पात्रेऽपि चिरं घृतैर्दिव्यैश्च पाचयेत् ।
नारिकेलस्य शकलैः पूरिताभ्यन्तराणि च ।। १२ ।।
कृत्वा षोडशसंख्यानि मोदकानि पृथूनि च ।
कृत्वा नैवेद्यमस्यैतन्महालक्ष्म्यै निवेदयेत् ।। १३ ।।

वन्दापनां तदा रम्यां कुर्य्यात्पूजां ततोऽर्च्चकः ।
एवं षोडशसंख्यानि दिनानि नृपसत्तम ।। १४ ।।
कुर्य्याल्लक्ष्मीव्रतमिदं सर्वेषां हितकाम्यया ।
असम्भवेऽथवा कुर्य्यादाद्ये चान्ते च पूजनम् ।। १५ ।।
वन्दापनामपि तथा कुर्य्याद् भूपतिसत्तम ।
एकादश्यां च शुक्लायां प्रातः पूजावसानतः ।। १६ ।।
बलस्य जगदीशस्य भद्रायाश्च प्रयत्नतः ।
महास्नानविधिं कृत्वा लेपयेच्चन्दनादिना ।। १७ ।।
नवीनवस्त्रालङ्कारैर्भूषयेत्तान् सुरानपि ।
मध्याह्नपूजां विधिवत्कुर्य्यादवनिपालक ।। १८ ।।
चतुर्थकालपूजान्ते महास्नानं च पूर्ववत् ।
कृत्वा चन्दनलेपं च सर्वास्वपि च पूर्ववत् ।। १९ ।।
नव्याम्बरार्पणं कृत्वा भूषणैः परिभूषयेत् ।
क्षालितान्नं ततो भूप नानापूपसमन्वितम् ।। २० ।।
व्यञ्जनोत्करसंयुक्तं दिव्यं भूरितरं नृप ।
तादृशं वरनैवेद्यं कृत्वा संपूजयेत्तदा ।। २१ ।।
चतुर्विंशतिभिर्भक्त्या ह्युपचारैर्मनोहरैः ।
निराजनं ततः कुर्य्याद् गछेत् शयनमन्दिरम् ।। २२ ।।
अग्निशर्मा ततः पेटीसमुत्फेटनमाचरेत् ।
पुष्पाञ्जलिं प्रगृह्याथ प्रार्थयेदतिभक्तितः ।। २३ ।।
देवराज नमस्तुभ्यं कल्पानां परिवर्त्तक ।
यतश्चराचरं सर्वं जगदेतत् प्रवर्तते ।। २४ ।।
जाग्रत्स्वप्नसुसुप्तिष्वेत्सर्वं योऽवति स्फुटम् ।
स त्वं प्रभो निजस्यास्य पार्श्वस्य परिवर्त्तनम् ।। २५ ।।

कुरु लोकहितार्थाय नाशाय च दुरात्मनाम् ।
परिवर्त्तनकालोऽयं हिताय जगतां महान् ।। २६ ।।
इन्द्रस्तु ध्वजमालम्ब्य तवाज्ञां परिपालयन् ।
काले वर्षति ते भीत्या पुण्डरीकनिभेक्षण ।। २७ ।।
त्वत्पादकमलद्वन्द्वप्रेक्षणोपतया हरिः ।
दैवतैः सह लक्ष्मीशं ध्वजेऽपि परिवर्त्तते ।। २८ ।।
जलं मुञ्चति तावद्वै प्रजानां रक्षणाय सः ।
एवं रूपेण मतिमान् प्रार्थयेज्जगदीश्वरम् ।। २९ ।।
वीणया तोषयेद् भूप जगदीशं सुरेश्वरम् ।
बलस्य जगदीशस्य भद्रायाश्च मनोरमाः ।। ३० ।।
प्रत्यर्च्चाश्च पृथक् कृत्वा पुष्पाञ्जलिमनुत्तमम् ।
दत्त्वा तान् स्वपदे तत्र परिवर्त्तितया द्विजः ।। ३१ ।।
स्थापयेत्तत्र शय्यायां भक्तिभावसमन्वितः ।
ततो वन्दापनां कृत्वा पेट्याश्च दृढमुद्रणम् ।। ३२ ।।
एतस्मिन् समये राजन् ये पश्यन्ति जनार्द्दनम् ।
पापजालविनिर्मुक्ता विष्णुलोकं व्रजन्ति ते ।। ३३ ।।

ऋषय ऊचुः

नीलाद्रिनिलयस्यास्य विष्णोस्तावत्परात्मनः ।
सूत श्रुतं तद्भवति पार्श्वस्य परिवर्त्तनम् ।। ३४ ।।
अन्यत् किं कथितं ब्रह्मन् ब्रह्मणा नृपतेः पुरः ।
तदुच्यतां द्विजश्रेष्ठ तत्र कौतूहलं हि नः ।। ३५ ।।

सूत उवाच

यूयं धन्या द्विजश्रेष्ठा विष्णुभक्तिपरायणाः ।
नीलाचलपतेस्तस्य यात्रां वक्तुं क्षमश्च कः ।। ३६ ।।

इन्द्रद्युम्नेन यत्पृष्टं पुनर्ब्रह्माणमादरात् ।
कथ्यमानं मया तं तु शृणुध्वं मुनयोऽधुना ।। ३७ ।।
क्षात्रे श्रीपुरुषोत्तमे त्रिजगतां सारे मुरारेः प्रिये
तीरे क्षीरमहार्ण्णवस्य रुचिरे दूरीकृताघोत्करे ।
तत्रास्ते परमः पुमान् प्रतिदिनं नानावताराश्रितां
यात्रां तां प्रचुरां वितत्य ऋषयो यूयं शृणुध्वं मुदा ।। ३८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पार्श्वपरिवर्त्तनं नाम पञ्चविंशोऽध्यायः ।।

षड्विंशोऽध्यायः

अग्निकोणे ततः कुर्य्यादधिवासादि कर्म तत् ।
पवित्रायाः पुरः कुर्य्याद्वरुणार्च्चनमुत्तमम् ।। १ ।।
स्वस्तिवाचनमाचर्य्य त्वाचार्य्यवरणं ततः ।
तथैव ब्रह्मवरणं कुर्य्यादग्नेश्च पूजनम् ।। २ ।।
पात्रासादनमाकुर्य्यात्तथाधारचतुष्टयम् ।
भूरादिकां तदा कुर्य्यान्नवाहुतिमनुत्तमाम् ।। ३ ।।
सहस्रहोमं वै कुर्य्यान्मन्त्रराजेन मन्त्रवित् ।
अभावेन तदर्द्धं स्यात्तदभावे शतत्रयम् ।। ४ ।।
पूर्ण्णाहुतिं ततः कुर्य्यात्पवित्रा स्वर्ण्णतो भवेत् ।
राजते पट्टसूत्रे वा त्वष्टोत्तरशतैर्गुणैः ।। ५ ।।
अभावे स्यात्तदर्द्धेन तस्याभावेन सा पुनः ।
सप्तविंशतिसंख्यातैर्गुणैः स्याद्गुणिनां वरः ।। ६ ।।

यवप्रमाणग्रन्थीनां सप्तविंशतिसंयुता ।
चतुर्दिक्षु तदा कुर्य्यान्नाभिपर्य्यन्तमुत्तमा ।। ७ ।।
एका स्याज्जानुपर्य्यन्तमापादमपरा भवेत् ।
एवं रूपेण मतिमानेकत्र परियोजयेत् ।। ८ ।।
त्रयाणां सुरमुख्यानां कुर्य्यात् प्रीत्यर्थमुत्तमम् ।
सर्वतोभद्रमालिख्य तत्र कुम्भं सुसंन्यसेत् ।। ९ ।।
ततस्तत्र महीनाथ विष्णुं च परिपूजयेत् ।
गन्धादिभिश्च नैवेद्यैर्यजेद्भूपालसत्तम ।। १० ।।
अग्रे पद्मत्रयं वीर शोभनं विलिखेद्बुधः ।
तेषु पद्मेषु पत्राणि वंशानि रुचिराणि च ।। ११ ।।
अंशुकाच्छादितान्येव स्थापयेदतियत्नतः ।
इदं विष्णुरिति क्षिप्रं मन्त्रमुच्चार्य्य मन्त्रयेत् ।। १२ ।।
पवित्राच्छादनं तत्र कर्त्तव्यमतियत्नतः ।
गन्धद्वारेति मन्त्रेण गन्धं दद्यान्मनोरमम् ।। १३ ।।
स श्रीश्चेति मनुं जप्त्वा पुष्पं दद्यान्महीपते ।
वितानस्त्वेति मन्त्रेण दद्याद्दामनकं बुधः ।। १४ ।।
चक्रमन्त्रेण मनसा स्थापयेच्च सुदर्शनम् ।
एवं रूपेण वै कुर्य्यात्स पवित्राधिवासनम् ।। १५ ।।
देवानां तु महास्नानं कृत्वा सर्वाङ्गलेपनम् ।
नवीनवस्त्रालङ्कारैर्भूषयेत्परमेश्वरम् ।। १६ ।।
चतुर्विंशतिभिस्तावदुपचारैः प्रपूजयेत् ।
द्वादश्यां च तिथौ प्रातः पूजान्ते त्वधिवासितम् ।। १७ ।।
पूर्वं पवित्रकं दद्याद्देवेभ्यो नृपसत्तम ।
महास्नानविधानेन स्नापयेच्चन्दनेन तु ।। १८ ।।

सर्वाङ्गे लेपयेत्तावद्दिव्यनव्याम्बरार्पणम् ।
अलङ्कारार्पणं कृत्वा ततोऽसौ पूजकोत्तमः ।। १९ ।।
तथा ब्रह्माग्निशर्मा च त एव धरणीपते ।
घण्टाकाहालमधुरीमृदङ्गप्रमुखैस्स्वनैः ।। २० ।।
छत्रचामरवृन्दादिस्फुरितैश्च महोत्सवैः ।
भ्रामयेयुः पवित्रास्ताः प्रासादं ते त्रिवारतः ।। २१ ।।
देवत्रयमपि तथा कृत्वा देवाग्रतो न्यसेत् ।
वीक्षणं नेत्रमन्त्रेण प्रोक्षणं चास्त्रमन्त्रतः ।। २२ ।।
तेन तालत्रयं कृत्वा तेनैव बन्धनं दिशाम् ।
कवचेनावगुण्ठ्याथ मन्त्रराजेन मन्त्रवित् ।। २३ ।।
अष्टवारं तदा जप्त्वा स्पृष्ट्वा तान् प्रार्थयेत्तदा
देव देव जगन्नाथ भक्त्यानुग्रहकारक ।। २४ ।।
वर्षपूजाफलं प्राप्त्यै गृहाणेदं पवित्रकम् ।
बलभद्र नमस्तेऽस्तु रोहिणीनन्दन प्रभो ।। २५ ।।
अङ्गीकुरु देव देव दीयमानं पवित्रकम् ।
भद्रे देवि नमस्तेऽस्तु नमस्ते परमेश्वरि ।। २६ ।।
गृहाणेदं मया दत्तं मातश्चारुपवित्रकम् ।
इति संप्रार्थ्य देवांस्तान् पवित्रार्पणमाचरेत् ।। २७ ।।
द्वितीयकालपूजार्थं पाकशालान्तराद्द्रुतम् ।
नैवेद्यं प्रचुरं दिव्यं चरुहोता समानयेत् ।। २८ ।।
देवाग्रे स्थापयेद्भक्त्या पङ्क्तिमध्ये यथाविधि ।
अग्निशर्मा ततो दद्याद्बलभद्रं रमापतिम् ।। २९ ।।
समुद्दिश्य परं माल्यं तदा दामनकं पुनः ।
समर्पणं विधातव्यं पूजकेन मुदा ततः ।। ३० ।।

चन्दनं पीतवस्त्रे च पृथक् दद्याद्विशांपते ।
आचार्य्यः पूर्ववत्पूजां कुर्य्यात् संयतमानसः ।। ३१ ।।

सूत उवाच

पवित्रोत्सवमेतं वै प्रतिवर्षं द्विजोत्तमाः ।
कुर्वन्ति जगदीशस्य पद्मपाणेस्तदाज्ञया ।। ३२ ।।
भाद्रवस्य च शुक्लायां द्वादश्यां बुधवासरे ।
श्रवणासहितो यावत्तदा योगो महान् भवेत् ।। ३३ ।।
नोचेदयं द्विजास्तावद् द्वादश्यामपि तच्चरेत् ।
पवित्रोत्सवमेवं ये कुर्वन्ति भुवि मानवाः ।। ३४ ।।
पश्यन्ति ये मुहुस्तेषां सफलाः स्युर्मनोरथाः ।
अन्ते च विष्णुभवनं गच्छन्ति सुरदुर्लभम् ।। ३५ ।।
अस्योत्सवस्यार्थकृते वर्षपूजा च निष्फला ।
तस्मादिमं प्रकुर्वीत प्रतिवर्षं धरासुराः ।। ३६ ।।
विष्ण्वादीनां च सर्वेषां देवानां तुष्टिदायकम् ।
पवित्रोत्सवमाकुर्य्याद् भक्तिश्रद्धान्वितस्तदा ।। ३७ ।।
ततो मध्याह्नपूजान्ते जगदीशान्तिकं नृप ।
प्रत्यर्च्चां समनुस्थाप्य पवित्रार्थमनातुरः ।। ३८ ।।
वन्दापयेत्तदा भक्त्या जन्मार्थं वामनस्य तु ।
वन्दापयेत्तथा धीमान् प्रार्थयेत्परमेश्वरम् ।। ३९ ।।
आज्ञापय जगन्नाथ वामनोत्पत्तिहेतवे ।
नानावतारलीलानां प्रवर्त्तक जगद्गुरो ।। ४० ।।
इत्युक्त्वा पूजकस्तावद् बद्धाञ्जलिपुरःसरम् ।
हेरेर्दक्षाङ्गतो मालां प्रत्यर्चोपरि संन्यसेत् ।। ४१ ।।

निरोधनगृहाग्रेऽपि सर्वतोभद्रमण्डलम् ।
लिखित्वा वासयेत्तत्र प्रत्यर्च्चां वामनाह्वयाम् ।। ४२ ।।
अग्निशर्माणमाचार्य्यः संकल्पयति तत्त्ववित् ।
कुर्य्यादाचार्य्यवरणं ब्रह्मावरणमेव च ।। ४३ ।।
अग्निशर्मा पूजकस्तु पुण्याहवाचनं चरेत् ।
सुवर्ण्णस्य पलेनैव वामनप्रतिमां शुभाम् ।। ४४ ।।
तदर्द्धेन तु वा कुर्य्यात् प्रयत्नेन नृपोत्तम ।।
पञ्चामृतैः स्नापयेत्तामदितेर्गर्भसंस्थिताम् ।। ४५ ।।
ध्यात्वा संपूजयेद्धीमानुपचारैश्च पञ्चभिः ।
दुग्धशर्करयोस्तत्र नारिकेलफलस्य च ।। ४६ ।।
विकारसम्भवं कुर्य्यान्नैवेद्यं रचयेत्सुधीः ।
ततस्त्वेजतु मन्त्रेण दद्याद्गर्भोदकं पुनः ।। ४७ ।।
अदितेर्गर्भतो जातं वामनं तं विभावयेत् ।
दामदामनकं गन्धं पीतवस्त्रद्वयं तदा ।। ४८ ।।
हरिद्रापिण्डकं दद्यादग्निशर्मा ततोऽर्च्चकः ।
पूर्ववद् वटिकां दद्याज्जलदोषोपशान्तये ।। ४९ ।।
कर्पूरारात्रिकं कुर्य्याद्वसोर्द्धारं च वै पुनः ।
वामनं गरुडस्याग्रे ब्रह्मचारिस्वरूपिणम् ।। ५० ।।
वेगेन रचयेत्तावत् शुद्धसूक्ष्माम्बरद्वयम् ।
कृष्णाजिनं त्रिपुण्ड्रं च यज्ञसूत्रकुशांस्तथा ।। ५१ ।।
दण्डं कमण्डलुं पात्रीं वामनाय प्रयच्छयेत् ।
अग्निकोणे ततो दुर्गा वर्त्तते सुरवन्दिता ।। ५२ ।।
तां तु संप्रार्थयन्तं तं वामनं भावयेदिति ।
दुर्गे देवी जगद्धात्री सर्वकामप्रदेऽनघे ।। ५३ ।।

दधि भिक्षां च मे देहि गिरिजे ब्रह्मचारिणि ।
श्रुत्वेमां प्रार्थनां दुर्गा स्यान्न पूर्ण्णा सुरेश्वरी ।। ५४ ।।
वामनाय ददौ भिक्षां रक्षवक्षोविदारिणी ।
तदैवं मनसाचार्य्यो भावयित्वा त्रिवारतः ।। ५५ ।।
दद्याद्दधि मनोरम्यं वामनाय नृपोत्तम ।
दुर्गया सहितं पञ्चोपाचारैः संप्रपूजयेत् ।। ५६ ।।
वन्दापनां ततः कुर्य्यादग्निशर्मा च पूर्ववत् ।
ततस्तौ स्वपदे रक्षेदुत्सवस्य समापने ।। ५७ ।।
नीलाचले येऽखिललोकसारे
स्थितस्य विष्णोरमुमुत्सवं हि ।
भक्त्या निरीक्षेत सुखं विभुज्य
व्रजन्ति लोकं परमं मुरारेः ।। ५८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये वामनजन्मोत्सवो नाम षड्विंशोऽध्यायः ।।

सप्तविंशोऽध्यायः

ब्रह्मोवाच

तृतीयप्रहरस्यान्ते विष्णोस्तस्य परात्मनः ।
निद्राभङ्गं प्रकुर्य्यात्तु प्रार्थयेदर्चकः प्रभुम् ।। १ ।।
जगदीश रमाकान्त नानालीलाप्रवर्त्तक ।
शक्रध्वजसमर्च्चायै ह्याज्ञापय नमोऽस्तु ते ।। २ ।।
प्रार्थयित्वेति राजेन्द्र देवाङ्गान्माल्यमुत्तमम् ।
आनीय मर्द्दलाकारे दत्त्वा घण्टादिचामरैः ।। ३ ।।

महोत्सवैः भ्रामयेच्च प्रासादं मर्द्दलाकृतिम् ।
तृतीयावरणस्यापि बाह्ये पूर्वदिशि न्यसेत् ।। ४ ।।
स्थाने तस्मिन् प्रथमतो वरुणार्च्चनमाचरेत् ।
आचार्य्येऽप्यग्निशर्माणं संकल्पयति सादरम् ।। ५ ।।
अग्निशर्मा ततो राजन्नाचार्य्यवरणं चरेत् ।
तथैव ब्रह्मावरणमग्निशर्मा चरेत्पुनः ।। ६ ।।
आचार्य्यस्त्वग्निपूजां च कुर्य्यात्पञ्चोपचारतः ।
प्राजापत्यादिकं तावच्चतुराहुतिमाचरेत् ।। ७ ।।
पुण्याहवाचनं कृत्वा ततो भूरादिकां द्विजः ।
नवाहुतिं समाकुर्य्याद्दिक्कालान् स्वस्वमन्त्रतः ।। ८ ।।
पञ्चविंशतिसंख्यातामाहुतिं रचयेत्तदा ।
अष्टाक्षरेण मन्त्रेण सहस्रं होमयेद्बुधः ।। ९ ।।
घृताक्ताः स. हुनेद्धीमान् समिधश्च परंतपः ।
नृसिंहमन्त्रराजेन तिलहोमं सहस्रशः ।। १० ।।
अभावेऽपि तदर्द्धं स्यात् पूर्णाहुतिमथाचरेत् ।
एवं यथाविधि तथा होमं कुर्य्यात् प्रयत्नतः ।। ११ ।।
शक्रध्वजस्य दण्डस्य हस्तानां पञ्चविंशतिः ।
प्रमाणं स्याद्यथा रम्भाकाण्डवद्धरणीपते ।। १२ ।।
तत्काष्ठं खादिरं चैव दारवं छेदवर्जितम् ।
अथवा चम्पकं कुर्य्यादर्जुनीयं च शालकम् ।। १३ ।।
ध्वजकाष्ठं विधातव्यं नान्यतोऽपि कदाचन ।
चक्रद्वयेन तत्कुर्य्याद् यन्त्रितं सुस्थिरीकृतम् ।। १४ ।।
न स्पृशेत्तद् यथाभूमिं तत्तथैव समाचरेत् ।
एतन्मेरुमिति प्राज्ञो भावयेन्नृपसत्तम ।। १५ ।।

सार्द्धहस्तोन्नतियुतान् चतुरस्रांश्च वंशजान् ।
सार्द्धहस्तद्वयान् लोकान् सप्त तत्र च कल्पयेत् ।। १६ ।।
तानथोपरिभागेऽपि कुर्य्यात्तु चतुरस्रकान् ।
भूलोकं पञ्चवर्ण्णैश्च भुवर्लोकं च कर्वुरम् ।। १७ ।।
स्वर्लोकं शुक्लवर्ण्णं तु महर्लोकं च रक्तकम् ।
जनलोकं कृष्णवर्ण्णं हरिद्वर्ण्णं तपस्तथा ।। १८ ।।
सत्यलोकं परं कुर्य्यान्मुक्तारजतवर्ण्णकम् ।
अष्टौ नागांश्च भूलोके स्वस्वनाम्ना प्रपूजयेत् ।। १९ ।।
भुवर्लोके महाराज वामदेवं पराशरम् ।
गौतमं गर्गमपरं पूजयेदर्च्चकोत्तमः ।। २० ।।
इन्द्रं यमं च वरुणं कुवेरं स्वर्गवासिनम् ।
पूजयेत्तत्र मतिमान् स्वर्लोकेऽखिलसौख्यदे ।। २१ ।।
जनलोके जनाधीश वह्निं निर्ऋतिमेव च ।
पवनं च तथेशानं पूजयेत्पूजकोत्तमः ।। २२ ।।
जनलोके नृपश्रेष्ठ कल्पवृक्षं मनोरमम् ।
वागीश्वरीं चाङ्गिरसं पूजयेच्च यथाविधि ।। २३ ।।
तपोलोके तपःशीलं नारदं मुनिपुङ्गवम् ।
सनत्कुमारमत्रिं च पूजयेत् क्रमतः पुमान् ।। २४ ।।
सत्यलोके महीनाथ सावित्र्या सह मां तदा ।
सरस्वत्या च सहितं भावयित्वार्च्चयेद्बुधः ।। २५ ।।
लक्ष्मीनारायणौ तावन्मर्द्दलाकृतिकेऽर्च्चयेत् ।
ध्वजनी च बहिः पुच्छे वज्रं स्वं पूजयेत्तथा ।। २६ ।।
पुरः पञ्चामृतैः स्नात्वा पूजा पञ्चोपचारिका ।
कार्य्या तत्र ततः शीघ्रं पाकशालान्तरात्तदा ।। २७ ।।

चरुहोता पायसान्नमानीय स्थापयेत्पृथक् ।
ध्वजस्य दिक्षु सर्वासु दिक्पालबलिमाचरेत् ।। २८ ।।
वन्दापयेद्ध्वजं तावत् अग्निशर्मा ततः परम् ।
ध्वजं पञ्चोपचारेण पूजयेद्दिनसप्तकम् ।। २९ ।।
एतस्मिन् पूजिते शक्रध्वजे नृपतिसत्तम ।
कदाचिन्न भयं राज्ये दुर्भिक्षं नरकं पतेत् ।। ३० ।।
प्रजाश्च सुखसम्पन्ना दीर्घायुश्च नृपो भवेत् ।
इन्द्रस्तु प्रीतिमासाद्य कालेऽम्बुवर्षणं चरेत् ।। ३१ ।।
एवं विधिं प्रकुर्वीत प्रतिवर्षं नृपोत्तम ।
अन्यथा शत्रुभीतिः स्यात् शस्यहानिश्च जायते ।। ३२ ।।
महोत्पातादिकं घोरमनावृष्टिश्च सम्भवेत् ।
प्रजाक्षयो भवेत्तावद्राज्यभङ्गो भवेद्ध्रुवम् ।। ३३ ।।
तावत्ते ऋषयो मुरान्तककथासंकर्ण्णनानन्दनो
निर्द्धूताघचयास्तपोवनरताः शान्ताश्च दान्ताश्च ते ।
तं सूतं कथयन्तमब्जनयन श्रीनीलभूमिधर
प्रोद्यत् कन्दरसंस्थितस्य च हरेः संतुष्टुवुश्चेष्टितम् ।। ३४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसंवादे शक्रध्वजोत्सवकथनं नाम सप्तविंशतितमोऽध्यायः ।।

अष्टविंशोऽध्यायः

सूत उवाच

एवं कथयतो विप्रा ब्रह्मणोऽयं स भूपतिः ।
इन्द्रद्युम्नो महातेजा कृताञ्जलिरभाषत ।। १ ।।

कृतकृत्यतया श्रुत्वा पुनर्यत् पृष्टवान् नृप ।
तद्ब्रवीमि समासेन श्रूयतां मुनिसत्तमाः ।। २ ।।

ब्रह्मोवाच

पौर्ण्मीदिवसस्यास्य स्थिते दण्डत्रये नृप ।
निद्राभङ्गं हरेः कुर्य्याद् गोविन्दाख्यं ततस्तदा ।। ३ ।।
प्रत्यर्च्चां पार्श्वतो नीत्वा पूजितः स कृताञ्जलिः ।
प्रार्थयेत्कमलाकान्तं भक्त्या परमया नृप ।। ४ ।।
दीनबन्धो जगन्नाथ नीलाचलपते प्रभो ।
आज्ञापयतु गोविन्दं पौर्ण्णम्युत्सवहेतवे ।। ५ ।।
प्रार्थयित्वा तु देवाङ्गान्मालां दद्यान्मनोरमाम् ।
छत्रचामरघण्टादि स्फुरदुत्सवसंयुतम् ।। ६ ।।
शक्रध्वजसमीपे तां प्रत्यर्च्चां च निवेशयेत् ।
शक्रध्वजं च गोविन्दं चक्रं च पूजकोत्तमः ।। ७ ।।
पञ्चोपचारविधिवत् पूजयेच्छ्रद्धयान्वितः ।
वन्दापयेदग्निशर्मा स्वस्थाने तं प्रवेशयेत् ।। ८ ।।
द्वादशीदिनतो राजन् नक्तं च सप्तमेऽहनि ।
वासवीयं ध्वजं तोये विसृज्य त्वरितं क्षिपेत् ।। ९ ।।
अष्टमेऽह्नि ध्वजं ये च पश्यन्ति नृपसत्तम ।
भवेद्वंशक्षयस्तेषां सुकृतं च विनश्यति ।। १० ।।

इन्द्रद्युम्न उवाच

ब्रह्मन् भाद्रवमासस्य विधिं श्रुत्वा महत्सुखम् ।
प्राप्तमाश्विनमासस्य विधिं कथय सांप्रतम् ।। ११ ।।

ब्रह्मोवाच

साधु साधु नृपश्रेष्ठ भक्तोऽसि जगतां पतेः ।
यतो विष्णुकथां श्रुत्वा हृष्टो भवति सर्वदा ।। १२ ।।

आश्विनस्य च मासस्य विधिं शृणु नृपोत्तम ।
आश्विनस्यासिते पक्षेऽष्टम्यां च सुमुहूर्त्तके ।। १३ ।।
प्रातः कालार्च्चनं कृत्वा क्षालयेद्देवतापुरः ।
जयदुर्गां सुवर्ण्णेन रचितां सुमनोहराम् ।। १४ ।।
भद्रान्तिकेऽपि संन्यस्य सुभद्रां प्रार्थयेद्द्विजः ।
भद्रे देवी नमस्तुभ्यमाज्ञापय सुरेश्वरि ।। १५ ।।
दुर्गोत्सवाङ्गभूताय सहस्रकुम्भकेन तु ।
अभिषेकाय गिरिजां जगदानन्दकारिणीम् ।। १६ ।।
इति संप्रार्थ्य राजेन्द्र सुभद्राङ्गात् स्रजं पुनः ।
आनीय दुर्गादेव्यै तत् प्रासादस्य च पूर्वतः ।। १७ ।।
मण्डपेऽत्र मनोरम्ये नानामण्डनमण्डिते ।
चतुरस्रे चतुर्द्वारे वितानैः परिशोभिते ।। १८ ।।
भद्रासने निवेश्याथ तां दुर्गां नृपसत्तम ।
आचार्य्यो वरुणार्च्चां स कुर्य्यात्पञ्चोपचारतः ।। १९ ।।
अग्निशर्माणमापूतं संकल्पयति सादरम् ।
सोऽमरावरणं ब्रह्मा ब्रह्मवरणमेव च ।। २० ।।
कुर्य्यादाचार्य्य एवायं ततः पुण्याहवाचनम् ।
आसनादींस्तथा दीपोपचारान्नं विधिं चरेत् ।। २१ ।।
गन्धपुष्पोदकं तावत्संस्कुर्य्याद्वीक्षणादिना ।
सौवर्ण्णं राजतं वापि कुम्भं ताम्रसमुद्भवम् ।। २२ ।।
कुर्य्यात् शतपलाम्भोभिः परिपूर्ण्णं यथा भवेत् ।
पञ्चाशत्पलपूर्ण्णं बाह्याभावे रचयेत् पुनः ।। २३ ।।
तदर्द्धं रचयेद्धीमान् अतो नूनं न कारयेत् ।
कुर्य्याच्चेन्निष्फला पूजा जायते च परं तपः ।। २४ ।।

वनदुर्गामनुं मन्त्रं पठन् वै स्नापयेत्ततः ।
अष्टोत्तरसहस्रेण जलकुम्भेन चाम्बिकाम् ।। २५ ।।
ततो नव्याम्बरेणैव प्रोञ्छयेदतियत्नतः ।
नानालङ्कारवृन्देन नवेन वसनेन च ।। २६ ।।
भूषयित्वार्च्चयेत्पञ्चोपचारेण यथाविधि ।
वन्दापनां ततः कुर्य्यात्स्वपदे तां निवेशयेत् ।। २७ ।।
अशुभं चेद्दिने चास्मिन्नष्टम्यां च विधिं चरेत् ।
अष्टम्यां च विधिं प्राप्य पूजानन्तरतो नृप ।। २८ ।।
समाधवं न्यस्य दुर्गां रत्नसिंहासने विभोः ।
प्रार्थयेत्पुण्डरीकाक्षं माधवायार्च्चकोत्तमः ।। २९ ।।
आज्ञापय सुरश्रेष्ठ नानाकौतुककारक ।
माधवं दुर्गया सार्द्धं पूजार्थं करुणानिधे ।। ३० ।।
ततो मालां दक्षिणाङ्गात्संन्यसेन्माधवोपरि ।
भद्रे भद्रपदे मातराज्ञापय सुरेश्वरि ।। ३१ ।।
दुर्गेयं पूजिता तावन्माधवेन समं शुभे ।
इति भद्रां स संप्रार्थ्य दुर्गां तन्माल्यमर्पयेत् ।। ३२ ।।
छत्रघण्टादिकं राजन्नुत्सवं रचयेन्मुहुः ।
ततः पश्चिमदिग्भागं नीत्वा तौ प्रार्थयेद्द्विजः ।। ३३ ।।
माधवात् त्रिदशाधीश दूरयात्राश्रमघ्नकम् ।
पाद्यं गृहाण मे दत्तं भक्त्या परमया विभो ।। ३४ ।।
पाद्यं गृहाण त्वं दुर्गे मार्गश्रमविनाशकम् ।
श्रद्धयापि मया दत्तं सर्वकामप्रदे शुभे ।। ३५ ।।
इति संप्रार्थ्य राजेन्द्र दुर्गामाधवयोस्तयोः ।
पादाम्बुजतले रम्ये कर्पूरोदकमाक्षिपेत् ।। ३६ ।।

पादप्रक्षालनं जातमिति चित्ते विभावयेत् ।
ततोऽर्च्चकस्तत्र पदे स्थापयित्वार्च्चयेच्च तौ ।। ३७ ।।
वन्दापयेदग्निशर्मा पूर्वोक्तविधिना नृप ।
त्रिकालार्च्चावसाने तौ रात्रौ मार्गे महोत्सवैः ।। ३८ ।।
नीत्वा तौ स्वपदे रक्षेदेवमष्टौ दिनावधि ।
ततोऽष्टमदिने राजन् तृतीयार्च्चावसानतः ।। ३९ ।।
वन्दापयेत्ततो रक्षेत्पदे स्वे सुमनोहरे ।
एवं रूपेण तस्यैव प्रासादस्य बहिः पुनः ।। ४० ।।
अष्टौ दिनान्यभिव्याप्य पूर्वस्यां दिशि पूजयेत् ।
प्रथमेऽह्नि नृपश्रेष्ठ प्रथमार्च्चावसानतः ।। ४१ ।।
वन्दापनां प्रकुर्वीत भक्त्या परमया तदा ।
अष्टम्यां च तिथौ राजन् यामिन्यां यतमानसः ।। ४२ ।।
तृतीयकालपूजायां अन्ते वन्दापनां चरेत् ।
विष्णोर्दक्षिणदेशे तु नवम्यां पूजयेत्ततः ।। ४३ ।।
एतत् सप्तदशाह्नेषु वासरस्य क्षयो यदि ।
न भवेद्दक्षिणे पूजा तत्र चैवाष्टमीदिने ।। ४४ ।।
वन्दापयेन्नवम्यां च भक्तिभावसमन्वितः ।
वृद्धिश्चेद्बाह्यतो राजन् पूजयेन्नववासरान् ।। ४५ ।।
सुमुहूर्त्ते दशम्यां वै प्रातः पूजावसानतः ।
जगदीशाग्रतः कुर्य्याद् वरुणार्च्चनमुत्तमम् ।। ४६ ।।
मङ्गलारोपणार्थं वै कुर्य्यात्पुण्याहवाचनम् ।
प्रत्यर्च्चां च नृपश्रेष्ठ देवतानां समीपतः ।। ४७ ।।
नीत्वा बलादिदेवानां मङ्गलारोपणं चरेत् ।
वन्दापनां ततः कुर्य्यात् प्रार्थयेद्देवसत्तमान् ।। ४८ ।।

बलभद्र नमस्तेऽस्तु नमस्ते मुषलायुध ।
राममाज्ञापय विभो दशम्युत्सवहेतवे ।। ४९ ।।
जगदाधार देवेश जगदीश जगत्पते ।
माधवं मदनं कामं गोपालं कृष्णमेव च ।। ५० ।।
विजयायां च दशम्यां वै ह्युत्सवाय जनार्द्दन ।
आज्ञापय जगन्नाथ जगतः हितकारणात् ।। ५१ ।।
हरिद्रावर्ण्णरुचिरे भद्रे भद्रपदे शुभे ।
उत्सवाय दशम्यां तां दुर्गामाज्ञापयेश्वरीम् ।। ५२ ।।
इति संप्रार्थ्य नृपते देवेभ्यो माल्यमुत्तमम् ।
आनीय दद्यात् प्रत्यर्च्चास्तास्ताश्चैव यथाक्रमम् ।। ५३ ।।
छत्रघण्टावली राजत्काहालमर्द्दलादिभिः ।
लोलैश्चामरवृन्दैश्च तथैव जयनिःस्वनैः ।। ५४ ।।
महोत्सवं विधायाशु प्रासादभ्रमणं तथा ।
कृत्वार्द्धाशनीपर्य्यन्तं नीत्वा पञ्चोपचारतः ।। ५५ ।।
प्रत्यर्च्चां पूजयेत्तत्र आचार्य्यो नृपसत्तमः ।
वन्दापयेदग्निशर्मा ततः स्वपदमानयेत् ।। ५६ ।।
तस्मिन् दिने नृपश्रेष्ठ पश्यन्त्यर्द्धाशिनीं च ये ।
लभन्ते कोटिगुणितं क्षेत्रवासफलं च ते ।। ५७ ।।
एकादश्यां तिथौ प्रातः पूजानन्तरतो नृप ।
नानालङ्कारशोभाढ्यं रचयेत्परमेश्वरम् ।। ५८ ।।
प्रातः पूजां ततः कुर्य्यात्कर्पूरारात्रिकावधि ।
नारिकेलतिलार्द्राणां दुग्धशर्करयोस्तथा ।। ५९ ।।
मुद्गानां पक्वरम्भानामिक्षुखण्डचयस्य च ।
सम्बन्धदिव्यनैवेद्यं सुवासितजलान्वितम् ।। ६० ।।

रचयित्वा यथायोग्यं ततो गन्धादिना यजेत् ।
कृष्णागुरुपरार्द्धेन धूपं कृत्वा ततः परम् ।। ६१ ।।
संस्कृत्य वंशव्यजनैर्वीजयेच्च शनैः शनैः ।
एतद्धूपोद्भवं धूपं घ्राणयेद्देवताङ्गकम् ।। ६२ ।।
कर्पूरचूर्णकं क्षिप्त्वा सुवासिततरं परम् ।
मूलमन्त्रं समुच्चार्य्य धृत्वा हस्तद्वये पुनः ।। ६३ ।।
घ्राणदेशं प्रदर्श्याथ कुर्य्याद्दीपं च संस्कृतम् ।
न घण्टावादनं कुर्य्युर्बहिर्घण्टाध्वनिर्भवेत् ।। ६४ ।।
गीतं नृत्यं तदा नानावाद्यानां निःस्वनं भवेत् ।
उत्सवे सति भूपाल पूजकास्ते निजासनात् ।। ६५ ।।
उत्तिष्ठन्तो गवावाज्यजर्जरं सुमनोहरम् ।
वेदाङ्गुलप्रमाणं च दीपं नव्यांशुकाञ्चितम् ।। ६६ ।।
कर्पूररजसा युक्त गन्धव्याप्तदिगन्तरम् ।
तादृशं दर्शयेयुस्ते मूलमन्त्रपुरःसरम् ।। ६७ ।।
उषित्वा स्मरणं विष्णोः कृत्वा नैवेद्यसंस्कृतम् ।
विधाय भक्तिभावेन दद्युः पूजकसत्तमाः ।। ६८ ।।
पञ्चाशज्जपमाचर्य्य गण्डूषात्र द्विसंख्यकान् ।
ताम्बूलदानं कर्पूरदीपनीराजनं तथा ।। ६९ ।।
एवं रूपेण राजेद्र दामोदरमनामयम् ।
स लक्ष्मीकं यजेन्नित्यं कार्त्तिकं पौर्ण्णमीमनुम् ।। ७० ।।
एतत्पूजासु ये मर्त्त्या नीराजनमकल्मषम् ।
पश्यन्ति सर्वपापेभ्यो मुक्ता यान्ति हरेः पदम् ।। ७१ ।।

राजंस्तदा नीलधराधरस्थितं
स्तुतिं सुरेन्द्रादिभिरच्युतं च ये ।
विलोकयन्ति स्फुटपद्मलोचनं
विभुज्य शर्मात्र भवाब्धिपारगाः ।। ७२ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये अष्टाविंशतितमोऽध्यायः ।।

एकोनत्रिंशोऽध्यायः

तस्मिन्नेव दिने राजन् नीराजनसमापने ।
वन्दापनां प्रकुर्वीत त्रैलोक्यानन्ददायिनीम् ।। १ ।।
पौर्णमीदिवसस्यास्य दण्डे च ऋतुसंख्यके ।
स्थिते निद्राविभजनं विष्णोः कुर्य्यात्परं तपः ।। २ ।।
जगदीशाग्रतो रक्षेत् सुदर्शनमनामयम् ।
ततो वद्धाञ्जलिर्भूत्वा पूजकः प्रार्थयेद्धरिम् ।। ३ ।।
जगद्बन्धो जगन्नाथ जगदानन्दकारक ।
भक्तत्रासहरः श्रीमान् क्षेत्रभ्रमणहेतवे ।। ४ ।।
भूतप्रेतपिशाचादिक्रूरकर्मक्षयाय च ।
आज्ञापय सुरश्रेष्ठ सुदर्शनमतिप्रभम् ।। ५ ।।
संप्रार्थ्यानीय माल्यं वै देवाङ्गाच्चक्रमर्पयेत् ।
विद्यापतिकुलोद्भूता विश्वावसुकुलोद्भवाः ।। ६ ।।
ते नयेयुर्विमाने तं नानाभूषणभूषितम् ।
प्रासादभ्रमणं कृत्वा चाङ्गिराश्रममार्गतः ।। ७ ।।
यमेश्वरान्तिकं नीत्वा तत्र गन्धादिना यजेत् ।
विद्यापतेः कुलोद्भूतस्तव वन्दापयेन्मुदा ।। ८ ।।

ततः प्रासादपुरतः तृतीयावरणस्य च ।
पूर्वद्वारे चरेद्राजन् पुनर्वन्दापनां बुधः ।। ९ ।।
ततोऽग्रे जगदीशस्य स्थानं पञ्चामृतेन तु ।
कृत्वास्य स्वपदे रक्षेदुपचारैर्मनोहरैः ।। १० ।।
चतुर्विंशतिभिस्तावदाचार्य्यैः सुरसत्तमान् ।
समं सुदर्शनेनैव चत्वारस्तेऽपि पूजकाः ।। ११ ।।
यजेयुस्ते तृतीयार्च्चा कर्म कुर्य्यात्सुरादरात् ।
वन्दापयेदग्निशर्मा सुदर्शनमरिन्दम ।। १२ ।।
ततश्चतुर्थकालार्च्चा प्रान्ते देवाग्रतः पुनः ।
शुद्धशुक्लांशुकानीह त्रिपङ्क्तिकतया न्यसेत् ।। १३ ।।
गुवाकपुञ्जं पक्वं च कदलीपुञ्जमुत्तमम् ।
लाङ्गलीफलपुञ्जं च संरक्षेदिक्षुखण्डकान् ।। १४ ।।
सुवर्ण्णरौप्यरचिता लाङ्गली प्रतिमास्तथा ।
लाजां लाजाविकारं च शर्करायाः विकारजम् ।। १५ ।।
कर्कटीफलवृन्दं च पुरतोऽस्य न्यसेत्तथा ।
आचार्य्याश्चासनाद्यन्ते कृत्वा च वीक्षणादिना ।। १६ ।।
समर्पयेयुः संस्कृत्य पठित्वा प्रार्थनामिमाम् ।
हे देवदेव लक्ष्मीश दीनबन्धो जगत्पते ।। १७ ।।
एतद्द्रव्याणि सर्वाणि स्वीकुरु त्वनुकम्पया ।
दन्तिदन्तसमुद्भूतान् द्यूतकर्मप्रकीर्त्तितान् ।। १८ ।।
सारात्सारतरान् भूप सौवर्ण्णान् रौप्यकानपि ।
कपर्दान् चिन्तितान् कृत्वा सोऽग्निशर्मार्च्चकस्तथा ।। १९ ।।
ब्रह्मादिदेवतानां च कुर्य्यात्सुद्यूतभावनाः ।
लक्ष्म्या सह मुरारातिं ततो वन्दापयेन्मुदा ।। २० ।।

भूतलीलां च ये विष्णोः पश्यन्ति भुवि मानवाः ।
सर्वं सुखं विभुज्यात्र विष्णुलोकं ब्रजन्ति ते ।। २१ ।।
मासानां प्रवरे मासि कार्त्तिके पुण्यवर्द्धने ।
एकादश्यां च शुक्लायां लक्ष्मीदामोदरस्य वै ।। २२ ।।
पूजानीराजनान्तेऽपि पूनर्वन्दापनां चरेत् ।
देवाङ्गान्माल्यवस्त्रादि समुत्तार्य्य महीपते ।। २३ ।।
महास्नानं प्रकुर्वीत चतुःसमविलेपनम् ।
कृत्वा नव्याम्बरं मालां भूषणानि शुभानि च ।। २४ ।।
दत्त्वा मध्याह्नपूजां च कृत्वा वन्दापयेत्तदा ।
ततश्चतुर्थपूजान्ते आचार्य्याः शुद्धमानसाः ।। २५ ।।
अग्निशर्मा प्रतिनिधिर्गत्वा शयनमन्दिरम् ।
कवाटोत्फेटनं कृत्वा गृह्णन्पुष्पाञ्जलिं पुनः ।। २६ ।।
प्रार्थयेदग्निशर्मासौ रौहिणेयं परं तपः ।
रेवतीरमणः श्रीमान् पूर्ण्णचन्द्रनिभाकृते ।। २७ ।।
हलायुध नमस्तेऽस्तु निद्रां मुञ्च प्रभोऽधुना ।
इति संप्रार्थ्य हलिने दद्यात् पुष्पाञ्जलिं च सः ।। २८ ।।
पुनः पुष्पाञ्जलिं राजन्नग्निशर्मा दधत्पराम् ।
प्रार्थयेत् परया भक्त्या भक्तवत्सलमीश्वरम् ।। २९ ।।
जगन्नाथ नमस्तेऽस्तु विष्णो सर्वाघनाशन ।
शङ्खचक्रगदापद्मस्फुरत्करसरोरुह ।। ३० ।।
यस्त्वं मासानतिव्याप्य चत्वारः परमेश्वरः ।
निद्रासुखं प्रभजसे तदन्ते सांप्रतं प्रभो ।। ३१ ।।
उत्तिष्ठोत्तिष्ठ देवेन्द्र अपराधं क्षमस्व मे ।
सुमुखीभव भो देव जगतः परिपालने ।। ३२ ।।

विश्वम्भर नमस्तेऽस्तु चतुर्वर्गप्रदायक ।
पठित्वेति सुरश्रेष्ठ पुष्पाञ्जलिमभिन्यसेत् ।। ३३ ।।
भद्रे देवि सुरेशानि चतुर्वर्गप्रदायिनि ।
निद्रां मुञ्च जगन्मात मङ्गलानि प्रयच्छ मे ।। ३४ ।।
इत्युक्त्वा वितरेद्भद्रां प्रति पुष्पाञ्जलिं तदा ।
ततस्ते पूजया भक्त्या प्रतिमाः शुभदर्शनाः ।। ३५ ।।
गृहीत्वा देवताग्रेऽपि न्यसेयुः शोभना तदा ।
भद्रासने ततः कृत्वा महास्नानं परंतप ।। ३६ ।।
प्रोञ्छयेन्नववस्त्रेण नव्यानि वसनानि च ।
गन्धं पुष्पं तथा दत्त्वा रक्षेत्सदैव सन्निधौ ।। ३७ ।।
बलादिदेवताङ्गानि लेपयेच्च चतुःसमैः ।
नव्यवस्त्राणि गन्धांश्च माल्यानि भूषणानि च ।। ३८ ।।
दत्त्वा सुभूषयेत्तावद्भक्त्या परमया नृप ।
ततो वै पाकशालायां नैवेद्यं विविधं बहु ।। ३९ ।।
आनीय पूर्ववद्देवपुरतो विन्यसेन्मुदा ।
पूर्ववत् सोऽग्निशर्मापि गन्धं दामनकं परम् ।। ४० ।।
माल्यं पीताम्बरे दिव्ये दद्युस्ते पूजकास्ततः ।
यजेयुश्च ततो राजन् भक्त्या वन्दापयेद्विभुम् ।। ४१ ।।
एतदुत्थापनोत्थं ये पश्यन्त्युत्सवमादरात् ।
सर्वं कामफलं प्राप्य मुक्तास्ते पापजालतः ।। ४२ ।।
देहान्ते विष्णुभवनं व्रजन्त्यमरदुर्लभम् ।
द्वादश्यां च तिथौ राजन् सायं पूजावसानतः ।। ४३ ।।
पञ्चामृतैः परिस्नाप्य गरुडं पूजकोत्तमः ।
गन्धवस्त्रालङ्कृतिभिर्भूषयेदरुणानुजम् ।। ४४ ।।

यजेद्गन्धादिना लाजाविकारादिकमुत्तमम् ।
दद्यान्नैवेद्यमानन्दात्कुर्य्याद्वन्दापनां नृप ।। ४५ ।।
निद्रां मुञ्च खगश्रेष्ठ त्वं विष्णोर्वाहनोत्तम ।
जातमुत्थापनं विद्धि मुरारातेर्जगत्पतेः ।। ४६ ।।
इति संप्रार्थ्य गरुडं दद्यात्पुष्पाञ्जलिं शुभम् ।
आचार्य्यो भावयेत्तावदुत्थितं गरुडं हृदा ।। ४७ ।।
प्राप्तायामथ पोर्ण्णम्यां लक्ष्मीदामोदरार्च्चनम् ।
कृत्वा वन्दापनां रम्यां पश्यतां सुखवर्द्धनीम् ।। ४८ ।।
सायं पूजावसानेऽपि जगन्नाथान्तिकं पुनः ।
नारायणप्रतिकृतिं शोभमानां नयेत्तदा ।। ४९ ।।
लक्ष्मीपते नमस्तेऽस्तु लोकानुग्रहकारक ।
नारायणप्रतिकृतिमाज्ञापय सुरेश्वर ।। ५० ।।
दीपोत्सवाय सर्वाब्दं प्रोञ्छयेद्देहमात्मनः ।
सन्ध्यादिपठनं कुर्य्याद् यथाविधि नरेश्वर ।। ५१ ।।
तावन्मौनं चरेद्धीमान् यावत्क्षेत्राटनं भवेत् ।
मार्कण्डेयेश्वरं मर्त्त्यो हरेरास्ये ह्युदारधीः ।। ५२ ।।
वामदेव नमस्तेऽस्तु विरूपाक्ष नमोऽस्तु ते ।
त्रिशूलडम्बरुधर स्फुरद्वृषभवाहन ।। ५३ ।।
पार्वतीरमणं श्रीमंन् करुणावरुणालय ।
इति संप्रार्थ्य देवेशं दण्डवत्प्रणमेन्नरः ।। ५४ ।।
मनसा पूजयेद्भक्त्या सर्वपापप्रशान्तये ।
ततः प्रासादमागत्य पादप्रक्षालनं चरेत् ।। ५५ ।।
आचम्य विधिवद्धीमान् विष्णोर्दर्शनमाचरेत् ।
यः कुर्य्याद्दर्शनं विष्णोः पादप्रक्षालनं विना ।। ५६ ।।

वर्षत्रयेणं सुकृतं दर्शनं विफलं भवेत् ।
विष्णुद्रोही भवेन्नूनं सर्वधर्मबहिष्कृतः ।। ५७ ।।
प्रासादोपरि विभ्राजच्चक्रं प्रथमतो नृप ।
प्रार्थयेद्भक्तिभावेन विष्णुहस्ताम्बुजस्थितम् ।। ५८ ।।
विष्णुशस्त्र नमस्तेऽस्तु कोटिसूर्य्यसमप्रभ ।
तापत्रयस्य विध्वंसि दर्शनं कारय प्रभो ।। ५९ ।।
सर्वपापप्रशमनं चतुर्वर्गफलप्रदम् ।
दर्शनं जगदीशस्य कारय त्वमविघ्नतः ।। ६० ।।
इत्युक्त्वा प्रणमेच्चक्रं ततो मुक्तेश्वरं व्रजेत् ।
शूलपाणे नमस्तुभ्यं पार्वतीपतये नमः ।। ६१ ।।
मुक्तिप्रदस्त्वमेवासि मुक्तीश्वर नमोऽस्तु ते ।
एतत् प्रार्थनया भूप पश्येन्मुक्तीश्वरं बुधः ।। ६२ ।।
वटमूलं ततो गत्वा प्रार्थयेद्वटमुत्तमम् ।
वटवृक्ष नमस्तेऽस्तु विष्णुरूपोऽसि नान्यथा ।। ६३ ।।
यतो क्षये ब्रह्मलये पापं मोचय मामकम् ।
इति संप्रार्थ्य राजेन्द्र न्यग्रोधं प्रणमेज्जनः ।। ६४ ।।
गणेश उल्लसद्देह सर्वविघ्नविनाशक ।
विघ्नं नाशय विष्ण्वात्मन् भुक्तिमुक्तिप्रदायक ।। ६५ ।।
नमस्तुभ्यं जगन्नाथ नीलाचलपते प्रभो ।
पठित्वा प्रार्थनामेतामाज्ञामालां ततो न्यसेत् ।। ६६ ।।
छत्रघण्टादिसहितं नारायणमथो न्यसेत् ।
महास्नानं समाचर्य्य पुनर्गन्धादिना यजेत् ।। ६७ ।।
एकविंशतिसंख्यातान् गोघृतैः परिपूरितान् ।
सप्तपङ्क्तिस्थितान्दीपान् संस्कृतानर्पयेद् बुध ।। ६८ ।।

नारायण सुरश्रेष्ठ शङ्खचक्रगदाब्जधृक् ।
अङ्गीकुरु प्रभो दीपानेतानद्य मयार्पितान् ।। ६९ ।।
इत्युक्त्वा प्रार्थनामन्त्रं कुर्य्याद्दीपसमर्पणम् ।
कृत्वा वन्दापनां भूप स्वपदे तं निवेशयेत् ।। ७० ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये कार्त्तिकमासपूजाविधिर्नाम एकोनत्रिंशोऽध्यायः ।।

त्रिंशोऽध्यायः

ब्रह्मोवाच

मार्गशीर्षे च राजेन्द्र मासे तस्य जगत्पतेः ।
या लीला स्यात्प्रवक्ष्यामि शृणुष्व यतमानसः ।। १ ।।
मार्गशीर्षस्य मासस्य कृष्णपक्षे शुभोदये ।
पञ्चमीदिवसे तावत् क्षेत्रभ्रमणमाचरेत् ।। २ ।।
मार्कण्डेयवरे रम्ये प्रथमं स्नानमाचरेत् ।
तद्वदामि समासेन शृणु भूपतिसत्तम ।। ३ ।।
प्रथमं धौतपादः स्यात्सम्यगाचम्य वारिणा ।
कृतशौचक्रियः पूर्वं नरः संकल्पमाचरेत् ।। ४ ।।
विष्णुप्रीत्यर्थमथ तत् प्रार्थयेत्तीर्थसत्तमम् ।
तीर्थोत्तम नमस्तेऽस्तु सर्वपापविनाशक ।। ५ ।।
मार्कण्डेयेन मुनिना विनिर्मित सुपावन ।
नानातीर्थफलश्रेणीपद त्वं तीर्थसत्तम ।। ६ ।।
स्नानं करोमि ते नीरे हर पापचयं मम ।
इमं मन्त्रं समुच्चार्य्य स्नायाद्धर्मपदेऽम्भसि ।। ७ ।।

वासुदेवस्तुतिं कृत्वा दर्शने त्वां नमाम्यहम् ।
इत्युक्त्वा च नमेद्भूयो गणेशं सर्वकामदम् ।। ८ ।।
ततो वटेश्वरं गच्छेत् प्रार्थयेत्परमेश्वरम् ।
वटेश्वर नमस्तेऽस्तु नमस्ते वृषभध्वज ।। ९ ।।
स्वयंभुवे नमस्तुभ्यं सर्वपापं प्रमोचय ।
मङ्गलां प्रार्थयेद्धीमान् सर्वकल्याणदायिनीम् ।। १० ।।
नमस्ते मङ्गले देवि सर्वमङ्गलकारिणि ।
विष्णुशक्त्यै नमस्तेऽस्तु वटमूलनिवासिनि ।। ११ ।।
नीलाचलपतेर्विष्णोर्दर्शनं देहि लालसम् ।
अनुकम्पय मां देवि नमस्तुभ्यं सुरेश्वरि ।। १२ ।।
स्तुत्वेत्थं मङ्गलां देवीं प्रणमेद्भक्तितो नरः ।
वटं प्रदक्षिणीकृत्य क्षेत्रपालान्तिकं ब्रजेत् ।। १३ ।।
क्षेत्रपाल नमस्तेऽस्तु सर्वपापं विनाशय ।
क्षेत्रवासं सदा देहि त्वमश्वारोहणप्रिय ।। १४ ।।
इति स्तुत्वा नमेद्भूयः श्रीकण्ठं क्षेत्रपालकम् ।
नरसिंहस्थलं गत्वा प्रार्थयेत्तदनन्तरम् ।। १५ ।।
उग्ररूप नमस्तेऽस्तु शङ्खचक्रगदाधर ।
हिरण्यकशिपोर्वक्षोदारुणोरुनखोत्कर ।। १६ ।।
चन्द्रसूर्य्याग्निनेत्रेण सर्वपापविनाशकृत् ।
मुक्तिप्रद नमस्तुभ्यं पापं संहर मे प्रभो ।। १७ ।।
प्रार्थयित्वा नृपश्रेष्ठ नरिसिंहं नमेद् बुधः ।
विमलं विमलास्थानं गत्वा तां प्रार्थयेत्तदा ।। १८ ।।
दुर्गे देवि नमस्तुभ्यं विष्णुभक्तिप्रदायिनि ।
विमले निर्मलधियं देहि सर्वप्रदेऽनघे ।। १९ ।।

त्वं लक्ष्मीस्त्वं च सावित्री त्वं हि देवी सरस्वती ।
सर्वरूपे नमस्तुभ्यं सर्वपापप्रणाशिनि ।। २० ।।
चतुर्वर्गप्रदे विष्णोर्वल्लभे त्राहि मां शुभे ।
इति प्रार्थनया भूप प्रणमेद् विमलां नरः ।। २१ ।।
पातालेश्वर देवेश नीलकण्ठ वृषध्वज ।
दीनबन्धो कृपासिन्धो त्राहि मां भवसागरात् ।। २२ ।।
स्तुत्वा नत्वा नृपश्रेष्ठ पातालेशं नमेद्बुधः ।
ईशानेश धराधीश नन्दनानन्दवर्द्धन ।। २३ ।।
त्रिलोचन नमस्तेऽस्तु त्राहि मृत्युञ्जय प्रभो ।
इति स्तुत्वा नमस्कुर्य्यात्तमीशानेशमीश्वरम् ।। २४ ।।
वैनतेय महावाहो विष्णोर्वाहनसारभृत् ।
पक्षिराज नमस्तेऽस्तु विष्णुभक्तिं प्रयच्छ मे ।। २५ ।।
अनया परया स्तुत्या स्तुत्वा तमरुणानुजम् ।
प्रणिपत्य मुहुर्भूमौ द्वारपालान्तिकं ब्रजेत् ।। २६ ।।
जय त्वं विष्णुभक्तोऽसि विजय त्वं हरेर्प्रियः ।
विष्णोः स्वरूपतां धृत्वा यदासाते च वां भजे ।। २७ ।।
इत्थं स्तुत्वा द्वारपालौ प्रणमेन्नृपसत्तम ।
प्रासादान्तःस्थलं प्राप्य पश्येद्वै सुरसत्तमान् ।। २८ ।।
स्तुत्या परमया भक्त्या भक्तभीतिभिदे भुवि ।
नमस्ते रेवतीकान्त रोहिणीनन्दनप्रभो ।। २९ ।।
सप्तोरगफणाविष्टशीर्षाय च नमो नमः ।
कुन्देन्दुशङ्खधवलचलत्कुण्डलमण्डितः ।। ३० ।।
कादम्बर्य्यारुण श्रीमन्नेत्रपद्मजमार्त्तिहन् ।
हलायुध नमस्तेऽस्तु नमस्ते भक्तवत्सल ।। ३१ ।।

नमस्तेऽस्तु रमाकान्त करुणावरुणालय ।
नीलजीमूतसंकाश नीलाचलपते प्रभो ।। ३२ ।।
नीलाम्बरानुज श्रीमन् नीलपङ्कजलोचन ।
दीनबन्धो कृपासिन्धो दीनं मां भवसागरात् ।। ३३ ।।
पद्माकारे नमस्तुभ्यं नमस्ते परमेश्वरि ।
सृष्टिस्थितिविनाशानां हेतुस्त्वं जगदम्बिके ।। ३४ ।।
सुदर्शन नमस्तुभ्यं कोटिसूर्य्यसमद्युते ।
वासुदेवकराम्भोजस्थितस्त्वं त्राहि मां भवात् ।। ३५ ।।
हे श्रीमाधव देवेश शङ्खरूप नमोऽस्तु ते ।
संसारसागरमग्नं मामुद्धर जगद्गुरो ।। ३६ ।।
त्राहि मां कमले लक्ष्मी विष्णोर्वक्षस्थलस्थिते ।
दारिद्र्यानलसंतप्तं कटाक्षामृतसेचनात् ।। ३७ ।।
विश्वधात्रि नमस्तुभ्यं गदारूपे हरिप्रिये ।
हर मे पापनिचयं सर्वशर्मप्रदायिनि ।। ३८ ।।
तत: परमया भक्त्या जगदीशं सुरेश्वरम् ।
एकरूपतया तावन्मनसा तं प्रपूजयेत् ।। ३९ ।।
पद्मं चाष्टदलं सुवर्ण्णघटितं नानामणिप्रस्फुर-
त्कान्तिश्रेणिमनोहरं स्फुटतरं धात्रा स्वयं निर्मितम् ।
नित्यं चासनमादरान्मुनिगणैर्भक्त्यापि संचिन्तितं
पद्मेश स्फुटपद्मलोचनहृदा दत्तं त्वमङ्गीकुरु ।। ४० ।।
स्वागताय जगदीश पेशलं
पुष्पषट्कमलं मयार्पितम् ।
तद्गृहाण करुणानिधे प्रभो
यन्मधुना परिरञ्जितं स्वकम् ।। ४१ ।।

श्यामाकादियुतं मतं मतिमतां स्फीतं सुशीलं हृदा
दत्तं पाद्यमिदं गृहाण च मया भक्त्या सुधासन्निभम् ।
अर्घ्यं तावदिदं यवादिसहितं दत्तं मया चेतसा
वारंवारमनन्त केशव हरे लक्ष्मीपते स्वीकुरु ।। ४२ ।।
लवङ्गजातीफलकादियुक्तं गृहाण देवाचमनीयमेतत् ।
दत्तं हृदा तुभ्यमनन्तशर्मप्रदं मया तत्परया च भक्त्या ।। ४३ ।।
दध्यादिद्रवसंयुक्तं मधुपर्कं मनोरमम् ।
मनसा तरसा दत्तं गृहाण परमेश्वर ।। ४४ ।।
पुनराचमनीयं ते पूर्ववन्मनसार्पितम् ।
गृहाण जगतां नाथ पाथोरुहनिभेक्षण ।। ४५ ।।
गङ्गादितीर्थवरनिर्हृतनीरपूर्णै-
र्लक्ष्मीपतेः कनककुम्भचयैर्मनोज्ञैः ।
कर्पूरकुङ्कुमलसन्मृगनाभिगन्ध-
व्यामिश्रितैश्च मनसा स्नपनं करोमि ।। ४६ ।।
चञ्चच्चण्डकरस्फुरद्द्युतिहरं रम्यं मनोज्ञं प्रियं
प्रीतं पूततरं महासुखकरं सूक्ष्मं त्वमङ्गीकुरु ।
नानाभूषणसंचयं सविनयं धात्रा स्वयं निर्मितं
चित्तेनैव मयार्पितं त्वमधुना स्वीकुर्वज श्रीपते ।। ४७ ।।
यज्ञोपवीतेन समं मुरारे दिव्योत्तरीयं मनसार्पितं यत् ।
गृहाण तच्चारुतरं नवीनं हे दीनबन्धो भव सानुकम्पः ।। ४८ ।।
सुगन्धमानन्दभरेण दत्तं चित्तेन मे माधव देवदेव ।
अङ्गीकुरु त्वं कृपया मुरारे संसारसारं वरसौरभश्रीः ।। ४९ ।।
मल्लीचम्पकजातिकासुतुलसीपुन्नागसत्केतकी
कुन्दाद्वृत्तमपुष्पजालरचिता मालातुला मञ्जुला ।
कर्पूरागुरुवासिता मधुरिपो चित्तेन भक्त्या मया
दत्ता संप्रति गृह्यतां नवघनश्यामाभिरामाकृते ।। ५० ।।

गन्धव्याप्तदिगन्तरोऽतिमधुरो यो योगनिद्राहरो
दत्तो मे मनसा महासुखकरो धूपोऽधुना गृह्यताम् ।
दिक्संख्याकलिताङ्गधूपवसुसंयुक्तो मुरारे तथा
दीपोऽयं नवगोघृतोत्करलसद्वर्त्त्या स्फुरद् गृह्यताम् ।। ५१ ।।
चञ्चद्गव्यघृतेन पाचिततरं सारं महासुन्दरं
नानापूपभरं सदा सुखकरं स्फीतं तथान्नं बहु ।
नानाव्यञ्जनसंयुतं बहुवणिक्द्रव्यैः परं रञ्जितं
हे लक्ष्मीश विशेषतोषजनकं दत्तं हृदा गृह्यताम् ।। ५२ ।।
पुनराचमनीयमादरान्मथुरानाथ मया हृदार्पितम् ।
मुखशुद्धिकरं गृहाण भो अपराधं विविधं क्षमस्व मे ।। ५३ ।।
जातिफलादिसहितं सुहितं हतारे
ताम्बूलजालमतुलं विमलं मनोज्ञम् ।
आनन्दवृन्दजनकं मनसार्पितं मे
पूतं गृहाण नवनीरदसुन्दरत्वम् ।। ५४ ।।
छत्रचामरभरोत्तमवीणा
यन्त्रवाद्यमधुरीप्रमुखाढ्यम् ।
गीतनृत्यरचनं मनसा यत्
कल्पतां सुखयतां नृहरे त्वाम् ।। ५५ ।।

ब्रह्मोवाच

एवं रूपेण राजेन्द्र श्रीपतेर्मनसार्च्चनम् ।
कृत्वा प्रदक्षिणं कुर्य्याच्चतुर्वारं शनैः शनैः ।। ५६ ।।
स्तूयात्पुरुषसूक्तेन पुरुषः पुरषोत्तमम् ।
आसन्नप्रसवानारी कक्षहस्त शिरोघटा ।। ५७ ।।
यथा गच्छेत् तथा विष्णो ब्रजेत्तस्य प्रदक्षिणे ।
हृद्देशे हस्तयुगलं पुटीकृतं विशांपते ।। ५८ ।।

कुर्य्यात् प्रदक्षिणं विष्णोर्न कुर्य्याद्बाहुकम्पनम् ।
भुजयोश्चालनं चैव निष्फलं स्यात् प्रदक्षिणम् ।। ५९ ।।
इत्थं यः कुरुते मर्त्यः प्रदक्षिणमिदं हरेः ।
पदे पदेऽश्वमेधानां फलं प्राप्नोत्यसंशयम् ।। ६० ।।
अभ्यन्तरे यदा कर्त्तुमसमर्थो भवेन्नरः ।
द्वितीयावरणे कृत्वा तत्फलं लभते ध्रुवम् ।। ६१ ।।
दण्डवत् प्रणमेन्मर्त्त्यो वारम्वारं नृपोत्तम ।
कृतकृत्यस्तदा भूयो विष्णोस्तस्य निरीक्षणात् ।। ६२ ।।
सूतके मृतके चैव यदा विष्णुं विलोकयेत् ।
विष्णुद्रोही भवेन्नूनं सुकृतं तस्य नश्यति ।। ६३ ।।
यदा स्यात्कृतसंकल्पो विष्णोर्दर्शनकर्मणि ।
द्वितीयावरणं सप्तप्रदक्षिणमयं चरेत् ।। ६४ ।।
प्रदक्षिणे ततो भूप तत्कालं लभते च सः ।
कदाचिद्दुर्जनो लोको महाविष्णुं स्पृशेद्यदि ।। ६५ ।।
सूतके मृतके चैव महास्नानं समाचरेत् ।
बृहद्विधितया कृत्वा महास्नानं समाचरेत् ।। ६६ ।।
सर्वाङ्गे लेपयेद्दिव्यं चन्दनं चारुसौरभम् ।
शीतलद्रव्यनैवेद्यं बहिष्कृत्य नृपोत्तम ।। ६७ ।।
सचेलं स्नानमाचार्य्यस्तदा कुर्य्यादुदारधीः ।
महास्नानं हरेः कार्य्यमन्यथा नारकी भवेत् ।। ६८ ।।
सूतके मृतके पाकशालायां चेद् विशेन्नरः ।
पाकशालान्तरस्थायि द्रव्यं सर्वं बहिः क्षिपेत् ।। ६९ ।।
पाकशाला च धौतव्या वैष्णवाग्निं पुनश्चरेत् ।
पुनः पाकं समाचर्य्य केशवाय निवेदयेत् ।। ७० ।।

सूतके मृतके मर्त्त्यः स्पृशेद्द्रव्यं हरेर्यदा ।
कदाचिद्द्रव्यं हरये न देयं तच्च भूपते ।। ७१ ।।
अन्यथा तु भवेद्राजा विष्णुद्रोही न संशयः ।
रक्षो ग्राह्या च सा पूजा विफला जायते ध्रुवम् ।। ७२ ।।
ये पश्यन्ति जनार्द्दनं क्षितितले नीलाचलेशं विभुं
तेन श्रीकमलोद्भवेन विधिना चोक्तेन भक्ता मुहुः ।
ते मर्त्त्या सुखमत्र पुत्रनिकरैः सार्द्धं वुभुज्याखिलं
देहान्ते पदमच्युतस्य सहसा गच्छन्ति देवेप्सितम् ।। ७३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये दर्शनविधिर्नाम त्रिंशत्तमोऽध्यायः ।।

एकत्रिंशोऽध्यायः

ब्रह्मोवाच

दर्शनान्ते ततो गच्छेत् श्वेतगङ्गां शुभोदयाम् ।
प्रार्थयेत् परया भक्त्या सर्वपापोपशान्तये ।। १ ।।
गङ्गे देवि जगद्धात्रि नमस्ते विष्णुवल्लभे ।
दक्षपार्श्वे स्थिते मातः मज्जयामि तवाम्भसि ।। २ ।।
पापं नाशय मे नित्ये देवनद्येऽनघे शुभे ।
प्रार्थयित्वेति तां गङ्गां नत्वा चैव मुहुर्मुहुः ।। ३ ।।
स्नानं च विधिवत्कुर्य्यान्माधवौ तौ विलोकयेत् ।
श्वेतमत्स्यकनामानौ पश्यतां सर्वकामदौ ।। ४ ।।
श्वेतमाधवभावेन मुक्तिदस्त्वं सदानघ ।
पापान्धकारसूर्य्यस्त्वं पापं नाशय मे प्रभो ।। ५ ।।

मत्स्यमाधवभावेन मुक्तिदस्त्वं सदानघ ।
विष्णोर्दक्षिणपार्श्वस्थ पापं नाशय मेऽधुना ।। ६ ।।
इत्येवं प्रार्थनामुक्त्वा पश्येत्तौ माधवौ नरः ।
कृतकृत्यो भवेत्तावत्तयोर्दर्शनतो नृप ।। ७ ।।
उग्रसेनस्थलं गत्वा प्रार्थयेदतिभक्तितः ।
उग्रसेन महावाहो भवान् राक्षसनाशकः ।। ८ ।।
क्षेत्रस्थानां जनानां च दण्डदोऽस्यापराधतः ।
आज्ञया जगदीशस्य दण्डदो ह्यपराधिनाम् ।। ९ ।।
आज्ञापय महावीर समुद्रस्नानहेतवे ।
हनुमन्तं ततो दृष्ट्वा चिरजीविनमव्ययम् ।। १० ।।
रामप्रिये नमस्तेऽस्तु नमस्ते पवनात्मज ।
पापं हर कपिश्रेष्ठ दुर्वृत्तासुरनाशक ।। ११ ।।
एवं स्तुतिं च कृत्वा वै तीर्थराजान्तिकं व्रजेत् ।
दण्डवत् प्रणमेत् सप्तवारं वारिधिमव्ययम् ।। १२ ।।
संकल्पं विधिवत्कुर्य्याद्दुरितक्षयपूर्वकम् ।
नीलाचलपतेर्विष्णोः प्रीत्यर्थ्यं नृपसत्तम ।। १३ ।।
बालुकावेदिकां कृत्वा चतुरस्रं सुशोभनाम् ।
तत्र चक्रं विधायाथ तन्मध्ये जगदीश्वरम् ।। १४ ।।
सप्तधा मूर्त्तिमत्रैव चैकमूर्त्तिं विभावयेत् ।
उपचारैः षोडशभिर्मनसा पूजयेद्द्विजः ।। १५ ।।
अथवा पञ्चभिस्तावदुपचारैर्हरिं यजेत् ।
दशदिक्षु यजेत्तावद् गोविन्दादीन् परंतप ।। १६ ।।
आज्ञापय महाबाहो शङ्खचक्रगदाब्जधृक् ।
समुद्रे स्नातुकामं मां नीलाचलपते प्रभो ।। १७ ।।

प्रार्थयित्वा तदा विष्णुं नमस्कुर्य्यात्पुनः पुनः ।
समुद्रं तं नमस्कृत्य प्रार्थयेदतिभक्तितः ।। १८ ।।
तीर्थराज नमस्तेऽस्तु नमस्ते सरितां पते ।
त्वद्दर्शनं भवेत् पुण्यं स्पर्शनं पापनाशनम् ।। १९ ।।
त्वयि स्नानाद् भवेन्मुक्तिस्तत्त्वां वन्देऽपि नित्यशः ।
इदानीं त्वज्जले सिन्धो करोमि स्नानमुत्तमम् ।। २० ।।
यथोक्तफलदो भूत्वा पापं नाशय मे बहु ।
इत्युक्त्वा परमप्रीतस्त्रिवारं स्नानमाचरेत् ।। २१ ।।
तीर्थराजं नमस्कृत्य ततश्च तर्पणादिकम् ।
कृत्वाथ पूर्ववत्पूजां मनसा तरसा चरेत् ।। २२ ।।
पूर्ववत् स्तवमाचर्य्य विष्णोस्तस्य परात्मनः ।
लोकेश्वरं ततो गच्छेत्प्रार्थयेद्भक्तितो द्विजः ।। २३ ।।
गङ्गाधर नमस्तेऽस्तु लोकनाथ महेश्वर ।
सर्वव्याधिविनाशाय पार्वतीपतये नमः ।। २४ ।।
नमामि त्वां महाबाहो पापं तापं च नाशय ।
इत्युक्त्वा परया भक्त्या लोकनाथं नमेद्बुधः ।। २५ ।।
कुष्ठव्याधिसमायुक्त पश्येत्वर्षं शिवं च यः ।
कुष्ठव्याधिविनिर्मुक्तः कामवत्सुन्दरो भवेत् ।। २६ ।।
ततो गत्वा मङ्गलायाः समीपं प्रार्थयेच्च ताम् ।
दुर्गे देवि नमस्तुभ्यं मङ्गले मङ्गलप्रदे ।। २७ ।।
पापं नाशय मे क्षिप्रं सर्वदैत्यविनाशिनि ।
शङ्खपृष्ठस्थिते मातः क्षेत्रस्य हितकारिणि ।। २८ ।।
धनं धान्यं सदारोग्यं पुत्रं पौत्रं च देहि मे ।
इति स्तुत्वा महीनाथ प्रणमेन्मङ्गलां शुभाम् ।। २९ ।।

आलम्वां दक्षिणे कृत्वा इन्द्रद्युम्नसरो ब्रजेत् ।
संकल्पं च पुरः कृत्वा प्रार्थयेत्तीर्थमुत्तमम् ।। ३० ।।
इन्द्रद्युम्न नमस्तुभ्यं नमस्तेऽमृतदायक ।
पापं नाशय मे क्षिप्रं मज्जतो हयमेधज ।। ३१ ।।
इत्युक्त्वा तज्जले स्नात्वा तर्पणादिकमाचरेत् ।
ततो विल्वेश्वरं गत्वा प्रार्थयेदवनीश्वर ।। ३२ ।।
महादेव नमस्तेऽस्तु नमस्ते शङ्कर प्रभो ।
विल्वेश्वर नमस्तुभ्यं दुर्गेश वरदो भव ।। ३३ ।।
वृषध्वज नमस्तेऽस्तु सर्वकामफलप्रद ।
पापजालहरः श्रीमान् चतुर्वर्गफलप्रद ।। ३४ ।।
नमस्तुभ्यं नमस्तुभ्यं नमस्ते राक्षसान्तक ।
नीलकण्ठ नमस्तेऽस्तु महारुद्र नमोऽस्तु ते ।। ३५ ।।
शिव सर्वेश देवेश नगेश स्मरसूदन ।
लिङ्गरूपी शिवस्त्वं हि क्षेत्रस्याधिपते प्रभो ।। ३६ ।।
त्रिपुरारे नमस्तुभ्यं मृत्युञ्जय नमोऽस्तु ते ।
दिव्यैर्विंशतिसंख्यातैर्नामभिर्नृपसत्तम ।। ३७ ।।
विल्वेश्वरं नमस्कुर्य्यात्तीर्थराजजले पुनः ।
चक्रतीर्थं परं स्नानं कृर्य्याद्वै विधिना द्विजः ।। ३८ ।।
ततो गच्छेद्दिशां नाथ यमेशनिकटं पुनः ।
प्रार्थयेत्परमप्रीत्या मम क्लेशोपशान्तये ।। ३९ ।।
यमेश्वर नमस्तेऽस्तु पापं मे हर संहर ।
स्तुत्वा नत्वा यमेशं तं चामुण्डासन्निधिं ब्रजेत् ।। ४० ।।
चामुण्डे चण्डिके दुर्गे महापापविनाशिनि ।
शिवे शिवप्रिये गौरि त्राहि मां दुःखसागरात् ।। ४१ ।।

इत्युक्त्वा नृपशार्द्दूल प्रणमेत् सिंहवाहिनीम् ।
कपालमोचनं श्रीमन् दक्षयज्ञविनाशन ।। ४२ ।।
मणिकर्णितटस्थाय नमस्तुभ्यं महेश्वर ।
अनया परया भक्त्या नमस्कुर्य्यात्तमीश्वरम् ।। ४३ ।।
तृतीयावरणं राजन् प्रासादस्य महत्तरम् ।
ततः प्रदक्षिणी कृत्य पश्येत् श्रीजगदीश्वरम् ।। ४४ ।।
पुनः प्रदक्षिणं कृत्वा दण्डवत् प्रणतिं तथा ।
स्तुत्वा परमया भक्त्या ततो निजगृहं ब्रजेत् ।। ४५ ।।
निराहारो जितक्रोधो जितनिद्रो निशां नयेत् ।
एवं प्रदक्षिणं कुर्य्यात् क्षेत्रस्य पञ्चमीदिने ।। ४६ ।।
ततः षष्ठीदिने प्रातः कृतनित्यक्रियः शुचिः ।
देवार्च्चनादिकं कृत्वा यथाशक्ति द्विजन्मने ।। ४७ ।।
भोज्यं दद्यान्निजैः सार्द्धं कुर्य्यात्पारणमुत्तमम् ।।
एवं यः कुरुते भूप क्षेत्रभ्रमणमादरात् ।। ४८ ।।
पृथिव्याः शतवारेण भ्रमणात् फलमालभेत् ।
देहान्ते विष्णुभवनं स गच्छेत् सुरदुर्ल्लभम् ।। ४९ ।।
ततोऽष्टमीदिने प्रातः पूजानन्तरतो नृप ।
महास्नानं विधिं कुर्य्याद्विष्णोस्तस्य कृपानिधेः ।। ५० ।।
सर्वाङ्गे चन्दनं दत्त्वा नव्यवस्त्रार्पणं चरेत् ।
पुष्पालङ्कारनिचयैर्भूषयेत्कमलेक्षणम् ।। ५१ ।।
देवतानां पुरोदेशे कलशान् स्थापयेन्नृप ।
आचार्य्या रचयेयुस्ते वरुणार्च्चनमुत्तमम् ।। ५२ ।।
ततो मध्याह्नपूजा सा कर्त्तव्या च यथाविधि ।
मूलकव्यञ्जनादीनि शाकानि व्यञ्जनानि च ।। ५३ ।।

नानापूपसमूहं च शिताज्यादिकजर्जरम् ।
अन्नं चारुतरं पूर्ण्णं दद्यान्नैवेद्यमीदृशम् ।। ५४ ।।
दद्यान्मध्याह्नपूजायां सुखार्थं कमलापते ।
ततोऽर्च्चकश्च ब्रह्मा च सोऽग्निशर्मा च भक्तितः ।। ५५ ।।
मङ्गलारोपणं ते वै कुर्य्यासुः प्रीतये हरेः ।
वन्दापयेयुः क्रमतो विष्णुं नीलाचलेश्वरम् ।। ५६ ।।
एतदुत्सवमानन्दाद्यः कुर्य्यान्नृपसत्तम ।
पश्येद्वा परया भक्त्या मुक्तः स्यात्पापवृन्दतः ।। ५७ ।।
अन्ते विष्णुपुरं गच्छेत्सर्वशर्मप्रदं परम् ।
अस्मिन् मासि शुभे लग्ने सुमुहूर्त्ते शुभे दिने ।। ५८ ।।
दद्यान्नवान्नमतुलं हरये विविधं बहु ।
नानापूपसमायुक्तं व्यञ्जनावलिसंयुतम् ।। ५९ ।।
मुद्गानि नूतनद्रव्यव्यञ्जनैश्चित्तरञ्जनैः ।
परमान्नयुतं तद्वद्दद्यान्मुरभिदे मुदा ।। ६० ।।
दत्त्वा वन्दापनां कुर्य्याद्विष्णुप्रीणनहेतवे ।
कृष्णायां च चतुर्दश्यां तृतीयार्च्चावसानतः ।। ६१ ।।
देवाग्रे रचयेद्वृक्षं तण्डुलैर्नृपसत्तम ।
तन्मध्ये गोघृतैः पूर्ण्णानष्टाविंशतिसंख्यकान् ।। ६२ ।।
त्रिपङ्क्तिकतया दीपान्स्थापयेदतिभक्तितः ।
नव चात्र बलस्यार्थं सुभद्रार्थं तथा नव ।। ६३ ।।
दश चाम्बुजनेत्रार्थमन्तः कर्पूरवर्त्तिकाम् ।
स्थापयित्वा सदाहं च कृत्वा दीपांस्तु भूपते ।। ६४ ।।
संस्कुर्य्यात् प्रार्थयेद्देवान् प्रगृह्य कुसुमाञ्जलिम् ।
नमस्ते देवदेवेश जगतां पतये नमः ।। ६५ ।।

समर्पयामि दीपांस्त्वं गृहाण परमेश्वर ।
बलभद्र नमस्तेऽस्तु फणाविकटमस्तक ।। ६६ ।।
तापत्रयहर श्रीमन् रेवतीपतये नमः ।
मया दत्ता प्रभो दीपा दीप्यमाना प्रगृह्यताम् ।। ६७ ।।
देवि भद्रे नमस्तुभ्यं नमस्ते जगदम्बिके ।
अङ्गीकुरु कुरङ्गाक्षि दत्तान् दीपान्मयाधुना ।। ६८ ।।
इति संप्रार्थ्य राजेन्द्र तद्दीपार्पणमाचरेत् ।
अग्निशर्मार्च्चको ब्रह्मा क्रमाद्वन्दापयेच्च तान् ।। ६९ ।।
एकादशीवदाचार्य्याः कुर्य्युर्नीराजनं मुदा ।
प्रासादं भ्रामयित्वा तु दर्शयेयुश्च चक्रिणम् ।। ७० ।।
प्रासादमूलतस्तावदाशीर्षं दीपमण्डनम् ।
कुर्य्याद्दर्शदिने कुर्य्याद्देवं च प्रतिपत्तिथौ ।। ७१ ।।
तस्यां प्रतिपदि श्रीमन्तिथौ चैवातिथिप्रिय ।
प्रत्यर्च्चां चरमां पृथ्वीमाज्ञामालामभिन्यसेत् ।। ७२ ।।
जगन्नाथ नमस्तेऽस्तु नीलरत्नाकर प्रभो ।
जगद्धिताय देवाय नमस्तुभ्यं नरेश्वर ।। ७३ ।।
आज्ञापय महाबाहो प्रतिमाः शुभदर्शनाः ।
दीपोत्सवाय जगतां हिताय कमलापते ।। ७४ ।।
इति स्तुत्वा जगन्नाथं दद्याद्राज्ञस्रजं पुनः ।
प्रतिमास्ताः समानीय देवाग्रे कुत्रचिन् न्यसेत् ।। ७५ ।।
दीपोत्सर्गं ततः कुर्य्यादाचार्यः पृथिवीपते ।
आशीर्वादं परं कुर्य्यात्तदा वैदिकमन्त्रतः ।। ७६ ।।
गीतनृत्यमहावाद्याद्युत्सवैस्ताः समानयेत् ।
मरीचान्तिकमित्यत्र यजेत्पञ्चोपचारतः ।। ७७ ।।

दीपार्पणं ततः कृत्वा भक्त्या वन्दापनां चरेत् ।
स्वस्थाने स्थापयेत्तस्मान् प्रतिमास्ताः परंतप ।। ७८ ।।
शुक्लायामथ पञ्चम्यां चतुर्थ्यर्च्चावसानतः ।
चतुर्विंशतिभिर्देवमुपचारैस्तु पूजयेत् ।। ७९ ।।
महास्नानं ततः कुर्य्याद्विधिना गन्धलेपनं ।
रचयेद्देवदेवस्य परिधानोत्तरीयके ।। ८० ।।
देवाग्रे पूर्ववत्कुर्य्यादष्टपूर्णाम्बुजत्रयम् ।
तेषु वंशानि पात्राणि वस्त्रैराच्छादितानि च ।। ८१ ।।
तेषु शुक्लं च रक्तं च कृष्णं च वसनं नृप ।
शिरसे जगदीशस्य कर्त्तव्यमतियत्नतः ।। ८२ ।।
देवाङ्गावरणार्थं वै शुक्लं चीनं विचित्रितम् ।
एवं रूपेण राजेन्द्र सप्त सप्त चरेत्पृथक् ।। ८३ ।।
एकविंशतिसंख्यानि वसनानि नवानि च ।
तेषु पात्रेषु संरक्षेत्सुदर्शनकृते पुनः ।। ८४ ।।
चित्रं वस्त्रं च संरक्ष्य माधवार्थं तथैव च ।
लक्ष्मीकृतेऽशुकं चित्रं विश्वधात्र्यै तथा न्यसेत् ।। ८५ ।।
इन्द्रघोषमनुं जप्त्वा रक्षेद्वस्त्राणि भाजने ।
वितानस्त्वेति मन्त्रेण वस्त्राण्याच्छादयेत्पुनः ।। ८६ ।।
तद्रक्षणाय मनसा चक्रं तत्र विचिन्तयेत् ।
नृसिंहमन्त्रराजेन वस्त्रं स्पृष्ट्वाष्टधा जपेत् ।। ८७ ।।
बलभद्रस्य भद्रायाः स्वमन्त्रजपकृद् भवेत् ।
सर्वासु दिक्षु वस्त्राणां दिक्पालान् पूजयेत्तदा ।। ८८ ।।
चतुर्दिक्षु पुनर्भूप गणेशं क्षेत्रपालकम् ।
महादेवं च दुर्गां च पूजयेदर्च्चकस्ततः ।। ८९ ।।

एवं कुर्य्यात्सुवस्त्राणामधिवासविधिं द्विजः ।
अन्यथा न हि वस्त्राणां शुद्धिः स्यान्नृपतीश्वर ।। ९० ।।
ततः षष्ठीदिने प्रातः पूजानन्तरतो हरेः ।
नव्यांशुकार्पणं कुर्य्यादभिभावसमन्वितः ।। ९१ ।।
अधिवासितद्रव्याणि नवानि विविधानि च ।
अग्निशर्मार्च्चको ब्रह्माघण्टाद्युत्सवसंयुताः ।। ९२ ।।
प्रासादं भ्रामयेयुस्ते त्रिवारं तान् सुरानपि ।
तथैव भ्रामयित्वात्र देवाग्रे स्थापयेन्नृप ।। ९३ ।।
आच्छादितांशुकं तावद् बहिष्कृत्य सुसंयतः ।
वीक्षणादिकं संस्कारं कुर्य्यात्तत्र यथाविधि ।। ९४ ।।
ततो वस्त्रं करे धृत्वा प्रार्थयेद्देवसत्तमान् ।
बलदेव नमस्तेऽस्तु रोहिणीनन्दन प्रभो ।। ९५ ।।
आच्छादयामि वस्त्रैस्त्वामपराधं क्षमस्व मे ।
देव देव हृषीकेश जगदीश नमोऽस्तु ते ।। ९६ ।।
क्षीरसागरमध्येऽपि नित्यं शेते च यः पुमान् ।
निर्गुणो व्यापकः श्रीमानपरो यो निरञ्जनः ।। ९७ ।।
तं देवं नीलशिखरे लोकानुग्रहकाम्यया ।
स्त्रीपुंनपुंसकतया व्यक्तं त्वां सप्तधा विभो ।। ९८ ।।
स्थितमाच्छादयाम्यद्य वस्त्रैर्विष्णो नमोऽस्तु ते ।
भद्रे देवि सुरेशानि सर्वभद्रप्रदायिनि ।। ९९ ।।
वस्त्रैराच्छादयामि त्वां मङ्गलं देहि मे सदा ।
इति संप्रार्थ्य राजेन्द्र नवीनाम्बरसंचयैः ।। १०० ।।
सप्तधा मूर्त्तिमानन्दात् पृथगाच्छादयेत्तदा ।
मुखं विना हरेः सर्वावयवाकृतिमाचरेत् ।। १०१ ।।

अलङ्कारैश्च माल्यैश्च भूषयेत्तदनन्तरम् ।
पूर्ववत्तं हरिं भूप भक्त्या वन्दापयेन्नरः ।। १०२ ।।
तथान्यदेवताभ्यश्च विप्रेभ्यो गुरवे तदा ।
दीनेभ्योऽभिनवं वस्त्रं दद्याद्ध्यावरणाय वै ।। १०३ ।।
रवौ धनुःस्थिते भूप सामान्ये प्रातरर्च्चने ।
नानापूपानि रम्याणि दद्यादिष्टानि विष्णवे ।। १०४ ।।
एतत्प्रावरणोत्सवं च कुरुते यो वा मुदा पश्यति
क्षिप्रं सर्वमनोरथं च लभते पुत्रप्रपौत्रैः समम् ।
अन्ते विष्णुपुरं ब्रजेत्स तु पुनस्तत्रैव लब्ध्वा परं
ज्ञानं मोक्षमनन्यलभ्यममरैस्तद्वाञ्छनीयं ब्रजेत् ।। १०५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये प्रावरणोत्सवकथनं नामैकत्रिंशत्तमोऽध्यायः ।।

द्वात्रिंशत्तमोऽध्यायः

ब्रह्मोवाच

पौषे मासि महीनाथ अमावास्यादिने पुनः ।
प्रातःकालान्तरस्यापि सङ्गे भक्त्याञ्चितोऽर्च्चकः ।। १ ।।
लाङ्गलीफलखण्डैश्च चूर्णैस्तण्डुलसम्भवैः ।
वर्त्तुलानि सुरम्याणि तानि पूपानि दापयेत् ।। २ ।।
पूजान्ते विष्णवे दद्याद्दिव्यांश्चुताङ्कुरानपि ।
वन्दापनां प्रकुर्वीत पूर्ववद्धरणीपते ।। । ३ ।।
अथ पुष्याभिषेकस्य कथयामि विधिं नृप ।
प्रासादस्यैशानकोणे मण्डपं रचयेच्छुभम् ।। ४ ।।

चतुरस्त्रं चतुर्द्वारं वितानोत्तममण्डितम् ।
पताकावलिभिर्व्याप्तमङ्कुरारोपणाय वै ।। ५ ।।
एकादश्यां च शुक्लायां तृतीयार्च्चावसानतः ।
आचार्य्यः प्रथमं तत्र मण्डपे वरुणार्च्चनम् ।। ६ ।।
कृत्वा ततोऽग्निशर्मा च कुर्य्यात्संकल्पमादरात् ।
आचार्य्यवरणं कुर्य्याद् ब्रह्मावरणमेव च ।। ७ ।।
आचार्य्यस्तु करे सूत्रं धृत्वा तन्मध्यतो न्यसेत् ।
चतुरस्त्रतया कुर्य्यात्पूर्वं देशिकसत्तमः ।। ८ ।।
तिर्य्यगूर्ध्वक्रमेणैव सप्त सप्त तु पातयेत् ।
चतुःकोष्ठ्यानुमानेन मध्येऽपि चतुरस्त्रकम् ।। ९ ।।
तद्बाह्ये नृपतिश्रेष्ठ कुर्य्याद्द्वादशकोष्ठिकाः ।
चतुरस्त्रतया तासु परिधिं रचयेत् कृती ।। १० ।।
चतुर्दिक्ष्वष्टकोष्ठीषु शालां कुर्य्यान्मनोरमाम् ।
चतुश्चतुर्षु कोष्ठेषु चतुष्कोणे परन्तप ।। ११ ।।
चतुरस्त्रं प्रकुर्वीत ततो मध्ये च पूजकः ।
चतुरस्त्रे लिखेत्पद्मं पूर्वोक्तलक्षणान्वितम् ।। १२ ।।
तद्बाह्ये परिधिं शुक्लां कुर्य्यादाचार्य्यसत्तमः ।
शालायां पूर्वदेशस्य पीतवर्ण्णं परिन्यसेत् ।। १३ ।।
दक्षिणे कृष्णवर्ण्णं च पश्चिमे शुक्लकं तथा ।
उत्तरे रक्तवर्ण्णं च बह्निकोणे तथा बुधः ।। १४ ।।
चतुरस्त्रं परं कुर्य्याद्रक्तवर्ण्णं महीपते ।
नैर्ऋतस्य च कोणस्य श्यामवर्ण्णो विधीयते ।। १५ ।।
कृष्णरक्तकसंयोगाद्धूम्रवर्ण्णं मरुद्दिशि ।
कुर्य्यादैशान्यकोणेऽपि शुक्लवर्ण्णं महोदयम् ।। १६ ।।

तासु सर्वासु कोष्ठीषु धान्यैश्च परिपूरयेत् ।
त्रिविधं भाजनं कुर्य्यादङ्कुरार्पणकर्मणि ।। १७ ।।
पालिका घटिका तद्वच्छरावश्च त्रिधा भवेत् ।
कराङ्गुष्ठोन्नतियुगपालिका सुरदुर्ल्लभा ।। १८ ।।
अष्टाङ्गुलप्रमाणेन कण्ठः स्याच्च तदङ्घ्रिकः ।
उत्तमपुष्पवद्वक्त्रं कुर्य्याद्विस्तृतमादरात् ।। १९ ।।
विंशत्यङ्गुलमानेन स्यादायामः परन्तपः ।
घटिका पञ्चवक्त्रा स्यादूर्ध्वभागे घटाकृत ।। २० ।।
अधोभागे पालिकावद्द्वादशाङ्गुलतो मुखम् ।
चतुर्दिक्षु चतुर्वक्त्रं चतुरङ्गुलमानकम् ।। २१ ।।
विंशत्यङ्गुलमायामशोभिका घटिका भवेत् ।
द्वादशाङ्गुलविस्तीर्ण्णं शरावस्य मुखं भवेत् ।। २२ ।।
षडङ्गुलप्रमाणोऽङ्घ्रिः पुष्पाकारं च रूपतः ।
उन्नतिः स्यात्पालिकावत् पालिका वैष्णवी मता ।। २३ ।।
ब्राह्मीयं घटिका ज्ञेया शरावश्चैव एव हि ।
विभाजनमिदं तावद्देवतात्रयरूपभाक् ।। २४ ।।
चतुरस्रे च मध्येऽस्मिन् पूर्वशालापदे नृप ।
दक्षिणस्यां च शालायां पश्चिमायां घटांश्च तान् ।। २५ ।।
पूजकश्च न्यसेत्कोणे बह्नेर्वै नैरृऋतस्य च ।
पालिकाद्वयमारक्षेद्वायुकोणे तदुत्तरे ।। २६ ।।
शालायां च तथा रक्षेदीशानस्य च कोणतः ।
शरावं परिसन्न्यस्य तेषु पात्रेषु विष्टरम् ।। २७ ।।
एकैकं परिसंयोज्य करीषं बालुकां मुदम् ।
कोणेषु तेषु पात्रेषु पूरयेत्पूजकोत्तमः ।। २८ ।।

पृथ्वीबीजं समुच्चार्य्य दुग्धैर्बीजानि धौतयेत् ।
शालिश्यामातिन्तिडी च मुद्गाशिम्बास्तथा तिला ।। २९ ।।
सर्षपश्च कुलत्थश्च कङ्गूमाषास्तथैव च ।
एतानि दशबीजानि वपेत्पात्रेषु भूपते ।। ३० ।।
हरिद्रोदकमासिच्य वस्त्रैराच्छादयेत्पुनः ।
ततोऽग्रे समिधौ दिव्ययतिन्नाग्नौ हुनेत्क्रमात् ।। ३१ ।।
सोममन्त्रेण राजेन्द्र हुनेदष्टोत्तरं बुधः ।
त्रिविधानां च पात्राणां दशदिक्षु बलिं तथा ।। ३२ ।।
दिक्पालेभ्यो भूतगणान् रक्षःपितृगणांस्तथा ।
नागानां च शिवं विष्णुं रजनीशं द्विजोत्तमः ।। ३३ ।।
लाजाभिश्च तिलैस्तद्वद्धरिद्राभिश्च सक्तुभिः ।
अन्नं दद्यात्तदा शीघ्रं भूतेभ्यो लोकपालक ।। ३४ ।।
पितृभ्यो भक्तितो दद्यात्तिलांश्च तण्डुलान्यपि ।
अधिसक्थु तथा लाजान् बलित्वेन प्रकल्पितान् ।। ३५ ।।
एतैर्द्रव्यैश्च पत्रैश्च नारिकेलोदकैः समम् ।
यमेभ्योऽपि बलिं दद्याद् ब्रह्मणे नृपसत्तम ।। ३६ ।।
पद्माक्षतानि भो दद्यान्नागेभ्यः सक्थुपिष्टकम् ।
दद्याच्छिवाय सापूपमन्नं च विष्णवे ततः ।। ३७ ।।
ऐक्ष्वान्नं परमं दद्याद्भक्तिश्रद्धासमन्वितः ।
एवं बलिक्रिया कार्य्या गीतनृत्यादिकं निशि ।। ३८ ।।
कुर्य्यात्पञ्चदिनान्येवं त्रीणि वा परमादरात् ।
नेत्रोत्सवे गुण्डिचायां बलभद्रस्य जन्मनि ।। ३९ ।।
अभिषेकोत्सवे राजन् देवप्रासादयोस्तथा ।
प्रतिष्ठायां च तत्कुर्य्यादङ्कुरार्पणमुत्तमम् ।। ४० ।।

न कुर्य्याच्चेदिदं कर्म सर्वं तान्निष्फलं भवेत् ।
न प्रसन्नो भवेद्देवस्तेषु कर्मसु केशवः ।। ४१ ।।
चतुर्दश्यां ततो विष्णोश्चतुर्थार्च्चावसानतः ।
देवाग्रेऽपि चतुःपङ्क्तिर्लिखेत्तण्डुलचूर्ण्णकैः ।। ४२ ।।
सौवर्ण्णरौप्यकान् कुम्भानथवा ताम्रसम्भवान् ।
निर्मलोदकसंपूर्ण्णानष्टोत्तरशतांश्च तान् ।। ४३ ।।
चन्दनागुरुकर्पूरैर्युतान् पङ्क्तिषु योजयेत् ।
पञ्चविंशतिसंख्यातान् त्रिषु पङ्क्तिषु योजयेत् ।। ४४ ।।
सुदर्शनस्य पङ्क्त्या च द्वादशप्रमितान् न्यसेत् ।
पङ्क्त्या पङ्क्त्या घृतैर्पूर्ण्णानृतुसंख्यान्यसेत्तथा ।। ४५ ।।
सुदर्शनस्य पङ्क्त्या वै घृतपूर्णं घटत्रयम् ।
कृत्वा चेत्थं घटानां वा अष्टोत्तरशतं न्यसेत् ।। ४६ ।।
यदश्वायेति मन्त्रेण वाससा सादयेत्पुनः ।
गन्धद्वारेति मनुना गन्धं क्षिप्त्वा ततः परम् ।। ४७ ।।
श्रीश्च त इति पुष्पाणि क्षिपेदन्तः परंतप ।
कुम्भाधिवासनं कुर्य्यादेवं देवाग्रतः पुनः ।। ४८ ।।
सर्वतोभद्रनामानं मण्डलं विलिखेत् सुधीः ।
तत्र भद्रासने रक्षेन्मुकुरं चारु निर्मलम् ।। ४९ ।।
गन्धपुष्पैर्भूषयित्वा वाससा सादयेत्पुनः ।
रात्रौ जागरणं कुर्य्याद् गीतनृत्यादिभिः परैः ।। ५० ।।
वीणामृदङ्गपटहैर्महोत्सवतया नृप ।
दण्डत्रयावशिष्टायां रजन्यां पूजकोत्तमैः ।। ५१ ।।
नित्यं स्नानं तदा कार्य्यं हरेस्तस्य परात्मनः ।
प्रातःपूजाद्वयं कार्य्यमेकदेव नृपेश्वर ।। ५२ ।।

अरुणोदये चाग्निकार्य्यं कुर्य्यात्तद्विधिना द्विजः ।
आचार्य्यः प्रथमं कुर्य्याद् वरुणस्यार्च्चनं मुदा ।। ५३ ।।
अग्निशर्माणमेवासौ संकल्पयति तत्त्वतः ।
आचार्य्यो विधिवत्कुर्य्यात्स्वस्तिवाचनकं पुनः ।। ५४ ।।
आचार्य्यवरणं चैव ब्रह्मावरणमेव च ।
अग्निशर्मा तथा कुर्य्यादाचार्य्यस्त्वग्निपूजनम् ।। ५५ ।।
पञ्चोपचारविधिना कृत्वा होममथाचरेत् ।
प्रथमं संहुनेद्भूप चाघारस्य चतुष्टयम् ।। ५६ ।।
पुण्याहवाचनं कृत्वा भूरादिकनवाहुतिम् ।
ब्रह्मा विष्णुमहेशानां स्व स्व मन्त्रैश्च वैदिकैः ।। ५७ ।।
कुर्य्याद्धोमं महीपाल भूरादिकनवाहुतिम् ।
अष्टोत्तरशतं तावज्जुहुयाच्च पृथक् पृथक् ।। ५८ ।।
तदन्ते मन्त्रराजेन त्रिशतं जुहुयाद्द्विजः ।
ततः पूर्णाहुतिं कुर्य्याद् ब्रह्मणश्च विसर्जनम् ।। ५९ ।।
अग्नेर्विसर्जनं कृत्वा दद्यादाचार्य्यदक्षिणाम् ।
स्वर्णेनैकेन राजेन्द्र भक्त्या परमया तदा ।। ६० ।।
तदर्द्धेन ततो दद्यात् ब्रह्मणे दक्षिणां पराम् ।
सहस्रभोजनान्येव द्विजेभ्यो वितरेन्मुदा ।। ६१ ।।
परिधानोत्तरीयेऽथ दद्यात्तस्मै मुरारये ।
ततः काहालच्छत्रोद्यद्घण्टाद्युत्सवसंयुतः ।। ६२ ।।
कलशांस्तान् हरेरग्रे आनीय पङ्क्तितो न्यसेत् ।
ततोऽर्च्चकः सुरेशं तं षण्मूर्त्या चैकमूर्त्तिकम् ।। ६३ ।।
भावयित्वा नृपश्रेष्ठ तदग्रे कमलां न्यसेत् ।
गन्धादिना यजेत्तावच्छीतलद्रव्यतो हरिम् ।। ६४ ।।

ताम्बूलं मन्त्रराजेन संस्कुर्य्यात् प्रार्थयेत्ततः ।
जगन्नाथ नमस्तेऽस्तु नमस्ते रावणान्तक ।। ६५ ।।
नानावतारलीलाभूर्नीलशैलपते प्रभो ।
दिव्येऽस्मिन् प्रतिविम्बे त्वां तत्कुम्भजमतोऽधुना ।। ६६ ।।
स्नापयामि सुराधीशं अपराधं क्षमस्व मे ।
इत्युक्वा तज्जलैर्देवं पुरुषसूक्तेन सेचयेत् ।। ६७ ।।
श्रीसूक्तेन महीनाथ पावमानीतिसूक्ततः ।
देवीसूक्तेन च पुनः स्नापयेत्तं शनैः शनैः ।। ६८ ।।
गायत्रीं च सहस्राक्षं पठन्नाचार्य्यसत्तमः ।
घृतेन स्नापयेद्धीरो मन्दं मन्दं मुदान्वितः ।। ६९ ।।
सौवर्ण्णं राजतं वापि ताम्रसम्बन्धि वा पुनः ।
सहस्ररन्ध्रसंयुक्तं पलैर्द्वादशभिः कृतम् ।। ७० ।।
धृत्वा तद्भाजनं ब्रह्मा प्रतिविम्बोपरि स्वयम् ।
सुवासितजलैस्तावत्स्नापयेद्भक्तिभावतः ।। ७१ ।।
ततस्तत्प्रोञ्छनं कृत्वा देवाङ्गाच्च ततो नृप ।
वस्त्रमाल्यादिकं तावद्बहिष्कुर्य्याच्छनैः शनैः ।। ७२ ।।
सर्वाङ्गलेपनं कृत्वा ततो नव्याम्बरार्पणम् ।
अलङ्कारैश्च माल्यैश्च भूषयेद्भक्तवत्सलम् ।। ७३ ।।
काहालच्छत्रघण्टादिस्फुरदग्रतया शनैः ।
आनयेच्चारुनैवेद्यं पाकशालान्तराद्बहु ।। ७४ ।।
पञ्चपङ्क्तितया रक्षेद् देवाग्रे तन्महीपते ।
अग्निशर्मा चन्दनं च पीतवस्त्रद्वयं तथा ।। ७५ ।।
दामदामनकं दिव्यं देवदेवाय दापयेत् ।
श्वेतच्छत्रं च संस्कृत्य समर्पयति सादरम् ।। ७६ ।।

कुर्य्यान्मध्याह्नपूजां स आचार्य्यः पूर्ववद्बलिम् ।
दत्त्वा बाह्योऽर्च्चको ब्रह्मा अग्निशर्मा च ते नराः ।। ७७ ।।
वन्दापयेयुः क्रमतो भक्तिभावसमन्विताः ।
इन्द्रद्युम्न महाराज त्वं तदा जगदीश्वरम् ।। ७८ ।।
पुष्पाञ्जलिं समर्प्याथ चामरैर्व्यजनैस्तथा ।
संवीज्य दण्डवत्कुर्य्याः प्रथमं च हरेः पुरः ।। ७९ ।।
एवं च परया भक्त्या तोषयेत्परमेश्वरम् ।
अभिषेकोत्सवं ये वै पश्यन्ति भुवि मानवाः ।। ८० ।।
सर्वपापविनिर्मुक्ता भुक्त्वा शर्माखिलं परम् ।
सर्वान् कामान् परं लब्ध्वा विष्णुलोकं ब्रजन्ति ते ।। ८१ ।।

ऋषय ऊचुः

इन्द्रद्युम्नेन महता पृष्टेन विधिना मुने ।
कथितं यत्पुरा विष्णोर्दीपदानादितत् श्रुतम् ।। ८२ ।।
सर्वाभीष्टप्रदः साक्षात् सकलाघविनाशकः ।
अभिषेकोत्सवश्चायं श्रुतः सूतमुखात्तव ।। ८३ ।।
मकरं भास्करे प्राप्ते को विधिः स्याज्जगत्पतेः ।
कथयस्व मुने तावत्सर्वज्ञो हि भवान् यतः ।। ८४ ।।

सूत उवाच

धन्याः पुण्यार्जने सक्ताः सत्कथाश्रवणादृताः
ब्रह्मणा भणितं यत्तु कथयिष्यामि भो द्विजाः ।। ८५ ।।
ये मानवाः कृष्णकथातिसक्तास्तच्चित्रलीलाश्रवणादृता ये ।
तत्पूजने दत्तहृदश्च विप्रास्तेषां न जानाति यमस्तु वार्त्ताम् ।। ८६ ।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये द्वात्रिंशत्तमोऽध्यायः ।।

त्रयस्त्रिंशोऽध्यायः

इन्द्रद्युम्नो उवाच

उत्तरायणे च तद्विष्णोः कीदृशं पूजनं भवेत् ।
यात्रा वा कीदृशी ब्रह्मन् तत्सर्वं वक्तुमर्हसि ।। १ ।।

ब्रह्मोवाच

नीलाचलपतेर्विष्णोर्नानालीलालयस्य च ।
सम्यक् वक्तुं च कः शक्तस्तल्लीलाकौतुकं नृप ।। २ ।।
तस्मात्समासतो वच्मि सावधानतया शृणु ।
नारायणप्रीतिकरे संप्राप्ते चोत्तरायणे ।। ३ ।।
मकरस्य च संक्रान्त्याः पूर्वेद्युः केशवस्य च ।
सान्ध्यपूजावसानेऽथ नानापुष्पैर्मनोहरैः ।। ४ ।।
भूषयेत्परमेशं तं प्रत्यर्चातत्समीपकम् ।
नीत्वा चतुर्थयजनं कृत्वा संप्रार्थयेद्धरिम् ।। ५ ।।
देवदेव जगन्नाथ प्रसीद परमेश्वर ।
प्रासादभ्रमणार्थं वै भ्रमणाय तव प्रभो ।। ६ ।।
आज्ञापय महाबाहो प्रत्यर्चां चारुशोभनाम् ।
इत्युक्त्वाङ्गाद्धरेर्माल्यं प्रत्यर्चाय समर्पयेत् ।। ७ ।।
प्रत्यर्च्चां भ्रामयेत्तावद् विष्णुमव्ययरूपिणम् ।
वारत्रयं ततो दिव्ये विमाने चारुमण्डने ।। ८ ।।
वासयित्वा मनोरम्यां प्रत्यर्च्चां परिभूषिताम् ।
छत्रचामरघण्टादि काहालमर्द्दलादिभिः ।। ९ ।।
वाद्यैर्नानाविधैः शङ्खैर्महोत्सवतया नृप ।
गीतनृत्यादिभिस्तावच्चतुर्वारं शनैः शनैः ।। १० ।।

प्रासादं भ्रामयेद्भूयः सर्वोपद्रवशान्तये ।
एतन्नवाङ्कभ्रमणे प्रथमभ्रमणं च यः ।। ११ ।।
पश्येत्पञ्चमहापापात् प्रमुक्तः स्यान्न संशयः ।
तथोपपातकैर्मुक्तो द्वितीयभ्रमणेक्षणात् ।। १२ ।।
तृतीये सर्वयज्ञानां फलं प्राप्नोति मानवाः ।
विष्णुप्रीततरश्च स्याच्चतुर्थभ्रमणेक्षणात् ।। १३ ।।
कुर्वतां भ्रमणे विष्णोर्मुक्तः स्याच्छाश्वती शुभा ।
तत्प्रदक्षिणं प्रत्यहं प्रत्यार्च्चसङ्गतो नृप ।। १४ ।।
कुर्वन्ति भक्त्या ये मर्त्त्याः पश्यन्ति च मुहुर्मुदा ।
ते सर्वे सुखमैश्वर्य्यं भुक्त्वा भूमितलेऽखिलम् ।। १५ ।।
पितृन्नृद्धुत्य नरकात् प्रापयन्ति हरेः पदम् ।
गच्छन्ति पुनरावृत्तिरहितं सुरदुर्ल्लभम् ।। १६ ।।
सत्पुत्रकोऽपि वंशे स्यात् क्षेत्रे श्रीपुरुषोत्तमे ।
एतत् प्रदक्षिणं कुर्य्यात्पश्येद्वा सुसमाहितः ।। १७ ।।
तत्प्रसादाद् गमिष्यामो विष्णोस्तत्पदमव्ययम् ।
वाञ्छन्ति पितरो नूनमित्येवं ते परस्परम् ।। १८ ।।
एतद् भ्रमणमानन्दान्नो पश्यन्ति जनाश्च ये ।
क्षेत्रे स्थित्वापि तेषां वै सुखलेशो न विद्यते ।। १९ ।।
सन्ततिश्च क्षयं याति पश्यन्ति पितरश्च तान् ।
पश्यतां भ्रमणं वापि शरीरेषु हरेर्यतः ।। २० ।।
अष्टादशानि चिह्नानि निवसन्ति नवं नवम् ।
तस्मान्नवाङ्कनाम्नीयं यात्रा तद्गदिता नृप ।। २१ ।।
एतद् भ्रमणकाले तु कल्पद्रुमवरान्नरः ।
पत्रमानीय बध्नीयात्करे भक्त्या समन्वितः ।। २२ ।।

सर्वान् कामानवाप्नोति पुत्रपौत्रैश्च मोदते ।
एतत् सप्तभ्रमान्ते तां प्रत्यर्च्चां स्वपदे न्यसेत् ।। २३ ।।
देवतापूर्वदिग्भागे चतुर्द्वारं मनोहरम् ।
नानावितानशोभाढ्यं चारुचामरसंयुतम् ।। २४ ।।
तादृशं मण्डपं कुर्य्यात्तत्र चाष्टदलाम्बुजम् ।
विलिखेत् स्वर्णरौप्यादिनिर्मितं भाजनं न्यसेत् ।। २५ ।।
तादृशेषु च पात्रेषु दिव्यतण्डुलकान् न्यसेत् ।
नवीनवाससाच्छाद्य गन्धपुष्पाणि पातयेत् ।। २६ ।।
एवं कुर्य्यात्तण्डुलानामधिवासं परंतप ।
संक्रान्तिदिनतः प्रातः पूजानन्तरतो नृप ।। २७ ।।
महास्नानं हरेः कार्य्यं लेपयेच्चन्दनादिना ।
नवांशुकैरलङ्कारैर्भूषयेत्परमेश्वरम् ।। २८ ।।
मध्याह्नकालयजनं कुर्य्यात्कार्य्यकलापवित् ।
मुखनीराजनं तद् वै ततः स चरुपाचकः ।। २९ ।।
किंचिन्नैवेद्यमागृह्य जगन्नाथस्य पङ्क्तितः ।
पात्रहोता समं मन्त्र्य ब्रह्मणा सहितस्तदा ।। ३० ।।
पूर्ववद् बाह्यकमलं दद्याद्भक्त्या यथाविधि ।
बलिं दत्त्वार्च्चकः श्रीमान् ततश्च परमेश्वरम् ।। ३१ ।।
गण्डूषान् जलधारांश्च ताम्बूलं च समर्पयेत् ।
नीराजनं ततः कुर्य्यात्पश्यतां सुखवर्द्धनम् ।। ३२ ।।
मध्याह्नपूजाकर्मान्ते तण्डुलानधिवासितान् ।
सम्यक् धौत्वा ततस्तत्र दुग्धं च शर्करां पराम् ।। ३३ ।।
नारिकेलस्य शकलानार्द्रकान्क्षुद्रकान्बहून् ।
घृतं च दुग्धसारं च दिव्यामृतकसंज्ञकम् ।। ३४ ।।

बहुरम्भाफलं तत्र कर्पूरक्षोदसंचयान् ।
पातयित्वा तण्डुलांस्तान् आलोड्य च पुनः पुनः ।। ३५ ।।
सौवर्ण्णेषु च पात्रेषु स्थापयेत्तत्प्रयत्नतः ।
सूक्ष्मांशुकैस्तदाच्छाद्य चरुहोतार एव ते ।। ३६ ।।
आच्छाद्य वाससा वक्त्रं धृत्वा पात्राणि तानि च ।
प्रासादं भ्रामयेयुश्च वारत्रयमरिन्दम ।। ३७ ।।
छत्रचामरघण्टादिकाहालादिध्वनौ सति ।
महोत्सवे जायमाने भ्रामयेत्तच्छनैः शनैः ।। ३८ ।।
ततो दधि भ्रामयेयुः शर्करां तदनन्तरम् ।
ताम्बूलं भ्रामयेदेकवारं परमभक्तितः ।। ३९ ।।
ताम्बूलव्यतिरेकेण तत्सर्वं द्रव्यमुत्तमम् ।
ण्यञ्जनान्यानि द्रव्याणि नानापूपानि यत्नतः ।। ४० ।।
चतुःसंख्याधिकश्रुतिप्रकारं विविधं बहु ।
तादृङ्नैवेद्यसंघातं पङ्क्त्या पङ्क्त्या नियोजयेत् ।। ४१ ।।
अग्निशर्मा ततः पीतवस्त्रं युग्मं मनोरमम् ।
दामदामनकं कान्तं चन्दनं च समर्पयेत् ।। ४२ ।।
यजेयुस्तेऽर्च्चकास्तावद् विधिना चन्दनादिना ।
तदन्ते विधिना दद्यात्ताम्बूलं सुखवर्द्धनम् ।। ४३ ।।
आचार्य्यश्चाग्निशर्मा च ब्रह्मा वन्दापनां चरेत् ।
कुशलो बलभद्रादीन् सर्वलोकमहेश्वरान् ।। ४४ ।।
एतदुत्सवमानन्दं ये पश्यन्ति जगत्पतेः ।
सर्वयज्ञफलं लब्ध्वा विष्णुलोकं ब्रजन्ति ते ।। ४५ ।।
माघमासस्य शुक्लायां पञ्चम्यां नृपसत्तम ।
मध्याह्नपूजनस्यान्ते कौस्तुभैरम्बरोत्तमैः ।। ४६ ।।

सर्वाङ्गे मण्डयेद् विष्णोर्भक्तिभावसमन्वितः ।
नानालङ्कारनिकरैः कमलाकेलिलालसः ।। ४७ ।।
भूषयेत्तं विशांनाथ चतुर्वर्गफलाप्तये ।
चतुर्विधानि दिव्यानि बहून्यन्नानि भक्तितः ।। ४८ ।।
नानापूपसमेतानि व्यञ्जनानि नृपोत्तम ।
नैवेद्यानि च संस्थाप्य यजेद् गन्धादिना द्विजः ।। ४९ ।।
पूजान्ते सोऽर्च्चकः श्रीमानग्निशर्मा ततः परम् ।
ब्रह्मा च ते श्वेतवर्ण्णं पीतरक्तं मनोरमम् ।। ५० ।।
फुल्लपुञ्जं च संस्कृत्य बलदेवादिदेवताः ।
आपादशीर्षपर्य्यन्तं पातयेयुश्च संयताः ।। ५१ ।।
वन्दापनां प्रकुर्य्यासुः क्रमादानन्दमानसाः ।
त्वमेव नृपशार्द्दूल देवानां पुरतः स्थितः ।। ५२ ।।
फल्गु तत् त्रिविधं द्रव्यं कर्पूरेण सुवासितम् ।
पातयेः परया भक्त्या चतुर्वर्गफलाप्तये ।। ५३ ।।
जगन्नाथं सुराधीशमाचार्य्यः प्रार्थयेत्ततः ।
आज्ञापय महाबाहो लीलारसलसोन्मनाः ।। ५४ ।।
नारायणप्रतिकृतिं जगदाह्लादकारिणीम् ।
इति संप्रार्थ्य चानीय तदाज्ञामाल्यमादरात् ।। ५५ ।।
प्रत्यर्च्चायै ददौ सार्द्धं श्रीधराभ्यां तदार्चकः ।
प्रतिमास्ता रथारोहे देवयाने सुशोभने ।। ५६ ।।
वासयित्वा नयेद्यज्ञवेद्यान्तिकमरिन्दम ।
तत्र गन्धादिना भक्त्या यजेद्वन्दापयेत्ततः ।। ५७ ।।
आनीय प्रतिमास्तस्मात्स्वपदे विनिवेशयेत् ।
ये पश्यन्ति नराः भक्त्या ह्येतदुत्सवमुत्तमम् ।। ५८ ।।

तेषां च दुष्कृतं नश्येत्सर्वान् कामान् भजन्ति ते ।
वसन्तगुण्डिचेत्येवं पश्यन् जन्म च यो वसेत् ।। ५९ ।।
घोषयात्राफलं सोऽपि प्राप्नुयान्नात्र संशय ।
नीलशैलपतेर्विष्णोस्तावदङ्गावृतिर्भवेत् ।। ६० ।।
यावद् वसन्तसज्ञा स्यात्पञ्चमी च न तत्परम् ।
आदोलोत्सवमेतस्य विष्णोरव्यक्तरूपिणः ।। ६१ ।।
पृष्ठभागाकृतिं कुर्य्यादवनीश जनोत्तम ।
एकादशीदिने प्रातः पूजानन्तरतो हरेः ।। ६२ ।।
महास्नानविधिः कार्य्यः चतुःसमविलेपनम् ।
नवीनवस्त्रमाल्यादिभूषणैस्तं विभूषयेत् ।। ६३ ।।
ततो मध्याह्नयजनं विधेयं विधिनार्चकैः ।
वन्दापयेत्तदन्ते च गरुडध्वजमादरात् ।। ६४ ।।
एतस्मिन् समये भूप ये पश्यन्ति जनार्द्दनम् ।
सर्वपापविनिर्मुक्ताः सुखसौभाग्यभोगिनः ।। ६५ ।।
न तेषां च पुनर्जन्म मुक्तिस्तेषां न दुर्लभा ।
सफला सर्वकार्य्येषु जायन्ते नृपसत्तम ।। ६६ ।।

ब्रह्मोवाच

इदानीं फाल्गुने मासि यो विधिः स्यान्नृपोत्तम ।
तं वदामि समासेन समाकर्ण्णय सादरम् ।। ६७ ।।
दण्डद्वयावशिष्टायां क्षपायां रक्षकैस्तदा ।
निद्राभङ्गो हरेः कार्य्यः प्रार्थयेज्जगदीश्वरम् ।। ६८ ।।
आज्ञापय रमाकान्त नमस्ते भक्तवत्सल ।
त्रैलोक्यलोकसुखद प्रत्यर्च्चां भ्रमणाय वै ।। ६९ ।।
इत्याज्ञाप्य ततो मालां प्रत्यर्च्चायै ददौ मुदा ।
छत्रचामरघण्टादिस्फुरदग्रतया नृप ।। ७० ।।

प्रत्यर्च्चां तां विमानस्थां मार्कण्डेयान्तिकं नयेत् ।
स्नापयित्वा तु तत्रैव पूजयेच्चन्दनादिना ।। ७१ ।।
वन्दापयेत्तथा धीमान् भक्तिभावं वहन् हृदि ।
एवंविधं प्रकुर्वीत सप्तवासरतो नृप ।। ७२ ।।
अथवा पञ्चदिवसं त्रिदिनं वा महोत्सवम् ।
ये पश्यन्ति नराः धन्याः भुवि मोक्षाभिलाषिणः ।। ७३ ।।

सूत उवाच

वसन्तभ्रमणस्यास्य चतुर्मुखमुखोद्गतम् ।
विधिं श्रुत्वा महीनाथो विनन्द्य च मुहुर्मुहुः ।। ७४ ।।
क्षीरार्ण्णवस्योत्तरतीरदेशे
मूले च कल्पद्रुमपादपस्य ।
व्यक्तस्य विष्णोः परमात्मनश्च
चकार राजा स च सर्वलीलः ।। ७५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये त्रयस्त्रिंशोऽध्यायः ।।

चतुस्त्रिंशोऽध्यायः

इन्द्रद्युम्न उवाच

दोलाकेलिविधिं ब्रह्मन् कथयस्व यथा भवेत् ।
यद्विष्णोः प्रीतिदं गात्रं गोविन्दस्य परात्मनः ।। १ ।।
यत्र श्रीभगवान् देवो दोलायिततरः स्वयम् ।
पश्यतां सर्वलोकानां चतुर्वर्गफलप्रदः ।। २ ।।

ब्रह्मोवाच

साधु पृष्टं महाभाग गोपनीयतरं तु यत् ।
गोविन्दप्रीतिजनकं चतुर्वर्गप्रदायकम् ।। ३ ।।

तच्छ्रोतुं भवतश्चित्तं साभिलाषि यतः परम् ।
तस्माद्भूपतिशार्दूल धन्योऽसि त्वं महामते ।। ४ ।।
फाल्गुनस्य च मासस्य शुक्लपक्षे शुभोदये ।
फल्गूत्सवं प्रकुर्वीत पञ्च वा त्रिदिनानि वा ।। ५ ।।
तिथौ दशम्यां राजेद्र नीलाचलपतेः प्रभो ।
मध्याह्नपूजनान्तेऽपि भगवन्तं जनार्द्दनम् ।। ६ ।।
कौस्तुभवस्त्रालङ्कारैर्भूषयेत्परमेश्वरम् ।
गोविन्दनामप्रत्यर्च्चां जगदीशान्तिकं न्यसेत् ।। ७ ।।
संन्यस्य त्वथ देवांश्च नानाभोगैर्मनोहरैः ।
पञ्चोपचारविधिना पूजयेद्देशिकोत्तमः ।। ८ ।।
पूजानन्तरतो राजन्नथ नैवेद्यमन्दिरम् ।
क्षालयित्वा यथा न्यायं भूयो देवांश्च भूपते ।। ९ ।।
कर्पूरक्षोदसंयुक्तैश्चन्दनीयैश्च फल्गुभिः ।
रञ्जयेयुः क्रमेणैव श्रद्धाभक्तिसमन्विताः ।। १० ।।
अग्निशर्मा बलं तावत् ब्रह्मा भद्रां शुभप्रदाम् ।
पूजकोऽपि जगन्नाथं चक्रं च माधवं तथा ।। ११ ।।
प्रत्यर्च्चां कमलादेवीं विश्वधात्रीमतः परम् ।
अथ त्वं नृपशार्दूल सिंहासनतले स्थितः ।। १२ ।।
श्वेतं रक्तं तथा पीतं फल्गुचन्दननिर्मितम् ।
शिरसः पादपर्य्यन्तं प्रक्षिपेद्देवसत्तमान् ।। १३ ।।
त्वदभावेऽप्यग्निशर्मा तस्याभावेऽर्चकः क्षिपेत् ।
फल्गुदानावसानेऽथ माल्यं दामनकं शुभम् ।। १४ ।।
अग्निशर्मा च राजेन्द्र दद्यान्मुषलपाणये ।
पीतवस्त्रद्वयं तावत् फल्गुपुञ्जं जनार्द्दने ।। १५ ।।

समर्प्याथ तथा भद्रां दद्याच्चन्दनपिण्डकम् ।
कर्पूरवर्त्तिभिस्तावद्दूर्वाक्षतचयैः पुनः ।। १६ ।।
तथैव सप्तवर्त्त्या च पिष्टकावर्त्तिभिर्नृप ।
अग्निशर्मा जगन्नाथं बलभद्रं च पूजकः ।। १७ ।।
ब्रह्मा भद्रपदां भद्रां भक्त्या वन्दापयेत् क्रमात् ।
ततोऽग्निशर्मा माल्यादीन् समुत्तार्य्य प्रयत्नतः ।। १८ ।।
दद्यात्तुभ्यं च तत्सर्वं संप्रार्थ्य हृष्टमानसः ।
कृतकृत्यो भवेद्भूयो भवान् वै भूपसत्तम ।। १९ ।।
आज्ञापय जगन्नाथ प्रत्यर्च्चां च रमां धराम् ।
बहिः फल्गूत्सवार्थं च क्रीडालालसमानसः ।। २० ।।
दक्षिणाङ्गाद्धरेर्माल्यमुत्तार्य्य धरणीपते ।
प्रत्यर्च्चोपरि तद्दत्त्वा वामाङ्गाच्च पुनः प्रभो ।। २१ ।।
माल्यमानीय वेशेन श्रीधराभ्यां समर्पयेत् ।
अतस्ताः प्रतिमा दिव्या रत्नसिंहासनात् पुनः ।। २२ ।।
द्वारपालपुरोदेशे स्थापयित्वा तु फल्गुभिः ।
त्रिविधै रञ्जयित्वाशु ततो वन्दापनां चरेत् ।। २३ ।।
दन्तिदन्तसमुद्भूते नानारत्नोपशोभिते ।
दिव्यमाल्याम्बरधरे सुरम्ये पावने तथा ।। २४ ।।
छत्रचामरघण्टादिस्फुरदग्रदलेऽमले ।
तादृशे देवयाने च स्थापयित्वा च ताः शुभाः ।। २५ ।।
लोकेश्वराख्यशम्भोश्च तथा यमेश्वरस्य च ।
नीलकण्ठेश्वरस्यापि मार्कण्डेयेश्वरस्य वै ।। २६ ।।
कपालमोचनस्यापि प्रत्यर्च्चाश्च पृथक् पृथक् ।
विमानस्थां नृपश्रेष्ठ ! प्रासादं भ्रामयेत्सकृत् ।। २७ ।।

शनैः शनैर्नयेद्दिव्यैर्विमानैः कृतमण्डनैः ।
महोत्सवतया राजन् मरीचान्तिकमुत्तमम् ।। २८ ।।
नयेत्ततश्च ताः सर्वाः प्रतिमाः शुभदर्शनाः ।
चञ्चत्फल्गुषु धूलिभिर्मिथः क्षेपोत्सवैः परम् ।। २९ ।।
समानीय निजस्थाने स्थापयेत् प्रतिमाश्च ताः ।
एवं विधिं प्रकुर्वीत दशमीदिनतो नृप! ।। ३० ।।
त्रयोदशीदिनमभिस्फुरदुत्सवयोगतः ।
चतुर्दशीतिथौ भूप! पूर्ववन्माधवार्च्चनम् ।। ३१ ।।
समाप्य जगदीशस्य फल्गुदानादिकर्म तत् ।
पूर्ववन्नृपते भक्त्या चरेत् पूजकसत्तमः ।। ३२ ।।
प्रासादभ्रमणं कृत्वा दोलमण्डपपूर्वतः ।
नीत्वा वन्ह्युत्सवं कृत्वा विघ्ननाशनहेतवे ।। ३३ ।।

इन्द्रद्युम्न उवाच

कीदृशो भविता ब्रह्मन् वन्ह्युत्सवविधिर्हरेः ।
विघ्ननाशार्थमत्यन्तं कथयाम्बुजसम्भव ।। ३४ ।।
दोलायां मण्डपं तादृक् कार्यं वा सुरसत्तम ।
एतद्विवरणं ब्रूहि मां च शुश्रूषुमादरात् ।। ३५ ।।

ब्रह्मोवाच

शृणु भूप समासेन वन्ह्युत्सवविधिं हरेः ।
दोलमण्डपनिर्माणं तथैव च यथाविधि ।। ३६ ।।
दोलमण्डपपूर्वे हि सामान्यगृहनिर्मितम् ।
कृत्वा द्वारद्वयं तत्र पूर्वपश्चिमदेशतः ।। ३७ ।।
तद्गृहाभ्यन्तरे वह्नेर्दाहकं मेषपुङ्गवम् ।
बध्वा तत्पश्चिमद्वारि स्थण्डिलं बालुकामयम् ।। ३८ ।।

चतुरस्रं हस्तमात्रं वेदाङ्गुलसमुच्छ्रितम् ।
प्राङ्मुखोदङ्मुखो वापि शुचिर्भूत्वा समाहितः ।। ३९ ।।
विधाय पूजकः कुम्भे वरुणार्च्चनमुत्तमम् ।
ततोऽग्निशर्मा संकल्पं कृत्वाचार्य्यवृत्तिं तथा ।। ४० ।।
ब्रह्मावरणमाकुर्य्यात्पुण्याहवाचनं तथा ।
आचार्य्यः स्थण्डिले राजन् कुशत्रयमनिन्दितम् ।। ४१ ।।
गोमयं स्थापयित्वा तु जलपात्रं तथैव च ।
पुनः कुशत्रयं चैव न्यसेत्कर्मकलापवित् ।। ४२ ।।
पुरा कुशत्रयेणैव परिमार्जनमाचरेत् ।
गन्धोदकैर्विलिप्याशु वज्रेणोल्लेखनं चरेत् ।। ४३ ।।
वारिणाभ्युक्षणं कुर्य्यात् त्रिवारं पूजकोत्तमः ।
मृत्तिकोद्धरणं कुर्य्यान्मध्यमाङ्गुष्ठयोगतः ।। ४४ ।।
पञ्चैव संस्कृतिं भूमेः कृत्वास्मिन् स्थण्डिले क्रमात् ।
मध्ये त्रिकोणं संलिख्य षट्कोणं तद्बहिर्लिखेत् ।। ४५ ।।
ततो हृदादिमन्त्रेण वीक्षणादिकमाचरेत् ।
यद्यथा स्यान्नरपते गदतो मे निशामय ।। ४६ ।।
ॐ आचक्राय स्वाहेते हृदयाय नमो वदेत् ।
वीक्षणं च चरेन्मन्त्री सर्वमन्त्रविदो नरः ।। ४७ ।।
अतः परं विचक्राय स्वाहान्तं शिरस इति ।
भक्त्या प्रोक्षणमाकुर्य्यात्ततो दर्भैस्तु ताडनम् ।। ४८ ।।
ॐ स्वचक्राय स्वाहेति शिखायै वषडित्यपि ।
एवं विधिविधानेन कुर्य्यादाचार्य्यः कर्म तत् ।। ४९ ।।
त्रैलोक्यरक्षणपदं पुरतश्च कृत्वा
चक्राय चेति नृपते शिखिनः प्रियान्तम् ।
चक्राय हुमिति निगद्य तदैव मन्त्रं
ह्यभ्युक्षणं रचयतु स्फुटमत्र भूयः ।। ५० ।।

असुरान्तकचक्राय स्वाहेत्यस्त्राय फट् पुनः ।
इत्युक्त्वा तत्र कोणे वै मध्ये विष्टरमान्यसेत् ।। ५१ ।।
कुशमूले ऋतुमतीं लक्ष्मीं च मदनातुराम् ।
विष्णुं च ग्राम्यधर्मेण चिन्तयित्वा प्रपूजयेत् ।। ५२ ।।
ततोऽग्निपूजनं ध्यात्वा वह्निं तद्बीजरूपकम् ।
विचिन्त्य देवाय तदा देव्यै चाचमनीयकम् ।। ५३ ।।
दत्त्वा यज्ञेन्धनैस्तावद्वह्निं प्रज्वालयेत्ततः ।
आसनाद्यर्घ्यसंस्कारपर्य्यन्तं कर्म संचरेत् ।। ५४ ।।
पद्ममुद्रां प्रदर्श्याथ नवशक्तिं प्रपूजयेत् ।
श्वेता पीताऽरुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ।। ५५ ।।
रुचिरा ज्वालिनी चेति नवशक्तिरुदाहृता ।
गन्धादिभिः समभ्यर्च्य ताश्च भूपतिसत्तम ।। ५६ ।।
चतुर्थ्यन्तं नमस्कुर्य्याद्देवतानां च नामधृक् ।
ततो बह्निस्वरूपं हि ध्यायेदाचार्य्यसत्तमः ।। ५७ ।।
राजद्दिव्यास्ययुग्मं ऋजुनयनधरं पिङ्गलं सप्तहस्तं
चञ्चत्पादत्रयाढ्यं त्रिगुणकृतिमहामेखलं सप्तजिह्वम् ।
बालादित्यप्रकल्पं रुचिरतरचतुः शृङ्गमत्युग्रमेषा
रूढं यज्ञोपवीतस्फुरितनिजतनुं सज्जटाजूटजुष्टम् ।। ५८ ।।
अक्षमालां च शक्तिं च स्रुक्स्रुवौ दक्षबाहुषु ।
तोमरं व्यजनं चैव घृतपात्रं महोदयम् ।। ५९ ।।
वामबाहुषु दक्षेषु दधानं मुकुटोज्ज्वलम् ।
पाचकं तादृशं श्रीमान् चिन्तयेद्देशिकोत्तमः ।। ६० ।।
वामभागे स्वधा तस्य स्वाहा देवी च दक्षिणे ।
सर्वकर्मसु तं वह्निं तादृशं चिन्तयेन्नरः ।। ६१ ।।

दक्षिणे ब्रह्मणः स्थानं प्रणीतामुत्तरे तथा ।
उत्तराग्रं ततः पूर्वं पूर्वाग्रं दक्षिणे तथा ।। ६२ ।।
पश्चिमे चोत्तराग्रं च पूर्वाग्रमुत्तरे पुनः ।
इत्थं वन्ह्नेः प्रकुर्वीत परिस्तरणकर्म तत् ।। ६३ ।।
कुशैरशेषफलदैः पात्रासादनमेव च ।
कुर्य्यादुत्तरसंस्थं तत्पवित्रच्छेदनं तथा ।। ६४ ।।
कुशत्रयेण नृपते ब्रह्मग्रन्थिं समाचरेत् ।
कुशस्य द्विदलेनैव पवित्रे सूत्रवेष्टिते ।। ६५ ।।
कुर्य्याद्वै प्रोक्षणीपात्रविधानं देशिकोत्तमः ।
यज्ञात् पूर्वं सर्वमेतद्विधेयं स्थिरचेतसा ।। ६६ ।।
आज्यस्थाली तैजसी वा मृण्मयी योग्यतावशात् ।
त्रयः कुशा मार्जने स्युस्ततश्च धरणीधव ।। ६७ ।।
कुर्य्यात्तथोपयमनकुशांश्च सप्तभिः कुशैः ।
तिस्त्रश्च समिधः कार्य्यः प्रादेशपरिनिर्मिताः ।। ६८ ।।
आशादयेच्छ्रुवं तावद् गव्यमाज्यं च देशिकः ।
अष्टमुष्टिर्भवेत्कुञ्चः कुञ्चस्याष्टौ च पुष्कलम् ।। ६९ ।।
चतुःपुष्कलको राजन् पूर्ण्णपात्रं विदुर्बुधाः ।
आसादयेत्पूर्ण्णपात्रं तादृशमृषिभाषितम् ।। ७० ।।
दत्त्वा पवित्रं च ततः पवित्रच्छेदनोपरि ।
दक्षिणावर्त्तिभावेन वेष्टयेत्तदनन्तरम् ।। ७१ ।।
अग्रं प्रादेशमात्रं तत्पवित्रछेदनं चरेत् ।
प्रोक्षण्युपरि संस्थाप्य गृहीत्वा प्रणीतोदकम् ।। ७२ ।।
प्रोक्षणीं पूरयित्वा तु प्रोक्षणीपात्रतः पुनः ।
पवित्रेण चरेद् विद्वान् तज्जलोत्पवनं नृप ।। ७३ ।।

प्रोक्षणीं सव्यहस्ते च कृत्वाऽनामिकया पुनः ।
अङ्गुष्ठया च दक्षस्य करस्योद्दिङ्गनं जले ।। ७४ ।।
प्रणीतोदकतो भूपः प्रोक्षयेत्प्रोक्षणीजलैः ।
ताभ्यामेव पवित्राभ्यामर्चको यतमानसः ।। ७५ ।।
अग्निप्रणीतयोर्मध्ये तत्रासंचरते स्थले ।
प्रोक्षणीस्थापनं कुर्य्यादाज्यस्थाल्यां ततः परम् ।। ७६ ।।
आज्यनिर्वाप एव स्यादाज्याधिश्रयणं ततः ।
पर्य्यग्निकरणं कुर्य्यादुदकस्पर्शनं तथा ।। ७७ ।।
श्रुवप्रतपनं कार्य्यं सम्मार्जनकुशैः श्रुवम् ।
प्रमार्जयेन्मूलतोऽग्रपर्य्यन्तं पूजकोत्तमः ।। ७८ ।।
प्रणीतोदकतस्तस्य श्रुवस्याभ्युक्षणं चरेत् ।
पुनः श्रुवप्रतपनं भूमौ तस्य निवेशनम् ।। ७९ ।।
आज्योद्वासनमाकुर्य्यादग्नेरुत्तरतः पुनः ।
आनीय स्थापनं तस्य त्रिवारमिति योगतः ।। ८० ।।
ततः पवित्रमादाय तदाज्योत्पवनं चरेत् ।
त्रिवारतस्तदा कार्य्यमाज्यावेक्षणमुत्तमम् ।। ८१ ।।
नियोजनं श्रुवस्यापि प्रोक्षिण्युत्पवनं ततः ।
पवित्रस्थापनं तत्र सव्यहस्ते कुशान् न्यसेत् ।। ८२ ।।
धृत्वाथ हस्ते वामेऽपि चोत्तिष्ठन् समिधः क्षिपेत् ।
आचार्य्यो ब्रह्मणा स्पृष्टो होमं कुर्य्यादुदारधीः ।। ८३ ।।
धृत्वा पवित्रसंयुक्तं प्रोक्षणीजलमादरात् ।
ईशानकोणादारभ्य तदन्तं पावकस्य च ।। ८४ ।।
पर्य्युक्षणं चरेद्धीमान् प्रणीतायां पवित्रकम् ।
स्थापयेन्नृपतिश्रेष्ठ होमकर्मविचक्षणः ।। ८५ ।।

एष ह देवइत्येवं मन्त्रमुच्चार्य्य मन्त्रवित् ।
ओं श्रुवमूले स्थितो ब्रह्मा श्रुवमध्ये हरिस्तथा ।। ८६ ।।
नीलकण्ठोऽस्ति कण्ठेऽस्य तत्स्थानं तन्न धारयेत् ।
चतुरङ्गुलमुत्सृज्य धारयेत् शङ्खमुद्रया ।। ८७ ।।
होममुद्रात्रयं कुर्य्यान्मृगी हंसी च शूकरी ।
प्रजापतिं च मामिन्द्रमग्निषोमं क्रमाद्धुनेत् ।। ८८ ।।
पुण्याहवाचनं कृत्वा नवाहुतिमतः परम् ।
भूरादिकं हुनेन्मन्त्री राष्ट्रहोमं चरेत्ततः ।। ८९ ।।
अष्टाक्षरेण मन्त्रेण शतमष्टोत्तरं हुनेत् ।
अभावेऽपि तदर्द्धं स्यात्तस्याभावे तदर्द्धकम् ।। ९० ।।
तेनैव मनुना राजन् समिद्भिश्च शतं हुनेत् ।
पूर्णाहुतिकृते तावत्पात्रासादनमादरात् ।। ९१ ।।
आज्यस्थाली त्रयो दर्भास्तथा दर्भाः पुनः पुनः ।
श्रुवं स्रुचं च संन्यस्य थैकां समिधं न्यसेत् ।। ९२ ।।
आज्यं तदाज्यस्थाल्यां वै त्वाज्यनिर्वापणं चरेत् ।
आज्याधिश्रयणं कुर्य्यात्पर्यग्निकरणं ततः ।। ९३ ।।
आदितस्त्रितयनैव श्रुवस्य मार्जनं चरेत् ।
अपरैश्च त्रिभिर्दर्भैस्तदाज्योत्पवनं चरेत् ।। ९४ ।।
आज्यावेक्षणमेवं च श्रुवेण स्रुचि भूपते ।
चतुराहुतिमापूर्य्य नारिकेलफलं पुनः ।। ९५ ।।
दत्त्वा तत्रैव समिदाधानं कुर्य्याद्विचक्षणः ।
मूर्द्धानमिति मन्त्रेण वह्नौ पूर्णाहुतिं हुनेत् ।। ९६ ।।
अग्नेर्विसर्जनं कृत्वा प्रणीता ब्रह्मणस्तथा ।
अच्छिद्रावधृतिं कुर्य्याद्देवतानामतः परम् ।। ९७ ।।

सर्वासां पूजनं कार्य्यमग्निशर्मा च पूर्ववत् ।
कुर्य्याद्वन्दापनं राजन्नाशु शुशानमन्त्रतः ।। ९८ ।।
वद्धमेषे गृहे तत्र वह्निक्षेपं समाचरेत् ।
ज्वलितेऽग्नौ ततः शीघ्रं बहिर्मेषं समानयेत् ।। ९९ ।।
सप्तवारं तदा वह्निं प्रत्यर्च्चां भ्रामयेन्नृप ।
समानीय निजस्थाने स्थापयेत् प्रतिमाश्च ताः ।। १०० ।
एवं वह्न्युत्सवं कुर्य्याद्दद्यादाचार्यदक्षिणाम् ।
दोलमण्डपनिर्माणं कथयाम्यवधारय ।। १०१ ।।
एतत्प्रासादपूर्वे हि मण्डपः शोभनोदयः ।
विभासत्षोडशस्तम्भो विस्तीर्ण्णश्चूर्ण्णलेपितः ।। १०२
पाषाणरचितो दिव्यो राजदाकाशमण्डनः ।
चामराम्बरशोभाढ्यो वितानोत्करसुन्दरः ।। १०३ ।।
शुककोकिलहंसालिप्रमुखैः कृत्रिमैः खगैः ।
राजमानः समन्ताद् वै पश्यज्जनमनोहरः ।। १०४ ।।
नारिकेलफलैः पुष्पैः पनसैः कदलीफलैः ।
नागरङ्गैश्च जम्बीरैर्वन्द्यैरन्यैः फलैस्तथा ।। १०५ ।।
जम्बुपल्लवजालैश्च रसालफलसंचयैः ।
सर्वत्र तत्र शोभां च कुर्य्यात्कार्य्यविचक्षणः ।। १०६ ।।
एतादृशं नृपश्रेष्ठ कुर्य्यादुच्चैश्च मण्डपम् ।
समन्तात्परमां शोभां मण्डपस्य चरेन्नृप ।। १०७ ।।
विस्तीर्ण्णे मण्डपे तत्र दिव्यसोपानभूषिते ।
वेदीद्वयं महीपालकुर्य्याच्चारुतरं परम् ।। १०८ ।।
तत्रोपरि परिभ्राजन्नानारत्नसमाकुला ।
तोरणा रुचिरा कार्य्या गोविन्दप्रीतिकारिणी ।। १०९ ।।

तत्र दोलागततुलां नानारत्नसमुज्ज्वलाम् ।
दिव्यनव्याम्बरवृतां योजयेन्नृपसत्तम ।। ११० ।।
तत्र भद्रासनं रम्यं श्रीपर्ण्णिकाष्ठनिर्मितम् ।
स्थापयेत्तुलिकायुक्तमुपधानीसमन्वितम् ।। १११ ।।
चतुर्द्दशीदिनस्यापि रात्रेः पञ्चमयामतः ।
गोविन्दनामप्रत्यर्च्चां नीत्वा विष्ण्वन्तिके न्यसेत् ।। ११२ ।।
लाजाविकाररजं दिव्यं नारिकेलविकारजम् ।
एतादृशं च नैवेद्यं काले तस्मिन्निवेदयेत् ।। ११३ ।।
पूजावसाने राजेन्द्र क्षालयेद्देवतापुरः ।
पूजकः प्राञ्जलिर्भूत्वा प्रार्थयेच्छुद्धमानसः ।। ११४ ।।
देव देव नमस्तेऽस्तु जगन्नाथ नमोऽस्तु ते ।
नानावतारलीलाभूर्नीलाचलपते नमः ।। ११५ ।।
आज्ञां देहि जगन्नाथ प्रत्यर्च्चां प्रति संप्रति ।
कमलां विश्वधात्रीं च दोलाक्रीडनहेतवे ।। ११६ ।।
इति संप्रार्थ्य देवेशं तदङ्गान्माल्यमाहरेत् ।
प्रत्यर्च्चां कमलां पृथ्वीं पूर्ववद्वितरेद्बुधः ।। ११७ ।।
प्रत्यर्च्चा सा महीनाथ जगन्नाथस्त्रगर्चिता ।
ब्रह्मणा सकला मूर्त्तिर्जगत्त्रयसुपाविनी ।। ११८ ।।
तस्याः प्रतिकृतेर्भूप विष्णोस्तस्य परात्मनः ।
नास्ति भेदो जगत्यस्मिन् सत्यं सत्यं न संशयः ।। ११९ ।।
अर्चायां विन्यसेन्मन्त्रं परं याति विभावयन् ।
ततः सा प्रतिमा ह्यत्र जायते जगदीश्वरः ।। १२० ।।
ततो गोविन्दमानन्दाद्विश्वधात्रीं रमां तथा ।
सप्तवारं भ्रामयेद् वै देवानभि नृपोत्तम ।। १२१ ।।

द्वितीयावरणस्यैवाभ्यन्तरे यत्र कुत्रचित् ।
शालायां च निवेश्याथ तां तु भद्रासनोपरि ।। १२२ ।।
पञ्चामृतेन तेनैव स्नापयेच्च पृथक् पृथक् ।
तस्यैवान्यतमेनापि स्नपनं रचयेत् प्रभोः ।। १२३ ।।
श्रीसूक्तं च समुच्चार्य्य गन्धतोयेन तां पुनः ।
स्नापयेदतियत्नेन प्रोच्छयेन्नववाससा ।। १२४ ।।
वस्त्रालङ्कारमाल्याद्यैर्भूषयेद्देवतास्ततः ।
पञ्चोपचारतः पूजां कुर्य्यादार्य्यजनोत्तमः ।। १२५ ।।
वन्दापनां प्रकुर्वीत यथाविधितया तदा ।
दिव्ये विमाने संस्थाप्य महोत्सवतया नृप ।। १२६ ।।
भ्रामयेत्सप्तशो भक्त्या प्रासादोपरितस्तदा ।
घण्टामृदङ्गढक्कादिवाद्यजालध्वनिर्भवेत् ।। १२७ ।।
शङ्खानां मधुरीणां च काहालानां च निःस्वनम् ।
करतालावलिस्तावत्पताकावलिजृम्भणम् ।। १२८ ।।
चारुचामरवृन्दस्य पतनं च समन्ततः ।
जयशब्दः स्तवपाठस्तथैव पुष्पवर्षणम् ।। १२९ ।।
चन्द्रदीपैर्मनोरम्यैरन्यैर्दीपसहस्रकैः ।
निवारिततमः कुर्य्याद्दोलाकेलिमहोत्सवे ।। १३० ।।
श्वेतछत्रं तथा कृष्णं धारयेद्धरणीधव ।
मेघाडम्बरविख्यातमातपत्रं च धारयेत् ।। १३१ ।।
परीक्षकस्तु पुरतः स्वर्ण्णवेत्रधरस्तदा ।
वाराङ्गनाश्च नृत्यन्त्यो भविष्यन्ति च भूषिताः ।। १३२ ।।
एवं महोत्सवं कृत्वा दोलामण्डपसन्निधिम् ।
नीत्वा तन्मण्डलस्याधो भ्रामयेत्तच्च सप्तशः ।। १३३ ।।

ऊर्ध्ववेदीं समालम्ब्य सप्तशो भ्रामयेत्पुनः ।
तदूर्ध्ववेद्यां तां दोलां भ्रामायित्वा च सप्त वै ।। १३४ ।।
तत्र दोलान्तरे दिव्ये वासयेद्दक्षिणामुखम् ।
केतकीच्छत्रयुगलमुभयोः पार्श्वतो न्यसेत् ।। १३५ ।।
ऊर्ध्वदेशे वितानं तु केतकीचयनिर्मितम् ।
मल्लिकाशोकवकुलपुन्नागचम्पकैर्वृतम् ।। १३६ ।।
मत्तभ्रमरझङ्कारस्स्वान्तोल्लसिकरं न्यसेत् ।
अतः परं महाराज पूजक शुद्धिमत्तरः ।। १३७ ।।
प्रातस्तेषां च देशानामङ्गतो माल्यमम्बरम् ।
बहिष्कृत्य पुनः शीघ्रं पूजयेत्परमेश्वरम् ।। १३८ ।।
नानालङ्कारसंयुक्तं कुर्य्यादाचार्य्यसत्तमः ।
ततो देवाग्रतः शीघ्रं मध्यवेद्यां नृपोत्तम ।। १३९ ।।
क्षालयित्त्वा च तत्रैव मेखलात्रयमालिखेत् ।
तत्र धौताम्बरं शीघ्रं निपात्य तत्पुरः पुनः ।। १४० ।।
अंशुकावरणं कुर्य्यात्पुनश्च परितो नृपः ।
स्तम्भानावृत्य यत्कुर्य्याद् यत्नादाच्छादनं तदा ।। १४१ ।।
लाजानां नारिकेलानां शर्कराणां विकारजम् ।
पयसां शर्कराणां च तिलानां सुखदायिनाम् ।। १४२ ।।
विकारजं च नैवेद्यं कर्त्तव्यं नृपसत्तम ।
दिव्यरम्भाफलैश्चैव पयःपेटिसमुद्भवैः ।। १४३ ।।
इक्षुखण्डसमूहैश्च नवीनाम्रफलैस्तथा ।
तादृशं वरनैवेद्यं प्रतिहारैः समन्ततः ।। १४४ ।।
भक्ष्यमाणं महीनाथ चरुहोता समानयेत् ।
वस्त्राच्छादितवक्त्रश्च नैवेद्याहरणे नृप ।। १४५ ।।

ततो यत्यादयः केऽपि न विशेयुश्च तत्र वै ।
तत्र नीत्वा मेखलान्ते नैवेद्यं स्थापयेद्द्विजः ।। १४६ ।।
बहिर्निरोधने तत्र नैवेद्ये स्थापिते सति ।
प्रमादाच्चेद्विशेत्कोऽपि तन्नैवेद्यं बहिः क्षिपेत् ।। १४७ ।।
तथाग्निशर्मा राजेन्द्र गन्धदामनकं स्रजम् ।
पीतवस्त्रद्वयं तावत् फल्गुपुञ्जं मनोरमम् ।। १४८ ।।
केतकीवकुलाशोकमल्लीपुन्नागचम्पकैः ।
रचितं चारुमाल्यं च गोविन्दाय समर्पयेत् ।। १४९ ।।
पात्रहोतुरितः पीठे श्रीपर्णिकाष्ठनिर्मिते ।
पूजार्थं पूजकस्तत्र वसेत्संयतमानसः ।। १५० ।।
चतुर्विंशतिसंख्यातैरुपचारैर्मनोहरैः ।
पूर्ववत्पूजयेद्विष्णुं नीराजनसमन्वितैः ।। १५१ ।।
त्रयोदशाक्षरेणाष्टादशाक्षरत एव वा ।
मन्मथस्य च लक्ष्म्याश्च मायया बीजकत्रयम् ।। १५२ ।।
दशाक्षरेण संयोज्य प्रथमं पूजयेत्ततः ।
बीजं श्रीकाममायानां समुच्चार्य्य प्रयत्नतः ।। १५३ ।।
तेनैव मनुना मध्ये पूदजयेद्देशिकोत्तमः ।
तृतीयपूजने बीजं मायाया मन्मथस्य च ।। १५४ ।।
रमायाश्च दशार्ण्णेन युक्त्या संपूजयेत्सुधीः ।
एतन्मन्त्रवरस्यास्य ऋषिर्ब्रह्मा त्वहं नृप ।। १५५ ।।
गायत्रीछन्द एव स्याद्देवो नारायणः स्मृतः ।
स्मरोबीजं प्रिया वह्नेः शक्तिः क्षितिभृतां वर ।। १५६ ।।
चतुर्वर्गफलप्राप्त्यै विनियोगो निगद्यते ।
आचक्रादिश्च पञ्चाङ्गमस्य मन्त्रवरस्य च ।। १५७ ।।

दशाक्षरस्य यन्न्यासं कुर्य्याद्ध्यानं विना द्विजः ।
तन्मन्त्रावरणं कुर्य्याद्देवतानां च पूजनम् ।। १५८ ।।
पूजासमयमारभ्य स्वर्ण्णवेत्रधरशुचिः ।
तव प्रतिनिधिस्तिष्ठेद्घण्टादीनां ध्वनिर्भवेत् ।। १५९ ।।
तौर्य्यत्रिकं तदा कुर्य्याच्छत्रचामरधारणम् ।
महोत्सवं प्रकुर्वीत विष्णोः पूजनकर्मणि ।। १६० ।।

इन्द्रद्युम्न उवाच

ध्यानं विना कथं पूजा कर्त्तव्यासौ त्वया प्रभो ।
कथमुक्तमिति क्षिप्रं कथयाम्बुजसम्भव ।। १६१ ।।

ब्रह्मोवाच

ध्यानं तथा स्यान्नृपते दोलाकेलिसमर्च्चने ।
निशामयरहस्यं तद्गोविन्दप्रीतिदायकम् ।। १६२ ।।
ध्यायेत्केलिकदम्बमूलनीलयं वृन्दावनं शोभने
नानापुष्पलतावितानमधुरे चञ्चत्पिकालिस्वरे ।
कालन्दीजलशीकराञ्चितमरुत्संसेव्यमाने धने
क्रीडन्तं नवमञ्जुगोपरमणीजुष्टं सहृष्टान्तिकम् ।। १६३ ।।
नीलेन्दीवरसुन्दरं सुनयनं चन्द्राननं पावनं
बन्धूकाधरसम्मितं परिलसद्भूषावलीवेष्टितम् ।
चञ्चच्चक्रगदाब्जशङ्खविलसद्धस्तारविन्दं लसद्
वेणुं पीततरांशुकं सुमधुरं दोलायमानं परम् ।। १६४ ।।
पद्माक्ष्मासहितं सुवर्ण्णमुकुटं प्रद्योतमानं सुरैः
गन्धर्वैर्मुनिपुङ्गवैः सरभसं प्रस्तूयमानं सदा ।
राजद्गोरजसञ्चितं दिनमणिव्यूहप्रभाभास्वरं
कन्दर्पार्वुदसुन्दरं सुचतुरं गोविन्दमानन्ददम् ।। १६५ ।।

एवं ध्यात्वा नृपश्रेष्ठ गोविन्दं मोक्षदायकम् ।
पूजयेत्परया भक्त्या दोलाकेलिदिनेऽर्च्चकः ।। १६६ ।।
पूजावसाने नृपते तन्नीराजनतः पुनः ।
कर्पूरवर्त्ति राजेन्द्र संप्रदर्श्य ततः पुनः ।। १६७ ।।
फल्गुत्रिविधमाक्षिप्य चामरं चालयेत्स्वयम् ।
व्यजनं च तथा कुर्य्याद्भक्त्या पुष्पाञ्जलिं नृप ।। १६८ ।।
प्रार्थयेत्त्वं तदा भक्त्या गोविन्दं सर्वकामदम् ।
नमस्तुभ्यं सुरश्रेष्ठ जगदानन्दकारक ।। १६९ ।।
नानावतारलीलाभिर्लोकानां च हितं चरन् ।
दुष्टानां नाशनार्थाय पालनार्थं सतां प्रभो ।। १७० ।।
प्रकाशय नमस्तुभ्यं गोविन्दाय नमो नमः ।
इदानीं त्वां जगन्नाथ चारुदोलान्तरे स्थितम् ।। १७१ ।।
दोलयामि महावाहो अपराधं क्षमस्व मे ।
इति संप्रार्थ्य देवेशं दद्यात्पुष्पाञ्जलित्रयम् ।। १७२ ।।
ततः शनैः शनैर्देवान् सप्तकृत्वस्तु दोलयेत् ।
दोलायमाने गोविन्दे जगत्त्रयजनास्तदा ।। १७३ ।।
जयशब्दं प्रकुर्य्याशु स्तुतिपाठपुरःसरम् ।
पूर्ववन्मध्यदोलां हि कुर्य्यादवनिपालक ।। १७४ ।।
एवं तृतीयदोलान्ते सोऽग्निशर्मा च पूर्ववत् ।
वन्दापनां तदा कुर्य्यात्तदन्ते नृपसत्तम ।। १७५ ।।
नीराजनान्ते तत्रैव प्रविशेद्भक्तितो भवान् ।
नववस्त्रद्वयं धृत्वा कराभ्यां प्रणमेत्ततः ।। १७६ ।।
कृताञ्जलिपुटो भूत्वा भक्त्या भगवतः पुरः ।
ततोऽग्निशर्मा सहसा संप्रार्थ्य परमेश्वरम् ।। १७७ ।।

पूर्ववद्दोलयेन्नन्दं गोविन्दं सुरसेवितम् ।
ततः परं प्रभोरङ्गान्माल्यादिं च समर्पयेत् ।। १७८ ।।
तत्प्राप्य कृतकृत्योऽहमित्युक्त्वा हृष्टमानसः ।
ततः पुष्पाञ्जलिं दत्त्वा नीराजनमथाचरेत् ।। १७९ ।।
कर्पूरवर्त्त्या कुर्य्यात्तु चारुचामरचालनम् ।
व्यजनैस्तालवृन्तैश्च वीजयेद्भक्तितो भवान् ।। १८० ।।
मण्डपस्य समन्ताद् वै मर्द्दयेच्चन्दनाम्भसा ।
सेचयेत्तद्रजो भूयः क्षिपेन्मण्डपसर्वतः ।। १८१ ।।
ततः स्तुतिं समाकुर्य्यात्प्रणिपातपुरःसरम् ।
नमस्ते देवदेवेश हृषीकेश नमोऽस्तु ते ।। १८२ ।।
गोविन्द परमानन्द मुकुन्द परमेश्वर ।
लोकानुग्रहणार्थाय नानालीलास्त्वया धृताः ।। १८३ ।।
कंसादयो हताः सर्वे राक्षसलोकहिंसकाः ।
येन त्वया जगन्नाथ गोविन्दाय नमोऽस्तु ते ।। १८४ ।।
पूतना निहता येन हिंसितः शकटश्च वै ।
येन वृन्दावने क्रीडाः कृतास्तस्मै नमो नमः ।। १८५ ।।
एवं बहुविधैः स्तोत्रैः पवित्रैः परमेश्वरम् ।
स्तुत्वा तं प्रणमेद्भक्त्या भवान् वै भक्तवत्सलम् ।। १८६ ।।
अथाग्निशर्मा सहसा देवाङ्गादवतार्य्य तत् ।
वस्त्रमाल्यादिकं तुभ्यं दास्यति क्षितिपोत्तम ।। १८७ ।।
अथ देवान् भ्रामयेत्तां सप्तवारं च दोलिकाम् ।
मध्यवेदीं सप्तवारं भ्रामयित्वा तु मण्डपे ।। १८८ ।।
दक्षिणस्यां स्थापयित्वा कुर्य्याद्वन्दापनां द्विजः ।
पूर्ववदग्निशर्मा च भक्तिभावसमन्वितः ।। १८९ ।।

अधोभागे समानीय चक्रपाणिं सुरेश्वरम् ।
पुनस्तं भ्रामयेद्दोलामण्डपं नृप सप्तशः ।। १९० ।।
दिव्ये विमाने संस्थाप्य महोत्सवतया ततः ।
आनीय सप्तवारं तं प्रासादं भ्रामयेत्पुनः ।। १९१ ।।
भ्रमणान्ते पुनस्तस्य प्रासादस्य तु पश्चिमे ।
शीतद्रव्यैश्च नैवेद्यं दत्त्वा वन्दापनां चरेत् ।। १९२ ।।
ततो देवोत्तमपुरः स्थापयेत् प्रतिमाश्च ताः ।
पूर्ववच्च प्रकुर्वीत तद्वन्दापनकर्म वै ।। १९३ ।।
प्रत्यर्च्चाशतमत्युग्रं तत्तेजः परमेश्वरे ।
स्नापयित्वा प्रतिकृतिं स्थापयेन्निजवेश्मनि ।। १९४ ।।

सूत उवाच

शौनकाद्या महीदेवा ब्रह्मणा कथितं यथा ।
इन्द्रद्युम्नस्तु राजर्षिस्तत्तथैव समाचरेत् ।। १९५ ।।
ये मर्त्त्या भक्तिभावेन क्षेत्रे श्रीपुरुषोत्तमे ।
तादृशां कमलाभर्त्तुः दोलाकेलिमहोदयाम् ।। १९६ ।।
पश्यन्ति तेषां नो जन्म जगत्यस्मिन् सुदुःखदम् ।
सर्वकामप्रदां यात्रां दोलाख्यां धरणीसुराः ।। १९७ ।।
दृष्ट्वा लभन्ते परमं शर्म गोविन्ददर्शनात् ।
दोलार्थं परिगच्छन्तं गोविन्दं ये च मानवाः ।। १९८ ।।
पश्यन्ति तेषां पूर्ण्णाः स्युः सद्यः सर्वमनोरथाः ।
दोलायमानं गोविन्दं ये पश्यन्ति मुहुर्मुहुः ।। १९९ ।।
सर्वतीर्थाटनफलं लब्ध्वा मुक्ता भवार्ण्णवात् ।
प्रथमां ये च पश्यन्ति दोलाकेलिं जगत्पतेः ।। २०० ।।
तेषां वै जायते धर्मः सुखहेतुः समानतः ।
दोलाकेलीर्मुराराते द्वितीया नामधारिणी ।। २०१ ।।

हेलया लोकिता यैस्तैर्लभ्यन्तेऽर्था न संशयः ।
एतदेव प्रपश्यन्ति दोलाकेलित्रयं च ये ।। २०२ ।।
भुक्त्वा शर्मपरं त्वत्तः शेषे मोक्षमवाप्नुयुः ।
दक्षिणाभिमुखस्यास्य गोविन्दस्य जगत्पतेः ।। २०३ ।।
वन्दापनां सकृद्दृष्ट्वा न पुनर्जायते जनिः ।
विमाने वापि दोलायामकस्मात्पतनं हरेः ।। २०४ ।।
तदा राज्ये भयं घोरं राजा नश्येन्न संशयः ।
दुर्भिक्षं मरणं चैव सज्जनानां च संक्षयः ।। २०५ ।।
अधिकारवतामेव नाशः स्याद्धरणीसुराः ।
तस्माद् बहुविधां शान्तिं राजा भक्त्या च कारयेत् ।। २०६ ।।
राज्यस्य कुशलार्थं वै निजस्य च मुनीश्वराः ।
दारुब्रह्मप्रसादेषु या मतिर्जायते द्विजाः ।। २०७ ।।
प्रत्यर्च्चानां प्रसादेषु तथा विश्वासमाचरेत् ।
आज्ञामाल्यप्रदानेन तासां च ब्रह्मणा द्विजाः ।। २०८ ।।
भेदो नास्ति यथा नूनं तत्प्रसादः सुपावनः ।
महाप्रसादे विष्णौ च तथा नामसु भूसुराः ।। २०९ ।।
विश्वसन्ति महासत्त्वाः त्रिष्वेतेषु पुनः पुनः ।
स्वल्पपुण्यवतो जन्तोर्विश्वासो नापि जायते ।। २१० ।।
भूमिदेववराः सुरोत्करवरो ब्रह्मा पुराप्यादरा-
दिन्द्रद्युम्नमहीपतिं प्रतिविभोर्यामाह यात्रोत्तमाम् ।
दोलाकेलिममुं च तां भगवतः पश्यन्ति ये श्रद्धया
तेषां नास्ति महीतले विपदणुर्मुक्तिश्च नो दुर्लभा ।। २११ ।।

इति श्रीसूतसंहितायां श्रीनीलाद्रिमहोदये श्रीशौनकादिमुनिसूतसंवादे दोलयात्रावर्णनं नाम चतुस्त्रिंशोऽध्यायः ।।

पञ्चत्रिंशोऽध्यायः

ब्रह्मोवाच

चैत्रे मासि महाविष्णोर्नानालीलालयस्य याः ।
यात्रा स्युस्ताश्च वक्तव्याः श्रूयतामेकचेतसा ।। १ ।।
चैत्रे शुक्लाष्टमी यावत्तिथिः स्याददतिथिप्रिय ।
तद्दिनेऽपि मुराराते: सायं पूजावसानतः ।। २ ।।
कौशल्यायाश्च शान्त्यर्थं क्षालितान्नं च पायसम् ।
नानाव्यञ्जनसंयुक्तं नानापूपसमाकुलम् ।। ३ ।।
तन्नैवेद्यं समर्प्याशु यजेत्तं चन्दनादिना ।
वन्दापयेत्तदा भक्त्या पूर्ववत्तं परन्तप ।। ४ ।।
नवम्यां च तिथौ प्रातः पूजान्ते पूजकोत्तमः ।
महास्नाविधौ स्नायात्परमेशं चतुःसमैः ।। ५ ।।
लेपयेदतियत्नेन नवीनाम्बरमाल्यकैः ।
सुन्दरैस्तैरलङ्कारैर्यथायोग्यं सुभूषयेत् ।। ६ ।।
ततो मध्याह्नपूजां च कुर्य्याद्विधिवदादरात् ।
ततो रामप्रतिकृतिं जगदीशान्तिके न्यसेत् ।। ७ ।।
सर्वरूपधरः श्रीमान् नीलभूधरमन्दिर ।
नमस्ते जगतां नाथ जगज्जनमहार्त्तिहन् ।। ८ ।।
आज्ञापय महबाहो रामजन्मोत्सवाय वै ।
रामप्रतिकृतिं तावद्रावणादिविनाशिनीम् ।। ९ ।।
इति विज्ञाय देवेशं तदङ्गादर्चकः पुनः ।
माल्यमानीय तद्दद्यात् प्रत्यर्चां प्रति भूपते ।। १० ।।
निरोधनगृहाग्रेऽथ लिखेद्राघवमण्डलम् ।
आचार्य्यः सूत्रहस्तः स्याच्चतुरस्रं लिखेत्पुरः ।। ११ ।।

तिर्य्यगूर्ध्वक्रमान्मध्ये अष्टाधिकदशान्विताः ।
रेखाश्च तादृशा भूयो विलिख्य च यथाक्रमम् ।। १२ ।।
चतुष्कोणानि शुक्लानि कर्त्तव्यानि त्रिभिस्त्रिभिः ।
इन्दुवन्नृपतिश्रेष्ठ कुर्य्यादाचार्य्यसत्तमः ।। १३ ।।
पञ्चकोष्ठिषु राजेन्द्र शृङ्खला कृष्णवर्णभाक् ।
एकादशपदैर्वल्ली श्यामवर्ण्णा भवेत् शुभा ।। १४ ।।
भद्रं रक्तं विधातव्यं पदैश्च नवभिस्तदा ।
वापी शुक्ला च कर्त्तव्या चतुर्विंशतिभिः पदैः ।। १५ ।।
परिधिः पीतवर्ण्णः स्यात्पदैर्विंशतिसंख्यकैः ।
कलासंख्यासु कोष्ठीषु पङ्कजं पूर्ववल्लिखेत् ।। १६ ।।
अर्द्धाङ्गुलप्रमाणेन कोष्ठीनां कल्पनां चरेत् ।
पूर्वद्वारं समालिख्य पश्चिमे कलशं पुनः ।। १७ ।।
पताकाचक्रसहितं लिखेन्मण्डलकर्म वित् ।
दक्षिणोत्तरदिग्भागे वसुकोणं लिखेत्तदा ।। १८ ।।
चतुःकोणे नृपश्रेष्ठ कुर्य्यात्कीराकृतिं बुधः ।
एवं मण्डलमालिख्य रामस्य प्रीतिदायकम् ।। १९ ।।
ख्यातं राघवनामानं पश्यतां विस्मयप्रदम् ।
रामजन्मनि भो भूप प्रशस्तं मण्डलं त्विदम् ।। २० ।।
अन्यथा चेत्तदा पूजा निष्फला स्यान्न संशयः ।
प्रत्यर्च्चां मण्डले तत्र वासयित्वा ततोऽर्चकः ।। २१ ।।
कुर्य्याद् वरुणपूजां स त्वग्निशर्माणमादरात् ।
संकल्पयति राजर्षे सोऽग्निशर्मा पुनस्तदा ।। २२ ।।
आचार्य्यब्रह्मवरणं कुर्य्याद्वै क्रमतो मुदा ।
पुण्याहवाचनं कुर्य्यादाचार्य्यश्च पुनर्नृप ।। २३ ।।

सुवर्ण्णरचितां रामप्रतिमां सुमनोरमाम् ।
पञ्चामृतेन संस्नाप्य कौशल्योदरसंस्थिताम् ।। २४ ।।
अर्चयित्वा तु तं रामं यजेद्गन्धादिना नृप ।
ततस्त्वेजतु मन्त्रेण गर्भोदकमनुत्तमम् ।। २५ ।।
दत्त्वा पात्रतले रामं जन्मप्राप्तं तु चिन्तयेत् ।
पीतवस्त्रद्वयं गन्धं दामदामनकं शुभम् ।। २६ ।।
अग्निशर्मा तदा दद्यात्पूर्ववत् पूजकोत्तमः ।
जलदोषोपशान्त्यर्थं वटिकानवनीतकम् ।। २७ ।।
आचार्य्योऽप्यग्निशर्मा च कुर्य्यात् कर्पूरवर्त्तिकाम् ।
एतदन्तेऽर्चकः श्रीमान् वसोर्द्धारां समाचरेत् ।। २८ ।।
ततो महोत्सवतया प्रत्यर्च्चां स्वपदे न्यसेत् ।
एतदुत्सवमौत्सुक्यान्मानवा ये मुहुर्मुहुः ।। २९ ।।
कुर्वन्ति विधिवद्भक्त्या कुर्वन्ति सुसमाहिताः ।
सर्वपापविनिर्मुक्ता लभन्ते ते हरेःपदम् ।। ३० ।।
द्वादश्यां च तिथौ सायं पूजान्ते नृपसत्तम ।
चतुरस्रा च पट्टस्य निर्मिता हस्तयुग्मतः ।। ३१ ।।
कर्त्तव्या विलिखेत्तत्र शम्बरारिं मनोहरम् ।
रक्तवर्ण्णं हस्तयोश्च धनुर्बाणान् दधत्स्मरम् ।। ३२ ।।
स्कन्धदेशे ते तूणीरं सशरं विलिखेत्सुधीः ।
तादृशं पट्टमानन्दात् पञ्चामृतरसैः शुभैः ।। ३३ ।।
स्नापयित्वा ततो वस्त्रैर्माल्यैश्च भूषयेत्ततः ।
गन्धादिना यजेत्तावदेवं पट्टाधिवासिनम् ।। ३४ ।।
कुर्य्यात्ततः त्रयोदश्यां दिवाभागे नृपोत्तम ।
पञ्चदण्डस्थिते काले निद्राभङ्गः श्रियःपते ।। ३५ ।।

निद्राभङ्गं विधायाशु रामकृष्णौ नयेत्पुनः ।
बलस्य जगदीशस्य समीपे त्वधिवासितम् ।। ३६ ।।
पट्टं च स्थापयित्वा तु प्रार्थयेत्पूजकोत्तमः ।
बलदेव नमस्तेऽस्तु नमस्ते मुषलायुध ।। ३७ ।।
नमस्ते रेवतीकान्त रोहिणीनन्दन प्रभो ।
वसन्तभ्रमणार्थायाहर्त्तुं दमनकोत्करम् ।। ३८ ।।
राममाज्ञापय क्षिप्रं हिताय जगतां परम् ।
इन्दीवरदलश्याम जगदीश रमापते ।। ३९ ।।
नानालीलावर श्रीमन् नमस्तुभ्यं नमो नमः ।
नमस्ते पद्मनेत्राय पद्मनाभाय ते नमः ।। ४० ।।
पद्मापते नमस्तुभ्यं पद्ममालिन् नमोऽस्तु ते ।
हर्त्तुं दामनकं वृन्दं गन्धव्याप्तदिगम्बरम् ।। ४१ ।।
वसन्तभ्रमिलीलायै कृष्णमाज्ञापय प्रभो ! ।
कन्दर्पस्तु सुरश्रेष्ठ पूज्यः स्याद्वै तवाज्ञया ।। ४२ ।।
एतदर्थं महाबाहो आज्ञापय रमाधव ! ।
इति विज्ञाप्य राजेन्द्र ! देवाङ्गान्माल्यमाहरेत् ।। ४३ ।।
रामं कृष्णं तथा कामं प्रतिदद्यात् पृथक् पृथक् ।
शिविकायां ततस्तौ तु रामकृष्णौ सुशोभनौ ।। ४४ ।।
वासयित्वा देवयाने ततस्तं पट्टमेव च ।
समारोप्य नयेत्पूर्वे दिव्यारामप्रदक्षिणैः ।। ४५ ।।
आचार्य्यः प्रथमं कुर्य्यात् प्राणिनो यजनं मुदा ।
कन्दर्पाग्रे वसन् धीमान् यथाविधि परन्तप ।। ४६ ।।
आग्निशर्माणमेवासौ संकल्पयति सादरम् ।
सप्त वा पञ्च वा कुर्य्याद्ब्राह्मणान् स्वस्तिवाचनम् ।। ४७ ।।

आचार्य्यवरणं कुर्य्याद् ब्रह्मणः वरणं तथा ।
अर्चकस्त्वग्नियजनं पात्रासादनमेव च ।। ४८ ।।
कृत्वा ततश्च जुहुयादाघारावाज्यभागकौ ।
भूरादिकां हुनेद्भूयो नवाहुतिमनिन्दिताम् ।। ४९ ।।
गायत्र्या कामदेवस्य सहस्रं संहुनेद् द्विजः ।
तदभावे तदर्द्धेन तस्याभावे शतत्रयम् ।। ५० ।।
घृताक्तः समिधस्तत्र शतमष्टोत्तरं हुनेत् ।
अशोककुसुमैस्तावत्सहस्रं जुहुयाद्बुधः ।। ५१ ।।
पूर्णाहुतिं ततो दत्त्वा कुर्य्यात्पुण्याहवाचनम् ।
एवं यदा महीनाथ होमकर्म समाचरेत् ।। ५२ ।।
आयुरारोग्यमैश्वर्य्यं सर्वत्र जय एव च ।
यजमानस्य राजेन्द्र कीर्त्तिवंशोदयो भवेत् ।। ५३ ।।
कामं पञ्चोपचारेण पूजयेत् पायसेन च ।
संपूज्य त्वग्निशर्मासौ तद्वन्दापनमाचरेत् ।। ५४ ।।
चामरव्यजने तावदग्निशर्मा समर्पयेत् ।
आचार्य्याय ततो दद्यात्स्वर्ण्णनिष्केण दक्षिणा ।। ५५ ।।
ततस्तौ रामकृष्णौ च पूजयेच्चन्दनादिना ।
वन्दापनां दामनकं वृक्षं संप्रार्थयेत्पुनः ।। ५६ ।।
पूजायै जगदीशस्य समीपं ते समागतः ।
नयामि त्वां दमनक प्रसन्नो भव साम्प्रतम् ।। ५७ ।।
पूजकस्त्विति संप्रार्थ्य पुष्पाञ्जलिमथो न्यसेत् ।
ॐ नमः कामाय मन्त्रं वदन् दमनकं हरेत् ।। ५८ ।।
एकैकं मूलसंयुक्तं द्रुमं दामनकं शुभम् ।
न्यसेत्कराम्बुजे भूप तयोश्च रामकृष्णयोः ।। ५९ ।।

पट्टेदेवं विसृज्याथ पात्रहोता च वाससा ।
आच्छादितमुखस्तावदेकविंशतिसंख्यकान् ।। ६० ।।
सप्त सप्त द्रुमान् दिव्यान् वाससाच्छादितान् तथा ।
महोत्सवतया चाग्रे रामकृष्णौ च पृष्ठतः ।। ६१ ।।
प्रासादं प्रति भूपाल ! नयेत्तान् दमनोत्करान् ।
स्वपदे रामकृष्णौ तौ न्यसेत्तत्र मनोरमे ।। ६२ ।।
प्रासादपूर्वतो रम्ये चतुर्द्वारविभूषिते ।
चतुरस्रे वितानादिस्फुरिते मण्डपोत्तमे ।। ६३ ।।
तत्र दामनकान् वृक्षान् समूलान् परिसंन्यसेत् ।
सायं पूजावसानेऽथ मण्डपे तत्र शोभने ।। ६४ ।।
बालुकागृहनिर्माणं चतुरस्रं मनोरमम् ।
पूर्वतो द्वारसंयुक्तं तन्मध्ये चाष्टपूर्ण्णकम् ।। ६५ ।।
एतान् द्रुमान् दामनकानेकविंशतिसंख्यकान् ।
संरक्ष्य धरणीनाथ बालुकायां च गोपयेत् ।। ६६ ।।
पद्मे दमनकचयं स्थापयित्वा तु यत्नतः ।
गन्धपुष्पार्पणं तत्र वस्त्रैराच्छादयेत्पुनः ।। ६७ ।।
कृष्णं रामं विश्वधात्रीं पूजयेच्चन्दनादिना ।
रामकृष्णकरस्थौ यौ द्रुमौ दामनकौ नृप ।। ६८ ।।
तदाचार्य्यं करे धृत्वा प्रार्थयेत्परमेश्वरम् ।
नमस्तुभ्यं जगद्बन्धो ! नमस्त्रैलोक्यनायक ।। ६९ ।।
नमस्तुभ्यं सुरश्रेष्ठ ! सिन्धुजापतये नमः ।
त्रैलोक्यकण्टको भूत्वा योऽभूद्दमनकोऽसुरः ।। ७० ।।
पूर्वसन्निहितः शीघ्रं तदा दैत्यो महाबलः ।
स च दैत्यो हरेः पश्चान्नम्रयित्वा जनार्द्दनम् ।। ७१ ।।

प्रीतस्त्वं च पुनस्तस्मै सुसम्पत्तिप्रदः प्रभो ।
अधुना वृक्षरूपेण जातः सोऽयं महीतले ।। ७२ ।।
सुप्रीतो भव देवेश ! तत्र दामनकद्रुमे ।
इत्युक्त्वासौ दमनकं कृष्णहस्ताम्बुजेऽर्पयेत् ।। ७३ ।।
गीतनृत्यादिभिर्भूप ! क्षपां तावन्नयेज्जनः ।
अरुणोदयचतुर्द्दश्यां प्रातर्यजनमाचरेत् ।। ७४ ।।
ततः कुर्य्यान्महास्नानं देवानामतिभक्तितः ।
चतुःसमविलेपं च वस्त्रालङ्कारमण्डनम् ।। ७५ ।।
ततोऽर्च्चकः सोऽग्निशर्मा ब्रह्मा च ते सुसंयताः ।
अधिवासगृहं गत्वा द्रुमान् दामनकान्पुनः ।। ७६ ।।
वस्त्रैराच्छादितान् धृत्वा छत्रघण्टादिचामरैः ।
काहालशङ्खमधुरीभेरीसन्मर्द्दलादिभिः ।। ७७ ।।
महोत्सवं विधायाथ भ्रामयित्वा त्रिवारतः ।
प्रासादं च सुरश्रेष्ठान् तथा कृत्वा महीपते ! ।। ७८ ।।
देवाग्रे स्थापयेयुस्ते तान् दमनकान् द्रुमान् ।
देवानां यजनं कार्य्यं चतुर्विंशतिसंख्यकैः ।। ७९ ।।
उपचारैः पञ्चभिर्वा ततः संस्कृत्य प्रार्थयेत् ।
हिरण्यकशिपोर्वक्षो विदार्य्य नखरैर्निजैः ।। ८० ।।
तद्वसाभिर्यथा देव ! कृतं यज्ञोपवीतकम् ।
तथा दमनकस्यापि सम्बन्धिकुसुमान्वितम् ।। ८१ ।।
मया दत्तं गृहाणेदं वृक्षं ते प्रीतिहेतवे ।
जगन्नाथ ! नमस्तेऽस्तु नमस्ते करुणानिधे ! ।। ८२ ।।
अपराधो मदीयोऽसौ क्षन्तव्यो भक्तवत्सल ! ।
इत्थं संप्रार्थ्य देवेशं तद् द्रुमान् शिरसि प्रभो ! ।। ८३ ।।

दत्त्वा परमया भक्त्या नमः कुर्य्यात्पुनः पुनः ।
बलदेव बलाधार बलोत्पाटितभूतले ।। ८४ ।।
बलध्वस्तप्रलम्बं त्वां नमामि बलिनां वर ।
गन्धतृणमिदं रम्यं गृहाण परमेश्वर ! ।। ८५ ।।
इत्युक्त्वा सोऽग्निशर्मा च ददौ दमनकं मुदा ।
भद्रे ! देवि ! नमस्तुभ्यं भक्तानां भद्रदायिनि ।। ८६ ।।
इदं दमनकं देवि ! स्वीकुरु स्मेरसुन्दरि !
ब्रह्मा तदा निगद्यैवं दद्याद्दमनकं तृणम् ।। ८७ ।।
ततो मध्याह्नयजनं कृत्वा प्रक्षालयेत्पुरः ।
वन्दापयेयुस्ते सर्वे पुनर्दमनकं शुभम् ।। ८८ ।।
शिरसस्तु बहिष्कृत्य ददुस्तुभ्यं नृपोत्तम !
एतस्मिन् समये ये च भक्त्या पश्यन्ति केशवम् ।। ८९ ।।
इह भोगान्मनोरम्यान् भुक्त्वा चान्ते परं पदम् ।
गच्छन्ति नृपशार्दूल ! संशयोऽत्र न विद्यते ।। ९० ।।
एतद्दमनकं ये वै खादन्ति च वहन्ति च ।
सर्वपापविनिर्मुक्तास्तथा रोगैः प्रमुच्यते ।। ९१ ।।
वहतां तद्विशां नाथ ! बलं हस्तेन मस्तके ।
डाकिन्यः प्रेतकृष्माण्डभूतवेतालकादयः ।। ९२ ।।
शक्नुवन्ति न कर्त्तुं ते हिंसालेशं च हिंसकाः ।
गोहस्तिवाजिनां तावन्न रोगस्तु निषेवणे ।। ९३ ।।
ये च भक्त्या करे धृत्वा भक्तिभावसमन्विताः ।
रणं गच्छन्ति ते सर्वे जयकामा भवन्ति ते ।। ९४ ।।

सूत उवाच

एतद्दामनकं महद्भृशतरं जप्त्वा पुनः सोऽब्जजो
विप्रास्तं नृपतिं प्रतिक्षितितले नीलाचलेशं तु यत् ।
प्राह प्रेमभरेण तत्र विमले वैशाखमासि स्फुटं
चान्यद्यद्गदतां नृणां कलिमलप्रध्वंसि वैशृण्वताम् ।। ९५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसूतसंवादे दमनकयात्राकथनं नाम पञ्चत्रिंशोऽध्यायः ।।

षट्त्रिंशोऽध्यायः

ब्रह्मोवाच

वैशाखे मासि यन्नीतिर्नीलाचलपतेर्हरे ।
तं वदामि नृपश्रेष्ठ ! सर्वकामफलप्रदम् ।। १ ।।
मेषमासस्य संक्रान्त्यां प्रातर्यजनतः परम् ।
महास्नानं हरेः कृत्वा सर्वाङ्गस्य विलेपनम् ।। २ ।।
नवीनवस्त्रालङ्कारैर्भूषयेत्कमलेक्षणम् ।
तण्डुलानामेकभागे माषाणां च द्विभागतः ।। ३ ।।
एककृत्य च तत्रैव रामठं लवणं पुनः ।
यत्र पाकेन वै कुर्य्यात्पूपं च तादृशं बहु ।। ४ ।।
प्रपानकेन दिव्येन समं कृत्वा नराधिप ! ।
बहूनि तानि पूपानि कृत्वा तन्मध्यमार्च्चनम् ।। ५ ।।
समाप्य विधिवद्भक्त्या वन्दापनकमाचरेत् ।
अथो वौशाखमासस्य शुक्लपक्षे शुभोदये ।। ६ ।।

तृतीयायां तिथौ सायं पूजानन्तरतो नृप ! ।
प्रासादपूर्वदेशे हि चतुरस्रं सुशोभनम् ।। ७ ।।
चतुर्द्वारसमायुक्तं पताकाबलिराजितम् ।
वितानजालसन्नद्धं मण्डपं रचयेत्ततः ।। ८ ।।
पद्मपत्रत्रयं कृत्वा तत्र भद्रासने न्यसेत् ।
सौवर्ण्णे वाथ वा रौप्ये रम्ये पात्रत्रये पुनः ।। ९ ।।
सहस्रपलसंख्यातं चन्दनं चारुपेषितम् ।
पातयेच्चन्दने तत्र सिल्लिकाफलपञ्चकम् ।। १० ।।
चन्दनोद्गतसंपक्वतैलस्य च पलत्रयम् ।
कस्तूरिकापलं तत्र कर्पूरं च पलं द्विकम् ।। ११ ।।
एतत्सर्वं विनिक्षिप्य पेषयेत्पाणिना मुहुः ।
जगदीशकृते तत्तु सहस्रार्द्धपलं न्यसेत् ।। १२ ।।
बलाय त्रिशतपलं सुभद्रायाः कृते नृप ! ।
सपादं स्थापयेत्तत्र नवाधिकशतद्वयम् ।। १३ ।।
एवं रूपेण मतिमान् भाजनेषु न्यसेच्च तान् ।
चीनपट्टांशुकैर्नव्यैर्यत्नादासादयेद्बुधः ।। १४ ।।
त्रैलोक्यरक्षणपद प्राक्चक्रं च स्वाहान्तिकम् ।
इत्युक्त्वा वाससाच्छाद्य त्वसुरान्तकपदं पुनः ।। १५ ।।
पूर्वे दत्त्वा चतुर्थ्यन्तं स्वाहान्तं चक्रमुच्चरन् ।
पातयेत्केतकीपत्रं तत्र चन्दनभाजने ।। १६ ।।
गन्धद्वारेति गन्धं च स्थापयेत्सोममन्त्रतः ।
ततो गारुडिकीं मुद्रां दर्शयेद् भाजनोपरि ।। १७ ।।
नृंसिहमन्त्रराजेन दृष्ट्वा चैवाष्टधा जपेत् ।
एवं गन्धादिवासश्च कर्त्तव्यो धरणीपते ! ।। १८ ।।

अरुणोदयकाले च तद्द्रव्यैश्च प्रपूजयेत् ।
पूजान्ते नृपशार्द्दूल ! सिंहासनगताश्च ते ।। १९ ।।
प्रातःपूजां महास्नानं नववस्त्रार्पणं तथा ।
आचार्य्योऽप्यग्निशर्मा च ब्रह्मा च भक्तितत्परः ।। २० ।।
छत्रघण्टादि संराजदुत्सवैश्च मनोहरैः ।
प्रासादं भ्रामयित्वा च चन्दनं तत् त्रिवारतः ।। २१ ।।
देवान् तथा भ्रामयित्वा देवाग्रे तद्भूतं न्यसेत् ।
ततो पञ्चोपचारेण शीतद्रव्यैश्च पूजयेत् ।। २२ ।।
पूजान्ते नृपशार्द्दूल ! सिंहासनगताश्च ते ।
आसनं च परं कृत्वा तथैव बन्धनं दिशाम् ।। २३ ।।
भूतशुद्धिं च कुर्य्यासुस्तेऽर्चकप्रमुखा द्विजाः ।
इतो वस्त्राणि राजेन्द्र ! केतक्याश्च दलानि च ।। २४ ।।
बहिष्कुर्य्यात्ततस्तत्र संस्कुर्य्युर्वीक्षणादिभिः ।
प्रार्थयेदग्निशर्मासौ बलदेवं महोदयम् ।। २५ ।।
बलदेव नमस्तुभ्यं नीलाम्बर ! नमोऽस्तु ते ।
तापत्रयाग्निशान्त्यर्थं जगत्या मुषलायुध ।। २६ ।।
चन्दनैश्चारुगन्धाढ्यैस्तव देहं महत्तरम् ।
लेपयामि सुरश्रेष्ठ ! अपराधं क्षमस्व मे ।। २७ ।।
इत्युक्त्वा सोऽग्निशर्मापि लेपयेच्चन्दनैर्बलम् ।
जगन्नाथ नमस्तेऽस्तु नमः संसारतारक ।। २८ ।।
जनार्द्दन जगद्बन्धो जगदाधार ते नमः ।
तापत्रयोपशान्त्यर्थं ददामि चारुचन्दनम् ।। २९ ।।
अङ्गीकुरु महाबाहो पाहि मां शरणागतम् ।
इत्युक्त्वा लेपयेद्गन्धं सर्वाङ्गे पूजकोत्तमः ।। ३० ।।

जगद्धात्रि नमस्तुभ्यं नमस्ते भद्रदायिनि ! ।
दिव्यचन्दमङ्गे ते ददामि परमेश्वरि ।। ३१ ।।
हिताय जगतां मातस्तथा तापोपशान्तये ।
अङ्गीकुरु कुरङ्गाक्षि ! अपराधं क्षमस्व मे ।। ३२ ।।
बलं पुरुषसूक्तेन श्रीसूक्तेन रमापतिम् ।
देवीसूक्तेन तां भद्रां सुदर्शनमरिन्दम ।। ३३ ।।
लक्ष्मीं च माधवं विश्वधात्रीं च स्वस्वमन्त्रतः ।
लेपयेच्चन्दनैर्दिव्यैर्गन्धव्याप्तदिगन्तरैः ।। ३४ ।।
परिधास्येति मन्त्रेण गन्धं संस्कृत्य दापयेत् ।
यशसामेति मनुना चोत्तरीयं समर्पयेत् ।। ३५ ।।
श्रीश्च ते इति मन्त्रेण पुष्पं दद्यान्मनोरमम् ।
अनेनैव तु मन्त्रेण प्रकुर्य्यादलकार्पणम् ।। ३६ ।।
अलङ्करणमन्त्रमुक्त्वालङ्कारमथार्पयेत् ।
यद्यशेति शिरे चूलं च हरेति गले स्रजम् ।। ३७ ।।
एतत्सर्वं महीनाथ ! संस्कृत्य वीक्षणादिभिः ।
दद्यात्परमया भक्त्या परमेशं परात्परम् ।। ३८ ।।
संस्कारव्यतिरेकेण किञ्चिद् गृह्णाति नो हरिः ।
अतःपरं हरेः पार्श्वे गोपालं मदनाभिधम् ।। ३९ ।।
कृष्णं च न्यस्य रामं तु बलपार्श्वे निवेशयेत् ।
ततो मध्याह्नयजनं कृत्वा वन्दापयेत् क्रमात् ।। ४० ।।
रौहिणेय नमस्तुभ्यं रेवतीरमण ! प्रभो ! ।
राक्षसानां परं जेता राम ! तुभ्यं नमो नमः ।। ४१ ।।
जलक्रीडार्थमेवैनं राममाज्ञापय क्षणैः ।
इत्युक्त्वा बलदेवाङ्गान्माल्यमानीय सादरम् ।। ४२ ।।

दद्याद्रामाय च पुनः प्रार्थयेज्जगदीश्वरम् ।
क्रीडानन्दरसाम्भोधि चारुचन्द्रनिभानन ।। ४३ ।।
जगत्पते ! नमस्तुभ्यं जगदाह्लादकारक ।
कृष्णं मदनगोपालं लक्ष्मीं पृथ्वीं तथा प्रभो! ।। ४४ ।।
आज्ञापय सुराधीश ! जलक्रीडाकृते हरेः ।
इत्येतां प्रार्थनामुक्त्वा माल्यमादाय चादरात् ।। ४५ ।।
प्रत्यर्च्चानां गले दद्यादाज्ञारूपं पृथक् पृथक् ।
पुनश्च प्रार्थयेद्देवानर्च्चकः क्षितिपोत्तम! ।। ४६ ।।
बलभद्र नमस्तुभ्यं नमस्ते लाङ्गलायुध ।
आज्ञापय प्रलम्बारे ! रथनिर्माणहेतवे ।। ४७ ।।
नन्दीघोषरथारूढ चक्रायुध ! नमोऽस्तु ते ।
नीलाचलपते ! देव ! नित्यं तुभ्यं नमो नमः ।। ४८ ।।
आज्ञापय जगन्नाथ ! जगदानन्दवर्द्धन ।
रथस्य निर्मितिं कर्त्तुं जगत्पावनहेतवे ।। ४९ ।।
भद्रे ! देवि ! जगद्धात्रि सृष्टिस्थितिलयाश्रये ! ।
आज्ञापय सुरेशानि ! निर्माणार्थं रथस्य वै ।। ५० ।।
इति विज्ञाप्य नृपते देवेभ्यो माल्यकत्रयम् ।
क्रमादानीय सहसा ततः प्रासादमुत्तमम् ।। ५१ ।।
प्रत्यर्च्चास्ता भ्रामयित्वा विमानस्थाः परन्तप ।
पञ्चेशानं च पार्श्वस्था प्रतिमास्ता विमानगाः ।। ५२ ।।
महोत्सवतया सर्वा आनयेच्च जलोत्सवे ।
वनयागविधानेन वनादानीय यानि वै ।। ५३ ।।
स्थितानि तानि काष्ठानि पूर्वद्वारप्रदेशतः ।
काष्ठैस्तैश्च विशांनाथ ! रथनिर्माणहेतवे ।। ५४ ।।

शिल्पिभ्यः प्रददौ माल्यं काष्ठान्दातुं यथाक्रमम् ।
ततो गच्छेत्सुरश्रेष्ठ !महोत्सवतया पुनः ।। ५५ ।।
ततः सरोवरस्यास्य मध्ये कुर्यान्महाशयम् ।
नानामण्डलसंयुक्तं मण्डपं चारुशोभनम् ।। ५६ ।।
ततो नौकायुगे लम्बे दारवं मण्डपं चरेत् ।
संपादयेत्परं पीठं यथायोग्यं च दारुभिः ।। ५७ ।।
कृत्रिमाभिश्च रम्याभिः पुत्रिकाभिर्मनोहरम् ।
वितानोत्तमसंयुक्तं चामरैः समलङ्कृतम् ।। ५८ ।।
रमणीयतरं कुर्य्यान्नौकायानं महीपते! ।
तादृशे दिव्ययानेऽस्मिन् नौकारूपे महोदये! ।। ५९ ।।
प्रत्यर्च्चास्ता समस्ताश्च वासयेत्सुमहोत्सवे ।
गीते नृत्ये च पुरतो जायमाने मुहुर्मुहुः ।। ६० ।।
भ्रामयेदेकवारं च तत्रस्थे जलमण्डपे ।
तत्र नीत्वा च प्रत्यर्च्चाः कुण्डेषु विविधेषु च ।। ६१ ।।
गन्धपुष्पोदकैः पूर्णेष्वेषु ता वासयेत्पृथक् ।
रामकृष्णौ न्यसेत्तावदेकत्र कुत्रचित् पदे ।। ६२ ।।
लक्ष्मीं मदनगोपालं धरामेकत्र वासयेत् ।
महेशानां तु प्रत्यर्च्चाः पृथगेकत्र वासयेत् ।। ६३ ।।
गीतं नृत्यं विधायाथ नानानृत्यैर्मनोहरम् ।
महोत्सवं समाचर्य्य प्रहरं गन्धवारिषु ।। ६४ ।।
ततस्ताः प्रतिमा दिव्याः संप्रोच्छ्य नववाससा ।
वस्त्रमाल्यार्पणं कृत्वा पूजयेच्चन्दनादिना ।। ६५ ।।
अग्निशर्मा ततो भूप ! वन्दापयति सादरम् ।
चतुर्दण्डावशिष्टेऽस्मिन् दिने तावन्नराधिप! ।। ६६ ।।

दिव्याम्बराणि माल्यानि दिव्यालङ्करणानि च ।
गन्धपुष्पाणि दत्त्वाथ भूषयेत्ताः पृथक् पृथक् ।। ६७ ।।
गोधूमचूर्ण्णनिचयमामिक्षासङ्गतः पुनः ।
तत्र गन्धरसं क्षिप्त्वा घृतेन पाचयेद्द्विजः ।। ६८ ।।
नानाविधानि पूपानि कारयेद्भक्तिभावतः ।
शर्कराभिश्च युक्तानि घृतेन जर्जराणि च ।। ६९ ।।
पक्वाम्रफलसंघातं सुपक्वकदलीफलम् ।
नारिकेलफलानां च लाजानां च विकारजम् ।। ७० ।।
तादृशं वरनैवेद्यं संपाद्य चन्दनादिना ।
पूजयेत् परया भक्त्या तत्र ताः प्रतिमाः शुभाः ।। ७१ ।।
विष्णुप्रतिकृतेस्तावद्गोत्रायाश्च शिरस्तथा ।
स्पृष्टास्पृष्टजदोषोऽपि प्रसादेषु न विद्यते ।। ७२ ।।
विज्ञानं तत्र मा कार्य्यं कुर्य्याच्चेन्नारकी भवेत् ।
तस्मात्तद्भक्षणं कार्य्यं प्राप्तिमात्रेण भूपते! ।। ७३ ।।
भक्षणात् सर्वपापेभ्यो मुच्यते नात्र संशयः ।
पूजान्ते नृपशार्द्दूल ताम्बूलानि समर्पयेत् ।। ७४ ।।
गीतं नृत्यं पुरः कुर्य्यात्तन्नौकापीठसत्तमे ।
वासयित्वा पुनस्तास्ताः प्रतिमाः शुभदर्शनाः ।। ७५ ।।
जलेऽस्मिन् भ्रामयेद्भूप ! त्रिवारं च शनैः शनैः ।
स्वे स्वे विमाने ताः सर्वाः समारोप्य ततः परम् ।। ७६ ।।
मार्गे महोत्सवतया स्वपदेषु निवेशयेत् ।
देवानां गन्धलेपं च यज्जलभ्रमणं तथा ।। ७७ ।।
जलमण्डपपूजां च मार्गे वैषां गतागते ।
पश्यन्ति भ्रमतो भक्त्या तेषां स्यात्पापसंक्षयः ।। ७८ ।।

सन्ततिर्वर्द्धते तेषां शेषे वैकुण्ठवासिता ।
ततस्तस्य महाविष्णोः सायं पूजावसानतः ।। ७९ ।।
देवानामङ्गतो माल्यं वस्त्रालङ्कारसञ्चयम् ।
समुत्तार्य्यार्पयेद्दिव्यं पञ्चवर्ण्णं विचित्रितम् ।। ८० ।।
सूक्ष्मं वसनसंघातं परिधाप्य ततो नृप! ।
सूक्ष्मं वस्त्रोत्तरीयं च जातीकुसुममाल्यकम् ।। ८१ ।।
दीपासादनकं कृत्वा वीजयेद्दण्डजुग्मतः ।
व्यजनं मण्डलाकारं द्वादशाङ्गुलवृन्तकम् ।। ८२ ।।
तत्तु सौवर्ण्णकं वापि राजतं वापि कारयेत् ।
व्यजनं तत् पट्टपटैर्दृढीकृत्य विनिर्मितम् ।। ८३ ।।
परितः पीतवस्त्रेण दृढीभूतं च तद्भवेत् ।
एतादृग्भिश्च व्यजनैर्वीजयेद्देवसत्तमान् ।। ८४ ।।
गीतं तावद्भवेद्रम्यं काले तस्मिन्न को व्रजेत् ।
द्वितीयावरणं भूप ! निःशब्दं भविता तदा ।। ८५ ।।
एतत्तृतीयादिनतो ज्येष्ठशुक्लचतुर्द्दशीम् ।
व्याप्य नीतिरियं राजन् ! कर्त्तव्यानुदिनं महैः ।। ८६ ।।
जलभ्रमणयात्रां तामेकविंशतिभिर्दिनैः ।
कुर्य्यात्तद्विंशतिदिने सायंकाले परन्तप ।। ८७ ।।
पुष्करिण्यां च परितः प्रतिकोणं च मध्यतः ।
सप्त सप्त भ्रमिः कार्य्या जायमाने महोत्सवे ।। ८८ ।।
एकविंशतिसंख्याते दिने ताः प्रतिमाः पुनः ।
यन्त्रेण वेणुजातेन पानयेद्भक्तितो हरिम् ।। ८९ ।।
वारत्रयं तथा कृत्वा मार्गे चानीय पूर्ववत् ।
महोत्सवैस्ततस्तास्ताः स्वपदे विनिवेशयेत् ।। ९० ।।

प्रातः पूजनकर्मान्ते व्यजनैः परिवीजनम् ।
तथा चन्दनलेपं च वस्त्रमाल्यार्पणं तथा ।। ९१ ।।
कृत्वा ततश्च प्रत्यर्च्चां समीपे स्थापयेत्तदा ।
क्षालितान्नं च नैवेद्यं प्रपानकचयैः समम् ।। ९२ ।।
कृत्वा पूपभरैः सार्द्धं शाकाम्लसहितं तथा ।
पञ्चोपचारविधिना पूजयेत्परमेश्वरम् ।। ९३ ।।
पूर्वोक्तविधिना भूप ! प्रत्यर्च्चास्ता मनोरमाः ।
जलक्रीडार्थमानन्दान्नयेत्तत्र महोत्सवैः ।। ९४ ।।
सायं पूजनकर्मान्ते कुर्य्याद्व्यजनवीजनम् ।
अष्टभागे जले भूप ! शर्करा ऋतुभागतः ।। ९५ ।।
दुग्धसारं द्विभागं च तैः कुर्य्यात्सुप्रपानकम् ।
सोऽपि विष्णुः प्रसन्नात्मा सर्वान् कामान् प्रपूरयेत् ।। ९६ ।।
आसनादिं विधायाथ पूजां कृत्वा समर्पयेत् ।

इन्द्रद्युम्न उवाच

ब्रह्मन् ! केन विधानेन वनयागविधिर्भवेत् ।। ९७ ।।
विष्णोर्दारुमये देहे कथं तिष्ठेच्च चन्दनम् ।
एतत् प्रश्नद्वयं ब्रूहि यदि ते मय्यनुग्रहः ।। ९८ ।।

ब्रह्मोवाच

साधु साधु महीपाल ! कर्मज्ञोऽसि महीतले ।
अतस्त्वां वच्मि तद्गुह्यं शृणु मत्तः समाहितः ।। ९९ ।।
चैत्रकृष्णतृतीयायां वनयागविधिं चरेत् ।
आचार्य्यः प्रथमं तावद् वरुणस्य च पूजनम् ।। १०० ।।
कृत्वा तमग्निशर्माणं स कल्पयति मन्त्रवित् ।
अग्निशर्मा ततः कुर्य्यादाचार्य्यस्य वृतिं तथा ।। १०१ ।।

ब्रह्मणश्च वृत्तिं कुर्य्यात् स्वस्तिवाचनपूर्विकाम् ।
ब्रह्माचार्य्यं ततः शिल्पिव्यूहं च शस्त्रपाणिनम् ।। १०२ ।।
प्रेषयेत्तां च ते सर्वे वनमध्यं गता दृढम् ।
वैष्णवाग्निविधानेन होमयेदर्चकः पुनः ।। १०३ ।।
घृतैः समिद्भिश्चरुभिः शतमष्टोत्तरं हुनेत् ।
प्रत्येकं मन्त्रराजेन ततः पूर्णाहुतिं चरेत् ।। १०४ ।।
ततो गणेशं संपूज्य बलिं दद्याद्विचक्षणः ।
दिक्पालेभ्यस्तथा दद्याद्बलिं वनस्पतिं तथा ।। १०५ ।।
क्षेत्रपालं पशुपतिं प्रतिदद्याद्बलिं क्रमात् ।
शस्त्राभिसंस्कृतिं कृत्वा वृक्षच्छेदनमाचरेत् ।। १०६ ।।
तत्कर्मणि नियोज्याशु वर्द्धकिव्रजमुत्तमम् ।
आगच्छेदर्चकः सोऽयं ब्रह्मा च सदनं प्रति ।। १०७ ।।
तादृशैः काष्ठजालैश्च रथत्रयविनिर्मितम् ।
कारयेस्त्वं नृपश्रेष्ठ ! भक्त्या परमया तदा ।। १०८ ।।
असम्भवे तु वैशाखे शुक्लपक्षे शुभे दिने ।
तृतीयायामयं तावत्कर्त्तव्यो विधिरेव च ।। १०९ ।।
प्रासादपूर्वे काष्ठानि वनादानीय यत्नतः ।
ततः शालां विधायाथ वनयागविधिं तथा ।। ११० ।।
कृत्वा रथत्रयस्यापि निर्मितौ नृपसत्तम ! ।
नियोजयेन्महानन्दाद् वर्द्धक्युत्कटमुत्तमम् ।। १११ ।।
एतद्विधिं विना भूप ! रथानां घटने कृते ।
विघ्नो भवेद्रथानां च भङ्गः कुत्र च कुत्रचित् ।। ११२ ।।
इदानीं नृपशार्दूल ! विष्णो रथ्यानि यानि वै ।
पुष्टानि स्युर्यथा दिव्यैश्चन्दनैस्तच्छृणुष्व मे ।। ११३ ।।

विद्यापतिकुले जातास्तथा विश्वावसोः कुले ।
ते सर्वे पट्टवस्त्रैश्च विष्णोरङ्गानि सर्वशः ।। ११४ ।।
शिरोगण्डप्रदेशं च दृढं चित्रतरं नृप ।
कलयेयुस्तथा वक्षः पृष्ठभागं मनोरमम् ।। ११५ ।।
कर्पूरवारिणा चाथ श्रीमुखाब्जं प्रमार्जयेत् ।
पञ्चामृतेन स्नपनं हरेः कार्य्यं प्रयत्नतः ।। ११६ ।।
श्वेतपट्टगुणैरेवं युग्मं युग्मं च मासतः ।
कुर्य्यादवनिनाथेश ह्यष्टम्यां च तिथौ पुनः ।। ११७ ।।
कुर्य्यादुत्सवमेतस्य नीलशैलस्य भूपते ! ।
तत्पूर्वदिनतः कुम्भोत्करस्य जलपूरणम् ।। ११८ ।।
कर्पूरचन्दने क्षिप्य वस्त्राच्छादनमाचरेत् ।
ततो गन्धं च पुष्पं च पातयित्वा घटोत्करान् ।। ११९ ।।
अष्टोत्तरशतानेव अधिवासतया न्यसेत् ।
प्रातःपूजावसाने वै देवाग्रे स्थापयेद्घटान् ।। १२० ।।
महास्नानस्य वस्तूनि चासनार्थं समाचरेत् ।
संस्कृत्य स्नापयेयुस्ते पूर्ववदर्च्चकाः प्रभून् ।। १२१ ।।
नवांशुकेन संप्रोच्छ्य चतुःसमविलेपनम् ।
नवीनवस्त्रालङ्कारनिचयार्पणमाचरेत् ।। १२२ ।।
मध्याह्नपूजां कृत्वाथ बलिं दद्याच्च बाह्यतः ।
वन्दापनां ततः कुर्य्यान्महाभक्त्या महीपते ! ।। १२३ ।।
प्रातःपूजां समाचर्य्य द्वादश्यां च हरेः पुनः ।
महास्नानं विधातव्यं चतुःसमविलेपनम् ।। १२४ ।।
नवीनवस्त्रालङ्कारैः भूषयित्वा ततः परम् ।
मध्याह्नपूजां विधिवत् कृत्वा वन्दापयेत्ततः ।। १२५ ।।

चतुर्द्दश्यां महास्नानं कृत्वा चन्दनलेपनम् ।
नवीनवस्त्रालङ्कारोत्तममाल्यभरैर्हरिम् ।। १२६ ।।
भूषयित्वा ततः सायं पूजा कार्य्या प्रयत्नतः ।
तदन्ते च नृसिंहाख्यां प्रत्यार्च्चां निकटे न्यसेत् ।। १२७ ।।
जगदीशस्य तस्यापि प्रार्थयेच्च ततो हरिम् ।
विष्णोर्निरञ्जनश्रीमन्दैत्यान्तक सुरोत्तम ! ।। १२८ ।।
नमस्ते करुणासिन्धो ! जगद्बन्धो ! नमो नमः ।
आज्ञापयतु प्रत्यर्च्चां नृसिंहजन्मने प्रभो ! ।। १२९ ।।
इत्याज्ञाप्य जगन्नाथं माल्यमानीय तद्गले ।
दत्त्वा महोत्सवतया नृंसिहाग्रे निवेशयेत् ।। १३० ।।
महास्नानं च पूजां च वन्दापनमथाचरेत् ।
स्वपदे तां नृसिंहाख्यां प्रत्यर्च्चां स्थापयेत्ततः ।। १३१ ।।
ज्येष्ठस्य कृष्णैकादश्यां दर्शे षष्ठीदिनेऽसिते ।
चन्दनाङ्गार्च्चनात्पूर्वं प्रत्यर्च्चां न्यस्य पूजयेत् ।। १३२ ।।
आज्ञापय जगन्नाथ ! नानाकौतुककारक ! ।
जलक्रीडारसं भोक्तुं सश्रीकं कृष्णमञ्जसा ।। १३३ ।।
लक्ष्मीं च सहितं कृष्णमाज्ञामाल्याञ्चितां नृप ! ।
महोत्सवैः समानीय जलमध्यं निवेशयेत् ।। १३४ ।।
अग्निशर्माथ तेनैव यन्त्रेण वंशजेन तु ।
कर्पूरोदकमानन्दान्निक्षिपेच्च शनैः शनैः ।। १३५ ।।
गीतनृत्ये पुरः कृत्वा पूजयेच्चन्दनादिना ।
वन्दापयेत्ततो नीत्वा स्वपदे विनिवेशयेत् ।। १३६ ।।

सूत उवाच

ऋषयो ब्रह्मवादिन्यो भवतां पुरतोऽधुना ।
भक्तिचित्तं पुरा विप्रा विधिना वर्ण्णितं तु यत् ।। १३७ ।।

नीलाचलेऽत्राखिललोकसारे
मुक्तिप्रदे केशवमिन्दुवक्त्रम् ।
पश्यन्ति ये वै विधिवच्च भक्त्या
ते यान्ति विप्राः पदमव्ययं तत् ।। १३८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सूतशौनकादिमुनिसंवादे षट्त्रिंशत्तमोऽध्यायः ।।

सप्तत्रिंशोऽध्यायः

तिथौ दशम्यां शुक्लायां सायं पूजासमापने ।
जगदीशान्तिकं नीत्वा प्रत्यर्च्चां कृष्णसंज्ञकाम् ।। १ ।।
नमस्ते देवदेवेश ! निर्गुणस्त्वं परं पुमान् ।
सगुणं त्वां परंब्रह्म भावयामि कृपानिधे ! ।। २ ।।
राजराजेन्द्र ! संख्याताभिषेकाय महाप्रभो ! ।
कृष्णमाज्ञापय क्षिप्रमपराधान् क्षमस्व मे ।। ३ ।।
इत्युक्त्वा देवदेवाङ्गान्माल्यं कृष्णगले न्यसेत् ।
छत्रचामरघण्टादि स्फुरदुत्सवसंयुतम् ।। ४ ।।
कृष्णं पुनः समानीय कुत्रचिद्वासयेत्पदे ।
दक्षिणाशां जवतया ततो दूतः समागतः ।। ५ ।।
विदर्भदेशे देवेश नानानृपगणाञ्चिते ।
रुक्मिण्या रूपवत्याश्च जायते तु स्वयम्बरः ।। ६ ।।
दूतोऽसाववदच्चित्ते चिन्तयेदतिभक्तितः ।
ततः सोऽप्यर्च्चको भूप ! तं दूतमिति संवदेत् ।। ७ ।।

दूताकर्ण्णय कृष्णस्य यथाज्ञाजनि साम्प्रतम् ।
एषा च मत्प्रिया लक्ष्मीः सर्वदा मद्धृदि स्थिता ।। ८ ।।
अहं देवो यथाजातस्तथा देवीति सा भवेत् ।
मानुषे मानुषी सा स्याद्रामे सीता बभूव सा ।। ९ ।।
इदानीं कृष्णरूपस्य प्रतिद्वारक्षितौ मम ।
जाता स्त्री रुक्मिणी नाम्नी सा सम्प्रति निबोधत ।। १० ।।
तस्याश्च केन वा कार्य्यः स्वयंवरमहोत्सवः ।
अज्ञः स भीष्मभूपालो मां न जानाति चाव्ययम् ।। ११ ।।
ततः सर्वांश्च भूपालानभिभूय पराक्रमैः ।
आनीय रुक्मिणीं तां तु गृह्योक्तविधिना रमाम् ।। १२ ।।
ग्रहीष्यामि पुनर्दूतं कृष्णाज्ञामिति तं वदेत् ।
इत्युक्त्वा पूजको भूप नन्दिघोषरथं परम् ।। १३ ।।
सुचारुसैव्यसुग्रीवमेघपुष्पबलाहकैः ।
हयैर्युतं शस्त्रयुतं वीरवाद्यनिनादितम् ।। १४ ।।
आनयेत् क्षिप्रमिति तं दारुकं प्रति संवदेत् ।
तादृग्रथे वासयित्वा प्रासादं भ्रामेयत्ततः ।। १५ ।।
विजिताः सर्वभूपालाः विक्रमैरिति चिन्तयेत् ।
राजराजेन्द्रभावेन त्वभिषेकं समाचरेत् ।। १६ ।।
पञ्चामृतेन संस्नाप्य पूजयेच्चन्दनादिना ।
ततो वन्दापनां कृत्वा स्वपदे विनिवेशयेत् ।। १७ ।।
एकादश्यां तिथौ प्रातः पूजायज्ञान्ततो हरेः ।
पार्श्वे कृष्णं समानीय प्रार्थयेदर्चकः प्रभुम् ।। १८ ।।
नमो नीलनृसिंहाय विष्णो ! ब्रह्मन् ! रमापते ! ।
इदानीं रुक्मिणीं विष्णो हृत्वा परिणयिष्यति ।। १९ ।।

विक्रमैर्देवदेवेश ! कृष्णमाज्ञापय प्रभो ! ।
आज्ञामालां समानीय श्रीकृष्णाय समर्पयेत् ।। २० ।।
वैनतेय पुरोदेशे महोत्सवतया पुनः ।
पर्यङ्कोपरि संन्यस्य द्वारपालान्तिके नृप ! ।। २१ ।।
सभास्थिततया किञ्चित् वासयित्वार्चकः पुनः ।
रुक्मिणीप्रेषितां दूतहस्तादानीय पत्रिकाम् ।। २२ ।।
पठित्वा वासयेत्कृष्णं वासयित्वा रथे पुनः ।
विमलान्तिकमासाद्य स्थापयेदुत्सवं विना ।। २३ ।।
अभ्यर्च्य विमलां देवीमागतां रुक्मिणीं प्रभुः ।
हस्तमुद्धृत्य सहसा रथे स्वाङ्के निवेशयेत् ।। २४ ।।
अर्चकस्त्वेति संचिन्त्य महोत्सवतया रथे ।
कन्यां नयन्तं श्रीकृष्णं प्रासादं भ्रामयेत्ततः ।। २५ ।।
प्रासादे पूर्वदिग्भागे मण्डिते चारुमण्डपे ।
तत्र मध्ये सुपर्य्यङ्के रुक्मिण्या सहितं हरिम् ।। २६ ।।
वासयेत्तत्र वै कुर्य्यान्महोत्सवमनुत्तमम् ।
ततः कुर्य्यात् प्रभोरङ्गे मुदा चन्दनलेपनम् ।। २७ ।।
गोविन्दप्रतिमां तावत्समीपे न्यस्य भक्तितः ।
चन्दनाङ्गार्च्चनं कृत्वा प्रार्थयेदर्चकः पुनः ।। २८ ।।
जगदीश ! नमस्तेऽस्तु नानाक्रीडारतः स्वयम् ।
भक्तानां रक्षणार्थाय नाशाय च दुरात्मनाम् ।। २९ ।।
जललीलाकृते श्रीमन् गोविन्दं परमेश्वरम् ।
आज्ञापय महाबाहो रमाकान्त नमोऽस्तु ते ।। ३० ।।
ततः संप्रार्थ्य भूपाल दद्यादाज्ञास्रजं गले ।
उत्सवैस्तं समानीय पूर्ववज्जलमण्डपे ।। ३१ ।।

जलमध्येऽपि संस्थाप्य पूजयेच्चन्दानादिना ।
वन्दापनां समाप्यैनं स्वपदे स्थापयेत्ततः ।। ३२ ।।
तिक्तं प्रपानकार्घ्यान्ते महास्नानविधिं हरेः ।
सर्वाङ्गे लेपनं कुर्य्यान्नवीनांशुकधारणम् ।। ३३ ।।
कारयित्वा तथा माल्यैर्भूषाभिः परिभूषयेत् ।
सायंकालसमर्च्चान्ते रुक्मिणीकृष्णयोः पुनः ।। ३४ ।।
कलशं स्थापयित्वासौ पूजको वरुणं यजेत् ।
परीक्षकः पुरस्तिष्ठेत्सावधानतया मुदा ।। ३५ ।।
महोत्सवेषु जातेषु गीतनृत्यादिषु स्फुटम् ।
अग्निशर्मा च संकल्पं ततो कुर्य्यात् प्रयत्नतः ।। ३६ ।।
आदौ कृत्वा देशकालवाक्यं रुक्मिणीकृष्णयोः ।
करिष्येऽहं द्विजद्वारा कर्म वैवाहिकं शुभम् ।। ३७ ।।
इति सङ्कल्पमाचर्य्य आचार्य्यो ब्राह्मणैर्वृतम् ।
कुर्य्याद्धृदयमात्रेण कांस्यपात्रजलेन वै ।। ३८ ।।
धावयेत् कृष्णचन्द्रस्य पादौ कमलकोमलौ ।
प्रीतये वासुदेवस्य श्रीमद्भगवतो हरेः ।। ३९ ।।
इत्युक्त्वा वितरेत्तस्मै चासनाय कुशत्रयम् ।
पादासनं तथैवार्ध्यमाचामं गन्धपुष्पके ।। ४० ।।
वन्दापनेन मन्त्रेण वैवाहे कर्मणि प्रभो ! ।
देशकेशरसंयुक्तं शुद्धसूक्ष्मांशुकद्वयम् ।। ४१ ।।
यज्ञोपवीतसंयुक्तं मुद्रिकाकुण्डलान्वितम् ।
गन्धपुष्पयुतं तत्तु नारिकेलफलान्वितम् ।। ४२ ।।
धृत्वा कार्य्ये देशकालवाक्यं कृत्वा सुसंयतः ।
यथाविधितया क्षिप्रं गोत्रमुच्चार्य्य तत्त्वतः ।। ४३ ।।

तद्वस्त्रयुगलं दिव्यं कृष्णहस्ते समर्पयेत् ।
वृतोऽस्मीति वदन्कृष्ण आचार्य्य इति भावयेत् ।। ४४ ।।
तन्न्यस्य कृष्णपार्श्वेऽपि किञ्चिद्गन्धं ततः करे ।
घर्षयित्वा तदाचार्य्यः प्राणपानादिकं पठेत् ।। ४५ ।।
कृष्णस्येन्द्रियनिकरं संस्पृशेच्च यथाविधि ।
सुरक्षेति च मन्त्रेण ललाटे चन्दनं न्यसेत् ।। ४६ ।।
परिधास्येति मन्त्रेण वस्त्रं दद्यान्मधुद्विषे ।
यज्ञोपवीतमनुना यज्ञसूत्रं समर्पयेत् ।। ४७ ।।
यशसामेति संदद्यादुत्तरीयं मनोरमम् ।
याहार इति मन्त्रेण मालां दद्याद्द्विजोत्तमः ।। ४८ ।।
यद्यसोऽप्सरसां मन्त्रमुक्त्वा माल्यं शिरे न्यसेत् ।
अलङ्करणमिमं मन्त्रमुक्त्वालङ्कारमर्पयेत् ।। ४९ ।।
ततः शङ्खजलैः पूर्ण्णं कृत्वा तत् क्रमुकद्वयम् ।
सुदूर्वावदरीपत्रं युक्तं गन्धं च पुष्पकम् ।। ५० ।।
पातयित्वा ततः सत्यवाक्यमुक्त्वा जलैः समम् ।
क्रमुकद्वयमानन्दाद्धस्ते कृष्णस्य दापयेत् ।। ५१ ।।
दत्त्वाचार्य्यस्ततः कुर्य्यात्पुण्याहवाचनं शुभम् ।
अग्निशर्मा ततो गन्धं दिव्यां दामनकस्रजम् ।। ५२ ।।
पीतवस्त्रद्वयं तावत् श्रीकृष्णायार्पयेदथ ।
वन्दापनां च विधिवद्गन्धादिवासनाय तु ।। ५३ ।।
कुर्य्याद्वरुणपूजां च पुण्याहं वाचयेत्ततः ।
सत्त्वां गन्धादिमुनिभिः चतुरश्चार्चकोत्तमः ।। ५४ ।।
गन्धानुलेपनं कुर्य्यात् कृष्णाङ्गे तन्महोत्सवे ।
एभिर्मन्त्रैश्च रुक्मिण्या अङ्गे तल्लेपनं चरेत् ।। ५५ ।।

वेदाश्च पूर्वदिग्भागे गर्भेऽष्टनागपूजनम् ।
कृत्वा तत्रैव दण्डं वै वैणकं गन्धवारिणा ।। ५६ ।।
धौतं कृत्वा स्थापयेच्च स्थिरो भव वदन्निति ।
पृथुभिर्वेति मनुना तत्रैव मृत्तिकां क्षिपेत् ।। ५७ ।।
क्षिपेत्पञ्चव्रीहींश्चैव दण्डमूले द्विजोत्तम ।
मूलकं गन्धमनुना हरिद्रां लेपयेत्ततः ।। ५८ ।।
रुक्मिणीकृष्णयोरङ्गे विवाहोत्सवकर्मणि ।
ततो मातृगणार्च्चां च वसोर्द्धारां ततः परम् ।। ५९ ।।
वेद्याश्चतुष्कोणकादेराचार्य्यास्तत्र संस्थिताः ।
आशुशिशानो वृषभमिति मन्त्रं जपन् पुनः ।। ६० ।।
सूत्रवेष्टनमाकुर्य्यात्सप्तवारमतः परम् ।
तत्सूत्रं त्रिगुणं कृत्वा हरिद्राक्तं ततश्चरेत् ।। ६१ ।।
बदरीपत्रसंयुक्ताः सप्तदूर्वा मनोरमाः ।
एवं सप्तविधां ग्रन्थिं कुर्य्यात्तत्र गुणे द्विजः ।। ६२ ।।
यथेन्द्रस्येन्द्राणिमनुमुक्त्वा तत्सूत्रमुत्तमम् ।
कृष्णचन्द्रकराम्भोजमणिबन्धे तु बध्नीयात् ।। ६३ ।।
एवं कौतुकसूत्रं तद्रुक्मिण्याश्च करेऽर्पयेत् ।
नारिकेलजलैश्चाथ कृष्णपादौ प्रधौतयेत् ।। ६४ ।।
ततः साधुभवान्नास्तामित्युक्त्वाचार्य्यसत्तमः ।
दद्यात् पुष्पाञ्जलिं कृष्णं प्रति भक्तियुतं पराम् ।। ६५ ।।
तदार्चयन्तं तं कृष्णं वदन्तमिति भावयेत् ।
षडर्घ्ययजनार्यैश्च कुर्य्यात्पुण्याहवाचनम् ।। ६६ ।।
कुशत्रयं कृतं पूतं विष्टरं स्थापयेत्पुरः ।
पाद्यं गन्धजलं रक्षेत्पुनर्विष्टरमेव च ।। ६७ ।।

सम्यगर्घ्यं तथैवात्र रक्षेच्चाचमनीयकम् ।
मधुपर्कं तथा न्यस्य मूलमन्त्रेण ताः स्पृशेत् ।। ६८ ।।
वर्ष्मोऽस्मीति समुच्चार्य्य दद्याद्विष्टरमुत्तमम् ।
विराजो दोहमनुना पाद्यं दद्यान्मुरारये ।। ६९ ।।
पूनर्विष्टरमाचार्य्यः पूर्ववद्दापयेन्मुदा ।
समुद्रं वः प्रहिणोमीत्युक्त्वार्घं वितरेद्बुधः ।। ७० ।।
आमागन्तिति मन्त्रेण दद्यादाचमनीयकम् ।
यन्मधुनो मनुना तन्मधुपर्कं समर्च्चयेत् ।। ७१ ।।
पूर्वं वस्त्रयुगं चापि धृत्वा वाक्यं समुच्चरन् ।
कृष्णं समर्पयेद्धीमान् यथाविधि द्विजोत्तमः ।। ७२ ।।
जरां गछेति मन्त्रेण पीतवस्त्रसमर्पणम् ।
याकृन्तमिति मन्त्रेण रुक्मिण्यै चोत्तरीयकम् ।। ७३ ।।
कृष्णाङ्गाच्च बहिष्कृत्य मालां यज्ञोपवीतकम् ।
दत्त्वा गन्धं च संदद्याद् गन्धद्वारेण मन्त्रतः ।। ७४ ।।
पुष्पं च श्रीश्च ते इति रुक्मिण्यै वितरेद् द्विजः ।
मूलमन्त्रेण मुकुटे कृष्णस्य शिरसि न्यसेत् ।। ७५ ।।
ततस्तां रुक्मिणीं देवीमग्रेऽपि वासयेत्तदा ।
समज्जन्तु मनुं जप्त्वा रुक्मिणीकृष्णयोर्मिथः ।। ७६ ।।
कारयेद्देवलोकं तत्पश्यतां सर्वकामदम् ।
दूर्वाक्षतानि दिव्यानि तयोः शिरसि संन्यसेत् ।। ७७ ।।
ततः शङ्खेऽपि नीराणि दूर्वाश्च बदरीदलम् ।
गन्धपूर्वं च क्रमुकद्वन्दं संक्षिप्य संदधत् ।। ७८ ।।
दानवाक्यं स च तदा ततो गोत्राणि कथ्यते ।
कात्यायनसगोत्रश्च गोत्रश्च मुनिभिः स्मृतः ।। ७९ ।।

पूर्वं किल कौण्डिन्यशब्दं कात्यायनमतः परम् ।
विश्वामित्रपदं योज्यं क्रमात्तत्पूर्ववत् स्मृतः ।। ८० ।।
ततो यदुरथ श्रीमान् शूरसेनो महातपा ।
वासुदेवश्च कृष्णश्च क्रमात्ते पुरुषास्त्रयः ।। ८१ ।।
प्रपौत्र-पौत्र-पुत्रत्वं कृष्णस्य प्रवदेत्सुधीः ।
श्रीकौण्डिन्यसगोत्राया रुक्मिण्याश्च महीपते ।। ८२ ।।
मैत्रावरुणकौण्डिन्यवसिष्ठप्रवरां द्विजः ।
पूर्वपुरुषनामानि शृणु तस्याश्च कौतुकात् ।। ८३ ।।
कौण्डिन्यदेवशर्मा च विदर्भदेवकर्मकः ।
भीष्मदेवकस्तेषां च क्रमेणैव वदेत्पुनः ।। ८४ ।।
प्रपौत्री-प्रौत्री-पुत्रीत्वं कन्यायाश्च वदेत्तदा ।
त्रिवारमेवं संजप्य रुक्मिणीहस्तमुत्तमम् ।। ८५ ।।
कृष्णहस्ते समर्प्याथ शङ्खोदकसमन्वितम् ।
तद्गुवाकद्वयं दिव्यमानीय द्विजसत्तमः ।। ८६ ।।
तदुत्तरीयवस्त्रान्ते दृढग्रन्थिं च पातयेत् ।
ततः कुशगुणेनैव रुक्मिणीकृष्णयोस्तयोः ।। ८७ ।।
बध्नीयाच्च करौ तावत्पद्मशोभातिरस्करौ ।
कृष्णस्तु कामगायत्रीं पठित्वा च परिग्रहम् ।। ८८ ।।
कृतवानिति विप्रेन्द्रो भावयेत्सुसमाहितः ।
गोभूहिरण्यवस्त्राणि कृष्णं प्रति समर्प्य च ।। ८९ ।।
आचार्य्याय परं दद्यात्तत्सर्वं गोधनादिकम् ।
यदैषीति परं मन्त्रं पठित्वा सोऽर्चकः पुनः ।। ९० ।।
रुक्मिण्याश्च तदा नाम लक्ष्मीति कल्पयेद्बुधः ।
ततः करगतग्रन्थिं फेटयेद् भक्तितत्परः ।। ९१ ।।

त्वं गौरीति मनुं जप्त्वा रुक्मिणीं वामपार्श्वके ।
श्रीकृष्णस्य वासयित्वा ततः कृष्णोत्तमाङ्गतः ।। ९२ ।।
आनीय मुकुटं दिव्यं रुक्मिण्याः शिरसि न्यसेत् ।
ततो गृह्योक्तविधिना होमं कुर्य्यात्प्रयत्नतः ।। ९३ ।।
एकविंशतिसंख्यातैः सौवर्ण्णैश्च वराटकैः ।
द्यूतलीलां परां कुर्य्यात्तयोश्च सप्तवारतः ।। ९४ ।।
आचार्य्याय तदा दद्यात् सुवर्ण्णेन तु दक्षिणाम् ।
प्रक्षाल्याग्रं ततः कुर्य्याच्चतुरस्रं सुशोभनम् ।। ९५ ।।
हस्तद्वयप्रमाणेन मण्डलं तत्र कारयेत् ।
तत्रास्तीर्य्य परं वस्त्रं नैवेद्यं तत्र संन्यसेत् ।। ९६ ।।
आम्राणां पनसानां च तालरम्भाफलानि च ।
पयःपेटीचयं तत्र परमं च प्रपानकम् ।। ९७ ।।
नारिकेलसितालाजादुग्धानां च विकारजम् ।
दिव्यं बहुतरं भक्त्या नैवेद्यं रचयेत्तदा ।। ९८ ।।
अग्निशर्माथ सहसा गन्धं दमनकं तथा ।
पीतवस्त्रद्वयं रम्यं श्रीकृष्णाय समर्पयेत् ।। ९९ ।।
आचार्य्यः परमप्रीत्या पूजयेच्चन्दनादिना ।
आदौ कृष्णाय नैवेद्यं श्रीरुक्मिण्यै ततः परम् ।। १०० ।।
एवं विवाहसमये चैकपङ्क्तितया द्विजः ।
नैवेद्यं परमं दद्यान्न दद्यादन्यवासरे ।। १०१ ।।
दद्याच्चेद् भ्रमतो वापि न प्रीतः स जनार्द्दनः ।
ताम्बूलं च समर्प्याथ कर्पूरोल्लासिवर्त्तिभिः ।। १०२ ।।
नीराजयेन्महानन्दात्परमानन्दवर्द्धनम् ।
दूर्वाक्षतं पुनर्दत्त्वा सप्तवर्त्या नृपोत्तम ! ।। १०३ ।।

पुनर्नीराजनं कुर्य्याद् भक्तिभावसमन्वितः ।
ततो लक्ष्मीं पुरस्कृत्य कृत्वा कृष्णं तु पृष्ठतः ।। १०४ ।।
जगदीशस्य पार्श्वेऽपि न्यसेत्तत्र महोत्सवैः ।
ततश्चतुर्थकालार्च्चां कुर्य्याद्भूपतिसत्तम ! ।। १०५ ।।
द्वादश्यां च तिथौ प्रातः निद्राभङ्गं जगत्पतेः ।
कृत्वा च रुक्मिणीं कृष्णं स्थापयेत्कूर्चमत्पदे ।। १०६ ।।
तद्दिने तु स्थिते दण्डे काले कृष्णं च रुक्मिणीम् ।
पुनर्हि तां हरेः पार्श्वे वासयित्वा तु प्रार्थयेत् ।। १०७ ।।
जगन्नाथ ! सुरश्रेष्ठ ! नमस्ते कमलापते ! ।
नमस्ते रुक्मणीनाथ ! महाबाहो ! जगत्प्रभो ! ।। १०८ ।।
आज्ञापय महाबाहो श्रीकृष्णं रुक्मिणीं प्रति ।
विवाहोत्सवकार्य्यान्ते भ्रमणाय सुलीलया ।। १०९ ।।
इत्युक्त्वा च स्रजं दत्त्वा महोत्सवसमन्वितौ ।
नयेद्यमेशनिकटं तौ तत्रापि समर्च्चयेत् ।। ११० ।।
यज्ञोपचारविधिना कुर्य्याद्वन्दापनां ततः ।
तौ तु तस्मात्समानीय महोत्सवतया नृप ! ।। १११ ।।
प्रासादं प्रति स्वस्थाने स्थापयेदतियत्नतः ।
ततस्तस्यां चतुर्द्दश्यां रात्रौ च घटिका ततः ।। ११२ ।।
तयोश्च वेदविधिना चतुर्थीकर्मसंचरेत् ।
दण्डद्वयावशिष्टायां क्षपायां नृपसत्तम ।। ११३ ।।
रुक्मिणीकृष्णयोर्विष्णुग्रन्थिं च परिफेटयेत् ।
नयेत्कृष्णं जगन्नाथनिकटं स्नानमण्डपे ।। ११४ ।।
स्नापयेज्जगदीशस्य वामपार्श्वस्थितं नृप ! ।
लक्ष्म्याश्च जगदीशस्य परस्परविलोकनम् ।। ११५ ।।

आषाढमासस्य शुक्ला पञ्चमी च यदा भवेत् ।
तत्पर्य्यन्तं महीनाथ ! कारयेदेव यत्नतः ।। ११६ ।।

सूत उवाच

ब्रह्मणा तेन भूपस्य चेन्द्रद्युम्नस्य धीमतः ।
अग्रे प्रकीर्त्तिताः सर्वाः यात्रास्ता जगतां पतेः ।। ११७ ।।
प्रतिवर्षं प्रकुर्य्याच्च विष्णुप्रीणनहेतवे ।
नीलाद्रौ जगदीशस्य यात्रा एता द्विजोत्तमाः ।। ११८ ।।
इन्द्रद्युम्नेन तेनैव विहिता ब्रह्मणेरिताः ।
लोपयन्ति नृपा ये ये ताश्च यात्रा जगत्पतेः ।। ११९ ।।
तेषां कुलक्षयं नूनं भवेद्भूमिसुरोत्तमाः ।
नरके च ध्रुवं वासो भवेत्तेषां न संशयः ।। १२० ।।
ये कुर्वन्ति जनाः भूमौ पश्यन्ति दर्शयन्ति वै ।
भावयन्ति च शृण्वन्ति श्रावयन्ति समादरात् ।। १२१ ।।
ते सर्वे मनुजाः श्रेष्ठाः पुत्रपौत्रसमन्विताः ।
सुखमैश्वर्य्यमाभुज्य गच्छन्त्यन्ते हरेः पदम् ।। १२२ ।।
विष्णुरूपधरास्ते ते पूज्यास्ते सुरमण्डलैः ।
ज्ञानमासाद्य तत्रैव मोक्षमक्षयमाप्नुयुः ।। १२३ ।।
तेषां पुण्यं द्विजश्रेष्ठाः सम्यग् वक्तुं क्षमस्व कः ।
पापिनोऽपि विमुक्ताः स्युः पापेभ्यो यदि लोकनात् ।। १२४ ।।
येषु येषु च कालेषु यो यो विधिरुदीरितः ।
ब्रह्मणापि मुखेनैव तत्तथैव समाचरेत् ।। १२५ ।।
अरुणोदयवेलायां हरेः स्नानं समाचरेत् ।
भूषयित्वा यथान्यायं ततः पूजा विधीयते ।। १२६ ।।
प्रथमं याममासाद्य प्रातः पूजा भवेद्विभो ।
द्वितीयप्रहरे तावन्मध्यमार्च्चा विधीयते ।। १२७ ।।

रात्रौ च प्रथमे यामे तृतीयार्च्चां समाचरेत् ।
नक्तं द्वितीयप्रहरे चतुर्थयजनं तथा ।। १२८ ।।
हरेर्नीलाद्रिनाथस्य यजनं पावनं महत् ।
कुर्वतां पश्यतां लोके चतुर्वर्गफलप्रदम् ।। १२९ ।।
तस्मात्कालेषु चोक्तेषु कर्त्तव्यं यजनं मुदा ।
व्यतिक्रमे महान् दोषो हरेस्तुष्टिर्न जायते ।। १३० ।।
अकाले विहिता पूजा निष्फला जायते द्विजाः ।
रक्षो ग्राह्या च सा पूजा जायते नात्र संशयः ।। १३१ ।।
यजमानस्य माङ्गल्यं कदाचिन्न हि जायते ।
अर्चकस्य विनाशः स्यात्तस्मात्काले दिनं चरेत् ।। १३२ ।।
पाकद्रव्यासम्भवेऽपि न हि कालव्यतिक्रमम् ।
कुर्य्याल्लाजाशर्कराद्यैर्नैवेद्यैरर्च्चयेद्धरिम् ।। १३३ ।।
नीराजनं च पूजा च तथैवोत्सवसञ्चयाः ।
अकाले द्विजशार्दूला न कर्त्तव्या कदाचन ।। १३४ ।।
कर्त्तव्याश्चेत्तदा तांस्तु न गृह्णाति हरिः स्वयम् ।
तत्सर्वं राक्षसैर्ग्राह्यं सत्यमेतन्न संशयः ।। १३५ ।।
विष्ण्वालये मनोरम्ये पवित्रे पापनाशने ।
म्लेच्छाश्च यत्र जनके सारमेयादयः क्वचित् ।। १३६ ।।
गृध्रादयः पक्षिणश्च यवनाद्यास्तथैव च ।
न विशेयुः कदाचिद्वै तत्र यत्नं महर्षयः ।। १३७ ।।
कर्त्तव्यं मानवैः सर्वैः आधिकारयुतैः सदा ।
प्रमादाद्यदि तेषां वै प्रवेशोऽत्रैव जायते ।। १३८ ।।
पाकद्रव्यं च यद्वस्तु तत्रस्थं जलसंयुतम् ।
तत्सर्वं दीर्घखातेषु निक्षिपेत्तु प्रयत्नतः ।। १३९ ।।

पावयेद्गोमयाम्बुभिः सुधाम्भोभिश्च सेचयेत् ।
पुनर्होमश्च कर्त्तव्यो वैष्णवाग्नौ विशेषतः ।। १४० ।।
महास्नानं विधातव्यं देवानां विधिना ततः ।
महोत्सवतया तेषां नैवेद्यं कारयेत्पुनः ।। १४१ ।।
अन्यथा निष्फलं सर्वं क्रुद्धो देवो भवेद्ध्रुवम् ।
सर्वेषां च विनाशः स्यात्तस्माद्यत्नं समाचरेत् ।। १४२ ।।

ऋषय ऊचुः

इन्द्रद्युम्नो महीपालः तस्मात्तच्छ्रुतवान् मुनेः ।
पुनर्ब्रह्माणमानन्दात् पप्रच्छ च वदस्व तत् ।। १४३ ।।

सूत उवाच

धन्याश्च कृतपुण्याश्च स्वयं सर्वे महत्तमाः ।
यतो नीलाद्रिनाथस्य गुह्यं तच्छ्रोतुमुद्यताः ।। १४४ ।।
तेन श्रीजगतां पतेः परमया भक्त्या च तन्निर्मितः
स्रष्टा यो विधिरद्भुतश्च गदितः तं भूमिपालं प्रति ।
तद्वक्तव्यमिदं द्विजाः श्रुतियुगानन्दप्रदं पावनं
शृण्वन्तु क्षितिमण्डलेऽतिविमलं स्पष्टं भवन्तश्च तत् ।। १४५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसूतसंवादे सप्तत्रिंशोऽध्यायः ।।

अष्टत्रिंशोऽध्यायः

ब्रह्मोवाच

ब्राह्मे मुहूर्त्ते चोत्थाय शयनाद्देशिकोत्तमः ।
शुद्धं वस्त्रान्तरं भूत्वा यतचित्तो हरिं स्मरेत् ।। १ ।।

नमः कमलनाभाय जगत्कारणकारिणे ।
नारायणाय देवाय परमानन्ददायिने ।। २ ।।
देवकीजठराम्भोधेः सम्भवाय परात्मने ।
कृष्णदेव नमस्तुभ्यं सत्तमोर्ध्वंसिने नमः ।। ३ ।।
इत्थं स्तोत्रं पठेद्भक्त्या विष्णुध्यानपरायणः ।
प्रार्थयेद्धरणीं देवीं कृताञ्जलिपुटस्ततः ।। ४ ।।
जगदाल्हादनकर ! श्यामसुन्दर ! तेजसे ।
नमस्तेऽस्तु हृषीकेश ! रामचन्द्राय ते नमः ।। ५ ।।
आधारभूता भूतानां क्षमे त्वं नित्यशोऽनघे ।
ब्राह्मीं क्रियां करिस्यामि मृत्तिकां देहि मे धरे ।। ६ ।।
इति संप्रार्थ्य तां प्राज्ञो मृत्तिकाखननं चरेत् ।
तन्मृत्तिकां करे धृत्वा दक्षिणे जलभाजने ।। ७ ।।
नैर्ऋताशां ततो गच्छेन्निर्जने कुत्रचित्पदे ।
यज्ञोपवीतं संन्यस्य दक्षकर्ण्णेऽवसंयतः ।। ८ ।।
आच्छाद्य वस्त्रतः शीर्षं मलमूत्रे परित्यजेत् ।
दक्षिणाभिमुखो रात्रौ दिवा भूयादुदङ्मुखः ।। ९ ।।
शङ्काभावे कुन्थनेन कुर्य्याद्देहस्य शुद्धये ।
ततः शौचो विधातव्यो यथोक्तविधिना नृप ! ।। १० ।।
सकृल्लिङ्गे त्रिवारं च गुदे सप्त करे दश ।
उभयोः करयोः सप्त दद्यात्तिस्रश्च पादयोः ।। ११ ।।
पादौ पाणिद्वयं धौत्वा वस्त्रमन्यद्दधेच्छुचिः ।
ततः प्रणवमुच्चार्य्य गोकर्ण्णाकृतिके करे ।। १२ ।।
धृत्वा जलं माषदघ्न त्रिः पीत्वा द्विः प्रमार्जयेत् ।
समस्ताङ्गुलिसंलग्नं गोकर्ण्णाकृतिकं विदुः ।। १३ ।।

तेनाचम्य भवेच्छुद्धो दोषभागन्यथा भवेत् ।
मुखं च नासिकां चक्षुः श्रोत्रं नाभिं च हृच्छिरः ।। १४ ।।
बाहुमूलं च संस्पृश्य शुद्धिः स्यात्स्वस्वमुद्रया ।
तद्यथा स्यान्नरपते मुद्राणां लक्षणं शृणु ।। १५ ।।
मुखे मध्यमया न्यस्य तर्जन्यङ्गुष्ठयोगतः ।
नासिकायां ततश्चक्षुरनामाङ्गुष्ठकेन च ।। १६ ।।
कनिष्ठाङ्गुष्ठकाभ्यां तु कर्णौ नाभिं च संस्पृशेत् ।
अनेन हृदयं न्यस्य सर्वाभिः शिरसि न्यसेत् ।। १७ ।।
अग्रेण बाहूसंस्पृश्य शुद्धो भवति देशिकः ।
आयुर्बलमिति प्राज्ञो मन्त्रमुच्चार्य्य मन्त्रवित् ।। १८ ।।
दन्तकाष्ठं गृहीत्वान्नाद्यायेति दन्तघर्षणम् ।
वटश्च खदिरश्चैव कदम्बश्च करञ्जकः ।। १९ ।।
तिन्तिडीवेणुपृष्ठं च निम्बाम्रोदुम्बरस्तथा ।
अपारमार्गश्च विल्वश्च कण्टकीक्षीरसंयुताः ।। २० ।।
एते प्रशस्ता नृपते दन्तधावनकर्मणि ।
एतत् काष्ठिकया तावद्द्वादशाङ्गुलमानया ।। २१ ।।
दन्तानां घर्षणं कुर्य्याद्विलम्बेन नृपोत्तम ।
जलैर्द्वादशगण्डूषैर्मुखशुद्धिं समाचरेत् ।। २२ ।।
पूर्वोक्ताचानं कृत्वा मृत्तिकाहरणं ततः ।
अश्वक्रान्ते रथक्रान्ते इति मन्त्रं परं पठेत् ।। २३ ।।
मृत्तिकालेपनं कुर्य्याच्छिरोहृद्बाहुकेषु च ।
गङ्गां स्मृत्वा जले विश्य वारुणस्नानमाचरेत् ।। २४ ।।
अनन्तगर्भिणं साग्रं समूलं सकुशद्वयम् ।
कृत्वा पवित्रं पाणौ च दक्षे वामे कुशानथ ।। २५ ।।

धृत्वा मौनं समाचर्य्य यावत्स्नानसमापनम् ।
इमं मे वरुण इति मनोश्चाहं प्रजापतिः ।। २६ ।।
ऋषिश्च छन्दो गायत्री देवता वरुणः स्मृतः ।
विनियोगस्य च पुरोनुवाक्यायामुदाहृतः ।। २७ ।।
इमं मे वरुणश्चैव मन्त्रमुक्त्वा ततो वदेत् ।
गङ्गेऽत्रागच्छ चेत्येवमावाह्य जाह्नवीं स्मरेत् ।। २८ ।।
तत्वायामीति मन्त्रेण जलाभिमन्त्रणं ततः ।
ऊरुं हि राजेति मनुं संजप्याचमनं चरेत् ।। २९ ।।
योवः शिवेति संमार्ज्यमापोहि मुखमज्जनम् ।
उदुत्तममिदं मन्त्रं निगद्य स्नानमाचरेत् ।। ३० ।।
गङ्गा-गया-कुरुक्षेत्र-प्रयागोदधिसङ्गगमान् ।
स्मृत्वैतान्निर्मले तोये स्नायाद्वारत्रयं बुधः ।। ३१ ।।
ततो दत्त्वा वामपादं भूमौ दत्वा पदं जले ।
यथोक्तविधिनाचम्य पुनर्गच्छेज्जलान्तरम् ।। ३२ ।।
आब्रह्मस्तम्भपर्य्यन्तमित्युक्त्वा तर्पयेत् त्रिशः ।
आचम्य प्रोञ्छयेद्गात्रं शिरः प्रोञ्छनपूर्वकम् ।। ३३ ।।
अनेन विधिना स्नानं समाप्य विष्णुमन्त्रतः ।
पुनस्तत्क्षणमेवायं मन्त्रस्नानं समाचरेत् ।। ३४ ।।
देशकालौ समुच्चार्य्य नामगोत्रे यथाविधि ।
श्रीमद्भगवतो विष्णोः प्रीत्यर्थं स्नानमुत्तमम् ।। ३५ ।।
करिष्येऽहमिति प्राज्ञः कुर्य्यात्संकल्पमादरात् ।
अस्त्रमन्त्रेण विप्रेन्द्रो मृत्तिकावरणं शुभम् ।। ३६ ।।
तत्र भागपरं कृत्वा प्रणवेन करद्वये ।
घर्षयेद्रविसंख्यातैर्वारैर्वारियुतं मुहुः ।। ३७ ।।

मूलमन्त्रं समुच्चार्य्य नाभ्यन्तं मस्तकादि तत् ।
लेपयन् मूलमन्त्रेण पुनः पादादिनाभितः ।। ३८ ।।
मध्यभागेन तेनाशु शेषेण सर्वतो लिपेत् ।
सूर्य्यमण्डलमध्यस्थ श्रीमन्नारायणाङ्घ्रितः ।। ३९ ।।
जाताया जाह्नवीदेव्या जलमङ्कुशमुद्रया ।
आवाह्य धेनुमुद्रान्तस्त्वमृतीकरणं ततः ।। ४० ।।
कवचेनावगुण्ठ्यास्त्रमन्त्रेण संचरन् पुनः ।
मूलेन दशधा जप्त्वा सोमसूर्य्याग्निमण्डलम् ।। ४१ ।।
विचिन्त्य परया भक्त्या तन्मध्ये विष्णुमव्ययम् ।
ध्यात्वा जप्त्वा मूलमन्त्रं यथाशक्तिनिमज्जनम् ।। ४२ ।।
कृत्वाचम्य षडङ्गेन न्यासं कृत्वा यथाविधि ।
मूलेन मनुनामन्त्र्य जलं चैव त्रिधा पुनः ।। ४३ ।।
सेचयेद्दशधात्मानं मुद्रया कलशाख्यया ।
माहात्म्यं जाह्नवीदेव्यास्तदा ब्रूयात्सुभक्तितः ।। ४४ ।।
शुक्लसूक्ष्माम्बरे शुद्धे धृत्वा रक्तेन नीलकम् ।
गङ्गातीरमृदा गोपीचन्दनेन च भक्तितः ।। ४५ ।।
यथोक्तविधिना कुर्य्यात्तिलकं पापमोचनम् ।
दण्डाकृतिर्ललाटे ये कुर्य्यात्सच्छिद्रमध्यकम् ।। ४६ ।।
पद्मपत्राकृतितया हृदये तिलकं न्यसेत् ।
वेणुपत्राकृतिं बाह्वोरन्यत्सर्वं प्रदीपवत् ।। ४७ ।।
मूर्त्तिपञ्जरन्यासस्य मन्त्रेण तत्पदे सुधीः ।
तिलकानि प्रकुर्य्याद् वै तिलकानि नृपोत्तम ! ।। ४८ ।।
शङ्खपद्मौ तथा चक्रं दक्षबाहौ न्यसेत्सुधीः ।
चक्रं गदां तथा शङ्खं धारयेद्वामबाहुके ।। ४९ ।।

शङ्खचक्रगदाम्भोजचिह्नानि विलिखेत्तनौ ।
कुर्य्याद्विष्ण्ववताराणां नृपेन्द्र !मूर्त्तिधारणम् ।। ५० ।।
प्राङ्मुखः कुशहस्तः सन् कुर्य्यात्सन्ध्यां महोदयाम् ।
विधाय वैदिकीं सन्ध्यां मूलमन्त्रेण मन्त्रवित् ।। ५१ ।।
कुर्यात्सन्ध्यां पुनः प्राज्ञो यथा तच्छ्रृणु सत्तम ! ।
गङ्गे च यमुने चैव इति मन्त्रमुदीर्य्य सः ।। ५२ ।।
तीर्थमावाह्य मूलेन मनुनाङ्कुशमुद्रया ।
त्रिवारं निक्षिपेन्मौलौ तज्जलैर्मन्त्रमन्त्रितैः ।। ५३ ।।
ततः षडङ्गविन्यासं कृत्वा वामकरे पुनः ।
जलं गृहीत्वा दक्षेण विधानं पाणिना चरेत् ।। ५४ ।।
हं क्षं रमिति मन्त्रेण ह्यभिमन्त्र्य परं पठन् ।
मूलमन्त्रं ततो वारिगलितं यत्तदम्भसा ।। ५५ ।।
अमृताभ्युक्षणं मूर्ध्नि कुर्य्याद्वै तत्त्वमुद्रया ।
अथ शेषजलं दक्षे समुदाय करे पुनः ।। ५६ ।।
तेजोरूपं परं ध्यात्वा तिलयाकृष्य पातकम् ।
प्रक्षाल्य कृष्णवर्ण्णं तु जलं पातु स्वरूपकम् ।। ५७ ।।
ध्यात्वा पिङ्गलया तावद्विरेच्य पुरतः पुनः ।
क्षिपेद्वज्रशलाकायां कल्पितायां फडित्यतः ।। ५८ ।।
अघमर्षणमेवं च कृत्वा धौतकरद्वयः ।
अस्त्रमन्त्रेण चाचम्य गायत्र्याञ्जलिकत्रयम् ।। ५९ ।।
क्षिपेदथ नृसिंहादिगायत्रीं शृणु भूपते ! ।
तारमादौ समुच्चार्य्य नृसिंहायेत्यतः परम् ।। ६० ।।
विद्महे चेति संकल्प्य तीक्ष्णदंष्ट्राय धीमहि ।
तन्नो नारसिंह प्रचोदयादिति प्रयोजयेत् ।। ६१ ।।

एषा नृसिंहगायत्री सतां सिद्धिप्रदायिनी ।
सतारं मान्मथं बीजमादावुक्त्वा ततः परम् ।। ६२ ।।
कृष्णाय विद्महे चेति दामोदरपदं ततः ।
चतुर्थ्यन्तं विधायाथ धीमहीति पदं न्यसेत् ।। ६३ ।।
तन्नो विष्णुः प्रचोदयादिति मन्त्रं पठेत्सुधीः ।
असौ श्रीकृष्णगायत्री जपतां सर्वकामदाः ।। ६४ ।।
पुरः प्रणवमुच्चार्य्य श्रीगोपालाय विद्महे ।
इत्युक्त्वाथ चतुर्थ्यन्तं वासुदेवपदं ततः ।। ६५ ।।
धीमहीति च संयोज्य तन्नो विष्णुः प्रचोदयात् ।
इत्थं गोपालगायत्री मनोरथविधायनी ।। ६६ ।।
वासुदेवपदमिदं चतुर्थ्यन्तं विधाय च ।
विद्महेति च संलप्य तथा नारायणाय च ।। ६७ ।।
धीमहीति ततश्चोक्त्वा तन्नो विष्णुः प्रचोदयात् ।
वासुदवेस्य गायात्रीत्येषाशेषाघनाशिनी ।। ६८ ।।
जपतां स्मरतां वापि शृण्वतां कल्पतां तथा ।
सुदर्शनाय विद्महे महाचक्राय धीमहि ।। ६९ ।।
नन्नो विष्णुः प्रचोयदयान्मन्त्रविद्भिश्च बुध्यते ।
सौदर्शनीया गायत्री स्मरतां पापनाशिनी ।। ७० ।।
चतुर्थ्यन्तं सतारं च भुवनेश्वरीनामकम् ।
विद्महेति च संन्यस्य महालक्ष्म्यै च धीमहि ।। ७१ ।।
ततो ब्रूयाद्देशिकेन्द्रस्तन्नो देवी प्रचोदयात् ।
इति श्रीभुवनेश्वर्य्या गायत्री मङ्गलप्रदा ।। ७२ ।।
महालक्ष्म्यै विद्महे तु पदं चाभाष्य भक्तितः ।
पद्मायै धीमहि चेति तन्नो देवी प्रचोदयात् ।। ७३ ।।

महालक्ष्म्याश्च गायत्री सर्वसम्पत्प्रदा सताम् ।
सोंकारं पृथिवीबीजं वसुधायै पदं ततः ।। ७४ ।।
विद्महे विश्वधात्री च धीमहीति पदं पुनः ।
तन्नः पृथ्वी प्रचोदयादिति मन्त्रविनिर्ण्णयः ।। ७५ ।।
विश्वधात्र्यास्तु गायत्री सर्वदा सर्वदा सताम् ।
वेदमातुश्च गायत्र्या ध्यानमाकर्ण्णयोत्तमम् ।। ७६ ।।
रविविम्बस्थितां देवीं रक्तवर्ण्णां सुभूषणाम् ।
अक्षमालां त्रिशूलं च तथैव शङ्खचक्रके ।। ७७ ।।
धारयन्तीं कृष्णसारचर्माम्बरधरां शिवाम् ।
एवं संचिन्तयेद्देवीं गायत्रीं वेदमातरम् ।। ७८ ।।
शुक्लां शुक्लाम्बरधरां वृषासनपरिग्रहाम् ।
त्रिनेत्रां वरदां पाशं त्रिशूलं च करोटिकाम् ।। ७९ ।।
सूर्य्यमण्डलमध्यस्थां ध्यात्वा देवीं समभ्यसेत् ।
श्यामवर्ण्णां चतुर्बाहुं शङ्खचक्रगदाम्बुजम् ।। ८० ।।
धारयन्तं करैर्दिव्यैः सूर्य्यासनगतां शुभाम् ।
सायाह्ने वरदां देवीं गायत्रीं तां स्मरेद्बुधः ।। ८१ ।।
ध्यानं त्रिकालसन्ध्यासु गायत्र्याः परिकीर्त्तितम् ।
ध्यानानन्तरतो मन्त्रं यथाशक्ति जपेद्बुधः ।। ८२ ।।
ततोऽपि ह्रीं हंस इति सूर्य्यायार्घ्यं प्रदापयेत् ।
इति संध्याविधिः सम्यक् कथितो मे तवाग्रतः ।। ८३ ।।
इदानीं तर्पणविधिं कथयामि महामते ! ।
शृणु त्वं नृपशार्द्दूल ! समाहितधिया पुनः ।। ८४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये अष्टत्रिंशोऽध्यायः ।।

ऊनचत्वारिंशोऽध्यायः

ब्रह्मोवाच

सूर्य्योपस्थानकर्मान्ते कुशेष्वावाहनं चरेत् ।
प्रत्येकं तर्पणं कार्य्यं यथान्यायं महीपते ! ।। १ ।।
नारदं तर्पयामीति तर्पयेत्तं त्रिभिर्बुधः ।
एवं च पर्वतं विष्णुं तथा त्रिशतमुद्धवम् ।। २ ।।
दारुकं विश्वक्सेनं च वैनतेयं गुरुं तथा ।
तर्पयेत्क्रमतो धीमान् स्वनाम्ना स्वस्वमन्त्रतः ।। ३ ।।
श्यामवर्ण्णमिति ध्यानं ध्यात्वा क्षिप्त्वाञ्जलिं जले ।
तर्पयेद्विष्णुमानन्दाच्चतुर्वर्गप्रदायिनम् ।। ४ ।।
गुरुं च गुरुपत्नीं च तथैवेष्टान् सुरान्बुधः ।
मूलमन्त्रं समुच्चार्य्य श्रीकृष्णं सर्वकामदम् ।। ५ ।।
तर्पयामीत्यनेनैव मनुना तर्पयेद्बुधः ।
पञ्चविंशतिभिर्वारैर्वारिणा भूभृतां वरः ।। ६ ।।
ॐ हंसः सूर्य्याय स्वाहा पठित्वार्घ्यं प्रदापयेत् ।
शतमष्टोत्तरं तावत् गायत्रीं प्रजपेद् बुधः ।। ७ ।।
सूर्य्यस्य मण्डले देवीं विभाव्य मूलमन्त्रतः ।
यथाशक्ति परं जप्त्वा संहारमुद्रया ततः ।। ८ ।।
देवीं स्वहृदमानीय तीर्थं च प्रणिपत्य च ।
एतत्तर्पणकर्मान्ते मन्त्री मौनी भवेन्नृप ।। ९ ।।
देवागारं विशेत्तावद्धौतपादकरः शुचिः ।
वैष्णवाचमनं कुर्य्याद् यथोक्तविधिना ततः ।। १० ।।
विधिं शृणुष्व राजेन्द्र ! वैष्णवाचमनस्य च ।
ॐ काराद्यं नमोऽन्तं च चतुर्थ्यन्तं च केशवम् ।। ११ ।।

नारायणं माधवं च तन्नाम्ना चाचमेत् त्रिशः ।
गोविन्दं च तथा विष्णुं संजल्प्य क्षालयेत्करौ ।। १२ ।।
मधुसूदनमेवोक्त्वा त्रिविक्रमतः परम् ।
एतद्द्वाभ्यां प्रमृज्येत चोष्ठौ च द्विजसत्तम ।। १३ ।।
माधवश्रीधराभ्यां च तथैव मुखमार्जनम् ।
हृषीकेशेन नाम्ना च पुनः प्रक्षालयेत्करौ ।। १४ ।।
कुर्य्याच्च पद्मनाभेन क्षालनं पादयोस्तथा ।
दामोदरं परं स्मृत्वा प्रोक्षयेन्मस्तकं पुनः ।। १५ ।।
स्पृशेत् सङ्कर्षणं ध्यात्वा मध्यमाङ्गुलिभिर्मुखम् ।
तर्जन्यङ्गुष्ठयोगेन नसोर्दक्षपुटे न्यसेत् ।। १६ ।।
वासुदेवं ततो वामे प्रद्युम्नं च महीपते ! ।
अनामिकाङ्गुष्ठयोगेऽनिरुद्धं पुरुषोत्तमम् ।। १७ ।।
चक्षुर्द्वये न्यसेत्प्राज्ञस्तत्तत्कर्म कलापवित् ।
अधोक्षजं नृसिंहं च तेनैव कर्ण्णयोर्न्यसेत् ।। १८ ।।
अच्युतेन स्पृशेन्नाभिं कनिष्ठाङ्गुष्ठयोगतः ।
जनार्द्दनं परं स्मृत्वा जलेन हृदयं स्पृशेत् ।। १९ ।।
उपेन्द्राय नम इति सर्वाभिर्मस्तकं स्पृशेत् ।
हरये नम इत्युक्त्वा तथैव विष्णवे नमः ।। २० ।।
अङ्गुल्यग्रैर्भुजौ स्पृष्ट्वा क्षीणपापो भवेद्द्विजः ।
अनेन विधिना राजन् !कुर्य्यादाचमनं यदि ।। २१ ।।
इन्द्रियस्पर्शनं कृत्वा साक्षान्नारायणो भवेत् ।
तेनैवानुष्ठितं कर्म सफलं जायते ध्रुवम् ।। २२ ।।

ब्रह्मोवाच

एतत्कर्म विनाधुना मधुभिदः पूजां च होमादिकम् ।
ये कुर्वन्ति नराधमा नहि सुखं क्वापि श्रियं ते परम् ।
तस्माद्भूयइमं विधिं कुरुत भो श्रीविष्णुमोदप्रदं
नानापुण्यविवर्द्धनं कलिमलध्वंसप्रदं भूसुराः ।। २३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकोनचत्वारिंशोऽध्यायः ।।

चत्वारिंशोऽध्यायः

ब्रह्मोवाच

एतदाचमनं कृत्वा देवाग्रे प्रविशेद्द्विजः ।
क्षालयेद्देवाताग्रं च ततः पीठे सुमार्जिते ।। १ ।।
उपविश्यासनं कृत्वा भूतशुद्धिं ततः परम् ।
प्रणवमातृकाद्वन्द्वं कुर्य्यात्सविधिनार्च्चकः ।। २ ।।
जलपात्रस्य संस्कारं कृत्वा ह्यावाहनादिकम् ।
कुर्य्याद्विधिवदाचार्य्यस्ततः कर्पूरवारिणा ।। ३ ।।
मनसा देवदेवं तं शुद्धेन च सम्मार्जयेत् ।
मूलमन्त्रेण भो राजंस्ततः शुद्धजलैः पुनः ।। ४ ।।
वौषाडित्येव मनुना गण्डूषान्तद्विसंख्यकान् ।
दद्याद्देवमुखं पश्यन्नाचार्य्यो भक्तितत्परः ।। ५ ।।
दन्तकाष्ठस्य संस्कारं प्रणवेन विधाय सः ।
दन्तकाष्ठं करे धृत्वा कवचेनैव मन्त्रतः ।। ६ ।।
पूगचूर्ण्णे तु संयोज्य स्वाहेति दन्तघर्षणम् ।
ततो गण्डूषनिचयं दत्त्वा च नृपसत्तम ! ।। ७ ।।

हेम्ना वा रजतेनापि जिह्वोल्लेखनकर्म तत् ।
कृत्वा चैव गण्डूषांश्च दद्यादालस्यवर्जितः ।। ८ ।।
घृतेन मधुना राजन् ! शीतया पयसा तथा ।
युते दध्नि परिष्कृत्य वीक्षणादिककर्मणा ।। ९ ।।
ततस्तैर्वैदिकैर्मन्त्रैर्दधिक्रावणसंज्ञकैः ।
प्रतिविम्बे जगद्भर्त्तुः स्नानं कुर्य्याद्विचक्षणः ।। १० ।।
प्रतिविम्बे ततो दत्त्वा किञ्चिदामलकं द्रवम् ।
कर्पूररजसा सिक्तैः सुपुष्पैश्च सुवासितैः ।। ११ ।।
वस्त्रपूतैस्तथा नीरैर्विधिवत्संस्कृतैः पुनः ।
समुद्रज्येष्ठामन्त्रेण स्नानं कुर्य्यात् प्रयत्नतः ।। १२ ।।
मूलमन्त्रं समुच्चार्य्य ध्यात्वा रूपं हरेः परम् ।
शुद्धसूक्ष्माम्बरं धृत्वा मार्जयेत्तत्र भूपते ! ।। १३ ।।
वाजपेयाश्वामेधादिक्रतूनां यत्फलं स्मृतम् ।
तत्फलं नृपते ते स्याद्विधिनानेन स्नापनात् ।। १४ ।।
भक्तियुक्ताश्च ये मर्त्त्या जगन्नाथस्य भूपते ! ।
प्रातःस्नानं च पश्यन्ति गमिष्यन्ति पदं हरेः ।। १५ ।।
पदे पदेऽश्वमेधानां प्राप्नुवन्ति फलं हि ते ।
गच्छन्ति भक्त्या ये मर्त्त्या हरेः स्नानावलोकने ।। १६ ।।
तेषां नास्ति महीपाल ! गर्भवासः कदाचन ।
सूर्य्योदये यदा विष्णोरङ्गे माल्यम्बरादि यत् ।। १७ ।।
तत्सर्वं कण्टकप्रायं शल्यप्रायं च भूपते ! ।
महाक्रोधयुतो विष्णुस्तदा भवति नान्यथा ।। १८ ।।
क्रोधे विष्णोः समुत्पन्ने राजा दुःखी गतायुषः ।
तदा तदीयाः कुलजाः न चैवात्र प्रतिष्ठिताः ।। १९ ।।

अत्यन्तभक्तिसंयुक्तः पश्चात् चेत्सेवते नृप ! ।
तदा स भगवान् देवः कदा प्रीतोऽपि न भवेत् ।। २० ।।
अतः प्रतिदिनं त्वं हि राजन् देवार्च्चने सदा ।
सावधानो भवेत्तावद्धिताय स्वयमात्मनः ।। २१ ।।
स्नापयित्वा देवदेवं पाकार्थं प्रार्थयेद्विभुम् ।
आज्ञां देहि महाविष्णो लक्ष्मीश कमलेक्षण ।। २२ ।।
होमार्थं पाकशालायां वैष्णवाग्नौ जगत्पते ! ।
इति संप्रार्थ्य देवेशं गच्छेत्पाकगृहं ततः ।। २३ ।।
तच्छालापालकेनासौ प्रेरितः पूजकस्तदा ।
धौतायां पाकशालायं होमं कुरु महामते ।। २४ ।।
शालामध्ये प्रविश्याथ कुण्डे वा स्थण्डिलेऽपि च ।
शरावे चूल्लिकामध्ये प्रत्यहं होमयेद् द्विजः ।। २५ ।।
गोधूमचूर्ण्णकैर्हस्तप्रमाणं स्थण्डिलं ततः ।
अभावे तण्डुलैश्चैव कुर्य्यादाचार्य्य एव सः ।। २६ ।।
कुशत्रयं गोमयं च वज्राभावे पुनस्त्रयम् ।
उदपात्रं च संन्यस्य मार्जयेत् प्रणवेन तु ।। २७ ।।
उपलेपनमुल्लिख्य चोद्धृत्याभ्युक्षणं चरेत् ।
एतानि पञ्चकर्माणि प्रणवेन समाचरेत् ।। २८ ।।
त्रिकोणमृतुकोणं च वृत्तं च चतुरस्रकम् ।
चतुर्द्वारसमायुक्तमिदं वह्नेस्तु मण्डलम् ।। २९ ।।
स्थण्डिले रचयेद्धीमान् दर्भेण वह्निबीजतः ।
वासुदेवस्य मन्त्रेऽस्य हृन्मन्त्रेण च वीक्षणम् ।। ३० ।।
शिरोमन्त्रेण संप्रोक्ष्य शिखामन्त्रेण ताडनम् ।
कवचेनाभ्युक्षणं च मन्त्रमुक्त्वाष्टधा जपेत् ।। ३१ ।।

लक्ष्मीबीजेन संन्यस्य कुशत्रयं प्रचिन्तयेत् ।
कुशमूले ऋतुमतीं नानालङ्कारसंयुताम् ।। ३२ ।।
सर्वलक्षणसम्पन्नां सूक्ष्मचारुतराम्बराम् ।
एवं ध्यात्वा दैशिकेन्द्रो विष्णुं चैव स्मरात्मजम् ।। ३३ ।।
कोटिकन्दर्पलावण्यं नवीनाम्बुदसुन्दरम् ।
नानालङ्कारसंयुक्तं चतुर्बाहुं किरीटिनम् ।। ३४ ।।
श्रीवत्सकौस्तुभोरस्कं कुण्डलद्वयमण्डितम् ।
सस्मेरापाङ्गतः कान्तां लोकयन्तं विचिन्तयेत् ।। ३५ ।।
स्थण्डिले तत्र विमले लेख्यां संचिन्त्य कोमलाम् ।
तयोस्तत्र रतिं चिन्त्य श्रोत्रियस्य गृहाद्द्विजः ।। ३६ ।।
अरणेर्वा वनाद्वापि पाषाणाद्वान्यकाष्ठतः ।
तादृशं पावकं तत्र संचिन्त्य च पुनर्हृदि ।। ३७ ।।
तं तु ताम्रगतं कृत्वा क्रव्यादांशत्वमात्मनः ।
संनिरस्य पुनस्तं तु भावयेद् विष्णुमव्ययम् ।। ३८ ।।
वीर्य्यरूपतया तं तु भावयेन्निजचेतसा ।
कुण्डोपरि त्रिवारं तु भ्रामयित्वाथ तं पुनः ।। ३९ ।।
देया मौनीति संचिन्त्य तस्मिन्कुण्डे च तं न्यसेत् ।
चिन्तयेच्च तयोर्केलिसम्भूतं तं विभावयेत् ।। ४० ।।
आचमयित्वा तौ भूयः स्वयमाचम्य चेतसा ।
ततस्ताम्बूलनिचयं ताभ्यां दद्याच्च देशिकः ।। ४१ ।।
सर्वाभिर्मखयोग्याभिरग्निं प्रज्वाल्य पूजयेत् ।
प्रादेशमात्रं समिधद्वयं चोत्थाय निक्षिपेत् ।। ४२ ।।
तथाग्नेर्दक्षिणे देशे ब्रह्माणं वरयेत्ततः ।
सुपीठोपरि तिष्ठन्तं मनसा कर्मवीक्षणे ।। ४३ ।।

चिन्तयेदर्च्चयेद्भूयो ब्रह्माणममितौजसम् ।
ममांशसम्भवोऽयं च ब्रह्मा नृपशिरोमणे ।। ४४ ।।
सर्वेषु देवकार्य्येषु वरयेच्चन्दनादिना ।
अग्नेरुत्तरतो रक्षेत् प्रणीतापात्रमुत्तमम् ।। ४५ ।।
परिस्तरणमाकुर्य्यात्कुशैरेव समन्ततः ।
पूर्वस्मिन्नुत्तराग्रं च पूर्वाग्रं दक्षिणे नृप ! ।। ४६ ।।
उत्तराग्रं पश्चिमे तु पूर्वाग्रमुत्तरे तथा ।
आसादनं तु पात्राणां कुर्य्यादुत्तरसंस्थितम् ।। ४७ ।।
पवित्रच्छेदनानि स्युर्ब्रह्मग्रन्थियुतैः कुशैः ।
त्रिभिः कुशद्वयेनाथ पवित्रे रचयेत्सुधीः ।। ४८ ।।
आज्यस्थाली तैजसी वा मृण्मयीयोग्यतावशात् ।
वैश्वदेवनिमित्तं च चरुस्थाल्यां परिन्यसेत् ।। ४९ ।।
सम्मार्जनकुशांश्चैव तथैवोपयमान् कुशान् ।
संन्यस्य तं ततो विप्राः संमन्त्रयमनिन्दितम् ।। ५० ।।
श्रुवस्रुचौ तथाज्यं च पूर्ण्णपात्रं च तण्डुलैः ।
पवित्रच्छेदनैः कुर्य्याद्दक्षिणावर्त्ततः क्रमात् ।। ५१ ।।
प्रादेशमात्रं राजेन्द्र पवित्रं देशिकोत्तमः ! ।
प्रोक्षन्नुपरि संस्थाप्य पवित्रं वाग्यतः शुचिः ।। ५२ ।।
पवित्रोदकमादाय प्रोक्षणीं पूरयेत्ततः ।
तज्जलं तत्पवित्रेण कुशादुत्पवनं तथा ।। ५३ ।।
प्रोक्षणीपात्रमेतत्तु सव्ये धृत्वाथ दक्षिणे ।
अङ्गुष्ठानामिकाभ्यां तु जलोदङ्मनसाचरेत् ।। ५४ ।।
प्रणीतोदकतो भूयः प्रोक्षयेत्प्रोक्षणीजलम् ।
प्रोक्षणीपात्रं सवनौ संस्थाप्य तज्जलेन वै ।। ५५ ।।

आसादितानां पात्राणां क्रमेण प्रोक्षयेत्ततः ।
अग्निप्रणीतयोर्मध्ये समं च समुदाहृतम् ।। ५६ ।।
प्रोक्षणीं स्थापयेत्तत्र होमकर्मविशारदः ।
आज्यनिर्वापणे जाते मोदके चरुपात्रके ।। ५७ ।।
तण्डुलानि च निक्षिप्य ततश्च आज्ययोः पुनः ।
सहाधिश्रयणं कुर्य्यात्पर्य्यग्निकरणं ततः ।। ५८ ।।
आज्योद्वासनमानीय चरूद्वासनमेव च ।
वह्नेरुत्तरतः कृत्वा स्थापनं देशिकोत्तमः ।। ५९ ।।
आज्योत्पवनमावृत्य चाज्यावेक्षणमाचरेत् ।
प्रोक्षण्युत्पवनं कार्य्यं सन्निधाय पवित्रकम् ।। ६० ।।
कुशानुपयमान् सव्ये धृत्त्वोत्तिष्ठन्समित्क्षिपेत् ।
पवित्रसहितेनायं प्रोक्षणीपात्रवारिणा ।। ६१ ।।
ऐशान्यकोणादारभ्य चाग्नेः पर्य्युक्षणं चरेत् ।
ब्रह्मणा स्पृश्यमानस्तु जानुदेशे कुशेन च ।। ६२ ।।
आज्यं होमं ततः कुर्य्याच्छ्रुवेणैव यथाविधि ।
संश्रवस्थापनं कार्य्यमाधारवाज्यभागकौ ।। ६३ ।।
महाव्याहृतयस्तावद् भवन्ति मुनिसत्तमाः ।
स्विष्टकृच्चेति सर्वेषां प्रायश्चित्तनिमित्तजम् ।। ६४ ।।
प्रजापतिरयं शब्दः प्रणवाद्यो यदा पुनः ।
स्वाहा ओं च चतुर्थ्यन्तः पूर्वाधार स उच्यते ।। ६५ ।।
इदं प्रजापतये चेत्याचार्य्यात् संश्रवं पुनः ।
प्रजापतिमिवेन्द्रं च होमयेद्विधिना द्विजः ।। ६६ ।।
दक्षिणाधार एषोऽपि कथितो मे नृपर्षभ ! ।
अग्नीषोमौ तदा प्राज्ञः जुहुयात् क्रमतः शुचिः ।। ६७ ।।

पश्चिमोत्तरनामानौ त्वाधारौ च तथा स्मृतौ ।
पुण्याहवाचनं कुर्य्यात्तदादौ गोत्रनामके ।। ६८ ।।
उच्चार्य्य विधिवद्धीमान् वैष्णवाग्नौ च पावने ।
होमारम्भः क्रियते च तारावारादिकं वदेत् ।। ६९ ।।
अयं चामृतयोगस्तु ग्रहाः सर्वे वदन्नृप ।
एकादशस्थाः फलदा भवन्तु च भवन्तु च ।। ७० ।।
शुभं भवत्विति तदा त्रिवारं कर्मकृद्वदेत् ।
अग्निं ध्यायेत्ततो धीमान् ध्यानं तच्छृणु भूपते ।। ७१ ।।
आस्ययुगललिप्तम् ऋतुनेत्रं,
पिङ्गलं सप्तबाहुमनिन्द्यम् ।
राजमानचरणत्रितयमुद्यन्-
मेखलायितगुणत्रयरम्यम् ।। ७२ ।।
सप्तजिह्वमुदितार्कसमाभं
वेदसंख्यं पृथुलोर्च्चकशृङ्गम् ।
मेषवाहनमनुत्तमयज्ञसूत्र-
वन्तमतिचारुजटालिम् ।। ७३ ।।
अक्षमाला च शक्तिश्च श्रुक्स्रुवौ दक्षवाहुषु ।
तोमरऋग्यजनं चैव घृतपात्रं च वामके ।। ७४ ।।
वामपार्श्वे स्वधा तस्य स्वाहा देवी च दक्षिणे ।
विष्णोः कर्मसु सर्वेषु वह्निमेतादृशं स्मरेत् ।। ७५ ।।
इति ध्यात्वाथ तद्वह्नौ मूलेन द्वादशाहुतीः ।
हुत्वा तु चिन्तयेत्तस्य गर्भाधानमिति द्विजः ।। ७६ ।।
नराधिपतया पुंसवनं द्वितीयमुच्यते ।
सीमन्तोन्नयनं कर्म तृतीयं मुनिभिः स्मृतम् ।। ७७ ।।

चतुर्थं जातकर्मेदं नामकर्म च पञ्चमम् ।
बहिर्निष्क्रमणं कर्म षष्ठं च नृपसत्तम ।। ७८ ।।
अन्नप्राशनकर्मेदं चूडाकर्म तथाष्टमम् ।
नवोपनयनं कार्य्यं विवाहो दशमः स्मृतः ।। ७९ ।।
एतत्कर्मसु प्रत्येकं सर्वेषु द्वादशाहुतीः ।
हुत्वा सर्वत्र मतिमान् चिन्तयेच्च क्रमाद्द्विजः ।। ८० ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये चत्वारिंशोऽध्यायः ।।

एकचत्वारिंशोऽध्यायः

ब्रह्मोवाच

इदानीं होमकर्मेदं श्रूयतां तत्तु यद् भवेत् ।
तच्छ्रुत्वा मानवा यावत्तदा भाग्यभृतश्च ते ।। १ ।।
भूरित्यस्य च मन्त्रस्य प्रजापतिरहं ऋषिः ।
गायत्रीछन्द एवात्र देवता वह्निरुच्यते ।। २ ।।
विनियोगस्त्वाज्यहोमे ततः प्रणवमुच्चरेत् ।
प्रथमान्तश्च भूशब्दः स्वाहान्तश्चेति संवदेत् ।। ३ ।।
उक्त्वा हुनेद् यथान्यायं संस्रवं धारयेत्ततः ।
भुव इत्यस्य मन्त्रस्य ऋषिश्चैव प्रजापतिः ।। ४ ।।
छन्द उष्णिगसौ चात्र देवता वायुरेव च ।
होमे तु विनयोगः स्यात्पूर्ववत्संस्रवं चरेत् ।। ५ ।।
स्वरित्यस्य च मन्त्रस्य प्रथमं प्रणवं वदेत् ।
पूर्ववदृषिमाभाष्य छन्दोऽपि त्रिष्टुभाख्यकम् ।। ६ ।।

सूर्य्यश्च देवता ख्यातो विनियोगश्च पूर्ववत् ।
होमं कृत्वा प्रयत्नेन पूर्ववत् संस्रवस्तथा ।। ७ ।।
तिसृणां व्याहृतीनां तु युगपन्नामधारणम् ।
कृत्वाचम्य च होमे तु सर्वं कृत्वा तु पूर्वकम् ।। ८ ।।
गायत्र्युष्णिगनुष्टुप्त्रिष्टुभाख्यं ऋषयस्तथा ।
अग्निर्वायुश्च सूर्य्यश्च देवताश्चात्र सम्मताः ।। ९ ।।
पूर्ववद्विनियोगश्च तथा होमश्च संस्रवः ।
अनेनैव विधानेन होमकर्म समाचरेत् ।। १० ।।

सूत उवाच

महाव्याहृतिहोमोऽयं कथितो भवतां पुरः ।
इन्द्रद्युम्नाय राज्ञे च विधिना यद्विभाषितम् ।। ११ ।।

ब्रह्मोवाच

त्वन्नोऽग्न इति मन्त्रस्य वामदेव ऋषिः स्मृतः ।
त्रिष्टुभाख्यमिदं छन्दस्त्वग्निश्च वरुणस्तथा ।। १२ ।।
देवतेऽत्र परिख्याते विनियोगश्च पूर्ववत् ।
त्वन्नोऽग्न इति मन्त्रेण होमं कुर्य्याद्यथाविधिः ।। १३ ।।
इदमग्निवरुणाभ्यामिति संस्रवं धारयेत् ।
सत्वन्नोऽग्नेश्च मन्त्रस्य पूर्ववदृषिरेव च ।। १४ ।।
पूर्ववच्छन्द एवात्र देवता चात्र पूर्ववत् ।
पूर्ववद्विनियोगः स्यात्सत्वन्नोऽग्ने तु होमयेत् ।। १५ ।।
संस्रवं पूर्ववत्कुर्य्यात्तत्त्वायामि ब्रह्मेत्यतः ।
मन्त्रस्य ऋषिरेवात्र प्रजापतिरहं नृप ! ।। १६ ।।
अग्निश्च देवता चात्र विनियोगस्तु पूर्ववत् ।
अयाश्चेति मनुं चोक्त्वा हुनेदाचार्य्यसत्तमः ।। १७ ।।

इदमग्नये इत्युक्त्वा संस्रवं धारयेत्पुनः ।
ये ते शतमपीत्यस्य मन्त्रस्य च नराधिप ! ।। १८ ।।
शुनःशेफ ऋषिः ख्यातः छन्दश्च त्रिष्टुभाख्यकम् ।
वरुणः सविता विष्णुर्विश्वेदेवाश्च वायवः ।। १९ ।।
स्वर्कश्चात्र महीपाल देवताः कथिता बुधैः ।
तथैव विनियोगः स्याद्येते शतमिमं मनुम् ।। २० ।।
उक्त्वा च होमयेद्धीमान् तेषां नाम सुसंस्रवः ।
उदुत्तममिति श्रीमन् ! मन्त्रस्यास्य महामते ! ।। २१ ।।
पूर्ववद्दृषिरेवात्र पूर्ववच्छन्द एव च ।
वरुणो देवता ख्याता विनियोगश्च पूर्ववत् ।। २२ ।।
उदुत्तममिति स्पष्टमुक्त्वा मन्त्रं हुनेद्बुधः ।
इदं च वरुणायेति संस्रव स्यान्महीपते ! ।। २३ ।।
अथ प्रणवमुच्चार्य्य चतुर्थ्यन्तेऽग्निबल्लभाम् ।
प्रजापतिमिमं शब्दमुक्त्वा होमं ततश्चरेत् ।। २४ ।।
इदं प्रजापतये च त्यतिसंस्रवमाचरेत् ।
अग्निस्विष्टकृतं चैव चतुर्थ्यन्तेऽग्निबल्लभाम् ।। २५ ।।
युगपत्कथयित्वेति हुनेत्तद्वच्च संस्रवः ।
वैष्णवाग्निमिमं शब्दं प्रणवाद्यं नमोऽन्तकम् ।। २६ ।।
चतुर्थ्यन्तं तु तं कृत्वा सामान्यविधिनार्च्चयेत् ।
पूर्णाहुतिं ततः कुर्य्याद्यथा भवति तच्छृणु ।। २७ ।।
आज्यस्थाली त्रयो दर्भाः पुनर्दर्भाश्च तादृशाः ।
श्रुवस्रुचौ च नृपते ! तथैका समिदुत्तमा ।। २८ ।।
आज्यमाज्यस्य च स्थाल्यामाज्यनिर्वाप एव वा ।
आज्याधिश्रयणं चाथ पर्य्यग्निकरणं ततः ।। २९ ।।
आद्यदर्भत्रयेणाथ श्रुवस्रुङ्मार्जनं चरेत् ।
कुशत्रयेण चान्येन तत्राज्योत्पवनं पुनः ।। ३० ।।

आज्योद्वासनमाकृत्य तथाज्यावेक्षणं चरेत् ।
श्रुवेणैव स्रुचि पुनश्चतुराहुतिसंग्रहः ।। ३१ ।।
तस्योपरि समिद्दानं नारिकेलफलं न्यसेत् ।
पूर्द्धानमिति मन्त्रस्य भारद्वाजो मुनिः स्मृतः ।। ३२ ।'
अनुष्टुभाख्यकं छन्दो वैश्वानरश्च देवता ।
अभीष्टसिद्धौ पूर्ण्णायामाहुतेर्होम एव च ।। ३३ ।।
विनियोगश्चेति वाक्यमुक्त्वाथ मन्त्रवित्तमः ।
मूर्द्धानमिति मन्त्रेण पुर्ण्णाहूतिमथार्पयेत् ।। ३४ ।।
ततो वह्निं विष्णुरूपं विचिन्त्य प्राशनं ततः ।
मार्जनं च ततः कृत्वा कृतस्यास्य च कर्मणः ।। ३५ ।।
सुप्रतिष्ठार्थमेवैतद् ब्रह्मणे पूर्ण्णपात्रकम् ।
दक्षिणां दापयेद्धीमान् सर्वभूपशिरोमणे ! ।। ३६ ।।
पवित्रप्रतिपत्तिश्च प्रणीताया विमोचनम् ।
विसर्जनं ब्रह्मणश्च तथा वह्नेर्विसर्जनम् ।। ३७ ।।
शान्तिकरणमाकुर्य्यात्तथाछिद्रावधारणम् ।
भोजनं ब्राह्मणानां च कारयेन्नृपसत्तम ! ।। ३८ ।।

सूत उवाच

इन्द्रद्युम्नं महीनाथं ब्रह्मणा कथितं विधिम् ।
वैष्णवाग्नेश्च भवतां पुरतोऽयं विभाषितः ।। ३९ ।।
इत्येवं गदतोऽथ वैष्णवबृहद्भानुव्यवस्थापनं
नानाकल्मषमोक्षदं सुखकरं तत्स्थापितं भो द्विजा ।
मुद्राणां समिधां च लक्षणमथ स्थालीद्वयस्यापि तत्
वक्ष्ये यत्कथितं पुरापि विधिना भक्तं प्रति क्ष्मापतिम् ।। ४० ।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकचत्वारिंशोऽध्यायः ।।

द्विचत्वारिंशोऽध्यायः

सूत उवाच

वैष्णवाग्नेर्द्विजा भूयः स्वरूपं कथयामि वः ।
होमश्च यत्र कर्त्तव्यस्तच्च कार्य्यस्य सिद्धिदम् ।। १ ।।
आज्यस्थाल्याश्चरोस्थाल्या मुद्राणां समिधां च यत् ।
इन्द्रद्युम्नं प्रति नृपं विधिनोक्तं वदाम्यहम् ।। २ ।।

ब्रह्मोवाच

वह्नेर्यज्ज्वलनं भूप ! मुखं तच्च प्रचक्षते ।
यत्र काष्ठं शिखाभावे श्रोत्रं धूमोऽस्य नासिका ।। ३ ।।
यत्राल्पज्वलनं तत्र तस्य नेत्रं विदुर्बुधाः ।
भस्मतः शिर एव स्याद्रूपं वह्नेः प्रकीर्त्तितम् ।। ४ ।।
कर्ण्णहोमे महाव्याधिर्नेत्रहोमेऽन्धता भवेत् ।
नासिकायां महापीडा शिरोहोमेऽतिदुःखता ।। ५ ।।
आस्यहोमे महीपाल ! सर्वसिद्धिर्भवेन्नृणाम् ।
तस्मादग्निं परिज्वाल्य तन्मुखे होमयेत्सुधीः ।। ६ ।।
सर्वसिद्धिमवाप्नोति मुखहोमान्न संशयः ।
होममुद्राः प्रवक्ष्यामि श्रूयतां सावधानतः ।। ७ ।। ।
मृगी हंसी शूकरीति त्रिधा मुद्राः प्रकीर्त्तिताः ।
तत्र तत्र प्रशस्ता सा विपरीता त्वनर्थदा ।। ८ ।।
शूकरी करीसंकोचे हंसी मुक्तकनिष्ठिका ।
मुक्तौ कनिष्ठतर्जन्यौ मृगी मुद्रा प्रकीर्त्तिता ।। ९ ।।
शान्तिपौष्टिककर्मार्थं मृगी हंसी च कथ्यते ।
कामदा साधकानां तु होमकर्मकृतामिह ।। १० ।।

आभिचारादिकर्मार्थं शूकरी कथिता बुधैः ।
उच्चाटने मोहने च स्तम्भने कर्षणे तथा ।। ११ ।।
विद्रावणे मारणे च भद्रामुद्रा च शूकरी ।
ब्रह्माविष्टरसंख्यायाः कथ्यतेऽथ नृपोत्तम ! ।। १२ ।।
यथा ब्रह्मभवेत्तद्वद् विष्टरश्च यथा भवेत् ।
तयोर्विवरणं ब्रूमः श्रूयतामेकचेतसा ।। १३ ।।
पञ्चाशत्कुशवृन्दश्च दक्षावर्त्तेन संयुतः ।
उद्‌र्ध्वकेशः सुशोभाढ्यो ब्रह्मेति च निगद्यते ।। १४ ।।
तदर्द्धकुशवृन्दस्तु लम्बकेशः सुशोभनः ।
वामावर्त्ते भवेद्ब्रह्मा दक्षावर्त्तस्तु विष्टरः ।। १५ ।।
अथ श्रुवस्रुचेर्भूप ! लक्षणं कथ्यतेऽधुना ।
पलाशाश्वत्थयोः काष्ठैः शम्यायाःश्वखदिरस्य च ।। १६ ।।
सालशारङ्गयोश्चापि स्रुवः स्याद्धरणीधव ।
अश्वत्थं च विना शक्रसमाः शेषाः स्रुवस्य च ।। १७ ।।
स्रुचं प्रकल्पयेद्राजन् वक्ष्यमाणेन दारुणा ।
श्रीपर्ण्या शिंशपायाश्च तथा क्षीरभृतां शुभैः ।। १८ ।।
स्रुवं वदति सर्वत्र ब्रह्मकर्मसुशोभनम् ।
तेषां मध्ये गृहीत्वैकं मानं षड्‌विंशकाङ्गुलम् ।। १९ ।।
विंशांशैश्च भवेद्दण्डो वेदी तैरष्टभिर्भवेत् ।
कण्ठमेकांशतः कुर्य्यात्सप्तांशेन मुखं स्मृतम् ।। २० ।।
वेदी त्र्यंशेन विस्तार कर्ण्णिकांशक कीर्त्तिता ।
अग्रं कुर्य्यात्कण्ठमानान्मुखे मार्गं च कारयेत् ।। २१ ।।
कनिष्ठाङ्गुलिमानेन कर्ण्णिका स्यान्महीपते ! ।
विदधीत शुभां तस्य कटीमेकांशतोऽभितः ।। २२ ।।

तस्य भावैस्त्रिभिर्वृत्तो बहिरर्द्धांशतो भवेत् ।
अंशेनैकेन परितः पात्राणि परिकल्पयेत् ।। २३ ।।
अर्द्धांशतो मेखला स्यान्मुखवेद्यो समन्ततः ।
एवं क्रमेण विधिवन्निर्माणमुचितं भवेत् ।। २४ ।।
दण्डमूलाग्रयोः कुम्भ्योः गुणवेदाङ्गुलैः क्रमात् ।
गण्डीयुगं यमांशैः स्याद्दण्डस्यार्द्धं हरेदिति ।। २५ ।।
वेद्याश्च पृष्ठभागेऽसौ षड्भिरंशैश्च कर्मवित् ।
हंसवक्त्राभवद्भूप ! राहुवत् पुत्रिवत्तथा ।। २६ ।।
मुखं च विलिखेत्पश्चाद्भागे वेद्याश्च तत्त्ववित् ।
मुखस्य पृष्ठभागस्य स्रुचः प्रोक्तां तु लक्षणम् ।। २७ ।।
चतुर्विंशांशतो भूप ! स्रुचश्च स्रुवमाचरेत् ।
द्वाविंशत्या दण्डमानामंशैरेतस्य कीर्त्तितम् ।। २८ ।।
चतुर्भिरंशैरानार्हः कर्षाम्बुग्राहि तच्छिरः ।
चतुर्भिरंशैर्निखनेत्पङ्के मृगपदाकृतिम् ।। २९ ।।
दण्डमूलाग्रयोर्गण्डी भवेत्कङ्कणभूषिता ।
समिल्लक्षणमाचक्ष्ये शुभाशुभफलप्रदम् ।। ३० ।।
सल्लक्षणं च कुरुते मङ्गलं जायते पुनः ।
अन्यथा चेत् प्रभवति नानादुःखकरं सदा ।। ३१ ।।
समिधश्च प्रकर्त्तव्याः कर्त्तुः प्रादेशसंमिताः ।
वन्यास्त्वचायुताः शुद्धा ऋजवो दलवर्जिताः ।। ३२ ।।
नातिह्रस्वा न च स्थूला न वक्राश्च महीपते ! ।
द्विधा प्रजा न हि तथा नातिदीर्घाश्चि कण्टकाः ।। ३३ ।।
नोत्पाटिता न भग्नाश्च समिधः शुभदायिकाः ।
सर्व कर्म सुविख्यातास्त्वन्यथाप्यशुभा मताः ।। ३४ ।।

क्षीणायुष्का विशीर्ण्णाश्च सदला रोगदायिनी ।
दौर्वल्यदा च ह्रस्वा चेद्वक्रा स्थानहरा स्मृताः ।। ३५ ।।
द्विधा प्रजावैरिवृद्धिः कृशासर्वस्वनाशिका ।
स्थूला नाशयते लक्ष्मीं दीर्घा विघ्नप्रदायिनी ।। ३६ ।।
आर्द्राः प्रादेशमात्रा च छेदिता च त्वरण्यजा ।
अनामिकाङ्गुलिसमा न सूक्ष्मा न च पुष्टिका ।। ३७ ।।
त्वचायुतास्ता समिधः प्रशस्ता होमकर्मणि ।
नोत्पाटितां नातिह्रस्वां न वक्रां नातिपुष्टिकाम् ।। ३८ ।।
लतापल्लवसंयुक्तां द्वादशाङ्गुलसम्मिताम् ।
पौष्टिके शान्तिके चैव समिधः तादृशी हुनेत् ।। ३९ ।।
पवित्रलक्षणं भूयः कथयामि नृपोत्तम ! ।
अर्च्चाभिः साग्रकं रम्यं कुशयुग्मं पवित्रकम् ।। ४० ।।
शूद्रादिना स्पृश्यमानं सकृदाच्छिन्नमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं नृपसत्तम ! ।। ४१ ।।
अच्छिन्नाग्रौ तु दर्भौ द्वौ प्रादेशौ तु प्रमाणतः ।
अन्तःसूक्ष्मकुशाहीनौ पवित्रमिति कीर्त्तितम् ।। ४२ ।।
कर्मणि प्रत्यहं शुद्धौ न च पर्य्युषितौ च तौ ।
तस्मादनुदिनं भूयः कर्त्तव्यौ तादृशौ कुशौ ।। ४३ ।।
वटुं धारयते यस्तु विना मन्त्रेण भूसुरः ।
तेन कर्म कृतं रक्षोग्राह्यं भवति नान्यथा ।। ४४ ।।
रमामायाकामबीजयुताय वटुकाय च ।
नमोऽन्तायेति राजेन्द्र ! वटुमन्त्रः स उच्यते ।। ४५ ।।
तन्मन्त्रेण वटुं गृह्णन् कर्मसिद्धिमवाप्नुयात् ।
अङ्गुल्यग्रे तपो वृद्धिः मध्ये सिद्धिर्भवेद्ध्रुवम् ।। ४६ ।।

मूले काम्यप्रदं चाहुः वटुकग्रहणं बुधाः ।
कुशहीनं तु यत्कर्म कुरुते यदि भूसुरः ।। ४७ ।।
तत्कर्म निष्फलं ज्ञेयं कर्मशस्ताः कुशाः यतः ।
इन्द्रो यथा वज्रहस्तश्चक्रहस्तो यथा हरिः ।। ४८ ।।
शूलहस्तो यथा शम्भुः कुशहस्तस्तथा द्विजः ।
आज्यस्थाल्या लक्षणं हि तद्वदामि तवाग्रतः ।। ४९ ।।
चरुस्थाल्याश्च राजेन्द्र ! कर्मिणां हर्षवर्द्धनम् ।
तैजसद्रव्यसम्भूता त्वाज्यस्थालीं विचक्षणैः ।। ५० ।।
कर्त्तव्यं कर्म सुप्राज्ञो विशेषाद्धोमकर्मणि ।
विभवस्यानुमानेन स्थालिका शुभदायिका ।। ५१ ।।
वैष्णवाग्नेश्च होमार्थं चतुर्विंशपलैः स्मृता ।
तदर्द्धं वा प्रकर्त्तव्या नित्यहोमस्य कर्मणि ।। ५२ ।।
सुदृढामव्रणां भद्रां स्थालीं कुर्य्यान्महोदयाम् ।
चरुस्थालीभवेत् प्राज्ञे पित्तलैश्चाथ मृण्मयैः ।। ५३ ।।
यथाशक्ति विधातव्या वित्तशाष्ठ्यं न कारयेत् ।
चरुप्रमाणतः स्थाली कुर्य्याच्चर्वन्नसिद्धये ।। ५४ ।।
अवश्यमेव कर्त्तव्यं सर्वेषां हितकाम्यया ।
अन्नं विना न वर्त्तेत जगदेतत् प्रतिष्ठितम् ।। ५५ ।।
तस्मादन्नस्य कर्त्तव्या हेतोः स्थाली महीपते ! ।
स्वशाखोक्ततया राजन् ! चरुं कुर्य्यात्प्रयत्नतः ।। ५६ ।।
न च स्विन्नं न दग्धं च न चैव शिथिलं नृप ! ।
न भज्यमानमाज्याक्तं रम्यं देवप्रियं शिवम् ।। ५७ ।।
शुद्धं प्रयत्नतः कुर्य्यात्तादृक् चरुमनुत्तमम् ।
प्रस्थत्रयेण तत्कुर्य्याद्वैष्णवानलहोमके ।। ५८ ।।

वैश्वदेवविधिं वक्ष्ये श्रूयतां नृपसत्तम ! ।
पञ्चभूः संस्कृतीः कुर्य्यात् स्थण्डिलेऽग्निपुरस्थले ।। ५९ ।।
ब्रह्माणं प्रणवाद्यं च चतुर्थ्यन्तेऽग्निवल्लभाम् ।
वास्तोस्पतिं तथा कृत्वा प्रजापतिमनन्तरम् ।। ६० ।।
विष्णुं तथा च मतिमान् विश्वकर्त्तारमेव च ।
नियोक्त्या क्रमतो भक्त्या जुहुयात्संस्कृतेऽनले ।। ६१ ।।
स्वस्वनाम्ना प्रकुर्वीत संस्रवं च पृथक् पृथक् ।
द्वारपार्श्वयुगे चण्डप्रचण्डौ प्रतिदापयेत् ।। ६२ ।।
नमोऽन्तनाममन्त्रेण चरुं च संस्रवं तथा ।
ऐशान्ये क्षेत्रपालं च विरूपं दक्षिणे तथा ।। ६३ ।।
नैर्ऋत्यां गणनाथं च प्राच्यां दुर्गां सरस्वतीम् ।
महालक्ष्मीं महेन्द्रं च कौवेरदिशि दापयेत् ।। ६४ ।।
आग्नेय्यां दिशि पार्श्वस्था पशूनां पतिरेव यः ।
यो नारद इति ख्यातः स च दद्याच्चरुं नृप ! ।। ६५ ।।
वायव्यां दिशि राजेन्द्र ! वह्निं प्रतिचरुं न्यसेत् ।
विश्वसाक्षिणमालक्ष्य मध्ये दद्याच्चरुं पुनः ।। ६६ ।।
पञ्चप्राणानभिपुनश्चरुं दद्याद्यथाक्रमम् ।
आद्यं तयोर्जलं दद्यात्प्रत्येकं बलिकर्मणि ।। ६७ ।।
नमोऽन्तं च चतुर्थ्यन्तं प्रणवाद्यं महीपते ! ।
सर्वेषां नाम चोक्त्वाथ चरुं दद्याद्बुधः शुचिः ।। ६८ ।।
अथार्च्चकः समाप्यैतल्लक्ष्मीं ध्यायेत्सुरेश्वरीम् ।
विष्णोः श्रीजगदीशस्य नीलाचलनिवासिनः ।। ६९ ।।
बलभद्रान्वितस्यापि माधवेन सुरैः समम् ।
वर्त्तमानस्य च मुदे पाकार्थं याहि सिन्धुजे ।। ७० ।।

तव दृष्ट्या यतो रम्यं नानाव्यञ्जनसंयुतम् ।
नानापूपसमायुक्तं भर्जनाबलिमञ्जुलम् ।। ७१ ।।
घृतैर्जर्जरितं तावत् खेचरान्नमनुत्तमम् ।
चतुर्विधमिदं रम्यं रस्यमानन्दवर्द्धनम् ।। ७२ ।।
अन्नं यथा स्यात्कमले लोभनीयतरं बहु ।
जगन्नाथस्य तृप्त्यर्थं कुरु साम्प्रतमब्धिजे ।। ७३ ।।
इति ध्यात्वामलां लक्ष्मीं संप्रार्थ्य च पुन: पुन: ।
प्रार्थयेद् गणनाथं च भूपसत्तम ! पूजक: ।। ७४ ।।
नमामि गणनाथं त्वां सर्वविघ्नपतिं प्रभुम् ।
विघ्नलेशो यथा न स्यात्पाकेऽस्मिन् कुरुत तथा ।। ७५ ।।
विधिमेवं प्रकुर्वीत प्रत्यहं नियतेन्द्रिय: ।
अन्यथा न भवेद्विष्णो: स सन्तोषो महीपते ! ।। ७६ ।।
विधिहीनं यदा कर्म जायते केशवार्च्चने ।
न गृह्णाति तदा पूजां जगदीशो महीपते ! ।। ७७ ।।
तस्मादेतद्विधिं कुर्य्यात् प्रयत्नेनैव सत्तम: ।
वैष्णवाग्निरयं भूप ! पावनश्च जगत्त्रये ।। ७८ ।।
अनेन धूपं तद्विष्णोर्दीपदानं महोदयम् ।
आरात्रिकां तथा कुर्य्यादवश्यं मङ्गलोदयाम् ।। ७९ ।।
वैष्णवाग्नियुतं धूपं दीपमारात्रिकां तथा ।
ये पश्यन्ति महाविष्णोर्मुक्ता: स्यु: भवबन्धनात् ।। ८० ।।
एतानि पूर्ववत् कृत्वा षडङ्गन्यासमाचरेत् ।
करन्यासं तत: कुर्य्यादङ्गन्यासं तथैव च ।। ८१ ।।
आदित्यं च रविं चैव भानुं भास्करमेव च ।
सूर्य्यं च क्रमतो न्यस्येदादित्यादीनि पञ्च च ।। ८२ ।।
आदित्याय नम इति वदेत्प्रणवपूर्वकम् ।
शिरस्यास्ये च हृदये गुह्ये पादतले तथा ।। ८३ ।।

आदित्यवन्न्यसेत्तत्र तांश्च तत्रैव भूपते ! ।
मस्तके मुखदेशे च कण्ठे च हृदये तथा ।। ८४ ।।
कुक्षौ नाभौ ध्वजे पादे मन्त्राक्षरचयं न्यसेत् ।
प्रत्येकं प्रणवाद्यं च नमोऽन्तं तत्र तत्र च ।। ८५ ।।
एवं क्रमेण विधिवत् न्यासकार्य्यं समाचरेत् ।
न्यसेत्तदा पूजकोऽसौ सूर्य्यध्यानं ततः शृणु ।। ८६ ।।
शोणाम्भोजयुगं भयेप्सितकरं केयूरहाराङ्गद-
भ्राजत्कुण्डलमण्डितं त्रिनयनं माणिक्यवन्मस्तकम् ।
मन्दारद्युतिसुन्दरं सुरभसं घोरान्धकारछिदं
लोकानन्दकरं शुभं परतरं वन्दे सदा भास्करम् ।। ८७ ।।
एवं प्रातः सुरं सूर्य्यं ध्यात्वा मध्यंदिने तथा ।
ध्यायेद्यथा तद्वदामि श्रूयतां नृपसत्तम ! ।। ८८ ।।
रक्ताम्भोजवरासनं गुणनिधिं त्रैलोक्यशर्मप्रदं
फुल्लाम्भोजमुखाभयेष्वविलसद्धस्तं शिरोरत्नकम् ।
सौवर्णोत्तमभूषणाञ्चिततनुं देदीप्यमानाकृतिं
भानुं सर्वजनाभिनन्दितपदं मित्रं पवित्रं भजे ।। ८९ ।।
मध्याह्ने पूजने भूप ! सूर्य्यमेवं च चिन्तयेत् ।
चिन्तयित्वार्च्चयेद्विष्णुं नीलाद्रौ दारुरूपिणम् ।। ९० ।।
सायाह्नध्यानमाचक्षे सौरं पापहरं नृप ! ।
दाडिमीकुसुमाकारं श्वेतपद्मलसत्करम् ।। ९१ ।।
सुवर्ण्णभूषणं रम्यं रत्नोल्लासिशिरःस्थलम् ।
सप्ताश्वरथमध्यस्थं व्योममार्गावलम्बिनम् ।। ९२ ।।
ब्रह्मादिदेवतावन्द्यं छायादिपरिसेवितम् ।
ध्यायेदेवं सूर्य्यरूपं त्रैलोक्यानन्दवर्द्धनम् ।। ९३ ।।

एवं त्रिषु च कालेषु ध्यात्वा मुद्रां प्रदर्शयेत् ।
व्योममुद्रा पद्‌ममुद्रा कुम्भमुद्रा च निष्ठुरा ।। ९४ ।।
गोविषाणा धेनुमुद्रा तापिनी सप्तमुद्रिका ।
एता मुद्रा प्रदर्श्याथ व्यापकत्रयमाचरेत् ।। ९५ ।।
अथार्घ्यपात्रविषयं कथयामि नृपोत्तम ! ।
श्रूयतां ते यथा श्रद्धा जायते हृदयेऽमले ।। ९६ ।।
रत्नं हैमं रोप्यकं च पित्तलं ताम्रमेव च ।
शङ्खं च दारुघटितं शस्तमर्घ्यार्पणे रवेः ।। ९७ ।।
एतेषामर्घ्यपात्राणां शङ्खः श्रेष्ठतमो मतः ।
तस्माच्छङ्खेन कृतिना सूर्य्यायार्घ्यं प्रदीयते ।। ९८ ।।
शस्त्रमन्त्रेण च पुनः शङ्खं प्रक्षाल्य तत्र वै ।
मूलमन्त्रेण तेनाशु जलं च पूरयेत्सुधीः ।। ९९ ।।
वैष्णवाग्निविधिं विष्णोर्दीपं वा धूपमेव वा ।
आरात्रिकां वा यः कुर्य्याद्विष्णुं संकोपयेद्ध्रुवम् ।। १०० ।।
विष्णोः क्रोधाग्निना दग्धो लिप्यतेऽत्र न संशयः ।
शैवाग्नेः कीर्त्तनं श्च करोति मानवः सदा ।। १०१ ।।
अवलोकं तथा पूजां प्रदक्षिणमकल्मषम् ।
कृत्वा मुच्येत संसाराम्बुधितो नृपसत्तम ! ।। १०२ ।।
एतद्वैष्णवपावकोत्तमविधिं विष्णौ महाप्रीतिदं
नानाकल्मषमोक्षदं सुखकरं बुद्धिप्रसादप्रदम् ।
ये श्रुत्वा रचयन्ति तेन विधिना पूजां हरेः शाश्वतीं
भुक्त्वा चात्र महासुखं कुलयुतं गच्छन्ति शेषेऽव्ययम् ।। १०३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये द्विचत्वारिंशोऽध्यायः ।।

त्रिचत्वारिंशोऽध्यायः

ब्रह्मोवाच

पाकवेश्मनि तत्कर्म समाप्य परमं पुनः ।
ध्यात्वा रमां गणेशं च नियुज्य पाककर्मणि ।। १ ।।
चेतसा पूजकः श्रीमान् ! ततः प्रासादसन्निधिम् ।
गत्वाग्निकोणे नृपते ! सूर्य्यमत्युग्रमर्च्चयेत् ।। २ ।।
पवित्रेऽवनीदेशे वा जलेऽग्नौ वान्तरीक्षके ।
प्रतिमायां तथाम्भोजे मण्डले स्थण्डिलेऽपि वा ।। ३ ।।
यन्त्रे वा पूजनं चास्य सूर्य्यस्य च महीपते ! ।
चतुर्द्वारसमायुक्तमष्टपत्रदलैस्तथा ।। ४ ।।
कर्णिकारायितं पीठं मध्ये तस्य विराजते ।
सूर्य्ययन्त्रमिदं प्राहुस्तत्रैव पूजनं रवेः ।। ५ ।।
तत्कथ्यते नृपमणे ! विष्णोः प्रीणनहेतवे ।
विना यत्पूजनं सर्वं जायते निष्फलं ध्रुवम् ।। ६ ।।
अष्टाक्षरं चाष्टदलेषु तेषु संन्यस्य च द्वारचतुष्टयेषु ।
वेदांश्च विन्यस्य च मध्यदेशे तारं समान्यस्य पुनश्च सूर्य्यम् ।। ७ ।।
दीप्यमानं सूरं ध्यात्वा तत्रैव नृपसत्तम ! ।
संपूजेदर्च्चकस्तु यथाविधि विधानतः ।। ८ ।।
उपविश्य च पीठेऽसौ घण्टानादं तदा क्रियात् ।
आसने गणेशादीनां वन्दनं चाचरेद्बुधः ।। ९ ।।
तालत्रयेण क्रमतो दिग्बन्धनमथाचरेत् ।
भूतशुद्धिं मातृकां च कृत्वा मूलमनोर्नृप ! ।। १० ।।
ऋष्यादिन्यासमाकुर्य्याद्यथाविधि तदार्च्चकः ।
अष्टाक्षरस्य सौरस्य मन्त्रस्य ऋषिरेव च ।। ११ ।।

भार्गवः कथितो भूपः! गायत्रिछन्द एव च ।
कथितो देवतादित्यस्तत्र पूजनकर्मणि ।। १२ ।।
विनियोगोऽभीष्टसिद्धौ करन्यासं ततश्चरेत् ।
आदौ प्रणवमुच्चार्य्य सत्यायेति ततः परम् ।। १३ ।।
तेजो ज्वालचतुर्थ्यन्तमुक्त्वाथ मणि हुं फट् ।
स्वाहेति कथयित्वाथाङ्गुष्ठाभ्यां च ततो न्यसेत् ।। १४ ।।
ब्रह्माणं चैव विष्णुं च रुद्रमस्मिंश्च भूपते ! ।
मन्त्रोऽयं गदितो भूप तव स्नेहात्सुदुर्ल्लभः ।। १५ ।।
आदौ प्रणवमुच्चार्य्य घृणिशब्दमतः परम ।
सूर्य्यादित्याय चं ततो मन्त्रोऽयं सर्वकामदः ।। १६ ।।
सौराष्ट्राक्षर एवासौ साधकस्येप्सितप्रदः ।
अनेन मन्त्ररत्नेन वरिपूर्णोदरोदरे ।। १७ ।।
गोरोचनां तिलं चैव वैष्णवं कुङ्कुमं तथा ।
श्यामाकं रक्तगन्धं च शालीं दर्भाग्रमेव च ।। १८ ।।
तण्डुलांश्चैव कर्पूरं करवीरं च चन्दनम् ।
दूर्वां चैव महीपाल ! तत्राघ्यार्थं विनिक्षेपेत् ।। १९ ।।
कवचेनावगुण्ठ्याथ गालिनीं तत्र दर्शयेत् ।
शङ्खमुद्रां प्रदर्श्याथ तालत्रयमथार्च्चकः ।। २० ।।
दिग्बन्धनं ततः कुर्य्याद्धेनुमुद्रां च दर्शयेत् ।
अष्टधा मूलमन्त्रं चजप्त्वा च नियतेन्द्रियः ।। २१ ।।
अर्घ्यपात्रजलात्किञ्चित् प्रोक्षण्यां निक्षिपेत्पुनः ।
संस्कृत्य सवर्वस्तूनि नैवेद्यं स्वं च देवताम् ।। २२ ।।
प्रोक्षयेन्मूलमन्त्रेण प्रोक्षणीवारिभिः शुभैः ।
ततोऽष्टदलमन्त्रं तु पीठेऽपि चन्दनाम्भसा ।। २३ ।।

विलिख्य पद्ममुद्रां च दर्शयेत्तदनन्तरम् ।
नवशक्तिस्तत्र तत्र पूजयेत् प्रतिमाः शुभाः ।। २४ ।।
दीपा सूक्ष्मा जया भद्रा विभूतिविमला तथा ।
अमोघा विद्युता चैव तथा च सर्वतोमुखी ।। २५ ।।
एतासां पूजनं येन तद्वदामि नृपोत्तम ! ।
अग्नेर्बीजं चरुं प्राहुस्तलाकारादिभिः सुरैः ।। २६ ।।
आकारान्तैर्युतं कृत्वा तादृशं वह्निबीजकम् ।
समुच्चार्य्य प्रथमतस्तासां नाम पृथक् पृथक् ।। २७ ।।
चतुर्थ्यन्तं नमोऽन्तं च संलक्ष्य पूजयेत्ततः ।
आसां रूपं महीपाल ! गदतो मे निशामय ।। २८ ।।
उद्यद्दीपशिखाकारा दिव्याम्बरधरा सती ।
दीप्ता पद्माभयकरा तत्पद्मदलसंस्थिता ।। २९ ।।
नवयौवनसंपन्ना नानाभूषणभूषिता ।
एतादृशाः समस्तास्ताः प्रतिपत्रं पृथक् स्थिताः ।। ३० ।।
गन्धपुष्पादिभिस्तत्र मनसा पूजयेच्च ताः ।
ततः प्रणवमुच्चार्य्य ब्रह्माविष्णुशिवात्मकः ।। ३१ ।।
सूरोऽयं योगपीठात्मा चतुर्थ्यन्तो नमोऽन्तकः ।
अनेन मनुना राजन् ! पीठमध्ये प्रपूजयेत् ।। ३२ ।।
आवाहनादिकं कृत्वा देवाङ्गे मातृकां न्यसेत् ।
गुणत्रयात्मकं सूर्य्यं प्रतिदद्य नृपोत्तम ! ।। ३३ ।।
गन्धं च पुष्पं मतिमान् दत्त्वा मुद्राः प्रदर्शयेत् ।
वह्नि देशादिकोणेषु पीठं मन्त्राम्बुजस्य च ।। ३४ ।।
हृदयादङ्कमन्त्रैश्च पूजयेत् कल्पविक्रमात् ।
नेत्रयोर्मनुना मध्ये त्वस्त्रमन्त्रेण दिक्षु च ।। ३५ ।।

आदित्यश्च रविश्चैव भानुश्च भास्करस्तथा ।
सूर्य्यश्च पूजनीयास्ते द्वितीयावरणे नृप ! ।। ३६ ।।
उषा प्रज्ञा प्रभा चैव सत्या च सत्यविक्रम ।
तृतीयावरणे पूज्या प्रणवादिविधानतः ।। ३७ ।।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा च ततः परम् ।। ३८ ।।
महालक्ष्मीश्च भूपाल ! पूजनीया विधानतः ।
चतुर्थावरणेऽप्येताः सूर्य्यानन्दप्रदायिकाः ।। ३९ ।।
आदित्यसोमौ भौमश्च बुधश्च गुरुरेव च ।
शुक्रः शनिस्तथा राहुः केतुश्चेति नव ग्रहाः ।। ४० ।।
पूजनीया नमोऽन्ताश्च पञ्चमावरणेयऽनघ ।
इन्द्रमग्निं यमं चैव नैर्ऋतिं वरुणं तथा ।। ४१ ।।
मरुतं धनदं चैव तथेशानं ततः परम् ।
ब्रह्माणं मां तथा विष्णुं पूजयेत्तत्र तत्र च ।। ४२ ।।
षष्ठे चावरणे राजन् ! पूजयेदर्च्चकस्तदा ।
ब्रजशक्तिस्तथा दण्डः खड्गपाशौ च भूपते ! ।। ४३ ।
गदां शूलं पङ्कजं च तथा चक्रं सुदर्शनम् ।
सप्तमावरणे पूज्यान्यायुधानि यथाक्रमम् ।। ४४ ।।
धूपदीपौ ततो दत्त्वा नैवेद्यं च ततः परम् ।
शतमष्टोत्तरं जप्त्वा समर्पणमतः परम् ।। ४५ ।।
गण्डूषान् जलधारांश्च दत्त्वाथ तेजसे पुनः ।
चण्डनैवेद्यमादद्यात् पुष्पयुक्तेन वारिणा ।। ४६ ।।
पुनः कराङ्गयोर्न्यासं कृत्वाथ प्रणिपत्य च ।
स्थितोऽवनौ ततो भानोरैक्यमात्मन एव च ।। ४७ ।।

कृत्वा भावनया भूयो धृत्वा मस्तकमात्मनः ।
निधाय दृष्टिं तत्रैव मूलमन्त्रेण मन्त्रवित् ।। ४८ ।।
दद्यादर्घ्यं तत्र यन्त्रे शङ्खे न भास्करं नृप ! ।
अर्घ्यदानानन्तरतः पुष्पाञ्जलिसमर्पणम् ।। ४९ ।।
प्रणम्य दण्डवद्भूमौ प्रदक्षिणमथाचरेत् ।
सप्तवारं ततो भक्त्या स्तूयादेवं दिवाकरम् ।। ५० ।।
सूर्य्यार्थं वहते यावदर्घ्यपात्रं च यो नरः ।
तावत्तुष्टो दिनेशस्तु तद्वाञ्छाफलदो भवेत् ।। ५१ ।।
अर्घ्यदानान्महीनाथ ! कर्त्तुं सर्वमनोरथान् ।
पूरयेदचिरादेव भास्करोऽर्घ्यप्रियो यतः ।। ५२ ।।
चण्डिका बलिदानेन त्वर्घ्यदानेन भास्करः ।
शङ्करो गीतनृत्याभ्यां नोपवासं विना हरिः ।। ५३ ।।
यदा भानुं प्रति प्रीत्या न दद्यादर्घ्यमुत्तमम् ।
तदा पूजामयं विष्णुः न गृह्णाति कदाचन ।। ५४ ।।
सूर्य्यपूजां विना विष्णोः पूजां यो मूढधीश्चरेत् ।
सा पूजा राक्षसैर्ग्राह्या प्रीतो न स्याज्जनार्द्दनः ।। ५५ ।।

सूत उवाच

एवं त्रिकालेषु रविं पूदजयेद्द्विजसत्तमः ।
प्रातः पूजामिमां कृत्वा द्विकालं वा हृदार्च्चयेत् ।। ५६ ।।
ये सूर्य्यपूजां रचयन्ति मर्त्त्याः
पश्यन्ति ये वा ह्यवलोकयन्ति ।
शृण्वन्ति ये वा भुवि ते सुखानि
विभुज्य शेषे त्रिदिवं प्रयान्ति ।। ५७ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये त्रिचत्वारिंशोऽध्यायः ।।

चतुश्चत्वारिंशोऽध्यायः

सूत उवाच

शृणुध्वं मुनयः सर्वे द्वारपालप्रपूजनम् ।
इन्द्रद्युम्नमभिव्यक्तं विधिना कथितं तु यत् ।। १ ।।

ब्रह्मोवाच

पूर्वद्वारं प्रविश्याऽसौ पीठे तत्र महोदये ।
उपविश्य ततो धीमानासनादिं समाचरेत् ।। २ ।।
मातृकान्तं महीपाल ! सामान्यार्घ्यं ततश्चरेत् ।
पूजको शान्तचित्तात्मा यथोक्तविधिना पुनः ।। ३ ।।

सूत उवाच

सामान्यार्घ्यविधिस्तावत्कथ्यते मुनिपुङ्गवाः ।
देवतायाः पुरश्चापि निजस्य चन्दनाम्भसा ।। ४ ।।
संलिप्य तत्र विलिखेत् त्रिकोणं गन्धपुष्पतः ।
षट्कोणं तत्र चक्राख्यं वृत्तं च सुमनोहरम् ।। ५ ।।
चतुष्कोणं ततः शालां चतुर्द्वारसमन्विताम् ।
आधारसहितं शङ्खं धौतयेत् प्रणवेन तु ।। ६ ।।
अस्त्रमन्त्रेण संरक्ष्य पूरयेत् वारिमूलतः ।
दद्याद्गन्धं च पुष्पं च स्वाहेति कुसुमं क्षिपेत् ।। ७ ।।
त्रिवारं च ततस्तत्र सप्ततीर्थानि सूर्य्यतः ।
मुद्रयाङ्कुशयान्यस्य शङ्खोदरगते दले ।। ८ ।।
स्वकीयहृदयाम्भोजाद्देवं तत्र प्रवे शयेत् ।
भ्रामयन् गालिनीं मुद्रां शङ्खमुद्रां च दर्शयेत् ।। ९ ।।
प्रोक्ष्यमन्त्रेण तद्दृष्ट्वा कवचेनावगुण्ठनम् ।
सुदर्शनं नमोऽन्तं च कृत्वास्त्रं च फडन्तकम् ।। १० ।।

तालत्रयं ततः कुर्य्याद्दिशां बन्धनमाचरेत् ।
धेनुमुद्रां प्रदर्श्याथ जपेन्मूलेन चाष्टधा ।। ११ ।।
देवं चात्मानमव्यग्रो नैवेद्यं प्रोक्षयेद्बुधः ।
इति पञ्चोपचारेषु सामान्यार्घ्यविधिः स्मृतः ।। १२ ।।
द्वारशाखाद्वयोर्मध्ये तत्र दक्षिणदेशतः ।
जयं चण्डं च धातारं बलं च जाह्नवीं तथा ।। १३ ।।
एतास्तदक्षिणे देशे पूज्या द्वारस्य भूपते ! ।
वामपार्श्वेऽथ विजयः प्रचण्डश्च महाबलः ।। १४ ।।
विधाता प्रबलश्चैव यमुना च नृपोत्तम ! ।
एताश्च देवताः सर्वा वामे पूज्या दिने दिने ।। १५ ।।
जयं च विजयं चैव चित्रेणैव विनिर्मितम् ।
आवाह्य देवताः सर्वास्तत्पार्श्वे पूजयेत्क्रमात् ।। १६ ।।
द्वारोपरिष्टाद्विलिखेन्महालक्ष्मीं सुशोभनाम् ।
निधिं शङ्खं च पद्मं तस्याः पार्श्वत्रये नृप ! ।। १७ ।।
तदूर्ध्वदेशे परमे ग्रहाणां स्थापनं लिखेत् ।
द्वाराधोदेशतः श्रीमन् । देहल्यां क्षेत्रपालकम् ।। १८ ।।
कालरात्रिं च संचिन्त्य पूजयेदर्च्चकस्ततः ।
यथोक्तविधिना राजन् ! सम्पाद्य देशिकेन वै ।। १९ ।।
विष्णोश्च पुरतः स्तम्भे तिष्ठन्तं वाहनं खगम् ।
पूजयेच्च यथा ध्यात्वा तत्सर्वं निगदाम्यहम् ।। २० ।।
चण्डं न चिन्तयेच्छान्तं श्यामं कमललोचनम् ।
विष्णुमाधवशोभाढ्यं नानालङ्कारमण्डितम् ।। २१ ।।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।
द्वारस्य दक्षिणे भागे सर्वलोकैकवन्दितम् ।। २२ ।।

शङ्खं च चक्रं च गदाक्षमालां
करैश्चतुर्भिर्दधतं सुरम्यम् ।
नारायणाकारधरं सुनीलं
सव्ये जयन्तं परिचिन्तयामि ।। २३ ।।
धातारं चिन्तयेत्तं च कीर्त्तीश्वरसमप्रभम् ।
हंसपृष्ठगतं चाक्षसूत्रचारुकमण्डलुम् ।। २४ ।।
सर्वाभरणभूषाढ्यं दक्षदेशे स्थितं परम् ।
बलं भूरिबलं धीरं सुन्दरं भक्तितत्परम् ।। २५ ।।
मालाखड्गलसद्धस्तं भावयेत् दक्षिणे मुहुः ।
मनसा भक्तिपूतेन चिन्तयेद्देशिकोत्तमः ।। २६ ।।
कुन्देन्दुहीरधवलां मकराधिरूढां
स्मेराञ्चिताधरतटीं वरसूक्ष्मचेलाम् ।
नीलोत्पलं करतले कलशं च सव्ये
धृत्वा स्थितां हृदि नमामि च जह्नुकन्याम् ।। २७ ।।
शङ्खचक्रगदामाललसत्करचतुष्टयम् ।
नीलाभं वामपार्श्वस्थं सर्वाभरणभूषितम् ।। २८ ।।
नारायणाकाररूपं भक्तिपूतवपुर्द्धरम् ।
सुस्मेरापाङ्गमानन्दप्रदं संविजयं भजे ।। २९ ।।
नवाम्बुदश्यामतरं प्रचण्डं
चण्डांशुवच्चण्डसुतेजसं तम् ।
सुवर्णनेत्रेण च पङ्कजेन
लसत्करद्वन्द्वमहं भजामि ।। ३० ।।
नमामि तं विधातारं हंसवाहनमुत्तमम् ।
किञ्जल्कवर्ण्णरम्याभं मालापुस्तकसत्करम् ।। ३१ ।।

प्रबलं बलिनां श्रेष्ठं खड्गचर्मधरं शुभम् ।
सुवर्ण्णवर्ण्णरत्नाढ्यं सर्वलोकनमस्कृतम् ।। ३२ ।।
यमुनानीलवर्ण्णाभां नानाभूषणभूषिताम् ।
कलशाम्बुजसद्धस्तां कृष्णभक्तिपरां भजे ।। ३३ ।।
द्वारोर्ध्वदेशनिलयां कमलासनीं तां
स्मेराननां कमलरम्यकरां कटाक्षैः ।
तावत्स्वभक्तजनतापहरां मुरारेः
प्राणप्रियां जलधिराजसुतां नमामि ।। ३४ ।।
नानाशर्मप्रदं शान्तं कुन्देन्दुधवलप्रभम् ।
कोटिपुण्यचये दृश्यं तं च शङ्खनिधिं भजे ।। ३५ ।।
सुरासुरनमस्कारचारुपादतलद्वयम् ।
नानाभीष्टचयानन्दप्रदं पद्मनिधिं भजे ।। ३६ ।।
देहल्यन्तिकवासिनं हयचयश्रेष्ठासनं दुर्द्धरं
चञ्चत्खड्गकपालराजितकरं पूर्ण्णेन्दुशोभाधरम् ।
वक्रोत्तुङ्गतराग्रदन्तनिकरं सर्पावलीभूषितं
राजच्चूलिकमस्तकं त्रिनयनं तं क्षेत्रपालं भजे ।। ३७ ।।
तावद्वक्त्रकरालदन्तनिकरप्रोद्भीषणास्यां कृशां
रक्ताक्षां द्विभुजां महोन्नतकुचां चर्मासिराजत्कराम् ।
देहल्युत्तमशायिनीं त्रिनयनां मुण्डावलीमण्डितां
दुष्टध्वंसनतत्परां सुरनुतां तां कालरात्रिं भजे ।। ३८ ।।
तद्विष्णोर्वहने क्षमं बलवतां मध्येवरं सुन्दरम् ।
चञ्चद्भक्तिरसप्रसारणपरं कान्त्या तु कार्त्तस्वरम् ।
अग्रे ध्यानपरायणं गुणत्रयं नागावलीचर्वणम् ।
सर्वेषां बलगर्विणां भयधरं तं पक्षिराजं भजे ।। ३९ ।।

ध्यायेद्रक्तममुं रविं च शशिनं शुभ्रं तु भौमं पुनः
शोणं तावदमुं च चारुमधुना प्रीतं बुधं च क्रमात् ।
शुक्रं शुक्लतमं शनिं च मनसा राहुं च कृष्णत्विषं
केतुं धूम्ररुचिं शुभाशुभफलप्रोल्लासदं भावये ।। ४० ।।
सप्ताश्वरथमध्यस्थं द्विभुजं रक्तवाससम् ।
रक्तवर्ण्णं पद्महस्तं कश्यपाङ्गसमुद्भवम् ।। ४१ ।।
ग्रहराजं चित्रभानुं प्रणमेद् हृदि भक्तितः ।
बाह्यान्तरतमोध्वंसतत्परं चिन्तयेद्रविम् ।। ४२ ।।
शङ्खगोक्षीरसंकाशमात्रेयकुलसम्भवम् ।
मृगाभीतकरद्वयं तं सोमं प्रणमाम्यहम् ।। ४३ ।।
मेषाधिरूढमतिरिक्ततनुं सुरक्त-
माल्याम्बरं भुजचतुष्टयराजमानम् ।
वाञ्छसि शक्तिकगदाधरमाशु वन्दे
रत्नोल्लसत्कनकभूषणभूषिताङ्गम् ।। ४४ ।।
बुधं सिंहगतं वन्दे पीतमाल्याम्बराञ्चितम् ।
चतुर्भुजैर्वरं शङ्खचर्मचारुगदां तथा ।। ४५ ।।
धारयन्तं काञ्चनाभं वन्दे तं बुधमुत्तमम् ।
गुरुं गोरचनाचूर्णं वर्णितं च कलेवरम् ।। ४६ ।।
वराक्षसूत्रदंष्ट्राभपात्रं हस्तचतुष्टयम् ।
सर्वविद्याकरं धीरमाङ्गीरसमहं भजे ।। ४७ ।।
चञ्चच्चन्द्रकरीन्द्रमौक्तिकसुधाश्वेतारविन्दप्रभं
हस्तोल्लासिवराक्षसूत्रविलसद्दण्डाम्बुसद्भाजनम् ।
न्यग्रोधोत्तमसम्भवं भृगुसुतं नानासुखप्रीतिदं
दाहोत्तीर्णसुवर्णभूषणधरं शुक्रं हृदा भावये ।। ४८ ।।

गृध्रासनस्योपरि राजमानं नवाम्बुदश्यामतमं प्रसन्नम् ।
वरत्रिशूलेषु गदाढ्यहस्तं शुभाशुभग्रामफल प्रदानम् ।। ४९ ।।
छायात्मजं कृष्णशरीररूपं
सौराष्ट्रदेशाधिपतिं च मन्दम् ।
सूर्य्याग्निकोटिप्रतिमोग्रभासं ,
शनैश्चरं तं सततं नमामि ।। ५० ।।
नवीनाञ्जनसंकाशं सिंहासनोपरि स्थितम् ।
चतुर्भुजकरोल्लासिवरचर्मासिसद्गदम् ।। ५१ ।।
वक्त्रे दुःखप्रदं शूरं तं राहुं प्रणमाम्यहम् ।
धूम्रवर्ण्णसमायुक्तं गृध्रवाहनराजितम् ।। ५२ ।।
अन्तर्वेदीसमुद्भूतं त्रिभुजं च गदाधरम् ।
सेवितं सर्वलोकैस्तु तं केतुं प्रणमाम्यहम् ।। ५३ ।।

ब्रह्मोवाच

एतासां देवतानां च ध्यानमेतादृशं पृथक् ।
कृतावाह्य तु भूपाल ! तासां नाम पुनः पृथक् ।। ५४ ।।
यथोक्तविधिना सम्यगुपादानं समर्प्य च ।
प्रणवादिनमोऽन्तं च कृत्वा संपूजयेच्च ताः ।। ५५ ।।
गन्धादिनापि विधिना नैवेद्यान्तेन पूजयेत् ।
ताम्बूलानि समर्प्याथ स्तुत्वा तां प्रणमेद्बुधः ।। ५६ ।।

सूत उवाच

एवं विष्णोर्द्वारपालपूजां कृत्वा महर्षयः ।
ततस्तां कालरात्रिं तु प्रार्थयेदर्च्चकः पुनः ।। ५७ ।।
कालरात्रि नमस्तेऽस्तु विष्णोर्देहलिसंस्थिते ।
मार्गं देहि हरेः पूजां करोमि भवदाज्ञया ।। ५८ ।।

एतत् प्रार्थनया साथ सङ्कोचितपदाजनि ।
इति ध्यात्वार्च्चकः श्रीमानुत्तरो देशिको विशेत् ।। ५९ ।।
ततस्तु भैरवध्यानं कृत्वाप्यर्च्चकसत्तमः ।
श्रीसिंहासनपार्श्वस्थं राक्षसादिभयङ्करम् ।। ६० ।।
सर्वभीतिहरं भीमं भक्तप्रीतिकरं सदा ।
ध्यायेत्तं भैरवं भक्त्या पूजाध्यक्षं सुदंष्ट्रकम् ।। ६१ ।।
अहमेव सदा भावये बलिनां दर्पहरं श्रीभैरवम् ।
श्रीसिंहासनपार्श्वस्थं नीलगोत्राधिप पूजने मतम् ।। ६२ ।।
प्रविश्य सः तदाचार्य्यः प्रासादस्य च मध्यतः ।
नमोऽन्तं तं स्वनाम्ना च ब्राह्मणं मनसार्च्चयेत् ।। ६३ ।।
ये मानवाः प्रतिदिनं मधुसूदनस्य
नीलाद्रिकूटनिलयस्य च कल्मषघ्नम् ।
द्वारार्च्चनं परतरं कलयन्ति सन्तः
पश्यन्ति ये च सुखमत्र विभुज्य मुक्ताः ।। ६४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये चतुश्चत्वारिंशोऽध्यायः ।।

पञ्चचत्वारिंशोऽध्यायः

दारुब्रह्मणि तद्विष्णौ बले चैव नृपोत्तम ! ।
भद्रायामपि चित्तेऽस्मिन्भावयेच्छिशुतां शुभाम् ।। १ ।।
नवनीतं करे दक्षे धृत्वा चानुयुगं पुनः ।
पातयित्वावनौ सव्यं हस्तं च क्रीडितं मुदा ।। २ ।।
एतादृशं जगन्नाथं बलभद्रं तदानघ ।
ध्यात्वा सामान्यविधिना प्रथमं पूजयेद्बुधः ।। ३ ।।

दुग्धस्य शर्करायाश्च लाजानां च विकारजैः ।
द्रव्यैरेतैः कृतं दिव्यं नैवेद्यं तत्र दापयेत् ।। ४ ।।
पक्वरम्भाफलान्येव लाङ्गलीशकलानि च ।
शृङ्गवेरस्य खण्डानि नवनीतमनुत्तमम् ।। ५ ।।
एतानि च महाराज ! नैवेद्यानि दिने दिने ।
प्रातःसमयमारभ्य देयानि हरये मुदा ।। ६ ।।
सामान्यविधिपूजां च कथयामि तवाग्रतः ।
पीठे शुद्धे चोपविश्य घण्टानादं समाचरेत् ।। ७ ।।
स्मृत्वाथ पुण्डरीकाक्षं तुलसीदलवारिभिः ।
शिरः प्रमार्जनं कृत्वा त्रिवारं सः परंतपः ।। ८ ।।
तदाचमननिर्धूतकल्मषोऽर्चकसत्तमः ।
कूर्मादिपूजनं कुर्य्याद्यथा तच्छृणु साम्प्रतम् ।। ९ ।।
कूर्मं त्वनन्तं पृथिवीमोंकाराद्यं नमोऽन्तकम् ।
एवमुक्त्वा च कूर्मादीन् संपूज्य मन्त्रमुच्चरेत् ।। १० ।।
पृथ्वी त्वयेति संभाष्य वासनोपरि संविशेत् ।
आसनस्य च मन्त्रस्य मेरुपृष्ठऋषिः स्मृतः ।। ११ ।।
सुतलं छन्द एव स्याच्छ्रीकूर्मोदेवता स्मृता ।
अनन्तो बीजमाख्यातं पृथिवीशक्तिरेव च ।। १२ ।।
आसने विनियोगः स्यात्ततोऽप्यासनमन्त्रवित् ।
आत्मासने पदमिति कमलाय नमस्ततः ।। १३ ।।
इत्युक्त्वा स्वासनं धीमान् ! संपूज्य तत्र संविशेत् ।
वामे गुरून् चतुर्थ्यन्तान् गणेशं दक्षिणे तथा ।। १४ ।।
अग्रे दुर्गां चतुर्थ्यन्तां क्षेत्रपालं च पृष्ठतः ।
नमःशब्दं प्रयुञ्जीत तेषु चान्ते नृपोत्तम ! ।। १५ ।।

ततो नम इति तूक्त्वा गन्धैः हस्तौ विलेपयेत् ।
नमोऽन्तं च चतुर्थ्यन्तं सुदर्शनमतः परम् ।। १६ ।।
अस्त्राय फडितमनुं कथयित्वाथ हस्तयोः ।
शुद्धिमाचर्य्य सहसा गन्धपुष्पैस्ततोऽर्च्चकः ।। १७ ।।
तालत्रयं परं कृत्वा दिग्बन्धनमथाचरेत् ।
ऐन्द्रीं दिशं च चक्रेण बध्नामीति वचोऽब्रूवन् ।। १८ ।।
नमश्चक्राय स्वाहेति कुर्य्याद्दिग्बन्धनंचरेत् ।
एवं दशदिशां कुर्य्यात् क्रमतो बन्धनं नृपः ।। १९ ।।
अस्त्रमन्त्रेण तालोत्थवह्निना देशिकोत्तमः ।
वह्निप्राकारमतुलं चिन्तयेच्चेतसा द्रुतम् ।। २० ।।
त्रैलोक्यं रक्ष रक्ष हूं फट् स्वाहा चेति मन्त्रतः ।
आत्मानं सोऽर्च्चको रक्षेत्तन्मध्ये भावनावशात् ।। २१ ।।
त्रिशूलमुद्रया चाथ रमित्यग्नेश्च बीजतः ।
जलवेष्टनमाकुर्य्यात्ततश्चन्दनसम्भवम् ।। २२ ।।
ज्ञानानलं तथैश्वर्य्याष्टकं छन्दोमनोहरम् ।
वैराग्यकर्ण्णिकायुक्तं प्रणवेन प्रकाशितम् ।। २३ ।।
ध्यायेत्तं हृदयाम्भोजं ततस्तत्कर्ण्णिकां पुटे ।
प्रदीपकलिकाकारं जीवात्मानं विचिन्तयेत् ।। २४ ।।
सुषुम्णा मार्गतो हंस इति मन्त्रेण तं पुनः ।
भावयेद्देशिको पूर्वं स्वहृदि स्थिरमानसे ।। २५ ।।
सहस्रदलसंपन्ने कमले परमात्मनि ।
स्थिते नियोजयेद्धीमान् भूतशुद्धिमथाचरेत् ।। २६ ।।
भूतशुद्धीति मन्त्रस्य शरीरात्मा ऋषिः स्मृतः ।
पुरुषप्रकृतिच्छन्दः सत्येऽत्र देवता स्मृतः ।। २७ ।।

पुरुषो बीजमाख्यातः शक्तिश्च प्रकृतिर्मता ।
भूतशुद्ध्यर्थमेवायं विनियोगः स्मृतो बुधैः ।। २८ ।।
ॐ भूरग्न्यात्मनेऽङ्गुष्ठाभ्यां नम इति संन्यसेत् ।
भुवःशब्दं पुरस्कृत्य प्राजापत्यात्मतत्त्वतः ।। २९ ।।
तर्जनीभ्यां स्वाहा चेति न्यसेद्विप्रः सुसंयतः ।
सुसत्यात्मने मध्यामाभ्यां च वषट् परं न्यसेत् ।। ३० ।।
महः पृथिव्यात्मने चोक्त्वा नासिकाभ्यां च हुं न्यसेत् ।
जनशब्दः तथैवान्ये ब्रह्मणे च ततः परम् ।। ३१ ।।
सूर्य्यात्मने कनिष्ठाभ्यां वौषडिति न्यसेद्बुधः ।
तपो बाह्यात्मने चेति प्रागुक्त्वा देशिकोत्तमः ।। ३२ ।।
करतलकरपृष्ठाभ्यामस्त्राय फडिति न्यसेत् ।
अङ्गन्यासं परं कुर्य्यादेवं देववरार्च्चने ।। ३३ ।।
आकाशवायुतेजोऽम्बु पृथ्वीश्रोत्रत्वचस्ततः ।
चक्षुश्च रसनाघ्राणमुखपाणय एव च ।। ३४ ।।
पादपायूपस्थशब्दं स्पर्शरूपरसास्तथा ।
गन्धाश्च वचनादानगतिश्चैव ततः परम् ।। ३५ ।।
पञ्चविंशतितत्त्वानि कथितानि परंतप ! ।
तत्त्ववृन्दं तु क्रमतो बीजभावेन देशिकः ! ।। ३६ ।।
देहेऽपि लीनमाचिन्त्य स्मरेत्तं पापपुरुषम् ।
वामपार्श्वस्थितं पापं पुरुषं कज्ज्वलप्रभम् ।। ३७ ।।
ब्रह्महत्या शिरोदेशं स्वर्ण्णस्तेयभुजाञ्चितम् ।
सुरापानैकहृदयं गुरुतल्पकटीद्वयम् ।। ३८ ।।
तत्संसर्गपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ।
उपपातकरोमाढ्यं रक्तश्मश्रुविमोचनम् ।। ३९ ।।

मूलाधारस्थितेनैव वह्निना निर्दहेत्तु तम् ।
ॐ यमिति वायुबीजेन निर्दहेत्पापसंज्ञकम् ।। ४० ।।
ॐ लमिति पृथवीबीजं तेनैवाप्लावनं चरेत् ।
ॐ वमित्यमृतबीजेन कुर्य्याच्चामृतवर्षणम् ।। ४१ ।।
तद्वदामि यथा कुय्याद्द्वारैश्च शोणितैः पुरः ।
चतुःषष्ट्या ततः कुर्य्याद्बीजानां चिन्तनं चरेत् ।। ४२ ।।
चतुर्विंशतिसंख्यातैस्तत्र तद्बीजचिन्तनम् ।
कुर्य्यात्ततो द्विजः पञ्चमहाभौतिकचिन्तनम् ।। ४३ ।।
अण्डं द्विखण्डं वै कृत्वा प्रणवेन महासिना ।
भूरित्येकं द्वितीयं द्यौरिति संचिन्त्य चेतसा ।। ४४ ।।
बीजात्मानं समानीय प्रणवेन ततः परम् ।
सोऽहमित्येव मन्त्रेण शरीरेऽमृतसंप्लवे ।। ४५ ।।
प्रवेशयेत्ततो वर्ण्णमयिमास्तां द्वयै पूषाम् ।
धारातया सदुत्पत्तिक्रमेण च ततः परम् ।। ४६ ।।
पञ्चाशद्वर्णघटितं शरीरं समुपादयेत् ।
पृथिव्यादिमहाभूतनियोजनमथाचरेत् ।। ४७ ।।
द्वादशान्तपदात्मानं सोऽहमित्येव मन्त्रतः ।
आनीयाभीष्टदेवार्च्चाभिन्नमात्मानमास्मरेत् ।। ४८ ।।
आत्मानं देशिको ध्यात्वाभीष्टदेवमरिन्दम ।
सोऽहमस्मीत्यभेदेन चिन्तयित्वात्मपूजनम् ।। ४९ ।।
ततश्च मातृकान्यासं मत्तः शृणु महीपते ! ।
मातृकेति च मन्त्रस्य अहं चैव ऋषिः स्मृतः ।। ५० ।।
गायत्रीछन्द एव स्यान्मातृका च सरस्वती ।
देवतात्र परं प्रोक्त्वा मुनिभिः क्षत्रियर्षभ ।। ५१ ।।

हली बीजमिति प्राहुः स्वराश्च शक्तयः स्मृताः ।
लिपिन्यासे मुनिवरैर्विनियोग उदाहृतः ।। ५२ ।।
ॐ अं प्रथमं चोक्त्वाथ कादिडान्तं ततः परम् ।
आचाङ्गुष्ठाभ्यां नमश्च न्यसेन् न्यासकलापवित् ।। ५३ ।।
इं चादौ कथयित्वाथ ओं तान् वर्णान्नियोज्य च ।
इं पुनस्तर्जनीभ्यां च स्वाहेति न्यासमाचरेत् ।। ५४ ।।
आद्यन्तयोरुकारौ द्वौ टादिणान्तं सबिन्दुकम् ।
मध्यमाभ्यां वषडिति न्यासं कुर्य्याद्यथाविधि ।। ५५ ।।
ए ऐं च क्रमतः कृत्वा सानुस्वारं तवर्गकम् ।
मध्येऽथानाभिकाभ्यां हुं गदित्वेति न्यसेद्द्विजः ।। ५६ ।।
ॐ ओं औं च तथा कृत्वा पवर्गं मध्यतः पुनः ।
कनिष्ठाभ्यां वौषडिति करयोरङ्गुलौ न्यसेत् ।। ५७ ।।
अं चादौ पुनरुक्त्वाथ यं रं चैव ततः परम् ।
लादिक्षान्तं वर्णवृन्दम् अश्च संयुज्य देशिकः ! ।। ५८ ।।
करयोः करपृष्ठाभ्याम् अस्त्राय फडिति न्यसेत् ।
करन्यास इव न्यासो भवेदङ्गेऽपि भूपते ! ।। ५९ ।।
अकारादिक्षकारान्तं शिरःप्रभृति संन्यसेत् ।
मातृकां देवतां ध्यायेन् न्यासान्ते पूजकोत्तमः ।। ६० ।।
अकारादिक्षकारन्तैर्वर्णैः सुघटितादिकाम् ।
अक्ष्णा च चन्द्रखण्डाङ्कां धवलां कमलासनाम् ।। ६१ ।।
अक्षमालां सुधाकुम्भं पुस्तकं लिखनं करैः ।
दधानां भावयेन्नित्यां वाग्देवीं हृदि संस्थिताम् ।। ६२ ।।
इति ध्यानं समाचर्य्य देशिको भूपते ! ततः ।
गङ्गा च यमुना चैवेत्यङ्कुशाख्यकमुद्रया ।। ६३ ।।
जलपात्रे ततः पुण्यं गङ्गामावाह्य पातयेत् ।
संस्कृत्य पूर्ववत्तत्तु सामान्यार्घ्यविधिं पुनः ।। ६४ ।।

पूर्ववद्देशिकः कुर्य्यात्पूजाकर्म विशारदः ।
देवपीठे वसुदलं पद्मं संलिख्य पूजयेत् ।। ६५ ।।
पद्ममुद्रां च संदर्श्य नवशक्तिं ततोऽर्च्चयेत् ।
आवाहनादिकं कृत्वा देवाङ्गे मातृकां न्यसेत् ।। ६६ ।।
गन्धादिनैतद्विधिना नैवेद्यान्तेन पूजयेत् ।
ताम्बूलादिं समर्प्याथ स्तुतिं कुर्य्याच्छुभोदयाम् ।। ६७ ।।
शिशुरूपतया विष्णोश्चिन्तितस्य तदर्च्चनम् ।
कुर्वन्ति ये च पश्यन्ति तेषां पक्षे फलं शृणु ।। ६८ ।।
एतत् प्रसादं येऽश्नन्ति गृह्णन्ति ग्राहयन्ति ये ।
ते सर्वे सर्वकामानि लब्ध्वा चान्ते विमोक्षकाः ।। ६९ ।।
एतत्सामान्यपूजाऽसौ कर्त्तव्या प्रथमं मुदा ।
कदाचित् प्रातरर्च्चायाः सङ्गे भवति भो द्विजाः ।। ७० ।।
तस्माद् भूसुरपुङ्गवाः प्रतिदिनं संस्नाप्य रात्रौ पुनः
प्रातःकालमभिश्रियः पतिरसौ पूज्यो विधिज्ञैस्तदा ।
तत्रैव प्रतिवासरं सरभसं यूयं ततः पश्यत
श्रीमद्दारुतनुं तमोभिरतुलैः किं वाधिकं वच्मि वः ।। ७१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पञ्चचत्वारिंशोऽध्यायः ।।

षट्चत्वारिंशोऽध्यायः

ब्रह्मोवाच

अतः परं प्रवक्ष्यामि जगदीशस्य साम्प्रतम् ।
यच्छ्रुत्वा मानवाः सर्वे सर्वान् कामानवाप्नुयुः ।। १ ।।

प्रथमं चिन्तयेद्विष्णुं यथा तच्छृणु भूपते ! ।
निर्मलाकाशदेशस्थं श्वेताम्बुजनिभेक्षणम् ।। २ ।।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।
हारकेयूरकटकश्रीमत्कुण्डलमण्डितम् ।। ३ ।।
नानालङ्कृतिशोभाढ्यं पीताम्बरधरं परम् ।
सिद्धगन्धर्वदेवेन्द्रमुनिवृन्दनिषेवितम् ।। ४ ।।
एवं सञ्चिन्त्य तद्विष्णोः पदाम्भोजं विचिन्तयेत् ।
ध्वजो वज्राम्बुजे तावदङ्कुशो यव एव च ।। ५ ।।
स्वस्तिकं चोर्ध्वरेखां च त्वष्टकोणं च चक्रकम् ।
एतानि दक्षिणे पादे चिह्नानि सन्ति भूपते ! ।। ६ ।।
मत्स्यं च कलशं चारुचामरं चार्द्धचन्द्रकम् ।
इन्द्रचापं तथा शङ्खं गोष्पदं बिन्दुमेव च ।। ७ ।।
त्रिकोणं च ततस्तैस्तैः सत्यपादस्तु लक्षिता ।
अष्टादशैर्लक्षणैस्तैः लक्ष्यमाणं च चिन्तयेत् ।। ८ ।।
तत्पादपद्मतलकोमलपद्मनाल-
वक्त्रोद्गलत्कमलनिर्मलधारया द्राक् ।
तद्ब्रह्मरन्ध्रमिलितप्रखरप्रवाह-
व्यस्तां तरीयमलयातिविशुद्धचेताः ।। ९ ।।
तत्पादपद्मपरिचिन्तननष्टपापः
विज्ञानभक्तिपरिपूरितनिर्मलान्तः ।
शुद्धात्मशान्तपरिशीलित्तचितसद्म
पूजां हरेः रचयितुं द्विज एष शक्तः ।। १० ।।
एवं मानसिकस्नानं कृत्वाथ पूजकोऽर्च्चयेत् ।
यदि शङ्का हृदि तदा स्नानमेवं समाचरेत् ।। ११ ।।

वैष्णवाचमनं पूर्वं कथितं यत्तदाच्र्चयेत् ।
देवागारे प्रविश्याथ भैरवं प्रार्थयेन्नृप ! ।। १२ ।।
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
अनुज्ञां देहि मे नाथ ! विष्णुपूजां करोम्यहम् ।। १३ ।।
अतितीक्ष्णमहोग्रदंष्ट्रपूजकसिद्धिवह श्रीभैरवः ।
मम पूजनकर्मणि सदा भव संयतवान् सुरप्रिय ! ।। १४ ।।
इति भैरवमाज्ञाप्य देवांश्च प्रार्थयेत्ततः ।
पूजाक्रमं महीपाल ! श्रूयतां सावधानतः ।। १५ ।।
देवतासन्निधिं गच्छेत् पूर्वं सम्प्रार्थ्य देवताः ।
वस्त्रासने चोपविश्य ततो घण्टां प्रवादयेत् ।। १६ ।।
आसनं च ततः कुर्य्यात्कूर्मादींश्च प्रपूजयेत् ।
भूतोत्सादनमेवं च चारुवन्दनमेव च ।। १७ ।।
हस्तयोः शोधनं कुर्य्यात्तालत्रयमतः परम् ।
दिग्बन्धनं ततः कृत्वा भूतशुद्धिमथाचरेत् ।। १८ ।।
प्राणप्रतिष्ठां कुर्य्याच्च प्रणवं च ततः परम् ।
ततोऽन्तर्मातृकां कृत्वा सृष्टिस्थितिलयात्मिकाम् ।। १९ ।।
सबिन्दुमातृकां कुर्य्यात्तथैव दशमातृकाम् ।
तत्त्वन्यासं ततः कृत्वा मन्त्रप्रणवमेव च ।। २० ।।
पीठन्यासं ततो धीमान् ! यथाविधि समाचरेत् ।
भावनात्रयमेवं च व्यापकत्रयमेव च ।। २१ ।।
मूलमन्त्रस्य ऋष्यादीन् कराङ्गन्यासमेव च ।
ततो मन्त्राक्षरन्यासं पुनर्यन्मान्त्रिकस्य च ।। २२ ।।
प्रधानन्यासमाकुर्य्यात्ततो ध्यानं समाचरेत् ।
मूर्त्तिपञ्जरकं कुर्य्यात् षडङ्गन्यासमेव च ।। २३ ।।

ततो ध्यानं समाधाय मुद्रया च्छोटिकाख्यया ।
दिग्बन्धनं व्यापकानि चान्तर्यजनमाचरेत् ।। २४ ।।
निजमुद्रां प्रदर्श्याथ जलपात्रस्य संस्कृतिम् ।
तथार्घ्यसंस्कृतिं कुर्य्यात् प्रोक्षणादिकभाजनम् ।। २५ ।।
संस्कुर्य्यादथ भूपाल ! कुर्य्यादात्मार्च्चनं बुधः ।
मुद्राचतुष्टयमथो तिलकं रविसंख्यकम् ।। २६ ।।
पञ्चपुष्पाञ्जलिं कृत्वा प्राणायमं चरेद्बुधः ।
जपं कुर्य्याद्दर्च्चकोऽसौ प्राणायामविधिं चरेत् ।। २७ ।।
समर्पणं जपस्यापि कुर्य्याद्यन्त्रस्य निर्मितम् ।
पीठपूजां ततस्तत्र कृत्वा ह्यावाहनादिकम् ।। २८ ।।
ततो देवाङ्गतः कुर्य्यान्मातृकां केशवादिकम् ।
मुद्राश्च षोडश प्राज्ञो देवाग्रे दर्शयेत्ततः ।। २९ ।।
आसनं प्रथमं प्रोक्तं स्वागतं तदनन्तरम् ।
पाद्यमर्घ्यं तथाचामं मधुपर्कं ततः परम् ।। ३० ।।
पुनराचमनं स्नानं वस्त्रं यज्ञोपवीतकम् ।
उत्तरीयं ततो दद्यात् तथाभरणमेव च ।। ३१ ।।
गन्धं पुष्पं च मतिमान् दत्त्वाथावरणार्च्चनम् ।
घण्टावादनकं कुर्य्यात् धूपेदीपौ क्रमात् पुनः ।। ३२ ।।
पुष्पाञ्जलित्रयं दत्त्वा पूजयेन्नृपसत्तम ! ।
पाद्यमाचमनं चैव नैवेद्यं च ततः परम् ।। ३३ ।।
अपोशानन्तु तत्र स्यात्ततो नीराजनार्पणम् ।
रविसंख्याश्च गण्डूषान् जलधारां च दापयेत् ।। ३४ ।।
ताम्बूलं च प्रसन्नार्च्चां दूर्वाक्षतसमर्पणम् ।
विलोमार्घ्यं ततो दद्यादाचरेद्धीनपूरणम् ।। ३५ ।।

ब्रह्मार्पणं ततः कुर्य्यात्प्रसादं वैष्णवान् प्रति ।
स्वयं प्रसादं गृह्णीयान्नमस्कृत्य पुनः पुनः ।। ३६ ।।
भक्तिभावनया पूर्णे हृदि संचित्य केशवम् ।
पठन् स्तुतिं च परमां कर्पूरावर्त्तिमाचरेत् ।। ३७ ।।
नीराजनं च देवानामग्रे कुर्य्यान्मनोरमम् ।
अनेन विधिना राजन् !पूजयेद्विष्णुमव्ययम् ।। ३८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये षट्चत्वारिंशोऽध्यायः ।।

सप्तचत्वारिंशोऽध्यायः

सूत उवाच

एतेषां कर्मणां विप्रा लक्षणं ब्रह्मणोदितम् ।
तत्सर्वं पूर्वमेवापि विभाव्य वर्णितं पृथक् ।। १ ।।
इदानीं वः प्रवक्ष्यामि पृथक् तं कर्मनिर्णयम् ।

ब्रह्मोवाच

प्रथमं पुरतः स्थित्वा देवानां पूजकः शुचिः ।। २ ।।
प्रार्थयेद्देवता धीमान् ! नीलाचलनिवासिनः ।
जगदीश ! जगन्नाथ ! जगदानन्दकारक ।। ३ ।।
नमस्तेऽस्तु महाबाहो दासस्त्वां पूजयाम्यहम् ।
बलदेव नमस्तेऽस्तु जगन्मङ्गलदायकः ।। ४ ।।
त्वदाज्ञयार्च्चयामि त्वमपराधं क्षमस्व मे ।
भद्रे ! देवि ! नमस्तुभ्यं भक्तानन्दप्रदायिनि ।। ५ ।।
पूजयेत्त्वां महाभागे ! कुरु मे मङ्गलं सदा ।
एवं बलं सुभद्रां च संप्रार्थ्य च पुनः पुनः ।। ६ ।।

नमस्कृत्याच्चर्येद्धीमान् शुचिस्तद्गतमानसः ।
आसनस्य विधिं ब्रूमः श्रूयतामवनीधर ! ।। ७ ।।
आसनेन विना पूजा विफला जायते यतः ।
धरण्यासनतो दुःखं दुर्गतित्वं च वंशजे ।। ८ ।।
तृणासने कीर्त्तिनाशः पल्लवे चित्तविभ्रमः ।
शिलासने भवेद्व्याधिः काष्ठे दौर्भाग्यमेव च ।। ९ ।।
एतानि नृपशार्द्दूल ! वर्जयेदासनानि च ।
कम्बलं दुःखराशिघ्नं चित्रकम्बलमिष्टदम् ।। १० ।।
कृष्णाजिने राजलक्ष्मीं व्याघ्रचर्मणि मुक्तता ।
वस्त्रासनं रोगहरं सिद्धिदं च कुशासनम् ।। ११ ।।
पद्मासने वश्यता च कौशेयासनतस्तथा ।
सर्वलोकप्रियत्वं च तथा सर्वार्थसिद्धिता ।। १२ ।।
आसनानि प्रशस्तानि बहुसंख्यानि भूपते ! ।
हस्तायति समायुक्तं चतुरस्त्रं सुशोभनम् ।। १३ ।।
ह्यङ्गुलोच्छ्रायरुचिरं शस्तं देवार्च्चने नृप ! ।
विनेदमासने विष्णोर्न स्यात्पूजा कदाचन ।। १४ ।।
एतदासनतोऽभावे महान् दोषोऽभिजायते ।
ततः पीठस्य विषयं कथयामि समासतः ।। १५ ।।
अवधारय भूपाल ! साम्प्रतं पीठनिर्णयम् ।
पुन्नागं चम्पकं चैव चन्दनं रक्तचन्दनम् ।। १६ ।।
जम्बुमाम्रं तथा निम्बमदुम्बरममुं नृप ! ।
मधुकं फलवृक्षाश्च ज्ञात्वा पीठानि कारयेत् ।। १७ ।।
एतेषां काष्ठतः पीठं कमठाकृतिकं नृप ! ।
चतुष्पादं त्रिपादं वा चतुरङ्गुलमुच्छ्रकम् ।। १८ ।।

समन्ताद्धस्तमात्रं तु मञ्जुलं पीठमीदृशम् ।
अथवा सर्वतोभद्राकृतिकं पीठमाचरेत् ।। १९ ।।
भद्रपूर्णीन्धनेनैव तेन भद्रपदं भवेत् ।
तादृशे देशिकः श्रीमान् ! आसने नियतेन्द्रियः ।। २० ।।
उपविश्यासने कुर्य्यादर्च्चनं मुरवैरिणः ।
आसनं तु यथा कुर्य्यात्तल्लक्षणमिहोच्यते ।। २१ ।।
आसनेन विना भूप कर्मसिद्धिर्न जायते ।
पद्मासनस्य बद्धस्य लक्षणं कथ्यतेऽग्रतः ।। २२ ।।
यत्सर्वदैव कुर्वन्ति योगिनः सिद्धिकांक्षया ।
जानुद्वयं प्रसार्य्याथ जानुन्युपरि पादयोः ।। २३ ।।
यत्र पृष्ठगताभ्यां च हस्ताभ्यां विपरीततः ।
सव्यपादाङ्गुलिं सव्ये दक्षिणं दक्षिणेन तु ।। २४ ।।
बद्धपद्मासनमिति प्राहुर्योगस्य सिद्धिदम् ।
प्रसार्य्य जानुयुगलं तत्र जानुद्वये पुनः ।। २५ ।।
पादौ दत्त्वा च देवस्य पद्मासनमकल्मषम् ।
ऊरुजानुतले पादौ कृत्वा यदुपदेशनम् ।। २६ ।।
स्वस्तिकासनमेतं तु कर्मणां कर्मसिद्धिदम् ।
ऊरुजानुतले पादौ कृत्वा यच्चोपदेशनम् ।। २७ ।।
अर्द्धस्वस्तिकमित्याहुः शस्तं पूजादिकर्मणि ।
आसनत्रयमेतत्तु सर्वसिद्धिकरं नृणाम् ।। २८ ।।
बद्धपद्मासनमिदं प्रशस्तं योगिनामिह ।
तस्मात्प्रयत्नतो विप्रः स्थित्वा साधुकृतासनः ।। २९ ।।
पूजयेत् केवलं कर्म प्रौढपादेन वा क्वचित् ।
उपविश्यासने पद्भ्यां केवलं यन्निवेशनम् ।। ३० ।।

अथवा व्यासजंघाया दक्षिणं करणं न्यसेत् ।
जानुदोशेऽथवा तद्वत् प्रौढपादः स उच्यते ।। ३१ ।।
प्रौढपाद द्विजो यावत् श्राद्धं वा पितृतर्पणम् ।
दानं होमं जपं वापि स्वाध्यायं देवपूजनम् ।। ३२ ।।
यत्कर्म कुरुते तावत् तत्सर्वं निष्फलं भवेत् ।
अथासनं प्रकुर्वीत गुरुकायः सुनिश्चलम् ।। ३३ ।।
ऋजूत्तमाङ्गः कुशलः पूजायामुत्सुकोऽर्च्चक ।
आसनं चालयेद्यस्तु तस्य कर्म च निष्फलम् ।। ३४ ।।
अग्रं वा पृष्ठतो वापि पार्श्वयोरुभयोरपि ।
अङ्गप्रचालनमपि न कुर्य्यात् क्रियते यदि ।। ३५ ।।
पुनरासनमाकुर्य्यात्तावद्विष्णुं स्मरन् शुचिः ।
आसनेन विना राजन् ! यदा विष्णुं च पूजयेत् ।। ३६ ।।
तदर्च्चनं न गृह्णाति प्रभुर्नारायणः स्वयम् ।
तद्ग्राह्या राक्षसैर्नूनं कर्त्ता दुःखी भवेन्नरः ।। ३७ ।।
दारुब्रह्मतनोर्विष्णोः पूजार्थं दक्षिणे स्थितः ।
उपविश्योदङ्मुखोऽपि पूजयेदर्च्चकोत्तमः ।। ३८ ।।
अन्यासां देवतानां तु प्राङ्मुखो वाप्युदङ्मुखः ।
पूजां कुर्य्यादर्च्चकोऽसौ नियमोऽस्मिन् न विद्यते ।। ३९ ।।
आसने तादृशे दिव्ये देशिकः संस्थितः शुचिः ।
पूजार्थं प्रथमं घण्टां दीर्घनादान् प्रवादयेत् ।। ४० ।।
यन्नादश्रवणादेव राक्षसाश्च पिशाचकाः ।
वेताला जातुधानाश्च डाकिन्योऽपि ग्रहास्तथा ।। ४१ ।।
क्रूराश्च भूता ये चान्ये दृष्टा हिंस्राश्च भूपते !
त्रस्ताः पलायिताः सर्वे तद्भीत्याश्च दिशो दश ।। ४२ ।।

वैनतेयाङ्कितानां तु घण्टानां वादने नृप !
राक्षसाद्याः पलायन्ते स्थानं स्यात् पावनं महत् ।। ४३ ।।
सुदर्शनेन शोभाढ्या वैनतेयेन वा पुनः ।
घण्टा प्रदीयते येन तस्य देहे वसेद्धरिः ।। ४४ ।।
आचार्य्यवरणार्च्चायाः प्रान्ते धूपेऽथ दीपके ।
मुखनीराजनायां च पूजामारात्रिकेषु च ।। ४५ ।।
स्थाने विलेपने तावत् पूजान्तेऽपि नृपोत्तम ! ।
घण्टाध्वनिं च कुर्य्याद्वा नो कुर्य्यान्नियमोऽत्र नः ।। ४६ ।।
घण्टानादेन महता या पूजा जायते हरेः ।
विविधा सापि सफला प्रीतस्तु मधुसूदनः ।। ४७ ।।
घण्टानादे जायमाने पूजायां नृपसत्तम !
यत्फलं तदहं वच्मि लभते साम्प्रतं नरः ।। ४८ ।।
अश्वमेधसहस्राणां गवां कोटिप्रदानतः ।
राजसूयशतानां च चान्द्रायणशतोद्भवम् ।। ४९ ।।
तत्फलं समवाप्नोति सत्यं सत्यं नृपोत्तम !
विण्णुपूजार्थमतुलां चक्रनागादिचिह्निताम् ।। ५० ।।
यो ददाति नृपश्रेष्ठ ! सोऽपि तत्फलमाप्नुयात् ।
यथा विष्णोः प्रिया लक्ष्मीर्देवानाममृतं यथा ।। ५१ ।।
तथा सुपर्ण्णोऽपि हरेर्घण्टाशेखरसंस्थितः ।
गृहे येषां प्रतिदिनं वैनतेयेन चिह्निताः ।। ५२ ।।
घण्टाध्वनियुगं तेषां न भयं यंत्र कुत्रचित् ।
विद्युच्चौरभयं नास्ति नाशेभ्यो नास्ति तद्भयम् ।। ५३ ।।
नापमृत्युभयस्तेषां न च दुर्भिक्षजं भयम् ।
चक्रनागारिचिह्नानां घण्टानां स्वनतो नृप ! ।। ५४ ।।

विष्णोः प्रसादात्सहसा सफलं स्यान्मनोरथः ।
पूजानां समये भक्त्या घण्टानादं शृणोति यः ।। ५५ ।।
भुक्त्वाहं सकलं शर्म पुत्रपौत्रान्वितः सदा ।
शेषे धाम ब्रजेद्विष्णोः दैवतैरपि दुर्ल्लभम् ।। ५६ ।।
घण्टानादं विना यस्तु पूजयेत्केशवं नृप ! ।
रक्षोग्राह्यापि सा पूजा न प्रीतो भगवानसौ ।। ५७ ।।
लभते स महादुःखं तस्माद्घण्टां प्रवादयेत् ।
अन्येषामपि देवानां पूजार्थं नृपसत्तम ! ।। ५८ ।।
येषां यैरायुधैर्वापि ध्वजैर्वा वाहनैश्च वा ।
छत्रे वा चिह्नितां घण्टां कुर्यात्तत्प्रीतये द्वि ज! ।। ५९ ।।
मातृकाक्षरवृन्दानां प्रत्येकं बिन्दुसंयुजाम् ।
यावदुच्चारणं जातं तावद्घण्टां प्रवादयेत् ।। ६० ।।
चतुर्विंशपलैर्घण्टां तदर्द्धेन च सा भवेत् ।
देवसंख्याङ्गुलं दैर्घ्यं तस्या भवति भूपते ! ।। ६१ ।।
दैर्घ्यार्द्धेन भवेत्तस्याः द्वे कण्टशिखरे पुनः ।
देवसंख्याङ्गुलमिता जिह्वायाः स्थूलता भवेत् ।। ६२ ।।
दण्डः षडङ्गुलः प्रोक्तस्तदग्रं परितोऽङ्गुलम् ।
तत्र चक्रं च नागारिं कुर्य्यात्सुप्रीतये हरेः ।। ६३ ।।
घण्टोपरि त्रिशूलं वा वृक्षं वा स्थापयेन्नृप ! ।
शम्भोः प्रीतिकरं तत्तु कामिनां सर्वकामदम् ।। ६४ ।।
शङ्खं दुर्गार्च्चने शस्तं पङ्कजं रविपूजने ।
गणपत्यर्च्चने कुर्य्याद् घण्टोपरि परिस्थितम् ।। ६५ ।।
एतादृशीं सदा घण्टां तदर्च्चायां च वादयेत् ।
तुलसीगन्धनीरैश्च सेचयेदर्च्चनं स्थलम् ।। ६६ ।।

विष्णोश्च स्मरणं कुर्य्यात् शुद्धं स्थानं तु चिन्तयेत् ।
कूर्मं त्वनन्तं पृथिवीं प्रणवाद्यं स्वनामतः ।। ६७ ।।
नमोऽन्तं गन्धपुष्पादि विधिना पूजयेद्द्विजः ।
कृताञ्जलिपुटो भूत्वा तानभिप्रार्थयेन्नृप ! ।। ६८ ।।
आदिकूर्म नमस्तेऽस्तु जगदाधाररूपधृक् ।
आसनं कुरु मे पूतं पूजार्थे यतचेतसः ।। ६९ ।।
वासुदेवकलारूप त्वमनन्तधराधर ।
वासुदेवार्च्चनार्थं मे पूतमानसमाचर ।। ७० ।।
विष्णुना त्वं धृत्वा पृथ्वि त्वया लोका परं धृताः ।
पूतं कुरु नमामि त्वां पूजकस्यासनं मम ।। ७१ ।।
इति संप्रार्थ्य भूपाल ! ततश्चासनमाचरेत् ।
कुशमूले स्थितिर्मेऽपि विष्णोश्च मध्यतः स्थितिः ।। ७२ ।।
अष्टमूर्त्तेः स्थितिश्चाग्रे कुशानामेष निर्णयः ।
रजःसत्त्वतमोरूपं विष्णुं संचिन्त्य चेतसा ।। ७३ ।।
आनीय हृदये धीमान् कुशेनासनमाचरेत् ।
आसनस्य च मन्त्रस्य मेरुपृष्ठऋषिः स्मृतः ।। ७४ ।।
सुतलं छन्द एवात्र श्रीकूर्मो देवता स्मृतः ।
अन्ततो बीजमाख्यातः पृथिवीशक्तिरेव च ।। ७५ ।।
आसने विनियोगः स्यादित्युक्त्वासनमाचरेत् ।
मन्त्रं करद्वये भूप ! ऋषिं शिरसि विन्यसेत् ।। ७६ ।।
आदौ प्रणवमुच्चार्य्य चात्मासनपदं ततः ।
कमलं च चतुर्थ्यन्तं नमोऽन्तं पृथिवीपते ! ।। ७७ ।।
इति मन्त्रेण तैर्दर्भैस्त्रिभिश्चासनमाचरेत् ।
ये भूताः विघ्नकर्त्तारो ते भूताः पृथिवीपते ।। ७८ ।।

अपसर्पन्तु ते भूयो नश्यन्तु च शिवाज्ञया ।
सर्षपं चन्दनं दूर्वां तथाक्षतचयं पुनः ।। ७९ ।।
गृहीत्वा निक्षिपेत् सर्वा दिशो विघ्नोपशान्तये ।
गन्धपुष्पाङ्किततौ हस्तौ पुटीकृत्यार्च्चकः पुनः ।। ८० ।।
वामे गुरुं तथा दक्षे गणेशं पुरतोऽम्बिकाम् ।
पृष्ठभागे क्षेत्रपालं तान् सर्वान् प्रणवादिकान् ।। ८१ ।।
नमोऽन्ताश्च चतुर्थ्यन्तानुक्त्वा तद्बन्धनं चरेत् ।
पूजोपदेशकत्वाच्च गुरूणां वन्दनं नृप ! ।। ८२ ।।
विघ्नध्वंसाय विघ्नेशं मन्त्रस्यास्य च पूजने ।
आधिष्ठात्रीतया तस्या दुर्गायाः वन्दनं चरेत् ।। ८३ ।।
क्षेत्रपालं महीपाल पूजानिर्विघ्नहेतवे ।
गुर्वादीनां प्रथमतो वन्दनं नाचरेत्तु यः ।। ८४ ।।
जपः होमश्च पूजा च तस्य सर्वं सुनिष्फलम् ।
विष्णुः प्रीतो न भवति पूजायां विघ्नं मा भवेत् ।। ८५ ।।
गन्धपुष्पं प्रगृह्याथ प्रणवं च नमः पुनः ।
अस्त्राय फडिति ब्रूत्वा हस्तं हस्तेन घर्षयेत् ।। ८६ ।।
घर्षयित्वा ततो हस्तशोधनं जायते परम् ।
दुष्प्रतिग्रहतो दोषोऽस्पृश्यसम्पर्कतस्तथा ।। ८७ ।।
विनिन्द्य कर्मजन्यश्च सहसा विलयं ब्रजेत् ।
कुक्षिदेशेऽथ कण्ठस्य ललाटस्य च देशके ।। ८८ ।।
अधो मध्योर्ध्वक्रमतः कुर्य्यात्तालत्रयं नृप ! ।
सव्यहस्ततले दक्षमध्यमाङ्गुलिभिस्त्रिभिः ।। ८९ ।।
उच्चे तालत्रये जाते तत्तालोत्थेन वह्निना ।
कनिष्ठाङ्गुष्ठसंयोगान्मिथो दक्षकरे पुनः ।। ९० ।।

प्रसृताङ्गुलिभिस्ताभिस्त्रिभिर्य्या मुद्रया तया ।
त्रिशूलाख्यतया भूप ! पूजागारे समन्ततः ।। ९१ ।।
अग्निप्राकारमाचिन्त्य राक्षसाद्यप्रवेशने ।
त्रयं त्रयं चाङ्गुलीनां संस्कृच्य लग्नहस्ययोः ।। ९२ ।।
तर्जन्यङ्गुष्ठसंयोगस्त्वनेन परितो भ्रमैः ।
दिग्बन्धनं यथा तत्तु कथयामि नृपोत्तम ! ।। ९३ ।।
ऐन्द्रीं दिशं च चक्रेण बध्नामीति ततः परम् ।
नमश्चक्राय स्वाहेति दिग्बन्धनमनुस्मृतः ।। ९४ ।।
अनेन मनुना राजन् ! क्रमाद्दिग्बन्धनं चरेत् ।
पूर्वस्यां दिशि मां पातु वज्रहस्तः सवाहनः ।। ९५ ।।
आग्नेय्यां शक्तिहस्तो मां मेषारूढोऽनलोऽवतु ।
महिषारूढ एषो मां पायाद्दण्डधरोऽन्तकः ।। ९६ ।।
नैरृत्यां नैरृतिः पातु खड्गपाणिः समावली ।
पश्चिमे वरुणः पातु पाशहस्तः सवाहनः ।। ९७ ।।
वायव्ये वायुरव्यान्मां राजमानाङ्कुशः शुभः ।
गदाधरश्चोत्तरेऽस्मिन् पातु मां नरवाहनः ।। ९८ ।।
वृषारूढः शूलहस्त ऐशान्ये पातु मां शिवः ।
ऊर्ध्वे ब्रह्मा पद्महस्तः पातु मां हंसवाहनः ।। ९९ ।।
कच्छपारूढ एषोऽव्यादनन्तोऽरिवधश्च माम् ।
दिक्षु सर्वत्र मां पातु वासवादय एव ते ।। १०० ।।
नाराचमुद्रया विघ्नध्वंसमाकृत्य देशिकः ।
भूतशुद्धिं यथा कुर्य्यात्तद्वदामि नृपोत्तम ! ।। १०१ ।।

सूत उवाच

इत्येवं गदता सरोरुहभुवा भूयो नृपो वैष्णवं
प्रत्याख्यातमनुत्तमं द्विजवरा यद्भूतशुद्ध्याह्वयम् ।
तत्तेऽहं निगदामि येन विधिना मर्त्यास्त्वमर्त्यायिता
देवेशं परिपूजयन्ति सततं तत्तच्चतुर्वर्गदम् ।। १०२ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सप्तचत्वारिंशोऽध्यायः ।।

अष्टचत्वारिंशोऽध्यायः

ब्रह्मोवाच

प्रथमं हृदयाब्जं च परमात्मनि योजयेत् ।
संपूज्य शोषणं कुर्य्याद्दहनं च ततः परम् ।। १ ।।
आप्लावनं तथा कुर्य्यात्ततोऽप्यमृतवर्षणम् ।
ततो जीवः पुनः राज्ञः हृदि संस्थाप्य भूपते ! ।। २ ।।
जीवसंस्थापनान्तेऽथ हृदये निर्मलेऽर्च्चकः ।
जीवस्य ब्रह्मणश्चैवमैक्यं तावदचिन्तयेत् ।। ३ ।।
पञ्चविंशतितत्त्वानां यथास्थानं निवेशनम् ।
विधेयं विधिना तावद्देशिकेन द्विजात्मना ।। ४ ।।
एतद्विवरणं भूप ! श्रूयतां निगदाम्यहम् ।
द्वादशच्छेन्दरम्येऽस्मिन् हृदये कलितेऽनघ ।। ५ ।।
उत्ताने सव्यहस्तेऽपि दक्षहस्तं ह्यधोमुखः ।
तर्जन्यङ्गुष्ठयोर्मध्ये सव्ये दक्षाङ्गुलिब्रजम् ।। ६ ।।
दत्त्वा बध्वा पुनः सव्यहस्ताङ्गुलित्रयं पुनः ।
दक्षोपरि समाबद्ध्य त्वङ्गुष्ठद्वययोर्जने ।। ७ ।।
या मुद्राजनि राजेन्द्र! बुधैः कच्छपिका स्मृता ।
भूतशुद्धौ प्रशस्ता सा साधकानां हितप्रदा ।। ८ ।।

अधोमुखी यदा सा तु कुम्भमुद्रेरिताप्यसौ ।
चिवुकेऽथ यदा लग्ना काहालेत्युच्यते बुधैः ।। ९ ।।
मुद्रामेतादृशीं कृत्वा ततश्चानन्दकन्दतः ।
जातं तु ज्ञाननालाढ्यं ऐश्वर्य्यव्यष्टपत्रकम् ।। १० ।।
वैराग्यकर्णिकायुक्तमोंकारेण प्रकाशितम् ।
एतादृशं तु कमलं ध्यात्वा तत् कर्णिकान्तरे ।। ११ ।।
प्रदीपकलिकाकारं जीवात्मानं च चिन्तयेत् ।
सुषुम्नामार्गतो हंस इति मन्त्रेण तं पुनः ।। १२ ।।
सहस्त्रदलपद्मास्ते परमात्मनि योजयेत् ।
जीवं स्थूलोऽतिसूक्ष्मश्च परश्च स उदाहृतः ।। १३ ।।
अतिसूक्ष्मांशतो नूनं तं तत्रैव नियोजयेत् ।
स्थूलरूपस्तु यो भूप ! चिन्तयेद्भौतिकेऽङ्गके ।। १४ ।।
विशुद्ध्यर्थं च भूतानां मन्त्ररूपतया पुनः ।
ॐकारं प्रथमं चोक्त्वा भूतशुद्धिपदं ततः ।। १५ ।।
मन्त्रस्य तु शरीरात्मा ऋषिरत्र प्रकीर्त्तितः ।
पुरुषप्रकृतिश्छन्दः सत्त्वश्च देवता स्मृतः ।। १६ ।।
पुरुषो बीजख्यातश्च प्रकृतिः शक्तिरत्र हि ।
भूतशूद्ध्यर्थमेवायं विनियोग उदाहृतः ।। १७ ।।
सतारं प्रथमान्तं च भूशब्दः पुरतो वदेत् ।
ततोऽग्निरात्मा तौ शब्दौ समस्तं प्रविधाय च ।। १८ ।।
सम्प्रदानेन संयुक्ते त्वङ्गुष्ठाभ्यां नमस्ततः ।
अनेन मनुना प्राज्ञस्त्वङ्गुष्ठन्यासमाचरेत् ।। १९ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये अष्टचत्वारिंशोऽध्यायः ।।

एकोनपञ्चाशोऽध्यायः

भुवश्च भूश्च स्वश्चैव महश्च जन एव च ।
तपश्च क्रमतो भूप ! प्रजापतिमतः परम् ।। १ ।।
सत्यं च पृथिवी चैव ब्रह्मसूर्य्यस्तथैव च ।
बाह्यं यथाक्रमं ब्रूत्वा ततः शेषाङ्गुलिं ब्रजे ।। २ ।।
न्यासं कुर्वीत नृपते ! तन्मन्त्रांश्च ततो वदेत् ।
अङ्गन्यासं ततः कुर्य्यादेवं तत्त्वानि चिन्तयेत् ।। ३ ।।
आकाशं वायुतेजाम्बु पृथ्वीश्रोत्रत्वचस्ततः ।
चक्षुश्च रसनाघ्राणमुखप्राणास्तथैव च ।। ४ ।।
पादपायूपस्थशब्दस्पर्शरूपरसानपि ।
गन्धं च वचनादाने पूजकः क्रमतो वदेत् ।। ५ ।।
विसर्गं च तदानन्दमाकाशं च नृपोत्तम ! ।
पञ्चविंशतितत्त्वानि व्युत्क्रमेण स देशिकः ।। ६ ।।
लत्नान्न तानि तत्त्वानि चिन्तयेद्धरणीधव ! ।
वामकुक्षिस्थितं पापपुरुषं तादृशं स्मरेत् ।। ७ ।।
ब्रह्महत्याशिरोयुक्तं स्वर्णस्तेयभूजद्वयम् ।
सुरापानसमुद्भूतपापजालहृदञ्चितम् ।। ८ ।।
गुरुतल्पकटीयुग्मं तत्संसर्गपदद्वयम् ।
अन्यैर्नानाविधैः पापैः सर्वाङ्गकलितं नृप ! ।। ९ ।।
उपपातकरोमाढ्यं रक्तश्मश्रुविलोचनम् ।
खड्गचर्मधरं क्रूरं कृष्णं कुक्षौ विचिन्तयेत् ।। १० ।।
चिन्तयित्वा नृपश्रेष्ठ ! तस्य नाशनहेतवे ।
यं बीजस्य ऋषिरहं ब्रह्मच्छन्दः श्रुतिप्रसूः ।। ११ ।।

वायुश्च देवताख्यातो विनियोगः स्मृतस्ततः ।
पापयुक्तशरीरस्य शोषणेऽथ विचिन्तयेत् ।। १२ ।।
षड्बिन्दुर्लाच्छितं वायोर्मण्डलस्य महीपते ! ।
मध्ये स्थितं धूम्रवर्णं यमित्यनिलबीजकम् ।। १३ ।।
वामनासाविलेनापि चिन्तयेत् साधकोत्तमः ।
द्वात्रिंशद्वारतो जप्त्वा तद्बीजं पूरकेण तु ।। १४ ।।
इडानाड्यां तु देवाशु प्रापयेन्नाभिमण्डलम् ।।
तत्पुनश्चार्पयेत्पूर्वं बीजं द्विगुणसंख्यया ।। १५ ।।
एवं कुम्भकमावृत्य तदुद्भूतेन वायुना ।
मनोवाक्कायजनितपापदोषसमुद्भवम् ।। १६ ।।
शरीरं शोषयित्वा तत्कलावारं जपेत्पुनः ।
तदेव रेचयेद्दक्षनासारन्ध्रेण देशिकः ।। १७ ।।
ॐ रमित्यग्निबीजस्य विश्वामित्रऋषिः स्मृतः ।
छन्दः स्यात् त्रिष्टुभाख्यं तु देवतात्रानिलः स्मृतः ।। १८ ।।
पापयुक्तशरीरस्य दहने विनियोगकः ।
ततो दक्षिणनासायाः रन्ध्रेण बीजमाविलम् ।। १९ ।।
स्वस्तिकोपेतमाचिन्त्य त्रिकोणमण्डलस्थितम् ।
तल्लीनमारुतं भूप ! स्फुलिङ्गाकारमीदृशम् ।। २० ।।
रक्तवर्ण्णं च संचिन्त्य जपेद्द्वात्रिंशवारतः ।
पूरकेण ततो भूप ! नाड्यां पिङ्गलयार्च्चक ।। २१ ।।
हृन्मध्यं प्रापयित्वास्य चतुःषष्ट्या जपं चरेत् ।
कुम्भके ललिते बीजो भूतेन वह्निना पुनः ।। २२ ।।
सदोषं तच्छरीरं तु दग्धं संचिन्त्य चेतसा ।
वामनासाविलेनासौ ततः षोडशवारतः ।। २३ ।।

रेचयेद्भस्मसहितं वायुं दग्धशरीरकम् ।
लमिति पृथ्वीबीजस्य ऋषिश्चात्र महीपते ! ।। २४ ।।
हिरण्यगर्भोऽनुष्टुभाख्यं शरीरस्य परंतप ! ।
आप्लावने ततः कुर्य्याद्विनियोगं स देशिकः ।। २५ ।।
लमित्येतन्महेन्द्रस्य बीजं च शुक्लवर्ण्णकम् ।
चतुष्कोणस्य मध्यस्थं मण्डलस्य महीपते ! ।। २६ ।।
वामनासाविले तत्तु संचिन्त्य स च पूजकः ।
द्वात्रिंशद्वारमाजप्य पूरकं च चरेन्नृप ! ।। २७ ।।
ततष्ठमिति तद्बीजं ललाटेन्दुं निर्माय च ।
तज्जपं च चतुःषष्टिवारं कृत्वाथ कुम्भकम् ।। २८ ।।
कुर्वन् पापशरीरस्य दाहस्थाने परंतप ।
वेष्टयित्वा जलं प्राज्ञ पूर्णं तेनैव भावयेत् ।। २९ ।।
ततः षोडशवारं तु जप्त्वा स मनुवित्तमः ।
दक्षनासाविलेनापि रेचयेत्तज्जलं पुनः ।। ३० ।।
वमित्यमृतबीजस्य जमदग्नीऋषिः स्मृतः ।
जगतीछन्द एवात्र चन्द्रो वै देवता मतः ।। ३१ ।।
शरीरामृतवर्षायां विनियोग उदाहृतः ।
ततो वामनसो रन्ध्र ठमितीन्दोश्च बीजकम् ।। ३२ ।।
अर्द्धचन्द्रोपेतमेतत् पङ्कजाकारमुत्तमम् ।
तोयमण्डलमध्यस्थं विचिन्त्यामृततः पुनः ।। ३३ ।।
ऐक्यं विभाव्य वमिति वरुणं बीजमद्भूतम् ।
द्वात्रिंशवारतो जप्त्वा कुर्य्यात्पूरकमर्च्चकः ।। ३४ ।।
भूयिष्ठमिति तद्बीजं ललाटेन्दुं नयेद्बुधः ।
नीत्वा तस्य चतुःषष्टिवारं जपमथाचरेत् ।। ३५ ।।

कुम्भकं रचयन् धीरस्तस्माच्चलितया नृप ! ।
पीयूषधारया तावन्मातृकारूपया ततः ।। ३६ ।।
मूर्द्धादिपादपर्य्यन्तं दिव्यं तावच्छरीरकम् ।।
उत्पाद्यात् प्लाव्य सुधया जपेच्छोडशवारतः ।। ३७ ।।
रेचयेद्विलतो दक्ष नसोद्देशिकसत्तमः ।
पादतो जानुपर्य्यन्तं व्याप्यमानं महोदयम् ।। ३८ ।।
चतुरस्त्रं पीतवर्ण्णं लंयुतं वज्रकान्वितम् ।
भुवः स्थानमिदं रम्यं देशिकस्तच्च चिन्तयेत् ।। ३९ ।।
जानुतो नाभिपर्य्यन्तं शुक्लवर्ण्णं च चन्द्रभम् ।
पद्मेन लांच्छितं दिव्यं स्वस्य बीजेन संयुतम् ।। ४० ।।
अपां स्थानमिदं रम्यं भावयेन्निजचेतसा ।
आकण्ठनाभितो रक्तं त्रिकोणं स्वस्तिकान्वितम् ।। ४१ ।।
स्वस्वबीजं मण्डलं तद् वह्नेः संचिन्तयेद्द्विजः ।
भ्रूमध्यादथकण्ठाभूद्धूम्रं वायोश्च मण्डलम् ।। ४२ ।।
षट्कोणरुतुबिन्दाढ्यं ध्यायेत् कल्मषशोषकम् ।
आब्रह्मरन्ध्रदेशं तत् भ्रूमध्याद्वर्त्तुलं शुभम् ।। ४३ ।।
कृष्णं स्वबीजसहितं ध्यायेत्तन्नभसः स्थलम् ।
एवं पञ्चमहाभूतस्थानं संचिन्त्य पूजकः ।। ४४ ।।
अन्यानि सर्वतत्त्वानि क्रमादानीय चेतसा ।
स्वस्वस्थानेषु संयोज्य चिन्तयेत् साधकः पुनः ।। ४५ ।।
प्रणवस्य च मन्त्रस्य त्वन्तर्य्यामिऋषिः स्मृतः ।
छन्दोदेवी देवमाता परमात्मा च देवता ।। ४६ ।।
आकारो बीजमाख्यातो हुंकारः शक्तिरेव च ।
मकारः कीलकं प्रोक्तस्त्वण्डस्फोटन एव च ।। ४७ ।।

विनियोगोऽपि भवति क्षोणीशैवं तदाचरेत् ।
ततः प्रणवरूपेण खड्गेन स च देशिकः ।। ४८ ।।
अण्डं द्विदण्डं कृत्वैकं चिन्तयेद्भूरिति क्षणम् ।
द्वितीयं चिन्तयेन्मन्त्री द्योरिति क्षीणकल्मषः ।। ४९ ।।
प्रणवेन ततो भूप ! जीवमानीय देशिकः ।
सोऽहमित्येव मनुना शरीरेऽमृतसंप्लवे ।। ५० ।।
वेशयेच्च वर्ण्णमयीं सुधाधारां च मन्त्रवित् ।
आप्लाव्याथ तया सृष्टिः क्रमतो नृपसत्तम ! ।। ५१ ।।
पञ्चाशद्वर्ण्णघटितमुत्पाद्य च शरीरकम् ।
तादृशोऽपि शरीरेऽस्मिन् स्थापिता या च देवता ।। ५२ ।।
ततो भिन्नं तदात्मानं चिन्तयेत्सोऽहमित्यतः ।
स्फुटारविन्दवदनं पीताम्बरमनोरमम् ।। ५३ ।।
शङ्खचक्रगदापद्मधारिणं चारुमण्डनम् ।
पद्मासनं सुरैर्वन्द्यं कौस्तुभमणिराजितम् ।। ५४ ।।
एवं संचिन्तयेद्देवं देवताया निजस्य च ।
यं यं देवं यजेत्तावत्तत्तद्रूपं च चिन्तयेत् ।। ५५ ।।
निगमागमगम्यं तं शून्यं च गगनादिभिः ।
जानन्ति यं वै तमसः पारे तिष्ठन्तमुत्तमम् ।। ५६ ।।
सर्वान्तःकरणं तावज्ज्ञानं तं ज्ञानगोचरम् ।
परमात्मस्वरूपं तं हंसं नौमि परात्परम् ।। ५७ ।।
सहस्रपत्रेऽम्बुजमध्यदेशे,
निरीहमानन्दरसस्वरूपम् ।
सहस्रभानुस्फुरदन्ततेजसं,
ज्योतिःस्वरूपं पारमात्मरूपम् ।। ५८ ।।

विभावसुं सर्वभुवप्रदीपं,
जगत्प्रसूतिस्थितिनाशकारणम् ।
ध्यायन्ति तं ध्यानपरा मुनिद्रा-
स्त्वन्तर्गतं च परिचिन्तयेऽहम् ।। ५९ ।।
प्रफुल्लाष्टदले पद्मे हृदि दीपशिखाप्रभम् ।
जीवात्मानं महोत्साहं सर्वचेष्टासुलालसम् ।। ६० ।।
सर्वलोकप्रतीकाशं सर्वज्ञानप्रदायकम् ।
भावयेऽहं प्रशान्तं त्वां चैतद्देहविशुद्धये ।। ६१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकोनपञ्चाशोऽध्यायः ।।

पञ्चाशत्तमोऽध्यायः

सूत उवाच

एवं ये कुर्वते भूतशुद्धिं पातकघातिनीम् ।
अन्तःशुद्धिर्भवेत्तेषां जपपूजादिकर्मसु ।। १ ।।
योग्यास्ते विमला लोका भवन्त्यत्र तपोधनाः ।
अन्यथा नहि ते शुद्धाः शतशः स्थापिता अपि ।। २ ।।
बाह्यन्तरीया शुद्धिश्च द्विधा भवति भूसुराः ! ।
अन्तःशुद्धिं विना बाह्या शुद्धिर्नो जायतेऽनघाः ।। ३ ।।
भूतादितत्त्ववृन्दस्य जीवस्य च निवेशनात् ।
परमात्मनि या शुद्धिर्भूतशुद्धिर्विधीयते ।। ४ ।।
एवं कृत्वा भूतशुद्धिं प्राणांसंस्थापयेदिह ।
यथा तथाहं कथये श्रूयतां भूसुरोत्तमा ! ।। ५ ।।

मनोः प्राणप्रतिष्ठया ऋषयश्चात्र ते स्मृताः ।
ब्रह्मा विष्णुश्च रुद्रश्च ततश्छन्दांसि भूसुराः ।। ६ ।।
ऋग्यजुःसामछन्दांसि स्मृतान्यत्र महर्षिभिः ।
चैतन्यरूपकलितपरमात्मा च देवता ।। ७ ।।
प्राणानां स्थापनायै च विनियोग उदाहृतः ।
सतारबिन्दुकं वर्गं त्वंकारं कथितं बुधैः ।। ८ ।।
महात्मनि कृत्वा चतुर्थ्यन्तमेके
ततश्चापराङ्गुष्ठकन्यासमाहुः ।
चवर्गं तथोक्त्वा सबिन्दुं त्विकारं
ततः शब्दगन्धान्तमात्मनमेव ।। ९ ।।
पुरावच्चतुर्थ्यन्तमापूज्यबिन्दु-
स्फुरद्वामनेत्रं ततस्तर्जनीभ्याम् ।
स्वाहाशब्दमन्ते मनुयोऽत्रजात-
श्चरेत्तर्जनीन्यासकं तेन मन्त्री ।। १० ।।
आदौ प्रणवमुच्चार्य्य टवर्गं बिन्दुभूषितम् ।
उकारं बिन्दुना युक्तमुक्त्वा मुक्तात्मनः वराः ।। ११ ।।
श्रोत्रादिप्राणपर्य्यन्तमात्मने चेत्यथ ब्रुवन् ।
तं चेत्युक्त्वा मध्यमाभ्यां वषडित्येव यो मनुः ।। १२ ।।
मध्यमाङ्गुलिकन्यासं कुर्य्यात्तेन विचक्षणः ।
ॐकारं प्रथमं ब्रूत्वा तवर्गं च सबिन्दुकम् ।। १३ ।।
एकारं बिन्दुना रम्यं वाक्पाणिपाद एव च ।
पायूपस्थौ च तैः सार्द्धमात्मा युज्यते तत्पदम् ।। १४ ।।
चतुर्थ्यन्तं तथा कुर्य्यादौ वा चेति पुनर्वदेत् ।
अनामिकाभ्यां हूं चेति यो मनुः कथ्यते बुधैः ।। १५ ।।

अनामिकान्यासममुं चरत्तेनैव मन्त्रवित् ।
ॐकारं प्रथमं चोक्त्वा पवर्गबिन्दुमण्डितम् ।। १६ ।।
ॐ चोक्त्वा वचनादानगतिशब्दानतः परम् ।
विसर्गानन्दशब्दौ च तैर्युतायात्मने त्विति ।। १७ ।।
औं कनिष्ठाभ्यामिति चेद्वौषडित्याह तान् पुनः ।
कनिष्ठन्यास एतेन भवेद्धर्मभृतां वराः ।। १८ ।।
आदौ प्रणवमुच्चार्य्य कादिक्षान्तममुं पुनः ।
सबिन्दुं वर्ण्णवृन्दं च वश्च ब्रूयात्पुनर्मनः ।। १९ ।।
बुद्धिः तथैवाहङ्कारं चित्तशब्दमतः परम् ।
मनुः प्रभृतिभिः शब्दैर्युतायात्मान एव च ।। २० ।।
उक्त्वाथ करयोस्तावत्तलयोः पृष्ठयोर्द्वयोः ।
तादृशोः शब्दयोर्धीराश्चतुर्थी वचनद्वये ।। २१ ।।
योजने जायमानेऽथ त्वस्त्राय फडिति द्विजः ।
अनेन मनुना कुर्य्यात् षडङ्गन्यासमादरात् ।। २२ ।।
करन्यास इवाङ्गस्य न्यासं कुर्य्यात् स देशिकः ! ।
पाशबीजं न्यसेन्नाभेरधः पादतलं प्रति ।। २३ ।।
मायाबीजं च हृदयान्नाभिपर्य्यन्तमुत्तमाः ।
पुनरङ्कुशबीजं तु मस्तकाद्धृदये न्यसेत् ।। २४ ।।
मन्त्री प्रणवमुच्चार्य्य यकारं बिन्दुना युतम् ।
त्वगात्मनेन म इति हृंदि विन्यासमाचरेत् ।। २५ ।।
रकारं तद्वदुक्त्वाथ सृषात्मेति नमोऽन्तकम् ।
चतुर्थ्यन्तं ततो दक्षबाहुमूले परं न्यसेत् ।। २६ ।।
लंमामात्मान इत्युक्त्वा नमःशब्दमतः परम् ।
उक्त्वा मन्त्री बाहुमूले तत्र तन्मत्रकं न्यसेत् ।। २७ ।।

ॐ वं मेदात्मन इति संपूर्वप्रणवादिकम् ।
समुच्चार्य्य ततो मन्त्री जठरे न्यासमाचरेत् ।। २८ ।।
प्राणात्मने नम इति पूर्वे तारं च हं तथा ।
उक्त्वानने न्यासममुं कुर्य्यादार्य्यो महीसुराः ।। २९ ।।
बिन्दुयुक्तं क्षकारान्तं प्रणवादि ततः परम् ।
जीवात्मनेन म इति हृदये विन्यसेद्द्विजः ।। ३० ।।
पुनर्यं चापि रंचेति लं वं शं षं तथापरे ।
सं हं वं क्षं चेति ब्रुवन्नपि जीवात्मने नमः ।। ३१ ।।
इत्युक्त्वा च ततो मन्त्री हृदये विन्यसेद्द्विजः ।
मातृकाक्षरमेवं च साधको मन्त्रवित्सुधीः ।। ३२ ।।

ब्रह्मोवाच

इत्थं न्यासं समाप्याथ यथाध्यानं चरेद्बुधः ।
देहं वच्मि ततो भूप ! जनानां हितकाम्यया ।। ३३ ।।
चं चद्रक्तपयोधिपोतविलसद्रक्ताब्जमध्ये स्थितां
हस्ते पाशमथाङ्कुशं च दधतमैक्षं धनुश्च शरम् ।
शूलं पाणिलसत्कपालमरुतां श्रीभासुरां त्र्यम्बका-
मम्बां तां प्रणमामि सर्वजगतां देहेषु धृत्यात्मिकाम् ।। ३४ ।।
अङ्गुष्ठानामिकायोगेऽनामिकां मध्यतर्जनी ।
स्पृशेन्नुक्त्वा कनिष्ठं तु प्राणमुद्रा प्रकीर्त्तिता ।। ३५ ।।
तयापि हृदये स्पृशेत् कुशैः पुष्पैश्च देशिकः ।
ॐकारं प्रथमं ब्रूयादां ह्रीं क्रों चैव देशिकः ! ।। ३६ ।।
यदि सान्तं वर्ण्णवृन्दं पृथग्बिन्दुसमन्वितम् ।
हंसमोहमिति मम प्राणा इह पुनश्च ते ।। ३७ ।।
एवं पुनस्तथैवोक्त्वा मम जीव इह स्थितः ।
तद्वद्भूयो वदन् वर्ण्णान् मम सर्वेन्द्रियाणि तु ।। ३८ ।।

पूर्ववत् तांश्च वर्णौघान् सोऽहमित्यालपन् पुनः ।
मम वाङ्मनसोश्चैव श्रोत्रघ्राणे ततः परम् ।। ३९ ।।
प्राणा इहागत्य सुखं चिरं तिष्ठन्त्विति ब्रुवन् ।
देया जाया पावकस्य तदन्ते देशिकोत्तमैः ।। ४० ।।
एवं विधेन विधिना भूयो वारद्वयं चरेत् ।
एषा प्राणप्रतिष्ठा च देहिनां प्राणवर्द्धनी ।। ४१ ।।
सर्वकर्मसु शस्ता सा त्वन्यथा कर्मनिष्फलम् ।
तस्मात् प्राणप्रतिष्ठायां साधकः स्थिरहृद्भवेत् ।। ४२ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पञ्चाशत्तमोऽध्यायः ।।

एकपञ्चाशोऽध्यायः

ब्रह्मोवाच

प्रणवश्रवणं कुर्य्यात्तदन्ते देशिकः पुनः ।
स्मरेत्प्राणप्रतिष्ठान्ते परां शक्तिं परंतप ! ।। १ ।।
अरुणकमलमध्ये स्थायिनीं शोभमानां
त्रिनयनपरिराजद्वक्त्रचन्द्रांशुरूपाम् ।
अभयवरसुपाशभ्राजमानां कुशाढ्यां
रुचिरवसनरम्यां भावयेत्तां सुरेड्याम् ।। २ ।।
यः पुजासु महीसुरः प्रतिदिनं प्राणप्रतिष्ठां च ते
नानाकल्मषमोक्षदां च चतुरां तां भूतशुद्धिं पराम् ।
नो कुर्य्यादथ तेन यत्कृतमिदं सर्वं च कर्म क्षितौ
व्यर्थं जायते केशवस्य न सुखं तस्मादिमं सञ्चरेत् ।। ३ ।।

गन्धपुष्पाञ्चितौ हस्तौ घर्षयित्वा पुनः पुनः ।
करशोधनमाकुर्य्यादर्च्चकः शुद्धमानसः ।। ४ ।।
ॐ प्रणवस्य च मन्त्रस्य प्रजापतिः ऋषिः स्मृतः ।
छन्दोऽत्र देवी गायत्री परमात्मा च देवता ।। ५ ।।
अकारो बीजमाख्यातः शक्तिरुकार उच्यते ।
मकारः कीलकं प्रोक्तं प्राणायामे ततः परम् ।। ६ ।।
विनियोगेऽपि भवति कुर्य्यादेवं विचक्षणः ।
अकारः प्रमुखैरेतैः स्वरैः षोडशभिः क्रमात् ।। ७ ।।
सानुस्वारैर्जायमाने प्रणवे पुटितेऽपि यः ।
अनेन मनुना प्राज्ञः षडङ्गन्यासमाचरेत् ।। ८ ।।
अकारं बिन्दुमाकारं रजोगुणसमन्वितम् ।
प्रणवाद्यं नमोऽन्तं यं ध्यात्वा नाभौ न्यसेद्बुधः ।। ९ ।।
उकारः सत्वसम्पन्नः शरदिन्दुसमप्रभः ।
नमोऽन्तः प्रणवादिश्च हृदि भाव्यः सदा बुधैः ।। १० ।।
मकारन्तु तमोनिष्ठं कृष्णवर्ण्णं नमोऽन्तकम् ।
प्रणवादिं विधायामुं मूर्द्धिन देशेऽपि विन्यसेत् ।। ११ ।।
प्रणवन्यासमाचर्य्याचर्य्यवर्य्यः स भूपते ! ।
ततो विष्णुं यथा ध्यायेत् श्रूयतां सावधानतः ।। १२ ।।
ध्यायेद्विष्णुं सुरेशं कमलदरगतं हस्तपाथोजराज-
च्चक्रोद्यध्वानशङ्खाम्बुजगद्मनघं कोटिसूर्य्येन्दुभासम् ।
स्मेरास्यं चारुवेशं रुचिररुचिलसत् कुण्डलद्वन्द्वहैम-
स्फुर्य्यद्धारादिभूषं हुतकनकरुचिक्षौमचेलं सुनीलम् ।। १३ ।।
पूरकं प्रथमं मन्त्री कुम्भकं तदनन्तरम् ।
रेचकं शून्यकं चेति कुर्य्यादेवं चतुर्विधम् ।। १४ ।।

प्रणवं जगतां भूप ! द्विजेन घ्राणरन्ध्रयोः ।
पूर्य्यतो मारुतो यस्मिन् स पूरक उदाहृतः ।। १५ ।।
यत्र वाष्पपरिधापणं भवेन्नासिकाविलयुगे चरेद्बुधः ।
कुम्भकःस गदितो मनीषिभिः सर्वकल्मषविनाशहेतुकः ।। १६ ।।
शनैः शनैर्यत्र च वातरेचनं
चरेत् स मन्त्री प्रणवं जपन् पुनः ।
स रेचकः पापकुलैकमोचकः
प्रगद्यते मन्त्रविदां वरैर्वरः ।। १७ ।।
न त्यजेन्न च निरुद्धनं चरे-
न्नास्ति यत्र मरुतां च सञ्जयः ।
भाव्यते प्रणव एष चेत्तदा
शून्यकः स्मृततरो मनीषिभिः ।। १८ ।।
या वामनासापुटदेशसंस्था
सैतेरिवा साधुभिरेतयासौ ।
पिबेन्मरुत् षोडशवारतश्चेत्
तारं च जप्त्वा स च पूरकः स्यात् ।। १९ ।।
सेयं सुषुम्णास्थि च मध्यदेशे
नमः स्थित्वा यत्र च देशिकेन्द्रः ।
जपं चतुःषष्टिकवारमेनं
मरुन्निरुन्दीत च कुम्भकः स्यात् ।। २० ।।
शनैः शनैर्यत्र च रेचयेत्तं वायुं समन्त्री प्रणवं प्रजापः ।
द्वात्रिंशवारैः स च रेचकः स्याद्दक्षस्थया पिङ्गलया नसश्च ।। २१ ।।
अधिष्ठाता स धाता यत् पूरकस्य तथानघ ।
कुम्भकस्य हरिस्तावद्रेचकस्य सदाशिवः ।। २२ ।।

अतः कुर्य्यात् पूरकादि प्राणायामं स देशिकः ! ।
पूरकादि गृहस्थानां वनस्थानां च कुम्भकः ।। २३ ।।
यत्यादीनां रेचकादि शून्यादि त्यक्तवाससाम् ।
पूरकादौ भवेदर्थसिद्धिश्च कुम्भके पुनः ।। २४ ।।
रेचकादौ ज्ञानसिद्धिर्मोक्षसिद्धिश्च शून्यके ।
नाभिपङ्कजमध्यस्थ पद्मकिञ्जल्कसन्निभम् ।। २५ ।।
चतुर्मुखं चतुर्बाहुं पुस्तकं च कमण्डलुम् ।
ध्यानाञ्जलिं संदधतं पूरकादौ विचिन्तयेत् ।। २६ ।।
शङ्खचक्रगदापद्मविस्फुरत् करपङ्कजम् ।
नवीननीरदश्यामं सर्वाभरणभूषितम् ।। २७ ।।
एवमेवं प्रकारेण मनसि भावयन्मुदा ।
कुम्भकादौ प्रसन्नास्यं हृदये भावयेद्धरिम् ।। २८ ।।
त्रिशूलखट्वाङ्गमृगाक्षमाला-
लसत्करं पूर्णशशाङ्करम्यम्
गङ्गाधरं चक्रधरं हरं तं,
ललाटके रेचककर्मणाढ्यम् ।। २९ ।।
संकोच्य तर्जनीमध्ये कुर्य्यादङ्गुष्ठया पुनः ।
कनिष्ठानामिकाभ्यां यन्मुद्रा सा प्रणवे स्मृता ।। ३० ।।
तावद्देहमलोत्करं क्षितिसुरैः ह्रीं स्वः स्मृतोऽयं यदा
तारः सारतरो हरेच्च विपुलं दीपो महापातकम् ।
तावत् सोऽपि प्लुतस्वरेण कलितो मोक्षप्रदो जायते
यावत् सन्ततिभावितो नरवरैः सायुज्यमुक्तिप्रदः ।। ३१ ।।
एवं चतुर्विधः प्रोक्तः प्राणायाम परंतप ! ।
षड्विधेऽपि भवेत् सोऽयं गद्यते तव सन्निधौ ।। ३२ ।।

श्वासयुक्तः सधूमः स्यादधूमश्चेन्न वर्जितः ।
जपयुक्तो यदा जातः सगर्भः प्रणवः स्मृतः ।। ३३ ।।
अनाभिश्च जपैर्हीनः संलक्ष्यो ध्यानसंयुतः ।
ध्यानहीनोऽप्यलक्ष्यः स्यात् षड्विधः प्रणवः स्मृतः ।। ३४ ।।
प्राणायामं यथोक्तं तु ये कुर्वन्ति द्विजा यतः ।
तदन्तःकरणशुद्धिमन्यथा न हि शुद्ध्यति ।। ३५ ।।
यावत्कालं तीक्ष्णबुद्ध्या पद्मपत्रोधभेदनम् ।
प्रणायामविधौ तावन्मात्रागणनमुच्यते ।। ३६ ।।
सव्यहस्ते सव्यजानुस्पर्शनं यावदाचरेत् ।
तावत्कालं प्रकुर्वीत मात्राभिर्गणनं द्विजः ।। ३७ ।।
यावदङ्गुलिनिस्थाने जायते तु परंतप ! ।
तावन्मात्राभिगणनं प्राणायामं चरेद्बुधः ।। ३८ ।।
प्राणायामं विना सर्वं कृतं यत् कर्मनिष्फलम् ।
प्राणायाममतः कुर्य्यादन्तःकरणशुद्धये ।। ३९ ।।
मनसश्च पराशुद्धिर्जीवस्य च महीपते ! ।
कायिकं वाचिकं पापं मनसीयं परं च यत् ।। ४० ।।
सर्वमेतन्महापापं तदन्यद्दुष्कृतं च यत् ।
प्राणायामो दहेदाशु विधिनानुष्ठितो यदा ।। ४१ ।।
अनेन विधिना यस्तु प्राणायामं चरेद्बुधः ।
सर्वपापैः प्रमुच्येते कोटिजन्मार्जितैरपि ।। ४२ ।।
श्वासः काशश्च रोगश्च शिरःश्रोत्राक्षिवेदना ।
जायते च तथा क्लेशाः प्राणायामव्यतिक्रमात् ।। ४३ ।।

सूत उवाच

तस्मात् संयतचित्तात्मा चरेत् प्रणवमुत्तमम् ।
सुखारोग्यवकीत्कीर्त्तिप्रदं पापविमोचकम् ।। ४४ ।।

ये कुर्वन्ति नृपं प्रति प्रकथितं धाता पवित्रात्मना
प्राणायामविधिं समस्तकलुषध्वंसप्रदं भूतले ।
ते वै सर्वसुखं विभुज्य सततं शेषे च मोक्षप्रदं
गच्छन्त्यब्जदृशः पदं मधुभिदो भूमा सुराणां वराः ।। ४५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये प्रणववर्णनं
नामैकपञ्चाशत्तमोऽध्यायः ।।

द्विपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

अथ देहस्वरूपस्य भावना वर्ण्यतेऽधुना ।
यज्ज्ञात्वा योगेन यान्ति तद्धाम परमं हरेः ।। १ ।।
योगीश्वरो हरो यत्तु कुरुते योगसिद्धये ।
अन्ये च साधका यत्तु कुर्वन्ति शुद्धमानसाः ।। २ ।।
साधकानां हितार्थाय गुह्याद्गुह्यतरं च यत् ।
तदहं संप्रवक्ष्यामि यथोक्तविधिना नृप! ।। ३ ।।
मण्डकाधारपृष्ठेऽपि सुषुम्ना संप्रवर्त्तते ।
तदूर्ध्वदेशे विश्वात्मा कालरुद्रो विराजते ।। ४ ।।
पद्मासनतया नाड्यां ध्यानमानस्त्रिलोचनः ।
जटामुकुटधारि च तदूर्ध्वे प्रकृतिः परा ।। ५ ।।
मूलप्रकृतिर्विख्याता द्विभुजाब्जलतायुधा ।
रक्ताम्बरा तडिद्गौरी तत्र नाड्यां सुशोभना ।। ६ ।।
तस्योपरि पुनर्मायाधारशक्तिर्गुणात्मिका ।
निर्गुणा सा च गदारिशङ्खाम्बुजकरा हरा ।। ७ ।।

पद्मासना रक्तवस्त्रा तत्र नाड्यां व्यवस्थिता ।
तदूर्ध्वदेशे कमठश्चतुरंघ्रिर्महाबलः ।। ८ ।।
तन्नाडीकल्पितस्तस्य स्वपार्श्वोद्यतनाडिकः
तन्नाड्या कलितो जिह्मपुच्छदेशाङ्गचूडकः ।। ९ ।।
अनन्तो नाम नागस्तु विश्वाधारो विराजते ।
तत्रैव चिन्तयेत् प्राज्ञ सुस्थिरमनसा पुनः ।। १० ।।
अनन्तरूढोद्गतनाडिकोदत्सव्यांघ्रिरेषो नवनीरदश्रीः ।
गदारिशङ्खाब्जमनोज्ञपाणिस्तिष्ठन्नसौ यज्ञवराह एव ।। ११ ।।
तद्वन्तो गतनाडिकोपरिलसत् पाताललोकं सुधा
वर्ण्णश्चास्ति तदूर्ध्वतोऽस्ति च रसां पूर्वं तलं नामकम् ।
विभ्रच्छ्रयामतरं तदूर्ध्वकपदे पीतं ततः निर्मलम्
नासाख्यातोमहातलं सुविपुलं तस्योपरिष्ठात् पुनः ।। १२ ।।
रक्तं तच्च तलातलं विजयते तावन्मनोज्ञं ततः
कृष्णं सुष्ठुतलं ततोऽपि वितलं रक्तं च पीतं तलम् ।
पातालादितलान्तमद्भुततमं तत्सप्तलोकं बभौ
तान्नाड्या परिगुम्फितं क्षितिपते ! तस्योर्ध्वदेशे पुनः ।। १३ ।।
आधारनामकं चक्रं चतुर्द्दशसमन्वितम् ।
दलेषु रक्तिमायुक्तं तन्नाड्या परिगुम्फितम् ।। १४ ।।
दले दले वकारादि मकारान्ताक्षराणि च ।
सुशक्तिमूर्त्तितत्त्वानि वाहनायुधसंभृतः ।। १५ ।।
तन्मध्ये डाकिनी नाम देवी पद्मासना शुभा ।
रक्तांशुका पञ्चमुखी नानाभूषणभूषिता ।। १६ ।।
श्रुवं पद्मं चाक्षसूत्रं पुस्तकं विभ्रती सती ।
विराजतां महादेवीं ध्यायतो नास्ति दुर्गतिः ।। १७ ।।

तस्योदरे विद्रुमवर्ण्णरम्यो,
लम्बोदरोऽब्जासन एष देवः ।
पाशाङ्कुशेष्वाभयंचारुहस्तः,
सशक्तितो मूषिकपत्र ईड्यः ।। १८ ।।
विद्युदा परिलसति सदा तत्र नाड्यूर्ध्ववर्त्ति
यच्चक्रं तत्र चास्तेऽपृदलसरसिजो वादिलान्तारयुक्तैः ।
तत्त्वैः शक्त्या च मूर्त्त्यायुतमथ विलसन्मध्यदेशे तदीये
देवी सा साकिनीयं कमलवरगता देववक्त्रान्तभूषा ।। १९ ।।
दण्डं घण्टां कपालं वरमभयमसिं विभ्रतीं हस्तपद्मै-
स्तस्याश्चक्रेऽब्जजन्मा वसति च सुतरां चोदरे नर्जरेऽस्मिन् ।
हस्तोद्यद्दण्डपुस्तस्रगमृतविसरद्भाजनो ध्येय एव
क्षौणीदेवैः स्वशक्तिस्फुरिततरनिजं क्रोडदेशः सुरेशः ।। २० ।।
तद्वच्च वक्रोद्गतनाडिकाभि-
र्ग्रस्तानना कुण्डलिनी त्रिवृत्ता ।
अधोमुखी प्रोद्यतपुच्छदेशा
सुप्ता च नाड्यूर्ध्वतले विशाले ।। २१ ।।
तदूर्ध्वदेशे वरनाभिचक्रं दिक्पत्रशोभं धृतरत्नकान्तिः ।
स्थितेषु सर्वेषु दलेषु तत्र वर्ण्णास्तु विद्यन्ते यथोक्तरीत्या ।। २२ ।।
उकारादि फकारान्तैर्वर्ण्णैः प्रतिदलं युतम् ।
मूर्त्तिशक्तिकतत्त्वैश्च तादृशं नाभिचक्रकम् ।। २३ ।।
तत्रस्था काकिनी नाम त्रिमुखी कमलासना ।
नानाभरणसम्पन्ना प्रतिवक्त्रं त्रिलोचना ।। २४ ।।
दण्डं खड्गं कपालं च वज्रमेवं च विभ्रती ।
शङ्खचक्रगदापद्मराजत्करचतुष्टयः ।। २५ ।।

लक्ष्म्या च सहितः श्रीमान् पीतवासा घनद्युतिः ।
विष्णुस्तदीयोदरगो ध्येयो ध्यानपरैर्नरैः ।। २६ ।।
तदग्रदेशे दरफुल्लपद्ममधोमुखं चाष्टदलं च शुक्लम् ।
क्रमेण चाष्टाक्षरवर्ण्णरम्यं तन्नाडिकास्यूतगतोर्ध्वनाडम् ।। २७ ।।
तदेव जीवस्वपदप्रसिद्धं प्राणनिलोल्लासितमस्य तस्य ।
स एव दीपस्य शिखेव भाव्यो देदीप्यमानो हृदि संयमञ्जैः ।। २८ ।।
तस्योर्ध्वदेशे रविशङ्खपत्रं
पद्मं सुवर्ण्णं प्रतिमप्रभं तत् ।
ठान्तैश्चकाद्यैः कलिता दलेषु
तन्मूर्त्तिशक्त्युत्तमतत्त्वयुक्तम् ।। २९ ।।
मध्ये तदीये द्विमुखी च कृष्णा
सा साकिनी नाम चतुर्भुजा च ।
त्रिशूलकं खर्परमक्षसूत्रं
सतुम्बुरुं चादधती प्रसन्नाम् ।। ३० ।।
तदुदरवरपीठे दिव्यदेहं शिवं तं
हरिणपरशुशूलस्वर्ण्णघण्टाढ्यहस्तम् ।
शिखिरविशशिनेत्रं चारुपद्मासनस्थं
रजतनिचयकान्तं कान्तयालक्ष्ममीडे ।। ३१ ।।
तद्वक्त्रदेशोद्गलनाडिकायां
देदीप्यते षोडशपत्र पद्मम् ।
स्वरैश्च मूर्त्यादियुतैर्दलेषु
स्तुत्यं च मुक्त्वा प्रभमीदृशं च ।। ३२ ।।
तन्मध्यभागे जयति त्रिशूलं
वज्रं दधाना स्फुटविद्रुमाभा ।
सा हाकिनी नाम लसद्विभूषा
पद्मासना रक्तपयोजवक्त्र ।। ३३ ।।

तस्याश्च देव्याः परमोदरेऽस्मि-
न्नात्माविशुद्धद्युतिरिड्यमानः ।
श्रुतिस्मृतिस्पष्टतरार्थदेव्यः सद्यः
सतां हृद्यविकासनश्रीः ।। ३४ ।।
तत् षोडशदलाम्भोजवक्त्रोद्यन्नाडिकोपरि ।
घण्टिकास्ते तदुपरि प्रवलप्रतिमोऽधरः ।। ३५ ।।
तदूर्ध्वे नासिका चास्ते नासिकोभयतः शुभे ।
चन्द्रसूर्य्यात्मके नेत्रे तदूर्ध्वे ते भ्रुवौ शुभे ।। ३६ ।।
तन्मध्ये वर्त्तते हंसः सोऽहमित्युच्यते बुधैः ।
तदूर्ध्वदेशे या नाडी तत्राब्जं द्विदलं स्मृतम् ।। ३७ ।।
तत्र हं क्षं वर्ण्णयुगं दधत् शुभ्रतमं शुभम् ।
तत्रास्ते लाकिनी नाम षडाननमनोहरा ।। ३८ ।।
डम्बरुं चाक्षमालां च पङ्कजं खर्परं तथा ।
हस्तेश्चतुर्भिर्दधती पद्मासनमनोरमा ।। ३९ ।।
दिव्ये तस्याश्च देव्याः विलसति सुतरां निर्मले चोदरेऽस्मि-
न्नित्यं सत्यस्वरूपः श्रुतिचयनिपुर्णैर्वेद्यमानः परात्मा ।
योगारूढैरमूढैर्नियमितहृदयैर्योगिभिश्चिन्त्यमानो
ध्यानाशक्तैश्च मुक्तैः क्वचिदपि हृदये वीक्षितो व्यापको यः ।। ४० ।।
तदूर्ध्वभागे परमे प्रसिद्ध-
मयूरपुच्छांशुकवर्जपक्षा ।
सिंहांघ्रिवत्पादचतुष्टयाढ्या
या बालदेशक्षतितामृतश्रीः ।। ४१ ।।
मनुष्यंवक्त्रा महिषत्रिशृङ्गा
सद्रोणचञ्चूद्गत नाडिकासौ ।
गोकर्ण्णयुक्ता चरणायुधोग्र-
कोटिस्थलाभात्यजपा कृपालुः ।। ४२ ।।

अजपा नाम या देवी गायत्री सोच्यते बुधैः ।
तज्जपाशक्तचित्तानां ब्रह्मसाक्षात्कृतिर्भवेत् ।। ४३ ।।
अजपोद्र्ध्वपदे सहस्रपत्रं
कमलं तद्विमलं विभाति लोके ।
प्रतिपत्रमकारदादिवर्ण्णाः
कलनीयाः कुशलैरथ क्षमस्व ।। ४४ ।।
सहस्रपत्राम्बुजमध्यभागे
या साकिनी नाम विराजतेऽसौ ।
पद्मासना सप्तमुखी प्रसन्ना
मुण्डाब्जहस्ता हृतचित्रवर्ण्णा ।। ४५ ।।
तदीयोदरे सुन्दरे शुद्धमूर्त्तिर्णुरु-
र्देवतानां गुरुर्भाति नित्यम् ।
अभित्यब्जहस्तस्वकान्ताङ्गसङ्गी
समस्ता प्रशस्ता श्रुतिस्मृत्यनीकः ।। ४६ ।।
तस्योपरि त्रिकोणं तु मण्डलं विमलं शुभम् ।
हमित्येकाक्षरारम्यं राजते रजतप्रभम् ।। ४७ ।।
तस्योपरिष्ठादतुले विमाने
या नीलचक्रद्युतिराजमानः ।
सुवर्ण्णवर्ण्णस्फुटरत्नसिंहः
मनस्थ शून्यस्थलमेव यः स्यात् ।। ४८ ।।
आमण्डुकाधारमनारतं यः
पूज्यो मुदा होमजपादिकेषु ।
शून्यालयान्तं प्रतिभाव्य कुर्य्यात्
कर्मात्र सौख्यं परिपूज्य मुक्तः ।। ४९ ।।

सूत उवाच

एतां तु भावनां कृत्वा यत्कर्म कुरुते सुधीः ।
तदेव कोटिगुणितं ब्रह्मेरीतमिति द्विजाः ! ।। ५० ।।
एतद्भावनया विना नहि सुखं प्राप्तं द्विजा याजकै-
र्यत्कर्म कृतं च तत्तु विफलं तेषां न शुद्धं मनः ।
तस्माद्यत्नतया हिताय सहसा तावन्निजस्य क्षितौ
लोकस्यास्य सद्गुरोरनुदिनं संशिक्ष्य कुर्य्यादिदम् ।। ५१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये द्विपञ्चाशत्तमोऽध्यायः ।।

त्रिपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

एतादृशीं भावनां तु कृत्वा पूजकसत्तमः ।
चक्राणां च यथा कुर्य्यान्न्यासान् षण्णां परंतप ! ।। १ ।।
तथैव षोडशाधारभावनां च यथाचरेत् ।
श्रूयतां भवतां तावत् पत्रणेह च शर्मणे ! ।। २ ।।
प्रतिचक्रं यथा ध्यानन्यासौ च देववर्ण्णयोः ।
मूर्त्तिं शक्तिकतत्त्वानां कथयामि च साम्प्रतम् ।। ३ ।।
आधारे देवपत्रे च वादिसान्तान् सबिन्दुकान् ।
मेदोऽस्थिमज्जाश्चक्रांश्च तत्त्वान् देवान् तथा शृणु ।। ४ ।।
बलं वृषघ्नं वृषहंससंज्ञो
सूक्ष्मां च सन्ध्यां क्रमतो हि देवि ! ।
प्रशाप्रभे चन्द्रसमानभासा
भयावरस्रग्गगनादिदिव्या ।। ५ ।।

आधारपङ्केरुहमध्यदेशे
संवाहनं शोणितवर्ण्णरम्यम् ।
पाशाङ्कुशेष्वभवहस्तपद्मं
वन्देऽरविन्दे स्थितमीशपुत्रम् ।। ६ ।।
तत्र गन्धादिना तांश्च विघ्नेशं मनसार्च्चयेत् ।
साधको भक्तिपूतात्मा दिव्यभावसमन्वितः ।। ७ ।।
अनावलिकाममयेऽथ पीठे विद्युत्प्रभे षट्छदचित्रदीप्ते ।
वरौ मयूरौ लमिताः षडर्ण्णाः प्राणोमतिर्जीव मनोऽनलेन ।। ८ ।।
तत्त्वानि च त्वामनुवर्ण्णितानि देवाश्च देवस्य परस्परं च ।
विद्युत्प्रभास्तुत्यमहः स्वरूपाः पीठेश्वरानन्दरताः प्रसन्नाः ।। ९ ।।
भूधरो विश्वमूर्त्तिश्च वैकुण्ठः पुरुषोत्तमः ।
बली बलानुजश्चैव षडेते पुरुषाः स्मृताः ।। १० ।।
क्लेदिनी च तथा क्लिन्ना वसुधा वसुधा परा ।
परायणेति विद्युद्भा अङ्कुशाम्बुजकार्मुका ।। ११ ।।
पुष्पबाणान् धारयन्त्यो मदविभ्रममन्वरा ।
ध्येयाश्च साधकैस्तावद् भक्तिभावसमन्वितैः ।। १२ ।।
षडम्भोजमध्ये स्मरं भावये-
त्तं दधानं धनुः पोष्पमेतच्छरांश्च ।
रतिप्राणबन्धुं सुशोणाङ्गमुच्चै-
र्जयन्तं जगत्तं सर्वमुग्धं नयन्ति ।। १३ ।।
स्मरमेतादृशं भूप ! षट्पत्रवर पङ्कजे ।
ध्यात्वा गन्धादिना तावन्मार्त्यादींश्च हृदार्च्चयेत् ।। १४ ।।
मणिपुरे दशारे च नीलाम्बुजसमत्विषि ।
डकारादिफकारान्तं न्यासं कुर्य्याद्यथाविधि ।। १५ ।।

प्रणवाद्याः विष्णुयुताः क्रमाद् भूपालसत्तम ! ।
नन्दीनरोनरकजित् हरिः कृष्णश्च सात्यकिः ।। १६ ।।
स्याततः शौरिः शूरश्च जनार्द्दन इतीरितः ।
देवानां गण इत्युक्तः शृणु देवि ! वदामि ते ।। १७ ।।
स्थितिः ऋद्धिः समृद्धिश्च शुद्धिर्वृद्धिस्तथा पुनः ।
भूतिर्मतिः क्षमा रमा उमा तादृशी कीर्त्तिता ।। १८ ।।
ताः श्यामज्ञानमुद्राश्च वराभयाम्बुजो ज्वलाः ।
ध्येयाः हृदि साधकेन निश्चलेन धिया पुनः ।। १९ ।।
चक्षुः श्रोत्रपादगन्धरसरूपैः सतत्त्वकैः ।
स्पर्शशब्दमनोहर्त्ता तत्त्वैरेतैः समुज्वलाः ।। २० ।।
वन्दे विधिं नाभिसरोजमध्ये
किञ्जल्कवर्ण्णं च चतुर्मुखं तम् ।
सशक्तिकं हंसवराधिरूढं
दण्डस्रगम्भः पदपुस्तहस्तम् ।। २१ ।।
मनसा मनसा तत्र तमर्च्य चन्दनादिना ।
अनाहते द्वादशारे पद्मरागसमप्रभे ।। २२ ।।
ल्कादिभिः ठकारान्तैः सानुस्वारैः पृथक् पृथक् ।
युक्ते तेषामात्मभूता देवादेव्यश्च तत्त्वतः ।। २३ ।।
चक्री गदी तथा शाङ्ग्री शङ्खी चैव हली तथा ।
मुषली शूली पाशी च अङ्कुशश्च मुकुलकः ।। २४ ।।
नन्दीत्यनाहतान्तःस्था देवाः देवीर्निबोध मे ।
जया दुर्गा प्रथा सत्या चण्डी वाणी विलासिनी ।। २५ ।।
विजया विरजा विद्या विनन्दा यमुनेति च ।
पृथ्यम्बाग्निवाय्वाकाशपणिपायुयुगं पदैः ।। २६ ।।

वाक्घ्राणरसनायुक्तैस्तत्वैर्युक्ता हरिप्रभा ।
वराभीत्याम्बुजद्वन्द्वधारयन्त्यो मनोरमाः ।। २७ ।।
हृदयजलददेशे विष्णुमिन्दीवराभं
करकलितगदाब्ज ध्यानभृच्छङ्खचक्रम् ।
कमलवलयहार प्रस्फुरत्कुण्डलादि-
प्रचुरतरविभूषं श्रीयुतं भावयेऽहम् ।। २८ ।।
मनसा भावयेद्विष्णुं हृच्चक्रे रविपत्रके ।
तत्र मूर्त्यादिकांश्चैव गन्धादिविधिनार्च्चयेत् ।। २९ ।।
विशुद्धे षोडशदले चन्द्रकान्तिसमप्रभे ।
स्वरवर्ण्णान् विजानीहि स्फूरत्तारविराजितान् ।। ३० ।।
देवानेषां प्रवक्ष्यामि सर्वसिद्धिफलप्रदान् ।
केशवोऽथ नारायणो माधवोऽनन्त एव च ।। ३१ ।।
गोविन्दो विष्णुरपरो मधुसूदन एव च ।
त्रिविक्रमो वामनश्च श्रीधरस्तदनन्तरम् ।। ३२ ।।
हृषीकेशो पद्मनाभो दामोदरोऽर्च्चयेच्च तान् ।
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।। ३३ ।।
सतत्त्वानन्दरुचिरा विज्ञेयाः स्वरदेवताः ।
ध्येयास्ते साधकैर्नित्यं चक्रसाधनकर्मणि ।। ३४ ।।
आनन्दत्वयं पुरतः प्रविष्टं
आनन्द ता तद्धितये प्रविष्टा ।
चित्तत्वमुक्तं त्रितये च सम्यक्
तुरीयतः स्यादपरेण तत्त्वम् ।। ३५ ।।
तद्विष्णुतत्त्वं जगदेतदन्त व्याप्तं
परात्मा सहसा चराचरम् ।
वर्द्धिष्णुतत्त्वं खलुषड्विभेदं
ज्योतिष्कमात्रत्वमथामृतत्वम् ।। ३६ ।।

लीला ततोऽथाभवतत्त्ववारः श्रीवासुदेवस्य त्वमोघशक्तेः ।
इलात्वमाद्यं पुरुषः प्रधानं प्राणस्ततः क्रोध न तत्त्व नाम ।। ३७ ।।
एतानि चैव तत्त्वानि कृष्णभैरवरूपतः ।
कथितानि विशुद्धेऽस्मिन् विभूतिर्न महाप्रभो ! ।। ३८ ।।
कीर्त्तिः कान्तिस्तुष्टिः पुष्टिः धृतिः शान्तिः क्रिया रमा ।
मेधा हर्षा तथा श्रद्धा लज्जा लक्ष्मीः सरस्वती । ३९ ।।
रतिः प्रीतिरिति प्रोक्ता स्वदेव्योऽप्यमृतात्मिकाः ।
शुद्धस्फटिकसंकाशाः सुधाकुम्भलसत्कराः ।। ४० ।।
धृतोत्पलावराभीतिधारिण्योऽमृतविग्रहाः ।
ध्यानयोगपरा ह्येता ध्येयाश्च साधकैः सदा ।। ४१ ।।
ध्यायेत्कण्ठसरोरुहे शशिकला जज्जह्नुकन्यालस-
न्मौलिशङ्करमिन्दुकुन्दसदृशं सौम्यं लसत् त्र्यम्बकम् ।
हस्तोल्लासितरात्रिशूलपरशुस्त्रग्डम्बरुं सुन्दरं
चञ्चद्व्याघ्रगजेन्द्रचर्मवसनन्द्वन्द्वं तमन्धच्छिदम् ।। ४२ ।।
तद्वत्तन्मनसा तत्र गन्धादिविधिनार्च्चकः ।
षोडशच्छदके शम्भुं मर्त्त्यादिसहितं यजेत् ।। ४३ ।।
शरदुदितशशाङ्कोद्दीप्तपङ्केरुहाङ्के
द्विदललसितवर्ण्णौ हंससंज्ञौ सविन्दू ।
क्रमत इह गतौ तौ श्रीवराहनृसिंहौ
ह्यमुवरपरतत्त्वक्रोधतत्त्वौ क्रमेण ।। ४४ ।।
निशम्य विद्युता शक्तिरित्यष्टचक्रमातृका ।
द्विदले केवले हंसवर्णयुग्मं विधुप्रभम् ।। ४५ ।।
मूर्त्त्यादिसहितं तत्र पूजयेन्नृपसत्तम ! ।
भक्तिभावनया सम्यक् विशुद्धमनसा सदा ।। ४६ ।।

ॐकारस्मरणोष्मरश्मिविकसत्पद्मेषु तेषु स्फुरत्
पत्रेषु स्वरदेवताचयलसत् रूपेषु यस्त्वर्च्चकः ।
नित्यं तावदिदं विभाव्य नृपते ! शुद्धेन ते चेतसा
चोर्द्ध्वं वक्त्रयुतेषु भावनवशात्ताः पूजयेद्भक्तितः ।। ४७ ।।
पुण्डरीकादधोदेशे आज्ञया उद्र्ध्वतः क्रमात् ।
भगवद्वैभवैर्मन्त्रैः षोडशाक्षरनिर्णयः ।। ४८ ।।
आध्रीयते पुण्डरीकं सर्वतत्त्वपरायणम् ।
आधारकथ्यते तेन कलाभेदः कलात्मना ।। ४९ ।।
रुद्राक्षविवरं चादौ कामरूपं द्वितीयकम् ।
उड्डियानं तृतीयं स्याज्ज्वालरन्ध्रं चतुर्थकम् ।। ५० ।।
पूर्णाचलं पञ्चमं च षष्ठं सतारसंज्ञकम् ।
सप्तमैकाम्रपीठं च अर्द्धचन्द्रमथाष्टकम् ।। ५१ ।।
निरोधिकाक्षं नवमं नादाख्यं दशमं स्मृतम् ।
एकादशे च नादान्तं द्वादशे क्षीरवारिधिम् ।। ५२ ।।
त्रयोदशे सहस्रारं तदूर्द्ध्वं चन्द्रमण्डलम् ।
चतुर्द्दशं पञ्चदशं शिवशक्तिपदं विदुः ।। ५३ ।।
नित्यस्थलं षोडशे स्यात् पुण्डरीकमिदं विदुः ।
तदूर्ध्वं यत्सहस्रारमूर्द्ध्वनालमधोमुखम् ।। ५४ ।।
तदनन्तं विजानीहि तदात्र पत्रलक्षणम् ।
सहस्रदलच्छत्रान्तर्मणिराजविराजितम् ।। ५५ ।।
राजज्योतिर्ब्रह्मवस्तु राजते प्रभया प्रभोः ।
सच्चिद्ब्रह्मानन्दवस्तु परस्य परमात्मनः ।। ५६ ।।
प्रभया मण्डितं स्नानं हंसविम्बायितं जगुः ।
बहिरर्थविदो ये ते हंसज्योतिः परायणाः ।। ५७ ।।

वस्तुतः तत्पदं नित्यं सर्ववृत्तिसमन्वितम् ।
अथ रुद्राक्षविवरं स्मरेच्चन्द्राग्निसन्निभम् ।। ५८ ।।
बिन्द्वाकारं शरीरं च चिदाकाशपरं महः ।
अपां बीजं तत्र गौरं लक्ष्मीनारायणात्मकम् ।। ५९ ।।
शरण्यो रमयाश्लिष्ट इलया च निसेवितः ।
योऽनामयः कलाक्रान्तपरं ज्योतिर्मयो विभुः ।। ६० ।।
अस्य पारायणाभ्यासात्सिद्धिः स्याच्छरणागतः ।
नारायणः प्रसन्नः स्यात्भूलीलाभ्यां निसेवितः ।। ६१ ।।
इत्येवं प्रथमाधारः कथितः सर्वकामदः ।
अधुना कथ्यते भूप ! द्वितीयाधारनिर्णयः ।। ६२ ।।
कामरूपं महापीठं विद्युदग्निसमप्रभम् ।
त्रिकोणमध्यतस्तस्य द्वितीयं बीजमुन्नयेत् ।। ६३ ।।
हरिरमाशान्तियुक्तो योगमायामहोऽन्वितः ।
उद्यद्भानुसमो ध्येयोऽविद्यामोहं तरेत्ततः ।। ६४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये त्रिपञ्चाशत्तमोऽध्यायः ।।

चतुःपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

महीपते ! ते पुरतो द्वितीयाधारनिर्णयः ।
कथयित्वा तृतीयस्याधारस्य फलमुच्यते ।। १ ।।
नाडिकांशं चाष्टकोणं चन्द्रकान्तिसमप्रभम् ।
नीलजीमूतसंकाशं तार्त्तियं तत्र चिन्तयेत् ।। २ ।।

कमलेशान्विता लक्ष्मीस्तुरीया परिमण्डिता ।
योगमाया च विमला परंब्रह्मप्रकाशिनी ।। ३ ।।
ध्यानेनेत्थं परानन्दकृष्णकामेऽभिसिद्ध्यते ।
तार्त्तीयाधार एषो हि चतुर्थः कथ्यतेऽधुना ।। ४ ।।
जालन्धरं महापीठं जवाकुसुमसन्निभम् ।
तमुर्वाकृतिकं मध्ये गोविन्दं व्यापिनीयुतम् ।। ५ ।।
योगमाया परंब्रह्मराजितं परमं मनुम् ।
ध्यायेदनेन गोपाल स्नेहाच्च वरीवर्द्धते ।। ६ ।।
तृतीयाधारमावर्ण्य पञ्चमं कथयाम्यहम् ।
पूर्णशैलमहापीठ मण्डलाकारमण्डने ।। ७ ।।
पदरागप्रतिकाशं परमानन्दमव्ययम् ।
इन्दिरालिङ्गितं प्रीतं योगमायापरायणम् ।। ८ ।।
अनेन जायते पीतः श्रीकृष्णे सुहृदम्बरे ।
पञ्चमाधार एषोऽत्र गदितो नृपसत्तम ! ।। ९ ।।
इन्द्रनीलप्रतिकाशं स्फटिकाञ्जनसंन्निभ ।
ध्यानेनानेन जगतां प्रकृतिः प्राकृतासन ।। १० ।।
नाथ एको जगन्नाथ विहर्त्ता प्रभुरीश्वरः ।
यथा प्रकृतिरीशस्य विलासायाखिलं जगत् ।। ११ ।।
शौरिः कृत्याश्लिष्टदेहः कलाबिन्दुसमन्वितः ।
एकान्ते काञ्चनाभासे मुक्ता च्छविधरो मनुः ।। १२ ।।
ध्यायेज्जगत्कार्य्यरूपं स्वकान्तं कृष्णमीश्वरम् ।
बहुवल्लभतामस्य विस्मरेत्तेन केशवम् ।। १३ ।।
विलासिनी स्वयं कृष्णा कान्ता स्वस्येव रञ्जकम् ।
नाथस्तत्र मन्त्रध्यानात्सिद्धेः ज्ञानं च तादृशम् ।। १४ ।।

इत्येवं सप्तमाधारः कथितो ज्ञानदायकः ।
अष्टमाधारमधुना निगदामि महीपते ।। १५ ।।
अर्द्धचन्द्रमसं पीठं विद्युदग्निसमप्रभम् ।
रसदं कीर्त्तिसंश्लिष्टं कालब्रह्ममयं तथा ।। १६ ।।
शुद्धानुरागमुदितं वल्लभं प्राणवल्लभम् ।
अत्र पारायणाभ्यासात् वल्लभत्वं भवेत् प्रभोः ।। १७ ।।
इत्यष्टमाधारफलोऽर्थविज्ञः करोति यः कर्मण एव धीरः ।
मुखं तथाभुज्य परत्र लोके सच्छर्म कर्मान्वित एक गच्छेत् ।। १८ ।।
परकीयानुरागाय यथा दुर्लभवस्तूनि ।
निरोधकाम्भोजनिभा अर्द्धचन्द्रतयाकृतिः ।। १९ ।।
तन्मध्ये चिन्तयेन्मन्त्री धरित्रीद्वितीयान्वितम् ।
केशवं योगमायाढ्यं परंज्योतिः परं स्मृतम् ।। २० ।।
सा धरित्री प्रेमात्मना संख्या युक्ता विलासिनी ।
अन्योऽन्याश्लिष्टसर्वाङ्गी तोषयेत्केशवं परम् ।। २१ ।।
ध्यानेनानेन सततमभ्यासेन गदाग्रजः ।
प्राप्नुयात् वासमपि सा रहस्यं ब्रजनाथयोः ।। २२ ।।
अयं नवधार इति प्रसिद्धिप्रदः सर्वदा ।
नादं विद्युत्प्रभं शुद्धं मृणालतन्तुसंनिभम् ।। २३ ।।
भगवन्तं भावयेत्तु कान्त्याश्लिष्टं सयौगिकम् ।
परं ब्रह्ममयं दिव्यं प्रेमभक्तिप्रसिद्धये ।। २४ ।।
दशमाधार एषोऽत्र देवता सर्वकामदः ।
अपरं कथयिष्यामि त्वाधारं रुद्रसंख्यकम् ।। २५ ।।
नादान्तं पाण्डरं शुद्धं चक्रावर्त्तं स्फुरद्रसम् ।
प्राणेशं चिन्तयेत्तत्र प्रबालमणिसन्निभम् ।। २६ ।।

कीर्त्तियोगान्वितं ज्योतिः प्रसिद्धं परमायनम् ।
अनेनैवानुसन्धानात् प्रेमप्राणो भवेत्सुधीः ।। २७ ।।
इत्येकादशकाधारः कथितो धर्मवर्द्धन ।
क्षिरोदधिक्षीरे शुभ्रं प्राणेशं रससंमितम् ।। २८ ।।
आद्येन रससारेण विलासन्तं कलागुरुम् ।
योगमाया ब्रह्मवस्तुपूरितं स्वानुभूतिदम् ।। २९ ।।
अनेन प्राप्नुयाद्भक्ति सिद्धप्रेमानुभूतिजम् ।
कृष्णं सुखं नवास्वादं मधुरं मधुसूदनम् ।। ३० ।।
द्वादशाधारमित्याहुः वदन्तीति मनीषिणः ।
त्रयोदशाधारमहं कथयामि महत्सुखम् ।। ३१ ।।
सहस्रारं महापद्मं सहस्रकिरणोज्वलम् ।
कलात्मिकासमाश्लिष्टमानन्दं तत्र चिन्तयेत् ।। ३२ ।।
योगमाया ब्रह्ममयं शरच्चन्द्रसमप्रभम् ।
ध्यानेनेत्थं सुतीव्रेण भक्तरक्षणिका भवेत् ।। ३३ ।।
भजतं श्रीकृष्णचन्द्रं नानाभावकलास्पदम् ।
इति त्रयोदशाधारः कथितो नृपसत्तम ।। ३४ ।।
चन्द्रमण्डलमेवादौ द्रवब्रह्मैककारणम् ।
तद्वै शिवपदं प्राहुः शुद्धस्फटिकसंनिभम् ।। ३५ ।।
परानन्दं शिवं तत्र यं शेषमिति ते जगुः ।
हलधृक् रेवतीयुक्तः तुरीयवासितोऽचलः ।। ३६ ।।
योगमायाज्योतिषाक्तः सहस्रफणिमस्तकः ।
वर्णभेदेन जगतः कलातस्तत्त्वमीयते ।। ३७ ।।
चतुर्द्दशाधार इति गदितो गदतां वर ।
अतः परं पञ्चदशाधारं शृणु महीपते ।। ३८ ।।

देवलोकमतो विद्धि ऊर्ध्वं सिद्धगणैः सदा ।
ध्येयमष्टास्त्रममलमष्टशक्तिसमन्वितम् ।। ३९ ।।
तद्वद्धानुसमं दीप्यद्रत्नाकीर्णं रसात्मिका ।
रमाप्रेम्णाभिसहिता योगमाया सहोच्यते ।। ४० ।।
देवीलोकमिमं केचित् वदन्ति तत्त्ववत्तमाः ।
रुक्मिण्यंशसमुद्भूता यत्रास्ते प्रकृतिः परा ।। ४१ ।।
सात्विकी राजसी चेति तामसी च गुणात्मिका ।
गुणातीताः पञ्चभेदाः तथा च कथिता श्रुतिः ।। ४२ ।।
सात्त्विकी च श्रुतिः प्रोक्ता वाणी तु राजसी मता ।
तामसी पार्वती चेति विद्युद्वती गुणात्मिका ।। ४३ ।।
गुणातीता तु विज्ञेया ईशा वा सर्वमेव तत् ।
इति पञ्चविधास्तासां कीर्त्तिता यत्र वै श्रुतिः ।। ४४ ।।
पञ्चभेदैः जगत्सर्वं प्रकाशयति सेश्वरी ।
इति पञ्चदशाधारः शृण्वतां तथा पार्वती ।। ४५ ।।
सर्वपापक्षयकरः सर्वदासर्वकामदः ।
तदूर्ध्वं पुण्डरीकं च नीलं दिव्यं सदाचलम् ।। ४६ ।।
सप्तपदाच्च तं प्राप्य गायत्रीभिरधिष्ठितम् ।
तत्र कृष्णपरं मन्त्रमेकार्णं चिन्तयेत्सुधीः ।। ४७ ।।
आनन्दं कृष्णसंकाशं धरित्रीं काञ्चनप्रभाम् ।
तुरीयामरुगानान्तां कलां शुभ्रां चतुर्मयम् ।। ४८ ।।
बिन्दुं विचिन्तयेन्नित्यं ब्रह्मसच्चित् परात्परम् ।
षोडशाक्षर एषोऽपि कुर्वतां स्मरतां तथा ।। ४९ ।।
एतद्भावयुतां तावत् सर्वकामफलप्रदः ।
एवं षट्चक्रसच्चित्तं षोडशाधारसंहतेः ।। ५० ।।

भावनां येऽपि कुर्वन्ति तेऽपि शुद्धा जपादिषु ।
पूजासु विष्णोस्ते योग्यास्तत्तद्भावनया द्विजाः ।। ५१ ।।
विना भावनया तेषां जपहोमार्च्चनादिषु ।
अयोग्यास्तेऽपि तद्विष्णोः कर्मणे च न संशयः ।। ५२ ।।
तस्माद्यत्नेन कर्त्तव्या साधकैर्भावमप्यसौ ।
कृते विष्णोश्च सन्तुष्टः कर्त्तुः कामफलप्रदः ।। ५३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये चतुःपञ्चाशत्तमोऽध्यायः ।।

पञ्चपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

विष्णोर्निगदितो तावन्मातृका कायशोधिका ।
इदानीं मातृका शाक्ता कथ्यते नृपसत्तम ।। १ ।।
आधारपद्ममरुणं चतुर्द्दलसमन्वितम् ।
वादिसान्तैश्चतुर्वर्णैर्युतं दिव्यमधोमुखम् ।। २ ।।
प्रणवाभ्यासतो मन्त्री प्रणवोच्चारमात्रतः ।
ऊर्ध्ववक्त्रं चिन्तयित्वा पूर्वादिक्रमतो न्यसेत् ।। ३ ।।
प्रणवं पूर्वमुच्चार्य्य वादिवर्णास्ततः परम् ।
लक्ष्मीमाया कामवाणी बीजं तस्मान्नियोजयेत् ।। ४ ।।
परमः सहजश्चैव विरजो योग एव च ।
आनन्दाय पदेनैव संयोज्य साधकोत्तमः ।। ५ ।।
गुप्ता पद्मा कामदा च शार्द्दोला सा चतुर्थिका ।
हृन्मन्त्रं च समुच्चार्य्य प्रत्येकेन तु संन्यसेत् ।। ६ ।।

ध्यायेत्तत्कर्णिकायां तु वक्त्रतुण्डमनामयम् ।
तत्र गन्धादिना तं तु मनसा पूजयेद्बुधः ।। ७ ।।
लिङ्गे स्वाधिष्ठानके च षड्दले वादिलान्तके ।
श्रियः कालो वारणश्च शार्द्दोलामृतपूर्णकः ।। ८ ।।
वकारादीन् पुनश्चान्ते षट्परिवारदेवताः ।
क्रीडामूर्च्छात्वाज्ञाम्बा च नमोऽन्ताः स चतुर्थिकाः ।। ९ ।।
एतत्पद्मान्तराले च मदनं मनसार्च्चयेत् ।
मणिपुरे दशदले नाभौ चूडादिपान्तके ।। १० ।।
सर्वोदयस्य शुक्तौ च रोचिनो विषदः स्मृतः ।
सत्यस्वापित स्वासौ च मोहान्ताः स चतुर्थिकाः ।। ११ ।।
ज्ञानभद्रा च शान्तिश्च मुद्रा च विक्रिया तथा ।
दाक्षिणी प्रोक्षणी चैव सुक्रिया स्वपिता रमा ।। १२ ।।
चतुर्थ्यन्ता नमोऽन्ताश्च शक्तयः कथिता बुधैः ।
शक्तिभिः सहनाभ्यब्जे पितामहममुं यजेत् ।। १३ ।।
हृच्चक्रे द्वादशदले कादिष्ठान्तार्ण्णसंयुते ।
प्रोक्षणश्च रकारश्च वैजयन्त्यश्च सोपनः ।। १४ ।।
मायायाश्च बलश्लेषतोऽर्थकः पद्य एव च ।
अनपायाः समचित्तो विकल्पोऽनन्त नामकः ।। १५ ।।
शान्तिमुद्रा च प्रीणा च विजया च गदा स्मृता ।
प्रोक्षणी च तथा चिन्ता सचतुर्थीकपालसा ।। १६ ।।
परितात्मा च सीमा च वेदिका सा सशारदा ।
नमोऽन्ताः कथिताः सम्यक् मध्ये विष्णुं च चिन्तयेत् ।। १७ ।।
ध्यायेत्तत्कर्णिकामध्ये श्यामवर्णं चतुर्भुजम् ।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।। १८ ।।

विशुद्धे षोडशदले कण्ठस्थाने न्यसेत् स्वरान् ।
मायया चित्ररामौ च प्रभृत्यः शुक्र एव च ।। १९ ।।
प्रियं भागः सिंहनाद पद्मनाभस्तथैव च ।
प्रभृत्यश्च सुमित्रश्च हंसः शिवः श्रियस्तथा ।। २० ।।
धूम्ररुद्धेन्द्रनामानौ चतुर्थ्यन्ता स्मृताश्च ते ।
भद्रा घण्टा च शिखरा षोडशा लोहिता तथा ।। २१ ।।
मदालसा क्षमा चैव रुचिरा सचतुर्थिका ।
सौभाग्या च गुरुभ्यां च वारिणी च श्रियस्तथा ।। २२ ।।
कालस्वदेवतादित्यार्ण्णपूर्णा चैव रामकाः ।
मध्ये च चिन्तयेन्मत्री नीलकण्ठं महेश्वरम् ।। २३ ।।
शरच्चन्द्रनिभं देवं शूलहस्तमनामयम् ।
तत्कर्णिकायाः मध्यस्थं त्र्यम्बकं पार्वतीधवम् ।। २४ ।।
चिन्तयित्वा तत्र देवं शिवं च मनसार्च्चयेत् ।
आज्ञाचक्रे द्विदले च भ्रुवोर्मध्ये सहाक्षके ।। २५ ।।
इन्द्रो दाक्षिण्यपुरुषः एतौ वर्णादिकौ मतौ ।
महाकाली महालक्ष्मीः शक्तिश्चैव प्रकीर्त्तिता ।। २६ ।।
क्षेऽन्तके च नमोऽन्ते च परमात्मनमुत्तरे ।
तत्र गन्धादिना पद्मे मनसात्मनमर्च्चयेत् ।। २७ ।।
आज्ञापूरे सहस्रान्ते लं वर्ण्णं तु परिन्यसेत् ।
पूरकाय भाग्यवती सचतुर्थी नमोऽन्तकाः ।। २८ ।।
समस्तमातृकायुक्ते भ्राजद्गुरुसुदेवते ।
नानावर्ण्णसमुल्लासे त्वज्ञानार्भिधशक्तिके ।। २९ ।।
हंसैकपरिपारेऽस्मिन् सर्वालङ्कारसंयुते ।
साङ्गोपाङ्गान् गुरून्नत्वा हृदा गन्धादिना यजेत् ।। ३० ।।

तादृशे कमले दिव्ये सुगुप्तं सुमनोहरम् ।
ललाटध्वनिनित्यस्थं लं सं च प्रणवं परम् ।। ३१ ।।
पुराज्ञाय ततो भाग्यवत्यै नम इति द्विजः ।
इति संचिन्त्य मनसात्मानं गन्धादिना यजेत् ।। ३२ ।।
ऊर्ध्वदेशे सहस्रारे सिद्धिरस्राद् प्रविन्यसेत् ।
आपो विकसितो नित्यः शिवोऽङ्गेऽन्ते प्रकीर्त्तितः ।। ३३ ।।
ऊर्ध्वाङ्गी चैव मेधाङ्गी नन्दा च पार्वती स्मृता ।
चतुर्थ्यन्ता नमोऽन्ता च तेजोमध्ये प्रविन्यसेत् ।। ३४ ।।
सहस्रपत्रे कमलेऽव्यक्ता विन्यस्यते द्विजः ।
नम इत्येषः स्फटिक मन्त्री मन्त्रफलं भवेत् ।। ३५ ।।
इत्यष्टचक्रविषयो वर्णितो मुनिपुङ्गवाः ।
शस्तः शक्त्यर्च्चनेऽप्येवमन्यथा निष्फलो विधिः ।। ३६ ।।
विधिः प्रोक्ता मातृकेयमीदृशी पूजकोत्तमैः ।
अवश्यमेव कर्त्तव्या पौरूषी शक्तिका तथा ।। ३७ ।।
यावदैवादशक्तास्ते कर्त्तुं च धरणीसुराः ।
सामान्यं मातृकां कुर्य्युर्यथा स्यात्तद्वदामि वः ।। ३८ ।।
आधारपद्मं स्मृतवेदपत्रं
लिङ्गाम्बुजं षट्छदमुत्तरोत्तरम् ।
दशार्णकं नाभिसरोरुहं तद्
रत्नप्रभं चाथ हृदयाम्बुजं च ।। ३९ ।।
दिनेशसंख्यछदपद्ममष्टा
पदप्रभं चन्द्रनिभं च कण्ठ्यम् ।
पद्मं पुनश्चारुललाटपद्मं
धूम्रप्रभं वस्त्रयुगेन युक्तम् ।। ४० ।।

वशी षसौ च न्यसता च मन्त्री
वाद्यं च लान्तं क्रमतस्ततोऽर्णम् ।
डाद्यं पकारान्तमवर्णवृन्दं
नाभौ च कादि हृदि ठान्तमेव ।। ४१ ।।
कण्ठे स्वराणां कुलमेव धीरो
न्यसेल्ललाटेऽहमिदं क्षमेवम् ।
नमोऽन्तमाद्यं प्रणवं सबिन्दुं
प्रत्यक्षरं न्यासयतु द्विजेन्द्रः ।। ४२ ।।
आधारपद्मादिललाटपद्मं
प्रान्तं क्रमाद् विक्रमणान्तशक्रो ।
अनामिकाङ्गुष्ठकमध्ययोगा-
दधोमुखी मुक्तकनिष्ठिकासौ ।। ४३ ।।
तर्जन्यलग्नाधृतपुष्पिकाभि-
र्न्यासे मृगी शस्ततमा च मुद्रा ।
तया न्यसेन्मन्त्रविदुत्तमोऽयं
षट्चक्रपत्रेषु च वर्णवृन्दान् ।। ४४ ।।
वकारवर्णादिक्षकारवर्णा-
न्धीरोऽपि संन्यस्य सुनिर्मलः स्यात् ।
आधारश्चक्रेऽपि गणेशमेवं
षट्पत्रपद्मे स्मरमाशुमन्त्री ।। ४५ ।।
नाभौ विधिं हृत्कमले च विष्णुं
कण्ठे शिवं चात्मयुगं भ्रूमध्ये ।
क्रमेण संचिन्त्य च तत्र तत्र
स्थानेऽर्च्चयेन्मानसतस्ततस्तान् ।। ४६

स्व स्व स्थानस्थितास्ताश्च षडङ्गन्यासदेवताः ।
चिन्तयित्वा ततो न्यासात् कुर्य्यादात्मविशुद्धये ।। ४७ ।।
शिरस्यास्य वृत्ते दृशोःकर्णयोश्च
स्फुरद्दण्डयुग्मे तथैवोष्ठभागे ।
लसद्दन्तपंङ्क्त्योः तथा चोत्तमाङ्गे
मुखेऽपि न्यसेत्तांश्च वर्णान् स वर्णी ।। ४८ ।।
बाह्वौर्मूलतलात्कराङ्गुलितलप्रान्तं तु सन्धिस्थले,
तावच्चोरुतलात्पदाङ्गुलितलं तत्सन्धिदेशे क्रमात् ।
पार्श्वे बन्धकपृष्ठनाभिहृदये कण्ठस्थले दक्षिणे
बाह्वौ तत्ककुदि न्यसेत्पुनरसौ सव्ये भुजे देशिक ।। ४९ ।।
अथ हृदयतलाद्धस्तपर्य्यन्तमार्य्यो
न्यसतु हि सकृदेवं सव्यवद्दक्षहस्ते ।
पुनरपि हृदयार्द्धात् सव्यपादान्तमेव
न्यसनविधिसुविज्ञो दक्षपादाङ्गुलान्तम् ।। ५० ।।
पुनः कुक्षौ मुखे चैव लिपिन्यासविधिं चरेत् ।
अकारादिक्षकारान्तं लिपिवृन्दं सुपावनम् ।। ५१ ।।
प्रणवाद्यं नमोऽन्तं च प्रत्येकं बिन्दुसंयुतम् ।
समुच्चार्य्य प्रयत्नेन तत्तत्स्थानेषु विन्यसेत् ।। ५२ ।।
तत्संन्यस्य यथान्यायं ततो ध्यायेत् स देशिकः ।
शान्तात्मा भक्तिभावेन निविष्टमनसा तदा ।। ५३ ।।
मातृकासौ महीनाथ ! चातुर्विधयुताभवेत् ।
बिन्दुत्रिधा बिन्दुयुक्ता तथैवोभयसंयुता ।। ५४ ।।
सविसर्गा चतुर्धेति कथिता बुधसत्तम ।
विद्याप्रदा केवला स्याद्धनदा सह बिन्दुका ।। ५५ ।।

सविसर्गा पुत्रकरी सोऽभया मोक्षदायिनी ।
एताश्चतुर्विधाः प्रोक्ताः मातृकाः कामदायिकाः ।। ५६ ।।
कर्त्तव्याः देशिकैः सर्वे कामनासिद्धिसत्वरैः ।
मातृकाक्षरवृन्दानां न्यासमुद्रा यथा भवेत् ।। ५७ ।।
इदानीं तत्प्रकटनं क्रियते श्रूयतां नृप ।
अनामिकामध्यमाभ्यां दक्षहस्तास्य देशिकः ।। ५८ ।।
शिरस्यास्ये च वृत्ते च तासां चैव तु विन्यसेत् ।
मध्यमानामिकाभ्यां च तर्जन्यां नेत्रयोर्न्यसेत् ।। ५९ ।।
अङ्गुष्ठेन न्यसेत् कर्णौ कनिष्ठाङ्गुष्ठयोगतः ।
नसोर्न्यासः प्रशस्तः स्यात्तर्जनी मध्यमे पुनः ।। ६० ।।
गण्डद्वये स्मृते ते चानामिकामध्यमे पुनः ।
अनया मुद्रया तावत् सर्वत्र विन्यसेत् बुधः ।। ६१ ।।
एताः मुद्राः प्रशस्तास्तु मातृकान्यासकर्मणि ।
विष्णोः प्रीतिकराः पुण्याः पूजायां सुप्रतिष्ठिताः ।। ६२ ।।
अथवानामिकाङ्गुष्ठा एकधा च प्रकीर्त्तिता ।
औष्ठयोर्दन्तपङ्क्तौ च समाख्याता मुनीश्वरैः ।। ६३ ।।
पुनर्मध्यमया शीर्षे सर्वाभिश्च मुखे न्यसेत् ।
मध्यमानामिकाङ्गुष्ठायोगेन विन्यसेत्तनौ ।। ६४ ।।
पुष्पैर्वा चेतसा वापि ह्यभावे न्यासमाचरेत् ।
मातृका दशधा प्रोक्ता गुप्ता गुप्ततमा अपि ।। ६५ ।।
त्वत्प्रेम्णा कथ्यते सेयं विष्णोः प्रीतिकरा नृप ।
शुद्धा च केशवाद्या च शक्तियुक्ता तथा स्मृता ।। ६६ ।।
श्रीबीजसहिता तावत् कामबीजयुता पुनः ।
रामा माया कामबीजसहिता चापि जायते ।। ६७ ।।

अनेन पुटिता स्याच्चेत्सर्वसिद्धिप्रदायका ।
हंसमन्त्रयुतासौ च सवाघमर्षणा स्मृता ।। ६८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पञ्चपञ्चाशत्तमोऽध्यायः ।।

षट्पञ्चाशत्तमोऽध्यायः

आदौ कुर्यान्मातृकामान्तरीयां पश्चाद्बाह्यां देशिकेन्द्रः सदैव ।
अन्तः शुद्धिर्नैव चेद्बाह्यशुद्धिर्न स्यादस्मादान्तरीयां चरेद्वै ।। १ ।।
यन्मातृकान्याससुकर्म कृत्वा मर्त्त्योऽपि देवत्वमुपैति सद्यः ।
मुद्रामनुदृष्टतयैव दोषान् सर्वान् दहत्येव हि मातृकेयम् ।। २ ।।
मातृकान्यासतः सर्वान् कामान् प्राप्यनरोत्तमाः ।
द्विजा यदा तया हीनास्त्वयोग्याः सर्वकर्मसु ।। ३ ।।

सूत उवाच

मातृकाख्यं मनुं चोक्त्वा ब्राह्मणम् ऋषिमन्त्र च ।
गायत्रीछन्दसं कृत्वा मातृकाशब्दपूर्विकाम् ।। ४ ।।
सरस्वती देवता स्याद्धलो बीजं तथा स्मृतम् ।
स्वराश्च शक्तयः ख्याता मातृकान्यासकर्मणि ।। ५ ।।
विनियोगं चरेद् विप्रा न्यासं कुर्य्याद्यथाविधि ।
ऋष्यादिकं चतुर्थ्यन्तं नमोऽन्तं प्रणवादिकम् ।। ६ ।।
कृत्वा त्वनेन विधिना ऋष्यादिन्यासमाचरेत् ।
संपुटीकृत्य स्वकरौ षष्ठ्यन्ते मन्त्रनामके ।। ७ ।।
ततोङ्गुलिचयालग्ने दक्षहस्ते फणाकृतौ ।
शिरोदेशे ऋषिन्यासं कुर्य्यादाचार्य्यवर्यकः ।। ८ ।।

कनिष्ठाङ्गुष्ठरहितमङ्गुलित्रयलग्नकम् ।
करं वक्त्रान्तरे मन्त्री छन्दोन्यासे प्रदर्शयेत् ।। ९ ।।
हृदये देवतान्यासं तलेन रचयेद्बुधः
कनिष्ठया विरहितं सर्वाङ्गुलिकयोजनम् ।। १० ।।
करं कृत्वा न्यसेद्द्बीजं शक्तिञ्चामृषिमुद्रया ।
विनियोगं ततः कुर्य्यात्कराञ्जलिपुटे पुनः ।। ११ ।।
आकारं तु विना युक्तं प्रणवाद्यं ततः परम् ।
कवर्गं बिन्दुसंयुक्तं मुक्त्वाङ्गुष्ठत्रिपर्वणि ।। १२ ।।
अङ्गुष्ठाभ्यां नम इति मन्त्रेण विन्यसेन्नरः ।
इकारद्वयसंयुक्तमाद्योपान्ते च वर्गकम् ।। १३ ।।
सानुस्वारं च ताराद्यं कृत्वा स देशिकः पुनः ।
तर्जनीभ्यामिति पदं वह्निजायां ततो वदेत् ।। १४ ।।
यो मनुर्जायते तेन तर्जनीन्यासमाचरेत् ।
उकाराभ्यां पुटीकृत्य सानुस्वारं टवर्गकम् ।। १५ ।।
मध्यमाभ्यां वषडिति मध्यमान्यासकृद्द्विजः ।
आद्येकारं तवर्गं च प्रान्तकारं सबिन्दुकम् ।। १६ ।।
अनामिकाभ्यां हूं चेति न्यसेन्मन्त्रीत्वनामिके ।
औंकारौकारपुटितं पवर्गं च स बिन्दुकम् ।। १७ ।।
कनिष्ठाभ्यां वौषडिति मनुना विन्यसेद् बुधः ।
अकारं पूर्वमुच्चार्य्यमादिवर्णान् सबिन्दुकान् ।। १८ ।।
अकारं प्रान्ततश्चोक्त्वा करशब्दं तथा जलम् ।
पृष्ठशब्दं समासेन चतुर्थीवचनद्वये ।। १९ ।।
संयोज्य ताभ्यामस्त्राय पङ्क्त्या न्यासंमाचरेत् ।
अनेन विधिना प्राज्ञश्चतुरङ्गुलिकाग्रतः ।। २० ।।

हृदये शिरसि न्यासं चरेद्देशिकयोसत्तमः ।
उन्नताङ्गुष्ठया प्रोक्ता ह्यधोमुख्या शिखां स्पृशेत् ।। २१ ।।
सव्यासव्यकरद्वन्द्वाङ्गुलिभिः कवचं न्यसेत् ।
तर्जनीमध्यमाभ्यां च नेत्रयोर्न्यासमाचरेत् ।। २२ ।।
अङ्गुलिभिश्च सर्वाभिः तलपृष्ठविघर्षणात् ।
सव्यहस्ततले भूयो दक्षमध्यत्रयाङ्गुलोः ।। २३ ।।
ताडनेऽस्त्रस्य मुद्रा स्यात् विघ्नत्रासविलासिनी ।
अस्त्रन्यासं द्विजः कुर्य्यात् पूर्ववन्मन्त्रवित्तमः ।। २४ ।।
षडङ्गमन्त्राधिष्ठाता देवता यादृशा स्मृताः ।
तासां रूपादिकं भूयः कथयामि समासतः ।। २५ ।।
नम इत्यस्य मन्त्रस्य देवता पुं स्त्रीलिङ्गका ।
लसत्कुण्डलताटङ्कः गदाकुम्भस्रगब्जधृक् ।। २६ ।।
हृदङ्गुष्ठस्थले चिन्ता भूषिताम्बुजसंस्थिता ।
पाशाङ्कुशवराभीति लसच्चारुकराम्बुजा ।। २७ ।।
स्वाहा नाम्नारुशाङ्गश्रीर्भूषणोल्लासिनी शुभा ।
शिरोदेशोऽम्बुजस्था सा चिन्तनीया च देशिकैः ।। २८ ।।
वषडित्यस्य मन्त्रस्य देवता त्रिगुणात्मिका ।
शङ्खचक्रं त्रिशूलं च डम्बरुवाञ्छिताभये ।। २९ ।।
धारयन्ती भुजैश्चित्यां शिखायां मध्यमाद्वये ।
हुंचेत्यर्ण्णगता देवो दुर्वादलसमप्रभः ।। ३० ।।
शङ्खचक्रधरः श्रीमान् पीतवासाब्जलोचनः ।
वर्गस्थलेऽनामिकायां चिन्तनीयो मुहुर्मुहुः ।। ३१ ।।
वौषडात्मक एषदैवतो ब्रह्मणोऽशाजनितोऽम्बुजप्रभः ।
चारुदण्डजलपात्रसत्करश्चिन्त्य एव नयने कनिष्ठके ।। ३२ ।।

नित्योऽस्त्राय फडितमन्त्रविलसद्वर्ण्णावली देवरा
श्रीरुद्रप्रतिरूपिणी त्रिनयना चन्द्रावतंशोज्ज्वला ।
शूलं डम्बरुकं मृगं विदधती मालां करैर्भूषिता
शार्दूला निजचेलिनी प्रतिदिनं चिन्त्यास्त्रमन्त्रैर्दिजैः ।। ३४ ।।
एतत्षडङ्गदेवानां चिन्तनं नाचरेत्तु यः ।
तस्य तत्कर्म विफलं जपहोमार्च्चनादिकम् ।। ३५ ।।
कुपितस्तस्य विप्रस्य षडङ्गादेवचिन्तकम् ।
मातृका च तदा सर्व सफलां तस्य जायते ।। ३६ ।।
युक्ता भूयश्च सकला सकला सकलार्थदा ।
एवं दशविधा प्रोक्ताः मातृका सर्वसाधिकाः ।। ३७ ।।
'पृथक्तल्लक्षणं ब्रूमः श्रूयतां नरपालकः ।
ऋष्यादिकं पदं कृत्वा पूर्ववद्देशिकोत्तमः ।। ३८ ।।
ताराबिन्दुनमः शब्दैः रहितं मातृकाक्षरम् ।
अकारादिक्षकारान्तं न्यसेद्यावन्निजाङ्गके ।। ३९ ।।
शुद्धाख्या मातृका ख्याता सा च वै सिद्धिकांक्षिभिः ।
एवं विधिविधानेन न्यासकार्य्यं समाचरेत् ।। ४० ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये षट्पञ्चाशत्तमोऽध्यायः ।।

सप्तपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

केशवादिन्यासमन्त्रस्यास्य दक्षप्रजापतिः ।
ऋषिश्चैवात्र कथितो गायत्रीच्छन्द एव च ।। १ ।।

अर्द्धलक्ष्मीनारायणो देवता परिकीर्त्तिता ।
क्लीं श्रीं बीजशक्ती च कथिते मुनिपुङ्गवैः ।। २ ।।
चतुर्वर्गफलप्राप्त्यै विनियोग उदाहृतः ।
दीर्घस्वरैः समायुक्तं कृत्वा तन्मत्रबीजकम् ।। ३ ।।
षडङ्गन्यासकं तेन बीजेन देशिकश्चरेत् ।
सार्द्धचन्द्रं रमा माया बीजं चोक्त्वाथ वर्णकम् ।। ४ ।।
सबिन्दुं च ततो मूर्त्तिं शक्तिं च देशिकोत्तमः ।
चतुर्थ्यन्तं नमोऽन्तं च कृत्वा च क्रमतः सुधीः ।। ५ ।।
मूर्त्त्या शक्त्या लक्षणं तत कथयामः समासतः ।
यद् ज्ञात्वा मुच्यते जन्तुः कोटिजन्मार्जितांहसा ।। ६ ।।
केशवो मूर्त्तिराख्यातः कीर्त्तिस्तावदिहोच्यते ।
तद्वन्नारायणः कान्तिर्माधवस्तुष्टिरेव च ।। ७ ।।
गोविन्दः पुष्टियुक्तः स्याद्विष्णुश्च धृतिसंयुतः ।
मधुसूदनसंज्ञस्य क्षान्तिः शक्तिर्निगद्यते ।। ८ ।।
त्रिविक्रमः क्रियायुक्तः श्रीधरो मेधयान्वितः ।
हृषीकनाथश्च पुनः शक्त्यापि हृष्टयान्वितः ।। ९ ।।
श्रद्धा साम्बुदनाभस्य लज्जा दामोदरस्य च ।
लक्ष्म्या युतो वासुदेवः तथा संकर्षणस्य च ।। १० ।।
शक्तिः सरस्वती ख्याता प्रीतिः प्रद्युम्ननामकः ।
अनिरुद्धस्य देवस्य रतिः सा शक्तिरुच्यते ।। ११ ।।
इमास्ताः शक्तयः सर्वाः सर्वाभरणसंयुताः ।
विद्युद्गौरास्त्वमरक्रोडदेशे व्यवस्थिताः ।। १२ ।।
अम्बुजाभयहस्ताख्याः स्वरूपैताश्च चिन्तयेत् ।
शङ्खचक्रगदापद्मधारिणो वनमालिनः ।। १३ ।।

नवनीरदनीलाभाः प्रफुल्लकमलेक्षणाः ।
दिव्याभरणसम्पन्नास्त च्छक्तिसमन्विताः ।। १४ ।।
एतादृशाः केशवाद्याः तद्देवमातृकाविधौ ।
चक्रिणश्च जया शक्तिः दूर्गाराजिन एव च ।। १५ ।।
प्रभावशाङ्‍र्गणः ख्याता खड्‍गी च सत्ययान्वितः ।
चण्डी शक्तिः शङ्‍खिनः स्याद्वाणीयं हलिनस्तथा ।। १६ ।।
मुषली लासिनी शक्तिः पाणी च विरजाञ्चितः ।
अङ्‍कुशविश्वया युक्तो मुकुन्दो विनयाञ्चितः ।। १७ ।।
नन्दजस्य सुनन्दा स्यान्नन्दिनः स्मृतिरेव च ।
नैरस्वर्द्धनरकजित् समृद्धिसहितः स्मृतः ।। १८ ।।
हरिः शुद्धियुतः ख्यातः कृष्णस्तु बुद्धिसंयुतः ।
सत्यो भुक्तियुतस्तावन्नार्तियुक्तश्च सात्वतः ।। १९ ।।
शक्तिः शौरेः क्षमा ख्याता शूरस्य चरमा स्मृता ।
उमा जनार्द्दनस्यैव क्लेदिनी भूधरस्य च ।। २० ।।
विश्वमूर्त्तेश्च सा क्लिन्ना वैकुण्ठो वसुधायुतः ।
वसुधाशक्तियुक्तश्च त्वगात्मा कलितस्तथा ।। २१ ।।
पुरुषोत्तमनामा च ततश्चाप्यमृतात्मनः ।
वन्दिनश्च परा शक्तिस्ततो मां सात्मनस्तथा ।। २२ ।।
बलानुजस्य कथिता शक्तिः सत्यपरायणा ।
मेदतत्त्वयुतः कालः सूक्ष्मशक्तिसमन्वितः ।। २३ ।।
अस्थ्यात्मतत्त्वसहितो बृषघ्नः सत्ययान्वितः ।
मज्जात्मतत्त्वरुचिरावृषः प्रज्ञान्वितस्तथा ।। २४ ।।
शुक्रतत्त्वात्मललितो हंसोऽयं प्रभयान्वितः ।
प्राणात्मतत्त्वकलितो वराहो निशयाञ्चितः ।। २५ ।।

शक्त्यात्मतत्त्वललितो विमलो मेधयान्वितः ।
क्रोधात्मतत्त्वसहितो नृसिंहो विद्युताञ्चितः ।। २६ ।।
पाशाङ्कुशगदाशङ्खराजमानाः कराः शुभाः ।
मूर्त्तिस्ता भावयेद्धीमान्स्वर्णवर्ण्णप्रतिष्ठिताः ।। २७ ।।
मूर्त्तिकोद्भवता शक्तिर्वराभयकराः पराः ।
सर्वालङ्कारशोभाढ्याः पीनोत्तुङ्गतरस्तनाः ।। २८ ।।
एवं संचिन्त्य मनसा मन्त्रज्ञो न्यासमाचरेत् ।
अतः परं प्रवक्ष्यामि ध्यानं सर्वफलप्रदम् ।। २९ ।।
चञ्चन्नीरदविद्युदुत्तमच्छवि श्रीभास्वरं सुन्दरं
प्रेम्णा लग्नतरं प्रतिक्षणमहं ध्याये रहः श्रीवपुः ।
हस्तैः शस्ततरैः सरोरुहगदाशङ्खारिशोभैर्नुतं
राजत्पुस्तकदर्पणाब्जकलसश्रीमत्करालक्षितम् ।। ३० ।।

सूत उवाच

केशवादिन्यासयुतो यः पूजयति केशवम् ।
सर्वपापविशुद्धात्मा मुनयः सोऽपि मुक्तिभाक् ।। ३१ ।।
तथा वर्णगतं हरिं द्विजवराः संचिन्त्य यः पूजयेत्
आनन्दात् प्रतिवासरं स लभते सर्वं सुखं भूतले ।
आयुर्वित्तमशेषकं च परमां कीर्त्तिं च धर्मं पुनः
लब्ध्वा सर्वमनोरथं परतरं स्थानं व्रजेच्छेषतः ।। ३२ ।।
इदानीं शक्तिबीजाख्या मातृका यादृशी भवेत् ।
तदहं वच्मि विप्राणां हिताय संयतात्मनाम् ।। ३३ ।।
शक्तिबीजं च पुरतो मातृकां तदनन्तरम् ।
भक्त्या चास्य च मन्त्रस्य शक्तिश्चात्र ऋषिः स्मृतः ।। ३४
गायत्रीछन्द एवात्र सर्वसौभाग्यदायिनी ।
तद्वच्छक्तिबीजयुक्ता मातृकान्यास एव च ।। ३५ ।।

शक्तिबीजं पुनर्दीर्घैः स्वरैरेव समन्वितम् ।
भक्त्या षडङ्गविन्यासं कुर्य्यात्तैनैव देशिकः ।। ३६ ।।
आदौ तारं समुच्चार्य्यशक्तिबीजं ततः परम् ।
अकारं बिन्दुना युक्तं नमोऽन्तं च ततो बुधः ।। ३७ ।।
मातृका लिपिवृन्दांश्च तत्तत् स्थानेषु विन्यसेत् ।
ध्यायेत्तत्र स्थितां शक्तिं सर्वकामाप्तसिद्धये ।। ३८ ।।
चञ्चच्चण्डमरीचिषश्च सदृशां तुङ्गोरुपीनस्तनां
चन्द्रार्द्धस्फुरितोत्तमाङ्गमुकुटं हारादिभूषोज्ज्वलाम् ।
अक्षस्रक्परशुत्वषाञ्चितकरां पाशाङ्कुरैः मण्डितां
त्र्यक्षीं तां सुरवदां सदाह्यभयदां वन्दे सरोजस्थिताम् ।। ३९ ।।
इति शक्तिकबीजमातृकान्तं
रचयंश्चारुतरं शिवं हि लोके ।
यदि न हि रचिता द्विजस्य शीघ्रं
सकलसुखं विनिहन्ति सेयमास्ते ।। ४० ।।
श्रीबीजमातृका सेयं श्रूयतां कथ्यते मया ।
यच्छुत्वा यदनुष्ठानान्न दुःखी जायते द्विजः ।। ४१ ।।
श्रीबीजमातृकामन्त्रस्य स्याद्भृगुऋषिः स्मृतः ।
स्मृतस्तु छन्द एव स्याद्देवता बीजनिर्गता ।। ४२ ।।
चतुर्वर्गफलप्राप्त्यै विनियोग उदाहृतः ।
दीर्घार्द्धबीजमानस्य षडङ्गं च समाचरेत् ।। ४३ ।।
तत्र स्थितां च जननीं ध्यायतो नास्ति दुर्गतिः ।
यथा ध्यानं चरेन्मन्त्री तच्छृणुष्व वदाम्यहम् ।। ४४ ।।
दाहोत्तीर्णसुवर्णवर्णरुचिरां मत्तेभचञ्चत्कर-
प्रोद्यद्दिव्यसुधाघटीसृतरसैः संसिक्तदेहां श्रियम् ।
मालापुस्तकहंससारसकरां सद्रत्नभूषोज्ज्वलां
पीनोत्तुङ्गकुचद्वयातिरुचिरां ध्यायेज्जगन्मातरम् ।। ४५ ।।

श्रीबीजसहितां तां तु मातृकां विधिनाचरेत् ।
श्रीबीजमातृकाकर्मवृत्तां लक्ष्मीः स्थिरा तथा ।। ४६ ।।
यथा विष्णोर्विशालेऽस्मिन् वक्षसि स्मितभाषिणी ।
स्मरबीजमातृकां च शृणुताथ महर्षयः ।। ४७ ।।
यस्य श्रवणमात्रेण वंशवृद्धिश्च जायते ।
स्मरबीजमातृकामन्त्रस्यास्य संमोहनो ऋषिः ।। ४८ ।।
गायत्री छन्द एवात्र स्मरोऽत्र देवता स्मृता ।
भुक्तिमुक्तिकृते तावद्विनियोग उदाहृतः ।। ४९ ।।
स्मरबीजं सुदीर्घं च कृत्वा तेनैव देशिकः ।
षडङ्गन्यासमाकुर्य्याद्देहशुद्ध्यर्थमादरात् ।। ५० ।।
प्रणवाद्यं ततः कृत्वा कामबीजं ततः परम् ।
वर्णकं च ततो ब्रूयात् नमः शब्दमतः परम् ।। ५१ ।।
न्यसेत्तन्मातृकास्थाने ततो ध्यानं समाचरेत् ।
वक्ष्यमाणेन विधिना सर्वाभीष्टसुसिद्धये ।। ५२ ।।
उद्यद्ग्रीष्मखरांशुकोटिरुचिरां तां स्फटिकीं मलिकां
कोदण्डं रुचिरेक्षुदण्डजनितं कन्दर्पबाणानथ ।
विद्यां चैव कराम्बुजैर्विदधतीं राजत् त्रिनेत्रां शुभां
नानालङ्कृतिमञ्जुलां धृतकलां वन्देऽरविन्दस्थिताम् ।। ५३ ।।
स्मरबीजयुतां रम्यां मातृकां रचयन्ति ये ।
तेषामत्र महासौख्यं वंशवृद्धिश्च जायते ।। ५४ ।।
बीजत्रययुतास्यास्य मातृकामन्त्रकस्य च ।
संमोहन ऋषि सोऽत्र गायत्री च्छन्द एव हि ।। ५५ ।।
सर्वलोकवशं कार्य्यमस्मिन् संमोहनामके ।
देवता कथिता भूत्यै विनियोगः परं स्मृतः ।। ५६ ।।

श्रीशक्तिकामबीजानि मातृकाणां सबिन्दुकाम् ।
नमोऽन्तं प्रणवाद्यं च क्रमान्मन्त्री न्यसेत्ततः ।। ५७ ।।
ध्यायेच्चन्द्रकलाधरां त्रिनयनां संमोहनां सत्कृतां ।
नानारत्नमयीं विभूषणयुतां चित्राम्बरां सुन्दराम् ।। ५८ ।।
मालामञ्जुतरेषु चापशरसत्पाशाङ्कुशाब्जस्फुरत् ।
विद्याहस्तसरोरुहां सुरनुतां तन्मातृकार्णालयाम् ।। ५९ ।।
इमां ये मातृकां कुर्य्युः जपहोमार्च्चनेषु च ।
ते नूनं सकलं वाञ्छाभरं प्राप्नुयुरुत्तमाः ।। ६० ।।
षड्बीजसंयुतस्यास्य मातृकामन्त्रकस्य च ।
दक्षप्रजापतिश्चात्र ऋषिश्चैव निगद्यते ।। ६१ ।।
त्रिष्टुभाख्यमिदं छन्दः कृतिभिः परिकीर्त्तितम् ।
सर्वस्य जननी चात्र मातृका देवता स्मृता ।। ६२ ।।
चतुर्वर्गफलप्राप्त्यै विनियोग उदाहृतः ।
षड्बीजानि क्रमान्मन्त्री षडङ्गेषु न्यसेत्परम् ।। ६३ ।।
रमामायाकामबीजान्यग्रेऽपि क्रमतो वदेत् ।
मध्ये वर्णं बिन्दुयुतं प्रतिलोमतया पुनः ।। ६४ ।।
तानि विजानि संगद्य मातृकान् स्थानतो न्यसेत् ।
पूर्वध्यानं द्विजश्रेष्ठाः कुर्य्यादत्रैव देशिकः ।। ६५ ।।
असिद्धिसिद्धिफलदो नानासंपत्प्रदस्तथा ।
सर्वव्याधिक्षयकरौ गद्यते मुनिपुङ्गवैः ।। ६६ ।।

सूत उवाच

प्रपञ्चमातृकामन्त्रस्यास्य ब्रह्मा ऋषिः स्मृतः ।
गायत्रीच्छन्द एवात्र विदन्तु मुनिसत्तमाः ।। ६७ ।।
परात्परं यत्तु सर्वं सर्ववस्तु गतं च यत् ।
योगिध्येयं च यत्तेजो देवतात्र प्रकीर्त्तितम् ।। ६८ ।।

प्रणवो वीजमाख्यातस्त्वजपा शक्तिरुच्यते ।
मोक्षप्राप्त्यर्थमेवायं विनियोग उदाहृतः ।। ६९ ।।
स्वाहां चादौ समुच्चार्य्य ततः पञ्चमनूनपि ।
हरिहरार्णतः कुर्य्यादस्त्रन्यासं समाचरेत् ।। ७० ।।
तारमादौ ततो मायाबीजं दत्त्वा सबिन्दुकम् ।
शिरोऽर्णः त्वजपात्मा च वह्निजायाथ यो मनुः ।। ७१ ।।
तं न्यसेन् मातृकास्थाने क्षादिवर्णान् विलोमतः ।
सानुस्वारान् ककारान्तान् तेन मन्त्रेण मन्त्रवित् ।। ७२ ।।
ॐकारादि पञ्चमन्त्रात् संवर्द्धमानतः स्वयम् ।
पूर्णं सर्वगतं बीजं लसन्तं तु चिदात्मकम् ।। ७३ ।।
कामबीजस्य मन्त्रस्य स्यादत्र च प्रजापतिः ।
ऋषिश्छन्दोऽपि गायत्री कलात्मकत्वयान्विता ।। ७४ ।।
वर्णानां जननी ह्यत्र शारदा देवता स्मृता ।
एतादृशीमातृकाया न्यासं कुर्य्यात्तु देशिकः ।। ७५ ।।
विनियोगं ततः कुर्य्यात् षडङ्गन्यासमुत्तमम् ।
लृ लृ द्वयं विना तारं स्वरैर्द्वादशभिः परैः ।। ७६ ।।
पुटीकृत्य क्रमात्कुर्य्यात् षडङ्गन्यासमादृतः ।
प्रणवादीन् स्वरनादौ चतुर्थ्यन्ताः कलास्तथा ।। ७७ ।।
कृत्वा न्यसेद्यथा मन्त्री श्रूयतां कथ्यते द्विजाः ।
निवृत्तिं विन्यसेत् पूर्वं प्रतिष्ठां च ततः परम् ।। ७८ ।।
विद्या शान्तिश्च संन्यस्य चेन्दिका दीपिका तथा ।
रेचिका मोचिका सूक्ष्मा तथा सूक्ष्मामृता स्मृता ।। ७९ ।।
ज्ञानामृताप्यायिनीं च व्यापिनी व्योमरूपका ।
अनन्ता न्यसनीया सा तथैव स्वरसम्भवा ।। ८० ।।

जाताः सदाशिवेनैताः देवताः शुभ्रमूर्त्तयः ।
अक्षमालां च विद्यां च त्रिशूलं च कपालकम् ।। ८१ ।।
दधानास्ताः स्वरोद्भूताः कलान्यासे प्रतिष्ठिताः ।
भुक्तिमुक्तिप्रदा शान्ता न्यस्यतां सततं सताम् ।। ८२ ।।
प्रथमं विन्यसेत् सृष्टिं तुष्टिं च स्मृतिमेव च ।
ततो मेध्यां न्यसेत्कान्तिं लक्ष्मीं च धृतिमेव च ।। ८३ ।।
स्थिरां स्थितिं तथा सिद्धिं क्रमादेवं न्यसेत्कलाः ।
कवर्गेण चवर्गेण युक्ता दश प्रकीर्त्तिताः ।। ८४ ।।
अकाररूपं यद्ब्रह्म तस्माज्जाता इमाः कलाः ।
तप्त चामी करप्रख्याः ख्याता ब्रह्मकला इति ।। ८५ ।।
अक्षस्त्रक्पङ्कजद्वन्द्वाऽमृतभाजनसत्कराः ।
जरान्यस्यापालिनी च शान्तिश्चैव तथेश्वरी ।। ८६ ।।
रतिश्च कामिका न्यस्था वरदाह्लादिनीति च ।
प्रतिदीर्घा योजनीया टादिनान्ताक्षरान्विता ।। ८७ ।।
उकाराद्विष्णुतो जातास्तमालदलसन्निभाः ।
शङ्खचक्रवराभीति हस्तास्ताः परिकीर्त्तिताः ।। ८८ ।।
संहारकारिणीभूताः कलाः सम्प्रति कथ्यते ।
मकाररूपात्तद्रुद्रात् संभूताः श्रूयतां नृप ।। ८९ ।।
न्यसेत्तीक्ष्णां च तां रौद्रीं भयां निद्रां च विन्यसेत् ।
तन्द्रा क्षुत्क्रोधिनी तावत् क्रियां च विन्यसेद्बुधः ।। ९० ।।
मकारी चैव मृत्युं च विन्यसेत् क्रमतः शुचिः ।
रुद्रेण पक्षयोर्वर्गा जाताश्चन्द्रनिभप्रभाः ।। ९१ ।।
अभयं वाञ्छितं शूलं कपालं बिभ्रती कलाः ।
न्यसेत्तत्र महोत्साहो संहाररसवर्द्धनाः ।। ९२ ।।

रुद्राक्षया गवर्गायाः संभूता विद्युतः कलाः॰ ।
शुभ्रा पीता शोणिताभासिता चेति क्रमान्न्यसेत् ।। ९३ ।।
बिन्दुयुक्तं सतारं च चतुर्थ्यन्तं च सूक्तकम् ।
श्वेतां चतुर्थीसंयुक्तामुक्त्वा स्थाने न्यसेद्बुधः ।। ९४ ।।
मकारां च तथा मज्जां पीतां चैव तथा न्यसेत् ।
अहं हंसं तथैवोक्त्वाप्यरुणां च तथा न्यसेत् ।। ९५ ।।
क्षं क्रोधं च शितामुक्त्वा पूर्ववद्विन्यसेद्बुधः ।
जवाकुसुमरक्ताभां हरिणं टङ्कमेव च ।। ९६ ।।
अभयं च वरं चैव दधाना निजबाहुभिः ।
एता बिन्दुकलाः ख्याताः साधकानां च सिद्धिदाः ।। ९७ ।।
एतत्कलान्यासपरा नरा ये ते सर्वसौख्यं सहपुत्रपौत्राः
भुक्त्वात्र चान्ते परमं पदं तं गच्छन्ति शान्ता वरमुक्तिभाजा ।। ९८ ।
विभ्राणां करपङ्कजैः सरसिजं चक्रं च पाशं मृगं
विद्यां शङ्खधरां कपालमतुलां मालां च टङ्कास्तथा ।
शूलं दैत्यवपुःविदारणपरं सिंहासनस्थां शुभां
ध्यायेत्सर्वशुभप्रदां त्रिनयनां माहेश्वरीं शारदाम् ।। ९९ ।।
सौवर्णं कलशं विभूषिततमां पाथोजमुक्ताजवा
विद्युत्स्फाटिकवर्ण्णकैश्च वदनैस्त्यक्षैर्युता पञ्चभिः ।
पूर्णेन्दुप्रतिमप्रभां पृथुमहोन्नत्यस्तनाढ्यां शिवां
बालां बालमृगेक्षणां सुरनुतां तां शारदां चिन्तयेत् ।। १०० ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सप्तपञ्चाशत्तमोऽध्यायः ।।

अष्टपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

श्रीकण्ठमातृकान्यासविधिं शृणु महीपते ।
यस्य श्रवणमात्रेण क्षीणपापो भवेन्नरः ।। १ ।।
श्रीकण्ठमातृकान्यासमन्त्रस्यास्य ऋषिः कृतः ।
दक्षिणामूर्त्तिः ऋषिः प्रोक्तः गायत्रीः छन्द ईरितम् ।। २ ।।
अर्द्धनारीश्वरोऽत्यत्र देवता कथितो बुधैः ।
हंसबीजमत्र कतितं शक्तिः सा च निरूप्यते ।। ३ ।।
सर्वसौख्यकलाभार्थे विनियोगः उदाहृतः ।
हंसेन दीर्घयुक्तेन षड्ङ्गन्यासमाचरेत् ।। ४ ।।
न्यासान्ते साधको धीमान् प्रार्थयेच्छिवदं शिवम् ।
सोऽहमित्येव संचिन्त्य ध्यायेद्देवं हृदम्बुजे ।। ५ ।।
राजत्पल्लवराजराजतगिरि श्रीभासुराङ्गं मुदा
प्रेम्णोल्लासिभरात्परस्परमिलद्देहार्द्धभावं विभुम् ।
सप्ताशाङ्कुशमालिकावरलसद्धस्ताम्बुजं सद्भुजं
चञ्चच्चन्द्रकलं च त्र्यक्षमधुरं ध्यायेऽद्रिजावल्लभम् ।। ६ ।।
तात्रीर्यपूर्वानथमातृकार्णान् न्यसेत्ततो रुद्रकशक्तिकाख्याः ।
क्षार्णाद्रिवर्णेषु च धातुयुग्मं प्राणं तथा क्रोधममुं च युञ्ज्यात् ।। ७ ।।
ह्रौं च सर्वत्र संयोज्य मातृकार्णं क्रमेण च ।
मूर्त्तिः शक्तिस्तथा चोक्त्वा नमोऽन्तं विन्यसेद्बुधः ।। ८ ।।
देवता शक्तिनामानि कथ्यते साम्प्रतं मया ।
श्रीकण्ठं च तथा पूर्णोदरीं च विन्यसेद्द्विजः ।। ९ ।।
अनन्तं विरजां चैव सूक्ष्मशाल्मलीके तथा ।
त्रिमूर्त्ति च ततो लोलाक्षीं चैव विन्यसेद्बुधः ।। १० ।।

अमरेशीं वर्त्तुलाक्षीं दीर्घेशं दीर्घघोणिकाम् ।
भूभारभूतिकास्यास्य शक्तिं दीर्घमुखीं न्यसेत् ।। ११ ।।
अतिथीशस्य सा शक्तिः विन्यसेत् तौ सदेशिकः ।
स्थाणुं च दीर्घजिह्वां च ततो वाराहमेव च ।। १२ ।।
कुण्डोदरीं न्यसेद्धीमान् न्यासकर्मणि तत्परः ।
झिण्टिशं मुक्तकेशीं च विन्यसेत् क्रमतः सुधीः ।। १३ ।।
भौतिकं चाथ विकृतमुखीं च तदनन्तरम् ।
सद्योजातं ततो ज्वालामुखीं च विन्यसेत् क्रमात् ।। १४ ।।
अनुग्रहेश्वररेणाथ सार्द्धमुल्कामुखीं न्यसेत् ।
अनुग्रहं चाथ सुश्रीमुखीं तावत्परिन्यसेत् ।। १५ ।।
महासेनं ततो विद्यामुखीं मन्त्रीं परिन्यसेत् ।
इत्येता मूर्त्तयस्तावत् शक्तयः षोडशः स्मृताः ।। १६ ।।
त्रिशूलखट्वाङ्गपिनाकमालाधरा जटाजूटविशोभमानाः ।
रुद्राशसम्भूततरां सिताभास्ताभावनीयाः खलु देशिकेन्द्रैः ।। १७ ।।
पाशाङ्कुशभीतिवराब्जहस्ताः
प्रफुल्लरक्तोत्पलमञ्जुलाभाः ।
मूर्त्त्यङ्कदेशस्थित सावधानाः
सुशोभनास्ताः परिभाव्यमानाः ।। १८ ।।
कादिवर्णेषु सर्वेषु पूर्ववत् विन्यसेद्बुधः ।
क्रोधीश्वरं महाकालीं चण्डेशं च सरस्वतीम् ।। १९ ।।
पञ्चान्तकं सर्वसिद्धिं शिवोत्तममतः परम् ।
गौरीं च विन्यसेद्धीमान् मातृकाक्षरपूर्वकाम् ।। २० ।।

त्रैलोक्यविद्यया सार्द्धमेकं रुद्रं च तन्न्यसेत् ।
कूर्मं मन्त्रात्मशक्तिं च न्यसेन्न्यासविदां वर ।। २१ ।।
एकनेत्रं तथा कुर्य्याद्भूतमात्रा समं पुनः ।
चतुराननेन साकं लम्बोदरीं च संन्यसेत् ।। २२ ।।
अजेशं द्राविणं चैव शर्वं च नगरीं न्यसेत् ।
सोमेश्वरं खेचरीं च संन्यसेद्द्विजसत्तमः ।। २३ ।।
तां मञ्जरीं लाङ्गलिना सार्द्धशक्तिमथ न्यसेत् ।
दारुकरूपिणं तावत् विन्यसेत् साधकोत्तमः ।। २४ ।।
अर्द्धनारीश्वरं तत्तु गिरिशं विन्यसेद्बुधः ।
उमाकान्तं तथा कालोदरीं च विन्यसेत् क्रमात् ।। २५ ।।
आषाढिनं पूतनां तां दण्डिनं भद्रकालिकाम् ।
अत्रिं च योगिनीं तावन्मीनं च शिखिनीमिमाम् ।। २६ ।।
मेषेश चादिनी शक्तिः ज्ञात्वा तौ देशिको न्यसेत् ।
लोहितं कालरात्रिं च शशिनं कुब्जिनीं न्यसेत् ।। २७ ।।
छगलण्डं ततो धीमान् कपर्द्दिनीमतः परम् ।
द्विरण्डेशं ततो विप्राः बीजं च विन्यसेद् बुधः ।। २८ ।।
महाकालं जयां चैव विन्यसेद्देशिकोत्तमः ।
त्वगसृङ्मांसमेदास्थिमज्जाशुक्रान्यतः परम् ।। २९ ।।
प्राणश्चैव तथा शक्तिर्नव तत्त्वानि च क्रमात् ।
यदि वर्णेषु संयोज्य मातृकाणां तु प्रान्ततः ।। ३० ।।
सुमुखेश्वरीं तां शक्तिं बालिना सह संन्यसेत् ।
रत्या सह भुजङ्गेशं माधवीं च पिनाकिना ।। ३१ ।।
खड्गीशं वारुणीं तावद् वकेशं वायवीं तथा ।
श्वेतरक्षोऽवधारिण्या सार्द्धं तावच्च विन्यसेत् ।। ३२ ।।

दुर्गेशं सहजां चैव लक्ष्म्या सह कुसंज्ञकम् ।
शिवं च व्यापिनीं तावद्विन्यसेन्मतिमान्नरः ।। ३३ ।।
वर्द्धकं मायया सार्द्धं ह्रौं क्षं प्रणवपूर्वकम् ।
कादिवर्णं गताः शान्ता मूर्त्तयः शक्तयस्तथा ।। ३४ ।।
शर्वर्य्योरससंभूताः पूर्ववत् भावयेच्छुभाः ।

सूत उवाच

एता द्वादशधा प्रोक्ता मातृका धर्मसाधिकाः ।। ३५ ।।
विष्णोः पूजासु कर्त्तव्याः भावनीयाः मुहुर्मुहुः ।
ये विप्राः प्रत्यहं तावत् कुर्वन्ति विष्णुपूजनम् ।। ३६ ।।
त एव कर्त्तुं शक्यन्ते जगतः सर्जनं क्षयम्,
हव्यार्जने कलान्यासं श्रीकण्ठादि ततः परम् ।। ३७ ।।
अन्यथा केवलं कर्म निष्फलं जायते पुनः
अशक्तः स्याद्द्विजो यावत् कर्त्तुं तद्दशमातृकाः ।। ३८ ।।
बिन्दोश्च मातृकां कुर्य्यात्केशवादिं च देशिकः ।
ध्यायेद्यथोक्तविधिना न्यासवित्साधकोत्तमः ।। ३९ ।।
एतद्व्यासपरायणा यदि महीदेव्यः सदा भूतले ।
ये नूनं विनिहत्य पापनिचयं पुण्योदयोल्लासिनः ।। ४० ।।
नानावाञ्छितशर्मजालमतुल सम्भुज्य सार्द्धं निजैः ।
गच्छन्त्यत्र दशासु वैष्णवपदं शम्भोः पदं वा परम् ।। ४१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये
श्रीकण्ठादिवर्णनेऽष्टपञ्चाशत्तमोऽध्यायः ।।

एकोनषष्टितमोऽध्यायः

सूत उवाच

अतः परं प्रवक्ष्यामि तत्त्वन्यासं महोदयम् ।
यन्न्यासस्मरणादेव ब्रह्मभूतो भवेन्नरः ।। १ ।।

ब्रह्मोवाच

पूर्वं प्रणवमुच्चार्य्य आदिवर्णान् व्यतिक्रमात् ।
नमः शब्दं परायेति तानि तत्त्वानि चात्मना ।। २ ।।
त्रिभिरेतैश्च तत्त्वैश्च हृदये विन्यसेद्द्विजः ।
शब्दस्पर्शरूपतत्त्वरसान् गन्धमतः परम् ।। ३ ।।
शिरस्याननहृद्गुह्यपादेषु क्रमतो न्यसेत् ।
श्रोत्रं त्वक् चक्षुसि चैव रसनाघ्राणमेव च ।। ४ ।।
वाक्पाणिपादपायूपस्थतत्त्वानि देशिकः ।
श्रोतयोस्त्वथ नेत्रे च जिह्वायां च नमस्तथा ।। ५ ।।
वाचि हस्तद्वये चांघ्र्योः मेढ्रके तानि विन्यसेत् ।
आकाशतत्त्वं शिरसि वायुतत्त्वं मुखे न्यसेत् ।। ६ ।।
तेजस्तस्त्वं हृदि पुनः जलं लिङ्गोपरि न्यसेत् ।
पृथ्वीतत्त्वं पदद्वन्द्वे क्रमादेतानि विन्यसेत् ।। ७ ।।
हृत्पुण्डरीकतत्त्वं तु हृदये पूर्ववन्न्यसेत् ।
द्वादशकलाव्याप्तात्मा सूर्यमण्डलमेव च ।। ८ ।।
चतुर्थ्यन्तं नमोऽन्तं च हं नमः शब्दपूर्वकम् ।
पराशब्दं चतुर्थ्यन्तं कृत्वेति विन्यसेद्बुधः ।। ९ ।।
शं षं नमः शब्दपूर्वं पराशब्दं च पूर्ववत् ।
षोडशकलया व्याप्तं चन्द्रमण्डलमात्मना ।। १० ।।

चतुर्थ्यन्तं च संयोज्य नमोऽन्तं तद्हृदि न्यसेत् ।
प्रणवाद्यं वह्निबीजं हृन्मन्त्रं च ततो वदेत् ।। ११ ।।
परं च पूर्ववत्कृत्वा दिक्पालाव्याप्तपूर्वकम् ।
वह्निमण्डलशब्दं तु योजयेदात्मना सह ।। १२ ।।
समस्तं तादृशं पद्मं चतुर्थ्यन्तं नमोऽन्तकम् ।
कृत्वा तन्मण्डलत्रय्यां हृदये विन्यसेद्बुधः ।। १३ ।।
षकारं वायुबीजं च लकारं वारुणार्णकम् ।
पृथ्वीबीजं तु सर्वत्र सबिन्दुं हृन्मनुं ततः ।। १४ ।।
भक्त्या पीत्वायेति तथा परमेष्ठिनमेव च ।
पुरुषं विश्वशब्दं च निवृत्तं सर्वमेव च ।। १५ ।।
एतेषामात्मना सार्द्धं समासेञ्जनता पुनः ।
वासुदेवं चतुर्थ्यन्तं सङ्कर्षणमतः परम् ।। १६ ।।
प्रद्युम्नञ्चानिरुद्धञ्च नारायणमतः परम् ।
नमः शब्दं च सर्वत्र देशिकः क्रमतो वदेत् ।। १७ ।।
शिरोमुखे तु हृदयेऽघ्रिंदेशे
मेढ्रे तु तान्न्यस्य तु धीरबुद्धिः ।
न्यसेच्च सर्वत्र सतारपूर्वं
क्षरो नमश्चेति पराय चेति ।। १८ ।।
क्रोधतत्त्वात्मने नृसिंहाय
नम इति देहे सर्वत्र विन्यसेत् ।
क्रोधाद्य तत्त्वात्मन एवमुक्त्वा
ततो नृसिंहाय नमश्च मन्त्री ।। १९ ।।
तत्त्वान्यासरता ये च मातृकान्यास तत्पराः ।
ते सर्वे विष्णुसदृशाः योग्याः स्युः विष्णुपूजने ।। २० ।।

तेषां न्यासवतां ये च दर्शनं कुर्वते नराः ।
आलापं वा विमुक्ताः स्युः सर्वसौख्यभुजश्च ते ।। २१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकोनषष्टितमोऽध्यायः ।।

षष्टितमोऽध्यायः

ब्रह्मोवाच

प्राणायामं च ऋष्यादिध्यानपर्य्यन्तमाचरेत् ।
इडयापूरकं कुर्य्यात् मूलेन बीजतश्च वा ।। १ ।।
सुषुम्णया कुम्भकं च रेचकं पिङ्गलाख्यया ।
पूरकः षोडशः ख्यातः चतुःष्षष्ट्या च कुम्भकः ।। २ ।।
द्वात्रिंशद्वारैर्विख्यातो रेचकः पापमोचकः ।
मूले वा प्रणवो वापि कर्त्तव्यत्वाद्द्विधा स्मृतः ।। ३ ।।
प्राणायामस्य द्वैविध्यं कर्त्तव्यं विष्णुपूजने ।
अन्यथा स्यान्महादोषः सन्तोषो नैव दैवतः ।। ४ ।।
रोगी दुःखीः च निष्कर्म तद्द्वयं नाचरेद्यदि ।
अतो हि देशिको धीमान् तद्द्वयं यत्नतःश्चरेत् ।। ५ ।।
प्राणायामं समाप्याथ योगपीठं निजाङ्गके ।
कुर्य्याद्यथा देशिकेन्द्रः साम्प्रतं तत्प्रकाश्यते ।। ६ ।।
आधारशक्तिं प्रकृतिं कुर्मानन्तौ क्षमा ततः ।
क्षीरसिन्धुस्तथा श्वेतदीपश्च मणिमण्डपः ।। ७ ।।
कल्पद्रुमश्च तान् सर्वान् चाधारादीन् हृदि न्यसेत् ।
दशवासांसयोस्तावत् दक्षवामोरुदेशके ।। ८ ।।

मुखेऽस्मिन् वामपार्श्वे च कट्यां दक्षिणपार्श्वके ।
धर्मं ज्ञानं च वैराग्यमैश्वर्य्यं च ह्यधर्मकम् ।। ९ ।।
ततोऽज्ञानमवैराग्यमनैश्वर्य्यं क्रमेण तान् ।
प्रणवाद्यान्नमोऽन्तांश्च चतुर्थ्यन्तान् परं न्यसेत् ।। १० ।।
सत्त्वं रजस्तमस्त्वेति गुणैस्तैः वृत्तिकायितैः ।
असंलग्नतया पद्मं वेष्टितं वसुपत्रकम् ।। ११ ।।
कर्णिकारं समयुक्तं केशरो भास्वरः परम् ।
सन्नाडकन्दकलितं तादृशं हृदि चिन्तयेत् ।। १२ ।।
आनन्दकन्दं च ततः संविन्नालं चिदात्मकम् ।
प्रकृतिमयपत्राणि विकारमयकेशराः ।। १३ ।।
पञ्चाशद् वर्णबीजाढ्यकर्ण्णिकां चेतिमात्रकः ।
कन्दादिकर्ण्णिकान्तं च हृदये भावयेत्तदा ।। १४ ।।
तारपूर्वं त्वकारं च बिन्दुना परिभूषितम् ।
आदित्यमण्डलं ङेऽन्तमुक्त्वा च तापिनी तथा ।। १५ ।।
तापिनी च ततो धूम्रा मरीचि ज्वलिनी रुचिः ।
सुषुम्णा भोगदा विश्वाबोधिनी धरणी क्षमा ।। १६ ।।
एतत्कलाभ्यो नमश्चेत्युक्त्वा हृदि च संन्यसेत् ।
ॐ चेत्युक्त्बा ततः सोममण्डलायेति कत्वा देशिकः ।। १७ ।।
अमृता मानदा पूषा तुष्टिः पुष्टिस्ततः परम् ।
रतिर्धृतिश्च शशिनी चन्द्रिकाकान्तिरेव च ।। १८ ।।
ज्योस्त्ना श्रीः प्रीतिरेव स्यादङ्गनामृतपूर्ण्णिका ।
कामदा चेति चन्द्रस्य शक्तयः षोडश स्मृताः ।। १९ ।।
एतत्कलाभ्यो नम इति स्मृत्वा तत्रैव विन्यसेत् ।
मं वह्निमण्डलायेति ततश्चोक्त्वा स मान्त्रिकः ।। २० ।।

धूम्राटीरुष्या ज्वलिनी ज्वालिनी तु स्फुलिङ्गिनी ।
सुश्रीश्चैव स्वरूपा च कपिला च ततः परम् ।। २१ ।।
हव्यकव्यवहा च स्यादिहोक्ता दशशक्तयः ।
तत्कलाभ्यो नम इति ब्रूवन् हृदि परिन्यसेत् ।। २२ ।।
सं सत्त्वाय नमश्चेति तथा रं रजसे नमः ।
तं तमसे नम इति ब्रूवन्नेवं न्यस्येद्गुणान् ।। २३ ।।
आं आत्मने नम इति अकारं च ततो ब्रूवन् ।
अन्तरात्मने नम इति फकारं च पुनर्वदन् ।। २४ ।।
परमात्मने नमोऽन्त्यं च ह्रीं बीजं च स्मरेत्पुनः ।
ज्ञानात्मने नम इति तत्सर्वं हृदि विन्यसेत् ।। २५ ।।
पूर्वादिदलमध्येषु प्राच्यादिक्रमतः पुनः ।
तासां न्यासं यथा कुर्य्यात्तत्तन्नामनि कीर्त्तयेत् ।। २६ ।।
विमलोत्कर्षिणी ज्ञानात्क्रियायोगा तथैव च ।
प्रभा रत्या तथेशानानुग्रहा नवशक्तयः ।। २७ ।।
प्रत्येकं प्रणवाद्यं च चतुर्थ्यन्तां नमोऽन्तकाम् ।
न्यसेदष्टदलेष्वेतामध्ये चानुग्रहान्न्यस्येत् ।। २८ ।।
अत्रत्याः शक्तयः सर्वाः सर्वाभरणभूषिताः ।
ज्ञानमुद्राब्जहस्तास्ताः पृथुलोच्चकुचद्वयाः ।। २९ ।।
सौवर्ण्णनिकषाभासश्चिन्तनीयाश्च देशिकैः ।
अङ्गुष्ठानामिकाभ्यां च शेषाङ्गुलिविषारणे ।। ३० ।।
या तत्त्वमुद्रा भवति तया न्यस्य तु पुष्पतः ।
नमो भगवते विष्णवे सर्वभूतात्मने तथा ।। ३१ ।।
वासुदेवाय च पदं कल्पयित्वा स देशिकः ।
सर्वात्मसंयोगपद्मपीठात्मने नमस्त्विति ।। ३२ ।।

कर्णिकामध्यतः स्मृत्वा विन्यसेत्तादृशं हरिम् ।
ध्यायेत्सभ।क्तकतया देशिकस्तत्त्ववान् पुनः ।। ३३ ।।

सूत उवाच

आधारोत्तमभावनामनुदिनं कुर्वन्ति ये देशिका
श्चोमान्ते श्रुतकीर्त्तयः कलिमलध्वंसस्फुरन् मूर्त्तयः ।
योग्यास्ते जपहोमपूजनविधौ संधौतकान्तिर्मलाः
सद्ज्ञानामृतपानतोषकलिता लोकद्वये पूजिताः ।। ३४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये षष्टित्तमोऽध्यायः ।।

एकषष्टितमोऽध्यायः

ब्रह्मोवाच

उत्तानसंपुटसव्यकरं हृदयलग्नकम् ।
तत्र पुष्पाणि चाधाय दक्षहस्तं पिधाय च ।। १ ।।
व्यस्तं तद्ध्यानमुद्रेति विदितं मन्त्रवित्तमैः ।
मुद्रापो देवता तत्र चिन्तयेत् परमं महः ।। २ ।।
प्रकाश्यते तत्सहसा साधकानां हिताय च ।
हृदये परमाकाशमव्यक्तं तद्विचिन्तयेत् ।। ३ ।।
सर्वमन्त्रलताबीजं प्रणवं भावयेत्पुनः ।
प्रणवे परमाकाशस्थलस्थे वेदमूलके ।। ४ ।।
तत्र तारतरं सारं श्रुतिनाथ परं महः ।
ॐकारात्मनतस्तस्मात् तेजसो मूलमन्त्रगम् ।। ५ ।।
यत्तेजश्चिन्त्यते तावत् सैषा हृदयभावना ।
प्रणवात्मकतस्तस्मान्महसः श्वासवर्त्मना ।। ६ ।।

आनीय दीपवद्दीपाद्धस्ताभ्यन्तरके न्यसेत् ।
करन्यासं ततः कृत्वा विधिना विधिवत्तमः ।। ७ ।।
हस्तयोर्भावना सैषा कथ्यते विधिकोविदैः ।
हृदयाद्दक्षनासायां रन्ध्रेणानीय देशिकः ।। ८ ।।
तत्तेजोचित हस्ताभ्यां व्यापकत्रयमाचरेत् ।
निजे कलेवरे चाथ स स्वयं भास्करोपमम् ।। ९ ।।
अङ्गन्यासं ततः कुर्य्यात् व्यापकान्ते द्विजोत्तमः ।
सा देहभावना चैषा कथ्यते मुनिसत्तमैः ।। १० ।।
आब्रह्मरन्ध्रपादान्तं पादाद्ब्रह्मपदं प्रति ।
न्यस्यते ब्रह्मरन्ध्रान्तं हृदयान्तं न्यसेद्बुधः ।। ११ ।।
हृदयादङ्घ्रिपर्य्यन्तं न्यसेद्व्यापकमूर्त्तयः ।
अथ मन्त्रवरं सारं श्रुतीनां च वदाम्यहम् ।। १२ ।।
सकृद्वचोगतं यावदपमृत्युभयक्षयम् ।
तथा विषहरं तापत्रयनाशनकारणम् ।। १३ ।।
जयदं रणभूम्यां च वनेऽप्यभयदं तथा ।
जनानां जनभीतिघ्नं पुत्रपौत्रधनप्रदम् ।। १४ ।।
सौन्दर्य्यवीर्य्यशौर्य्यश्रीबलवाहनबुद्धिदम् ।
हस्त्यश्वरथपादातिधनधान्यसमृद्धिदम् ।। १५ ।।
बहुनापि किमुक्तेन जपतां सर्वकामदम् ।
कामधेनूपमं मन्त्रं साधकानां सदा मुदे ।। १६ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकषष्टितमोऽध्यायः ।।

द्विषष्टितमोऽध्यायः

ब्रह्मोवाच

खान्तार्ण्णं च समुद्धृत्याकारेण योजयेत्पुनः ।
पकारं वामनेत्राढ्यं जनशब्दमतः परम् ।। १ ।।
वल्लभं च चतुर्थ्यन्तं कृत्वा स्वाहेति देशिकः ।
एवं दशाक्षरो मन्त्रो निर्ण्णीतो द्विजसत्तमैः ।। २ ।।
खान्तार्ण्णं प्रथितं त्रयोदशयुतं चञ्चत्स्वराणामथो
वामाक्षिस्फुरितं पवर्गकपुरे वर्ण्णं तदन्ते जनम् ।
बीजं चोज्झितबिन्दुकं जलपतेः पृथ्वी च बीजं तथा
द्वैरुक्त्यं च ततः पवर्गचतुरैर्वर्ण्णैर्युतं देशिकः ।। ३ ।।
वायोर्बीजमिदं प्रोक्तं बिन्दुहीनं च जायते ।
वह्नेर्जायां योजयता दशार्ण्णः मनूनां वरः ।। ४ ।।
अयं दशाक्षरो मन्त्रो नारदोऽस्य ऋषिः स्मृतः ।
छन्दो विराड्यं ख्यातः सर्वमङ्गलदायकः ।। ५ ।।
नन्दनन्दन एषोऽत्र देवता परिकीर्त्तिता ।
क्लीं बीजमिति चाख्यातं स्वाहात्र शक्तिरुच्यते ।। ६ ।।
चतुर्वर्गफलप्राप्त्यै विनियोग उदाहृतः ।
एवमृष्यादिकं कुर्य्यात् निष्कामो द्विजपुङ्गवः ।। ७ ।।
सकामस्तु मनोस्तस्य कुर्य्याद्दुर्गां सुरेश्वरीम् ।
श्रीकृष्णस्य प्रतिकृतिमधिष्ठात्रीं च देवताम् ।। ८ ।।
आयुधोत्तममेतत्तु चक्रं विष्णोः प्रकीर्त्तितम् ।
तस्माच्चक्रेण पञ्चाङ्गन्यासं कुर्य्याद्विचक्षणः ।। ९ ।।
प्रथमं प्रणवं कुर्य्याद्द्वितीयं पूरकं ततः ।
चतुर्थ्यन्तं ततश्चक्रं वह्निजायां तदन्ततः ।। १० ।।

पतन्मनुलिङ्गमन्त्रे संयोज्य न्यासमाचरेत् ।
दक्षनेत्रयुतं बीजं वारुणं विश्वकन्दकम् ।। ११ ।।
सूपसर्वं ततः कृत्वा त्रैलोक्यभक्षणं ततः ।
असुरान्तकशब्दं तु चक्रं सर्वत्र योजयेत् ।। १२ ।।
संयोज्य विन्यसेद्धीमान् क्रमेण च परंतप ।
न्यासान्ते ध्यायतो पुंसः सर्वदुःखं विनश्यति ।। १३ ।।
पञ्चाङ्गयुक्तो मनुरेष भाति हर्षप्रदो दैत्यनिसूदनस्य ।
विना कनिष्ठानयनद्वयेन न्यासस्तथास्यद्वचसाब्जयोनेः ।। १४ ।।
अधुना तस्य मन्त्रस्य बीजं शृणुथ भूसुराः ।
त्रैलोक्यपावनकरं तत्पञ्चाङ्गमनोर्महत् ।। १५ ।।
पृथ्वीबीजोपरि ब्रह्म वर्णं च परियोजयेत् ।
वामनेत्रयुतं तत्तु बिन्दुनार्द्धेन्दुनान्वितम् ।। १६ ।।
एतादृशं बीजमनुत्तमं तद्दशाक्षरस्यास्य मनोः प्रसिद्धः ।
ब्रह्मस्वरूपः खलु पञ्चवर्णं संनिर्मितं दुर्ल्लभसिद्धिकारि ।। १७ ।।
भूमेर्लकारश्चोत्पन्नः ककारोजलसम्भवः ।
इकारो वह्निसंभूतो बिन्दुराकाशसम्भवः ।। १८ ।।
इति पञ्चाङ्गकं बीजं दशार्णान्ते नियुञ्जयन् ।
योजयेच्च स्वकं कर्म सिद्धिं नयति तत्क्षणात् ।। १९ ।।
मनोस्तस्य च बीजस्य विषयः कीर्त्तितो मया ।
ध्यानं च कथ्यते सम्यक् श्रूयतां द्विजसत्तमाः ।। २० ।।
राजन्नीरदनीलमञ्जुलतनुं सम्पूर्ण्णं चन्द्राननं
फुल्लेन्दीवरनिन्दिसुन्दरदृशं विम्बाधरं सुन्दरम् ।
श्रीमद्दन्तचयं मनोरमतमघ्राणं च सद्भ्रूलतं
मन्दारारुणपाणिपादतलकं वेणीलसत्पृष्ठकम् ।। २१ ।।

केयूरोत्तमहारकुण्डललसद्रत्नावलीमेखला
चञ्चत्स्वर्ण्णकिरीटनूपुरमुखश्रीमद्विभूषाधरम् ।
दक्षेहस्ततलेऽमले प्रविलसत्सत्पायसं वामके
संसर्पन्नवनीतकं सुरवरं गोपीकुमारं भजे ।। २२ ।।
प्रातः सामान्यपूजयामेवं प्रतिदिनं बुधः ।
दारुब्रह्मस्फुरद्रूपं भावयित्वार्च्चयेच्छुचिः ।। २३ ।।
एवं भावयतस्तस्य देशिकस्य द्विजोत्तमः ।
जायते श्रीरसौ पूर्णा स्थिरायां निश्चलोऽनघा ।। २४ ।।
पुत्रपौत्रप्रपौत्रश्च नन्दते सह बन्धुभिः
शेषे विष्णुपुरं याति ध्नानमेव चरेन्नरः ।। २५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये गोपालमन्त्रकथने द्विषष्टितमोऽध्यायः ।।

त्रिषष्टितमोऽध्यायः

ब्रह्मोवाच

प्रातः कालेऽपि या पूजा द्विधा प्रोक्ता महीसुराः ।
सामान्ये च विशेषे च कुर्य्यद्ध्यानमिदं बुधः ।। १ ।।
अतःपरमिदं वनं मिहिरनन्दिनीनीरजब्रज
प्रकट सौरभानिलमनोहरं सुन्दरम् ।
प्रसूनफलमञ्जुलद्रुमलताकुलं पत्रिणां
स्वनैः श्रुतिमुखं चरन्मगचयं च वृन्दावनम् ।। २ ।।
प्रबालकुसुमावलीफलचयापदेशान्मुहुः
समस्तमणिहीरकप्रमुखरत्नसम्पद्युतम् ।
अशेषनववल्लवीबलितकामतृष्णामिलन्नि
कुञ्जचयमञ्जुलं सकलसत्त्वशमोज्ज्वलम् ।। ३ ।।

मयूरशुकसारिकाप्रमुखपक्षिराजीमिल
न्निरन्तररतिक्रियं विविधसत्ववृन्दाश्रयम् ।
विसारिकुसुमोत्करं भ्रमरकोकिलासङ्कुला
चलद् द्रुमलतानिलं पवनसङ्गरङ्गं स्मरेत् ।। ४ ।।
सौवर्णोत्तमसौधके मणिमयस्थल्याञ्चिते भूषिते
रत्नश्रेणीविमण्डिते सुमनसां रेणुब्रजैर्वासिते ।
सच्चन्द्रातपराजिराजिततरचञ्चत्सुधाशीकरे
पश्येल्लोकमनोहरे गिरिवरप्रस्थे तु सौख्येऽक्षये ।। ५ ।।
तत्र श्रीनिलयं सुखप्रदमिदं दिव्यास्त्रतां सद्गुणं
तद्दूरद्रवचन्दनाञ्चितमतिः स्फीतं सुशीतं ततः ।
नानारत्नविचित्रकुट्टिमतलं सन्मङ्गलं मञ्जुलं
पीठ चाष्टदलाब्जचारुमधुरज्योतिर्मयं भावये ।। ६ ।।
श्रीवृन्दावनमध्यदेशविलसच्छोभेव तत्रोत्तमे
पीठे सत्पवने लताततिमिलत्कल्पद्रुमप्रोज्वले ।
चञ्चन्नीपतरूत्तमच्छदलसत् पुष्पप्रशाखावली
रम्ये हेममयस्थले सुखितयासीनं च कृष्णं स्मरेत् ।। ७ ।।
नवीनघनभासुरं कुटिलकुन्तलं मञ्जुलं -
चलत्शिखिशिखण्डकोज्वलशिरस्थलं मङ्गलम् ।
लसत्कनककुण्डलं सकलशारदेन्दूपमा-
नूनं जलरूहेक्षणं रुचिरभूषणं सद्गुणम् ।। ८ ।।
प्रबालमधुराधरं त्वतुलनासिकं कुन्दवत्-
स्फूरद्दशनजालकं कमलगन्धनिश्वासकम् ।
दरप्रतिमकण्टकं पृथुलदीर्घबाहुद्वयं
विशालतरवक्षसं विपुलपार्श्वकक्षस्थलम् ।। ९ ।।

श्रीवत्सकौस्तुभमनोहरहाररम्यं
ह्यावर्त्तसाम्यविलसन्नतनाभिदेशम् ।
पीताम्बराञ्चितकटीतटमेखलाढ्यं
दिव्योत्तरीयललितं बलितस्मितास्यम् ।। १० ।।
रोमावलीकलितनूतनयौवनाढ्यं
सज्जानुदेशरुचिरोरूयुगं प्रशंस्यम् ।
हस्तांङ्घ्रिकाद्वयतलाजितपल्लवाभं
केयूरनूपुरधरं जितकोटिमारम् ।। ११ ।।
माणिक्यनागनुतसन्नखरालिराजत्-
पादारविन्दतलजाष्टदशैकचिह्नम् ।
चञ्चत्स्वरामलमनोहरबेणुनाद
स्फूर्यद्रसालसभराजगति स्त्रियस्ता ।। १२ ।।
राजत्कुञ्जगृहान्तरेषु विलसद्गोपालबालैर्वृतं
हास्यं चारुतरं लसन्नधरयोः बेणुं ध्वनन्तं मुदा ।
वत्सानां च तथांशुजाललतिका वृक्षवलीनां मुहु-
र्वन्यानां मृगपक्षिणां च तरली भ्रूभङ्गमानन्ददम् ।। १३ ।।
आत्मानुरूपं ब्रजबालकानां वृन्दैरमन्दैः कृततुल्यवेशैः ।
समानतारुण्यविलासहासैर्वंशीधरैस्तैः परितो वृतं च ।। १४ ।।
गोपीकदम्बैः पृथुसन्नितम्बैः पीनोरुवक्षोजमनोहरैस्तैः ।
नाना विलासाश्रयचारुवक्त्रैः सद्भूषणश्रेणिलसत्सुगात्रैः ।। १५ ।।
चीनाम्बरैश्चारुतरैकहारैः प्रसूनमाल्याञ्चितकेशपाशैः ।
नेत्रारविन्दान्तलसत्कटाक्षैः त्रैलोक्यसंमोहनचारुचेष्टैः ।। १६ ।।
रत्नावलीभास्वरहेमभूषैः पश्यज्जनान्तः करणातितोषैः ।
संसेवितं सर्वत एव कामप्रदं मुरारिं स्मरकोटितुल्यम् ।। १७ ।।

समन्ततः सङ्गतगोपगोपी स्वमित्रभूतार्त्तिकधेनुजालम् ।
श्रीकृष्णचन्द्रं परिभाव्य चाग्रे समस्तदेवांश्च ततोऽनुध्यायेत् ।। १८ ।।
ध्येयं मुमुक्षुभिश्चैव चिन्तयेत्तकृपाण्र्णवम् ।
सव्यदेशेऽपि गन्धर्वा यक्षकिन्नरचारणाः ।। १९ ।।
विद्याधराः सदारास्ते गीतनर्त्तनतत्पराः ।
गीतनृत्यपरैः सारैः तृष्णोत्साहसुवेशितैः ।। २० ।।
गणैरप्सरसां दिव्यैः दिव्ययौवनहृद्यकैः ।
यः सदानन्दितो नूनं वन्दे तं नन्दनन्दनम् ।। २१ ।।
ओम् ऐशान्ये यस्य देवोत्तमनुतचरणाम्बोजयुग्मस्य विष्णोः
ज्ञानाशक्तिः शिवोऽयं जयति जगति च ख्यातिकीर्त्तिः सदैव ।
चञ्चत्कुन्देन्दुकान्तः कलितशशिकलः सज्जटः प्रस्फुटश्रीः
गङ्गाधारी सनारीस्मरपुरदलनस्तं भजे कृष्णचन्द्रम् ।। २२ ।।
पाशाङ्कुशभयवरस्फुरिताब्जहस्त
चञ्चत्प्रबालमधुराकृतिरग्निकोणे ।
खर्वसुधाकरकलारुचिरोत्तमाङ्गो ।
यं भावयन् वितनुते तमहं स्मरामि ।। २३ ।।
नैरुत्यां दिशि भानुश्च द्विभुजोऽम्बुजभृच्छुभः ।
ध्यात्वा यं नन्दते नित्यं तं नन्दतनयं भजे ।। २४ ।।
वायव्यकोणे परमोऽपि चन्द्रः सुधामयश्रीः सुखदःसदैव ।
यद्भावनालब्धतमात्मकान्तिस्तं कृष्णचन्द्रं सततं नमामि ।। २५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये त्रिष्टितमोऽध्यायः ।।

चतुःषष्टितमोऽध्यायः

सूत उवाच

तृतीययजनक्षणेऽसितगिरो मुरद्वेषितां
सरोजनयनं शरत्सकलचन्द्ररम्याननम् ।
सुदीर्घपृथुलद्वयभुजविराजमानं लसद्-
विशालतरवक्षसं रुचिरवाससं सुन्दरम् ।। १ ।।
दारुब्रह्मस्वरूपं तं ज्ञानमेव च भावयेत् ।
तृतीयार्च्चनकालेऽस्मिन् देशिको भक्तिभावुकः ।। २ ।।
सायाह्ने पूजने विप्रा यथाध्यानं चरेद्बुधः ।
तमहं साम्प्रतं वक्ष्ये शृण्वतां सर्वकामदम् ।। ३ ।।
द्वारवत्यां पुरश्रेष्ठैर्भवनानां सहस्रकैः ।
कलासंख्यैरसंख्यातमणिहोमादिनिर्मितैः ।। ४ ।।
संवर्ण्णस्तम्भनिकरप्रासादवरणाञ्चितैः ।
चारुचन्द्रातपैर्यूपराजिकासारसुन्दरैः ।। ५ ।।
चारुसोपानसहितश्रीमन्मण्डपमण्डितैः ।
पश्यज्जनमनोहारिविस्मयप्रदचारुकैः ।। ६ ।।
युतायां स्वर्ण्णतुल्यायां कृत्रिमैर्वनसत्तमैः ।
पद्मोत्पलादिरुचिरस्फीतगन्धाम्बुशीकरैः ।। ७ ।।
फलप्रसूनललितैर्लतावलिमनोहरैः ।
मन्दमारुतसम्पूर्ण्णैर्नानारससमुज्जलैः ।। ८ ।।
मत्तभ्रमरजालैश्च कोकिलालापमङ्गलैः ।
क्रीडत्पक्षिगणैर्दिव्यैर्दिव्यसौरभसंयुतैः ।। ९ ।।
शोभितायां रत्नविद्यां तत्र सिंहासने शुभे ।
मञ्जुलास्तरणे दिव्ये पीठे सौवर्ण्णके पदे ।। १० ।।

तत्र पङ्कजमध्यस्थं शोभनं वनमालिनम् ।
नारदाद्यैर्मुनिवरैर्वेष्टितं ज्ञानदायिनम् ।। ११ ।।
नवीननीरदश्यामं पीतवाससमच्युतम् ।
पूर्णचन्द्राननं सौम्यं शारदाम्बुजलोचनम् ।। १२ ।।
नानाभूषणरम्याङ्गगदाब्जदरचक्रिणम् ।
मन्दहासरसोल्लाससर्वलोकसुखप्रदम् ।। १३ ।।
श्रीवत्सकौस्तुभयुतं सेवतां सकलार्थदम् ।
एवं च चिन्तयेत्प्राज्ञश्चतुर्थपूजने शुभे ।। १४ ।।
रात्रौ नर्मपरिश्रान्तं रासोल्लासविलासिनम् ।
गोपीमण्डलमध्यस्थं नानामण्डनमण्डितम् ।। १५ ।।
गोपानां प्रेमभक्तानां चारुबेणुभृतां परम् ।
चूडामणिश्रवोभूषानासाभूषालसत्त्विषाम् ।। १६ ।।
हारनूपुरकाञ्चिभिः शोभितानां च भूषणैः ।
अन्यैर्नानाविधैर्द्रव्यैः दृष्ट्युत्साहकरैः परैः ।। १७ ।।
दिव्याम्बरपरितानां वस्त्रकुञ्चकुशं युजाम् ।
अन्योऽन्यशक्तहस्तानां सुस्मितानां च योषिताम् ।। १८ ।।
दिव्यशङ्कुपरिभ्राजत्पङ्कजस्त्वतिसंभृताम् ।
एतादृशं गोपीकानां भ्रमितानां मुहुर्मुहुः ।। १९ ।।
शतकोटिसहस्राणां वल्लवीनां च मध्यतः ।
सुखोपविष्टं नेत्रान्ते पश्यतां तद्विचेष्टितम् ।। २० ।।
अतसीकुसुमश्यामं वनमालाविभूषितम् ।
किरीटकुण्डलद्वन्दप्रमुखोत्तमभूषितम् ।। २१ ।।
पीताम्बरधरं देवं कामभोगसमुत्सुकम् ।
कोटिकन्दर्पललितं बर्होज्वलसचूडकम् ।। २२ ।।

एवं कृष्णं स्मरेद्धीमान् चन्द्रवत्तारकान्तरे ।
द्विगुणीकृतया दिव्यभ्रमया चारुशोभया ।। २३ ।।
तया वृत्या योषितां च शोभमानं सुचन्दनम् ।
यथेन्द्रनीलमणिकं काञ्चनान्तरसंस्थितम् ।। २४ ।।
तं च कृष्णं तथा ध्यायद् द्वारक्रीडाव्यवस्थितम् ।
शरच्चन्द्रोदये स्फीते नीरजोत्करवासिते ।। २५ ।।
मन्दमारुतरम्येऽस्मिन् चारुसैकतभूषितैः ।
कालिन्दीतरलस्वच्छनीरशीकरशीतले ।। २६ ।।
आकाशदेशसंराजद्देवगन्धर्वमुक्तकैः ।
सुमनोवर्षणैर्रम्यैः शोभमाने सुमण्डले ।। २७ ।।
यामुने पुलिने दिव्ये गोपीक्रीडनलालसम् ।
स्फुरद्बेणुस्वनेनैव मोहितानन्तनागरीम् ।। २८ ।।
कन्दर्पलीलाचतुरं भावयेन्नन्दनन्दनम् ।
रात्रौ पूजाद्वये विष्णुं तं ध्यायेद्देवमञ्जसाम् ।। २९ ।।
विष्णोः षट्कालपूजासु ध्यानान्येतानि यश्चरेत् ।
पुत्रपौत्रप्रपौत्राणां धनधान्यानि सम्पदाम् ।। ३० ।।
बुद्धिश्च जायते तस्य सुखमारोग्यमेव च ।
राजवल्लभता तस्य वृत्तिश्च विपुला भवेत् ।। ३१ ।।
विष्णुः सन्तोषितश्चान्ते कुर्य्याद्वैकुण्ठवासिताम् ।
अशक्तौच यदा तावत्सामान्यध्यानमाचरेत् ।। ३२ ।।
सव्ये सन्नवनीतपिण्डमितरे दक्षकरे पायसं
दिव्यं संदधतं नवीनघनवत् श्यामाभिरामाकृतिम् ।
पूर्णेन्दुप्रतिमाननं सुनयनं वक्षःस्फुरत्कौस्तुभं
राजद्व्याघ्रनखान्वितं परिचलद्वेणिं तु कृष्णं स्मरेत् ।। ३३ ।।

रम्ये वृन्दावने चञ्चत् पवने यामुने घने ।
तीरे तत्र स्वर्णमयी दिव्या च कनकस्तनी ।। ३४ ।।
तत्र कल्पतरोर्मूले मञ्जुले कुसुमोज्ज्वले ।
सहस्रदलसम्पन्नं पङ्कजं चारु चिन्तयेत् ।। ३५ ।।
तत् कर्णिकान्तरे दिव्ये वर्त्तमानं स्मिताननम् ।
दले दले स्थिताभिश्च गोपीभिर्वेष्टितं मुदा ।। ३६ ।।
वेणुवादनसंसक्तनानामण्डनमण्डितम् ।
पीताम्बरधरं शान्तं श्यामलं चारुकुण्डलम् ।। ३७ ।।
रासक्रीडापरं चञ्चत् कन्दर्पाविष्टचेष्टितम् ।
एतादृशं स्मरेत्प्राज्ञः पूजने पञ्चमेऽर्च्चकः ।। ३८ ।।
दिव्यसौधतले कान्ते शीतले रत्नकोज्ज्वले ।
तत्र सिंहासने दिव्ये गतौपम्ये सुखप्रदे ।। ३९ ।।
प्रमदाशतकोटीनां भूषितानां सुभूषणैः ।
विना सहाससम्पन्नैर्गणैश्च त्रिगुणीकृतैः ।। ४० ।।
वेष्टितं चारुरेष्टाढ्यं सर्वेषां मध्यवर्त्तिनम् ।
शङ्खं चक्रधरं द्वाभ्यां कराभ्यामितरे पुनः ।। ४१ ।।
कलवेणुधरं धीरं पुनर्दक्षकरे शुभे ।
रमया दत्तमन्नं तत् नानापूपसमन्वितम् ।। ४२ ।।
दिव्यपायससंयुक्तं क्षालितान्नं सुसाधितम् ।
पश्यत्सु सर्वदेवेषु ब्रह्मेन्द्रादिषु चाग्रतः ।। ४३ ।।
नीलजीमूतसङ्काशं नीलाचलगुहास्थितम् ।
एवं च चिन्तयेद्देवं षट्काले पुरुषोत्तमम् ।। ४४ ।।
एवं यो ध्यायते नित्यं पूजासु नरपालक ।
सर्वान् कामानवाप्नोति प्रसादाच्चक्रपाणिनः ।। ४५ ।।

तस्मात् तेन सरोजजेनमुनयो भूपोत्तमं तं प्रति
श्रद्धालुं गदितं च यत्कलिमलप्रध्वंसनं सौरभम् ।
सोऽयं सम्प्रति मे पुरः प्रकटितं दिक्संख्यकानां लस-
त्तत्त्वानां विधिनिर्ण्णयं च परमं तापत्रयच्छेदनम् ।। ४६ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये चतुःषष्टितमोऽध्यायः ।।

पञ्चषष्टितमोऽध्यायः

ब्रह्मोवाच

एतद्दशार्ण्णमन्त्रस्य प्रत्येकं ये च वर्ण्णकाः ।
तानर्द्धेन्दुयुतान् कृत्वा प्रणवादीन्नमोऽन्तकान् ।। १ ।।
न्यसेद्धृदि शिरोभागे शिखायां कवचेऽस्त्रके ।
पार्श्वयोश्चक्रमात्पृष्ठे नाभौ च मूर्द्ध्नि देशिकः ।। २ ।।
एतद्दशाङ्गविन्यासं पञ्च पञ्चाङ्गमुद्रया ।
सन्न्यस्य च ततः पार्श्वद्वये शूकरीमुद्रया ।। ३ ।।
नाभौ पृष्ठे न्यसेन्मूर्द्ध्नि मृगीनाभ्या च मुद्रया ।
ॐ कारं पुटितं मन्त्रं कृत्वा व्यापकमुद्रया ।। ४ ।।
सर्वाङ्गे विन्यसेन्मन्त्रं निजतेजःसमृद्धये ।
मन्त्राक्षराणि दिव्यानि ताराभ्यां पुटितानि च ।। ५ ।।
प्रत्येकं बिन्दुयुक्तानि तानि वर्ण्णानि तु क्रमात् ।
नमोऽन्तानि समुच्चार्य्य दक्षाङ्गुष्ठत्रिपर्वतः ।। ६ ।।
आसव्याङ्गुष्ठपर्य्यन्तं दशार्ण्णमनुमान्यसेत् ।
सृष्टिन्यासस्तदास्य स्यादुक्तोऽयं मन्त्रवेदिभिः ।। ७ ।।

दक्षाङ्गुष्ठकनिष्ठान्तमेवं तद्विन्यसेद्बुधः ।
वामाङ्गुष्ठकनिष्ठान्तं तथा न्यासं चरेत्पुनः ।। ८ ।।
स्थितिन्यासममुं कृत्वा ततः संहारमाचरेत् ।
वामाङ्गुष्ठात्पुनर्दक्षवृद्धाङ्गुलिमभिन्यसेत् ।। ९ ।।
संहारनामकं न्यासं कथयन्ति मनीषिणः ।
करयोर्यवसृष्टादि न्यासं कुर्य्याच्च देशिकः ।। १० ।।
पुत्रपौत्रधनैश्वर्य्यारोग्यवान् जायते नरः ।
संहारादौ यदा न्यासे वैरबुद्धिस्तदा भवेत् ।। ११ ।।
स्थित्यन्तेऽपि तदोज्जातं तस्मात्सृष्ट्वादिमाचरेत् ।
ततोऽङ्गपञ्चकं न्यासं कुर्य्याद्दक्षेऽपि देशिकः ।। १२ ।।
आकारादिक्षकारान्तं वर्ण्णं च बिन्दुसंयुतम् ।
मन्त्रेण पुटितं कृत्वा मातृका स्थानके न्यसेत् ।। १३ ।।
आदौ प्रणवमुच्चार्य्य मन्त्रार्ण्णं च नमोऽन्तकम् ।
परायेति ततः प्राज्ञः पृथ्वीतत्त्वं नियुज्य च ।। १४ ।।
आत्मना चेति मन्त्रेण पादयोः परिसंन्यसेत् ।
एवं च सलिलं वह्निं वायुं चाकाशमेव च ।। १५ ।।
महदोङ्कारतत्त्वे द्वे प्रकृतिपुरुषौ तथा ।
परतत्त्वं ततो धीमान् पादयोर्लिङ्गके तथा ।। १६ ।।
हृद्यास्ये च शिरोदेशे पुनश्च हृदये द्वयम् ।
सर्वाङ्गे च त्रयं तावद्दशतत्त्वानि तत्र तु ।। १७ ।।
पूर्वं कुर्य्याच्च सृष्ट्यादि पश्चात् संहारमन्त्रकैः ।
आनामिकाङ्गुष्ठयोगात्पञ्चतत्त्वानि विन्यसेत् ।। १८ ।।
पञ्चाङ्गुलिभिर्हृदये वारद्वयमनिन्दितम् ।
सर्वाङ्गे व्यापकं कुर्य्यात् त्रिवारं च करद्वये ।। १९ ।।

सूत उवाच

एवं यः कुरुते विप्राः दशतत्त्वानि विन्यसेत् ।
मन्त्रे सिद्धिर्भवेत्तत्र निष्पापो जायते नरः ।। २० ।।
अन्यथा मन्त्रबीजस्य हानिर्भवति भूतले ।
सावधानतया तस्मान्मन्त्री न्यासं समाचरेत् ।। २१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पञ्चषष्टितमोऽध्यायः ।।

षट्षष्ठितमोऽध्यायः

ब्रह्मोवाच

संहारादि यदा न्यासं शरीरे नृपसत्तम ।
सर्वपापसमूहस्य नाशात् संहार उच्यते ।। १ ।।
तस्मात्पादलतादूर्ध्वं मूर्द्धान्तं न्यासमाचरेत् ।
प्रणवं पुरतः कृत्वा मध्ये वर्णं नमोऽन्तकम् ।। २ ।।
एवं दशविधार्णानि तत्र तत्र च विन्यसेत् ।
पादयोश्च जानुदेशे लिङ्गे नाभौ हृदम्बुजे ।। ३ ।।
मुखे च नासपुटयोश्चक्षुषोः कर्णयोस्तथा ।
शिरस्येवं परं न्यासं कुर्य्याद्विप्रो यथाक्रमम् ।। ४ ।।
सर्वाङ्गुलिभिश्चरणे विनाङ्गुष्ठं च जानुनोः ।
कनिष्ठया विना मेढ्रे नाभौ चाङ्गुष्ठमध्यतः ।। ५ ।।
अङ्गुष्ठं तर्जनीभ्यां तु हृदये विन्यसेद्बुधः ।
सर्वाङ्गुलिभिश्च पुनः मुखे न्यासं समाचरेत् ।। ६ ।।
नासापुटद्वयेऽङ्गुष्ठानामिके नामिके मुदा ।
हृदि तर्जनीमध्यमाभ्यां चक्षुषोः न्यासमाचरेत् ।। ७ ।।

कनिष्ठाङ्गुष्ठयोगेन कर्णयोश्च ततः परम् ।
मध्याङ्गुल्या केवलया शिरोदेशेऽपि विन्यसेत् ।। ८ ।।
अनेन विधिना न्यासं संहाराख्यं विदुर्बुधाः ।
सर्वेषामेनसां नाशात् संहारः कथितो बुधैः ।। ९ ।।
इदानीं च स्थितिंवक्ष्ये शृणु तां सुखदां नृप ।
हृदयात्पादपर्य्यन्तं शिरसो हृदयादधि ।। १० ।।
पूर्ववन्मत्रवर्ण्णांश्च तत्र तत्र न मुद्रया ।
तया न्यसेत्ततो धीमान् स्थितिन्यासं वदन्ति हि ।। ११ ।।
शिरः श्रवणयोर्नेत्रघ्राणयोश्च मुखे तथा ।
हृदि नाभौ जानुदेशे लिङ्गे पादतले क्रमात् ।। १२ ।।
पूर्ववन्मन्त्रवर्ण्णाश्च विन्यसेद्देशिकोत्तमः ।
तत्र तत्र पदे न्यासं कुर्य्याच्चैवोक्तमुद्रया ।। १३ ।।
सृष्टिन्यासममुं विद्धि कुर्वतां सुखदं नृप ।
विभूतिपञ्जरं नाम न्यासं कुर्य्याद्यथा द्विजः ।। १४ ।।
प्रकाशयामि नृपते गुप्तं तत् साम्प्रतं परम् ।
प्रणवाद्यं ततो वर्ण्णं बिन्दुना परिभूषितम् ।। १५ ।।
नमोऽन्तं न्यासमाकुर्य्यात्तत्र तत्र च देशिकः ।
आधारे च ध्वजे नाभौ हृदये च गले मुखे ।। १६ ।।
ऊरुद्वये स्कन्धयोश्च नाभौ कुक्षौ हृदि न्यसेत् ।
स्तनद्वये पार्श्वयोश्च पृष्ठे च कटीभागके ।। १७ ।।
शिरस्यैव तथा नेत्रे श्रुतौ घ्राणद्वये तथा ।
कपोलयोश्च विन्यस्य ततो हस्तकसन्धिषु ।। १८ ।।
तथैव पादयोः सन्धौ पञ्च पञ्च च विन्यसेत् ।
हस्तपादाङ्गुलिवृन्दे प्रत्येकं वर्णकैर्न्यसेत् ।। १९ ।।

शिरमध्ये ततस्तस्य शिरसं पूर्वपार्श्वके ।
दक्षिणे च ततः पश्चात् उत्तरे च ततः परम् ।। २० ।।
ततः शिरसि मूले द्वे बाह्वोश्च सक्थिनि द्वये ।
शिरस्यक्ष्णि च वक्त्रे च कण्ठे च हृदये तथा ।। २१ ।।
ध्वजे पादयोश्च क्रमादेव विप्रो
न्यसेत् मन्त्रवर्णान् तथा देशिकेन्द्रः ।
पुनः श्रोत्रदेशे तथा चक्षुषोश्च-
स्फुरद्गण्डयोः कण्ठके बाहुमूले ।। २२ ।।
शीर्षे नेत्रेऽथ वक्त्रे गलविमलपदे मञ्जुले बाहुमूले
हृद्देशे नाभिपद्मे तदनु च परमे जानुदेशे च मेढ्रे ।
पादद्वन्द्वेऽथ मन्त्री परिपठिततया मन्त्रवर्णांश्च तावद्
वारं वारं न्यसेत्तु सकलतनुतले तत्र तत्र क्रमेण ।। २३ ।।
विभूतिपञ्जरन्यासं वंशोल्लासकरः परः ।
सेवतां शृण्वतां तावत् सर्वकामार्थसिद्धिदम् ।। २४ ।।
स्त्रीवशीकरणे श्लाघ्यः पुत्रपौत्रविवर्द्धनः ।
सुखारोग्यप्रदः श्रीमान् धनधान्यादिवृद्धिदः ।। २५ ।।
परत्र विष्णोश्चरणस्मृते वैकुण्ठवासदः ।
सर्वसिद्धिर्भवेज्जन्तोः श्रीजगन्नाथध्यानतः ।। २६ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये षट्षष्टितमोऽध्यायः ।।

सप्तषष्टितमोऽध्यायः

ब्रह्मोवाच

अतःपरं प्रवक्ष्यामि मृत्युपञ्जरनामकम् ।
यन्न्यासस्मरणादेव ह्यपमृत्युर्विनश्यति ।। १ ।।
विष्णोर्वल्लभतामेति तत्तत् सर्वजनप्रियः ।
कुर्वतस्तस्य लोकस्य किं ब्रूमः फलमुत्तमम् ।। २ ।।
प्रथमं प्रणवं चोक्त्वा द्वादशाक्षरवर्णकम् ।
आद्यस्वरं बिन्दुयुतं पूर्वजं नृपसत्तम ।। ३ ।।
केशवं चैव धातारं नारायणमतःपरम् ।
अर्य्यमाणं माधवं च मित्रं तत्र नियोजयेत् ।। ४ ।।
गोविन्दं वरुणं धीमान् विष्णमंशुं च योजयेत् ।
मधुसूदनं भगवन्तं त्रिविक्रममनुं पुनः ।। ५ ।।
विवस्वन्तं ततो वामनमिन्द्रं युगपत्तथा ।
श्रीधरं पुष्णिशब्दान्तं हृषीकेशमतःपरम् ।। ६ ।।
पर्जन्येन युतं पद्मनाभं त्वष्टारमेव च ।
दामोदरं विष्णुयुतं सर्वानेतान् परस्परम् ।। ७ ।।
विशेषणतया चान्त्यान् कृत्वा तांश्च नमोऽन्तकान् ।
चतुर्थ्यन्तान् विधायाशु न्यसेन्यासकलापवित् ।। ८ ।।
भाले चैवोदरे तावत् हृदये गन्धकूर्पके ।
दक्षपार्श्वे भुजाद्ये च भुजान्तरगले तथा ।। ९ ।।
वामपार्श्वे ततो धीमान् भुजमूले च वामके ।
भुजान्तरगले तावत् पृष्ठे च ककुदि क्रमात् ।। १० ।।
तारमादौ समुच्चार्य्य नमः शब्दं शुभोदयम् ।
भगवते चेत्युक्त्वाथ वासुदेवाय यत्फलम् ।। ११ ।।

अनेन मनुना प्राज्ञो मूर्द्धिन न्यासं समाचरेत् ।
इमं मन्त्रं न्यसेद्यस्तु मूर्द्धिन देहे च वर्ण्णकान् ।। १२ ।।
संन्यस्य जायते मर्त्त्यः कोटिचन्द्रसुशीतलः ।
कोट्यर्कसंनिभरुचिः निर्मलः परमद्युतिः ।। १३ ।।
सर्वभोगानवाप्नोति शेषे मोक्षमवाप्नुयात् ।
दशाक्षरस्य मन्त्रस्य ऋष्यादिं च पुनश्चरेत् ।। १४ ।।
पञ्चाङ्गं च ततः कृत्वा ध्यानमेवं समाचरेत् ।
दाहोत्तीर्ण्णं सुवर्णभिं पद्मे पद्मासनं शुभम् ।। १५ ।।
किरीटादिकभूषाभिर्नानाभिः परिशोभितम् ।
शङ्खचक्रगदापद्मधारिणं करुणोज्वलम् ।। १६ ।।
फणाभिः सप्तसंख्याभिः शोभमानं शुभोदयम् ।
शरच्चन्द्रनिभं शान्तं प्रणतानां सुखाशयम् ।। १७ ।।
एवं विधं हरिं ध्यात्वा मन्त्रमूर्त्तिं यथा स्मरेत् ।
तद्वदामि महीनाथ श्रूयतामेकचेतसा ।। १८ ।।
विश्वामित्रो वसिष्ठश्च भरद्वाजश्च नारदः ।
कश्यपः सनकादिश्च जाबालिर्गौतमश्च सः ।। १९ ।।
अत्रिश्च पुलहश्चैव मार्कण्डेयो महातपाः ।
पराशरो मरीचिश्च गर्गश्चान्ये महर्षयः ।। २० ।।
ध्यानं चक्रुर्नृपश्रेष्ठ ब्रह्मरूपतया ब्रजे ।
गोपबालस्वरूपं तं हरिं गोगोपवेष्टितम् ।। २१ ।।
ध्यानयोगेऽपि ते सर्वे मन्त्रमेवं प्रलेभिरे ।
कामबीजं शिरोदेशात् कृष्णस्य समजायत ।। २२ ।।
गोचेत्यक्षरमेतत्तु कर्णयोः समपद्यत ।
पीकारो नासिकारन्ध्रात् जकाराश्चक्षुषोस्तथा ।। २३ ।।

आननाच्च नकारस्तु वकारो गलदेशकः ।
लकारो विद्धि हृदये भकारः कुक्षितोऽभवत् ।। २४ ।।
यकारो नाभिजो ज्ञेयः स्वेति जानुप्रदेशतः ।
हाकारः पादयोर्जातो जानीहि क्षितिपालक ।। २५ ।।
एतैर्दशाक्षरैर्दिव्यैः कृष्णदेहसमुद्भवैः ।
जातो गोपाल मन्त्रोऽयं दशार्ण्णः परिनिर्मितः ।। २६ ।।
एवं च ध्यायतां तेषां मुनीन्द्राणां नृपोत्तम ।
आवर्त्तितानि वर्ण्णानि पश्यतां ज्ञानचक्षुषा ।। २७ ।।
पुनः कृष्णाय चेति वर्ण्णत्रयं हरिललाटतः ।
दृश्यानि चाथ गोविन्दश्चतुर्थ्यन्तो भुजद्वये ।। २८ ।।
जातस्तन्मन्त्रवर्णेऽसौ त्वष्टाधिकदशार्ण्णकः ।
पश्चाज्ज्ञातो मनुस्तावत् तन्मुनिब्रह्मसंमुदे ।। २९ ।।
मन्त्राक्षराणां यद्रूपं कथ्यतेऽत्र नृपोत्तम ।
बीजं तन्मदनस्यापि स्त्रीपुंवच्चिह्नवेष्टितम् ।। ३० ।।
अर्द्धाङ्गे नीलवर्णाभं वामाङ्गे च तडित्प्रभम् ।
चक्रपद्मधरं शान्तं नानालङ्कारमण्डितम् ।। ३१ ।।
ब्रह्मस्वरूपं तद्बीजं ध्यायेच्च सर्वकामदम् ।
गोवर्ण्णो नीरदश्यामः शङ्खचक्रगदाब्जधृक् ।। ३२ ।।
पद्मासने भूषणाढ्यः पीतवासाः स्मिताननः ।
नित्यं भावयतां भूप मोक्षः स्यान्नात्र संशयः ।। ३३ ।।
पीकारः पीतवर्णाभः पीनोत्तुङ्गतरस्तनः ।
नानाभूषणभूषाढ्यः स्मरतां सर्वसौख्यदः ।। ३४ ।।
पद्मं च ज्ञानमुद्रां च बिभ्रती सम्प्रदृश्यते ।
जकारो जगदाकारो विश्वरूपः परार्त्तिहा ।। ३५ ।।

शङ्खचक्रधरः श्रीमान् मुनीनां गोचरोऽभवत् ।
नकारो नीरदः श्रीमान् नानालङ्कारसुन्दरः ।। ३६ ।।
नीरजासनभृन्नित्यो गदाशङ्खधरोऽजनि ।
एवं यो ध्यायते मर्त्यः कदाचित्तस्य न व्यथा ।। ३७ ।।
वकारो विद्रुमाकारश्चक्रपाशधरः शुचिः ।
विभूषणधरःस्रग्वी स्मरताममृतप्रदः ।। ३८ ।।
लकारो लोलनेत्रान्तो लक्ष्मीरूपस्तडित्प्रभः ।
सर्वाभरणसम्पन्नः स्मरतामार्त्तिनाशनः ।। ३९ ।।
पद्मासनः पद्मधरोऽभयहस्तेऽत्र पातकः ।
भकारो भास्कराभासो भाविनीललिताकृतः ।। ४० ।।
नानाभूषाधरः स्रग्वी स्मरणं पापनाशनः ।
यकारचन्द्रगौराभोऽभयदो वरदोऽनघ ।। ४१ ।।
सर्वभूषणदिव्याङ्गो ध्यायतां दुःखनाशनः ।
स्त्रीरूपी पीतवसनः पीतवर्णः परात्परः ।। ४२ ।।
पद्मोल्लासिकरद्वन्द्वः श्वेतवर्णो विपत्तिहा ।
हाकारो हाटकाकारो हारादि भूषणोज्ज्वलः ।। ४३ ।।
अङ्गनाङ्गधरः श्रीमान् पाशाङ्कुशलसत्करः ।
स्मरतां सर्वपापानां नाशनः सुखदोऽभवत् ।। ४४ ।।
कृष्णायेत्यक्षराणि तु नानालङ्कारभूषिताम् ।
शङ्खचक्राभयवरा पाशाङ्कुशयुजामिह ।। ४५ ।।
स्मरतां सर्वपापानि नाशमायान्ति तत्क्षणात् ।
सर्वकामफलं तत्तु जायते नृपसत्तम ।। ४६ ।।
गोविन्दाय चेति वर्णचतुष्टयमिदं महत् ।
नानावर्णधरं धीरं नानाभूषणभूषितम् ।। ४७ ।।

शङ्खचक्रगदापद्मधनुर्बाणधरं परम् ।
पाशाङ्कुशसमायुक्तं ध्यायतां च तपस्विनाम् ।। ४८ ।।
आविर्भूतमिदं ये वै ध्यायन्ति प्रतिवासरम् ।
ते सर्वे सुखमाभुज्य यान्ति विष्णोः परं पदम् ।। ४९ ।।
ते सर्वे ऋषयो भूप मन्त्रमित्थं द्विधा गतम् ।
संप्राप्य तं सुरवरं भेजिरे तद्विधानतः ।। ५० ।।
पूर्वोक्तमन्त्रऋष्यादिन्यासकर्मविधानतः ।
ध्यानलब्धेन मन्त्रेण दशार्शेन मुनीश्वराः ।। ५१ ।।
गोगोपगोपीसंयुक्तं तं कृष्णं समुपाश्रिताः ।
एतन्मन्त्रवशं ब्रह्म यच्च सर्वगतं स्मृतम् ।। ५२ ।।
वेदान्तवेद्यं परमं यच्च नीलाद्रिसंज्ञितम् ।
मुनीनां ध्यानतो यत्तु लभ्यं भवति भूपते ।। ५३ ।।
यद्ब्रह्मपूर्णमानन्दं सच्चिदानन्दमव्ययम् ।
तदेवास्य च मन्त्रस्य वशं भवति निश्चितम् ।। ५४ ।।
अनेन मनुना राजन् दशार्णेन सदार्च्चकः ।
दारुब्रह्मार्च्चनं कुर्य्यादित्येतत्कथितं मया ।। ५५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सप्तषष्टितमोऽध्यायः ।।

अष्टषष्टितमोऽध्यायः

ब्रह्मोवाच

एतद्विधानतः कर्तुं यदि शक्तिर्न जायते ।
अष्टादशाक्षरेणैव यथा कुर्य्याद्वदाम्यहम् ।। १ ।।

अष्टादशाक्षरो मन्त्रः मन्त्रश्रेणिषु दुर्ल्लभः ।
मुनीनां माननीयो यः कामधेनूपमः सताम् ।। २ ।।
विष्णोः प्रीतिकरो नित्यं साधकानां हितप्रदः ।
इदानीं कथ्यते सोऽयं मन्त्रोऽष्टादशवर्णकः ।। ३ ।।
कामबीजं समुच्चार्य्य कृष्णायेति ततः परम् ।
गोविन्दाय ततश्चोक्त्वा गोपीजनपदं ततः ।। ४ ।।
वल्लभाय तदीयान्ते वह्निजायां ततो वदेत् ।
एतेनाष्टादशार्णाख्यस्त्रैलोक्येप्सितदायकः ।। ५ ।।
मन्त्रं मन्त्रविदां पूज्यं गोपनीयं सदैव हि ।
प्राकाश्यं साधुषु क्षिप्रमप्रकाश्यं च दुर्जने ।। ६ ।।
एतस्य मन्त्रस्य ऋषिर्ब्रह्माहं नृपसत्तम ।
गायत्रीछन्द एव स्यात् श्रीकृष्णः प्रकृतिः ततः ।। ७ ।।
दुर्गाधिष्ठात्रिका जाता देवतास्मिन् मनुः स्मृता ।
क्लीं चात्र कथ्यते बीजं स्वाहाशक्तिर्भिरुच्यते ।। ८ ।।
चतुर्वर्गफलावाप्तो विनियोगो विनिश्चितः ।
प्रणवाद्यं नमोऽन्तं च कामबीजं च कामदम् ।। ९ ।।
अङ्गुष्ठाय स्वमन्त्रेण न्यासं कुर्य्याद् विचक्षणः ।
आद्यत्रयं तु तर्ज्यन्यां मध्यमायां चतुष्टयम् ।। १० ।।
अष्टौ ह्यनामिकायां च द्वयमस्त्रे च विन्यसेत् ।
एतन्मन्त्रस्य पञ्चाङ्गं यन्मया कथ्यतेऽधुना ।। ११ ।।
तत् षडङ्गस्य मनुना क्रमात् पञ्चाङ्गमान्यसेत् ।
ध्यायेत् कृष्णं जागन्नाथं भक्तिभावेन देशिकः ।। १२ ।।
श्रीमन्नीरदनीलसुन्दरतनुः पिच्छावतंसः प्रियो
गोपालाभिनवाङ्गनासुनयनानन्दप्रदाङ्गः शुभः ।
गोगोपीवृत एष शारदशशिप्रोल्लासिवक्त्रावता-
द्वेणुः पङ्कजलोचनोऽवतु स नः श्रीदेवकीनन्दनः ।। १३ ।।

दशाक्षरस्य यद्ध्यानं तच्चाष्टदशके स्मृतम् ।
यदा कर्तुं न शक्येत यदैतद्ध्यानमाचरेत् ।। १४ ।।
शिरस्यांसिकदेदेऽपि चक्षुषोः कर्णयोस्तथा ।
घ्राणयोश्च मुखे चैव कण्ठे वा हृदये तथा ।। १५ ।।
हृदि नाभौ ध्वजे चैव जानुयुग्मे पदद्वये ।
एतन्मन्त्राक्षरं सम्यक् भिन्नं न्यसेत् स मन्त्रिकः ।। १६ ।।
प्रणवाद्यं नमोऽन्तं च कृत्वा तेषु क्रमान्न्यसेत् ।
एतदन्ते पुनर्वक्ष्ये मन्त्रस्य पदपङ्कजम् ।। १७ ।।
न्यसेत् यथा देशिकोऽसौ स्वदेहे नृपसत्तम ।
चतुरक्षराशीति च संख्याति च मुखे न्यसेत् ।। १८ ।।
तद्वच्च हृदये भूयो ध्वजेऽक्षरचतुष्टयम् ।
पदद्वये द्वयं तावन्न्यसेन्मन्त्रविदां वर ।। १९ ।।
तारद्वयेन पुटितं मन्त्रं कृत्वा प्रयत्नतः ।
तेनैव देशिकः कुर्य्याज्जापकत्रयमात्मनि ।। २० ।।
अनेन मनुना प्राज्ञः पुटितं मातृकाक्षरम् ।
स्वस्वस्थाने न्यसेत्तावत् प्रत्यक्षरमघक्षयम् ।। २१ ।।
मूर्त्ति पञ्जरतिनं पूर्वोक्तं न्यासमुत्तमम् ।
अस्मिन्मनौ परं कुर्य्यादाचार्य्यो विष्णुपूजने ।। २२ ।।
पूर्ववन्मन्त्रऋष्यादिं समाचर्य्य स देशिकः ।
ध्यानं कृत्वा ततः कुर्य्याद्दिग्बन्धनमिदं चरेत् ।। २३ ।।
पूर्ववद्व्यापकं कुर्य्यादाचार्य्यश्च त्रयं ततः ।
शङ्खचक्रे गदापद्मे दर्शयेच्च ततःपरम् ।। २४ ।।
मुषलं शाङ्र्गधनुषं नन्दकं दर्शयेत्पुनः ।
पाशाङ्कुशौ वैनतेयं श्रीवत्साङ्कं च कौस्तुभम् ।। २५ ।।

ब्रह्मोवाच

वेणुं तथाभयवरौ वनमालां च दर्शयेत् ।
कामक्रोधलोभमोहाः मदमात्सर्य्यकौ तथा ।। २६ ।।
एते षडरयः सन्ति शरीरे नृपसत्तम ।
किञ्चित्सत्कर्मकर्तुश्च विघ्नमादधति क्षणम् ।। २७ ।।
मुद्राणां दर्शनादेवं तेषां यन्मुद्रणे भवेत् ।
तस्मान्मुद्रा इति ख्याता ह्यता मुद्राः प्रदर्शयेत् ।। २८ ।।
तासां च लक्षणं वक्ष्ये विघ्नध्वंसाय साम्प्रतम् ।
दक्षस्य चतुरङ्गुल्या वामाङ्गुष्ठं विधृत्य च ।। २९ ।।
सव्यस्य चतुरङ्गुल्या दक्षाङ्गुष्ठं नियोजयेत् ।
अनेन शङ्खमुद्रा स्यात्प्रीतिदा सर्वदा हरेः ।। ३० ।।
सव्याङ्गुष्ठं स्पृशेद्यावद्दक्षस्य च कनिष्ठिका ।
तथाङ्गुष्ठं च दक्षस्य सा सव्यस्य कनिष्ठिका ।। ३१ ।।
अन्यां प्रसारितां कुर्य्यात्तच्च चक्रं प्रचक्षते ।
तच्चक्रदर्शनादेव राक्षसाद्याः पलायिताः ।। ३२ ।।
अन्योऽन्याङ्गुलिसम्बद्धेत् कफोणीद्वयलग्नके ।
तद्गते मध्यमायुग्मे गदेयं गदनाशिनी ।। ३३ ।।
पृष्ठतो लग्नकाङ्गुष्ठौ त्वन्योऽन्यप्रसूताङ्गुलौ ।
पद्माकारौ करौ कुर्य्यापद्ममुद्रेयमिष्टदा ।। ३४ ।।
मुष्टिं हस्तद्वये कृत्वा वामोपरि च दक्षताम् ।
अङ्गुष्ठतर्जनीयोगान्मुषलं प्रसृताङ्गुलौ ।। ३५ ।।
वामे च तद्वद्दक्षे च करे कृत्वा स देशिकः ।
काण्डवद्दक्षकर्णान्तोत्कर्षणादेव या भवेत् ।। ३६ ।।
शाङ्‌र्गमुद्रापि सा ज्ञेया सर्वसिद्धिप्रदायिनी ।
उद्गते दक्षहस्तेऽपि कनिष्ठाङ्गुष्ठपीडने ।। ३७ ।।

लग्नोद्गताङ्गुलितमा खड्गबाह्वांसशः प्रदा ।
दक्षमुष्ट्युद्यतायां तु तर्जन्यामुपरिस्थले ।। ३८ ।।
मण्डलाकारसंलग्नं तर्जन्याङ्गुष्ठयोर्यदि ।
सव्ये त्रिभिः पताकावत्पाशमुद्रा प्रकीर्त्तिता ।। ३९ ।।
कुर्वतां पश्यतां तावत् भावपापविनाशिनी ।
दक्षहस्ते ततः कुर्य्यान्मुष्टिं च तर्जनिं विना ।। ४० ।।
तर्जनीं किञ्चिदाकुञ्च्य दक्षहस्तेऽथ चोद्गते ।
अङ्कुशाभिधमुद्रेयं शत्रुसंहतिवारिणी ।। ४१ ।।
अन्योऽन्यपृष्ठसंलग्नौ हस्तौ कृत्वा ततः पुमान् ।
अङ्गुष्ठेऽङ्गुष्ठमायोज्य कनिष्ठायां कनिष्ठिका ।। ४२ ।।
तर्जनीं चैव तर्जन्यां शेषांश्च पक्षिवच्चरेत् ।
वैनतेयाख्यमुद्रेयं विष्णोः सान्निध्यदायिनी ।। ४३ ।।
मिथः संलग्नपृष्ठाभिरङ्गुलीभिः करद्वये ।
तर्जन्युपरि दक्षस्य वामस्य च कनिष्ठिका ।। ४४ ।।
तद्वद्दक्षकनिष्ठायां विशेत्सर्वस्य तर्जनी ।
मध्यमानामिकाभ्यां तु वामङ्गुष्ठं नियोजयेत् ।। ४५ ।।
पुनर्मध्यानामिकाभ्यां दशाङ्गुष्ठं निपीड्य च ।
श्रीवत्समुद्रा कथिता सदा श्रीपतिवल्लभा ।। ४६ ।।
अन्योऽन्यपृष्ठसंलग्ने वस्त्रयुग्मे कनिष्ठिकाम् ।
वामस्य च कनिष्ठायां पुनर्मध्यं च छन्दयेत् ।। ४७ ।।
दक्षसम्भवतर्जन्यामथ दक्षकरस्य च ।
मध्याङ्गुष्ठानामिकाभिर्वामसंभूततर्जनीम् ।। ४८ ।।
संयोज्योदगतवक्त्रं च त्वङ्गुष्ठं मणिबन्धके ।
एषा कौस्तुभमुद्रा स्याद्धनधान्यादिवृद्धिदा ।। ४९ ।।

वामस्योष्ठगतेऽङ्गुष्ठे तत्कनिष्ठां पुनः स्पृशेत् ।
दक्षाङ्गुष्ठस्तत्कनिष्ठाप्रसारमध्यमाचरेत् ।। ५० ।।
संलग्नाभिश्च शेषाभिरङ्गुलीभिश्च या भवेत् ।
वेणुमुद्रा प्रशस्ता स्यात् विष्णुभक्तिप्रवर्द्धिनी ।। ५१ ।।
प्रसारितोद्यतशयं वामबाहुं फणाकृतिम् ।
कृत्वा भयाख्यमुद्रा सा सर्वत्र भयनाशिनी ।। ५२ ।।
जानूपर्य्यग्रकं दक्षं प्रसृत्योत्तानपाणिकम् ।
भुजं प्रसार्य्य या जाता करमुद्रा वरप्रदा ।। ५३ ।।
तर्जनीद्वयमूलं तदङ्गुष्ठाभ्यां विधृत्य च ।
तादृशं तर्जनीयुग्ममधोमुखतयाग्रितः ।। ५४ ।।
नयेत्कण्ठं च मालावत्पातयेत्पार्श्वयोः पुनः ।
वनमाला प्रशस्ता सा वंशोल्लासकरी स्मृता ।। ५५ ।।
एताः षोडशमुद्रास्ता यस्त्वात्मानं न दर्शयेत् ।
निर्मलो न भवेत्सोऽपि न योग्यो भविताच्चर्चने ।। ५६ ।।

ब्रह्मोवाच

अन्तर्यजनमाचक्षे साम्प्रतं शृणु भूपते ।
यस्य श्रवणमात्रेण नरः स्यात्क्षीणकल्मषः ।। ५७ ।।
ध्यात्वाथ नन्दतनयमात्मानं स च देशिकः ।
आत्मनस्तस्य कृष्णस्याभेदं संचिन्तयेत्तदा ।। ५८ ।।
यदा स्वयं न देवः स्यात्तदा देवाच्चर्चनेऽक्षमः ।
अतो हि यत्नतो नूनमभेदं चिन्तयेत् नृप ।। ५९ ।।
ततो हृदि दृढं बध्वा विल्वमुद्रां स देशिकः ।
कामबीजं जपेत्पञ्चविंश प्रमाण्यतस्तदा ।। ६० ।।
विल्वमुद्रालक्षणं तु कथयामि समासतः ।
सव्यहस्ततले दक्षाङ्गुष्ठं तस्योपरि न्यसेत् ।। ६१ ।।

वामाङ्गुष्ठं पुनः सव्यं चतुरङ्गुलिमुद्रणम् ।
तत्र दक्षकरस्यापि प्रागग्राङ्गुलिबन्धने ।। ६२ ।।
या भवेद्विल्वमुद्रा सा गुप्ता सर्वार्थसाधिका ।
अर्घ्यादिकोपचारैश्च मनसात्मानमर्चयेत् ।। ६३ ।।
विश्वदेवाख्यहोमं वै कुर्य्यान्मानसिकं ततः ।
तदुच्यते नृपश्रेष्ठ सावधानतया शृणु ।। ६४ ।।
मूलाधारं कुण्डमिति ध्यात्वा देवाग्निदीपितम् ।
धर्माधर्मेऽपि संयुक्तं मूलमन्त्राज्यसंयुतम् ।। ६५ ।।
मनःस्रुवेण सम्पन्नं सुषुम्ना स्रुग्युतं नृप ।
नवाहुतिरंहतादिः प्रत्येकं जुहुयाद्द्विजः ।। ६६ ।।
अहन्तां च त्वसत्तां च पैशुन्यं कामक्रोधकौ ।
लोभमोहो मदं चापि मात्सर्य्यं च क्रमाद्धुनेत् ।। ६७ ।।
प्रणवाद्यमहन्तादिं त्वहं चेति ततो वदेत् ।
जुहोमीति पदं तत्र स्वाहा शब्दमतःपरम् ।। ६८ ।।
अनेन मनुना मन्त्री मनसा जुहूयात् पृथक् ।
तद्दक्षवृत्तिरहं चात्र जुहोमीति वदेच्च वा ।। ६९ ।।
होमाभावे यदा जाते त्वशक्तिः स्याच्च देशिकः ।
मूलमन्त्रं जपेत् भूप द्विगुणं पूजने क्षणे ।। ७० ।।
आरात्रिकं ततः कुर्य्यात् मनसाथ प्रयत्नतः ।
गण्डूषाश्च ततो दद्याद्रविसंख्यां विधानतः ।। ७१ ।।
इयं च मानसी पूजा गृह्यतां परमेश्वर ।
इत्युक्त्वा च नमस्कृत्य समर्प्याथ स देशिकः ।। ७२ ।।
हीनपूरणमाकुर्य्यात् बाह्यपूजां समाचरेत् ।
पूजा च त्रिविधा ख्याता मानसी बाह्यका तथा ।। ७३ ।।

अपरा च देवगता कर्त्तव्या त्रिविधानघा ।
मनसा याच्चर्चना प्रान्ते बाह्यपूजार्थमर्च्चकः ।। ७४ ।।
प्रार्थयेद्देवदेवेशं तच्छ्रुणुष्वावनीश्वर ।
शृणुध्वं मुनयः सर्वे बाह्यार्च्चाप्रार्थनाविधिम् ।। ७५ ।।
यच्छ्रुत्वा मानवाः पापाद्विमुक्ताः स्युर्न संशयः ।
प्रभोर्मनगतां पूजां यथाज्ञानं कृता मया ।। ७६ ।।
गृहीत्वा ज्ञापय क्षिप्रं मां बाह्यार्च्चनकर्मणि ।
क्षमस्व जगतां नाथ यत्राज्ञानदोषान् मम ।। ७७ ।।
इत्युक्त्वा स तु देशिको द्विजवरः पूजार्थजातादरः
श्रीविष्णुं प्रणिपत्य नम्रशिरसा संप्रार्थ्य तं चेतसा ।
तद्बाह्यार्च्चनमाचरेदविरतो भक्त्या तथा तद्भवे-
त्तावत्तत्कथयामि साम्प्रतमथो यूयं यतः पूजकाः ।। ७८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये अष्टषष्टितमोऽध्यायः ।।

ऊनसप्ततितमोऽध्यायः

ब्रह्मोवाच

पूजापात्रव्रजस्यास्य यादृशं घटनं भवेत् ।
यैर्विना न भवेत् पूजा तेषां च निर्णयं शृणु ।। १ ।।
यादृक् फलैर्भवेत् यच्च येषु येषु च वस्तुषु ।
तद्व्यवस्था मया भूयः कथ्यते तव सन्निधौ ।। २ ।।
प्रथमं जलपात्रस्य निर्णयं कथयाम्यहम् ।
तालैः षोडशसंख्यातैर्निर्मितं स्यान्मनोहरम् ।। ३ ।।

तावत्पलं प्रमाणाम्भः पूरितोदरसुन्दरम् ।
मुखं तु मण्डलाकारं सुष्ठुग्रीवं शुभोदयम् ।। ४ ।।
उदरैकप्रदेशस्य प्रमाणं जलनिर्गमम् ।
प्रणाल्योपरि पद्मं वा चक्रं वा रचयेत्सुधीः ।। ५ ।।
मण्डलाधारचक्राढ्यं रौप्यं स्वर्णमयं तथा ।
तच्च ताम्रमयं वापि पित्तलैर्वापि कारयेत् ।। ६ ।।
तादृशे जलपात्रेऽस्मिन् गन्धपुष्पे च पातयेत् ।
वीक्षणादिकसंस्कारं कृत्वा तत्र च देशिकः ।। ७ ।।
समुद्रसम्भवं शङ्खं निर्मलं चारुवृत्तकम् ।
शोभनाग्रं साधुपृष्ठं मञ्जुलं मञ्जुलोदरम् ।। ८ ।।
नाभिदेशोज्ज्वलं सारं विष्णोः करतलाश्रयम् ।
पूजायामर्घदानेऽपि प्रशस्तं तादृशं स्मृतम् ।। ९ ।।
धौतं कुर्य्यात् प्रयत्नेन वस्त्रमन्त्रेण देशिकः ।
चतुरङ्गुलप्रमाणेन विस्तीर्ण्णं तत् प्रमाणतः ।। १० ।।
उच्छ्रायः स्यात् त्रिपादाढ्य स्त्रिगुणैः परिनिर्मितम् ।
शङ्खाधारमिति प्राज्ञष्ठवर्ण्णाकृत्तिकं चरेत् ।। ११ ।।
लसद्वह्निकणारक्तं धौतयेत् प्रणवेन तत् ।
पूजास्थानं तदा मन्त्री शौधयेच्चन्दनाम्भसा ।। १२ ।।
त्रिकोणं प्रथमं कुर्य्यात् षट्कोणं च ततः परम् ।
वृत्तमेकं ततः कृत्वा चतुरस्त्रं लिखेत् पुनः ।। १३ ।।
चतुर्द्वारसमायुक्तं रचयेन्मत्स्यमुद्रया ।
तन्मध्ये मण्डूकं कूर्ममनन्तं मनसार्च्चयेत् ।। १४ ।।
गन्धं पुष्पं च निक्षिप्य मण्डूकादित्रयोपरि ।
शङ्खाधारं त्रिपादं तं स्थापयेद्देशिकोत्तमः ।। १५ ।।

तत्राधारे ततो वह्निकालरूपे समुज्ज्वले ।
शङ्खं च तादृशं दिव्यं स्थापयेच्चन्द्रसन्निभम् ।। १६ ।।
कायबीजेन पात्राणि प्रोक्षणीप्रमुखानि च ।
अथवा प्रणवेनैव धौतयेच्छुद्धवारिणा ।। १७ ।।
शुद्धं शुक्लं सूक्ष्मतरं पात्रार्थं वस्तु आक्षिपेत् ।
श्यामाकं च ततः श्वेतसर्षपोशीरके तथा ।। १८ ।।
कुङ्कुमाब्जे ततो विष्णुक्रान्ता च पुष्पजालकम् ।
दूर्वाश्चन्दनमेवं च जलेऽस्मिन् पातयेद्बुधः ।। १९ ।।
द्रव्याणामेतच्चिह्नेन युतं स्वापद्यसत्तमम् ।
शतपुष्पदलाकारं कर्णिकारयुतोदरम् ।। २० ।।
द्व्याङ्गुलोच्छ्रायशोभाढ्यं चतुष्पलविनिर्मितम् ।
तत्प्रमाणाम्बुसंयुक्तं प्रोक्षणीभाजनं पुनः ।। २१ ।।
शङ्खस्य दक्षिणे देशे प्रोक्षणीं स्थापयेत्पुनः ।
पाद्यपात्रं वसुपलं धुस्तूरकुसुमाकृतिः ।। २२ ।।
अष्टापलजलाधारं तादृशं रचयेद्बुधः ।
तत्तु शङ्खोत्तरे भागे स्थापयेत्क्षितिपोत्तम ।। २३ ।।
पलद्वयं कृतं तावत् पोक्षार्द्धं च तदाकृति ।
द्विपलाम्बुयुतं कार्य्यं भाजनं यत्तु जायते ।। २४ ।।
पातयेदर्घ्यपात्रेऽस्मिन् द्रव्याण्येतानि भूपते ।
उशीरं च यवांश्चैव तिलानि सर्षपान् तथा ।। २५ ।।
कुशांश्च गन्धपुष्पे द्वे दूर्वांश्च पूर्वमानतः ।
एतद्रव्ययुतं दिव्यमर्घभाजनकं च यत् ।। २६ ।।
पाद्यपात्रोत्तरे तत्तु स्थापयेद्देशिकोत्तमः ।
उशीरं जातिकर्पूरहिमगन्धौ मनोहरौ ।। २७ ।।

लवङ्गमेलाफलकं गन्धकाङ्कोलकं तथा ।
मुराख्यं च ततो धीमान् पूर्वजन्मानतः पृथक् ।। २८ ।।
आचमनीये संयोज्य तच्छ्रेष्ठाचमनीयकम् ।
आरामपात्रं द्विपलं द्विपलाम्बुसमायुतम् ।। २९ ।।
चतुरङ्गुरलकोच्छ्रायमर्घ्यपात्रोत्तरे न्यसेत् ।
पूर्वेषु तेषु पात्रेषु यानि द्रव्याणि भूपते ।। ३० ।।
पातयेत् कमलाभर्त्तुः प्रीतये सर्वदा हरेः ।
अन्यथा तन्न गृह्नीयाद्विष्णुः प्रीतो भवेन्नहि ।। ३१ ।।
चतुः पलं समुच्छ्रायं वेदाङ्गुलकमानतः ।
दध्याज्यमधुखण्डानां चतुर्णां च चतुष्पलैः ।। ३२ ।।
पूरितं मधुपर्कस्य भाजनं सपिधानकम् ।
शङ्खस्यैशानकोणेऽस्मिन् स्थापयेत् साधकोत्तमः ।। ३३ ।।
आचामपात्रयुगलं पूर्ववत्परिनिर्मितम् ।
शङ्खाग्रे स्थापयेद्धीमान् तावत्पलजलान्वितम् ।। ३४ ।।
तयोश्चोत्तरदेशेऽपि पाद्यपात्रं च पूर्ववत् ।
कृत्वाथ स्थापयेद्भूयो दिव्यनीरसमन्वितम् ।। ३५ ।।
अपोशानस्य पात्रं च द्विपलं द्विपलाम्बुकम् ।
पाद्यपात्रोत्तरे तीरे देशिकः स्थापयेत्पुनः ।। ३६ ।।
षोडशैः पलकैर्दिव्यैः घटितं जलपात्रकम् ।
विंशाङ्गुलसमुच्छ्रायं घटाकारं मनोहरम् ।। ३७ ।।
शतसंख्यं पलाम्बोभिः पूर्य्यमाणं यथा भवेत् ।
तादृशं स्नानपात्रं च ह्यापोशानोत्तरे न्यसेत् ।। ३८ ।।
आसनं स्वागतं चैव प्रोञ्छनांशुकमेव च ।
वस्त्रोत्तरीये च तथा यज्ञसूत्रं च भूषणम् ।। ३९ ।।

गन्धपुष्पे च भूपाल ह्येतानि येषु संन्यसेत् ।
तेषां विवरणं ब्रूमः पात्राणां शृणु साम्प्रतम् ।। ४० ।।
पलेनैकेन तत्पात्रं पद्माकारं मनोहरम् ।
मन्ये पद्मसमायुक्तं वेदाङ्गुलिसमुच्छ्रितम् ।। ४१ ।।
षडङ्गुलायतियुतं प्रत्येकं रचयेत्सुधीः ।
त्रिपङ्क्तिकतया चाग्रे तानि पात्राणि विन्यसेत् ।। ४२ ।।
रत्नैर्वा मणिभिर्वापि रजतैश्चन्द्रसम्भवैः ।
असम्भवे वा ताम्रैश्च सर्वपात्राणि कारयेत् ।। ४३ ।।
चतुर्वर्गो भवेत् रत्नात्काञ्चनाद्धनसन्ततिः ।
रजतात् भूमिलाभः स्यादारोग्यं ताम्रतो भवेत् ।। ४४ ।।
यथाशक्तितया भूपा पात्राणि रचयेद्बुधः ।
वित्तशाठ्यं न कुर्वीत कुर्य्याच्चेन्निष्फलं भवेत् ।। ४५ ।।
चतुर्विधानि पात्राणि प्रशस्तान्यच्युतार्च्चने ।
पात्राणां निर्ण्णयश्चोक्तः यः करोति यथाविधि ।। ४६ ।।
तैः पात्रैः पूजयेद्धीमान् दारुब्रह्मनिरञ्जनम् ।
स सर्वान् सकलान् कामान् लब्ध्वा नन्दति भूतले ।। ४७ ।।
उक्तेन येन विधिना तदर्द्धेन च वा चरेत् ।
दारुब्रह्मप्रसादेन शेषे मुक्तो भवेद्ध्रुवम् ।। ४८ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकोनसप्ततितमोऽध्यायः ।।

सप्ततितमोऽध्यायः

ब्रह्मोवाच

क्षकारादीन् मातृकायां त्वकारान्तान् सबिन्दुकान् ।
प्रतिलोमतया जल्पन् वर्ण्णान् शङ्खेऽम्बु पूरयेत् ।। १ ।।

अभावे मूलमन्त्रेण शङ्खेऽपि जलपूरणम् ।
प्रोक्षण्यादिषु पात्रेषु मूलमन्त्रेण वा पुनः ।। २ ।।
बीजेन वा देशिकेन्द्रो जलपूरणमाचरेत् ।
प्रोक्षण्यादिषु सर्वेषु सजलेषु च देशिकः ।। ३ ।।
गन्धं चिह्नकमानेन पातयेच्चन्द्रसंन्निभम् ।
केवलं स्थानपात्रेऽस्मिन् त्रिचिह्नं तच्च पातयेत् ।। ४ ।।
शङ्खोदके गन्धपुष्पे ह्रन्मन्त्रेण च पातयेत् ।
शिखामन्त्रेण तत्रैव दूर्वाक्षतचयं क्षिपेत् ।। ५ ।।
धूम्राक्षात्वर्च्चिचक्रष्या च ज्वालिनी च ततः परम् ।
ज्वालिनी च ततो भूप स्फुलिङ्गान्येव सत्तम ।। ६ ।।
स्वश्रीश्चैव सुरूपा च कपिला च ततः परम् ।
हव्यकव्यकदेहा च ह्येता दशकलाः स्मृताः ।। ७ ।।
एकदैवार्च्चयेद्वापि सकृद्वा पूजयेद् बुधः ।
स्वनामश्चतुर्थ्यन्तं शङ्खपीठेऽपि ताः कलाः ।। ८ ।।
एतादृशकलात्मानं भावयेद्वाह्नमेव च ।
चतुर्थ्यन्तं नमोऽन्तं च समुदायेऽप्ययं मनुः ।। ९ ।।
तपिनी तापिनी चेति धूम्रा चैव मरीचिका ।
ज्वालिनी च रुचिश्चैव सुषुम्ना चैव रोगदा ।। १० ।।
बोधिनी तारिणी चेति क्षमा चैव ततः परम् ।
एतद्द्वादशकं शब्दं कलाशब्दमतः परम् ।। ११ ।।
आत्मशुद्धं च संयोज्य सूर्य्यमण्डलमेव च ।
प्रणवाद्यं चतुर्थ्यन्तं नमोऽन्तं स च देशिकः ।। १२ ।।
उच्चार्य्य पूजयेच्छङ्खे गन्धपुष्पप्रपातनैः ।
अमृता मानदा चैव पूषा च नृपसत्तम ।। १३ ।।

तुष्टिः पुष्टीरतिश्चैव धृतिश्च शङ्खिनी तथा ।
चन्द्रिका च ततः प्रोक्ता कान्तिश्च तदनन्तरम् ।। १४ ।।
ज्योत्स्ना श्रीश्च ततश्चोक्त्वा प्रीतिश्चैवाङ्गदा तथा ।
अमृतासौ ततः पूर्ण्णा कामदाः च ततः परम् ।। १५ ।।
स्वरवा च ततः प्रोक्ता कलाः षोडश विस्मृताः ।
एतच्छोडशकला स्यादात्मेति योजयेत्पदम् ।। १६ ।।
चन्द्रमण्डलमेवं चतुर्थ्यन्तं नमोऽन्तकम् ।
उक्त्वा क्षिपेद्गन्धपुष्पे जले चैव स देशिकः ।। १७ ।।
आधारस्य विशुद्ध्यर्थं तत्रागने परिचिन्तकम् ।
कुर्य्यात् यतस्ततस्तत्र दशाग्नीनर्च्चयेद्बुधः ।। १८ ।।
शम्बूकभेदः शङ्खस्तु तस्य शुद्ध्यर्थमर्च्चकः ।
तस्य सूर्य्यस्वरूपत्वमवश्यं चिन्तयेत्तु यत् ।। १९ ।।
अतस्तत्र च सर्वेषां द्वादशानां महीपते ।
आदित्यानां तदा कुर्य्यात्पूजनं भावनाबलात् ।। २० ।।
चन्द्रस्यामृतरूपत्वादेवं सन्तोषकारणात् ।
षोडशेन्दुं प्रपूज्य वै जलेऽस्मिन् संचरेन्नरः ।। २१ ।।
एवं विधं तदावश्यं शङ्खाधारे च शङ्खके ।
चिन्तयित्वार्च्चयेद्धीमान् रविं संप्रार्थ्य चानयेत् ।। २२ ।।
आनीय शङ्खपानीये पूरयेच्चिन्तनावशात् ।
ततः सुहृदयाम्भोजाद्विष्णुमानीय चेतसा ।। २३ ।।
शङ्खोपरि स्फुरद्रूपं वासयेद्देशिकोत्तमः ।
कनिष्ठाङ्गुष्ठसंयोगे मुखे चान्योऽन्यहस्तयोः ।। २४ ।।
इतराभिश्चाङ्गुलिभिर्य्योजयेदृजुधर्मतः ।
यस्यात्मा गालिनी मुद्रा शङ्खस्योपरि चालिता ।। २५ ।।

शिखामन्त्रेण तां मन्त्री दर्शयेत्सावधानतः ।
शिरोमन्त्रेण शङ्खस्य मुद्रां चैव प्रदर्शयेत् ।। २६ ।।
तन्मूलं नेत्रमन्त्रेण पश्येत्स देशिकोत्तम ।
शङ्खभ्रमणमाकुर्य्यात्तर्ज्जनीद्वयतो मुहुः ।। २७ ।।
अवगुण्ठनमुद्रा सा कर्त्तव्या कवचेन तु ।
मूलमन्त्रस्य य पुनर्यत्षडङ्गं च वर्तते ।। २८ ।।
तद्वै शङ्खे चैव कुर्य्यान्न्यासपूजादि तत्त्ववित् ।
नमः सुदर्शनायेति अस्त्रायेति ततो वदेत् ।। २९ ।।
फडित्यनेन मन्त्रेण बुधस्तालत्रयं चरेत् ।
शङ्खस्य परितः कुर्य्याद्दिग्बन्धनमनेन च ।। ३० ।।
मुद्रयित्वा कनिष्ठादित्रयं स देशिको यदा ।
तर्जन्यङ्गुष्ठयोर्योगादाचरेच्छब्दमुत्कटम् ।। ३१ ।।
दिशोबन्धनमुद्रेयं रक्षोभूतादिभीतिदा ।
पूर्वादिदिक्षु शङ्खस्यानया दिग्बन्धनं चरेत् ।। ३२ ।।
तर्जनीभ्यां च मध्ये द्वेऽनामिकाभ्यां कनिष्ठिके ।
अन्योऽन्यहस्तयोः कुर्य्याद्धेनुमुद्रा स्मृता बुधैः ।। ३३ ।।
कामधेनोः स्तन इति सञ्चिन्त्य मनसा द्विजः ।
अधोमुखतया तां तु धेनुमुद्रां प्रदर्शयेत् ।। ३४ ।।
तद्द्वारामृतवर्षाणि पूजाद्रव्याणि तानि च ।
उपस्थितानि चिन्त्यानि चेतसा पूजकोत्तमैः ।। ३५ ।।
वायूबीजं समुच्चार्य्य त्रिवारं देशिकस्ततः ।
स्पृष्ट्वा हस्ततले चैव जलं दोषं च शोषयेत् ।। ३६ ।।
अग्निबीजं विचिन्त्याथ पञ्चवारं ततो द्विजः ।
तज्जलोद्गतदोषांश्च दहेत्पूजार्थतत्त्ववित् ।। ३७ ।।

ततो वरुणबीजेन सप्तवारं स देशिकः ।
चन्द्रमण्डलतः प्राप्तामृतेन प्लावयेच्च तत् ।। ३८ ।।
पुनर्गन्धादिकं तत्र पातयित्वा जपेत्पुनः ।
मूलमन्त्रं देशिकेन्द्रो ह्यष्टवारं जलं स्पृशेत् ।। ३९ ।।
हस्ताभ्यामञ्जलिं कृत्वा धृत्वा पुष्पादिकं पुनः ।
अर्घ्यपात्रं प्रार्थयेत्तद्देशिकः कर्मकारकः ।। ४० ।।
योऽयं श्रीपुरुषोत्तमस्य सततं हस्ताम्बुजे राजते
जातश्च त्रिदशैः श्रिया सह कथा चन्द्रेण सार्द्धं पुरा ।
कल्पन्तु प्रमुखैश्च तैर्जलनिधिर्यन्नादतो राक्षसा
स्त्रस्यन्ति प्रमुखं भजन्ति सुजनास्तं पाञ्चजन्यं भजे ।। ४१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शङ्खनिर्णयोनाम सप्तंतितमोऽध्यायः ।।

एकसप्ततितमोऽध्यायः

ब्रह्मोवाच

इति संप्रार्थ्य विप्रोऽसौ किंचिदानीय तज्जलात् ।
तेनैवार्घ्यजलेनाशु तुलस्याश्च प्रसर्वतः ।। १ ।।
देवतां च तथात्मानं सेचयेदर्च्चकोत्तमः ।
पूजोपकरणं सर्वं नैवेद्यं चैव सेचयेत् ।। २ ।।
प्रोक्षणीपात्रसंस्कारं कुर्य्याच्च तदनन्तरम् ।
प्रथमादर्घ्यपात्रस्थाज्जालात्किञ्चित्समानयेत् ।। ३ ।।
प्रोक्षणीभाजने तत्तु पातयेच्छुद्धिहेतवे ।
प्रोक्षण्यां वीक्षणं कुर्य्यात्ताडनं त्ववगुण्ठनम् ।। ४ ।।
तालत्रयं तदा कुर्य्याद्दिशां बन्धनमेव च ।
धेनुमुद्रां प्रदर्श्याथ महामुद्रां प्रदर्शयेत् ।। ५ ।।

अनामिकाङ्गुष्ठयुगस्य योगात्
प्रमृज्य नेत्रे स च देशिकेन्द्रः ।
नेत्रस्य मन्त्रेण विलोकयेच्च
तत्प्रोक्षणीपात्रगतं जलं च ।। ६ ।।
कनिष्ठानामिकेङ्गुष्ठातलेनाकुञ्च्य मूलके ।
तर्ज्जनीमध्यमाभ्यां च प्रोद्गताभ्यां स देशिकः ।। ७ ।।
तुलसीदलतस्तत्र प्रोक्षयेदत्र मन्त्रतः ।
अधोवक्त्रतया भूयस्त्वनया मुद्रया कुशैः ।। ८ ।।
पुष्पैर्वा ताडयेत्तिस्त्रः प्रणवोच्चारणादपि ।
हस्ते मुष्टिद्वयं कृत्वा तर्ज्जनीयुगलं विना ।। ९ ।।
अधोमुखेन तेनाशु भ्रमणाच्च पृथक् पृथक् ।
कवचाख्येन मन्त्रेण ह्यवगुण्ठनमाचरेत् ।। १० ।।
सुदर्शनस्य मन्त्रेण तालत्रयमथाचरेत् ।
दिग्बन्धनं ततो मन्त्री पूर्ववद्विधिना क्रमात् ।। ११ ।।
धेनुमुद्रां महामुद्रां दर्शयेद्बीजतस्तदा ।
मूलमन्त्रं समुच्चार्य्य जपेच्च वसुवारतः ।। १२ ।।
द्रव्यशुद्धिकरश्चायं विधिः सर्वत्र शोधनः ।
अनेन विधिना राजन् सर्वद्रव्याणि शोधयेत् ।। १३ ।।
विधिहीनं यदा कर्म सर्वं द्रव्यादिकं च यत् ।
असंस्कृतमिदं विष्णोरयोग्यं जायते ध्रुवम् ।। १४ ।।
तत्सर्वं राक्षसैर्ग्राह्यं ततो यत्नाद्विधिं चरेत् ।
प्रोक्षणीं च समारभ्य स्नानपात्रान्तमर्च्चकः ।। १५ ।।
एवं च संस्कृतं कुर्य्यात्सर्वेषां च पृथक् पृथक् ।
संस्कारान्ते पुनः सूक्ष्मं शुद्धं निर्मलमम्बरम् ।। १६ ।।

तेषु पात्रेषु सर्वेषु च्छादयदति भक्तितः ।
अतः पूजां प्रकुर्वीत पूजा मानसिकीं यथा ।। १७ ।।
कुर्य्यान्मन्त्री तत्कथये श्रूयतां द्विजसत्तमः ।
सहस्रदलसंपन्ने कमले विमलेऽर्च्चकः ।। १८ ।।
गुरुन् संपूज्य चाधारे चतुष्पत्रे गणेश्वरम् ।
आधारशक्तिप्रमुखैस्तन्मन्त्रैर्मन्त्रकोविदः ।। १९ ।।
स्वशरीरे जलैर्गन्धैरक्षतैः पुष्पकैस्तथा ।
धूपदीपप्रदानेन मनसा पूजयेत्ततः ।। २० ।।
मूलाधारं च हृदयं भ्रूमध्यं च स देशिकः ।
एतद्व्याप्य स्थितं जीवं कामबीजेन तावता ।। २१ ।।
तेजसा मन्त्ररूपेण ह्येकीभूतं विचिन्तयेत् ।
तत्तेजस्तु षडङ्गेन त्वङ्गैः सावयवं पुनः ।। २२ ।।
कृत्वा ततो विभूत्यादिन्यासमारभ्य देशिकः ।
अङ्गन्यासान्त कुर्य्यात्स्वशरीरे मा क्रमान्न्यसेत् ।। २३ ।।
संन्यस्य विधिवद्भूयः प्रत्येकं चासनादिका ।
पूजां कुर्य्यात्ततो मन्त्री नीरगन्धाक्षतादिभिः ।। २४ ।।
मनसाथ मुखे वेणुं गले वन्यस्रजं तथा ।
श्रीवत्सं वक्षसि प्रीत्या कौस्तुभं हृदि दापयेत् ।। २५ ।।
अन्यैश्च भूषणैर्दिव्यैरलङ्कुर्य्यात्स्वचेतसा ।
तिलकं कारयेद्धीमान् चन्दनैश्च सुसंस्कृतैः ।। २६ ।।
चतुरङ्गुलमानेन तिलकं शोभनाकृतिः ।
मध्ये च्छिद्रं विधातव्यं हरिपादाकृतिकृतम् ।। २७ ।।
ललाटे तादृशं कुर्य्यात्तिलकं सुमनोहरम् ।
तन्मध्ये स्थापयेन्मत्री केशवं क्लेशनाशनम् ।। २८ ।।

वामेऽस्य संस्मरेन्मत्री मां च दक्षे सदाशिवम् ।
अथ त्र्यङ्गुलकं कुर्य्यादङ्गुलं वाचयेत्पुनः ।। २९ ।।
हृदये कमलाकारं तन्मध्ये माधवं स्मरेत् ।
वेणुपत्राकृतिं कुर्य्याद्बाह्व्योश्च तिलकं स्मृतम् ।। ३० ।।
जीवत्पितृक एवापि ह्यधोमुखतया भुजे ।
कुर्य्यान्मृतपितृकश्च तिलकं चोर्ध्ववक्त्रकम् ।। ३१ ।।
दक्षिणे चिन्तयेन्मत्री बाहौ च मधुसूदनम् ।
वामे च श्रीधरं स्मृत्वा तावत्सप्तपदे पुनः ।। ३२ ।।
दीपस्य कलिकाकारं चरेत्तिलकमुत्तमम् ।
कण्ठस्थले वर्त्तुलं तत्तिलकं सुमनोहरम् ।। ३३ ।।
गोविन्दं कण्ठदेशेऽपि नारायणमथोदरे ।
विष्णुं च दक्षपार्श्वेऽपि स्मृत्वा दक्षगलस्थले ।। ३४ ।।
त्रिविक्रमं ततो वामे पार्श्वे च वामनं स्मरेत् ।
हृषीकेशं वामगले पद्मनाभं च पृष्ठके ।। ३५ ।।
दामोदरं ककुद्यां च शिखायां च ततो वदेत् ।
द्वादशार्णं मनुं तत्र संन्यसेत्मन्त्री सत्तमः ।। ३६ ।।
एवं यस्तिलकं कुर्य्याद्वासुदेवः स्वयं भवेत् ।
अनेन तिलकेनैव विना पूजां करोति यः ।। ३७ ।।
सा पूजा निष्फला ज्ञेया न प्रीतोर्विष्णुरव्ययः ।
तिलकान्ते ततो मन्त्री शिरोदेशे हृदम्बुजे ।। ३८ ।।
आधारे चरणे तावत्सर्वाङ्गे द्विजसत्तमाः ।
पञ्चपुष्पाञ्जलिंदद्याद्देवात्मैक्या दिवं चरेत् ।। ३९ ।।
मूलमन्त्रं समुच्चार्य्य श्वेतवक्त्राम्बुजाञ्जलिम् ।
निजोत्तमाङ्गे विप्रेन्द्रो दद्यादैक्याविचिन्तया ।। ४० ।।

पुनस्तेनैव मन्त्रेण हृदये शुक्ललोहिताम् ।
करवीराञ्जलिं दद्याद्देशिकः पारमार्थिकः ।। ४१ ।।
सप्तलाकुन्दपुष्पाणामञ्जल्याधारमर्च्चयेत् ।
मूलेन मनुना प्राज्ञः श्वेतरक्तप्रसूनतः ।। ४२ ।।
यूथिकारक्तकुन्दालिनीलोत्पले कृताञ्जलिम् ।
स्वपादयुगले मन्त्री मूलेन परिपातयेत् ।। ४३ ।।
तुलसीमालतीजातीकुन्दचम्पकपङ्कजैः ।
पुष्पाञ्जल्यार्च्चयेद्धीमान् सर्वाङ्गं मूलमन्त्रतः ।। ४४ ।।
श्वेतचन्दनपुष्पाभ्यां दक्षभागे तथैव च ।
रक्तचन्दनपुष्पाभ्यां वामभागेऽच्चर्येद्बुधः ।। ४५ ।।
असम्भवे प्रसूनानामुक्तानां द्विजसत्तमाः ।
अन्यैरेव प्रकर्त्तव्या पञ्चपुष्पाञ्जलिर्ध्रुवम् ।। ४६ ।।
पुष्पाञ्जलिं विना विप्रा ऐक्यभावो न जायते ।
भेदे जाते तु सा पूजा विफला स्यान्नसंशयः ।। ४७ ।।
ततो मन्त्री धूपदीपौ समर्प्य मूलमन्त्रतः ।
अर्च्चयेद्भक्तिभावेन विकृतिरहितो पुनः ।। ४८ ।।
चेतसाऽथ ललाटेन्दुमण्डलामृतधारया ।
सन्तोष्य विष्णुं सहसा नमस्कृत्य पुनः पुनः ।। ४९ ।।
प्रीणयेज्जगदानन्दं तदा स देशिकोत्तमः ।
गण्डूषांश्च ततो दन्तधावनाचमने तथा ।। ५० ।।
हस्तानुलेपनं कृत्वा मुखवासमतः परम् ।
माल्यभूषणगन्धाश्च पुष्पधूपदीपान् तथा ।। ५१ ।।
नैवेद्यं च समर्प्याथ ताम्बूलं दापयेत्ततः ।
गीतनृत्यसुवाद्यैश्च सन्तोष्य कमलापतिम् ।। ५२ ।।

जाग्रद्दशायां सुप्तायां सुषुप्त्यां वा महर्षयः ।
मनसा वचसा तावत्कर्मणापकृतं च यत् ।। ५३ ।।
हस्ताभ्यां चरणाभ्यां च कुक्ष्या शिश्नेन्द्रियाय च ।
यच्छ्रुतं च यदुक्तं च यत्कृतं सततं मया ।। ५४ ।।
तत्सर्वं साम्प्रतं ब्रह्मार्पणमस्त्वीत्थमावदेत् ।
आत्मानं सकलं भूयो मदीयं हरये सदा ।। ५५ ।।
समर्पयामीति वदेद्भक्त्या पूजकसत्तमः ।
ॐ तत्सवित्येवमुक्त्वासौ ब्रूयात्कृष्णार्पणं पुनः ।। ५६ ।।
इत्येवमात्मनः कुर्य्यात्समर्पणमनामयम् ।
पूर्ववत्प्रचरेन्मन्त्री प्राणायामं शुभोदयम् ।। ५७ ।।
ऋष्यादिकं षडङ्गं च कृत्वा ध्यायेत् सुरेश्वरम् ।
जगदानन्दकन्दं तु सर्वभूतात्महेतुकम् ।। ५८ ।।
सुप्रसन्नवदनं मनोरमं नूतनाम्बुदचयोपमं विभुम् ।
चारुपङ्कजनिभेक्षणं लसद्भूषणं विगतदूषणं हरिम् ।। ५९ ।।
पीतचेलरुचिरं हृदम्बुजे लग्नदक्षकरपङ्कजं पुनः ।
चारुवेणुधृतिसत्वहस्तकं नन्दनन्दनमहं स्मरामि तम् ।। ६० ।।
पूरकं कुम्भकं तावद्रेचकं मूलमन्त्रतः ।
अथवा कामबीजेन कलावारैश्च विद्यया ।। ६१ ।।
दन्तैश्च मात्रागणनं क्रमेण रेचयेत्तदा ।
अतः परं जपं कुर्य्यात्तद्विधिः कथ्यतेऽधुना ।। ६२ ।।
नासाग्रे दृष्टिमायोज्य मनः स्थिरतरं चरन् ।
मन्त्रार्थं देवतां चैव ध्यायन्नेव मुहुर्मुहुः ।। ६३ ।।
मनोमध्ये स्थितो मन्त्रो मन्त्रमध्ये स्थितं मनः ।
मनोमन्त्रसमायोगे जपसिद्धिश्च जायते ।। ६४ ।।

अनामिकामध्यमूले कनिष्ठायास्त्रिपर्वसु ।
पुनश्चानामिकाग्रे च मध्यग्रे च ततः परम् ।। ६५ ।।
तर्ज्जनीपर्वत्रितयेऽङ्गुष्ठाग्रं प्रसारयेत् ।
एवं च दशवारेण शतमष्टोत्तरं जपेत् ।। ६६ ।।
करमालाप्यसौ विप्राः सर्वसिद्धिप्रदायिनी ।
अनया मालया यज्ञसूत्राङ्गुष्ठकलग्नया ।। ६७ ।।
शुद्धांशुकाच्छादया च कामबीजं जपेत्सुधीः ।
पुटितं प्रणवेनैव जपेदष्टोत्तरं शतम् ।। ६८ ।।
त्रैलोक्यमोहनायेति विद्महे च ततः परम् ।
कृष्णाय धीमहीत्येवं तन्नो विष्णुः प्रचोदयात् ।। ६९ ।।
इत्येषा विष्णुगायत्री भुक्तिमुक्तिफलप्रदाम् ।
गोपनीया सदा लोके मुनिभिर्गदिताऽधुना ।। ७० ।।
अष्टोत्तरशतं कुर्य्याज्जपमस्यां प्रयत्नतः ।
ततो मूलमनुं प्राज्ञः सहस्रं वा तदर्द्धकम् ।। ७१ ।।
त्रिशतं वा जपेन्नूनं देवसन्तोषहेतवे ।
एतज्जपं यदाकर्तुं न शक्नुयात्स देशिकः ।। ७२ ।।
चतुः पञ्चाशतो विष्णोर्गायत्रीं प्रजपेन्मनुम् ।
कामबीजाग्रकं तावत्तच्चत्रयकसंख्यया ।। ७३ ।।
अधिष्ठात्री यतो दुर्गा मन्त्रमस्या द्विजर्षभाः ।
प्रदर्श्य योनिमुद्रां तु हृदि लग्नां विधाय च ।। ७४ ।।
प्रणवेनैव मन्त्रं तु संपुटीकृत्य देशिकः ।
निरुद्धपवनस्तावदष्टवारं प्रयत्नतः ।। ७५ ।।
प्रजपेत्परया भक्त्या मन्त्रशुद्धिस्ततो भवेत् ।
अन्यथा न भवेच्छुद्धो मन्त्रो वै भूमिनिर्जराः ।। ७६ ।।

इदानीं योनिमुद्राया लक्षणं कथयामि वः ।
अवधारय तच्छीघ्रं यया मन्त्रो विशुध्यति ।। ७७ ।।
हस्तयोस्तर्जनीयुग्मे संबध्वाऽनामिकायुगम् ।
तन्मध्ये मध्यमायुग्मं लग्नं कृत्वा समुद्गतम् ।। ७८ ।।
तस्योपरि कनिष्ठाया युगले साधुलग्नके ।
तत्कनिष्ठाद्वये पर्वत्रितये योजयेत्पुनः ।। ७९ ।।
अङ्गुष्ठयुगलाग्रं तु योनिमुद्रा ततो भवेत् ।
सर्वसिद्धिकरी ख्याता खेचरीत्युच्यते बुधैः ।। ८० ।।
न दर्शयेज्जपान्ते यो जपान्तेऽपि महासुधीः ।
तज्जपो निष्फलो ज्ञेयो देवता प्रीणयेन्न च ।। ८१ ।।
ऋष्यादिना विना कुर्य्यात् प्राणायामं च बीजतः ।
पूरकादिक्रमेणैव कुर्य्यादेवं स देशिकः ।। ८२ ।।
कल्पनाया दन्तसंख्यामात्राभिर्गणनं चरेत् ।
दक्षहस्तं प्रसार्य्याथ तर्ज्जनीमूलके पुनः ।। ८३ ।।
लग्नकाङ्गुलमायोज्य विचिन्त्य च कनिष्ठकम् ।
तत्रैव जलमाधाय तुलसीदलमिश्रितम् ।। ८४ ।।
मनसि चिन्तयेद्देवं देशिको मन्त्रवित्सुधीः ।
ध्यात्वा समर्पयद्देवं शास्त्रमुद्रेयमर्पणे ।। ८५ ।।
गुह्यातिगुह्यगोप्या त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवत्वत्प्रसादान्सुरेश्वर ।। ८६ ।।
इत्युक्त्वाथ मनुं भूयस्तारपूर्वं च देशिकः ।
भक्त्या समर्पयेदग्रे देवतायाश्च तज्जलम् ।। ८७ ।।

सूत उवाच

एवं समर्पयेद्भक्त्या देवं तज्जपसिद्धये ।
जपस्य फलमाप्नोति देवता चातितोषभाक् ।। ८८ ।।

एवं यः कुरुते समर्पणमिदं सर्वेश्वरस्याग्रतः
सर्वस्यापि मनोर्भवेदचिरतः सिद्धिः परा शाश्वती ।
भूयो वः कथयामि भूसुरवरास्तत्पुष्पपात्रादिकं
श्रीमल्लक्षणमुत्तमं च कलयेत् प्रीत्या च मे जल्पतः ।। ८९ ।।

इति नीलाद्रिमहोदये श्रीसूतसंहितायाम् एकसप्ततितमोऽध्यायः ।।

द्विसप्ततितमोऽध्यायः

ब्रह्मोवाच

कलापलसमुत्पन्नं वर्त्तुलं त्वङ्गुलोच्चकम् ।
षोडशाङ्गुलदैर्घ्येण समन्तात्परिशोभितम् ।। १ ।।
अदृश्यं पुष्पपात्रं तत्तुलस्युत्करपूजितम् ।
तत्पात्रं संस्कृतं कुर्य्याद्वीक्षणादिविधानतः ।। २ ।।
प्रोक्षणीजलसंसिक्तं कोमलं तुलसीदलम् ।
ज्ञानमुद्राधृतं तत्तु दत्वा स देवताहृदि ।। ३ ।।
मूलमन्त्रं कामबीजपुटितं त्वष्टधा जपेत् ।
अनेन देवतायाः स्यात्साम्मुख्यं जायते तदा ।। ४ ।।
एवंविधं न कुर्य्याच्चेदालस्याज्ञानसंयुतः ।।
तदा प्रीतो न हि भवेद्देवपूजा च निष्फला ।। ५ ।।
अतोऽपि देशिकः श्रीमान् विधिमेवं समाचरेत् ।
दारुब्रह्म नमस्तेऽस्तु नमस्ते भक्तवत्सल ।। ६ ।।
नमः कृष्णाय शान्ताय जगन्नाथाय ते नमः ।
तवानुग्रहतश्चान्तर्यजनं च कृतं मया ।। ७ ।।
बाह्यपूजां तथा कृत्वा साम्प्रतं तव पूजनम् ।
करोमि च यथाज्ञानं ह्यपराधान् क्षमस्व मे ।। ८ ।।

इत्याज्ञाप्य सुरेशं तं पूजयेद्भक्तवत्सलम् ।
संप्रार्थ्य देवदेवं तं देशिकः शुद्धमानसः ।। ९ ।।
ततो विष्णोः पदाम्भोजतले पीठं मनोरमम् ।
वायुकोणं समारभ्य चतुरस्रं च कल्पयेत् ।। १० ।।
तुलसीदलसंसक्तचन्दनैर्लेखयेत्पुनः ।
तत्र पदकणिकाढ्यं वसुपत्रं सकेशरम् ।। ११ ।।
गुणत्रितयवृन्ताढ्यं भूपरद्वयमध्यगम् ।
चतुरस्रं चतुर्द्वारं पद्मपात्रं च कारयेत् ।। १२ ।।
वामकरे गृहीत्वा तु तुलसीदलसंचयम् ।
वायुकोणादिके स्थाने हरिणीमुद्रया पुनः ।। १३ ।।
दक्षे वामात्समानीय तुलसीदलमाक्षिपेत् ।
गुरुभ्यो नम इत्युक्त्वा परमेभ्यस्ततःपरम् ।। १४ ।।
परात्परगुरुभ्यश्च जलगन्धाक्षतानि च ।
पुष्पं च धूपदीपौ सतुलस्येतान् समर्च्चयेत् ।। १५ ।।
पीठस्य दक्षिणे भागे दुर्गां लक्ष्मीं गणेश्वरम् ।
तुलस्या चैव तत्सर्वं तेभ्यो दद्यात्स देशिकः ।। १६ ।।
पीठस्याधस्तले तावदुपर्य्युपरि चिन्तयेत् ।
आधारशक्तिं प्रथमं प्रकृतिं च ततः परम् ।। १७ ।।
कूर्मं त्वनन्तं धरणीं ततः क्षीरपयोनिधिम् ।
तत्र श्वेतकनामानं दीपं तत्र महोदये ।। १८ ।।
सुरत्नमण्डपं तस्मिन् कल्पद्रुमवरोऽस्ति सः ।
क्रमादाधारशक्त्यादीन् प्रणवाद्यान्नमोऽन्तकान् ।। १९ ।।
जलगन्धाक्षतादीनि पुष्पं धूपं च दीपकम् ।
मनसा पूजयेन्मन्त्री तुलसीदलपातनैः ।। २० ।।

आग्नेयादिककोणेषु धर्मं ज्ञानं ततः परम् ।
वैराग्यं च तथैश्वर्य्यं पूजयेत् पूर्ववत्सुधीः ।। २१ ।।
पूर्वादिषु चतुर्दिक्षु ह्याधर्मज्ञानके तथा ।
अवैराग्यमनैश्वर्य्यं पूर्ववत्पूजयेच्च तान् ।। २२ ।।
अनन्तं च तथानन्दकन्दं चैव ततः परम् ।
संविन्नालं च पद्मं च प्रकृतिं च विशेषतः ।। २३ ।।
विकारमयशब्दाख्यान् केशरांश्च ततः परम् ।
पञ्चाशद्बीजवर्ण्णाढ्यां कर्ण्णिकां च ततः परम् ।। २४ ।।
आदित्यमण्डलं चैव सोममण्डलमेव च ।
अग्निमण्डलमेवं तु सं सत्वं च ततः परम् ।। २५ ।।
रं रजश्च ततो धीमान् तं तमश्चैव देशिकः ।
ॐ चात्मानकमेवं च त्वं चाप्यन्तरमात्मकम् ।। २६ ।।
पञ्चपरमात्मानं च ॐ ह्रीं ज्ञानात्मकं तथा
नमोऽन्ताश्च चतुर्थ्यन्तान् पूर्ववत्पूजयेच्च तान् ।। २७ ।।
पीठमध्ये ततो धीमान् पूर्वाद्यष्टसु दिक्षु च ।
वक्ष्यमाणक्रमेणैव पूजयेच्छक्तयश्च ताः ।। २८ ।।
विमलोत्कर्षिणी ज्ञाना क्रिया चैव ततः परम् ।
योगप्रह्वी च सत्या च सैशानाऽनुग्रहात्पुनः ।। २९ ।।
पीठमध्यस्थिता नित्यं नानाभूषणभूषिता ।
नमः शब्दं पुरःकृत्वा भगवच्छब्दकं ततः ।। ३० ।।
वासुदेवं ततः सर्वमात्मसंयोगमेव च ।
ततो योगं पद्मपीठं चात्मशब्दं ततः परम् ।। ३१ ।।
नमः शब्दं तदन्ते च संन्यस्य क्रमतः सुधीः ।
चतुर्थ्यन्तं नमोऽन्तं च शब्दवृन्दं विधाय च ।। ३२ ।।

तुलसीदलतस्तावत्पूर्ववत्पूजयेच्च तान् ।
ध्यायेत्तं जगदानन्दं कृष्णं त्रैलोक्यभूषणम् ।। ३३ ।।

सूत उवाच

पीठमध्यगतानां तु देवतानां पृथक् पृथक् ।
ध्यानं शृणुत भो विप्राभ्यासेन भाषितं तु यत् ।। ३४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये द्विसप्ततितमोऽध्यायः ।।

त्रिसप्ततितमोऽध्यायः

ब्रह्मोवाच

इन्द्रद्युम्नमहीपालं प्रत्युक्तं विधिना पुरा ।
व्यासाय नारदेनोक्तं सुगोप्यं विष्णुवल्लभम् ।। १ ।।
व्यासस्तु भगवान् प्रेम्णा मामिदं प्रत्यभाषतः ।
सावधानतया भूयः श्रूयन्तां तत्तपोधनाः ।। २ ।।
पीठस्यानिलकोणके स्थिरतरां देदीप्यमानप्रभान्
विष्णोर्ध्यानपरायणान् सुवसनान् सज्ञानदानोत्सुकान् ।
भालोद्यद्धरिमन्दिरान् सुतुलसीमालाकृताडम्बरान्
वन्दे तांश्च गुरुन् परान् परतरान् यज्ञोपवीतोज्ज्वलान् ।। ३ ।।
पीठस्य तस्यान्तिकदेशसंस्थां
दुर्गां महापत्तिहरां सुहासाम् ।
शङ्खारिवाच्छाभयचारुहस्तां
शान्तां भजे भूषणचारुकान्ताम् ।। ४ ।।

अस्यां दिशि श्रीहरिभामिनीं तां
कान्तां समस्ताभरणोज्ज्वलाङ्गाम् ।
वराभयाब्जद्वयहस्तपद्मां
पद्मां स्मरेद्विष्णुसमर्च्चनोत्काम् ।। ५ ।।
पाशाङ्कुशाभयवरस्फुरदब्जहस्तं
सवद्रुमाभामिभक्तपरं सुभूषम् ।
खर्वाङ्गमिन्दुशिरसं निजसेवकानां
कामप्रदं मुरभिदर्च्चनविघ्ननाशम् ।। ६ ।।
आधारशक्तिं द्विभुजां सुलोचनां
पद्मद्वयं संदधतीं सुभूषाम् ।
सुवर्ण्णवर्ण्णां जगदेकधारिणीं
ध्यायेज्जगन्मातरमिन्दुवक्त्राम् ।। ७ ।।
तदूर्ध्वदेशे प्रकृतिं मुनीनां पद्माभयोल्लासिकरद्वयान्ताम् ।
समस्तभूषापरिभूष्यमानां ध्यायेज्जगद्व्याप्य विराजते या ।। ८ ।।
पूर्ण्णेन्दुशुभ्रं शरदब्जनेत्रं स्मेराननं चारुकिरीटदुष्टम् ।
गदारिशङ्खाब्जधरं सुभूषं वन्दे च तं यत्कटितश्च कूर्मः ।। ९ ।।
तदूर्ध्वभागे सुरवर्य्यमीडे
सहस्रभोगाङ्कितमूर्ध्वदेशम् ।
अनन्तमिन्दुप्रभवामि भूषं
गदाब्जशङ्खारिकरं कृपालुम् ।। १० ।।
दूर्वादलश्यामलकोमलाङ्गीं
तदूर्ध्वके साधुरसप्रशंस्याम् ।
सज्ञानमुद्राब्जधरां धरां तां
भजेज्जगज्जालसुखैकहेतुम् ।। ११ ।।

ऊर्ध्वं च तस्याः परमं पवित्रं
क्षीराम्बुधिं नौमि विशालसंस्थम् ।
कल्लोलजालोत्तमचीरनुत्यं
लक्ष्मीन्दुरत्नादिकजन्महेतुम् ।। १२ ।।
तत्र क्षीराम्बुधौ नित्यं दिव्यं मणिगणाञ्चितम् ।
मन्दानीलसुखोल्लासं श्वेतदीपं च चिन्तयेत् ।। १३ ।।
चतुरस्रं चतुर्द्वारं चतुर्वर्गफलप्रदम् ।
नानारत्नसमुल्लासिस्वर्ण्णजालसुभूषितम् ।। १४ ।।
शोभोपशोभासंसक्तं हेमशेखरमण्डितम् ।
दिव्यसौरभसंनद्धमन्दमारुतसेवितम् ।। १५ ।।
तन्मध्ये नौमि तं रत्नमण्डपोत्तममीदृशम् ।
तन्मध्ये सुमहानास्ते कल्पवृक्षस्त्वघक्षयः ।। १६ ।।
नानावाच्छाभरप्रीतप्रदोऽयं भाव्यते मया ।
तन्मूले मञ्जुले दिव्यां त्रिवृत्ताढ्यां त्रिभिर्गुणैः ।। १७ ।।
कर्ण्णिकाकेशरानद्धं वसुपत्रं पवित्रितम् ।
भूपूरद्वयतो रम्यं भावये योगपीठकम् ।। १८ ।।
तत्पीठानलकोणके वृषतनुं धर्म्मं सदा चिन्तये
पूर्णेन्दुप्रतिमं चतुःश्रुतिप्रदं सद्भावनाशृङ्गकम् ।
आचारोत्तमपृच्छकं हरिकथाहारं महासुन्दरं
नानासच्चरिताऽखिलावयवकं मुक्त्वैकधेनूच्चकम् ।। १९ ।।
पीठस्यास्य च नैर्ऋते स्थिरतरं ज्ञानं तु संहावृति-
श्रीमच्छारदपार्वणैकरुचिरं मिथ्येभसंदारकम् ।
धीरान्तः करुणार्द्रकन्दरगतं दम्भादिसंभर्त्सको
पुच्छं सच्चरितावलीगिरिसुतादाहं सदाहं स्मरे ।। २० ।।

तत्पीठानिलदेशके स्थिरतरं हंसस्वरूपं मह-
द्वैराग्यं हरिभावनाविधिरहं ज्ञानामृताप्लावनम् ।
संसारोद्गतचेष्टिताय जनतां देहं सदाचारता-
म्भोजाली विषभोजनं सुजनता हंस्युत्कमीडे भृशम् ।। २१ ।।
पीठस्येकदिशि स्थितं गजवपुः श्रीकं सुधावर्णकं
पापध्वं सनतापदं सदयताहस्तं च मद्दन्तकम् ।
सत्योल्लासनगाबलान्विततरं सत्पात्रदानीरस-
यद्देशाब्धितमाशु नौमि तदहं चैश्वर्य्यमार्य्यप्रियम् ।। २२ ।।
चत्वार एते वृषकादयस्ते
पीठस्य तस्यैव च पादभूपः ।
विराजमानः स च पीठवर्य्य-
स्तत्पृष्ठ देशोपरि धर्म्मशीलाः ।। २३ ।।
कृष्णवर्णोऽप्यधर्मस्तु पुरुषाकृतिरेव च ।
गदाभयकरस्तावत्पीठपूर्वं स्थलं वहन् ।। २४ ।।
अज्ञातनामा पुरुषो मुषलाभयहस्तकः ।
पीठोद्धारसमायुक्तो दक्षिणाशाधरोऽरुणः ।। २५ ।।
अवैराग्याह्वयः स्रग्वी पीठखड्गो वरायुधः ।
पुमांश्च पश्चिमाशायां तत्पीठोद्धरणोद्यतः ।। २६ ।।
अनैश्वर्य्यकनामासौ नीलाभः शूलचापधृक् ।
उत्तराशास्थितो भीमोऽवनी तत्पीठभृत्सदा ।। २७ ।।
आनन्दकन्दाख्यतयार्जुनश्रीः
स्मेराननो निश्चलसंस्थितोऽयम् ।
ऋज्वाङ्गकः कोऽपि पुमान्समास्ते
तत्पीठमूलालुतचारुपीतः ।। २८ ।।

संविन्नालनामा तदूर्ध्वप्रदेशे
वृषाङ्गः पुमान् वै महासत्त्वयुक्तः ।
महापीठमूलोत्तमाङ्गं प्रशंस्यो
विभाति प्ररोमावलिकण्टकश्रीः ।। २९ ।।
उद्यद्भानुसमप्रभाविनियुतं यत्पीठपद्मायितं
नानाशर्मसुखप्रदं त्रिजगतां विख्यातकीर्त्तिं च तम् ।
पद्माक्षं निधिमन्त्रनीलशिखरी श्रीमन्महाकन्दरा
संराजद्युतिदेवसिंहयजनप्रीतिप्रदं भावये ।। ३० ।।
यन्त्रपद्मे महोल्लासे पत्रभूताः स्फुरद्युतिः ।
अभयावरहस्ताढ्यां भास्वत्प्रकृतयः सदा ।। ३१ ।।
विकाराः पुण्यसारास्ते चक्राभयकरा वराः ।
यत्र केशरतां प्राप्तास्तद्विष्णोः पार्श्वदाश्च ये ।। ३२ ।।
अकारादिवर्णाः सुवर्णावतंसाः
क्षकारासनास्ताः सुवर्णाः सुकर्णाः ।
पुमांऽसोपि यत्राम्बुजे बीजरूपाऽस्तै-
र्भासमानां भजे कर्णिकान्ताम् ।। ३३ ।।
आबीजयुक्तं च रक्ताङ्गमुग्रं
तापिन्यादिषड्युग्मसंख्योत्कलाढ्यम् ।
वराम्भोजहस्तं सदादित्यदेवा
स्फुरन्मण्डलं पत्रपद्मे भजेऽहम् ।। ३४ ।।
तमिति स्वबीजाड्यमीड्यं च सोम
स्फुरन्मण्डलं चामृताद्युत्कलाढ्यम् ।
सुधापूर्णकुम्भाऽभयोल्लासिहस्तं
सदा भावये तत्र पाथोजवर्ये ।। ३५ ।।

मं चेति बीजसम्पन्नं बह्निमण्डलमेव च ।
धूम्राच्यार्दिकलायुक्तं मन्दारारुणतेजसम् ।। ३६ ।।
दधन्तं घृतपात्रं च स्रुवं च तत्र चिन्तयेत् ।
संचेति बीजसंयुक्तं स त्वं च विष्णुसम्भवम् ।। ३७ ।।
वृत्तरूपं स्मरेत्तत्र पाशाङ्कुशधरं शितम् ।
रं बीजयुक्तं रजसं ब्रह्मणोऽशसमुद्भवम् ।। ३८ ।।
रक्तगौराङ्गमन्त्राब्जे मालापुष्पधरं स्मरेत् ।
तृतीयावृत्तकं कृष्णं श्रीरुद्रांशसमुद्भवम् ।। ३९ ।।
तं बीजसहितं तत्र तमसं सायुधं स्मरेत् ।
आं बीजसहतात्मानं जीवरूपं सचेतनम् ।। ४० ।।
वाच्छाभयवरं श्लाघ्यं तत्र पद्मे स्मराम्यहम् ।
चेति बीजरुचिरं त्वं परमात्मानमेव च ।। ४१ ।।
गदापद्मधरं वन्दे तत्र पद्मे महोदये ।
भावये परमात्मानं सर्वव्यापिनमीश्वरम् ।। ४२ ।।
पञ्चेतिबीजपरिभास्वरमेवमीडे
कोट्यर्कचन्द्रकिरणावलिराजमानम् ।
शृङ्गारिभासुरकराब्जमत्र पद्मे
यः सर्वमेव सचराचरमेत्य शस्ते ।। ४३ ।।
मायाबीजसमेतं तं ज्ञानात्मानं निरञ्जनम् ।
भावयेच्च तत्पीठेऽस्मिन् यो व्याप्नोति जगत् त्रये ।। ४४ ।।
चंचच्चन्द्रचयाभिरामधवलां श्वेताब्जवर्य्यासनां
दाहोत्तीर्णसुवर्णवर्णकजटाजूटां त्रिनेत्रोज्वलाम् ।
हस्तोद्यत्स्फटिकाक्षसूत्रफणिसद्विद्यासुधाभाजनां
ब्रह्मोपेन्द्रनुतां भजामि विमलां वाग्देवतां भूषिताम् ।। ४५ ।।

तत्पीठानिलकोणपत्रनिलयां वन्देऽहमुत्कर्षिणीं
श्रीमन्नीलसरोजमञ्जुलतरश्यामाभिरामाकृतिम् ।
हस्ताभ्यां ललिताञ्जलिसुरवरं ध्यायन्तीमेवाच्युतं
नानाभूषणभूषितां सुरनुतां सद्यौवनोद्गर्विताम् ।। ४६ ।।
ज्ञानदेवीं भजे दक्षे देशे ज्ञानाब्जधारिणीम् ।
अरुणां चारुभूषाढ्यां विष्णुध्यानपरायणाम् ।। ४७ ।।
पद्मकेशरवर्णाभां क्रियादेवीं महोदयाम् ।
नैर्ऋतच्छददेशस्थां वन्दे पाशाङ्कुशायुधाम् ।। ४८ ।।
वन्दे योगां योगसक्तां पीतां पीताम्बराश्रयाम् ।
तत्पश्चिमच्छदे रम्ये राजमानां सुमण्डनाम् ।। ४९ ।।
वायव्यकोणाब्जजले स्थितां तां
कान्तां सुशान्तां पृथुसत्कुचाढ्याम् ।
प्रज्ञां स्रवन्तीमधुरोत्कनुत्या
रक्ताम्बरां नौमि कृताञ्जलिं द्राक् ।। ५० ।।
सत्यां चोत्तरपत्रदेशनिलयं श्यामाभिरामाकृतिं
वन्दे नीलसरोजमञ्जुनयनां हस्ताब्जपद्माभयाम् ।
श्रीमत्कृष्णरतिप्रतीक्षणलसच्चित्तां स्वसौन्दर्य्यतो
मत्ताभूषणवृन्दवन्दिततरां दिव्याम्बरां सुन्दराम् ।। ५१ ।।
ईशानां चारुनीलाम्बरधृतिरुचिरां दिव्यहारां सुवेशां
माल्योद्यद्दिव्यकेशां रतिततिरतिविस्मारिसौन्दर्य्ययुक्ताम् ।
हस्तोद्यत्पद्मवाच्छां शरदमृतकरश्रीमदास्यां प्रशंस्यां
वन्दे लक्ष्मीशचेतः प्रतिदिनसुखदस्मेररम्यां वसानाम् ।। ५२ ।।
तत्पीठोत्तममध्यदेशविलसत्कल्पद्रुमूलस्थितां
दाहोत्तीर्णसुवर्णवर्णरुचिरां दिव्याम्बरां सुन्दराम् ।
भासोल्लासतचेन्दुखण्डरुचिरां नानासुभूषोज्ज्वलां
विष्णोश्चित्तवशंकरीं मधुरया वाचा भजेऽनुग्रहाम् ।। ५३ ।।

शक्तीनां श्रीमतीनां च चारुभूषणसंयुताम् ।
विमलाप्रमुखानां च सुस्मितानां च मध्यतः ।। ५४ ।।
अनुग्राह्या समीपस्थं भगवन्तं महोदयम् ।
वासुदेवं च सर्वात्मयोगयोगं मनोहरम् ।। ५५ ।।
पद्मपीठं तदात्मानं सर्वलोकनमस्कृतम् ।
सर्वाभरणसम्पन्नं सर्वायुधसुसंयुतम् ।। ५६ ।।
सर्वत्र सावधानस्थं विष्णुं ध्यायेद्दयार्णवम् ।
भक्त्या विशुद्धया धीमान् साधनो नृपसत्तम ।। ५७ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये अन्तर्यजनदेवताध्यानं नाम त्रिसप्ततितमोऽध्यायः ।।

चतुःसप्ततितमोऽध्यायः

ब्रह्मोवाच

तद्ब्रह्मनिरीहं पूर्णं निराकारं निरञ्जनम् ।
योगिभिर्दुर्ग्रहं वेदैर्दुर्ज्ञेयं चित्सरूपकम् ।। १ ।।
सत्तामात्रं दुर्विभाव्यं त्ववाङ्मनसगोचरम् ।
ध्यानमात्रैव घटते नावाहनमतः परम् ।। २ ।।
न च स्तोत्रं न पूजा सा तत्त्वब्रह्मण भो नृप ।
अप्रमेयं तु तद्ब्रह्म यतो वेदेषु सम्मतम् ।। ३ ।।
तद्ब्रह्मदारुरूपेऽस्मिन् निरीहे नीलधामनि ।
येन मन्त्रेण कर्त्तव्या पूजा विष्णोः परन्तप ।। ४ ।।
तन्मूर्त्त्यावाहनं कुर्य्यात्सर्वरूपे निरञ्जने ।
सर्वात्मकं यतो ब्रह्म सर्वं ब्रह्मणि संस्थितम् ।। ५ ।।

विष्णोरेतद्दारुदेहे सर्वामूर्त्तिः प्रकल्प्यते ।
नृसिंहोऽत्रैव कृष्णो वा रामो नारायणस्तथा ।। ६ ।।
इत्यादिना मूर्त्तयस्तास्त्वाबाह्य पूजयेत्सुधीः ।
छायायां शर्मदायां च कल्पवृक्षस्य भूपते ।। ७ ।।
अरुणाम्भोजमध्यस्थं श्रीकृष्णं सुमनोहरम् ।
पीठमन्त्रेण संपूज्य मन्त्रपूजां तु पीठके ।। ८ ।।
निवेश्य देशिकः श्रीमान् पुष्पाञ्जलिकमादधत् ।
हृदये स्वे पूज्यमूर्त्ति यथोक्तविधिना नृप ।। ९ ।।
ध्यात्वा पुनः प्रार्थयेत्तं यथा तत्कथये नृप ।
अरण्याः पावकमिव दीपो दीपान्तरं यथा ।। १० ।।
तथा त्वां हृदयाद्विष्णोस्त्वजं शुद्धं महेश्वरम् ।
आनीय ब्रह्मरूपायां दारुमूर्त्यां च पूजयेत् ।। ११ ।।
मूलमन्त्रं समुच्चार्य्य समागच्छ सुरोत्तम ।
श्रीकृष्णोऽत्र त्विति वदन् हृदयान्तर्गतं च यत् ।। १२ ।।
सुषुम्णामार्गतस्तच्च भ्रूवोर्मध्यगतं पुनः ।
संचिन्त्य देशिकस्तच्च दक्षप्राणाध्वना पुनः ।। १३ ।।
बहिर्गतं विचिन्त्याथ तत्पुष्पाणि समाक्षिपेत् ।
पूजामूर्त्यां तच्च तेजो हृषितं नृपसत्तमः ।। १४ ।।
वामनासापूटेनैव वेशयेद्देवता हृदि ।
तत्तेजसो देवतायां चैकं तस्मिन् विचिन्तयेत् ।। १५ ।।

सूत उवाच

एवमावाह्य भो विप्राः पूजाकाले मनोरमे ।
ब्रह्मणोक्तेन विधिना यार्चास्तात्तद्वदाम्यहम् ।। १६ ।।

ब्रह्मोवाच

आदौ चावाहनं कुर्य्यात्संस्थापनमतः परम् ।
सन्निधानं ततः कुर्य्यात्तन्निरोधनमतः परम् ।। १७ ।।

सकलीकरणं चैव ततः स्यादवगुण्ठनम् ।
धेनूपीयूषकरणं महामुद्रां ततः चरेत् ।। १८ ।।
परमीकरणं कुर्य्यादेता मुद्रा दश स्मृताः ।
एतासां लक्षणं वक्ष्ये श्रूयतां मुनयोऽधुना ।। १९ ।।
यज्ज्ञात्वा यत्समाश्रुत्य सर्वपापैः प्रमुच्यते ।
कराङ्गुलिसुसंलग्नगभीरोत्तानता च या ।। २० ।।
साञ्जलिः पुष्पपूर्णा च धारिता हृदयस्थले ।
दक्षनासापुटस्थानं नीता च हृन्महोन्विता ।। २१ ।।
संचिन्त्य पूजादेवस्य पादपद्मेऽर्पिता भवेत् ।
मुद्रा सावाहनी प्रोक्ता वेदमन्त्रप्रकाशिका ।। २२ ।।
तामञ्जलिं यदा कुर्य्यादधोमुखतया पुनः ।
स्थापनी सा च विज्ञेया यया देवः 'स्थिरो भवेत् ।। २३ ।।
मुष्टिद्वयं समायोज्य चोद्यताङ्गुष्ठद्वयकम् ।
संन्निधानकमुद्रा स्यादनेन जायते नृप ।। २४ ।।
अङ्गुष्ठांन्तर्गतां सैव मुद्रा सा स्यान्निरोधने ।
तस्या दर्शनमात्रेण देवता वशवर्त्तिनी ।। २५ ।।
उद्यताङ्गुष्ठता द्वन्द्वे मुष्टिभ्यां संमुखीकृते ।
मिथः श्लिष्टे मुष्टियुग्मे मुद्रासौ संमुखी स्मृता ।। २६ ।।
एतन्मुद्रा दर्शयेत्तु देवता संमुखी ततः ।
मूलमन्त्रस्य पञ्चाङ्गं पूर्वोक्तं यद्द्विजोत्तमाः ।। २७ ।।
तद्देवता हृदादौ चेद्विन्यस्य च यथाक्रमम् ।
सकलीकरणं चेति ब्रह्मणा कथितं पुरा ।। २८ ।।
परस्परं तर्जनीभ्यां भ्रमणं देवसन्निधौ ।
अवगुण्ठनमुद्रेयं दर्शयेद्देवसम्मुखे ।। २९ ।।
तर्जनीभ्यां च मध्येऽपि कनिष्ठाभ्यामनामिके ।
अन्योऽन्यं च समायोज्य धेनुमुद्रा प्रकीर्त्तिता ।। ३० ।।

अधोमुखतया तावद्मृतीकरणं चरेत् ।
मिथोऽङ्गुष्ठद्वयं बध्वा सर्वास्ताश्च प्रसारिता ।। ३१ ।।
कृत्वाथ दर्शयेत्तत्तु महामुद्रा प्रकीर्त्तिता ।
तस्याश्च भ्रमणादेव परमीकरणं चरेत् ।। ३२ ।।
मुदं ददाति देवेभ्यो दारयत्यसुरांश्च तत् ।
तस्मान्मुद्रा समाख्याता दर्शयेद्देवतार्च्चने ।। ३३ ।।
तस्मादावाहनादिन्दोर्मुद्रा यत्नात्प्रदर्शयेत् ।
मुद्राहीनं तु यत्कर्म तत्सर्वं निष्फलं स्मृतम् ।। ३४ ।।
मुद्राभयप्रदा यस्मात्तस्मान्मुद्राः प्रदर्शयेत् ।
यासां प्रदर्शनाद्विष्णोः जायते प्रीतिरुत्तमा ।। ३५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये आवाहनादिमुद्रालक्षणं नाम चतुःसप्तत्तितमोऽध्यायः ।।

पञ्चसप्ततितमोऽध्यायः

ब्रह्मोवाच

पुनः शृणु नृपश्रेष्ठ कथयामि तवाग्रतः ।
आहूयते यतो देवो यजने यत्र निर्जने ।। १ ।।
सोऽपि देवः समायातस्त्ववाहनमिहोच्यते ।
संस्थापयत्यमुं यस्मात्पीठे चारुतरेऽर्च्चकः ।। २ ।।
संस्थापनमिति प्राहुर्मुनयस्तत्त्वदर्शिनः ।
विभुत्वे वर्तमानेऽपि सोऽहमस्मित्यभेदतः ।। ३ ।।
यत्संनिधीयते तेजो हृद्यं तद्ब्रह्मदारुणि ।
दीपाद्दीपान्तरे तेजो यथा दीप्ततरं भवेत् ।। ४ ।।

तथात्र सन्निधानेन तेजो बुद्धिश्च जायते ।
अतो हि संनिधानं तु दोषायैव न कल्प्यते ।। ५ ।।
वेदो नारायणः साक्षात्सोऽपि कर्मप्रवर्त्तकः ।
पूजासमाप्तिपर्य्यन्तं देवताया महीसुराः ।। ६ ।।
सम्मुखीकरणं तत्तु तत्रोक्तत्वन्नदोषभाक् ।
अयं विष्णुर्भक्तबन्धुर्भक्त्याहूतो गमिष्यति ।। ७ ।।
इति संचिन्त्य मनसा भक्तियुक्तेन देशिकः ।
निबुध्यते यतस्तावत्तन्निरुन्धनमुच्यते ।। ८ ।।
तत्तु दोषाय न स्याद्वै यदुक्तं विधिना द्विजाः ।
ब्रह्मणेऽव्यक्तरूपत्वात्तत्र ध्यानादसम्भवः ।। ९ ।।
आकारकल्पनाहेतोः षडङ्गः क्रियते मया ।
नापराधोऽस्ति मे देव भक्त्या चिन्त्योऽतिदेशिकः ।। १० ।।
षडङ्गन्यासमाकुर्य्यादन्यथार्च्चा तु निष्फला ।
सकलीकरणं तत्तु न दुष्यति महीसुराः ।। ११ ।।
आर्त्ताश्च भक्ता दीनाश्च ज्ञानिनश्चार्थकारिणः ।
एवं विधा जनाः सन्ति तैराहूतस्त्वमव्ययः ।। १२ ।।
तेषु वासकचित्तश्चेत्पूजा मे विफला भवेत् ।
एतदर्थं मया तावदवगुण्ठनमुत्तमम् ।। १३ ।।
इति संप्रार्थ्य देवेशं त्ववगुण्ठनमाचरेत् ।
कामधेनुर्देवतानां नित्यं सन्तोषदायिनी ।। १४ ।।
यदुद्भावमृतरसैर्देवास्तुष्यन्ति नित्यशः ।
तत्समा धेनुमुद्रेयं दर्शनीया नृपोत्तम ।। १५ ।।
एतद्दर्शनतो देवः सन्तुष्टो जायते यतः ।
तया चेद्भ्रमणं भूयस्त्वमृतीकरणं विदुः ।। १६ ।।

तस्य दर्शनमात्रेण ह्यतिप्रीतो भवेन्नृप ।
महामुद्रादर्शनेन सर्वत्र मुद्रणं भवेत् ।। १७ ।।
त्वया च भ्रमणे जाते सर्वमाच्छादितं द्विजाः ।
आच्छादिते च सर्वत्र देवताया समन्ततः ।। १८ ।।
नैवेद्यगामिनी दृष्टिस्तस्माद्देतत्समाचरेत् ।
आवाहनादिकविधेः यत्फलं जायते नृप ।। १९ ।।
तदहं निगदाम्यद्य सर्वपापप्रणुत्तये ।
आवाहने हरेस्तावद्विधिवद्रचिते यदा ।। २० ।।
फलं प्राप्नोति विप्रोऽहमग्निष्टोमशतोद्भवम् ।
स्थापने क्रियमाणे तु स्थैर्य्यं सर्वत्र जायते ।। २१ ।।
महाव्रतफलं चासि कर्तुं स्यान्नात्र संशयः ।
सन्निधानं यदा मर्त्यः करोति विधिना तदा ।। २२ ।।
वाजपेयफलं लब्ध्वा सान्निध्यं ब्रह्मणो ब्रजेत् ।
पूजाकाले यदा कुर्य्यात्सन्निरोधनमुत्तमम् ।। २३ ।।
देवसन्तोषतो विप्राश्चतुर्मुखफलं दधत् ।
सकलीकरणं मन्त्री श्रद्धा पूर्वं करोति यः ।। २४ ।।
स एव लभते शर्म सकलं विपुलं यशः ।
वाजपेयस्य च फलं पूर्णं तच्छारदस्य च ।। २५ ।।
अवगुण्ठनमेतत्तु यः करोति नरोत्तमः ।
पौण्डरीकस्य यागस्य प्राप्नोति फलमुत्तमम् ।। २६ ।।
धेनुमुद्रां यदा विष्णोः पुरतो धारयेत्तु यः ।
सर्वयज्ञफलं सोऽपि लभते कृपया हरेः ।। २७ ।।
अमृतीकरणादेव भूमिदेवाः स देशिकः ।
चन्द्रलोकं समासाद्य मोदतेऽमृतपानतः ।। २८ ।।

महामुद्रां देशिको यः परमीकरणं ततः ।
करोति पुरतो विष्णोः स कदाचिन्महीतले ।। २९ ।।
विपल्लेशं न चाप्नोति महर्लोके महीयते ।
सर्वकामानवाप्नोति विष्णुलोके महीयते ।। ३० ।।

सूत उवाच

आवाहनादिमुद्राणां रचनाफलमीदृशम् ।
न कुर्य्याच्चेन्महान् दोषस्तस्माद्विप्राः समाचरेत् ।। ३१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिसंवादे दशमुद्राकथने पञ्चसप्ततितमोऽध्यायः ।।

षट्सप्ततितमोऽध्यायः

शौनकादय ऊचुः

दारुब्रह्मणि रूपेऽस्मिन् जीवन्यासं यथा चरेत् ।
कृष्णमावाह्य विधिवत्कथयस्व महामते ।। १ ।।

सूत उवाच

साधुपृष्टं महीदेवाश्चेमं विधिमनुत्तमम् ।
पृष्टो महीभृता पूर्वमिन्द्रद्युम्नोऽपि पद्मजम् ।। २ ।।
उक्तवान् यत्तदेवाद्य कथयामि समासतः ।
विना कनिष्ठया रूढ्याऽनामिकाङ्गुष्ठयोजने ।। ३ ।।
तर्जनीमध्यमे तत्र लग्ने कृत्वा ह्यधोमुखम् ।
जीवदाना समुद्रेयं जीवन्यासस्मृता द्विजाः ।। ४ ।।
तुलसीदलमालम्ब्य त्वनया मुद्रया पुनः ।
देवताहृदयं स्पृष्ट्वा तत्कुर्य्याद्देशिकोत्तमः ।। ५ ।।

पापाङ्कुशाख्यबीजाभ्यां शक्तिं च पुटितां चरेत् ।
यादि वर्ण्णान् सकारान्तान् सकृद्बिन्दुयुतान् चरेत् ।। ६ ।।
ततो हंसश्चेति पदं चोक्त्वाऽमुष्य च देशिकः ।
कृष्णस्य च पदं त्यक्त्वा प्राणाश्चेति पदं वदेत् ।। ७ ।।
इदं प्राणास्त्विवति ब्रूयात्तारपूर्वं मुनीश्वराः ।
पुनः पुनः समुच्चार्य्य ततो जीव इह स्थितः ।। ८ ।।
सर्वेन्द्रियेष्विति पदमुक्त्वाथ धरणीसुराः ।
वाङ्मनश्चक्षुश्रोत्राणि पुनः प्राणा इहेति च ।। ९ ।।
आगत्य च मुखं शब्दं चिरं शब्दं ततो वदेत् ।
तिष्ठन्तु स्वाहेति पदमुक्त्वेत्थं च स देशिकः ।। १० ।।
एवं वारद्वयं कृत्वा हृद्देशे संजपेद्बुधः ।
अनेन विधिना विप्रा जीवन्यासेन देशिकः ।। ११ ।।
सर्वत्र संस्थितायाश्च देवताया मनोहरे ।
प्रतिमारूपके तावज्जीवन्यासं समाचरेत् ।। १२ ।।
अवश्यमेव कर्त्तव्यं देवसान्निध्यहेतवे ।
न कुर्य्याच्चेद्देवतायाः सान्निध्यं नहि जायते ।। १३ ।।
देवताङ्गे मातृकां च केशवादिं ततः परम् ।
तत्र न्यासं च मन्त्रस्य ऋष्यादिं च समाचरेत् ।। १४ ।।
सृष्टिस्थितिलयं चैव दशतत्त्वानि कारयेत् ।
मन्त्रेण पुटितां तावन्मातृकां च तथा चरेत् ।। १५ ।।
मूर्त्तिपञ्जरकं न्यासं दशाङ्गं च तदर्द्धकम् ।
एवं कुर्य्यात्ततो मन्त्री तद्विष्णोः परमाङ्गके ।। १६ ।।
एतद्दारुमयं ब्रह्म निर्गुणं च महीसुराः ।
एतैर्न्यासैस्तदा ब्रह्मनिर्गुणं सगुणं भवेत् ।। १७ ।।

सर्वेन्द्रियसुसम्पन्नं सर्वतेजो बलान्वितम् ।
सर्वाङ्गसहितं देवं भावयेद्दिजसत्तमाः ।। १८ ।।
निजाङ्गवद्देवतनौ महर्षयो
न्यासादिकं तत्र चरत्स पूजकः ।
संन्यस्य मुद्राः कथिताश्चं याश्च
ताः प्रदर्शयेत्तत्कथितो भवन्मुदे ।। १९ ।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये षट्सप्ततितमोऽध्यायः ।।

सप्तसप्ततितमोऽध्यायः

ब्रह्मोवाच

पूर्ववद्देवताग्रे वै मुद्राः शङ्खादिसंयुता ।
षोडशो दर्शयेद्धीरं सर्वदिक्षु वृत्ता इव ।। १ ।।
आसनाद्युपचाराणां यथार्पणमयं चरेत् ।
तदहं कथये धीराः श्रूयतां तत्र सादराः ।। २ ।।
देवताया यत्र यत्र येन मन्त्रेण दीयते ।
तेषां चैवोपचाराणां यां मुद्रां दर्शयेत्पृथक् ।। ३ ।।
तत्सर्वं देवतामग्रे कथ्यते मुनिसत्तमाः ।
आदौ त्वच्चर्नपुष्पं तु पुनः पुष्पं च संदधत् ।। ४ ।।
संप्रार्थ्य ह्युपचाराणामर्पणं च ततः परम् ।
मुद्राणां दर्शनं तावत् दापयेच्च ततः परम् ।। ५ ।।
जलधारां ततो दत्त्वा मुखवासं प्रदापयेत् ।
क्रम एष स्मृतो विप्रा ब्रह्मणा कथितं पुरा ।। ६ ।।

सुखोपवेशनार्थाय दद्यात्दासनमुत्तमम् ।
स्वागतं च ततो दद्यात्पाद्यं पादाम्बुजद्वये ।। ७ ।।
अर्घ्यं शिरस्थले दद्यान्मुखे त्वाचमनीयकं ।
मधुपर्कं महीदेवाः पुनराचमनं तथा ।। ८ ।।
पुनर्मुखाम्बुजे दद्यात्स्नानं सर्वत्र गात्रके ।
कटिदेशे पीतवस्त्रं स्कन्धे यज्ञोपवीतकम् ।। ९ ।।
सोत्तरीयं ततो दद्यात्काञ्चनाभरणानि च ।
सर्वाङ्गे हृदये गन्धं माल्यं समस्तकण्ठयोः ।। १० ।।
घ्राणप्रदेशे धूपं च दीपं चक्षुःप्रदेशके ।
समीपे दृष्टिनिकटे दद्यान्नैवेद्यमुत्तमम् ।। ११ ।।
दूर्वाक्षतानि शिरसि ततश्चारात्रिकावलिम् ।
मुखमण्डलसामीप्ये भ्रमणैः परिदापयेत् ।। १२ ।।
उपचारादिकं स्थानं कथयित्वाथ मन्त्रकान् ।
निगदामि समासेन यद्ज्ञात्वा मुच्यतेऽशुभात् ।। १३ ।।

ब्रह्मोवाच

आसने स्वागते चैव पाद्ये वस्त्रोपवीतयोः ।
उत्तरीये महीपाल तथाभरणगन्धयोः ।। १४ ।।
नमःशब्दं प्रयुञ्जीत त्वेषां प्रान्ते स देशिकः ।
मधुपर्काचमान्ते च स्वधामन्त्रं प्रयोजयेत् ।। १५ ।।
स्नाने पुष्पे वौषडिति ब्रूयादर्च्चकसत्तमः ।
अर्घ्ये च धूपदीपे च नैवेद्ये हवने तथा ।। १६ ।।
मुखनीराजने चैव ताम्बूलार्पणके तथा ।
नीराजने ततो धीमान् स्वाहाशब्दं प्रयोजयेत् ।। १७ ।।
शेषोपचारेषु पुनर्नमःशब्दं वदेन्नृप ।
उपचारावृत्तिकरं बहिष्कुर्य्यात्तदंशुकम् ।। १८ ।।

ततः श्वेताम्बुजं नीलं रक्तपद्मं च भूपते ।
कर्णिकारं च तगरं त्वेतैः पञ्चभिरन्वितम् ।। १९ ।।
आसनस्य च पात्रं तत्संस्कुर्य्याद्वीक्षणादिना ।
आसनार्थे महाविष्णोः पुष्पाण्येतानि पञ्च च ।। २० ।।
सुखोपवेशनं देव विधेह्यस्मिंश्च साम्प्रतम् ।
इति संप्रार्थ्य देवेशमर्पयेत्तानि देशिकः ।। २१ ।।
मूलमन्त्रं समुच्चार्य्य श्रीकृष्णाय ततः परम् ।
आसनं नम इत्येवं वदन् दद्यात्तदासनम् ।। २२ ।।
दत्त्वाथ पद्ममुद्रां तां दर्शयेद्विष्णुमव्ययम् ।
एवं क्रमेण सर्वांस्तानुपचारान् प्रदापयेत् ।। २३ ।।
जातीपुष्पं चम्पकं च मल्लीपुष्पं मनोहरम् ।
मालतीकुसुमं तावद्बकुलं तदनन्तरम् ।। २४ ।।
अशोकं तानि पुष्पाणि संस्कुर्य्याद्वीक्षणादितः ।
पुष्पाण्येतानि वा तत्र लाङ्गली षट्पलानि वा ।। २५ ।।
पुरुषोत्तममहाबाहो कुशलेनात्र चागतः ।
मया दत्तं स्वागतं तद्गृहाण परमेश्वर ।। २६ ।।
प्रार्थयित्वा चेति विष्णुं ततः स्वागतमर्पयेत् ।
प्रसृतीकृत्य तद्दिशं हस्तं वृद्धाङ्गुलिं पुनः ।। २७ ।।
सुपाद्यमेतत्तवपादपद्मद्वये ददानि स्फुटकञ्जनेत्र ।
गृहाण त्वमेतमतीव भक्त्या यतो भवान्वै निजभक्तबन्धुः ।। २८ ।।
ततः करद्वये कुर्य्यादञ्जलिं मञ्जुलाकृतिम् ।
तर्जनीमूलयुग्मेऽपि लग्ने वृद्धाङ्गुलिद्वये ।। २९ ।।
पाद्यमुद्रेयमुदिता दर्शनीया हरिं प्रति ।
हृदये चिन्तयित्वा तु भक्तिभावेन देशिकः ।। ३० ।।

जगन्नाथ नमस्तेऽस्तु जगदानन्दकारक ।
दृश्यादृश्यस्वरूप त्वं मया दत्तार्घ्यमुत्तमम् ।। ३१ ।।
गृहाणाशु यतः श्रीमान् भवान् भृत्येषु वत्सलः ।
स्वस्तिमुद्रा यदा हस्तद्वये स्यादर्घमुद्रिका ।। ३२ ।।
स्वर्गङ्गाया जलं विष्णोः भावनानीतमुत्तमम् ।
आचमाय मया भक्त्या दत्तं स्वीकुरु साम्प्रतम् ।। ३३ ।।
किञ्चित्त्यक्तकनिष्ठाग्रे दक्षहस्ते प्रसारिते ।
तर्जनीमूलगाङ्गुष्ठे मुद्रा त्वाचमने मता ।। ३४ ।।
मधुपर्कं मया दत्तं मधुसूदन दयार्णव ।
गृहाण कमलाकान्त दीनबन्धुर्यतो भवान् ।। ३५ ।।
अनामिकाङ्गुष्ठयोगं कृत्वा शेषाः प्रसारिताः ।
अधोमुखी यदा जाता मुद्रेयं मधुपर्कके ।। ३६ ।।
ब्रह्मणो निर्गुणस्यास्य सद्गुणत्वे विचिन्तिते ।
अतः शुद्ध्यै नृपश्रेष्ठ मधुपर्कं प्रदापयेत् ।। ३७ ।।
अवश्यं हि प्रदातव्यं चतुरामृतकं च तत् ।
देवतातुष्टिमाप्नोति मधुपर्कप्रदानतः ।। ३८ ।।
विशुद्धाचमनं चेदं मया दत्तं पुनः प्रभो ।
गृहाण त्वं हृषीकेश दीने मयि कृपां कुरु ।। ३९ ।।
पूर्ववद्दर्शयेद्धीमान् मुद्रामाचनस्य च ।
ततः स्नानमण्डपस्थं देवं सञ्चिन्त्य चेतसा ।। ४० ।।
समुद्रज्येष्ठामन्त्रेण स्नापयेन्मुकुरे हरिम् ।
प्रतिमापट्टयन्त्रेषु स्नानं प्रतिदिनं न च ।। ४१ ।।
स्वे स्वे पर्वणि तत्कार्य्यं स्नानं चान्यत्र दर्पणे ।
कुशानामग्रतः शुद्धैर्वारिभिः सेचनं तु यत् ।। ४२ ।।

प्रतिमादिषु तत्स्नानं नृपेदं वेदसम्मतम् ।
नानातीर्थचया भक्त्या नीतैर्नीरैश्च चेतसा ।। ४३ ।।
सर्वस्वरूपं त्वां विष्णो स्नापयेन्मुकुरोत्तमे ।
अङ्गीकुरु महाबाहो यतोऽहं प्रेरितस्त्वया ।। ४४ ।।
उद्गताङ्गुष्ठया मुष्ट्या दक्षयाधोगता हि या ।
स्नानमुद्रा समाख्याता दर्शनीयावगाहने ।। ४५ ।।
अधः कनिष्ठतां मुद्रां दर्शयेद्देशिकः पुनः ।
लक्ष्म्यादीनां च शक्तीनां स्नानकाले धराधिप ।। ४६ ।।
आद्या मुद्रा पौरुषी स्यादन्त्या शक्त्यात्विति द्विधा ।
अर्कवारे रक्तवर्ण्णं सोमे शुभ्रं मनोहरम् ।। ४७ ।।
महीपुत्रे तथा रक्तं बुधे नीलतमं स्मृतम् ।
जीववारे पीतवर्ण्णं शुक्लं शुक्रस्य घस्रके ।। ४८ ।।
कृष्णवर्ण्णं शनेर्वारे प्रत्यहं वस्त्रयुग्मकम् ।
दद्याच्छ्रीहरये धीमान् पूजासूक्तक्रमान्नृप ।। ४९ ।।
धारणाम्बरमेतत्तु शुद्धं प्रीतिप्रवर्द्धनम् ।
मया दत्तं महाबाहो गृहाण परमेश्वर ।। ५० ।।
पश्चात्सर्वजनानन्दप्रदं निरुपमं वरम् ।
उत्तरीयमिदं भूयो गृह्यतां चारुनिर्मितम् ।। ५१ ।।
उत्ताने दक्षहस्ते च मध्याङ्गुष्ठोद्गदाग्रके ।
प्रसारिततरा च स्यान्मुद्रा वस्त्रोत्तरीययोः ।। ५२ ।।
यज्ञोपवीतमन्त्रस्य ब्रह्मेशानाम्बुजेक्षणाः ।
ऋषयश्चात्र गायत्री उष्णिक् चापि ततः परम् ।। ५३ ।।
अनुष्टुभाख्यछन्दांसि देवता वामन स्मृतः ।
श्रीकृष्णदेवयज्ञाख्याश्चक्रार्पणक एव च ।। ५४ ।।

विनियोगः स्मृतो भूप ततो ध्यानं समाचेरत् ।
श्रीजगन्नाथदेवस्य भक्तिभावेन चेतसा ।। ५५ ।।
मेघश्यामं पीतकौपीनशोभं
चञ्चच्छक्रं फुल्लपाथोजनेत्रम् ।
अम्भःपात्रं दक्षहस्ते स पात्रं
हैमं वामदण्डमुद्यत्कुशाघे ।। ५६ ।।
शुक्लोत्तरीयेण च कृष्णरङ्ग-
स्फीत जिनेनाञ्चितनीलदेहम् ।
त्रिपुण्ड्रकोल्लासितभालदेशं
जगत्पवित्रं धृतमुग्रकालम् ।। ५७ ।।
त्रिगुणान् त्रिगुणीकृत्य सकृद्ब्रह्मण्यरूपधृक् ।
निवीतं भवता पूर्वं ब्रह्मरूपतया तया ।। ५८ ।।
जगन्नाथ महाबाहो सर्वकल्याणकारक ।
यज्ञोपवीतमेतत्तु गृह्यतां तत्सुरोत्तम ।। ५९ ।।
उत्तानीकृतदक्षेऽपि कनिष्ठाङ्गुष्ठकायुतौ ।
अस्यां प्रसारणे जाते मुद्रा यज्ञोपवीतके ।। ६० ।।
चूडायाः पादपर्य्यन्तं नानारत्नोज्ज्वलप्रभम् ।
हारं कुण्डलयुग्मं च केयूरमुकुटं मणिम् ।। ६१ ।।
मुद्रिकानिचयं तावन्नूपुरं किङ्किणीगुणम् ।
इत्याभरणसन्दोहं मया दत्तं सुरेश्वर ।। ६२ ।।
गृहाणोचितदेशेऽपि यत्र तत्र रमापते ।
इति संप्रार्थ्य रौक्माणि भूषणानि प्रदापयेत् ।। ६३ ।।
मधुपर्कस्य या मुद्रा सोपानाभरणे स्मृता ।
कर्पूरं चन्दनं दिव्यं कस्तूरीकुङ्कुमं पुनः ।। ६४ ।।

एतच्चतुष्टयं भूयः पलपात्रं परन्तप ।
तच्च चन्दनसारेण कलितं चारुसौरभम् ।। ६५ ।।
गन्धमेतादृशं दद्याद्विष्णवे दैत्यजिष्णवे ।
देवदेव जगन्नाथ त्वच्छरीरे मनोहरे ।। ६६ ।।
मूर्त्ति पञ्चरमन्त्रेण तत्स्थानेषु निवेदितम् ।
गन्धं गृहाण लक्ष्मीश दीने मयि कृपां कुरु ।। ६७ ।।
इत्युक्त्वा च नमस्कृत्य हृद्देशे गन्धमर्पयेत् ।
मुक्तोद्गनामिकया दक्षमुष्ट्या स देशिकः ।। ६८ ।।
गन्धं दद्याज्जगद्बन्धुं तया गन्धस्य मुक्तया ।
हीरकस्य च मुद्राया माणिक्यस्य प्रबालतः ।। ६९ ।।
सूर्य्येन्दुकान्तयोश्चैव महानीलमणेस्तथा ।
सुवर्णस्य च रोप्यस्य चान्यरत्नस्य भक्तितः ।। ७० ।।
पुष्पाणि चम्पकादीनि कृत्वा तैः प्रत्यहं यजेत् ।
रत्नपुष्पे भो भूप चित्रवस्त्रेषु वा पुनः ।। ७१ ।।
पट्टवस्त्रेषु सर्वेषु नव पर्य्युषिता भवेत् ।
हीरप्रसूनाद्राजेन्द्र चतुर्वर्गफलं भवेत् ।। ७२ ।।
मुक्तापुष्पप्रदानेन त्रिवर्गफलमश्नुते ।
माणिक्यदाढ्यता स्याद्वै वैदुर्य्याद्वाग्मिता भवेत् ।। ७३ ।।
सूर्य्येन्दुकान्तपुष्पेभ्यः सुखमारोग्यमश्नुते ।
महानीलार्च्चनादेव भाग्यवान् जायते नरः ।। ७४ ।।
सुवर्ण्णदानाद्दारिद्र्यं नास्ति तस्य महीतले ।
रोप्यप्रसूनतो जाता मर्त्त्यः सत्कीर्त्तिमान् भुवि ।। ७५ ।।
एकदैव प्रदानेन मुक्ताः स्युर्भवबन्धनात् ।
वैकुण्ठलोकमासाद्य विष्णुना परिपूजितः ।। ७६ ।।

कोटिकल्पान्तपर्य्यन्तं भविता नात्र संशयः ।
एषामभावतः पुष्पैः पूजाकाले रमापतेः ।। ७७ ।।
यैः कुर्य्यात्तच्च वक्ष्यामि पूजनं शृणु भूमिप ।
चम्पकं जातिका -मल्ली-पुष्पं नीलोत्पलं तथा ।। ७८ ।।
पद्मद्वयं मालतीं च वकुलं नवमालिकाम् ।
अशोकं नगरं नागकेशरं माधवीकुलम् ।। ७९ ।।
कुन्दं च करवीरं च श्वेतरक्तप्रभांशुकम् ।
केतकीद्वयपुष्पाणि रम्याणि विविधानि च ।। ८० ।।
अन्यानि विष्णुयोग्यानि पूजामेतैश्च कारयेत् ।
कोमलैस्तुलसीपत्रैर्विल्वपत्रैस्तथा नृप ।। ८१ ।।
अपामार्गस्य शम्याश्च धात्र्याश्च छदनैर्नवैः ।
मारद्यैश्च दामनकैः पूज्योऽयं माधवः स्वभूः ।। ८२ ।।
पूजाकाले नरो यस्तु पुष्पाण्येतानि विष्णवे ।
भक्त्या दद्यात्स तु परं सुखमैश्वर्य्यमद्भुतम् ।। ८३ ।।
चिरं विभुज्य भूलोकेष्वेषु संख्यानुमानतः ।
अश्वमेधक्रतुफलं लब्ध्वा मुक्तो न संशयः ।। ८४ ।।
वासुदेव दयाशील वेशोज्ज्वल तनो हरे ।
मया दत्तानि पुष्पाणि त्वमङ्गीकुरु साम्प्रतम् ।। ८५ ।।
इत्युक्त्वा हरये दद्यात् पुष्पाण्येतानि सत्तम ।
हस्तद्वयप्रमाणं हि माल्यं कण्ठे समर्पयेत् ।। ८६ ।।
उत्तमाङ्गे हृदम्भोजे त्वाधारे पादयोस्तथा ।
सर्वाङ्गे देशिको दद्यात्पञ्चपुष्पाञ्जलिः शुभाः ।। ८७ ।।
दक्षमुष्ट्या उद्गता चेन्मध्यमाधोमुखी भवेत् ।
पुष्पमुद्रेति विख्याता दर्शनीया हरेः पुरः ।। ८८ ।।

देवतायाश्च हृद्देशे श्रीवत्सकौस्तुभं तथा ।
वेणुं च वदनाम्भोजे वनमालां गलस्थले ।। ८९ ।।
दर्शयेद्देशिकः श्रीमान् पुनः पूजामहोत्सवे ।
स्नापयित्वाथ वासांसि शुभानि विविधानि च ।। ९० ।।
यज्ञसूत्रोत्तरीये च त्वलङ्काराणि देशिकः ।
बन्धुपुष्पं च दत्त्वाथ मुकुरं दर्शयेन्मुखे ।। ९१ ।।
अरूपरूपे बहुरूपरूप-
स्त्वमेव विष्णोस्मरकोटिरम्यः ।
वैरूप्यवांस्त्वं त्वमणुस्वरूपः
स्थूलस्त्वमेवातुलमूर्त्तिकीर्त्तिः ।। ९२ ।।
निजाननाम्भोजविलोकनार्थं
समर्पितोऽयं मुकुरो मुकुन्द ।
त्वत् प्रीतयेऽस्तु प्रतिवासरं हि
संगृह्यतां भक्तजनैकबन्धो ।। ९३ ।।
इति संप्रार्थ्य भो विप्रा देशिकः परमेश्वरम् ।
मुकुरं हरये दद्यादर्च्चने सुमनोहरम् ।। ९४ ।।
अङ्गुष्ठामुद्गतः कृत्वा दक्षमुष्टिगतां पुनः ।
दर्शयेद्दर्पणस्यास्य मुद्रां मुद्राविदां वरः ।। ९५ ।।
एवं देशिकसत्तमः प्रतिदिनं सभावनां चान्ततः
कृत्वा श्रीकमलापतेर्मुनिवराः कृत्वोक्तमेतद्विधिम् ।
तावच्छ्रीजगदीश्वरस्य परितस्तिष्ठन्ति ये ये सुरा-
स्तेषामर्च्चनकं यथाभिरचयेद्दक्ष्ये समक्षेऽपि वः ।। ९६ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सप्तसप्ततितमोऽध्यायः ।।

अष्टसप्ततितमोऽध्यायः

ब्रह्मोवाच

इदानीं देवतानां च तासां पूजा च कथ्यते ।
ये चावरणदेशस्थाः सदा विष्णोश्च पार्षदाः ।। १ ।।
कर्ण्णिकायां चतुर्द्दिक्षु पूर्वदिक्षु परन्तप ! ।
संस्थिता येऽपि चैषां वै नामानि कथ्यन्तेऽधुना ।। २ ।।
दामः सुदामस्तस्यास्ते वसुदामस्तथैव च ।
किङ्किणी दाम एते वै चत्वारः संस्थिताः क्रमात् ।। ३ ।।
कृष्णवर्ण्णाः समस्तास्ते कृष्णवत्परिभूषिताः ।
कैशोरावस्थया युक्ता वेणुकन्दुकसत्कराः ।। ४ ।।
तत्पीठकेशरेष्वेवं हृन्मन्त्राद्यधिदेवताः ।
कर्मान्तं पूजयेन्मन्त्री यथा तत्कथयाम्यहम् ।। ५ ।।
हृन्मत्रदेवता शुक्ला सर्वाभरणभूषिता ।
नवयौवनसम्पन्ना पाशाङ्कुशवराभया ।। ६ ।।
धारयन्ती त्रिनेत्रा च चन्द्रखण्डविभूषिता ।
तत्र पूजा महीनाथ ! पूर्ववत् क्रमतः पुमान् ।। ७ ।।
स्वाहादेवी रक्तवर्ण्णा रक्तवर्ण्णधरा सती ।
शिरोदेवी महास्फीता मुकुटोज्ज्वलतरा सती ।। ८ ।।
पदद्वयं धारयन्ती पूज्या यामदिशि स्थिता ।
शिखाधिदेवता रम्या कृष्णवर्ण्णा सुभूषिता ।। ९ ।।
विचित्राम्बरसंस्थाना वौषडित्याभिधान्विता ।
त्रिनेत्रा हस्तयोर्भ्राजन्माला विद्या सुशोभना ।। १० ।।
एवं विधा तत्र पूजा त्रैलोक्यजनमोहिनी ।
कवचाधिदेवता पीता कृष्णांशुकसमन्विता ।। ११ ।।

पशाङ्कुशधरा हाराद्यलङ्काराञ्चिता नुता ।
हं चेति नाम्ना सा पूज्या कौवेरदिशि संस्थिता ।। १२ ।।
अस्त्राय फडतिनामा हसन्ती सर्वतोमुखी ।
सर्वादिक्षु स्थिता देवी पीतवर्ण्णा सुशोभना ।। १३ ।।
नवयौवनगर्वाढ्या रक्तवस्त्रा सुलोचना ।
परितः पूजनीयासौ बाणेषु शरचापभृत् ।। १४ ।।
प्रणवाद्याश्चतुर्थ्यन्ता स्वनामसु प्रपूजयेत् ।
तुलसीजलतो धूपजलगन्धाक्षतैः पुनः ।। १५ ।।
पुष्पैर्धूपेन दीपेन मनसा तांश्च भूषयेत् ।
रुक्मिणी सत्यभामा च त्वग्निजश्च सुनन्दका ।। १६ ।।
अतः परं महीपाल ! मित्रविन्दा सुलक्षणा ।
ततो जाम्बवती देवी सुशीलाष्टौदलस्थिताः ।। १७ ।।
एताः समस्ताभरणातिरम्याः
कामाङ्गशोभा ललिताश्च गौरी ।
विचित्रवस्त्रास्त्वरुणायताक्षीः
सद्यौवनोल्लासितराः सुदाताः ।। १८ ।।
पद्मैकहस्ता विविधोपचारान्
संधारयन्ती परितश्च विष्णोः ।
स्थिता दलेषु स्मरयंश्च मन्त्री
ताः पूजयेद्वै तुलसीदलैस्तैः ।। १९ ।।
ततो दलाग्रेषु तु देशिकेन्द्रः
संपूजयेद्वै वसुदेवमेव ।
तां देवकीं चैव जगत्पवित्रां
ततोऽथ नन्दं च तथा यशोदाम् ।। २० ।।

मित्रादिभिः दामसुदाममुखैः,
कृष्णं जगन्नाथप्रभुं महान्तम् ।
बलं सुभद्रां नृपतेऽथ गोपान्
गोपीश्च गोविन्दपरायताक्षीः ।। २१ ।।
कनकौ कनकाभासौ ज्ञानमुद्राब्जधारिणौ ।
मातरौ चारुशोभाढ्यौ नानालङ्कारमण्डिते ।। २२ ।।
वरं पायसपात्रं च धारयन्त्यो क्रमाद्यजेत् ।
ध्यायेच्च भक्तिभावेन देशिको भक्तितत्परः ।। २३ ।।
बलभद्रं बलोन्मत्तं नीलचेलातिमञ्जुलम् ।
हलं च मुषलं चैव दधतं रत्नभूषितम् ।। २४ ।।
कुन्देन्दुकाशधवलमेककुण्डलमण्डितम् ।
पश्यतां स्मरतां चापि कामदं तं यजेद्बुधः ।। २५ ।।
दाहोत्तीर्णसुवर्ण्णवर्ण्णरुचिरां दिव्याम्बरां सुन्दरां
सर्वाभीष्टवरप्रदां सुचतुरां लावण्यलोकोत्तराम् ।
तन्निद्राम्बुजलोचनां भगवतीं भद्राय भूयः सुरै-
रुद्राद्यैः परिवन्दिता प्रतिदिनं देवीं सुभद्रां भजे ।। २६ ।।
वेत्रवंशीशृङ्गतन्त्रीज्येष्ठशङ्खादिहस्तकाः ।
नवनीताब्जहस्तास्ते घनश्यामाः सुशोभनाः ।। २७ ।।
गोपालबालाश्च परितो गोपवेशभृतो हरेः ।
अर्च्चनीया महीनाथ ! पूजाकालेऽर्च्चकैः सदा ।। २८ ।।
नवयौवनसम्पन्ना नानामण्डनमण्डिताः ।
तडिद्गौराङ्गधारिण्यो ज्ञानमुद्राब्जसंभृताः ।। २९ ।।
कृष्णार्पिते क्षपास्तत्र दत्तचित्ताश्च भावयेत् ।
तद्बाह्ये चिन्तयेद्धीमान् कल्पवृक्षान् विशेषतः ।। ३० ।।

तच्चतुर्दिक्षु स्थितानां नामानि कथयाम्यहम् ।
मन्दारश्च ततः श्रीमान् सन्तानश्चर्च्चितः परम् ।। ३१ ।।
पारिजातस्ततः कल्पद्रुम एते समन्ततः ।
हरिचन्दननामासौ मध्ये पूजा ततो भवेत् ।। ३२ ।।
नानावाञ्छाभरोद्यानचतुराम्रप्रशाखकान् ।
एवं तांश्च समभ्यर्च्च्य तद्बाह्ये तत्र वैष्णवाः ।। ३३ ।।
शुद्धस्फटिकसङ्काशो वीणावादनलालसः ।
अक्षसूत्रधरः श्रीमान् जटामुकुटमण्डितः ।। ३४ ।।
विभूतिभूषितो ज्ञानी पूज्योऽसौ नारदस्तथा ।
विधिवद्भक्तिभावेन देशिकेन नृपोत्तम ! ।। ३५ ।।
मालायन्त्रधरं शान्तं पर्वतं चित्रवर्णकम् ।
ततस्तं चिन्तयेन्मन्त्री ज्ञानवैराग्यमन्दिरम् ।। ३६ ।।
उद्धवं शान्तमनसं मालापुस्तकसत्करम् ।
कृष्णभक्तिपरं श्रेष्ठं ततस्तं चिन्तयेद्बुधः ।। ३७ ।।
अक्रूरं सुन्दरं धीरं कृष्णालोकनतत्परम् ।
ज्ञानाञ्जनाञ्चितं तत्र संचिन्त्य परिपूजयेत् ।। ३८ ।।
निःशठं कर्मठं शौरं ज्ञानवैराग्यतत्परम् ।
कृष्णभक्तियुतं श्वेतं मालाचालनमर्च्चयेत् ।। ३९ ।।
दारुकं श्रीपतेराज्ञाकारिणं सर्वकारणम् ।
नन्दिघोषरथस्यास्य सूतं तत्र समर्च्चयेत् ।। ४० ।।
विश्वक्सेनं महात्मानं विष्णुध्यानपरायणम् ।
ऊर्ध्वबाहुं सदाशान्तं ततस्तत्र यजेत्परम् ।। ४१ ।।
वैनतेयं महात्मानं विष्णुध्यानपरायणम् ।
अजेयं बलसम्पन्नं पूजयेद्देशिकोत्तमः ।। ४२ ।।

प्रथमं नारदं विद्धि पर्वतं तदनन्तरम् ।
उद्धवं च ततोऽक्रूरं निःशठं दारुकं तथा ।। ४३ ।।
विश्वक्सेनं वैनतेयं क्रमादष्टौ समर्च्चयेत् ।
इन्द्रं देवाधिपं वीरं गजारूढं तडित्प्रभम् ।। ४४ ।।
वज्रहस्तं ततो ध्यायेन्मुदा सपरिवारकम् ।
तेजोनिधिं मेषपत्रं अग्निं कपिलवर्णकम् ।। ४५ ।।
शक्तितोमरसद्धस्तं साशुगं तत्र चिन्तयेत् ।
यमदण्डधरं नीलं महिषोत्तमवाहनम् ।। ४६ ।।
प्रेतानामधिपं तत्र चिन्तयेत्पूजयेच्च तम् ।
रक्षोऽधिपं श्यामलाभं प्रेतारूढं च खड्गिनम् ।। ४७ ।।
ततः सानुचरं तत्र नैऋतं चिन्तयेच्च तम् ।
जलाधिपं पाशहस्तं श्रीमन्मकरवाहनम् ।। ४८ ।।
श्वेताभं सपरिवारं यजेत्तत्र तदार्च्चकः ।
प्राणाधिपं मृगारूढं धूम्रवर्ण्णं धृताङ्कुशम् ।। ४९ ।।
वायुं सपरिवारं च संचिन्त्य पूजयेत्सुधीः ।
यक्षाधिपं गदाहस्तं नरवाहनमण्डितम् ।। ५० ।।
शुक्लवर्ण्णं कुवेरं च तत्र सानुचरं यजेत् ।
ईशानं च सुधाशुभ्रं शुक्लवस्त्रं वृषाश्रयम् ।। ५१ ।।
विद्याधिपं सानुगतं चिन्तयित्वात्र पूजयेत् ।
रक्षसो वरुणस्यापि मध्येऽनन्तं यजेद्बुधः ।। ५२ ।।
नगाधिपमनन्तं च कूर्मारूढं च चक्रिणम् ।
श्वेतवर्ण्णं सानुचरं संचिन्त्य पूजयेत्तदा ।। ५३ ।।
मध्येशानस्य चेन्द्रस्य ब्रह्माणं पूजयेत्सुधीः ।
ब्रह्माणं गौरवर्ण्णाढ्यं मालापुस्तकधारिणम् ।। ५४ ।।

हंसवाहनमेवं च सर्वलोकाधिपं तथा ।
परिवारयुतं वन्दे नाभिपङ्कजसम्भवम् ।। ५५ ।।
वज्रशक्तिदण्डखड्गौ पाशाङ्कुशगदास्तथा ।
शूलचक्रेऽम्बुजं तावत्तद्बहिः पूजयेद्वसून् ।। ५६ ।।
वज्रोऽयं शुक्लवर्ण्णाढ्यो त्रिभुजः कनकाम्बरः ।
स्वायुधाभयसम्पन्नः पूजनीयो हरेर्बहिः ।। ५७ ।।
शक्तिश्चम्पकवर्ण्णाभा द्विभुजा चारुलोचना ।
निजायुधाभयधरा यातमग्नेर्बहिर्यजेत् ।। ५८ ।।
दण्डः प्रचण्डमेधाभः कराभाभयदण्डकः ।
बहिर्यमस्य पूज्योऽसौ द्विभुजो हरिभूषणः ।। ५९ ।।
मन्दारारुणितः श्रीमान् खड्गोऽसौ त्वभयासिधृक् ।
नैर्ऋतस्यान्तिके पूज्यः सर्वशत्रुनिवारणः ।। ६० ।।
पाशोऽयं स्वर्ण्णवर्ण्णाभः पाशभीतिधरो महान् ।
अपां पत्युः समीपे तं पूजयेत्सर्वसिद्धिदम् ।। ६१ ।।
नीलवर्ण्णोऽङ्कुशो वीरो वारितारिकरिव्रजः ।
निजायुधभयधरः पूजनीयो नीलान्तिके ! ।। ६२ ।।
गदाभयधरा वीरा जवा चारुतरा गदा ।
पूज्या बहिर्द्धनपतेः सर्वशत्रुनिवारिका ।। ६३ ।।
शूलं प्रबालमधुरं शून्याभयलसत्करम् ।
नानादुष्टक्षयकरं यजेत्पशुपतेर्बहिः ।। ६४ ।।
कोटिसूर्य्यप्रभं चक्रं सचक्राभयहस्तकम् ।
अनन्तस्य बहिः पूज्यं त्रैलोक्ये ख्यातविक्रमम् ।। ६५ ।।
पद्मं पद्मासनस्यापि बहिर्भागे यजेच्छुभम् ।
पद्माभयधरं धीरं सुन्दरं श्वेतरक्तभम् ।। ६६ ।।

कर्णिकायां प्रथमतः सखादीन्पूजयेत्ततः ।
अङ्गदेवार्च्चनं कृत्वा रुक्मिण्याद्यर्च्चनं ततः ।। ६७ ।।
देवास्ते वसुदेवाद्याः पूज्याः स्युश्च परंतप ।
मन्दराद्यास्ततः पूज्याः नारदादीन् यजेद्बुधः ।। ६८ ।।
ततो मन्त्री यजेत्तावादिन्द्रादीन् क्रतवश्च तान् ।
वज्रादींश्च ततो धीमान् ततः कृष्णार्च्चकार्च्चनम् ।। ६९ ।।
यथा स्यात्कथये भूप श्रूयतामेकचेतसा ।
श्रीकृष्णं वासुदेवं च नारायणमतः परम् ।। ७० ।।
देवकीनन्दनं चैव यदुश्रेष्ठं ततः परम् ।
वार्ष्णेयं च ततो मन्त्रीत्यसुराक्रान्तभारहम् ।। ७१ ।।
धर्मसंस्थापनं चाष्टौ नवमावरणे चरेत् ।
कृष्णं तत्रैव मेघाभं नवनीतकरं वरम् ।। ७२ ।।
वामकरे जानुयुग्मे शनैर्गन्तुकमास्मरेत् ।
शङ्खचक्रगदापद्मधरं चारुतरं हरिम् ।। ७३ ।।
पीतांशुकं भूषणाढ्यं वासुदेवमहं भजे ।
नारायणं दिव्यवेशं शशिवर्ण्णं मनोरमम् ।। ७४ ।।
शङ्खचक्रवराभीतिधरं धीरं भजाम्यहम् ।
देवकीनन्दनं शान्तं कान्तं जीमूतशोभनम् ।। ७५ ।।
पश्यतां स्मरतां वापि सर्वदुःखहरं भजे ।
यदुश्रेष्ठं वसिष्ठाद्यैर्मुनिभिः परिवन्दितम् ।। ७६ ।।
ज्ञानदं मोक्षदं चैव साधोर्दुष्टस्य तं नुमः ।
वार्ष्णेयं सदयं दीने निर्दयं राक्षसां कुले ।। ७७ ।।
वेणुपगद्मधरं वीरं वृन्दावनचरं भजे ।
असुराक्रान्तभारस्य हारिणे वनमालिने ।। ७८ ।।

पीतवासाय शान्ताय जगदाह्लादिने नमः ।
धर्मसंस्थापनं देवं गोपीगोगोपपालनम् ।। ७९ ।।
श्रीमद्वृन्दावनक्रीडं वंशीवादनकं भजे ।
सर्वत्र प्रणवं चादौ स्वे स्वे नाम्नि स देशिकः ।। ८० ।।
नमोऽन्तं च विधायाशु चतुर्थ्यन्तं च पूजयेत् ।
एतानावरणस्थांश्च देवान् देवीश्च भूपते ! ।। ८१ ।।
जलपुष्पाक्षतैः पुष्पैर्धूपदीपान्तमर्च्चयेत् ।
मनसा तुलसीपत्रैः पूजयेदतिभक्तितः ।। ८२ ।।
इत्येवं येऽपि कुर्वन्ति दारुब्रह्मशरीरिणि ।
विष्णौ कृष्णार्च्चनं कृत्वा सर्वान् कामानवाप्नुयुः ।। ८३ ।।
संसारसागरं घोरं तीर्त्वान्ते च हरेः पदम् ।
गत्वा तत्रैव हरिवत्पूजितः स्यान्न संशयः ।। ८४ ।।
एतदावरणस्थानां देवानामर्च्चनं विना ।
दारुब्रह्मतनोर्विष्णोः पूजा च निष्फला भवेत् ।। ८५ ।।

मुनय ऊचुः

दारुब्रह्मशरीरेऽस्मिन् विष्णौ चावाह्य यत्नतः ।
कृष्णं च पूजयेत्तावद्विधिना पूतदेशिकः ।। ८६ ।।
नवावरणगतान् भूयः कृष्णादीन् पूजयेच्च तान् ।
उक्तमेतत्कथं सूत ! भवता संशयोऽत्र नः ।। ८७ ।।
एतद्विवरणं ब्रूहि संशयं छिन्धि नः कृतान् ।

सूत उवाच

साधु साधु महाप्राज्ञा गूढतत्त्वार्थदर्शिनः ।। ८८ ।।
गुप्तमेतन्भवत्स्नेहात्कथयामि समासतः ।
अतस्तन्मध्यतः कृष्णं कल्पभूरुहमध्यगम् ।। ८९ ।।
दारुब्रह्मशरीरेऽस्मिन् पूजयेद्देशिकोत्तमः ।
तत्पीठबाह्यतश्चापि कृष्णादीन् पूजयेदतः ।। ९० ।।

अन्तर्बहिः पूजनीयो हरिः सर्वैश्च सर्वदा ।
भवतां संशयो माभूदित्थं पूजां समाचरेत् ।। ९१ ।।
एवं यः कुरुतेऽर्च्चनं प्रतिदिनं श्रीनीलशैलप्रभो-
र्दारुब्रह्मकलवरस्य मुनयो भक्त्या शुचिर्देशिकः ।
कृत्वाचावरणावलीसुरगणार्च्चामाशु भूमितले
भुक्त्वासौऽप्यखिलं सुखं सह सुतैश्चान्ते विमुक्तिं ब्रजेत् ।। ९२ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये अष्टसप्ततितमोऽध्यायः ।।

नवसप्ततितमोऽध्यायः

ब्रह्मोवाच

घण्टामानीय चास्त्रेण मन्त्रेण पुरतो न्यसेत् ।
आदौ प्रणवमुच्चार्य्य हुंकारं च ततः परम् ।। १ ।।
वदेत्ततो जगद्घण्टात्मने नम इति द्विजः ।
स्वाहामन्त्रे प्रयोज्याथ घण्टामन्त्रोऽयमीरितः ।। २ ।।
अनेन मनुना तत्र गन्धपुष्पे परिक्षिपेत् ।
अवगुण्ठनमाकुर्य्यात्कवचस्यैव मन्त्रतः ।। ३ ।।
एकतालं त्रितालं वा कुर्य्याच्चक्रस्य मन्त्रतः ।
घण्टायाः परितः कुर्य्याद्दिग्बन्धनमनेन तु ।। ४ ।।
प्रणवेन ततो मन्त्री धेनुमुद्रां च दर्शयेत् ।
अष्टवारं निजस्यापि मनुना तां परिस्पृशेत् ।। ५ ।।
किञ्चित् पुष्पं प्रगृह्याथ प्रार्थयेत्तां ततो नृप ! ।
घण्टोपरिस्थितं नित्यमायुधं त्वां रमापतेः ।। ६ ।।
वाहन त्वं क्षमस्वाद्य ह्यपराधं प्रचालनात् ।
जगन्मङ्गलकृन्नादे घण्टे दुष्टादिवारिणि ।। ७ ।।

त्वामत्र विष्णोः पूजायां चालयामि नमोऽस्तु ते ।
वाममुष्ट्याश्च तर्जन्यङ्गुल्यग्रेऽपि निवेशिते ।। ८ ।।
दक्षहस्ते ह्यधोवक्त्रे फुल्लपङ्केरुहाकृतौ ।
घण्टामुद्रेति विख्याता घण्टां प्रति च दर्शयेत् ।। ९ ।।
ततो घण्टां च वादयेत्तद्देवार्च्चनकर्मणि ।
त देव मन्त्रपठनं दशवारं चरन् पुनः ।। १० ।।
तवत्कालं प्रकुर्वीत घण्टानादं मनोरमम् ।
धूपपात्रं वर्त्तुलाङ्घ्रिद्वयं चारुतरोदयम् ।। ११ ।।
ईषद्विकाशिताम्भोजप्रख्यं रत्नाङ्गुलायति ।
वसुसंख्यपलैर्वापि दिक्संख्यैकपलैः कृतम् ।। १२ ।।
बहुस्थानं समन्ताच्चतुरङ्गुलसमन्वितम् ।
मृणालसदृशाकारे मध्ये सद्ग्रन्थिसंयुतम् ।। १३ ।।
एतादृशं धूपपात्रं देवतामोदवर्द्धनम् ।
पूजकस्य भवेत्सिद्धिः समृद्धिश्चैव जायते ।। १४ ।।
पाकं धूपं च दीपं च तथैवारात्रिकावलिम् ।।
होमं चान्यं च तत्सर्वं कुर्य्याद्वैष्णववह्निना ।। १५ ।।
वैष्णवाग्निं विना राजन्नभ्रजालस्यतोऽपि वा ।
कुर्य्यात्कर्माणि चेन्मन्त्री यजमानोऽतिवेगवान् ।। १६ ।।
पूजकोऽपि भवेद् दुःखी तत्सर्वं कर्म निष्फलम् ।
तस्माद्वै वैष्णवाग्निस्तु सर्वत्र फलदः स्मृतः ।। १७ ।।
संदग्धदृढकाष्ठानामङ्गारैः घृतजर्जरैः ।
वैष्णवाग्निं सुविकैश्च त्वेकविंशतिगुग्गुलैः ।। १८ ।।
एतैर्धूपो विधातव्यो विष्णुप्रीणनहेतवे ।
उशीरं जातिकापत्रं जातीफललवङ्गके ।। १९ ।।

गुग्गुलं तुलसीपत्रं हीरवेरं च चन्दनम् ।
एलाकर्पूरविल्वाख्यचन्दनानि तथैव च ।। २० ।।
कुन्दुरं त्वगुरं चैव कस्तूरीं कुङ्कुमं तथा ।
मुरामांसीं ततो धीमान्मुस्तकां नागकेशरम् ।। २१ ।।
घृतं मधु सिता चेति धूपद्रव्याणि तानि च ।
एकविंशानि शस्तानि कथयन्ति मनीषिणः ।। २२ ।।
एतानि चूर्णितान्येव समभागानि नित्यशः ।
सितामध्वाज्यतः सर्वं मिलितं तत्र धूपयेत् ।। २३ ।।
सितामध्वाज्यकर्पूरचन्दनागुरुकुङ्कुमैः ।
गुग्गुलैर्वापि धूपेऽस्मिन् त्वष्टाङ्गं कथ्यते बुधैः ।। २४ ।।
एतत्त्रैविधकं धूपं भक्त्या धूपं समाचरेत् ।
श्रद्धया परया भूप भक्त्या धूपं समाचरेत् ।। २५ ।।
यन्निरीक्षणमात्रेण नरः स्यात्क्षीणकल्मषः ।
प्रत्येकं सकलस्यास्य द्रव्यस्य कर्षको भवेत् ।। २६ ।।
तस्यार्द्धं वा चरेन्मत्री तदर्द्धं त्वधमं स्मृतम् ।
धूपधूम्रपरित्यागाद् योगमायाञ्चितेक्षणः ।। २७ ।।
देवस्तया विमुक्तः स्याज्जगद्बोधनचेतनः ।
अतो हेतोर्महाभक्त्या धूपं कुर्य्यात् प्रयत्नतः ।। २८ ।।
वीक्षणादिविधानेन संस्कृत्य धूपमुत्तमम् ।
दद्यात्तावददातं तु प्रार्थयेद्देशिकोत्तमः ।। २९ ।।
नानासद्वृक्षसंभूते फलमूलरसच्छदैः ।
कथितोऽयं महाधूपो महानन्दप्रदः शुचिः ।। ३० ।।
गृह्यतां परमानन्दे श्रीपते सदनुग्रहात् ।
अङ्गुलित्रयमाकुञ्च्य तर्ज्जनीमुञ्चितां चरेत् ।। ३१ ।।

तर्ज्जनीमूलसंलग्नामङ्गुष्ठां प्रविधाय च ।
धूपमुद्रा प्रशस्तासौ दर्शनीयार्च्चनेऽर्च्चकैः ।। ३२ ।।
उपचारांश्च तान् सर्वान् मन्दं मन्दं समाचरेत् ।
धूपं दीपं च नैवेद्यं सत्वरं दापयेद्बुधः ।। ३३ ।।
एतत् त्रयं यदा भूप ! विलम्बेन चरेद्बुधः ।
तदा विष्णोर्महान् रोषो जायते नात्र संशयः ।। ३४ ।।
विष्णौ रुष्टे च तत्सर्वं विफलं जायते परम् ।
तस्माद् यत्नेन सततं धूपादिं सत्वरं चेरद् ।। ३५ ।।
विष्णोरुद्बोधकत्वाच्च धूपोऽयं परमो मतः ।
दर्शनात्कीर्त्तनाच्चैव श्रवणाद्वापि चिन्तनात् ।। ३६ ।।
सर्वेषां पापनिचयं तत्क्षणान्नाशयेत् ध्रुवम् ।
तस्मात्सर्वोपचाराणां धूपस्तु प्रवरः स्मृतः ।। ३७ ।।
ग्रीष्मे तु गुग्गुलस्तावत्कस्तूर्य्या धूपदानतः ।
दशाहोरात्रयागस्य फलं प्राप्नोति मानवः ।। ३८ ।।
दरविकशितपद्मोल्लासि दीपस्य पात्रं
वसुदलपरियुक्तं षड्दलं वा तदेव ।
भवति तदुपरिष्टात्कर्णिकाद्यङ्गुलोच्चौ
चरणगलसुकुक्षि ग्रन्थियुक्तं च कुर्य्यात् ।। ३९ ।।
दशाङ्गुलप्रमानाढ्यं तावत्पलविनिर्मितम् ।
एतादृशं दीपपात्रं कुर्य्यादेव मुदे जनः ।। ४० ।।
शुद्धसूक्ष्माम्बरच्छदैर्घृतकर्पूरचूर्णकैः ।
लवङ्गकुसुमप्रस्थैश्चतुर्भिः मुखसंयुतैः ।। ४१ ।।
वेदाङ्गुलप्रमाणाढ्यैः कर्ण्णिकावर्त्तीराचरेत् ।
पत्रावर्तीः प्रकुर्वीत ह्येकवक्त्रां सुशोभनाम् ।। ४२ ।।

वर्त्तीरेतादृशीः कुर्य्यान्नव वा सप्त वा नृप ! ।
पञ्च वा देशिकस्तावद्दीपदानं चरेत्ततः ।। ४३ ।।
सर्पिभिर्जर्जरास्ताः स्युस्तिलतैलेन वा पुनः ।
तादृशीभिश्च वर्त्तीभिः दीपं कृत्वा स देशिकः ।। ४४ ।।
वीक्षणादिविधानेन संस्कृत्य प्रार्थयेद्विभुम् ।
सुप्रकाशो महादीपो महाबाहो ! महाप्रभो ! ।। ४५ ।।
गृह्यतां भोजनार्थाय तमोनाशाय माधव ! ।
मूलमन्त्रं समुच्चार्य्य संप्रार्थ्य स च पूजकः ।। ४६ ।।
ऊद्‌र्ध्वं मध्ये तथाधश्च दर्शयेद्दीपमुत्तमम् ।
वारत्रयं नेत्रदेशे हृद्देशेऽपि तथैव च ।। ४७ ।।
नाभौ तथा भ्रामयेत्तं मन्दं मन्दं स देशिकः ।
यथापारावतो गच्छेत्खेतलं तत्र शीतले ।। ४८ ।।
पुनः किञ्चित्समुत्पत्य मध्ये खेलति लीलया ।
पुनश्चाधः स्थलं प्राप्य मण्डलाकारतश्चलन् ।। ४९ ।।
पुनश्चोद्‌र्ध्वपथा गच्छेदुद्वत्सं खेलते पुनः ।
अतः प्रदेशं सङ्गच्छेत्पुनस्तिर्य्यग्गतिं चरेत् ।। ५० ।।
तथैव दर्शयेद्दीपं विष्णोरग्रे स देशिकः ।
एवं त्रिवारं तं दीपं दर्शयेत्स्निग्धचेतसा ।। ५१ ।।
न्यूनं वाप्यधिकं वापि न कुर्य्यात्पुरतो हरेः ।
दीपज्वालाद् व्यङ्गुला स्यात् मध्यमा च त्रिकाङ्गुला ।। ५२ ।।
एकाङ्गुलो चेदधमा ततो न्यूनाऽधमाधमा ।
प्रसूनमुद्रा चोत्ताना दीपमुद्रा स्मृता बुधैः ।। ५३ ।।
दीपदानानन्तरतो मुद्रां तां दर्शयेद्‌बुधः ।
अर्घ्ये च मधुपर्के च स्नानवस्त्रद्वये तथा ।। ५४ ।।

यज्ञोपवीते धूपे च दीपे नैवेद्यके तथा ।
दद्यादाचमनं मन्त्री ह्यर्घादि नवकर्मसु ।। ५५ ।।
दीपदानानन्तरतो दद्यात्पुष्पाञ्जलित्रयम् ।
पूर्ववत्पाद्यमेवं च दद्यादाचमनं तथा ।। ५६ ।।
हस्तत्रितयमानाढ्यं चतुरस्त्रं मनोहरम् ।
मण्डलं तण्डुलाचूर्ण्णैः कुर्य्याद्विष्णोः पुरःस्थले ।। ५७ ।।
रम्भापत्रैः पवित्रैस्तैरभावेऽपि पलाशकैः ।
अथवा शालपर्ण्णैश्च मण्डलंच्छादनं चरेत् ।। ५८ ।।
तेषु पत्रेषु सूक्ष्मं तच्छुद्धं चारुतरं पुनः ।
वस्त्रं तु पातयेद्धीमान् तद्वस्त्रोपरि सत्तमः ।। ५९ ।।
रत्नपात्रं च सौवर्ण्णं राजतं पित्तलोद्भवम् ।
महत्तरं स्फुरद्रूपं स्थालीपात्रं तु पातयेत् ।। ६० ।।
पलैः सहस्रसंख्यातैरथवा त्रिशतैः शतैः ।
पञ्चाशद्भिश्च सञ्जातं तत्पात्रं पातयेत्पुनः ।। ६१ ।।
भक्ष्यं भोज्यं तथा चोष्यं लेह्यं चर्व्यं तु पेयकम् ।
षड्भिरेतैः रसैर्युक्तं दिव्यं नैवेद्यमुत्तमम् ।। ६२ ।।
स्थापयेत्तादृशं पात्रे पत्रवस्त्रोपरि स्थिते ।
मूलमन्त्रेण तेनैवं वीक्षणं तत्र सञ्चरेत् ।। ६३ ।।
ऋषितीर्थेऽस्त्रमन्त्रेण प्रोक्षयेत्प्रोक्षणीजलैः ।
चक्रस्य मुद्रया रक्षेच्चक्रमन्त्रेण मन्त्रवित् ।। ६४ ।।
अधोमुखेन दक्षेण प्रसृतेन करेण च ।
वायुबीजेन नैवेद्यगतदोषं विशोषयेत् ।। ६५ ।।
अग्निबीजेन तेनाशु दहेत्तदत्र दोषकान् ।
महामुद्रां भ्रामयित्वा ह्यधोमुखतया पुनः ।। ६६ ।।

वारुणेनैव बीजेन तस्याप्लावनमाचरेत् ।
शोषणे पञ्चवाराणि दहने सप्तवारतः ।। ६७ ।।
अप्लावे दशवाराणि बीजानां जपमाचरेत् ।
कवचस्य च मन्त्रेण विदधीतावगुण्ठनम् ।। ६८ ।।
अरिमन्त्रेण तत्कुर्य्यात्तालत्रयमतः परम् ।
दिशां वन्दनमाकृत्य ततो हृदये मन्त्रतः ।। ६९ ।।
धेनुमुद्रां प्रदर्श्याथ शिखामन्त्रेण देशिकः ।
अमृतीकरणं कुर्य्यान्मूलेनाष्टौ जपं चरेत् ।। ७० ।।
ॐकारोच्चारणेनैव गन्धं पुष्पं त्रिभिः क्षिपेत् ।
एवं त्रिधा क्षिपेन्मन्त्री नैवेद्योपरि सर्वतः ।। ७१ ।।
पुष्पाञ्जलिं गृहीत्वाथ प्रार्थयेत्परमेश्वरम् ।
निवेदयामि भगवन् ! गृहाणेदं हविर्हरे ।। ७२ ।।
निवेदनमनुश्चायं पूजायां स्वस्वनामतः ।
पुष्पाञ्जलिं समर्प्याथ नैवेद्यगतसद्रसान् ।। ७३ ।।
प्रापयेत्कमलाभर्त्तुरास्यदेशं स देशिकः ।
ततोऽम्बुचुलुकि हस्ते गृहीत्वा दक्षिणेऽर्च्चकः ।। ७४ ।।
दत्त्वामृतोपस्तरणमसि स्वाहेति चाब्रवीत् ।
विकचाब्जनिभे वामे ग्रासमुद्रा समीरिते ।। ७५ ।।
दक्षिणाङ्गुलिभिः प्राणादिंश्चैव जुहूयात्क्रमात् ।
कनिष्ठानामिकाङ्गुष्ठतयाग्रं परियोगतः ।। ७६ ।।
प्रथमाहुतिमुद्रेयं सर्वशास्त्रे सुकीर्त्तिता ।
अङ्गुष्ठातर्ज्जनीमध्यायोग चैव द्वयाहुतिः ।। ७७ ।।
मध्यमानामिकाङ्गुष्ठयोगे स्यादाहुतित्रयम् ।
कनिष्ठया विना योगाच्चतुर्ण्णां चतुराहुतिः ।। ७८ ।।

सर्वाङ्गुलीनां योगेन पञ्चाहुतिरियं नृप ! ।
प्राणापानौ व्यानोदानसमानाश्चेति पञ्च तान् ।। ७९ ।।
प्रणवान्तांश्चतुर्थान्तान् स्वाहान्तांश्च ततो वदेत् ।
अन्वाहार्य्यस्य वह्नेश्च मुखे स्थानं परन्तप ! ।। ८० ।।
आहवनीयं कण्ठेऽपि गार्हपत्यो हृदि स्थितः ।
संस्थाप्याप्युदरे स्थानमावसथ्याय सर्वतः ।। ८१ ।।
एतादृशाः पावकाश्च चिन्यनीया यथास्थलम् ।
मुखेऽपि जुहूयात्प्राणान् तत्र तत्र च चिन्तयेत् ।। ८२ ।।
स्वस्वस्थानेषु तान् वह्नीन् प्राणांश्चैव विचिन्त्य सः ।
तांस्तांश्चाभिहुनेन्मन्त्री मुखे चैव विचक्षणः ।। ८३ ।।
प्राणाहुतिं चोत्तरतोऽपानाहुतिञ्च वारुणात् ।
व्यानाहुतिं दक्षिणतोऽप्युदानाहुतिमैन्द्रतः ।। ८४ ।।
समनाहुतिमाकुर्य्यान्मध्यदेशे च देशिकः ।
तत्पञ्चानलसंनद्धं देवतासंस्फूरत्प्रभम् ।। ८५ ।।
कुण्ठमेवेति संचिन्त्य दक्षहस्तं स्रुवं पुनः ।
शृङ्गं विचिन्त्य वामं वै देशिकोऽहं च होमकृत् ।। ८६ ।।
इदं नैवेद्यनिचयं हविरित्थं विचिन्त्य च ।
प्राणादीन् होमयेत्तत्र त्विति चिन्ता परोऽर्च्चकः ।। ८७ ।।
देवतामुखकुण्डेऽस्मिन् पञ्च पाणाहुतिश्चरेत् ।
अर्च्चकेन पुनस्तस्त्र वैश्वदेवार्थमादरात् ।। ८८ ।।
तुलसीदलमाधृत्य नैवेद्यस्योपरिस्फुटम् ।
हस्तभ्रमणमाकृत्य पुनर्वक्त्रे प्रदीपयेत् ।। ८९ ।।
वैश्वदेवं कृतमिति ध्यातव्यं भूपसत्तम ।
दक्षजानुगताण्र्णं यद्भवेदोङ्कारसंयुतम् ।। ९० ।।

रकारेण पुनर्युक्तं वकारेण युतं चरेत् ।
सानुस्वारं तदेव स्यात्तारपूर्वं भजेत्ततः ।। ९१ ।।
अनिरुद्धमिदं बीजं विष्णुप्रीतिकरं द्विजः ।
नमः शब्दं परायैवासने चेति वदेत्तमः ।। ९२ ।।
अनिरुद्धाय नैवेद्यं कल्पयामीति मन्त्रतः ।
सर्वं नैवेद्यमेतेन दद्याद्कैमुरजिष्णवे ।। ९३ ।।
अनिरुद्धाख्यमन्त्रेण कृष्णाय परमात्मने ।
सर्वनैवेद्यनिचयं दद्याच्चेन्मुदितो हरिः ।। ९४ ।।
अतोऽप्यनेन मनुना दिव्यं तन्तुं नृपोत्तमः ।
मूलमन्त्रोच्चारणेन कृष्णायेति ततो वदेत् ।। ९५ ।।
प्राणायेति ततो ब्रूयात्स्वाहाशब्दमतः परम् ।
एवं पञ्चाहुतिः कार्य्याह्ययं पञ्चाहुतिक्रमः ।। ९६ ।।
अनिरुद्धाख्यमन्त्रेण पुनर्नैवेद्यदापनम् ।
कृष्णोपभुक्तं तत्सर्वं नैवेद्यं चिन्तयेद्बुधः ।। ९७ ।।
भोजनान्ते हरेस्तावत्सन्तोषो जायते महान् ।
तस्यामृतकवर्षिण्या हृष्टो लक्ष्मीपतिः पुनः ।। ९८ ।।
पात्राणि पूरितान्येव हृतसाराणि यज्ञिरे ।
इति सञ्चिन्त्य मनसा देशिको जलमादधत् ।। ९९ ।
ततोऽमृतापिधानमसि स्वाहेति संवदेत् ।
भुक्तोत्तरं चलुं दद्यान्नमस्कृत्यार्च्चकः पुनः ।। १०० ।।
मूलेनाचमनं दद्यात्क्रम एषोऽर्च्चने हरेः ।
पुनः शृणु नृपवर नैवेद्यस्य च कारणम् ।। १०१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये नवसप्ततितमोऽध्यायः ।।

अशीतितमोऽध्यायः

ब्रह्मोवाच

रसैः षड्भिश्च सम्पूर्णं दिव्यान्नं परमं महत् ।
चतुर्विधं महाश्लाघ्यं नानापूपसमन्वितम् ।। १ ।।
व्यञ्जनैः प्रचुरैर्युक्तं खेचरी पायसान्वितम् ।
पावनं लोभनीयं तु नैवेद्यं पुष्टिवर्द्धनम् ।। २ ।।
रम्यं प्रशस्यं हृद्यं च सद्योजातं परिष्कृतम् ।
सुलक्ष्यं सम्भवैर्विप्रैर्हेतुभूतैः समुद्यतैः ।। ३ ।।
लक्ष्यैव पाचितं चारु दिव्यं नैवेद्यजालकम् ।
लक्ष्मीपते महाबाहो ! जगन्नाथप्रभो विभो ! ।। ४ ।।
श्रीमन्नीलाचलाधीश गृहाणेदं मनोहरम् ।
इत्युक्त्वा देशिकस्तत्र तन्नैवेद्यं समर्पयेत् ।। ५ ।।
यतो नित्यं लक्ष्मीपतेर्भोजनस्थानमीरितम् ।
अतश्च पर्वताकारं व्यञ्जनैः पूपसंयुतैः ।। ६ ।।
नानायुतैश्च सम्भारैः षड्रसैः कृतवान्नृप ।
नानाविधं च नैवेद्यमेतच्च भोजनस्थलम् ।। ७ ।।
दक्षहस्तस्य सर्वाभिरङ्गुलिभिर्नियोजने ।
तद्गते जायमाने स्यान्मुद्रा नैवेद्यदापने ।। ८ ।।
एतां मुद्रां दर्शयेद्राक् भोजनान्ते महीपते ।
हस्तद्वयेऽनामिकाभ्यां त्वङ्गुष्ठे द्वे नियोजयेत् ।। ९ ।।
अन्याः प्रसार्य्य चोर्द्ध्वं स्यान्मुद्रा नैवेद्यकेऽपरा ।
एवं द्विधा सा च मुद्रा नैवेद्यस्य परन्तप ! ।। १० ।।
निर्द्दिष्टविधिना ते तु परिकल्प्य स मन्त्रवित् ।
दर्शयेत्पूजको धीमान् विष्णुप्रीणनहेतवे ।। ११ ।।

सर्वब्रह्ममहेन्द्रवह्निवरुणश्रीमत्कुवेरादिभि-
र्देवैर्महोपचारककरैः संसेवितः कान्तया ।
लक्ष्म्या स्वस्वसमीपदेशगतया रत्नाम्बुसद्भाजनं
मातः स्वादु ससौ प्रभाम्बुकलितं हस्ते वहन्तीक्षितः ।। १२ ।।
ब्रह्माण्डैकपतिः सतामतिगतिर्निलाचलान्तस्थिति-
र्दारुब्रह्मकलेवरोऽमरवरो भोगादरः सुन्दरः ।
नम्रीभूतसुरालितापसगतोद्भासिस्तवैः संसृतो
भुङ्क्ते देशिक चारुहस्तकमले स्मेरैर्जगन्मोहयन् ।। १३ ।।
सलीलं सुराणां मनः प्रीणयन्द्राक्
स्वयं मन्दं मन्दं हसन् हासयंश्च ।
सुदित्यं च नव्यं सुभवैः कृतं तत्प्रभुतं
सुरम्यं तदन्नं च योऽत्ति ।। १४ ।।
इति चिन्त्यार्च्चको धीमान् होमारम्भं ततः चरेत् ।
चित्तेन भक्तिभावेन सर्वशुद्धात्मना पुनः ।। १५ ।।
अन्यानां देवतानां च पूजने क्षितिपोत्तम ।
स्वशक्त्या सेव्यमानोऽपि भुञ्जते तांश्च चिन्तयेत् ।। १६ ।।
देवाग्रे पूर्ववद्राजन् वैष्णवाग्निं विधिं चरेत् ।
तत्राग्नौ देशिकः श्रीमान् तिलानां पायसस्य च ।। १७ ।।
घृतस्य मिलनं कृत्वा पञ्चविंशतिसंहुनेत् ।
मूलेन मनुना प्राज्ञः पश्चाद्व्याहृतिभिर्हुनेत् ।। १८ ।।
गन्धाद्यैः पूजयेदग्निं ततस्तं च विसर्जयेत् ।
प्रातः काले भूमिगतो वह्निश्च नृपसत्तम ! ।। १९ ।।
मध्यं दिनेऽन्तरीक्षस्थः सायाह्ने च रवौ स्थितः ।
रात्रौ स्वर्गे स्थितो देवोऽनलोऽयं नरपालकः ।। २० ।।
यस्मिन्काले वैष्णवाग्निं करिष्यति सदेशिकः ।
तत्तत् स्थानात्तत्तु भूयः स्वबीजेनाह्वयेद्ध्रुवम् ।। २१ ।।

तेन बीजेन तस्यैव विसर्ज्जनमसौ चरेत् ।
एतद्विधं यदा कर्त्तुं न शक्नोति च देशिकः ।। २२ ।।
होमाभावे जपं कुर्य्यात् द्विगुणं प्रीतये हरेः ।
जपान्ते प्रार्थयेद्देवं देशिकः श्रद्धयान्वितः ।। २३ ।।
वह्नितीर्थं नीतितरैर्नीरैर्नीरदसुन्दर ।
अपोशानं सौरभाढ्यमङ्गीकुरु कृपानिधे ।। २४ ।।
शालिचूर्ण समुद्भूते पिष्टसप्तकवर्णके ।
घृतेन दीप्तं भो नाथ सुखनीराजनं शुभम् ।। २५ ।।
मयादत्तं महाबाहो गृहाण मधुसूदन ।
इति संप्रार्थ्य मूलेन सुखनीराजनार्पणम् ।। २६ ।।
अतः परं बाहुवलिर्दापयेत्तद्वदाम्यहम् ।
वैष्णवाग्निसुसंपक्वमिदमन्नं चतुर्विधम् ।। २७ ।।
सद्योजातं घृताक्तं तु ताम्रपात्रस्थितं पुनः ।
ऐशान्ये हस्तमात्रेण जाते च तत्र मण्डले ।। २८ ।।
स्थापितं तत्र पात्रेऽपि ततः पीठस्य कल्पना ।
पुनस्तत्र स्मरेत्प्राज्ञः परमेष्ठ्यात्मिकां शुभाम् ।। २९ ।।
शक्तिमध्ये न्यसेद्धीमान् इन्द्रादीन् परितो न्यसेत् ।
तन्मध्ये स्थापयेद्देवं चक्रं चैव सुदर्शनम् ।। ३० ।।
बलिपात्रमिदं मन्त्री रक्षितुश्च द्विजन्मनः ।
हस्तद्वये समानीय बहिर्गच्छेच्छनैः शनैः ।। ३१ ।।
घण्टां धूपस्य सत्पात्रं दीपस्यापि च भूपते ।
जलपात्रं च पुष्पाणां पात्रं गन्धस्य चैव हि ।। ३२ ।।
ग्राहयित्वा द्विजैः सर्वं सिंहासनपदात्पुनः ।
बहिर्गच्छेद्देशिकोऽयं बलिदानाय सत्वरम् ।। ३३ ।।
चन्द्रमण्डलवच्छत्रं चामराणि शुभानि च ।
भेरीमृदङ्गपटहान् काहालं वंशवर्द्धकम् ।। ३४ ।।

मृदङ्गकांस्यतालांश्च करतालास्तथैव च ।
नर्त्तकान् गायकांदींश्च दिव्यस्त्रीश्च मनोरमाः ।। ३५ ।।
सालङ्कारासुदुश्याश्च निजयौवनगर्विताः ।
जयं च विजयं चैव महेशं च ततः परम् ।। ३६ ।।
वैनतेयं विघ्नराजं इन्द्रादींश्च दिशांपति ।
क्षेत्रपालं च भूपालं देवादींश्च पृथक् पृथक् ।। ३७ ।।
स्व स्व नामचतुर्थ्यन्तान् नमोऽन्तान् प्रणवादिकान् ।
गन्धादिना पूजयेत्तान् मन्त्री विधिविधानतः ।। ३८ ।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये अशीतितमोऽध्यायः ।।

एकाशीतितमोऽध्यायः

ब्रह्मोवाच

अतः परं बहिर्गच्छन् प्रासादस्य समन्ततः ।
गोमयाम्बुनिपातेन विलिप्य च दिशः स्थलीम् ।। १ ।।
कुमुदादि समावाह्य पूजयित्वा बलिं क्षिपेत् ।
प्रथमं कुमुदं मन्त्री पूजेयेच्चन्दनादिना ।। २ ।।
कुमुदाख्यं पुण्डरीकं वामनं च ततः परम् ।
शङ्कुकर्ण्णं ततः सर्वनेत्रं च सुखदं तथा ।। ३ ।।
सुप्रतिष्ठन्तमेवं च तांश्च सर्वान् तथार्च्चयेत् ।
प्रत्येकं भोजयेत्तावन्महोत्सवतया नृप ।। ४ ।।
ॐकारं च समाभाष्य नमः शिरच्छिदं ददेत् ।
देवेभ्य इति शब्दं तु वदित्वा च विशेषकम् ।। ५ ।।

जले क्षिपेत्तन्मन्त्रेण बलिशेषं महीधव ।
त्रिकालमेवं तत्कुर्य्याद्द्विकालं वा स देशिकः ।। ६ ।।
एककालं च वा कुर्य्याद्बलिदानं च देशिकः ।
बलिकर्मकृतां राजन् पुत्रपौत्रादिसंपदः ।। ७ ।।
वर्द्धन्ते दीर्घजीवित्वं लभन्ते बलिदानतः ।
विष्णुः प्रीतिकरो जातः पूरयेत्सकलेस्पितम् ।। ८ ।।
एतत्कर्म प्रतिदिनं बलिदानाख्यमुत्तमम् ।
कर्त्तुं चेत् देशिकोऽशक्तस्तदोत्सवदिने चरेत् ।। ९ ।।
यदोत्सवेषु नो कुर्य्याद्यजमानस्य संक्षयः ।
पूजा सा विफला जाता मन्त्री दुःखं च विन्दति ।। १० ।।
ऐशान्यदेशे तं ध्यायेद्विष्णोर्भक्त्या इमं नृप ।
गदाब्जशङ्खारिषट् च चतर्बाहुं महोदयम् ।। ११ ।।
तर्ज्जयन्तं च तर्ज्जन्या वामनासातलस्थया ।
सर्वं जगद्भृशतरं तं ध्यात्वा देशिकस्तथा ।। १२ ।।
नैवेद्यनिचयात्सारमुद्धरेद्धरणीधव ।
तुरीयांशं समादाय तस्मै चण्डं समर्पयेत् ।। १३ ।।
तच्चण्डप्रापणाद्देव विश्वक्सेनो महामतिः ।
सन्तोषमभजत्तेन विष्णुश्चैव प्रसीदति ।। १४ ।।
चतुर्थांशं नरे दद्यात् द्वादशं वा प्रदापयेत् ।
अथवा षोडशांशं तु चण्डत्वेन प्रकल्पयेत् ।। १५ ।।
चण्डहीनं यदा राजन् नैवेद्यं दीयतेऽर्च्चकः ।
पूजको राक्षसो भूयाद्दातुः स्याच्चाप्यधो गतिः ।। १६ ।।
तस्माद् यस्मान्महीपाल चण्डनैवेद्यमर्च्चयेत् ।
तं नैवेद्यं न गृह्णन्ति केशवाद्याः सुधाशनाः ।। १७ ।।

विश्वक्सेनस्य यो भागो दद्यात्तं पूजकाय वै ।
पूजकोऽपि च तल्लब्ध्वा यदा सन्तोषभाग् भवेत् ।। १८ ।।
तद्गृह्नाति च नैवेद्यं तदा विष्णुः प्रसीदति ।
अर्च्चकस्यास्य सन्तोषान्नैवेद्यं चैव निष्फलम् ।। १९ ।।
अतो विष्णोश्च पूजासु ह्यन्येषां च नराधिप ।
मूलरूपोऽर्च्चकस्तावद्यत्करे भुञ्जतेऽमराः ।। २० ।।
यत्नात्तं तोषयेद्यस्तु तस्मै विष्णुः प्रसीदति ।
देशिको यो धर्मशीलः सर्वज्ञो ज्ञानवान् भवेत् ।। २१ ।।
सत्कर्मनिरतो भूयात् पूज्यः कौशल्यवान् वशी ।
तेनार्च्चते हरो भूप सर्वसिद्धिमनोरथ ।। २२ ।।
एतेषामपि देवानां भद्रायाश्चण्डमेव च ।
चण्डमेवं तु यद्भागं तं दद्यात् ब्रह्मचारिणे ।। २३ ।।
यतः स चण्डरूपोऽपि त्वतः नैवेद्यतः पुन ।
दद्याच्चेत्सकलं कर्म सिद्धिर्भवति भूपते ।। २४ ।।
मातङ्गिनीं पुनः श्रीमन् भद्रा नैवेद्यतः पुनः ।
दद्याच्चण्डं परं मन्त्री न दद्याच्चेदमङ्गलम् ।। २५ ।।
मातङ्गिनीं तदा ध्यायेन्मातङ्गोपरिसंस्थिताम् ।
कपालकारहस्ताब्जां मालां विद्याधरां पराम् ।। २६ ।।
मौलौ चन्द्रार्द्धललितां सर्वालङ्कारभूषिताम् ।
एवं ध्यात्वार्पयेच्चण्डं देवीपूजासु भूपते ।। २७ ।।
मूर्त्तिनां च पृथक् पूजा जायते च नृपोत्तम ।
भिन्नं भिन्नं ततश्चण्डं दापयेद्देशिकोत्तमः ।। २८ ।।
लक्ष्मीपतेश्च पूजायां विश्वक्सेनोऽतिवैष्णवः ।
हरार्च्चने च दण्डश्च देव्या मातङ्गिनी तथा ।। २९ ।।

गणेशस्य च कुण्डेऽपि तेजश्च भवितुस्तथा ।
एते पूजासु चण्डार्हे ह्यन्यथा कर्म निष्फलम् ।। ३० ।।
हरेच्चण्डं तु यद् भूप देशिकः प्रतिदापयेत् ।
चण्डं दद्यात्ततो विप्रो मूलमन्त्रं वदेत्पुनः ।। ३१ ।।
ततो द्वादशगण्डूषान् विष्णुं प्रति समर्पयेत् ।
मन्त्रं त्रिवारं जप्त्वा वै जलधारां समर्पयेत् ।। ३२ ।।
अथार्च्चकोऽसौ हृदये विचिन्त्य तं नन्दसूनुं नितरां प्रसन्नम् ।
गन्धं प्रसूनोत्तमधूपदीपैर्दूर्वाक्षतैस्तं परिपूजयेद्द्राक् ।। ३३ ।।
तन्मूलमन्त्रं वसुवारतो वा
जपेत्पुनः पञ्चदश द्विजाग्र्यः ।
अर्घ्यस्य मुद्रां परिदर्श्य दद्या-
द्विलोकनार्घ्यस्तरसाऽथ मन्त्री ।। ३४ ।।
गण्डूषदानानन्तरतो न चेत्ताम्बूलदानतः ।
प्रसन्नार्च्चमिमां कुर्य्यात्सर्वकामफलप्रदम् ।। ३५ ।।
न कुर्य्याच्चेत्प्रसन्नार्च्चां पूजा न स्याच्छुभप्रदा ।
न प्रसन्नोऽपि भगवान् ह्यतस्तां यत्नतश्चरेत् ।। ३६ ।।
लवङ्गकर्पूरगुवाकजातीफलानि यत्नात्परिचूर्णितानि ।
पक्वेषु ताम्बूलदलेषु कृत्वा समर्पयेत्तन्मधुसूदनाय ।। ३७ ।।
तादृशा विटिका रम्याः स्वर्ण्णपात्रतले स्थिताः ।
संस्कृतास्ता महीपाल भोजनान्ते समर्पयेत् ।। ३८ ।।
कर्पूरचन्दनयुतानि सुवासितानि
खण्डीकृतानि च फलानि मनोहराणि ।
पूगीफलानि हरये परिपादयेद्वै
जातीलवङ्गवरचन्दनसंगतानि ।। ३९ ।।

ततोऽन्यथा चेद् भवति तन्न गृह्णाति माधवः ।
ताम्बूलान्नोऽर्च्चने तावद्वन्दनां च समर्पयेत् ।। ४० ।।
पूर्वस्तुतिं प्रकुर्वीत कथ्यते नृपसत्तम ।
करद्वयं संपुटितं कृत्वा स देशिकोत्तमः ।। ४१ ।।
नाभिदेशे च हृत्पद्मे शिरोदेशे निधाय च ।
पूर्ववत्संस्तुवन् भक्त्या सर्वं चापि समर्पयेत् ।। ४२ ।।
दन्तोल्लेखनकाचाममुखवासश्च चन्दनः ।
माल्यचामरछत्रैश्च नानावाद्यैर्मनोहरैः ।। ४३ ।।
गीतनृत्यैर्महाराज सोपहारैर्हरिः पुनः ।
तोषयेदतिभक्त्या च चलुकोदकदानतः ।। ४४ ।।
मूलमन्त्रं समुच्चार्य्य त्वर्पयेच्च पृथक् पृथक् ।
एकैकेन पलेनैव निर्मिते हेमपात्रके ।। ४५ ।।
ऊर्द्ध्वं चोत्पलपत्राभे मध्ये डम्बरुमध्यवत् ।
ठवर्ण्णाकृतिसत्पादे तादृशेऽपि मनोहरे ।। ४६ ।।
कर्ण्णिकापीठवत्पीठे कर्पूरावर्त्तिमाचरेत् ।
दिव्यकर्पूरचूर्ण्णे तं तत्पात्रे परिसंस्थितम् ।। ४७ ।।
वीक्षणादिविधानेन संस्कृत्य वृत्तिमुज्ज्वलम् ।
समर्पयेद् भगवतो घ्राणदेशेऽपि देशिकः ।। ४८ ।।
तद्दीपपात्रे भूपाल पूर्ववद्वर्त्तिसप्तकम् ।
कृत्वा मध्ये कर्ण्णिकाया एवं वर्त्तिमनोहराम् ।। ४९ ।।
समुज्ज्वलां विधायाशु संस्कृत्य पूर्ववद्द्विजः ।
तन्नयेनेत्रपर्य्यन्तं त्रिवारं भ्रामयेच्छुभम् ।। ५० ।।
ततोऽप्यधोऽधरस्यान्ते तद्वच्च भ्रामयेत्पुनः ।
ततोऽधश्च नाभिदेशे त्रिवारं भ्रामयेत्तथा ।। ५१ ।।

नाभितो नेत्रपर्य्यन्तं नयेच्छीघ्रं द्विवारतः ।
एवं विधिं त्रिवारं तु विष्णोरारात्रिकां चरेत् ।। ५२ ।।
हरेस्त्रिकामपूजासु दिव्यमारात्रिकाद्वयम् ।
ये कुर्वन्ति च पश्यन्ति ते सर्वे मानवोत्तमा ।। ५३ ।।
पुत्रपौत्रप्रपौत्रैश्च संयुक्ता भुवि नित्यशः ।
सुखमैश्वर्य्यमतुलं कीर्त्तिं च चिरजीवितम् ।। ५४ ।।
सर्वलोकप्रियत्वं च लब्ध्वा मोदभरात्लुताः ।
शेषे गच्छन्ति ते विष्णौ पदं मोक्षैकदायकम् ।। ५५ ।।
देव देव जगन्नाथ भक्तानुग्रहकारक ।
लक्ष्मीपते महाबाहो नमस्ते पुरुषोत्तम ।। ५६ ।।
करोमि पूजाकर्मान्ते त्विदं नीराजनाद्वयम् ।
अङ्गीकुरु प्रसन्नात्मा पश्यतां मङ्गलप्रदम् ।। ५७ ।।
इति संप्रार्थ्य लक्ष्मीशं वन्दे मूलमनुं द्विजः ।
दीपमुद्रां प्रदर्श्याथ ततो नीराजयेद् बुधः ।। ५८ ।।
बृहद्विधिं कृतार्च्चनां समापनकरीं नृप ।
अधिकां पिष्टकावर्त्त्या सायं नीराजनां चरेत् ।। ५९ ।।
रम्भापुष्पान्तरस्थायि सूक्ष्मात्सकलिकास्ति या ।
पिष्टकं च तथा कृत्वा तत्रापि परितः पुनः ।। ६० ।।
सूक्ष्मांशुका समायुक्ता घृतजर्जरिता भृशम् ।
सप्ततः काठिकास्तावत्प्रोथयेज्ज्वलिताः पुनाः ।। ६१ ।।
ऊर्द्ध्वं चैकां तथा कृत्वा पिष्टकावर्त्तिमाचरेत् ।
नीलाचलगूहावास देव देव जनार्द्दन ।। ६२ ।।
त्रिकालयजनान्तेऽपि संगतार्थं मया प्रभो ।
दत्तां गृहाण लक्ष्मीश पिष्टकावर्त्तिमुत्तमाम् ।। ६३ ।।

पिष्टकावर्त्तिभिर्विष्णुममुं नीराजनं च ये ।
दृष्ट्वा भक्त्या चिरं भोगं शेषे गच्छेयुरव्ययम् ।। ६४ ।।
तत्पिष्टकं वै यो मर्त्यो भक्त्या नीत्वापि भूतले ।
नानारोगात्ततो मुक्त्वा विष्णुलोकं स गच्छति ।। ६५ ।।
एवं प्रतिदिनं विष्णोर्विधिं कुर्य्यान्महीपते ।
सर्वत्र विजयं चैव महानीराजनं चरेत् ।। ६६ ।।
जय कृष्ण जगन्नाथ जय नीलाचल प्रभो ।
जयार्थं मङ्गलार्थं च महानीराजनां चरेत् ।। ६७ ।।
इति संप्रार्थ्य लक्ष्मीशं दीपमुद्रां च दर्शयेत् ।
पूर्ववद्विधिना रम्यां महानीराजनां चरेत् ।। ६८ ।।
महानीराजनां ये वै कुर्वते भक्तिभावतः ।
पश्यन्ति ये च शृण्वन्ति तेषां सुखफलं शृणु ।। ६९ ।।
इह शर्माखिलं प्राप्य पुत्रपौत्रसमन्विताः ।
अन्ते गच्छन्ति वैकुण्ठं देवैरपि सुदुर्लभम् ।। ७० ।।
जयार्थी जयमाप्नोति पुत्रार्थी पुत्रमाप्नुयात् ।
धनार्थी लभते पूर्ण्णं धनधान्यं नराधिप ।। ७१ ।।
मोक्षार्थी लभते मोक्षं तन्नीराजनलोकनात् ।
श्रीजगन्नाथदेवस्य नीलाचलनिवासिनः ।। ७२ ।।
ततः स मन्त्री चलुकोदकेन पूजावसाने परिवर्त्तमानः ।
श्रीमज्जगन्नाथपदारविन्दे पूजामिमां च प्रतिचार्पयेऽहम् ।। ७३ ।।
इत्युक्त्वा दीपभावेन विष्णुपादाम्बुजद्वये ।
समर्पयेदर्च्चनां तां परत्रेह च सौख्यदम् ।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं च यत्कृतम् ।। ७४ ।।

यत्पूजितं मया देव परिपूर्ण्णं तदस्तु मे ।
इत्युच्चार्य्य ततो मन्त्री पदाब्जे तत्समर्पयेत् ।। ७५ ।।
कृताञ्जल्या ततोऽङ्गुष्ठद्वये चानामिकाद्वयम् ।
नियोज्य दर्शनीया या मुद्रा सा द्रव्यपूरणी ।। ७६ ।।
एतां यदा दर्शयेत्तु हीनं यतश्च पूर्ण्णकम् ।
ध्यात्वा देवं चिन्मयं च निर्माल्य तुलसीदलैः ।। ७७ ।।
संहारयेत्प्रतिहृद्यं देवं संहारमुद्रया ।
आकृष्य हृदयाद्यं तु करे तु योजयेत्पुनः ।। ७८ ।।
तद्वासनं ततः कुर्य्याद्देवस्य मनुरूपिणः ।
षडङ्गं पूर्ववत् कृत्वा यथोद्वासनमाचरेत् ।। ७९ ।।
तन्मुद्रां कथयेद्भूप शृणु साम्प्रयमुत्तमाम् ।
प्रसार्य्य दक्षिणं हस्तं कनिष्ठाङ्गुलितः क्रमात् ।। ८० ।।
आकुञ्चने जायमाने मुद्रा संहारिणी मता ।
तया संहारयेद्देवं मन्त्रविग्रहमुत्तमम् ।। ८१ ।।
मूलमन्त्रं ततश्चोक्त्वा कृष्णमुद्वासयाम्यहम् ।
एवं वदन् ततो मन्त्री देवताहृदयात्पुनः ।। ८२ ।।
देवस्य दक्षिणघ्राणान्निर्गतं तन्महः परम् ।
स्व स्व वामनसोरन्ध्रे दत्त्वा हृत्कमलोदरे ।। ८३ ।।
कर्णिकामध्यतस्तत्र सयत्नं स्थापयेच्च तत् ।
अन्याऽन्यपृष्ठसंलग्नौ हस्तौ संवद्धकाङ्गुली ।। ८४ ।।
कृत्वा चोद्धृत्य तर्ज्जन्यौ योजयेद्योऽजनि स्फुटम् ।
समापना समाख्याता तया निर्माल्यमाहरेत् ।। ८५ ।।

आनीय मस्तके धार्य्यं ततोऽछिद्रावधारणम् ।
ततः पादाब्जदेशात्तु निर्माल्यं परिगृह्य च ।। ८६ ।।
बलिं विभीषणं दद्याद्भीष्मं च कपिलं तथा ।
नारदं फाल्गुनं चैव प्रह्लादं च ततः परम् ।। ८७ ।।
अम्बरीषं वसुं वायुं शुक्रं च सूतमेव च ।
विश्वस्केनं ध्रुवाक्रूरौ सनकादींश्च भो नृप ।। ८८ ।।
प्रसादं वासुदेवस्य प्रतिदद्याद् यथाक्रमम् ।
स्वयं मन्त्री ततो भक्त्या गृह्णीयात्तत्तु यत्नतः ।। ८९ ।।
श्रीमद्भगवतो विष्णोः पूजाशेषाः सुसौरभाः ।
तुलसीं ये च गृह्णन्ति ये च खादन्ति वा पुनः ।। ९० ।।
जिघ्रन्ति सुमहद्भक्त्या याचते वा मुहुर्मुहुः ।
संहृत्य परिरक्षन्ति प्रत्यहं संश्रयन्ति च ।। ९१ ।।
तेषां यत्पुण्यमेवं हि तच्छृणु त्वं महीपते ।
कोटिजन्मार्जितैः पापैर्ब्रह्महत्यामुखैरपि ।। ९२ ।।
तत्क्षणादेव मुच्यन्ते संयुज्य परमं सुखम् ।
आरोग्यं परमं लव्ध्वा शेषे गच्छन्ति निर्वृतिम् ।। ९३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकाशीतितमोऽध्यायः ।।

द्वाशीतितमोऽध्यायः

ब्रह्मोवाच

पुनः शृणु नृपवर विष्णोर्निर्माल्यलक्षणम् ।
विष्णुपूजावशिष्टाभिस्तुलसीभिश्च भक्तितः ।। १ ।।
योऽङ्गानि मार्जयेद्धीमान् कीर्त्यारोग्यधरो भवेत् ।
दुरितान्येव नश्यन्ति कोटिजन्मार्जितान्यपि ।। २ ।।

तस्माद्भक्त्या प्रतिदिनं तुलस्या मार्जनं चरेत् ।
प्रसादाभ्यन्तरे याश्च विमलाःप्रमुखा नृप ।। ३ ।।
क्षेत्रस्थाश्चैव या देव्यस्तन्निर्माल्यं सुदापयेत् ।
तास्तैरलङ्कृता देव्यो निर्माल्यैश्च परंतप ।। ४ ।।
यच्छन्ति सकलाभीष्टं सद्गतिं नात्रसंशयः ।
पूजासु विष्णोर्ये भक्त्या पादोदकमकल्मषम् ।। ५ ।।
स्पृशन् पश्यन्ति ये भक्त्या पिबन्ति धारयन्ति ये ।
ते सर्वे सर्वपापेभ्यो मुच्यन्ते तन्निषेवणात् ।। ६ ।।
वाजपेयशतानां तु चान्द्रायणशतस्य च ।
अश्वमेधशतस्यापि लभन्ते ते च तत्फलम् ।। ७ ।।
अकालमृत्युहरणं सर्वव्याधिनिवारणम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ।। ८ ।
इत्यनेन च मन्त्रेण किल्विषान्मुच्यते जनः ।
अतः परं देशिकोऽसौ यजमानस्य भूपते ।। ९ ।।
आयुरारोग्यकृच्चैव कुर्य्यादाशिषमुत्तमाम् ।
शिरः कक्षान्तकलशा गर्भिणीव तथा व्रजेत् ।। १० ।।
विष्णोः प्रदक्षिणे भूप भक्तिभावेन भूपते ।
संपूटीकृत्य स्वकरौ हृदि लग्नौ समुद्रिकौ ।। ११ ।।
मन्दं मन्दं व्रजेद्धीमान् स्तुतिं च परमां पठन् ।
प्रदक्षिणं चरेद्यावत्तावच्छृणु महीपते ।। १२ ।।
एकवाराद् व्याधिनाशो द्विवारात्कीर्त्तिमान् भवेत् ।
त्रिवाराद् बहुलक्ष्मीकश्चतुर्वारात्तु पुत्रवान् ।। १३ ।।
पञ्चवाराच्छत्रुनाश ऋतुवारात्कृती भवेत् ।
सप्तवारान् महाभक्तिरष्टौवाराच्च मुक्तता ।। १४ ।।
एवं प्रदक्षिणं कुर्य्याद्विष्णोरायतने शुभे ।
एवमेवं बहुफलं शतवारं प्रदक्षिणम् ।। १५ ।।

यः करोति नरो भक्त्या पाकशासनतां ब्रजेत् ।
त्रिशताद्याति ब्रह्मण्यं सहस्त्राक्षमवाप्नुयात् ।। १६ ।।
विष्णोश्चैव चतुर्वारं शिवस्यार्द्धप्रदक्षिणम् ।
सूर्य्यस्य सप्त च प्रोक्तं देव्याश्चैकप्रदक्षिणम् ।। १७ ।।
त्रयं विनायकस्यापि क्रम एष प्रकीर्त्तितः ।
संपूज्य विधिवद्विष्णुं स्तुत्वाथ नृपसत्तम ।। १८ ।।
प्रदक्षिणं ततः कृत्वा साष्टाङ्गं प्रणमेन्नरः ।
पादद्वयेन हस्ताभ्यां जानुयुग्मेन भूतले ।। १९ ।।
उरसा चेतसा वाचा नेत्राभ्यां शिरसा पुनः ।
इत्यष्टाङ्गप्रणामेन दण्डवत्प्रणमेज्जनः ।। २० ।।
सहस्त्रं वा तदर्द्धं वा त्रिंशतं शतमेव वा ।
तदर्द्धं वा तदर्द्धं च तस्याप्यर्द्धेन भो नृपा ।। २१ ।।
एकैकेनाश्वमेधस्य फलं प्राप्नोति नित्यशः ।
एतेषां फलसंख्याश्च वक्तुं कोऽपि न शक्तिमान् ।। २२ ।।
प्रणतश्च शरीरेऽस्मिन् लगन्ति रेणवश्च ये ।
तत्संख्यया विष्णुपदे कल्पकोटियुगं वसेत् ।। २३ ।।
जानुभ्यां चैव बाहुभ्यां मनोवाप्युत्तमाङ्गकैः ।
एष प्रणामः कथितः पञ्चाङ्गो मुक्तिदायकः ।। २४ ।।
एवं त्रिकालं तद्विष्णोः कुर्वतां पूजनं नृप ।
देशिकानां च ये मर्त्याः स्पर्शनं भाषणं तथा ।। २५ ।।
प्रणामं वापि सत्कारं पूजनं वापि भक्तितः ।
कुर्वन्ति ते वै भूपाल सर्वान् कामानवाप्नुयुः ।। २६ ।।
यतो विष्णोर्देशिकस्य भेदो नास्ति कदाचन ।
सत्यं सत्यं पुनः सत्यं सन्देहो नात्र विद्यते ।। २७ ।।
विष्णौ चेद्देशिके वापि भेदकृन्नरकं ब्रजेत् ।
तस्मात्तयोर्भेदबुर्द्धिः न कर्त्तव्यां कदाचन ।। २८ ।।

सूत उवाच

ब्रह्मणा कथिता विष्णोर्दारुब्रह्मस्वरूपिणः ।
इन्द्रद्युम्नं प्रति परा पूजा या लोकपावनी ।। २९ ।।
विप्रास्तां कमलेक्षणस्य च हरेर्ये मानवा भूतले-
दारुब्रह्मतनोः समस्तसुखदां पश्यन्ति भक्त्यान्विता ।
अग्रे नीलधरालयस्य विलसद्भूषाकुलस्य प्रभो-
स्ते नूनं भवसागरं सरभसं संतीर्य्य नाकं व्रजेत् ।। ३० ।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये द्वाशीतितमोऽध्यायः ।।

त्र्यशीतितमोऽध्यायः

आसनादुपचाराणां यत्पुण्यं फलमुत्तमम् ।
सद्वृत्तं वाग्रतो विप्रा निगदामि समासतः ।। १ ।।
आसनस्य प्रदानं तु दातुर्मङ्गलमावहन् ।
स्वागतार्पणतो दुःखव्याधिनाशो भवेद्ध्रुवम् ।। २ ।।
पाद्येन पातकं नश्येत्पूज्यः स्यादर्घ्यदानतः ।
आचामेन शुचिर्जातो माधुर्य्यं मधुपर्कतः ।। ३ ।।
स्नानोपचारदानेन तापनाशोऽपि जायते ।
वस्त्रार्पणादेव दातुः शठतादिक्षयो भवेत् ।। ४ ।।
उत्तरीयप्रदानेन दाता गच्छेद्दिवं नृप ।
यज्ञोपवीतदानेन ब्रह्मत्वमुपजायते ।। ५ ।।
भूषणार्पणतो विप्रः राजराजत्वमाप्नुयात् ।
बहुवित्तः स्याद्गन्धाच्च पुष्पदानाच्च पुष्टिभाक् ।। ६ ।।
धूपार्पणात् वैरिनाशो दीपाद्दीप्ततरो भवेत् ।
नैवेद्यदानतो नूनं चतुर्वर्गयुतो द्विज ।। ७ ।।

स्तुत्या स्तुत्यतरोलोके ताम्बूलाच्छ्रियमाप्नुयात् ।
कर्पूरवर्त्त्या चेन्द्रत्वं पुनर्नीराजनाविधेः ।। ८ ।।
जनलोके निवासी स्याद्देशिकोऽसौ द्विजोत्तमाः ।
ब्रह्मलोकमवाप्नोति पिष्टवर्त्त्यार्पणाद् द्विजाः ।। ९ ।।
महानीराजनादेव वैकुण्ठं लभते ततः ।
ताम्बूलदानतो विप्रा सर्व यज्ञफलं लभेत् ।। १० ।।
दन्तोल्लेखनदानेन दाता निष्कण्टको भवेत् ।
श्वेतातपत्रदानाद्वै चन्द्रलोके महीयते ।। ११ ।।
पूजाकाले हरेर्विप्रा यश्चालयति चामरम् ।
शनैः शनैर्महाभक्त्या तेषां पुण्यार्थसंख्यया ।। १२ ।।
भक्तलभ्यो हरिः श्रीमान् संपूर्य्य च मनोरथम् ।
अन्ते वैकुण्ठनिलये वासं तेभ्यो ददाति ह ।। १३ ।।
व्यजनैस्तालवृन्तैश्च त्वन्येश्च विविधैः शुभैः ।
हरिं यः सेवते नित्यं स्वर्गेऽपि निवसेद्ध्रुवम् ।। १४ ।।
मयूरपुच्छपुच्छेन ललितेन जनो यदा ।
सेवते भक्तितो विष्णुं स गच्छेत् वायुमन्दिरम् ।। १५ ।।
घण्टामृदङ्गमधुरीभेरीढक्का च काहलान् ।
तालांश्च विविधान् वाद्यान् वीणावेणुमुखान् शुभान् ।। १६ ।।
अर्च्चासमयमालम्ब्य ये च कुर्वन्ति मानवाः ।
कारयन्ति हरेर्धाम्नि ते मर्त्त्या विष्णुवल्लभाः ।। १७ ।।
इह सर्वं सुखं भुक्त्वा शेषे गच्छन्ति सत्पदम् ।
ये कुर्वन्ति हरेः स्थाने शोभां चन्द्रातपैः शुभैः ।। १८ ।।
ते त्वत्र सुखमाभुज्य ते ब्रजन्ति हरेः पदम् ।
कार्पासवाससात्वन्यैः पट्टवस्त्रैश्च लोमजैः ।। १९ ।।

यो मण्डयन्महाभक्त्या ते कृतार्था न संशयः ।
एवं प्रतिदिनं विष्णोः कुर्वते ये च पूजनम् ।। २० ।।
कारयन्त्यथ वा भक्त्या ये पिबन्ति मुहुर्मुहुः ।
दर्शयन्ति च ये मर्त्या दर्शनोत्सुकलालसान् ।। २१ ।।
ते सर्वे सकलं सौख्यं पुत्रपौत्रादिसंयुताः ।
भुक्त्वाचिरं धरण्यान्ते गच्छन्त्यन्ते हरेः पदम् ।। २२ ।।

सूत उवाच

श्रीनीराजनकर्मशर्मदमिदं विष्णोः प्रियं शात्वतं
ये पश्यन्ति सदा विलोकनपरा अर्घ्यं हरन्ति क्षितौ ।
ये कुर्वन्ति जनार्द्दनेऽपि भजनं भक्ताश्च मुक्ताश्च ते
हे विप्रा लवणाब्धितीरविलसन्नीलाद्रिनाथार्च्चकः ।। २३ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये त्र्यशीतितमोऽध्यायः ।।

चतुरशीतितमोऽध्यायः

ब्रह्मोवाच

अथाहं कथयाम्यद्य तर्पणस्य विधिं नृप ।
श्रूयतां तद्यथा कुर्य्याद्देशिकः कर्मकुशलः ।। १ ।।
पूजान्ते देशिकः श्रीमान् देवाग्रे पीठसंस्थितः ।
आचतुर्भावनान्तं च त्वासनादिं चरेद्द्विजः ।। २ ।।
कुर्य्यात्पीठोपरि श्रीमान् वस्त्राच्छादनकं शुभम् ।
यत्र चाधारशक्त्यादीन् पीठसंस्थान्तमर्च्चयेत् ।। ३ ।।
प्रत्येकं तुलसीपत्रैर्जलगन्धाक्षतादिभिः ।
पुष्पधूपप्रदीपैश्च मनसा परिपूजयेत् ।। ४ ।।

आसनाद्युपचाराणां महानीराजनां तथा ।
प्रत्येकं तुलसीपत्रैर्जलगन्धादिभिर्नृप ।। ५ ।।
मनसा पूजयेन्मत्री तथाङ्गावरणादिकान् ।
धर्मसंस्थापनान्तांश्च पूजयेच्च पृथक् पृथक् ।। ६ ।।
मध्ये कृष्णं यतो धीमान् मनसा भक्तिसंभृता ।
प्रणवादिचतुर्थ्यन्तान् स्व स्व नामसु पूजयेत् ।। ७ ।।
एतेषां तर्पणार्थाय हैमपात्रे जलं न्यसेत् ।
वीक्षणं मूलमन्त्रेण प्रोक्षणं शरमन्त्रतः ।। ८ ।।
कवचस्य च मन्त्रेण संस्कुर्य्यादवगुण्ठनम्
धेनुमुद्रां शिखामन्त्रे त्वमृतीकरणं तथा ।। ९ ।।
मूलमन्त्रं जपेदष्टौ प्रणवेन च चन्दनम् ।
क्षिपेत्पुष्पं तत्र पात्रे तर्पणाम्बु समन्विते ।। १० ।।
कदलीपुष्पपर्ण्णस्य विभो पात्रे च हैमके ।
द्विपले नैव रचिते चतुष्पलदलान्विते ।। ११ ।।
स्वर्ण्णाभावे रोप्यकांस्ये तदभावे च ताम्रके ।
अथ मन्त्री मूलमन्त्रं समुच्चार्य्य प्रयत्नतः ।। १२ ।।
श्रीकृष्णं तर्पयामीति मन्त्रतस्तर्पयेद्बुधः ।
हरेः शिरः स्थलमिति सञ्चिन्त्य देशिकोत्तमः ।। १३ ।।
पीठे तत्र चार्पयेद्द्राक् शतमष्टोत्तरं परम् ।
सकृदाधारशक्त्यादीन् धर्मसंस्थापनान्तकान् ।। १४ ।।
स्वस्व नाम तदीयान्तं तर्पयामीति मन्त्रतः ।
मूलमन्त्रं समुच्चार्य्य कृष्णाय च ततः परम् ।। १५ ।।
मार्जनं च नमश्चोक्त्वा मन्त्रेणानेन देशिकः ।
सर्वाङ्गे मार्जयेद्देवमष्टोत्तरशतं नृप ।। १६ ।।

एवं त्रिकालेषु परं तर्पणं मार्जनं द्विजः ।
अथ कालद्वये तत्तु त्वेककालं तदाचरेत् ।। १७ ।।
विष्णोर्निवेदितं यत्तु नैवेद्यं नृपसत्तमः ।
आचार्य्यप्रमुखान् विप्रान् प्रति वै.भोजयेद्भृशम् ।। १८ ।।
तर्पणेन विना भूप मार्जनं भोजनं विना ।
यदा पूजा च जायते तदा सा निष्फला भवेत् ।। १९ ।।

सूत उवाच

पूजा कल्पलता हरेर्विजयते श्रीनीलशैलेश्वरो
बीजा ब्रह्मसुताङ्कुरादिललितां क्षेत्रोत्तमां वापृथक् ।
इन्द्रद्युम्नमहीधवेन सहसा सिक्तार्थिता साम्प्रतं
सर्वेषां च प्रभक्तिमुक्तिफलदा सन्मत्री सत्पल्लवा ।। २० ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये चतुरशीतितमोऽध्यायः ।।

पञ्चाशीतितमोऽध्यायः

इन्द्रद्युम्न उवाच

अनेन विधिना ब्रह्मन् विष्णुर्नीलाचलप्रभुः ।
पूज्यः स्यादथ केनैव बलो भद्रा च तद्वद ।। १ ।।
मन्त्रश्च कथितो भिन्नो बलादीनां पृथक् पृथक् ।
तयोः पूजा च मुद्रा च कीदृशी स्याच्चतुर्मुख ।। २ ।।

सूत उवाच

इत्येवं पृच्छमाणाय ब्रह्मणा कथितं तु यत् ।
तद्विधिं कथयाम्यद्य शृण्वतां पापनाशनम् ।। ३ ।।
आदेहभावनान्तं च त्वासनादिं चरेद्बुधः ।
तेनैव बलभद्रस्य भद्रायाश्च परंतप ।। ४ ।।

पूजनं तदहं वक्ष्ये संक्षेपेण शृणुष्व मे ।
इन्द्रो यमश्च वरुणः कुवेरश्च शिवस्तथा ।। ५ ।।
अग्निसूर्य्यश्च मरुतस्त्वन्ये ये विबुधोत्तमाः ।
द्वादशाक्षरमन्त्रस्य चिन्तनात्तदुपासनात् ।। ६ ।।
सर्वे प्रतिष्ठिता राजन् बभूवुर्जगदीश्वराः ।
तत्प्रभावं निगदितुं कः शक्नोति हरिं विना ।। ७ ।।
कामधेनूपमो मन्त्रो द्वादशाक्षर एष वै ।
जपतां स्मरतां वापि सर्वकामफलप्रदः ।। ८ ।।
सामान्यतोऽहं कथये श्रूयतां द्विजसत्तमाः ।
आदौ तारः समुदितो हृन्मत्रं च ततो वदेत् ।। ९ ।।
विश्वमूर्त्त्यक्षरं चैव शाङ्‌र्गीति च ततः परम्
मासार्ण्णं च ततो मध्ये तेकारं च वदेत् पुनः ।। १० ।।
वासुदेवपदं तावच्चतुर्थ्यन्तं प्रकल्पयेत् ।
अनेन विधिना योऽभूद्द्वादशाक्षरमन्त्रकः ।। ११ ।।
अकर्मकर्मफलदो वासुदेवमनुः स्मृतः ।
द्वादशाक्षरमन्त्रस्य वासुदेवस्य मध्यतः ।। १२ ।।
मन्त्रस्यास्य ऋषिः प्रोक्तः प्रजापतिरिति द्विजा ।
गायत्रीछन्द एव स्याद्वासुदेवोऽत्र देवता ।। १३ ।।
प्रणवो बीजमाख्यातो यं च शक्तः प्रकथ्यते ।
चतुर्वर्गफलप्राप्तौ विनियोग उदाहृतः ।। १४ ।।
प्रथमार्ण्णं तारपूर्वमङ्‌गुष्ठाभ्यां न्यसेत्सुधीः ।
नम इत्यक्षरद्वन्द्वं तर्ज्जन्यां च ततो न्यसेत् ।। १५ ।।
मध्यमायां भगवते न्यसेदिति स देशिकः ।
अन्त्यैः पञ्चाक्षरैरेव संन्यसेच्च त्वनामिके ।। १६ ।।
अस्त्रन्यासं तदा कुर्य्यात्सर्वमन्त्राक्षरैः परैः ।
अस्त्रन्यासं प्रकुर्वीत करन्यास इव द्विजः ।। १७ ।।

श्रीमच्छारदपार्वणेन्दुनिकरप्रस्फर्द्धिदेहद्युतिं
विष्णुं शङ्खगदाब्जचक्रविलसद्धस्ताम्बुजं सुन्दरम् ।
श्वेताम्भोजकृतासनं सुवसनं दीप्त्या जगन्मोहनं
रत्नोल्लासिकिरीटकुण्डलमहाहारस्फुरत्कङ्कणम् ।। १८ ।।
श्रीवत्साञ्चितवक्षदेशमनघं वन्देऽरविन्देक्षणं
ब्रह्मेन्द्रादिमरुद्गणैः सरभसं संसेव्यमानांघ्रिकम् ।
लक्ष्म्यालिङ्गितपादपद्ममतुलं स्तुत्यं सदा योगिभिः
वन्दे सर्वशुभाकरं गुणनिधिं नीलाचलेशं विभुम् ।। १९ ।।

सूत उवाच

प्रातरर्च्चाद्वये मन्त्री ध्यायेद्देवं सनातनम् ।
मध्याह्नयजने ध्यायेद्यथा तन्निगदाम्यहम् ।। २० ।।
शृणुध्वं मुनयः सर्वे ब्रह्मणा कथितं पुरा ।
यच्छ्रुत्वा स तु राजेन्द्रोऽकारयत्तद्विधिं वधे ।। २१ ।।
कुन्देन्दुशङ्खधवलं श्वेतपद्मोदरस्थितम् ।
नीलाम्बरधरं शान्तं शिरः सप्तफणाञ्चितम् ।। २२ ।।
नानालङ्काररम्याङ्गं हलं च मुषलं तथा ।
पापाङ्कुशौ कराम्भोजैर्धारयन्तं मनोरमम् ।। २३ ।।
रेवतीमाधवाभ्यां च सेव्यमानं नमाम्यहम् ।
बलभद्रं महादेवं सर्वदुःखविनाशकम् ।। २४ ।।
एवं मध्याह्नसमये बलदेवं महीसुराः ।
सञ्चिन्त्य पूजयेन्मन्त्री भक्तिभावसमन्वितः ।। २५ ।।
सायाह्ने द्वारवत्यां तु चित्रोद्यानेऽतिशोभने ।
रत्नमण्डपमध्यस्थं हेमपद्मासनं शुभम् ।। २६ ।।
नानालङ्कारशोभाढ्यं विचित्राम्बरभूषणम् ।
कर्पूरकस्तूरीचञ्चन्नयनाञ्चितविग्रहम् ।। २७ ।।

नानासुवासमाल्यैश्च शोभमानं महोदयम् ।
शङ्खचक्रं हलं चैव मुषलं दधतं करैः ।। २८ ।।
रेवतीमाधवाभ्यां च सेव्यमानं च पार्श्वयोः ।
श्रुतिस्मृतिस्तथा कान्ति रमा चोमा ततः परम् ।। २९ ।।
विशुद्धा च तथा हर्षा लज्जा ताभिः क्रमाच्च तम् ।
पद्माभयधराभिश्च हसन्तीभिर्मनोहरम् ।। ३० ।।
नानालङ्कारशोभाभिश्चारुवस्त्राभिरेव च ।
दिव्याङ्गनाभिः स्त्रीभिश्च हेमवर्ण्णाभिरावृत्तम् ।। ३१ ।।
एवं ध्यायेद्बलं सायं रात्रौ चापि महर्षयः ।
केशवं पूर्वमान्यस्य नारायणमतः परम् ।। ३२ ।।
माधवं च ततो धीमान् गोविन्दं विष्णुमेव च ।
ततो महीसुरास्तावन्मधुभिदमकल्मषम् ।। ३३ ।।
त्रिविक्रमं वामनं च श्रीधरं तदनन्तरम् ।
हृषीकेशं पद्मनाभं दामोदरमनामयम् ।। ३४ ।।
एतानि द्वादश नामानि प्रणवाद्यानि भूसुराः ।
नमोऽन्तानि तथा कृत्वा चतुर्थ्यन्तानि वै क्रमात् ।। ३५ ।।
शिरस्यास्य कण्ठदेशे भुजद्वये तथा हृदि ।
पृष्ठेऽपि जठरे चैव जंघायुग्मे पदद्वये ।। ३६ ।।
क्रमान्नयसेत्तु नामानि केशवाद्यानि भूसुराः ।
न्यासानान्तरतः स्थाने तत्र तत्र विचिन्तयेत् ।। ३७ ।।
ते सर्वे केशवाद्याश्च दाहोर्त्तीर्ण्णाः सुवर्णभाः ।
शुक्लाम्बरधराः शान्ताः शङ्खाब्जारिगदाभृतः ।। ३८ ।।
किरीटाङ्गदहारादि श्रीमद्भूषणभूषिताः ।
पद्मपत्रविशालाक्षा वनमालाविशोभिनः ।। ३९ ।।
तत्र तत्र पदे रम्ये चिन्तनीयास्तदार्च्चकैः ।
केशवादिन्यासममुं ये कुर्वन्ति नरोत्तमाः ।। ४० ।।

ते निर्द्धूततराद्याश्च साक्षाद्ब्रह्मस्वरूपिणः ।
अतः परं प्रवक्ष्यामि संहारन्यासमुत्तमम् ।। ४१ ।।
पादद्वये जानुयुग्मे लिङ्गे नाभौ तथोदरे ।
हृदि दोर्मूलयोश्चैव गले वक्त्रे च मस्तके ।। ४२ ।।
शिखायां चाक्षराण्येव न्ससेन्मन्त्री क्रमात्पुनः ।
ॐकारादीन्यक्षराणि नमोऽन्तानि मुनिश्वराः ।। ४३ ।।
कृत्वा सकृन्न्यसेत्तावत्तत्र तत्र स देशिकः ।
ये ख्याता द्वादशादित्यास्ते वै द्वादशवर्णकाः ।। ४४ ।।
बाह्यान्तरतमश्चैव तत्परा भास्वराम्बराः ।
पद्मचक्रधरास्तावज्जगदानन्ददायिनः ।। ४५ ।।
सदारकाः सर्वपापघ्नाः सर्वकामफलप्रदाः ।
चित्राम्बरधराश्चञ्चद्भूषणांश्चेति चिन्तयेत् ।। ४६ ।।
शिखायां गलके नेत्रे वक्त्रे कण्ठे ततः परम् ।
भुजमूलद्वये चैव हृदये कुक्षिदेशके ।। ४७ ।।
नाभौ लिङ्गे जानुयुग्मे पादद्वये सकृन्न्यसेत् ।
पूर्ववद्वर्णकं न्यासं कृत्वाधानं च पूर्ववत् ।। ४८ ।।
सृष्टिमेवविधां कुर्य्यान्निष्पापो जायते नरः ।
हृत्कुक्षिनाभिलिङ्गेषु जानुपादयुगेषु च ।। ४९ ।।
करग्रीवास्यदेशेषु ललाटे मस्तके तथा ।
शिखाभागेऽपि संस्कुर्य्यान्न्यासं द्वादशवर्णकम् ।। ५० ।।

इति स्थितिन्यासममुं च कुर्वतां
सतां न च क्वाप्यसुखं नराधिप ।
अतोऽपि वच्मीति बलस्य हे नृप
मूर्त्तेश्चतत्पञ्जरनामकं शृणु ।। ५१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये पञ्चाशीतितमोऽध्यायः ।।

षडशीतितमोऽध्यायः

ब्रह्मोवाच

मूर्त्तिपञ्जरकं न्यासं पूर्ववद्देशिकश्चरेत् ।
पञ्चाङ्गमन्त्रतः कुर्य्यापूर्ववद्ध्यानमाचरेत् ।। १ ।।
दिग्बन्धनमथकुर्य्यात्पूर्ववद् व्यापकत्रयम् ।
अतः परं षोडशस्ता मुद्राश्चैव प्रदर्शयेत् ।। २ ।।
शङ्खश्चारिगदेऽम्बुजं च मुषलं श्रीशाङ्र्गकं सप्तमः
पाशश्चैव तथाङ्कुशो महदसि श्रीवत्ससत्कौस्तुभौ ।
तावच्छ्रीफलवेणुकौ सुविदितौ श्रीवन्यमाला च सा
शङ्खारेश्च हरेः समर्च्चनविधौ तान् दर्शयेद्देशिकः ।। ३ ।।
धीरः श्रीवासुदेवोऽहमिति निजहृदि ध्यानधारी भवेद्वै
स्वात्मानं वासुदेवं दृढमिति च मुहूर्भावयन् बिल्वमुद्राम् ।
कृत्वा हृत्पद्ममध्ये तनुपरि च जपेत्तारमेतत्तनोस्तद्
बीजं दिक्संख्यवारं सुरमपि च यजेन्नासनीयोपचारैः ।। ४ ।।
पूववद्धोमयेन्मन्त्री डान्तादीनंथतान्नव ।
अर्घ्यादिपात्रसंस्कारं कृत्वात्मपूजनं ततः ।। ५ ।।

श्रीवत्सादिचतुर्मुद्राः संदर्श्य द्वादशं पुनः ।
तिलकं कारयेन्मन्त्री पूर्ववन्निजवर्ष्मणि ।। ६ ।।
प्राणायामं च मूलेन ऋष्यादिपूर्वकं द्विजः ।
वासुदेवं चतुर्थ्यन्तं प्रणवाद्यं स देशिकः ।। ७ ।।
अथोक्त्वा विद्महे चेति नारायणमतः परम् ।
चतुर्थ्यन्तं तथा चोक्त्वा धीमहीति ततः परम् ।। ८ ।।
तन्नो विष्णुः प्रचोदयादित्येवं तु वदन् ततः ।
इत्येषां वासुदेवस्य गायत्री समुदाहृता ।। ९ ।।
जपतां स्मरतां वापि शृण्वतां सर्वकामदा ।
अष्टोत्तरशतं कुर्य्यादनया जपमुत्तमम् ।। १० ।।
अतः परं मूलमन्त्रं सहस्रं वा तदर्द्धकम् ।
अथवा त्रिशतं कुर्य्याज्जपमर्च्चकसत्तमः ।। ११ ।।
प्राणायामं ततः कृत्वा जपान्ते तत्समर्पणम् ।
पीठपूजादिकं चाथ ह्यावाहनमतः परम् ।। १२ ।।
तत्सर्वं पूर्ववत्कृत्वा देवताङ्गेऽपि तन्न्यसेत् ।
मातृकां केशवादींश्च तत्त्वन्यासं च पूर्ववत् ।। १३ ।।
पीठन्यासं च मन्त्रस्य ऋष्यादींश्च स देशिकः ।
सामान्यं केशवादींश्च संहारं सृष्टिमेव च ।। १४ ।।
स्थितिन्यासं तथा मूर्त्तिपञ्जरन्यासकं तथा ।
एतत्सर्वं देवताङ्गे स्वाङ्गवत् परिसंस्यनेत् ।। १५ ।।
पुष्पदानान्तमेवात्र कुर्य्यादाचार्य्यसत्तमः ।
पूजाकार्य्याणि विधिवद्धृदि भक्तिसमन्वितः ।। १६ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये षडशीतितमोऽध्यायः ।।

सप्ताशीतितमोऽध्यायः

ब्रह्मोवाच

प्रथमं वह्निकोणेऽपि बीजं च प्रणवादिकम् ।
नमोऽन्तं प्रविधायाथ तुलस्या तत्र पूजयेत् ।। १ ।।
नैर्ऋते च नमः शब्दं नमोऽन्तं प्रविधाय तम् ।
तुलसीदलतः पूज्यं रचयेच्च मरुद्दिशि ।। २ ।।
ॐकाराद्यं नमोऽन्तं च भगवत्पदमेव हि ।
चतुर्थ्यन्तं विधायाश्च च पूर्ववत् परिपूजयेत् ।। ३ ।।
ऐशान्ये वासुदेवायेत्येवमुक्त्वा प्रपूजयेत् ।
पूर्वादिषु चतुर्दिक्षु मूलमन्त्रं यजेद्द्विजः ।। ४ ।।
ॐकारं त्रिगुणात्मकं परतरं ब्रह्मस्वरूपं महज्-
ज्ञानाधारतरं समस्तकलुषश्रेणीध्मदावानलम् ।
योगिध्येयमुपासकस्य सुजनस्यैवैकमोक्षप्रदं
वेदानां सारभूतं सुरमुनिनमितं भावयेज्ज्योतिरूपम् ।। ५ ।।
नमःशब्दस्तावत्परमसुखहेतुः श्रुतिमतां
सतां ध्येयः श्रीमान् वचनचयचातुर्य्यसुषमः ।
स्फुरत्ताराहाराकृतिरतिसुपुण्यप्रदतनु-
र्धृताब्जारिः सोऽयं मम हृदि तनोतु प्रवसतिम् ।। ६ ।।
नमस्तस्मै भगवते शङ्खाब्जारिगदाभृते ।
नृसिंहवपुषे तुभ्यं कोट्यर्केन्दुनिभाय च ।। ७ ।।
वासुदेवाय शान्ताय साधकानां हिताय च ।
भक्तकल्पलताख्याय सर्वान्तःसाक्षिणे नमः ।। ८ ।।

एवं विधं द्वादशवर्ण्णदेवं
चन्द्रप्रभं चारुफणात्रयाढ्यम् ।
दधानमुग्रं मुषलं हलं च
दरं च चक्रं करपङ्कजेषु ।। ९ ।।
नीलाम्बरं भूषणमाल्यशोभं
वन्दे त्रिनेत्रं बलमुज्ज्वलं तम् ।
रिपोः प्रलम्बस्य विनाशहेतुं
रामं श्रीकृष्णाग्रजमीडे नित्यम् ।। १० ।।
इत्थं ध्यात्वा देशिकेन्द्रस्ततस्तत्र स्थले पुनः ।
नीरगन्धाक्षतैर्दिव्यैर्धूपदीपसमन्वितैः ।। ११ ।।
तुलसीदलतो मन्त्री पूजयेन्मनसापि तान् ।
ततः पीठे मनोरम्ये पद्मं द्वादशपत्रकम् ।। १२ ।।
गुणात्रितयसंयुक्तं सहकेशरमुत्तमम् ।
सुवृत्तं चतुरस्रं च चतुर्द्वारविभूषितम् ।। १३ ।।
तादृशे तत्र पद्मेऽपि पूजयेद्देशिकश्च तान् ।
एतानि द्वादशार्ण्णानि प्रणवानि परंतप ।। १४ ।।
नमोऽन्तानि यजेद्धीमान् केशरेषु स्थितानि वै ।
द्वादशादित्यरूपाणि चक्रपद्मधराणि च ।। १५ ।।
भावयित्वाथ संपूज्य पत्रमूलेषु देशिकः ।
केशवादीन् तान् देवान् पूजयेत् क्रमतः शुचिः ।। १६ ।।
पूर्ववद्ध्यानमाचर्य्य जलगन्धाक्षतादिभिः ।
केशवादीनर्च्चयित्वा दलमध्येषु देशिकः ।। १७ ।।
कीर्त्तिः कान्तिस्तथा तुष्टिः पुष्टिश्चैव ततः परम् ।
क्षान्तिः क्रिया दया चापि मेधा हर्षा ततः परम् ।। १८ ।।

श्रद्धा लज्जा द्वादशेति शक्तयः परिकीर्त्तिताः ।
स्वर्णवर्णाश्चारुभूषा दिव्यमाल्यम्बराः शुभाः ।। १९ ।।
उत्पलज्ञानमुद्राढ्याः कराभ्यां संस्थिता इमाः ।
पूर्वादिक्रमतः पूज्याः स्वस्वमन्त्रेषु भूपते ।। २० ।।
प्रणवादिचतुर्थ्यन्तान् नमोऽन्तां स्त्रींश्च पूजयेत् ।
नमोऽनन्ताय शान्ताय रेवतीपतये नमः ।। २१ ।।
सहस्रशिरषे तुभ्यं नमः पृथ्वीधराय च ।
कुन्देन्दुशङ्खगोक्षीरसुधावर्णाय ते नमः ।। २२ ।।
रेवतीमाधवीभ्यां च सेव्यमानाय वै नमः ।
नीलाम्बराय वै तुभ्यं जगत्प्रीणनकारिणे ! ।। २३ ।।
हलेन मुषलेनैव शङ्खारिभ्यां च शोभिने! ।
रोहिणीगर्भसम्भूत ! बलदेव ! नमोऽस्तु ते ।। २४ ।।
वासुदेवाग्रज ! श्रीमन् ! प्रलम्बासुरनाशन! ।
कादम्बरीपानमत्त ! नमस्तुभ्यं सुरेश्वर! ।। २५ ।।
कालन्दीभेदिने तुभ्यं बलभद्र ! नमोऽस्तु ते ।
इति स्तुतिं प्रकुर्य्याद्वै पूजान्ते देशिको नृप! ।। २६ ।।

सूत उवाच

ब्रह्मणोक्तेन विधिना ये पूजयन्ति भूसुराः ।
बलं च जगदीशं च सुभद्रां च तथा नृप ।। २७ ।।
सर्वपापविशुद्धास्ते ब्रजन्ति भुवनं हरेः ।
वासुदेवाख्यमन्त्रेण बलदेवस्य पूजनात् ।। २८ ।।
कोटिजन्मार्जितैः पापैर्मुच्यते नात्र संशयः ।
पश्यतां स्मरतां वापि कुर्वतां तत्प्रपूजनम् ।। २९ ।।
तथा कारयतां विप्रा नास्ति नास्त्यैव दुर्गतिम् ।
इह सर्वसुखं भुक्त्वा देहान्ते मोक्षभाजनः ।। ३० ।।

संक्षेपात्कथितं द्विजा हलभृतो लक्ष्मीपतेश्चार्च्चनं
ये पश्यन्ति चरन्ति तत्प्रतिदिनं कुर्वन्ति भूमितले ।
ये शृण्वन्ति मुहुर्मुहुस्तदधुनास्ते मानवा मानवा
धन्यास्ते कृतिनस्तथा सुकृतिनस्ते मोक्षभाजो भृशम् ।। ३१ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सप्ताशीतितमोऽध्यायः ।।

अष्टाशीतितमोऽध्यायः

ब्रह्मोवाच

जगत्कारणकारिण्याः सुभद्रायाः परंतप! ।
श्रीमत्प्रकृतिरूपायाः पूजनं यादृशं भवेत् ।। १ ।।
तद्वदामि नृपश्रेष्ठ! प्रेम्णा गुप्तमपि क्षितौ ।
पूर्ववच्चासनादिं च भावनायाश्चतुष्टयम् ।। २ ।।
नात्र कुर्य्यात्केशवादिं कलान्यासं चरेद्बुधः ।
हकारं वामनेत्राढ्यं चार्द्धेन्दुपरिमण्डितम् ।। ३ ।।
चन्द्रोपरि न्यसेद्बिन्दुं रकारोपरि संस्थितम् ।
मन्त्रोऽयं भुवनेश्वर्याः साधकाभीष्टसिद्धिनः ।। ४ ।।
अनेन ममुना प्राज्ञः सुभद्रां परिपूजयेत् ।
ऋषिः शक्तिश्च संप्रोक्तो गायत्री छन्द एव च ।। ५ ।।
भुवनेशी देवतात्र ह्रीं बीजं च तथा स्मृतम् ।
किंचात्र शक्तिरेव स्याच्चतुर्वर्गाप्तये पुनः ।। ६ ।।
विनियोगः कथ्यतेऽत्र भूपते त्वां परिस्फुटम् ।
अकारादि स्वरैरेव युक्तेनानेन भूपते ।। ७ ।।

देशिको मन्त्रतत्त्वज्ञश्चतुरो लोभवर्जितः ।
मनुनापि षडङ्गानि कुर्य्यान्मत्री विचक्षणः ।। ८ ।।
उद्यच्छारदपार्वणेन्दुरुचिरां शुक्लाम्बरां सुन्दरां
नानामण्डनमण्डितां त्रिनयनां देदीप्यमानां सुरीम् ।
हस्ताम्भोजवराभयाङ्कुशलसत्पाशांसुवेशां भजे
प्रातः श्रीभुवनेश्वरीं सुजननीं चन्द्रार्द्धमौलीं शिवाम् ।। ९ ।।
मन्दारोत्करसुन्दरां सुमधुरां रक्ताम्बरां सुन्दरां
पीनोदारकुचद्वयोपरिलसद्धारां महाभासुराम् ।
पाशं चाङ्कुशमब्जमिष्टमतुलं हस्तैर्दधानां भजे
मध्याह्ने भुवनेश्वरीं त्रिनयनां पद्मासनां सत्कलाम् ।। १० ।।
सायाह्नेऽपि भजे नवाम्बुदनिभां शोभाञ्चितां पूजितां
देवीं श्रीभूवनेश्वरीं त्रिनयनां कृष्णाम्बरां सुन्दराम् ।
नानारत्नसमुज्ज्वलां पृथुतरोत्तुङ्गस्तनां सुस्मितां
पाशं चाङ्कुशमिष्टमेवमभयं हस्तैर्दधानां सदा ।। ११ ।।
नानारत्नसमुज्ज्वलेति विपुले सत्तुलिकामञ्जुले
पल्यङ्के रुचिरोपधाननिकरे चञ्चत्प्रसूने स्थिताम् ।
दिव्यालङ्कृतिराजितां स्मितलवैर्लोकोत्तरां भावये-
द्देवीं तां भुवनेश्वरीं करलसत्पाशाङ्कुशाभीष्टकाम् ।। १२ ।।
ताभिः शक्तिभिरावृतां निजमनस्तोषोपचारैः स्फुर-
द्धस्ताभिः परितः प्रभादिभिरिमां स्वर्ण्णाकृतिभिर्भृशम् ।
नक्तं चारुसुसौरभां चिरतनुं पूर्णेन्दुरम्याननां
देवीं श्रीभुवनेश्वरीं सुरनतां वन्दे जगत्पाविनीम् ।। १३ ।।

हृल्लेखा गगना चापि रक्ता चापि करालिका ।
महासूक्ष्मा पञ्चताश्च प्रणवाद्या नमोऽन्तकाः ।। १४ ।।
चतुर्थ्यन्ता यत्र यत्र न्यसनीया वदाम्यहम् ।
पूजायाः रीतयोङ्गानि शृणुत मुनिसत्तमाः ।। १५ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदयेऽष्टाशीतितमोऽध्यायः ।।

एकोननवतितमोऽध्यायः

ब्रह्मोवाच

मूर्ध्नि वक्त्रे च हृद्भागे गुह्ये पादयुगे तथा ।
न्यसेत्तांश्च क्रमाद्देवीं हृल्लेखाद्या नृपोत्तम! ।। १ ।।
हृल्लेखादिन्यासममुं कुर्वतां च भवेज्जयः ।
सद्योजातं तत्पुरुषं त्वीशानं वामदेवकम् ।। २ ।।
अघोरं च ततो धीमान् तान् वक्त्रैश्च नियोजयेत् ।
ऊर्द्ध्वं वक्त्रं पूर्ववक्त्रं दक्षवक्त्रं च पश्चिमम् ।। ३ ।।
उत्तरास्यं चतुर्थ्यन्तं कृत्वा मध्ये च शक्तयः ।
ॐकारं प्रथमं ब्रूयात्तं चैवात्र ततः परम् ।। ४ ।।
सद्योजातं ततश्चोक्त्वा हृल्लेखां तदनन्तरम् ।
ऊर्द्ध्ववक्त्रं ततः कृत्वा क्रमादेवं न्यसेद्बुधः ।। ५ ।।
चतुर्णां न्यासमेवं तु कुर्य्यान्मन्त्री विचक्षणः ।
गायत्रीं च चतुर्थ्यन्तां प्रणवाद्यां नमोऽन्तकाम् ।। ६ ।।
कण्ठमूले न्यसेत्तावत्सावित्रीं च सरस्वतीम् ।
सव्यदक्षस्तनद्वन्द्वे संन्यसेत्क्रमतो बुधः ।। ७ ।।

ब्रह्माणं विष्णुमेवात्र शिवं चैव नमोऽन्तकम् ।
प्रणवाद्यं चतुर्थ्यन्तमुक्त्वा पत्रं न्यसेच्छृणु ।। ८ ।।
सव्यांशे हृदये तद्वद्दक्षांशेऽपि क्रमान्न्यसेत् ।
शङ्खं पद्मं निधिं द्वन्द्वं चतुर्थ्यन्तं नमोऽन्तकम् ।। ९ ।।
भक्त्या सव्यस्य दक्षस्य मूलयुग्मे न्यसेद्बुधः ।
ॐ ह्रीं नमश्चेति नाभौ तिलकन्यास एव च ।। १० ।।
कुर्वतां पश्यतां सद्यः सर्वकामवरप्रदः ।
ब्रह्माणीं ब्रह्मरूपां तां तद्वन्माहेश्वरीमपि ।। ११ ।।
कौमारीं वैष्णवीं चैव वाराहीं च नृपोत्तम! ।
इन्द्राणीं चापि चामुण्डां महालक्ष्मीमतः परम् ।। १२ ।।
प्रणवाद्यां चतुर्थ्यन्तां नमोऽन्तां चैव देशिकः ।
आकाराद्यैः स्वरैर्युक्तां दीर्घैस्तैश्च परन्तप! ।। १३ ।।
भाले सव्यांशके सव्ये पार्श्वेऽपि जठरे नृप! ।
दक्षपार्श्वे च दक्षांशे गले हृदि क्रमाच्च ताः ।। १४ ।।
न्यसेन्मत्री मूलश्रेष्ठमूलेन व्यापकत्रयम् ।
मूर्त्तिपञ्जरकं न्यासं पूर्ववत्प्रचरेत्कृती ।। १५ ।।
इयं साक्षाद्ब्रह्मरूपा सुभद्रा भुवनेश्वरी ।
मूर्त्तिपञ्जरकं न्यासमस्यां कुर्य्यान्नृपोत्तम! ।। १६ ।।
एतस्यामेव कर्त्तव्यस्तन्न्यासो ब्रह्मसत्तमैः ।
अन्यासु शक्तिषु श्रीमन् ! नो कार्य्यो न्यास एष च ।। १७ ।।
ततः षडङ्गविन्यासं कुर्य्यान्मन्त्री विचक्षणः ।
ध्यायेच्च भक्तिभावेन देवीं तां भुवनेश्वरीम् ।। १८ ।।
सिन्दूरारुणसुन्दराङ्गरुचिरां पाशाङ्कुशेष्वाभय-
भ्राजद्धस्तसरोरुहां त्रिनयनां दिव्याङ्गभूषोज्ज्वलाम् ।
पीनोत्तुङ्गकुचां लसत्सुवसनां विम्बाधरान्तस्मितां
वन्दे श्रीभूवनेश्वरीं त्रिजगदानन्दप्रदां सर्वदा ।। १९ ।।

ध्यानानन्तरतो राजन्निजमुद्रां प्रदर्शयेत् ।
योनिमुद्रां ततो लिङ्गमुद्रां चैव ततः परम् ।। २० ।।
व्यापिनां छत्रकं चैव गदां घण्टां तथैव च ।
दण्डं चाखेटकं चक्रं शूलं चापि शरं तथा ।। २१ ।।
धनुः पाशं चाङ्कुशं च त्वभीतिं वरमेव च ।
दर्शयेद्देवताग्रेऽपि मुद्रां षोडशसत्तम ।। २२ ।।
एतासां लक्षणं वक्ष्ये शृण्वतां पापमोचकम् ।
अन्योऽन्यानामिके धृत्वा तर्जनीभ्यां स देशिकः ।। २३ ।।
मध्योद्गते मध्यमे च तत्र लग्ने कनिष्ठिके ।
त्रिपर्वोपरि संलग्नमङ्गुष्ठयुगलं चरेत् ।। २४ ।।
अनेन योनिमुद्रा स्याद्देव्याः सान्निध्यदायिनी ।
प्रसारिते वामपाणौ त्वङ्गुष्ठां दक्षमुष्टितः ।। २५ ।।
धृत्वा दक्षकराङ्गुष्ठं चरेदूर्ध्वमुखं द्विजः ।
एतेन लिङ्गमुद्रा स्यात्सर्वं तत्र प्रतिष्ठिता ।। २६ ।।
अन्योऽन्याङ्गुष्ठसंयोगे सर्वाङ्गुल्यः प्रसारिताः ।
परितो भ्रमणादेव मुद्रा स्याद्व्यापिनी मता ।। २७ ।।
दक्षमुष्ट्याश्च तर्जन्याश्चोर्ध्वाग्रे सव्यहस्तकम् ।
अधोमुखोत्पलाकारं दद्याच्चेच्छत्रकं स्मृतम् ।। २८ ।।
अन्योऽन्याङ्गुलिसम्बन्धे हस्तयुग्मे पुनस्ततः ।
मध्यमे चोन्नते लग्ने कुर्य्याद्यदि गदा मता ।। २९ ।।
संकोचितेऽङ्गुलेर्दक्षहस्तस्य चोन्मुखे पुनः ।
तदग्रे वा वामकरमधोमुखतया न्यसेत् ।। ३० ।।
अनेन घण्टामुद्रा स्यात्पूजाविघ्नविनाशिनी ।
कफोणितो दक्षहस्ते चोन्नते मुष्टितं पुनः ।। ३१ ।।

तर्ज्जन्यामूर्ध्ववक्त्रायां दण्डमुद्रेति सा स्मृता ।
वाममुष्ट्यां कनिष्ठान्ते दक्षाङ्गुष्ठां च योजयेत् ।। ३२ ।।
तर्ज्जन्या दक्षया तत्र ताडनं चेत् त्रिवारतः ।
एषा खेटकमुद्रा च रक्षोभूतादि भीतिदा ।। ३३ ।।
प्रसारितौ करौ कृत्वा वामाङ्गुष्ठोपरि न्यसेत् ।
दक्षां कनिष्ठां तद्वच्च त्वङ्गुष्ठान्तकनिष्ठके ।। ३४ ।।
अनेन चक्रमुद्रा स्याद्दुष्टत्रासप्रदा सदा ।
सव्यमुष्ट्यां स्थिते दक्षे दक्षाङ्गुष्ठकनिष्ठयोः ।। ३५ ।।
योगात्संकोचने जाते त्वन्यास्तिस्रस्तथोर्ध्वगाः ।
शूलिमुद्रा समाख्याता शूलिन्याः प्रीतिवर्द्धिनी ।। ३६ ।।
वाममुष्ट्युत्थितायां च तर्ज्जन्यां तर्जनीं पुनः ।
दक्षां नियोज्य कर्णान्तमानयेद्देशिकोत्तमः ।। ३७ ।।
शरमुद्रा समाख्याता पूजाविघ्नविनाशिका ।
तर्ज्जन्याङ्गुष्ठयोर्योगान्मण्डलं सव्यहस्तके ।। ३८ ।।
अन्याः प्रसार्य्य तद्वच्च दक्षहस्तं नियुज्य च ।
आकर्षयेद्दक्षकर्ण्णं दक्षहस्तं तु तादृशम् ।। ३९ ।।
धेनुमुद्रेति विख्याता दुष्टसत्वविघातिनी ।
दक्षमुष्ट्युत्थतर्जन्याश्चाग्रे वामकरं पुनः ।। ४० ।।
तर्जन्यङ्गुष्ठसंयोगं प्रसृतान्यङ्गुलित्रयम् ।
एवं चेन्निक्षिपेत्तावत्पाशमुद्रा शुभप्रदा ।। ४१ ।।
आकफोण्युद्गते दक्षे हस्ते संकोचिताङ्गुलौ ।
किञ्चिदाकुञ्चिताग्रायां तर्ज्जन्यां यदि सत्तमः ।। ४२ ।।
अङ्कुशाख्यापि सा मुद्रा रिपुवारनिवारिणी ।
दक्षजानुस्थिते दक्षे पाणौ चैव प्रसारिते ।। ४३ ।।

तत्ताडने जायमाने वरमुद्रा प्रकीर्त्तिता ।
स्कन्धपर्य्यन्तमुत्क्षिप्य प्रसूतोर्ध्वगताङ्गुलौ ।। ४४ ।।
सव्यहस्तं तु तत्कुर्य्यान्मुद्रा सा त्वभया मता ।
एताः षोडशमुद्राश्च कुर्वतां सर्वकामदाः ।। ४५ ।।
देवताया महत्प्रीतिप्रदाः सुदर्शयेच्च ताः ।
ये न कुर्वन्ति मुद्रास्ता ये न जानन्ति वा पुनः ।। ४६ ।।
तैः कृतं पूजनं तच्च निष्फलं नृपसत्तम! ।
आत्मनो भुवनेश्वर्य्यास्त्वैकां सञ्चिन्तयेत्ततः ।। ४७ ।।
योनिमुद्रां च हृद्देशे कृत्वा मूलमनुं पुनः ।
दशधा प्रजपेन्मन्त्री भावयन्भुवनेश्वरीम् ।। ४८ ।।
तज्जपान्ते मानसैस्तैरुपचारैश्च देवताम् ।
संपूज्याथाप्यहं त्वादीन् होमयेन्मनसार्च्चकः ।। ४९ ।।
अर्घसंस्कारकर्मादिं सर्वं तत्तिलकान्तकम् ।
पूर्ववद्देशिकः कुर्य्यात्पूजाकर्मविचक्षणः ।। ५० ।।
भुवनेश्वर्य्यै चेति पदं विद्महे च ततो वदेत् ।
महालक्ष्मै धीमहीति तन्नो देवी प्रचोदयात् ।। ५१ ।।
इत्येषां भुवनेश्वर्य्या गायत्रीजपतां सताम् ।
सर्वसिद्धिकरी ख्याता शेषे मोक्षप्रदायिनी ।। ५२ ।।
शतमष्टोत्तरं प्राज्ञः प्रजपेद्देशिकोत्तमः ।
सहस्रं वा तदर्द्धं वा त्रिशतं वा जपेत्पुनः ।। ५३ ।।
मूलं मनुं तदा भक्त्या देवीप्रीणनहेतवे ।
अन्यत्सर्वं कर्म यच्च पूर्ववत्तच्चरेद्बुधः ।। ५४ ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकोननवतितमोऽध्यायः ।।

नवतितमोऽध्यायः

ब्रह्मोवाच

पीठेऽस्मिन्नवशक्तीनां पूजां शृणु महीपते! ।
यत्पूजामन्तरेणैव सा देवी न प्रसीदति ।। १ ।।
प्रभा माया जया तावत्सूक्ष्मा च विजयान्विता ।
नित्या विलासिनी दोग्धी घोरा च मङ्गला नव ।। २ ।।
तप्तस्वर्ण्णकलेवराः सुरुचिरा दिव्याम्बरा भासुरा
पद्मा भीतिधराः पृथश्च तरसा दक्षोरुहाः सुन्दराः ।
नानालङ्कृतिमञ्जुलास्त्रिजगतां रक्षोविधानोद्यता
भक्तानां सकलार्थदाननिरताः ख्याताः प्रभाद्या नव ।। ३ ।।
ॐकारं प्रथमं चोक्त्वा वज्रशब्दमतः परम् ।
नखदंष्ट्रायुधपदं चतुर्थ्यन्तं समस्य च ।। ४ ।।
महासिंहाय च ततो हूं फडित्येव हृन्मनुम् ।
सिंहमन्त्रोऽयमाख्यातो देव्याः प्रीतिकरो महान् ।। ५ ।।
कुर्य्यादावाहनादिं च देवाङ्गे मातृकां न्यसेत् ।
कलान्यासं ततः कुर्य्यात्तत्त्वन्यासं तथैव च ।। ६ ।।
पीठन्यासं ततः कृत्वा मनोर्ऋष्यादिमेव च ।
हृल्लेखादिन्यासमथो ब्रह्मण्यादिं न्यसेत्पुनः ।। ७ ।।
एतत्सर्वं देवताङ्गे न्यसेद्देशिकसत्तमः ।
आसनादिं च पुष्पान्तं पूर्ववत्प्रचरेद्बुधः ।। ८ ।।
षट्कोणं कल्पनां कृत्वा वृत्तं तत्र प्रकल्पयेत् ।
चतुरस्रं चतुर्द्वारं देवताग्रे प्रकल्पयेत् ।। ९ ।।
षट्कोणेषु षडङ्गानि तुलसीदलतोऽर्च्चयेत् ।
मन्त्रस्य लिपयः सर्वा गौराङ्ग्यश्चारुभूषणाः ।। १० ।।

वराभयधराः स्वान्ता त्वर्च्चनीयाश्च देवताः ।
गगनं पूजयेद्धीमान् पूर्वस्यां दिशि सत्तमः ।। ११ ।।
रक्तां तथा दक्षिणस्यां पश्चिमेऽपि करालिकाम् ।
महासूक्ष्मां चोत्तरेऽपि हृल्लेखां मध्यतोऽर्च्चयेत् ।। १२ ।।
एताः पञ्चमहारम्या शरच्चन्द्रनिभाननाः ।
पाशाङ्कुशाभयवरान् दधानाः करपङ्कजैः ।। १३ ।।
यजेत्तत्र देशिकेन्द्रो जलगन्धाक्षतादिभिः ।
गायत्रीं च यजेत्पूर्वे सावित्रीमग्नीकोणके ।। १४ ।।
सरस्वतीं दक्षिणेऽपि ब्रह्माणीं नैर्ऋतेऽपि च ।
विष्णुं यजेत्पश्चिमेऽपि वायव्ये शिवमेव च ।। १५ ।।
यजेच्छंखनिधिं श्रीमन्कौवेरे पद्ममेव च ।
ऐशान्येऽपि क्रमादेवं संपूज्य मध्यभागके ।। १६ ।।
ॐ ह्रीं नम इति तदा यजेन्मध्येऽपि देशिकः ।
एता धनुर्बाणधराः सर्वालङ्कारभूषिताः ।। १७ ।।
ब्रह्मविष्णुमहेशाश्च स्वस्वायुधसमन्विताः ।
इत्थं विचिन्त्य मतिमान् गन्धपुष्पाक्षतादिभिः ।। १८ ।।
मनसा पूजयेत्तत्र षट्कोणाख्यकमण्डले ।
अनङ्गकुसुमा चाथ त्वनङ्गकुसुमान्तरा ।। १९ ।।
तथा भुवनपालाख्या ततो गगनवेणिका ।
शशिरेखा ततो भूप गगनरेखा करालिका ।। २० ।।
विकराली ततश्चोमा तथा चैव सरस्वती ।
श्रीदेवी च ततो दुर्गा जया लक्ष्मी स्मृतिर्धृतिः ।। २१ ।।
मेधा मतिस्तथा कान्तिर्वृत्ताकारतया स्थिताः ।
पद्मद्वयधराः सर्वाः सर्वाभरणाभूषिताः ।। २२ ।।

पीनोत्तुङ्गकुचाः सर्वा निजयौवनगर्विताः ।
प्रणवाद्याश्चतुर्थ्यन्ता नमोऽन्ताः स्वस्वकामतः ।। २३ ।।
पूजयेत्परया भक्त्या गन्धपुष्पाक्षतादिभिः ।
अष्टदिक्षु यजेन्मन्त्री ब्रह्माण्याद्याः परंतप ।। २४ ।।
ब्रह्माणीं पूर्वदिग्भागे वह्नेः माहेश्वरीं दिशि ।
कौमारीं दक्षिणे देशे वैष्णवीं नैर्ऋतिस्थले ।। २५ ।।
वाराहीं चैव पाश्चात्यामिन्द्राणीं च मरुद्दिशि ।
चामुण्डां चोत्तरे देशे लक्ष्मीमीशानकोणके ।। २६ ।।
क्रमादेता देवतास्ताः पूजयेद्देशिकोत्तमः ।
स्वस्ववल्लभरूपाढ्या स्वानुरूपायुधान्विताः ।। २७ ।।
नानाभूषणसंपन्नाश्चारुवेशा मनोरमाः ।
एवं विचिन्त्य मतिमान् गन्धपुष्पादिभिर्यजेत् ।। २८ ।।
एतासां परितो बाह्ये वासवादीन्यजेत्पुनः ।
तद्बाह्येऽपि च वज्रादीन्देवरूपान् विचिन्तयेत् ।। २९ ।।
संपूजयेत्तत्र तत्र जलगन्धाक्षतादिभिः ।
तुलसीदलतः कार्य्यं सर्वेषामर्च्चनं बुधैः ।। ३० ।।
पूर्ववत्सर्वमेवं हि कुर्य्यादाचार्य्यसत्तमः ।
समर्पयेत्ततो मन्त्री देवीं च भुवनेश्वरीम् ।। ३१ ।।
समर्प्य विधिवत्सर्वं स्तुतिं कुर्य्यादनुत्तमाम् ।
नमो देव्यै महादेव्यै वैष्णव्यै च नमो नमः ।। ३२ ।।
ब्रह्माण्यै ब्रह्मरूपायै शिवायै सततं नमः ।
रुद्राण्यै रुद्ररूपायै कालरात्र्यै नमो नमः ।। ३३ ।।
वैष्णव्यै विष्णुरूपायै महालक्ष्म्यै नमो नमः ।
स्त्रीरूपिण्यै नमस्तेऽस्तु सुभद्रे ! त्वां नमाम्यहम् ।। ३४ ।।

साक्षाद्ब्रह्मस्वरूपां त्वां जगदम्ब ! नमोऽस्तु ते ।
जगत्कारणकारिण्यै कर्मकारणसाधिके ! ।। ३५ ।।
त्वां नमामि महादेवि ! भद्रे देवि ! नमोऽस्तु ते ।
एतां स्तुतिं नृपश्रेष्ठ ! ये पठन्ति नरोत्तमाः ।। ३६ ।।
पूजान्ते सफलं तेषां जीवितं च सुजीवितम् ।
स्तवतां शृण्वतां वापि तथा श्रावयतामिह ।। ३७ ।।
सर्वसम्पत्फलं भुक्त्वा पुत्रपौत्रसमन्वितः ।
शेषे वैकुण्ठमाप्नोति स्तवस्यास्य प्रसादतः ।। ३८ ।।
बलस्य जगदीशस्य सुभद्रायाश्च भूपते! ।
निर्माल्यं ये च कुर्वन्ति खादन्ति च मुहुर्मुहुः ।। ३९ ।।
जगन्नाथस्य नैवेद्यं बलभद्रान्वितस्य च ।
उच्छिष्टं भुञ्जतां लोके भूयो जन्म न विद्यते ।। ४० ।।

सूत उवाच

यदन्नं पाचितं लक्ष्म्या भुक्तं श्रीपतिना परम् ।
नीलाद्रौ चैव तच्चान्नं पावनं पापमोचनम् ।। ४१ ।।
तच्च चण्डालसंस्पृष्टं भोजनीयं द्विजैरपि ।
शङ्का नैवात्र कर्त्तव्या ब्रह्महत्यादिनाशने ।। ४२ ।।
महाप्रसादेषु देवेषु नीलाद्रिनिलयेषु च ।
वैष्णवेषु द्विजेष्वेव वेदेषु पुण्यकर्मसु ।। ४३ ।।
इन्द्रद्युम्नमहीभृतपरिलसत्कीर्त्तेर्मुरारिस्फुरद्-
भक्त्या विष्णुपरस्य तस्य पुरतश्चोक्तो विधिर्ब्रह्मणा ।
तैनेवात्र महोदयेन विधिना नीलाचले मञ्जुले
विष्णुं ये परिपूजयन्ति सुखिनो भूत्वा लभन्तेऽच्युतम् ।। ४४ ।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये ब्रह्मेन्द्रद्युम्नसंवादे बलभद्राच्युतबृहद्विधिपूजासमापनं नवतितमोऽध्यायः ।।

एकनवतितमोऽध्यायः

ब्रह्मोवाच

श्रीविष्णोर्यच्च नैवेद्यं दृष्ट्वा पापात् प्रमुच्यते ।
येऽपि खादन्ति पश्यन्ति स्पृशन्ति वापिजानतः ।। १ ।।
मुच्यन्ते ते पितृदिने द्विजेभ्यो यदि दापयेत् ।
नरकस्थाश्च पितरो मुच्यन्ते तत्क्षणान्नृप ।। २ ।।
यदि श्राद्धं प्रकुर्वीत गयाश्राद्धशतं समम् ।
एकवारं पुण्यतमं बहुवारमनन्तकम् ।। ३ ।।
यस्मिंश्च नियमो नास्ति प्राप्तमात्रेण भक्षयेत् ।
स्पर्शास्पर्शस्य यद्दोषं न गृह्णात्यत्र हे नृप! ।। ४ ।।
म्लेच्छादिभिः स्पर्श्यमानं गङ्गातोयं यथैव तत् ।
पुनः शृणु नृपवर! कथयामि तवाग्रतः ।। ५ ।।
महोत्पातो यदि भवेत् पाकशालागृहे नृप! ।
द्रुतं निर्माणकं कुर्य्यान्मन्त्रराजेन मन्त्रवित् ।। ६ ।।
होमयेत्तु चाष्टशतं गोमयोदकमाक्षिपेत् ।
सुधारसं तत्र क्षिप्त्वा भोगस्य पाकमाचरेत् ।। ७ ।।
अन्नाद्यभावे लाजादिविकारैर्भोगमाचरेत् ।
तत्र स्थले रन्धनं स्यादभावे कुत्रचिन्नहि ।। ८ ।।
कृष्णवर्णानि पात्राणि वर्जयित्वान्यभाण्डके ।
न कुर्य्यान्नृपतिश्रेष्ठ कूपस्य विषयं शृणु ।। ९ ।।
यदि तत्र महोत्पातो भवेच्च सैकतैरपि ।
पूरयित्वापि वृक्षादिं कृत्वा गामपि भक्षयेत् ।। १० ।।
मृदं निःशेषकां कृत्वा नवीनजलमुद्धरेत् ।
आनुष्टुभेन मन्त्रेण होमयेद्वा सहस्रकम् ।। ११ ।।

पञ्चामृतं पञ्चगव्यं मन्त्रराजेन वा क्षिपेत् ।
स्यन्दने वा वसेत् कङ्कगृध्रादिः शान्तिमाचरेत् ।। १२ ।।
देवतापतनं वापि तदा शान्तिकमाचरेत् ।
स्यन्दनाङ्गादिभग्नः स्यात्तदा शान्तिं समाचरेत् ।। १३ ।।
प्रसादं प्रविशेयुर्वा यवनकुक्कुरादयः ।
तदा शान्तिं प्रकुर्वीत त्वन्यच्छृणु नृपोत्तम! ।। १४ ।।
त्वत्प्रासादे योऽपि मर्त्त्यः कीर्त्तिं वा कारयिष्यति ।
त्वत्प्रतिष्ठा तत्प्रतिष्ठा भवति नृपसत्तम! ।। १५ ।।
त्वत्कीर्त्त्यां येऽपि कीर्त्तिं वै कुर्वन्ति नृपसत्तम! ।
गता चैतत्प्रतिष्ठायां कृत्वा चेद्दुष्कृती भवेत् ।। १६ ।।
यदा प्रभुः सत्यसत्यमित्युक्त्वा च त्रिवारतः ।
इत्यादिवाक्यतो देव! तदाज्ञां परिपालय ।। १७ ।।
यदि कालान्तरे कीर्त्तिं कुर्वन्ति येऽपि हे नृप! ।
आनुष्टुभेन मन्त्रेण पञ्चगव्यादिकं क्षिपेत् ।। १८ ।।
एतद्बुध्वा नृपश्रेष्ठ! विभोर्नीतिं समाचर ।
अन्यद् यद्विषयं राजन्! तवाग्रे कथयाम्यहम् ।। १९ ।।
विष्णोर्नवाम्बुदतनोर्जगदीशितुश्च
नीलाद्रिनाथचरितं कथितं तवाग्रे ।
शृण्वन्ति येऽपि हि सदा खलु पुण्यभाज-
स्तेऽपि भवन्ति नितरां वसुपुत्रयुक्ताः ।। २० ।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकनवतितमोऽध्यायः ।।

Prof. Harekrishna Satapathy

Prof. Harekrishna Satapathy, Son of Late Pandit Krishnachandra Satapathy is one of the renowned scholars and senior authority in the fields of Sahitya, Purana, Philosophy and Law. He hails from a most respectable family at Bhitarbamphu Village in Kendrapada District of Orissa.

Prof. Satapathy Served as Professor, Chairman of P.G. Council and VICE-CHANCELLOR of Sri Jagannatha Sanskrit University, Puri. Having acquired a fine and accurate grasp of the sastric texts, Prof. Stapathy authored and published 30 books and 35 research papers in national and international journals. He also specialises in Sanskrit Literature, Modern Sanskrit, Jagannatha Cult etc. He is an able exponent of Alankara Sastra and guided more than 20 research scholars successfully for their doctoral and post doctoral degrees.

Prof. Satapathy had a bent for scholastic life ever since his childhood and got the distinction of winning Utkala Ranjan Gold Medal, Rani Suratarangini Gold Medal, Bijaya Ranjan Gold Medal and University Gold Medal for securing highest position in both LL.B and LL.M,

He obtained Acharya in Sahitya from Rashtriya Sanskrit Sansthan, New Delhi, Acharya in Purana Itihasa, M.A. (Sanskrit) from Utkala University, L.L.B. & L.L.M. from Utkala University through Madhusudana Law College, Cuttack, Orissa, in all the exams secured first position, obtained Ph.D.(Vidyavaridhi) degree from Rashtriya Sanskrit Sansthan, New Delhi, won twelve Gold Medals for securing top position in various exams and National Level competitions both in Sanskrit & Law.

He is associated with many other cultural and academic bodies in various positions like an executive member of All India Oriental Conference, Honorary Chairman of Maharsi Vyasadeva National Research Institute of Oriental Language & Culture etc. He is also a member of executive council of Lalbahadur Shastri Rashtriya Sanskrit Vidyapeetha, New Delhi, Rashtriya Sanskrit Sansthan, New Delhi, Chief Editor (Hony.) of Amrita Bhasa (A monthly Sanskrit Magazine), Patron of Orissa Chair, R.S.Vidyapeetha, Tirupati. Recognizing his scholarship, Govt. of Orissa awarded him Orissa Sahitya Akademi Award and Delhi Govt. honoured him with Delhi Sanskrit Sahitya Akademi Award. Prof.Satapathy, actively engaged in promotion, propgation and research in Jagannatha Culture; has been participating in various programmes on Jagannatha Cult including live telecast programmes of world famous car festival (Ratha Yatra) as a commentator.

Prof. Satapathy is a great scholar, great writer, great thinker, great visionary and above all a great administrator. At present he is the **VICE-CHANCELLOR** of **Rashtriya Sanskrit Vidyapeetha (Deemed University) Tirupati.**